# MAHABHARATAM

## DRONA PARVA

TEXT

PUBLISHED AND DISTRIBUTED GRATIS

BY

PRATAP CHANDRA ROY, C. I. E.

# श्रीमहाभारतम्।

श्रीमन्महर्षिवेदव्यासविरचितम्।

द्रोणपर्व्वं।

सि, आइ, इ, उपाधिधारिणा

रायश्रीप्रतापचन्द्रेण

प्रकाशितम्

मूल्यं विना वितीर्णञ्च।

“हस्तपादादिसम्पन्ना यूयं किमवसीदथ’

68.761

LIBRARY
AUG 5 1897
U.S. BUREAU of EDUCATION

तृतीयसंस्करणम्।

कलिकाता बीडन् ष्ट्रीटान्तर्गत

१ नं राजा गुरुदास ष्ट्रीट् भारतयन्त्रे

श्रीकालिदास सेनेन मुद्रितम्।

शकाब्दाः १८११।

Sak. 1811 = A.D. 1889

PK 3631
.A2
1887
Vol. 4
Orien
Sans

BY TRANSFER
1908

9.3.M.1100.48

# श्रीमहाभारतम्।

## द्रोणपर्व्व ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

जनमेजय उवाच । तमप्रतिमसत्त्वौजोबलवीर्य्यपराक्रमम् । हतं देवव्रतं श्रुत्वा पाञ्चाल्येन शिखण्डिना ॥ १ ॥ धृतराष्ट्रस्तदा राजा वाष्पव्याकुललोचनः । किमचेष्टत विप्रर्षे हते पितरि वीर्य्यवान् ॥ २ ॥ तस्य पुत्रो हि भगवन् भीष्मद्रोणमुखैरथैः । पराजित्य महेष्वासान् पाण्डवान् राज्यमिच्छति ॥ ३ ॥ तस्मिन् हते स भगवन् केतौ सर्व्वधनुष्मताम् । यदचेष्टत कौरव्यस्तन्मे ब्रूहि तपोधन ॥ ४ ॥

वैशम्पायन उवाच । निहतं पितरं श्रुत्वा धृतराष्ट्रो जनाधिपः । लेभे न शान्तिं कौरव्यश्चिन्ताशोकपरायणः ॥ ५ ॥ तस्य चिन्तयतो दुःखमनिशं कौरवस्य तत् । आजगाम विशुद्धात्मा पुनर्गावल्गणिस्तदा ॥ ६ ॥ शिविरात् सञ्जयं प्राप्तं निशि नागाह्वयं पुरम् । आम्बिकेयो महाराज धृतराष्ट्रोऽन्वपृच्छत ॥ ७॥ श्रुत्वा भीष्मस्य निधनमप्रहृष्टमना भृशम् । पुत्राणां जयमाकाङ्क्षन् विललापातुरो यथा ॥ ८ ॥

PK 3631
.A2
1887
Vol. 4
Orien
Sans

BY TRANSFER
[illegible] 8 1908

9.3.M.1108.48

# श्रीमहाभारतम् ।

द्रोणपर्व्व ।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥

जनमेजय उवाच । तमप्रतिमसत्त्वौजोबलवीर्य्यपराक्रमम् । हतं देवव्रतं श्रुत्वा पाञ्चाल्येन शिखण्डिना ॥ १ ॥ धृतराष्ट्रस्तदा राजा वाष्पव्याकुललोचनः । किमचेष्टत विप्रर्षे हते पितरि वीर्य्यवान् ॥ २ ॥ तस्य पुत्रो हि भगवन् भीष्मद्रोणमुखैरथैः । पराजित्य महेष्वासान् पाण्डवान् राज्यमिच्छति ॥ ३ ॥ तस्मिन् हते स भगवन् केतौ सर्व्वधनुष्मताम् । यदचेष्टत कौरव्यस्तन्मे ब्रूहि तपोधन ॥ ४ ॥

वैशम्पायन उवाच । निहतं पितरं श्रुत्वा धृतराष्ट्रो जनाधिपः । लेभे न शान्तिं कौरव्यश्चिन्ताशोकपरायणः ॥ ५ ॥ तस्य चिन्तयतो दुःखमनिशं कौरवस्य तत् । आजगाम विशुद्धात्मा पुनर्गावल्गणिस्तदा ॥ ६ ॥ शिविरात् सञ्जयं प्राप्तं निशि नागाह्वयं पुरम् । आम्बिकेयो महाराज धृतराष्ट्रोऽन्वपृच्छत ॥७॥ श्रुत्वा भीष्मस्य निधनमप्रहृष्टमना भृशम् । पुत्राणां जयमाकाङ्क्षन् विललापातुरो यथा ॥ ८ ॥

धृतराष्ट्र उवाच। संशोच्य तु महात्मानं भीष्मं भीमपराक्रमम्। किमकार्षुः परं तात कुरवः कालचोदिताः॥ ९॥ तस्मिंस्तु निहते शूरे दुराधर्षे महात्मनि। किन्नुस्वित् कुरवोऽकार्षुर्निमग्ना शोकसागरे॥ १०॥ तदुदीर्णं परं सैन्यं त्रैलोक्यस्यापि सञ्जय। भयमुत्पादयेत्तीव्रं पाण्डवानां महात्मनाम्॥११॥ देवव्रते तु निहते कुरूणामृषभे तदा। यदकार्षुर्नृपतयस्तन्ममाचक्ष्व सञ्जय॥ १२॥

सञ्जय उवाच। शृणु राजन्नेकमना वचनं ब्रुवतो मम। यत्ते पुत्रास्तदाकार्षुर्हते देवव्रते मृधे॥ १३॥ निहते तु तदा भीष्मे राजन् सत्यपराक्रमे। तावकाः पाण्डवेयाश्च प्राध्यायन्त पृथक् पृथक्॥ १४॥ विस्मिताश्च प्रहृष्टाश्च क्षत्रधर्मं विशाम्पते। स्वधर्मं पद्यमानास्ते प्रणिपत्य महात्मने॥ १५॥ शयनं कल्पयामासुर्भीष्मायामिततेजसे। सोपधानं नरव्याघ्राः शरैः सन्नतपर्वभिः॥ १६॥ विधाय रक्षां भीष्माय समाभाष्य परस्परम्। अनुमान्य च गाङ्गेयं कृत्वा चापि प्रदक्षिणम्॥ १७॥ क्रोधसंरक्तनयनाः समवेक्ष्य परस्परम्। पुनर्युद्धाय निर्जग्मुः क्षत्रियाः कालचोदिताः॥ १८॥ ततस्तूर्य्यनिनादैश्च भेरीणां निनदेन च। तावकानामनीकानि परेषाञ्चैव निर्ययुः॥ १९॥ व्यावृत्तेऽहनि राजेन्द्र पतिते जाह्नवीसुते। अमर्षवशमापन्नाः कालोपहतचेतसः॥ २०॥ अनादृत्य वचः पथ्यं गाङ्गेयस्य महात्मनः। निर्ययुर्भरतश्रेष्ठाः शस्त्राण्यादाय सत्वराः॥ २१॥ मोहात्तव सपुत्रस्य वधाच्छान्तनवस्य च। कौरवा मृत्युमाहूताः सहिताः सर्वराजभिः॥ २२॥ अजावय इवागोपा वने श्वापदसङ्कुले। भृशमुद्विग्नमनसो हीना देवव्रतेन ते॥ २३॥ पतिते भरतश्रेष्ठे बभूव कुरुवाहिनी। द्यौरिवापेतनक्षत्रा हीनं खमिव वायुना॥ २४॥ विपन्नशस्येव मही वाक्चैवासंस्कृता यथा। आसुरीव

यथा सेना निगृहीते पुरा बलौ ॥ २५ ॥ विधवेव वरारोहा शुष्कतोयेव निम्नगा । वृकैरिव वने रुद्धा पृषती हतयूथपा ॥२६॥ शरभाहतसिंहेव महती गिरिकन्दरा । भारती भरतश्रेष्ठ पतिते जाह्नवीसुते ॥ २७ ॥ विष्वग्वातहता रुग्णा नौरिवासीन्महार्णवे । बलिभिः पाण्डवैर्वीरैर्लब्धलक्ष्यैर्भृशार्द्दिता ॥ २८ ॥ सा तदासीद्भृशं सेना व्याकुलाश्वरथद्विपा । विपन्नभूयिष्ठतरा कृपणा त्रस्तमानसा ॥ २९ ॥ तस्यां त्रस्ता नृपतयः सैनिकाश्च पृथग्विधाः । पाताल इव मज्जन्तो हीना देवव्रतेन ते ॥ ३० ॥ कर्णं हि कुरवोऽस्मार्षुः स हि देवव्रतोपमः । सर्वशस्त्रभृतां श्रेष्ठं रोचमानमिवातिथिम् ॥ ३१ ॥ बन्धुमापन्नतस्येव तमेवोपागमन्मनः । चुक्रुशुः कर्णकर्णेति तत्र भारत पार्थिवाः ॥ ३२ ॥ राधेयं हितमस्माकं सूतपुत्रं तनुत्यजम् । स हि नायुध्यत तदा दशाहानि महायशाः ॥ ३३ ॥ सामात्यबन्धुः कर्णो वै तमाह्वयत माचिरम् । भीष्मेण हि महाबाहुः सर्वक्षत्रस्य पश्यतः ॥ ३४ ॥ रथेषु गण्यमानेषु बलविक्रमशालिषु । सङ्ख्यातोऽर्द्धरथः कर्णो द्विगुणः सन्नरर्षभः ॥ ३५ ॥ रथातिरथसङ्ख्यायां योऽग्रणीः शूरसम्मतः । पितृवित्ताम्बुदेवेशानपि यो योद्धुमुत्सहेत् ॥ ३६ ॥ स तु तेनैव कोपेन राजन् गाङ्गेयमुक्तवान् । त्वयि जीवति कौरव्य नाहं योत्स्ये कदाचन ॥ ३७ ॥ त्वया तु पाण्डवेयेषु निहतेषु महामृधे । दुर्य्योधनमनुज्ञाप्य वनं यास्यामि कौरव ॥ ३८ ॥ पाण्डवैर्वा हते भीष्मे त्वयि स्वर्गमुपेयुषि । हन्तास्म्येकरथेनैव कृत्स्नान् यान्मन्यसे रथान् ॥ ३९ ॥ एवमुक्त्वा महाबाहुर्द्दशाहानि महायशाः । नायुध्यत ततः कर्णः पुत्रस्य तव सम्मते ॥ ४० ॥ भीष्मः समरविक्रान्तः पाण्डवेयस्य भारत । जघान समरे योधानसङ्ख्येयपराक्रमः ॥ ४१ ॥ तस्मिंस्तु निहते शूरे सत्यसन्धे महौजसि । त्वत्सुताः कर्णमस्मार्षुस्तर्त्तुकामा इव प्लवम् ॥ ४२ ॥

तावकास्तव पुत्राश्च सहिताः सर्वराजभिः। हा कर्ण इति चाक्रन्दन् कालोऽयमिति चाब्रुवन्॥ ४३॥ जामदग्न्यराभ्यनुज्ञातमस्त्रे दुर्वारपौरुषम्। अगमन् वो मनः कर्णं बन्धुमात्ययिकेष्विव॥ ४४॥ स हि शक्तो रणे राजन् त्रातुमस्मान् महाभयात्। त्रिदशानिव गोविन्दः सततं सुमहाभयात्॥ ४५॥

वैशम्पायन उवाच। तथा तु सञ्जयं कर्णं कीर्त्तयन्तं पुनः पुनः। आशीविषवदुच्छ्वस्य धृतराष्ट्रोऽब्रवीद्वचः॥ ४६॥

धृतराष्ट्र उवाच। यत्तु वैकर्त्तनं कर्णमगमद्वो मनस्तदा। अथापश्यन्त राधेयं सूतपुत्रं तनुत्यजम्॥ ४७॥ अपि तन्न मृषा कर्णो युधि सत्यपराक्रमः। सम्भ्रातॄणां तदार्त्तानां त्रस्तानां त्राणमिच्छताम्॥ ४८॥ अपि तत् पूरयाञ्चक्रे धनुर्द्धरवरो युधि। यत्तद्विनिहते भीष्मे कौरवाणामुपाश्रये॥ ४९॥ तत्खण्डं पूरयन् कर्णः परेषामादधद्भयम्। कृतवान् मम पुत्राणां जयाशां सफलामपि॥ ५०॥

इति द्रोणपर्वणि द्रोणाभिषेकपर्वणि धृतराष्ट्रप्रश्ने प्रथमोऽध्यायः॥ १॥

---

सञ्जय उवाच। हतं भीष्ममथाधिरथिर्विदित्वा भिन्नां नावमिवात्यगाधे कुरूणाम्। सोदर्य्यवद्व्यसनात् सूतपुत्रः सन्तारयिष्यंस्तव पुत्रसेनाम्॥ १॥ श्रुत्वा तु कर्णः पुरुषेन्द्रमच्युतं निपातितं शान्तनवं महारथम्। अथोपयायात् सहसारिकर्षणो धनुर्द्धराणां प्रवरस्तदा नृप॥ २॥ हते तु भीष्मे रथसत्तमे परैर्निमज्जतीं नावमिवार्णवे कुरून्। पितेव पुत्रांस्त्वरितोऽभ्ययात्ततः सन्तारयिष्यंस्तव पुत्रसेनाम्॥ ३॥

कर्ण उवाच। यस्मिन् धृतिर्बुद्धिपराक्रमौजः सत्यं दमो

वीरगुणाश्च सर्व्वे। अस्त्राणि दिव्यान्यथ सन्नतिर्ह्रीः प्रिया च वागनसूया च भीष्मे ॥ ४ ॥ सदा कृतघ्ने द्विजशत्रुघातके सनातने चन्द्रमसीव लक्ष्म। स चेत् प्रशान्तः परवीरहन्ता मन्ये हतानेव हि सर्व्वयोधान् ॥ ५ ॥ नेह ध्रुवं किञ्चन जातु विद्यते लोके ह्यस्मिन् कर्म्मणो नित्ययोगात्। सूर्य्योदये को हि विमुक्तसंशयो भावं कुर्व्वीताद्य महाव्रते हते ॥ ६ ॥ वसुप्रभावे वसुवीर्य्यसम्भवे गते वसूनेव वसुन्धराधिपे। वसूनि पुत्रांश्च वसुन्धरां तथा कुरूंश्च शोचध्वमिमाञ्च वाहिनीम् ॥ ७ ॥

सञ्जय उवाच। महाप्रभावे वरदे निपातिते लोकेश्वरे शान्तनवे महौजसि। पराजितेषु भरतेषु दुर्म्मनाः कर्णो भृशञ्चाश्वसदश्रु वर्त्तयन् ॥ ८ ॥ इदन्तु राधेयवचो निशम्य ते सुताश्च राजंस्तव सैनिकाश्च ह। परस्परं चुक्रुशुरार्त्तिजं भृशं तदाश्रु नेत्रैर्मुमुचुर्हि शब्दवत् ॥ ९ ॥ प्रवर्त्तमाने तु पुनर्म्महाहवे विनाश्यमानासु चमूषु पार्थिवैः। अथाब्रवीद्धर्षकरं वचस्तदा रथर्षभान् सर्व्वमहारथर्षभः ॥ १० ॥ जगत्यनित्ये सततं प्रधावति सञ्चिन्तयन्नस्थिरमेव लक्षये। भवत्सु तिष्ठत्स्विह पातितो रणे गिरिप्रकाशः कुरुपुङ्गवः कथम् ॥ ११ ॥ निपातिते शान्तनवे महारथे दिवाकरे भूतलमाश्रिते यथा। न पार्थिवाः सोढुमलं धनञ्जयं गिरिप्रवोढारमिवानिलं द्रुमाः ॥ १२ ॥ हतप्रधानं त्विदमार्त्तरूपं परैर्हतोत्साहमनाथमद्य वै। मया कुरूणां परिपाल्यमाहवे बलं यथा तेन महात्मना तथा ॥ १३ ॥ समाहितं चात्मनि भारमीदृशं जगत्तथानित्यमिदञ्च लक्षये। निपातितञ्चाहवशौण्डमाहवे कथं नु कुर्य्यामहमाहवे भयम् ॥ १४ ॥ अहन्तु तान् कुरुवृषभानजिह्मगैः प्रवेशयन् यमसदने रणे चरन्। यशः परं जगति विभाव्य वर्त्तिता परैर्हतो युधि शयिताथ वा पुनः ॥ १५ ॥ युधिष्ठिरो धृतिमतिधर्म्मसत्त्ववान् वृकोदरो गजशततुल्यविक्रमः। तथा-

र्जुनश्चिदम्बरात्मजो युवा न तद्बलं सुजयमिहामरैरपि॥ १६॥
यमौ रणे यत्र यमोपमौ बले ससात्यकिश्चैत्र च देवकीसुतः। न
तद्बलं कापुरुषोऽभ्युपेयिवान् निवर्त्तते मृत्युमुखादिवासुहृत्॥१७॥
तपो ह्युदीर्णं तपसैव बाध्यते बलं बलेनैव तथा मनस्विभिः।
मनश्च मे शत्रुनिवारणे ध्रुवं सुरक्षणे वा बलवद्व्यवस्थितम्॥ १८॥
ध्रुवञ्चैषां बाधमानं प्रभावं गत्वैवाहं तान् प्रजयास्यद्य सूत।
मित्रद्रोहोमर्षणीयो न मेऽयं भग्ने सैन्ये यः समेयात् स मित्रम्
॥ १९॥ कर्त्तास्म्येतत् पुरुषा आत्मकर्म त्यक्त्वा प्राणानतुयास्यामि
भीष्मम्। सर्वान् सङ्ख्ये शत्रुसङ्घान् हनिष्ये हतस्तैर्वा वीरलोकं
गमिष्ये॥ २०॥ सम्प्राक्रुष्टे रुदितस्त्रीकुमारे परिभूते पौरुषे
धार्त्तराष्ट्रे। मया कृत्यमिति जानामि सूत तस्माच्छत्रूनद्य राज्ञो
विजेष्ये॥ २१॥ कुरून् रक्षन् पाण्डुपुत्रान् जिघांसन् त्यक्त्वा
प्राणान् घोररूपे रणेऽस्मिन्। सर्वान् सङ्ख्ये शत्रुसङ्घान्निहत्य
दास्याम्यहं धार्त्तराष्ट्राय राज्यम्॥ २२॥ निबध्यतां मे कवचं
विचित्रं हैमं शुभ्रं मणिरत्नावभासि। शिरस्त्राणं चार्कसमान-
भासं धनुः शरांश्चाग्निविषाहिकल्पान्॥ २३॥ उपासङ्गान्
षोड़श योजयध्वं धनूंषि दिव्यानि तथा हरन्तु। शरांश्च शक्तीश्च
गदाश्च गुर्वीः शङ्खञ्च जाम्बूनदचित्रभागम्॥ २४॥ इमां रौक्मीं
नागकक्षां विचित्रां ध्वजञ्चैत्रं दिव्यमिन्दीवराभम्। सूक्ष्मैर्वस्त्रै-
र्विप्रमृज्यानयस्व चित्रां मालाञ्चानुबद्धां सजालाम्॥ २५॥ अश्वा-
नन्यान् पाण्डुराभ्रप्रकाशान् पुष्टान् स्नातान् मन्त्रपूताभिरद्भिः।
तप्तैर्भाण्डैः काञ्चनैरभ्युपेतान् शीघ्राच्छीघ्रं सूतपुत्रानयस्व॥२६॥
रथं चाग्र्यं हेममालावनद्धं रत्नैश्चित्रं चन्द्रसूर्य्यप्रकाशैः। द्रव्यैर्युक्तं
सम्प्रहारोपपन्नैर्वाहैर्युक्तं तूर्णमावर्त्तयस्व॥ २७॥ चित्राणि
चापानि च वेगवन्ति ज्याश्चोत्तमाः संहननोपपन्नाः। तूणांश्च
पूर्णान्महतः शराणामासज्ज गात्रावरणानि चैव॥ २८॥ प्राया-

णिकं चानय चाशु सर्वं दृष्ट्वा पूर्णं वीर कांस्यञ्च हैमम् । आनीय मालामवबध्य चाङ्गे प्रवादयन्त्वाशु जयाय भेरीः ॥ २९ ॥ प्रयाहि सूताशु यतः किरीटी वृकोदरो धर्म्मपुत्रो यमौ च । तान् वा हनिष्यामि समेत्य सङ्ख्ये भीष्माय वैष्यामि हतो द्विषद्भिः ॥ ३० ॥ यस्मिन् राजा सत्यधृतिर्युधिष्ठिरः समास्थितौ भीमसेनार्जुनौ च । वासुदेवः सात्यकिः सृञ्जयाय मन्ये बलं तदजय्यं महीपैः ॥ ३१ ॥ तच्चेन्मृत्युः सर्वहरोऽभिरक्षेत् सदाप्रमत्तः समरे किरीटिनम् । तथापि हन्तास्मि समेत्य सङ्ख्ये यास्यामि वा भीष्मपथा यमाय ॥ ३२ ॥ न त्वेवाहं न गमिष्यामि तेषां मध्ये शूराणां तत्र चाहं ब्रवीमि । मित्रद्रुहो दुर्व्वलभक्तयो ये पापात्मनो मम नैते सहायाः ॥ ३३ ॥

सञ्जय उवाच । समृद्धिमन्तं रथसत्तमं दृढं सकूवरं हेमपरिष्कृतं शुभम् । पताकिनं वातजवैर्हयोत्तमैर्युक्तं समास्थाय ययौ जयाय सः ॥ ३४ ॥ सम्पूज्यमानः कुरुभिर्महात्मा रथर्षभैर्देवगणैर्यथेन्द्रः । ययौ तदायोधनमुग्रधन्वा यत्रावसानं भरतर्षभस्य ॥ ३५ ॥ वरूथिना महता सध्वजेन सुवर्णमुक्तामणिरत्नमालिना । सदश्वयुक्तेन रथेन कर्णो मेघस्वनेनार्क इवामितौजाः ॥ ३६ ॥ हुताशनाभः स हुताशनप्रभे शुभः शुभे वै स्वरथे धनुर्द्धरः । स्थितो रराजाधिरथिर्महारथः स्वयं विमाने सुरराड़िव स्थितः ॥ ३७ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि कर्णनिर्याणे द्वितीयोऽध्यायः ॥ २ ॥

---

सञ्जय उवाच। शरतल्पे महात्मानं शयानममितौजसम्। महावातसमूहेन समुद्रमिव शोषितम्॥ १॥ दृष्ट्वा पितामहं भीष्मं सर्वक्षत्रान्तकं गुरुम्। दिव्यैरस्त्रैर्महेष्वासं पातितं सव्यसाचिना॥ २॥ जयाशा तव पुत्राणां संभग्ना शर्म शर्म च। अपाराणामिव द्वीपमगाधे गाधमिच्छताम्॥ ३॥ स्रोतसा यामुनेनेव शरौघेण परिप्लुतः। महेन्द्रेणेव मैनाकमसह्यं भुवि पातितम्॥ ४॥ नभश्च्युतमिवादित्यं पातितं धरणीतले। शतक्रतुमिवाचिन्त्यं पुरा वृत्रेण निर्जितम्॥ ५॥ मोहनं सर्वसैन्यस्य युधि भीष्मस्य पातनम्। ककुदं सर्वसैन्यानां लक्ष्म सर्वधनुष्मताम्॥ ६॥ धनञ्जयशरव्याप्तं पितरं ते महाव्रतम्। तं वीरशयने वीरं शयानं पुरुषर्षभम्॥ ७॥ भीष्ममाधिरथिर्दृष्ट्वा भारतानां पितामहम्। अवतीर्य्य रथादार्त्तः शोकमोहपरिप्लुतः॥ ८॥ पद्भ्यामेव जगामार्त्तो बाष्पव्याकुललोचनः। अभिवाद्याञ्जलिं बद्ध्वा वन्दमानोऽभ्यभाषत॥ ९॥ कर्णोऽहमस्मि भद्रन्ते वद मामभि भारत। पुण्यया क्षेमया वाचा चक्षुषा चावलोकय॥ १०॥ न नूनं सुकृतस्येत्थं फलं कश्चित् समश्नुते। यत्र धर्मपरो वृद्धः शेते भुवि भवान् हतः॥ ११॥ कोशसञ्जनने मन्त्रे व्यूहे प्रहरणेषु च। नाहमन्यं प्रपश्यामि कुरूणां कुरुसत्तम॥ १२॥ बुद्ध्या विशुद्धया युक्तो यः कुरूंस्तारयेद्भयात्। योधांस्तु बहुधा हत्वा पितृलोकं गमिष्यसि॥ १३॥ अद्य प्रभृति संक्रुद्धा व्याघ्रा इव मृगक्षयम्। पाण्डवा भरतश्रेष्ठ करिष्यन्ति कुरुक्षयम्॥ १४॥ अद्य गाण्डीवघोषस्य वीर्य्यज्ञाः सव्यसाचिनः। कुरुभ्यः सन्त्रसिष्यन्ति वज्रपाणेरिवासुराः॥ १५॥ अद्य गाण्डीवमुक्तानामशनीनामिव स्वनः। त्रासयिष्यन्ति बाणानां कुरूनन्यांश्च पार्थिवान्॥ १६॥ समिद्धोऽग्निर्यथा वीर महाज्वालो द्रुमान् दहेत्। धार्त्तराष्ट्रान् प्रधक्ष्यन्ति तथा बाणाः किरीटिनः॥१७॥

येन येन प्रसरतो वायुग्नी सहितौ वने । तेन तेन प्रदहतो भूरि गुल्मतृणद्रुमान् ॥ १८ ॥ यादृशोऽग्निः समिद्धस्तु तादृक् पार्थो न संशयः । यथा वायुर्नरव्याघ्र तथा कृष्णो न संशयः ॥ १९ ॥ नदतः पाञ्चजन्यस्य रसतो गाण्डिवस्य च । श्रुत्वा सर्व्वाणि सैन्यानि त्रासं यास्यन्ति भारत ॥ २० ॥ कपिध्वजस्योत्पततो रथस्यामित्र-कर्षिणः । शब्दं सोढुं न शक्ष्यन्ति त्वामृते वीर पार्थिवाः ॥ २१ ॥ को ह्यर्जुनं योधयितुं त्वदन्यः पार्थिवोऽर्हति । यस्य दिव्यानि कर्म्माणि प्रवदन्ति मनीषिणः ॥ २२ ॥ अमानुषश्च सङ्ग्रामस्त्र्यम्ब-केण महात्मना । तस्माच्चैव वरं प्राप्तो दुष्प्रापमकृतात्मभिः ॥२३॥ कोऽन्यः शक्तो रणे जेतुं पूर्व्वं यो न जितस्त्वया । पाण्डुपुत्रो वलश्लाघी माधवेन च रक्षितः ॥ २४ ॥ जितो येन रणे रामो भवता वीर्य्यशालिना । क्षत्रियान्तकरो घोरो देवदानवपूजितः ॥ २५ ॥ तमद्याहं पाण्डवं युद्धशौण्डममृष्यमाणो भवता चानु-शिष्टः । आशीविषं दृष्टिहरं सुघोरं शूरं शक्ष्याम्यस्त्ववला-न्निहन्तुम् ॥ २६ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि कर्णवाक्ये
तृतीयोऽध्यायः ॥ ३ ॥

---

सञ्जय उवाच । तस्य लालप्यमानस्य कुरुवृद्धः पितामहः । देशकालोचितं वाक्यमब्रवीत् प्रीतमानसः ॥ १ ॥ समुद्र इव सिन्धूनां ज्योतिषामिव भास्करः । सत्यस्य च यथा सन्तो वीजा-नामिव चोर्व्वरा ॥ २ ॥ पर्ज्जन्य इव भूतानां प्रतिष्ठा सुहृदां तव । वान्धवास्त्वानुजीवन्तु सहस्राक्षमिवामराः ॥ ३ ॥ मानहा भव शत्रूणां मित्राणां नन्दिवर्द्धनः । कौरवाणामपि भवान् यथा विष्णुर्दिवौकसाम् ॥ ४ ॥ स्वबाहुबलवीर्य्येण धार्त्तराष्ट्रप्रियैषिणा ।

कर्ण राजपुरं गत्वा काम्बोजा निर्ज्जितास्त्वया॥ ५॥ गिरिव्रज-गताश्चापि नग्नजित्प्रमुखा नृपाः। अम्बष्ठाश्च विदेहाश्च गान्धाराश्च जितास्त्वया॥ ६॥ हिमवद्दुर्गनिलयाः किराता रण-कर्कशाः। दुर्य्योधनस्य वशगाः कृताः कर्ण त्वया पुरा॥ ७॥ उत्कला मेकलाः पौण्ड्राः कलिङ्गान्ध्राश्च संयुगे। निषादाश्च त्रिगर्त्ताश्च वाह्लीकाश्च जितास्त्वया॥ ८॥ तत्र तत्र च संग्रामे दुर्य्योधनहितैषिणा। बहवो निर्ज्जिता वीर त्वया कर्ण महौ-जसः॥ ९॥ यथा दुर्य्योधनस्तात सज्ञातिकुलबान्धवः। तथा त्वमपि सर्व्वेषां कौरवाणां गतिर्भव॥ १०॥ शिवेनाभिवदामि त्वां गच्छ युध्यस्व शत्रुभिः। अनुशाधि कुरून् सङ्ख्ये धत्स्व दुर्य्योधने जयम्॥ ११॥ भवान् पौत्रसमोऽस्माकं यथा दुर्य्योधनस्तथा। तथापि धर्मतः सर्व्वे तथा तस्य वयं तथा॥ १२॥ यौनात्सम्बन्धकाल्लोके विशिष्टं सङ्गतं सताम्। सद्भिः सह नर-श्रेष्ठ प्रवदन्ति मनीषिणः॥ १३॥ स सत्यसङ्गतो भूत्वा ममेद-मिति निश्चितम्। कुरूणां पालय बलं यथा दुर्य्योधनस्तथा॥१४॥ निशम्य वचनं तस्य चरणावभिवाद्य च। ययौ वैकर्त्तनः कर्णः समीपं सर्व्वधन्विनाम्॥ १५॥ सोऽभिवीक्ष्य नरौघाणां स्थान-मप्रतिमं महत्। व्यूढप्रहरणोरस्कं सैन्यं तत्समवृंहयत्॥ १६॥ हृषिताः कुरवः सर्व्वे दुर्य्योधनपुरोगमाः। तमागतं महाबाहुं सर्व्वानीकपुरःसरम्॥ १७॥ कर्णं दृष्ट्वा महात्मानं युद्धाय समुप-स्थितम्। क्ष्वेडितास्फोटितरवैः सिंहनादरवैरपि। धनुःशब्दैश्च विविधैः कुरवः समपूजयन्॥ १८॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि कर्णाश्वासे
चतुर्थोऽध्यायः॥ ४॥

---

सञ्जय उवाच । रथस्थं पुरुषव्याघ्रं दृष्ट्वा कर्णमवस्थितम् । हृष्टो दुर्य्योधनो राजन्निदं वचनमब्रवीत् ॥ १ ॥ सनाथमिद-मत्यर्थं भवता पालितं बलम् । मन्ये किं नु समर्थं यत् हितं तत् सम्प्रधार्य्यताम् ॥ २ ॥

कर्ण उवाच । ब्रूहि नः पुरुषव्याघ्र त्वं हि प्राज्ञतमो नृपः । यथा चार्थपतिः कृत्यं पश्यते न तथेतरः ॥ ३ ॥ ते स्म सर्व्वे तव वचः श्रोतुकामा नरेश्वराः । नान्याय्यं हि भवान् वाक्यं ब्रूया-दिति मतिर्मम ॥ ४॥

दुर्य्योधन उवाच । भीष्मः सेनाप्रणेतासीत् वयसा विक्रमेण च । श्रुतेन चोपसम्पन्नः सर्व्वैर्य्योधगणैस्तथा ॥ ५ ॥ तेनातियशसा कर्ण घ्नता शत्रुगणान्मम । सुयुद्धेन दशाहानि पालिताः स्मो महात्मना ॥ ६ ॥ तस्मिन्नसुकरं कर्म कृतवत्यास्थिते दिवम् । कर्ण सेनाप्रणेतारं मन्यसे कं तदन्तरम् ॥ ७ ॥ न विना नायकं सेना मुहूर्त्तमपि तिष्ठति । आहवेष्वाहवश्रेष्ठ कर्ण हीनेव नौर्ज्जले ॥ ८ ॥ यथा ह्यकर्णधारा नौ रथो वासारथिर्यथा । द्रवेद्यथेष्टं तद्वत्स्यादृते सेनापतिं बलम् ॥ ९ ॥ अदेशिको यथा सार्थः सर्व्व-कृच्छ्रं समर्च्छति । अनायका तथा सेना सर्व्वान् दोषान् सम-र्च्छति ॥ १० ॥ स भवान् वीक्ष्य सर्व्वेषु मामकेषु महात्मसु । पश्य सेनापतिं युक्तमनुशान्तनवादिह ॥ ११ ॥ यं हि सेनाप्रणेतारं भवान् द्रक्ष्यति संयुगे । तं वयं सहिताः सर्व्वे करिष्यामो न संशयः ॥ १२ ॥

कर्ण उवाच । सर्व्व एव महात्मान इमे पुरुषसत्तमाः । सेनापतित्वमर्हन्ति नात्र कार्य्या विचारणा ॥ १३ ॥ कुलसंहनन-ज्ञानैर्बलविक्रमबुद्धिभिः । युक्ताः कृतज्ञा धीमन्त आहवेष्वनिव-र्त्तिनः ॥ १४ ॥ युगपन्न तु ते शक्याः कर्त्तुं सर्व्वे पुरःसराः । एक एव तु कर्त्तव्यो यस्मिन् वैशेषिका गुणाः ॥ १५ ॥ अन्योऽन्य-

सर्व्वेषां पुंषां यद्येकं सत्करिष्यसि। शेषा विमनसो व्यक्तं न योत्स्यन्ति हितास्तव ॥ १५ ॥ अयञ्च सर्व्वयोधानामाचार्य्यः स्थविरो गुरुः। युक्तः सेनापतिः कर्त्तुं द्रोणः शस्त्रभृताम्वरः ॥ १६ ॥ को हि तिष्ठति दुर्द्धर्षे द्रोणे ब्रह्मविदुत्तमे। सेनापतिः स्यादन्यस्माच्छुक्राङ्गिरसदर्शनात् ॥ १७ ॥ न च कोऽप्यस्ति ते योधः सर्व्वराजसु भारत। द्रोणं यः समरे यान्तं नानुयास्यति संयुगे ॥ १८ ॥ एष सेनाप्रणेतॄणामेष शस्त्रभृतामपि। एष बुद्धिमतां श्रेष्ठो राजन्नेष गुरुश्च ते ॥ १९ ॥ एनं दुर्य्योधनाचार्य्यमाशु सेनापतिं कुरु। जिगीषन्तोऽसुरान् सङ्ख्ये कार्त्तिकेयमिवामराः ॥ २० ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि कर्णवाक्ये पञ्चमोऽध्यायः ॥ ५ ॥

---

सञ्जय उवाच। कर्णस्य वचनं श्रुत्वा राजा दुर्य्योधनस्तदा। सेनामध्यगतं द्रोणमिदं वचनमब्रवीत् ॥ १ ॥

दुर्य्योधन उवाच। वर्णश्रैष्ठ्यात् कुलोत्पत्त्या श्रुतेन वयसा धिया। वीर्य्याद्दाक्ष्यादधृष्यत्वादर्थज्ञानान्नयाज्जयात् ॥२॥ तपसा च कृतज्ञत्वात् वृद्धः सर्व्वगुणैरपि। युक्तो भवत्समो गोप्ता राज्ञामन्यो न विद्यते ॥ ३ ॥ स भवान् पातु नः सर्व्वान् विबुधानिव वासवः। भवन्नेत्राः परान् जेतुमिच्छामो द्विजसत्तम ॥ ४ ॥ रुद्राणामिव कापाली वसूनामिव पावकः। कुवेर इव यक्षाणां मरुतामिव वासवः ॥ ५ ॥ वशिष्ठ इव विप्राणां तेजसामिव भास्करः। पितॄणामिव धर्म्मेन्द्रो यादसामिव चाम्बुराट् ॥ ६ ॥ नक्षत्राणामिव शशी दितिजानामिवोशनाः। श्रेष्ठः सेनाप्रणेतॄणां स न सेनापतिर्भव ॥ ७ ॥ अक्षौहिण्यो दशैका च वशगा सन्तु

तेऽनघ। ताभिः शत्रून् प्रतिव्यूह्य जहीन्द्रो दानवानिव ॥ ८ ॥
प्रयातु नो भवानग्रे देवानामिव पावकिः। अनुयास्यामहे त्वाजौ
सौरभेया इवार्षभम् ॥ ९ ॥ उग्रधन्वा महेष्वासो दिव्यं विस्फा-
रयन् धनुः। अग्रे भवं त्वान्तु दृष्ट्वा नार्जुनः प्रहरिष्यति ॥ १० ॥
ध्रुवं युधिष्ठिरं सङ्ख्ये सानुबन्धं सबान्धवम्। जेष्यामि पुरुष-
व्याघ्र भवान् सेनापतिर्य्यदि ॥ ११ ॥

सञ्जय उवाच। एवमुक्ते ततो द्रोणं जयेत्यूचुर्नराधिपाः।
सिंहनादेन महता हर्षयन्तस्तवात्मजम् ॥ १२ ॥ सैनिकाश्च मुदा
युक्ता वर्द्धयन्ति द्विजोत्तमम्। दुर्य्योधनं पुरस्कृत्य प्रार्थयन्तो मह-
द्यशः। दुर्य्योधनं ततो राजन् द्रोणो वचनमब्रवीत् ॥ १३ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि दुर्य्योधनप्रोत्साहे
षष्ठोऽध्यायः ॥ ६ ॥

---

द्रोण उवाच। वेदं षड़ङ्गं वेदाहमर्थविद्याञ्च मानवीम्।
त्रैयम्बकमथेष्वस्त्रमस्त्राणि विविधानि च ॥ १ ॥ ये चाप्युक्ता
मयि गुणा भवद्भिर्जयकाङ्क्षिभिः। चिकीर्षुस्तानहं सर्वान् योध-
यिष्यामि पाण्डवान् ॥ २ ॥ पार्षतन्तु रणे राजन् न हनिष्ये
कथञ्चन। स हि सृष्टो वधार्थाय ममैव पुरुषर्षभ ॥ ३ ॥ योध-
यिष्यामि सैन्यानि नाशयन् सर्वसोमकान्। न च मां पाण्डवा
युद्धे योधयिष्यन्ति हर्षिताः ॥ ४ ॥

सञ्जय उवाच। स एवमभ्यनुज्ञातश्चक्रे सेनापतिं ततः।
द्रोणन्तव सुतो राजन् विधिदृष्टेन कर्मणा ॥ ५ ॥ अथाभिषिषिचु-
र्द्रोणं दुर्य्योधनमुखा नृपाः। सैनापत्ये यथा स्कन्दं पुरा शक्र-
मुखाः सुराः ॥ ६ ॥ ततो वादित्रघोषेण शङ्खानाञ्च महास्वनैः।
प्रादुरासीत् कृते द्रोणे हर्षः सेनापतौ तदा ॥ ७ ॥ ततः पुण्याह

घोषेण स्वस्तिवादस्वनेन च। संस्तवैर्गीतशब्दैश्च सूतमागधवन्दि-
नाम्॥ ८॥ जयशब्दैर्द्विजाग्र्याणां सूतानां वर्त्तितैस्तथा। सत्-
कृत्य विधिना द्रोणं मेनिरे पाण्डवान् जितान्॥ ९॥

सञ्जय उवाच। सैनापत्यन्तु सम्प्राप्य भारद्वाजो महारथः।
युयुत्सुर्व्यूह्य सैन्यानि प्रायात्तव सुतैः सह॥ १०॥ सैन्धवश्च कलि-
ङ्गश्च विकर्णश्च तवात्मजः। दक्षिणं पार्श्वमास्थाय समतिष्ठन्त
दंशिताः॥ ११॥ प्रपक्षः शकुनिस्तेषां प्रवरैर्हयसादिभिः। ययौ
गान्धारकैः सार्द्धं विमलप्रासयोधिभिः॥ १२॥ कृपश्च कृतवर्मा
च चित्रसेनो विविंशतिः। दुःशासनमुखा यत्ताः सव्यं पक्षमपालयन्
॥ १३॥ तेषां प्रपक्षाः काम्बोजाः सुदक्षिणपुरःसराः। ययु-
रश्वैर्महावेगैः शकाश्च यवनैः सह॥ १४॥ मद्रास्त्रिगर्त्ताः सम्वष्ठाः
प्रतीच्योदीच्यमालवाः। शिवयः शूरसेनाश्च शूद्राश्च मलदैः सह
॥ १५॥ सौवीराः कितवाः प्राच्या दाक्षिणात्याश्च सर्वशः।
तवात्मजं पुरस्कृत्य सूतपुत्रञ्च पृष्ठतः॥ १६॥ हर्षयन्तः स्वसै-
न्यानि बलेषु बलमादधत्। ययौ वैकर्त्तनः कर्णः प्रमुखे सर्व-
धन्विनाम्॥ १७॥ तस्य दीप्तो महाकायः स्वान्यनीकानि हर्ष-
यन्। हस्तिकक्षो महाकेतुर्बभौ सूर्य्यसमद्युतिः॥ १८॥ न
भीष्मव्यसनं कश्चिद्दृष्ट्वा कर्णममन्यत। विशोकाश्चाभवन् सर्वे राजानः
कुरुभिः सह॥ १९॥ हृष्टाश्च बहवो योधास्तत्राजल्पन्त सङ्गताः।
न हि कर्णं रणे दृष्ट्वा युधि स्थास्यन्ति पाण्डवाः॥ २०॥ कर्णो
हि समरे शक्तो जेतुं देवान् सवासवान्। किमु पाण्डुसुतान्
युद्धे हीनवीर्य्यपराक्रमान्॥२१॥ भीष्मेण तु रणे पार्थाः पालिता
बाहुशालिना। तांस्तु कर्णः शरैस्तीक्ष्णैर्नाशयिष्यति संयुगे॥२२॥
एवं ब्रुवन्तस्तेऽन्योऽन्यं हृष्टरूपा विशाम्पते। राधेयं पूजयन्तश्च
प्रशंसन्तश्च निर्ययुः॥ २३॥ अस्माकं शकटव्यूहो द्रोणेन विहितो-
ऽभवत्। परेषां क्रौञ्च एवासीद्व्यूहो राजन् महात्मनाम्॥२४॥

प्रीयमाणेन विहितो धर्मराजेन भारत। व्यूहप्रमुखतस्तेषां तस्थतुः पुरुषर्षभौ॥ २५॥ वानरध्वजमुच्छ्रित्य विष्वक्सेनधनञ्जयौ। ककुदं सर्वसैन्यानां धाम सर्वधनुष्मताम्॥ २६॥ आदित्यपथगः केतुः पार्थस्यामिततेजसः। दीपयामास तत् सैन्यं पाण्डवस्य महात्मनः॥ २७॥ यथा प्रज्वलितः सूर्य्यो युगान्ते वै वसुन्धराम्। प्रदहन् दृश्यते तद्वत् केतुः पार्थस्य धीमतः॥ २८॥ योधानामर्जुनः श्रेष्ठो गाण्डीवं धनुषां वरम्। वासुदेवश्च भूतानां चक्राणाञ्च सुदर्शनम्॥ २९॥ चत्वार्य्येतानि तेजांसि वहन् श्वेतहयो रथः। परेषामग्रतस्तस्थौ कालचक्रमिवोद्यतम्॥ ३०॥ एवं तौ सुमहात्मानौ बलसेनाग्रगावुभौ। तावकानां मुखे कर्णः परेषाञ्च धनञ्जयः॥ ३१॥ तौ जातावभिसंरब्धौ परस्परबधैषिणौ। अवेक्षेतां तदान्योऽन्यं समरे कर्णपाण्डवौ॥ ३२॥ ततः प्रयाते सहसा भारद्वाजे महारथे। आर्त्तनादेन घोरेण वसुधा समकम्पत॥ ३३॥ ततस्तुमुलमाकाशमावृणोत् सदिवाकरम्। वातोद्भूतं रजस्तीव्रं कौषेयनिकरोपमम्॥ ३४॥ ववर्ष द्यौरनभ्रापि मांसास्थिरुधिराण्युत। गृध्राः श्येना बलाः कङ्का वायसाश्च सहस्रशः॥ ३५॥ उपर्य्युपरि सेनान्ते तदा पर्य्यपतन्नृप। गोमायवश्च प्राक्रोशन् भयदा दारुणाः खगाः॥ ३६॥ अकार्षुरपसव्यञ्च बहुशः पृतनां तव। बिभक्षिषन्तो मांसानि पिपासन्तश्च शोणितम्॥ ३७॥ अपतद्दीप्यमाना च सनिर्घाता सकम्पना। उल्का ज्वलन्ती संग्रामे पुच्छेनावृत्य सर्वशः॥ ३८॥ परिवेशो महांश्चापि सविद्युत् स्तनयित्नुमान्। भास्करस्याभवद्राजन् प्रयाते वाहिनीपतौ॥ ३९॥ एते चान्ये च बहवः प्रादुरासन् सुदारुणाः। उत्पाता युधि वीराणां जीवितक्षयकारणाः॥ ४०॥ ततः प्रववृते युद्धं परस्परबधैषिणाम्। कुरुपाण्डवसेनानां शब्देनापूरयज्जगत्॥ ४१॥ ते त्वन्योऽन्यं सुसंरब्धाः

पाण्डवाः कौरवैः सह । प्रत्यघ्नन्निशितैः शस्त्रैर्जयगृध्राः प्रहारिणः ॥ ४२ ॥ स पाण्डवानां महता महेष्वासो महाद्युतिः । वेगेनाभ्यद्रवत् सैन्यं किरन् शरशतैः शितैः ॥ ४३ ॥ द्रोणमभ्युद्यतं दृष्ट्वा पाण्डवाः सह सृञ्जयैः । प्रत्यगृह्णंस्तदा राजञ्छरवर्षैः पृथक् पृथक् ॥ ४४ ॥ संक्षोभ्यमाणा द्रोणेन भिद्यमाना महाचमूः । व्यशीर्यत सपाञ्चाला वातेनेव बलाहकाः ॥ ४५ ॥ बहूनीह विकुर्वाणो दिव्यान्यस्त्राणि संयुगे । अपीड़यत् क्षणेनैव द्रोणः पाण्डवसृञ्जयान् ॥ ४६ ॥ ते बध्यमाना द्रोणेन वासवेनेव दानवाः । पाञ्चालाः समकम्पन्त धृष्टद्युम्नपुरोगमाः ॥ ४७ ॥ ततो दिव्यास्त्रविच्छूरो याज्ञसेनिर्महारथः । अभिनच्छरवर्षेण द्रोणानीकमनेकधा ॥ ४८ ॥ द्रोणस्य शरवर्षेण शरवर्षाणि पार्षतः । सन्निवार्य्य ततः सर्वान् कुरूनप्यवधीद्बली ॥ ४९ ॥ संहृत्य तु ततो द्रोणः समवस्थाप्य चाहवे । स्वमनीकं महाबाहुः पार्षतं समुपाद्रवत् ॥ ५० ॥ सवाणवर्षं सुमहदसृजत् पार्षतं प्रति । मघवान् समभिक्रुद्धः सहसा दानवेष्विव ॥ ५१ ॥ ते कम्पमाना द्रोणेन वाणैः पाण्डवसृञ्जयाः । पुनः पुनरभज्यन्त सिंहेनेवेतरे मृगाः ॥ ५२ ॥ तथा पर्य्यचरद्द्रोणः पाण्डवानां बलं बली । अलातचक्रवद्राजंस्तदद्भुतमिवाभवत् ॥ ५३ ॥ खचरनगरकल्पं कल्पितं शास्त्रदृष्ट्या चलदनिलपताकं ह्लादितं चालिताश्वम् ॥ ५४ ॥ स्फटिकविमलकेतुं त्रायसन् शात्रवाणाम् । रथवरमधिरूढ़ः सञ्जहारारिसेनाम् ॥ ५५ ॥

इति द्रोणपर्वणि द्रोणाभिषेकपर्वणि द्रोणपराक्रमे
सप्तमोऽध्यायः ॥ ७ ॥

---

सञ्जय उवाच। तथा द्रोणमभिघ्नन्तं साश्वसूतरथद्विपान्। व्यथिताः पाण्डवा दृष्ट्वा न चैनं पर्य्यवारयन् ॥ १ ॥ ततो युधिष्ठिरो राजा धृष्टद्युम्नधनञ्जयौ। अब्रवीत् सर्व्वतो यत्तैः कुम्भयोनिर्न्निवार्य्यताम् ॥ २ ॥ तत्रैनमर्ज्जुनश्चैव पार्षतश्च सहानुगः। पर्य्यगृह्णंस्ततः सर्व्वे समायान्तं महारथाः ॥३॥ कैकेया भीमसेनश्च सौभद्रश्च घटोत्कचः। युधिष्ठिरो यमौ मत्स्यो द्रुपदस्यात्मजस्तथा ॥ ४ ॥ द्रौपदेयाश्च संहृष्टा धृष्टकेतुः ससात्यकिः। चेकितानश्च संक्रुद्धो युयुत्सुश्च महारथः ॥ ५ ॥ ये चान्ये पार्थिवा राजन् पाण्डवस्यानुयायिनः। कुलवीर्य्यानुरूपाणि चक्रुः कर्म्माण्यनेकशः ॥ ६ ॥ संरच्यमाणां तां दृष्ट्वा पाण्डवैर्व्वाहिनीं रणे। व्यावृत्य चक्षुषी कोपात् भारद्वाजोऽन्ववैक्षत ॥ ७ ॥ स तीव्रकोपमास्थाय रथे समरदुर्म्मदः। व्यधमत् पाण्डवानीकमभ्राणीव सदागतिः ॥ ८ ॥ रथानश्वान्नरान्नागानभिधावन्नितस्ततः। चचार मत्तवद्द्रोणो वृद्धोऽपि तरुणो यथा ॥ ९ ॥ तस्य शोणितदिग्धाङ्गाः शोणास्ते वातरंहसः। आजानेया हया राजन्नविश्रान्ताः श्रियं दधुः ॥ १० ॥ तमन्तकमिव क्रुद्धमापतन्तं यतव्रतम्। दृष्ट्वा संप्राद्रवन् योधाः पावण्डस्य ततस्ततः ॥ ११ ॥ तेषां प्रद्रवतां भीमः पुनरावर्त्ततामपि। वीक्षतां तिष्ठतां चासीच्छब्दः परमदारुणः ॥ १२ ॥ शूराणां हर्षजननो भीरूणां भयवर्द्धनः। द्यावापृथिव्योर्व्विवरं पूरयामास सर्व्वतः ॥ १३ ॥ ततः पुनरपि द्रोणो नाम विश्रावयन् युधि। अकरोद्रौद्रमात्मानं किरन् शरशतैः परान् ॥ १४ ॥ स तथा तेष्वनीकेषु पाण्डुपुत्रस्य मारिष। कालवद्व्यचरद्द्रोणो युवेव स्थविरो बली ॥ १५ ॥ उत्कृत्य च शिरांस्युग्रो बाहूनपि सभूषणान्। कृत्वा शून्यान् रथोपस्थानुदक्रोशन्महारवान् ॥१६॥ तस्य हर्षप्रणादेन बाणवेगेन वा विभो। प्राकम्पन्त रणे योधा गावः शीतार्द्दिता इव ॥ १७ ॥ द्रोणस्य

रथघोषेण मौर्वीनिष्पेषणेन च । धनुःशब्देन चाकाशे शब्दः समभवन्महान् ॥ १८ ॥ अथास्य धनुषो बाणा निश्चरन्तः सहस्रशः । व्याप्य सर्वा दिशः पेतुर्नागाश्वरथपत्तिषु ॥ १९ ॥ तं कार्मुकमहावेगमस्त्रज्वलितपावकम् । द्रोणमासादयाञ्चक्रुः पाञ्चालाः पाण्डवैः सह ॥ २० ॥ तान् सकुञ्जरपत्त्यश्वान् प्राहिणोद्यमसादनम् । चक्रेऽचिरेण च द्रोणो महीं शोणितकर्द्दमाम् ॥ २१ ॥ तन्वता परमास्त्राणि शरान् सन्ततमस्यता । द्रोणेन निचितं दिक्षु बाणजालमदृश्यत ॥ २२ ॥ पदातिस्यन्दनाश्वेषु रथेष्वपि च सर्वशः । तस्य विद्युदिवाभ्रेषु चरन् केतुरदृश्यत ॥ २३ ॥ स कैकयानां प्रवरांश्च पञ्च पञ्चालराजञ्च शरैः प्रमथ्य । युधिष्ठिरानीकमदीनसत्त्वो द्रोणोऽभ्ययात् कार्मुकबाणपाणिः ॥२४॥ तं भीमसेनश्च धनञ्जयश्च शिनेश्च नप्ता द्रुपदात्मजाश्च । शैव्यात्मजः काशिपतिः शिविश्च हृष्टा नदन्तो ह्यकिरन् शरौघैः ॥ २५ ॥ तेषामथ द्रोणधनुर्विमुक्ताः पतत्रिणः काञ्चनचित्रपुङ्खाः । भित्त्वा शरीराणि गजाश्वयूनां जग्मुर्महीं शोणितदिग्धवाजाः ॥ २६ ॥ सा योधसङ्घैश्च रथैश्च भूमिः शरैर्विभिन्नैर्गजवाजिभिश्च । प्रच्छाद्यमाना पतितैर्बभूव समावृता द्यौरिव कालमेघैः ॥ २७ ॥ शैनेयभीमार्जुनवाहिनीञ्च सौभद्रपाञ्चालसकाशिराजम् । अन्यांश्च वीरान् समरे प्रमृद्नन् द्रोणः सुतानां तव भूतिकामः ॥ २८ ॥ एतानि चान्यानि च कौरवेन्द्र कर्माणि कृत्वा समरे महात्मा । प्रताप्य लोकानिव कालसूर्य्यो द्रोणो गतः स्वर्गमितो हि राजन् ॥ २९ ॥ स तु कृत्वा महत् कर्म द्रोणः परबलार्द्दनः । एवं रुक्मरथः शूरो हत्वा शतसहस्रशः ॥ ३० ॥ पाण्डवानां रणे योधान् पार्षतेन निपातितः । अक्षौहिणीभ्यामधिकां शूराणामनिवर्त्तिनाम् ॥ ३१ ॥ निहत्य पश्चाद्धृतिमानगच्छत् परमां गतिम् । पाण्डवैः सह पाञ्चालैरशिवैः क्रूरकर्मभिः ॥ ३२ ॥ हतो

रुक्मरथो राजन् कृत्वा कर्म सुदुष्करम् । ततो निनादो भूताना-
माकाशे समजायत ॥ ३३ ॥ सैन्यानाञ्च ततो राजन्नाचार्य्ये निहते
युधि । द्यां धरां खं दिशो वापि प्रदिशश्चानुनादयन् ॥ ३४ ॥
अहोधिगिति भूतानां शब्दः समभवद्भृशम् । देवताः पितरश्चैव
सर्व्वे ये चास्य बान्धवाः ॥ ३५ ॥ ददृशुर्निहतं तत्र भारद्वाजं महा-
रथम् । पाण्डवास्तु जयं लब्ध्वा सिंहनादान् प्रचक्रिरे । सिंह-
नादेन महता समकम्पत मेदिनी ॥ ३६ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि द्रोणवधश्रवणे
अष्टमोऽध्यायः ॥ ८ ॥

---

धृतराष्ट्र उवाच । किं कुर्व्वाणं रणे द्रोणं जघ्नुः पाण्डव-
सृञ्जयाः । तथा निपुणमस्त्रेषु सर्व्वशस्त्रभृतामपि ॥ १ ॥ रथ-
भङ्गो बभूवास्य धनुर्व्वाशीर्य्यतास्यतः । प्रमत्तो वाभवद्द्रोणस्ततो
मृत्युमुपेयिवान् ॥ २ ॥ कथन्तु पार्षतस्तात शत्रुभिर्दुष्प्रधर्षणम् ।
किरन्तमिषुसङ्घातान् रुक्मपुङ्खाननेकशः ॥ ३ ॥ क्षिप्रहस्तं द्विज-
श्रेष्ठं कृतिनं चित्रयोधिनम् । दूरेषुपातिनं दान्तं शस्त्रयुद्धेषु पार-
गम् ॥ ४ ॥ पाञ्चालपुत्रो न्यवधीत् दिव्यास्त्रधरमच्युतम् । कुर्व्वाणं
दारुणं कर्म रणे यत्तं महारथम् ॥ ५ ॥ व्यक्तं हि दैवं बलवत्
पौरुषादिति मे मतिः । यद्द्रोणो निहतः शूरः पार्षतेन महा-
त्मना ॥ ६ ॥ अस्त्रं चतुर्व्विधं वीरे तस्मिन्नासीत् प्रतिष्ठितम् ।
तमिष्वस्त्रधराचार्य्यं द्रोणं शंससि मे हतम् ॥ ७ ॥ श्रुत्वा हतं
रुक्मरथं वैयाघ्रपरिवारितम् । जातरूपपरिष्कारं नाद्य शोक-
मुपानुदे ॥ ८ ॥ न नूनं परदुःखेन म्रियते कोऽपि सञ्जय । यत्र
द्रोणमहं श्रुत्वा हतं जीवामि मन्दभाक् ॥ ९ ॥ दैवमेव परं मन्ये
नन्वनर्थं हि पौरुषम् । अश्मसारमयं ननं हृदयं सुदृढं मम ॥१०॥

यच्छ्रुत्वा निहतं द्रोणं शतधा यन्न दीर्य्यते। ब्राह्मे दैवे तथे ष्वस्त्रे यमुपासन् गुणार्थिनः ॥ ११ ॥ ब्राह्मणा राजपुत्राश्च स कथं मृत्युना हतः। शोषणं सागरस्येव मेरोरिव विसर्पणम् ॥ १२ ॥ पातनं भास्करस्येव न मृष्ये द्रोणपातनम्। दुष्टानां प्रतिषेद्धासीद्धार्म्मिकाणाञ्च रक्षिता ॥ १३ ॥ योऽहासीत् कृपण-स्यार्थे प्राणानपि परन्तपः। मन्दानां मम पुत्राणां जयाशा यस्य विक्रमे ॥ १४ ॥ वृहस्पत्युशनस्तुल्यो बुद्ध्या स निहतः कथम्। ते च शोणा वृहन्तोऽश्वाश्छन्ना जालैर्हिरण्मयैः ॥ १५ ॥ रथे वातजवा युक्ताः सर्वशस्त्रातिगा रणे। वलिनो ह्रेषिणो दान्ताः सैन्धवाः साधुवाहिनः ॥ १६ ॥ दृढ़ाः संग्राममध्येषु केचिदासन् न विह्वलाः। करिणां वृंहतां युद्धे शङ्खदुन्दुभिनिस्वनैः ॥ १७ ॥ ज्याक्षेपशरवर्षाणां शस्त्राणाञ्च सहिष्णवः। आशंसन्तः परान् जेतुं जितश्वासा जितव्यथाः ॥ १८ ॥ हयाः पराजिताः शीघ्रा भारद्वाजरथोद्वहाः। ते स्म रुक्मरथे युक्ता नरवीरसमाहिताः ॥ १९ ॥ कथं नाभ्यतरंस्तात पाण्डवानामनीकिनीम्। जात-रूपपरिष्कारमास्थाय रथमुत्तमम् ॥ २० ॥ भारद्वाजः किमक-रोत् शूरसंक्रन्दनो युधि। विद्यां यस्योपजीवन्ति सर्वलोकधनु-र्द्धराः ॥ २१ ॥ स सत्यसन्धो बलवान् द्रोणः किमकरोद्युधि। दिवि शक्रमिव श्रेष्ठं महामात्रं धनुर्भृताम् ॥ २२ ॥ के तु ते रौद्रकर्माणं युद्धे प्रत्युद्ययूरथाः। ननु रुक्मरथं दृष्ट्वा प्राद्रवन्ति स्म पाण्डवाः ॥ २३ ॥ दिव्यमस्त्रं विकुर्वाणं रणे तस्मिन्महा-बलम्। उताहो सर्वसैन्येन धर्मराजः सहानुजः ॥ २४ ॥ पाञ्चाल्य-प्रग्रहो द्रोणं सर्वतः पर्य्यवारयत्। नूनमावारयत् पार्थो रथिनो-ऽन्यानजिह्मगैः ॥ २५ ॥ ततो द्रोणं समारोहत् पार्षतः पाप-कर्मकृत्। न ह्यहं परिपश्यामि बधे कञ्चन शुष्मिणः ॥ २६ ॥ धृष्टद्युम्नादृते रौद्रात् पाल्यमानात् किरीटिना। तैर्वृतः सर्वतः

शूरैः पाञ्चाल्यापसदस्ततः ॥ २७ ॥ कैकेयैश्चेदिकारूषैर्मत्स्यै-
रन्यैश्च भूमिपैः । व्याकुलीकृतमाचार्य्यं पिपीलैरुरगं यथा ॥२८॥
कर्मण्यसुकरे शक्तं जघानेति मतिर्मम । योऽधीत्य चतुरो वेदान्
साङ्गानाख्यानपञ्चमान् ॥ २९ ॥ ब्राह्मणानां प्रतिष्ठासीत् स्रोतसा-
मिव सागरः । क्षत्रञ्च ब्रह्म चैवेह योऽभ्यतिष्ठत् परन्तपः ॥ ३० ॥
स कथं ब्राह्मणो वृद्धः शस्त्रेण वधमाप्तवान् । अमर्षणो मर्षित-
वान् क्लिश्यमानः सदा मया ॥ ३१ ॥ अनर्हमाणः कौन्तेयात्
कर्मणस्तस्य तत्फलम् । यस्य कर्मानुजीवन्ति लोके सर्वधनुर्भृतः
॥ ३२ ॥ स सत्यसन्धः सुकृती श्रीकामैर्निहतः कथम् । दिवि
शक्र इव श्रेष्ठो महासत्त्वो महाबलः ॥ ३३ ॥ स कथं निहतः
पार्थैः क्षुद्रमत्स्यैर्यथा तिमिः । क्षिप्रहस्तश्च बलवान् दृढ़धन्वारि-
मर्द्दनः ॥ ३४ ॥ न यस्य विजयाकाङ्क्षी विषयं प्राप्य जीवति ।
यन्द्वौ न जहतः शब्दौ जीवमानं कदाचन ॥ ३५ ॥ ब्राह्मश्च वेद-
कामानाञ्ज्याघोषश्च धनुष्मताम् । अदीनं पुरुषव्याघ्रं श्रीमन्त-
मपराजितम् ॥ ३६ ॥ नाहं मृष्ये हतं द्रोणं सिंहद्विरदविक्रमम् ।
कथं सञ्जय दुर्द्धर्षमनाधृष्ययशोबलम् ॥३७॥ पश्यतां पुरुषेन्द्राणां
समरे पार्षतोऽवधीत् । के पुरस्तादयुध्यन्त रक्षन्तो द्रोणमन्ति-
कात् ॥ ३८ ॥ के तु पश्चादवर्त्तन्त गच्छन्तो दुर्लभां गतिम् ।
केऽरक्षन् दक्षिणं चक्रं सव्यं के च महात्मनः ॥ ३९ ॥ पुरस्तात्
के च वीरस्य युध्यमानस्य संयुगे । के च तत्र तनूस्त्यक्त्वा प्रतीपं
मृत्युमाव्रजन् ॥ ४० ॥ द्रोणस्य समरे वीराः केऽकुर्वन्त परां
गतिम् । कच्चिन्नूनं भयान्मन्दाः क्षत्रिया व्यजहन् रणे ॥ ४१ ॥
रक्षितारस्ततः शून्ये कच्चिन्नैको हतः परैः । न स पृष्ठमवत्रासा-
द्रणे द्रोणः प्रदर्शयेत् ॥ ४२ ॥ परामप्यापदं प्राप्य कथं स
निहतः परैः । एतदार्य्येण कर्त्तव्यं कृच्छ्रास्वापत्सु सञ्जय ॥४३॥
पराक्रमेद्यथा शक्त्या तच्च तस्मिन् प्रतिष्ठितम् । मुह्यते मे मन-

स्तात कथा तावन्निवर्त्त्यताम्। भूयस्तु लब्धसंज्ञस्त्वां परिपृच्छामि सञ्जय ॥ ४४ ॥

इति द्रोणपर्वणि द्रोणाभिषेकपर्वणि धृतराष्ट्रशोके
नवमोऽध्यायः ॥ ९ ॥

---

वैशम्पायन उवाच। एवं पृष्ट्वा सूतपुत्रं हृच्छोकेनार्द्दितो भृशम्। जये निराशः पुत्राणां धृतराष्ट्रोऽपतत्चितौ ॥ १ ॥ तं विसंज्ञं निपतितं सिषिचुः परिचारकाः। जलेनात्यर्थशीतेन वीजन्तः पुण्यगन्धिना ॥ २ ॥ पतितं चैनमालोक्य समन्ताद्भरतस्त्रियः। परिवव्रुर्महाराजमस्पृशंश्चैव पाणिभिः ॥ ३ ॥ उत्थाप्य चैनं शनकैराजानं पृथिवीतलात्। आसनं प्रापयामासुर्वाष्पकण्ठ्यो वराङ्गनाः ॥ ४ ॥ आसनं प्राप्य राजा तु मूर्च्छयाभिपरिप्लुतः। निश्चेष्टोऽतिष्ठत तदा वीज्यमानः समन्ततः ॥ ५ ॥ स लब्ध्वा शनकैः संज्ञां वेपमानो महीपतिः। पुनर्गावल्गणिं सूतं पर्य्यपृच्छद्यथातथम् ॥ ६ ॥

धृतराष्ट्र उवाच। यः स उद्यन्निवादित्यो ज्योतिषा प्रणुदंस्तमः। अजातशत्रुमायान्तं कस्तं द्रोणादवारयत् ॥ ७ ॥ प्रभिन्नमिव मातङ्गं यथा क्रुद्धं तरस्विनम्। प्रसन्नवदनं दृष्ट्वा प्रतिद्विरदगामिनम् ॥ ८ ॥ वासितासङ्गमे यद्वदजय्यं प्रतियूथपैः। निजघान रणे वीरान् वीरः पुरुषसत्तमः ॥ ९ ॥ यो ह्येको हि महाबाहुर्निर्दहेद्घोरचक्षुषा। कृत्स्नं दुर्य्योधनबलं धृतिमान् सत्यसङ्गरः ॥ १० ॥ चक्षुर्हणं जये सक्तमिष्वासधरमच्युतम्। दान्तं बहुमतं लोके के शूराः समवारयन् ॥ ११ ॥ के दुष्प्रधर्षं राजानमिष्वासधरमच्युतम्। समासेदुर्नरव्याघ्रं कौन्तेयं तत्र मामकाः ॥ १२ ॥ तरसैवाभिपद्याथ यो वै द्रोणमुपाद्रवत्।

यः करोति महत्कर्म शत्रूणां वै महाबलः ॥ १३ ॥ महाकायो महोत्साहो नागायुतसमो बले । तं भीमसेनमायान्तं के शूराः पर्य्यवारयन् ॥ १४ ॥ यदायाज्जलदप्रख्यो रथः परमवीर्य्यवान् । पर्जन्य इव बीभत्सुस्तुमुलामशनीमिव ॥ १५ ॥ विसृजन् शरजालानि वर्षाणि मघवानिव । अवस्फूर्ज्जन् दिशः सर्वास्तलनेमिस्वनेन च ॥ १६ ॥ चापविद्युत्प्रभो घोरो रथगुल्मबलाहकः । स्नेमिघोषस्तनितः शरशब्दातिबन्धुरः ॥ १७ ॥ रोषनिर्मितजीमूतो मनोऽभिप्रायशीघ्रगः । मर्म्मातिगो बाणधरस्तुमुलः शोणितोदकैः ॥ १८ ॥ संप्लावयन् दिशः सर्वा मानवैरन्तको यथा । भीमनिस्वनितो रौद्रो दुर्य्योधनपुरोगमान् ॥ १९ ॥ युद्धेऽभ्यषिञ्चद्विजयो गार्द्धपत्रैः शिलाशितैः । गाण्डीवं धारयन् धीमान् कीदृशं वो मनस्तदा ॥ २० ॥ इषुसम्बाधमाकाशं कुर्वन् कपिवरध्वजः । यदायात् कथमासीत्तु तदा पार्थं समीक्ष्य तम् ॥ २१ ॥ कच्चिद्गाण्डीवशब्देन प्रणाश्य तव वै बलम् । यद्वः स भैरवं कुर्वन्नर्जुनो भृशमभ्ययात् ॥ २२ ॥ कच्चिन्नापानुदत्प्राणान्निषुभिर्वो धनञ्जयः । वातो मेघानिवाबिध्यत् प्रावाच्छरवनानि च ॥ २३ ॥ को हि गाण्डीवधन्वानं रणे सोढुं नरोऽर्हति । यमुपश्रुत्य सेनाग्रे जनः सर्वो बिदीर्य्यते ॥ २४ ॥ यत्सेनाः समकम्पन्त यद्वीरानस्पृशद्भयम् । के तत्र नाजहुर्द्रोणं के क्षुद्राः प्राद्रवन् भयात् ॥ २५ ॥ के वा तत्र तनूस्त्यक्त्वा प्रतीपं मृत्युमाव्रजन् । अमानुषाणां जेतारं युद्धेष्वपि धनञ्जयम् ॥ २६ ॥ न च वेगं सिताश्वस्य संसहिष्यन्ति मामकाः । गाण्डीवस्य च निर्घोषं प्रावृज्जलदनिःस्वनम् ॥ २७ ॥ विश्वक्सेनो यस्य यन्ता यस्य योद्धा धनञ्जयः । अशक्यः स रथो जेतुं मन्ये देवासुरैरपि ॥ २८ ॥ सुकुमारो युवा शूरो दर्शनीयश्च पाण्डवः । मेधावी निपुणो धीमान् युधि सत्यपराक्रमः ॥ २९ ॥ आरावं विपुलं कुर्वन्

व्यथयन् सर्वसैनिकान्। यदायान्नकुलो द्रोणं के शूराः पर्य्य-
वारयन्॥ ३०॥ आशीविष इव क्रुद्धः सहदेवो यदाभ्ययात्।
कदनं करिष्यंच्छत्रूणां श्वेताश्वो दुर्ज्जयो युधि॥ ३१॥ आर्य्य-
व्रतममोघञ्च ह्रीमन्तमपराजितम्। सहदेवं समायान्तं के शूराः
पर्य्यवारयन्॥ ३२॥ यस्तु सौवीरराजस्य प्रमथ्य महतीं
चमूम्। आदत्त महिषीं भोजां काम्यां सर्वाङ्गशोभनाम्॥ ३३॥
सत्यं धृतिश्च शौर्य्यञ्च ब्रह्मचर्य्यञ्च केवलम्। सर्वाणि युयुधाने च
नित्यानि पुरुषर्षभे॥३४॥ बलिनं सत्यकर्माणमदीनमपराजितम्।
वासुदेवसमं युद्धे वासुदेवादनन्तरम्॥ ३५॥ धनञ्जयोपदेशेन
श्रेष्ठमिष्वस्त्रकर्मणि। पार्थेन सममस्त्रेषु कस्तं द्रोणादवारयत्
॥ ३६॥ वृष्णीनां प्रवरं वीरं शूरं सर्वधनुष्मताम्। रामेण
सममस्त्रेषु यशसा विक्रमेण च॥ ३७॥ सत्यं धृतिर्मतिः शौर्य्यं
ब्राह्मंच चास्त्रमनुत्तमम्। सात्वते तानि सर्वाणि त्रैलोक्यमिव
केशवे॥ ३८॥ तदेवं गुणसम्पन्नं दुर्वारमपि दैवतैः। समा-
साद्य महेष्वासं के शूराः पर्य्यवारयन्॥ ३९॥ पाञ्चालेषूत्तमं
वीरमुत्तमाभिजनप्रियम्। नित्यमुत्तमकर्माणमुत्तमौजसमाहवे॥४०
युक्तं धनञ्जयहिते ममानर्थाय सुत्थितम्। यमवैश्रवणादित्यमहेन्द्र-
वरुणोपमम्॥ ४१॥ महारथं समाख्यातं द्रोणायोद्यतमाहवे।
त्यजन्तं तुमुले प्राणान् के शूराः समवारयन्॥ ४२॥ एकोऽप-
सृत्य चेदिभ्यः पाण्डवान् यः समाश्रितः। धृष्टकेतुं समायान्तं
द्रोणं कस्तं न्यवारयत्॥ ४३॥ योऽवधीत् केतुमान् वीरो
राजपुत्रं दुरासदम्। अपक्रान्तं गिरिद्वारे द्रोणात् कस्तमवा-
रायत्॥ ४४॥ स्त्रीपुंसयोर्नरव्याघ्रो यः सवेद गुणागुणान्।
शिखण्डिनं याज्ञसेनिमम्लानमनसं युधि॥ ४५॥ देवव्रतस्य
समरे हेतुं मृत्योर्महात्मनः। द्रोणायाभिमुखं यान्तं के वीराः
पर्य्यवारयन्॥ ४६॥ वृष्णीनां प्रवरं शूरं वरं सर्वधनुष्मताम्।

यस्मिन्नभ्यधिका वीरे गुणाः सर्व्वे धनञ्जयात् ॥ ४७ ॥ यस्मिन्नस्त्राणि सत्यञ्च ब्रह्मचर्य्यञ्च सर्व्वदा । वासुदेवसमं वीर्य्ये धनञ्जयसमं बले ॥ ४८ ॥ तेजसादित्यसदृशं बृहस्पतिसमं मतौ । अभिमन्युं महात्मानं व्यात्ताननमिवान्तकम् ॥ ४९ ॥ द्रोणायाभिमुखं यान्तं के शूराः समवारयन् । तरुणस्तरुणप्रज्ञः सौभद्रः परवीरहा ॥ ५० ॥ यदाभ्यधावद्वै द्रोणं तदासीद्वो मनः कथम् । द्रौपदेया नरव्याघ्राः समुद्रमिव सिन्धवः ॥ ५१ ॥ यद्द्रोणमाद्रवत् सञ्जय के शूरास्तानवारयन् । ये ते द्वादशवर्षाणि क्रीड़ामुत्सृज्य बालकाः ॥ ५२ ॥ अस्त्रार्थमवसन् भीष्मे बिभ्रतो व्रतमुत्तमम् । क्षत्रञ्जयः क्षत्रदेवः क्षत्रवर्मा च मानदः ॥ ५३ ॥ धृष्टद्युम्नात्मजा वीराः के तान् द्रोणादवारयन् । शताद्विशिष्टं यं युद्धे सममन्यन्त वृष्णयः ॥ ५४ ॥ चेकितानं महेष्वासं कस्तं द्रोणादवारयत् । भ्रातरः पञ्च कैकेया धार्म्मिकाः सत्यविक्रमाः ॥ ५५ ॥ इन्द्रगोपकसङ्काशा रक्तवर्म्मायुधध्वजाः । मातृष्वसुः सुता वीराः पाण्डवानां जयार्थिनः ॥ ५६ ॥ तान् द्रोणं हन्तुमायातान् के वीराः पर्य्यवारयन् । यं योधयन्तो राजानो नाजयन् वारणावते ॥ ५७ ॥ षण्मासानपि संरब्धा जिघांसन्तो युधां पतिम् । धनुष्मतां वरं शूरं सत्यसन्धं महाबलम् ॥ ५८ ॥ द्रोणात् कस्तं नरव्याघ्रं युयुत्सुं पर्य्यवारयत् । यः पुत्रं काशिराजस्य वाराणस्यां महारथम् ॥ ५९ ॥ समरे स्त्रीषु गृध्यन्तं भल्लेनापाहरद्रथात् । धृष्टद्युम्नं महेष्वासं पार्थानां मन्त्रधारिणम् ॥ ६० ॥ युक्तं दुर्य्योधनानर्थे सृष्टं द्रोणवधाय च । निर्द्दहन्तं रणे योधान् दारयन्तञ्च सर्व्वशः ॥ ६१ ॥ द्रोणाभिमुखमायान्तं के शूराः पर्य्यवारयन् । उत्सङ्ग इव संवृद्धं द्रुपदस्यास्त्रवित्तमम् ॥ ६२ ॥ शिखण्डिनं शस्त्रगुप्तं के वा द्रोणादवारयन् । य इमां पृथिवीं कृत्स्नां चर्म्मवत् परिवेष्टयेत् ॥ ६३ ॥ महता रथघोषेण

मुख्यारिघ्नो महारथः। दशाश्वमेधानाजह्रे स्वन्नपानान् सुद-क्षिणान् ॥ ६४ ॥ निरर्गलान् सर्वमेधान् पुत्रवत् पालयन् प्रजाः। गङ्गास्रोतःसु यावत्यः सिकताश्चाप्यशेषतः ॥ ६५ ॥ तावतीर्गा ददौ वीर उशीनरसुतोऽध्वरे। न पूर्वे नापरे चक्रुरिदं केचन मानवाः ॥ ६६ ॥ इतीदं चुक्रुशुर्देवाः कृते कर्म्मणि दुष्करे। पश्यामस्त्रिषु लोकेषु न तं संस्थास्नु चारिषु ॥ ६७ ॥ जातं वापि जनिष्यन्तं द्वितीयञ्चापि साम्प्रतम्। अन्यमौशीनराच्छैव्याद्धुरोवोढारमित्युत ॥ ६८ ॥ गतिं यस्य न यास्यन्ति मानुषा लोकवासिनः। तस्य नप्तारमायान्तं शैब्यं कः समवारयत् ॥ ६९ ॥ विराटस्य रथा-नीकं मत्स्यस्यामित्रघातिनः। प्रेप्सन्तं समरे द्रोणं के वीराः पर्य्यवारयन् ॥ ७० ॥ सद्यो वृकोदराज्जातो महाबलपराक्रमः। मायावी राक्षसो वीरो यस्मान्मम महद्भयम् ॥ ७१ ॥ पार्थानां जयकामं तं पुत्राणां मम कण्ठकम्। घटोत्कचं महाकायं कस्तं द्रोणादवारयत् ॥ ७२ ॥ एते चान्ये च बहवो येषामर्थाय सञ्जय। त्यक्तारः संयुगे प्राणान् किन्तेषामजितं युधि ॥ ७३ ॥ येषाञ्च पुरुषव्याघ्रः शार्ङ्गधन्वा व्यपाश्रयः। हितार्थी चापि पार्थानां कथं तेषां पराजयः ॥ ७४ ॥ लोकानां गुरुरत्यर्थं लोकनाथः सनातनः। नारायणो रणे नाथो नृणां दिव्यात्मवान् प्रभुः ॥ ७५ ॥ यस्य दिव्यानि कर्म्माणि प्रवदन्ति मनीषिणः। तान्यहं कीर्त्तयिष्यामि भक्त्या स्थैर्य्यार्थमात्मनः ॥ ७६ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि धृतराष्ट्रवाक्ये दशमोऽध्यायः ॥ १० ॥

---

धृतराष्ट्र उवाच। शृणु दिव्यानि कर्म्माणि वासुदेवस्य सञ्जय। कृतवान् यानि गोविन्दो यथा नान्यः पुमान् क्वचित् ॥ १ ॥ संवर्द्धता गोपकुले बालेनैव महात्मना। विख्यापितं बलं बाह्वो-

स्त्रिषु लोकेषु सञ्जय ॥ २ ॥ उच्चैःश्रवस्तुल्यबलं वायुवेगसमं जवे।
जघान हयराजानं यमुनावनवासिनम् ॥ ३ ॥ दानवं घोरकर्म्माणं
गवां मृत्युमिवोत्थितम्। वृषरूपधरं बाल्ये भुजाभ्यां निजघान
ह ॥ ४ ॥ प्रलम्बं नरकं जम्भं पीठं वापि महासुरम्। मुरञ्चा-
मरसङ्काशमवधीत् पुष्करेक्षणः ॥ ५ ॥ तथा कंसो महातेजा
जरासन्धेन पालितः। विक्रमेणैव कृष्णेन सगणः पातितो रणे
॥ ६ ॥ सुनामा रणविक्रान्तः समग्राक्षौहिणीपतिः। भोज-
राजस्य मध्यस्थो भ्राता कंसस्य वीर्य्यवान् ॥ ७ ॥ बलदेवद्वितीयेन
कृष्णेनामित्रघातिना। तरस्वी समरे दग्धः ससैन्यः शूरसेनराट्
॥ ८ ॥ दुर्व्वासा नाम विप्रर्षिस्तथा परमकोपनः। आराधितः
सदारेण स चास्मै प्रददौ वरान् ॥ ९ ॥ तथा गान्धारराजस्य
सुतां वीरः स्वयम्वरे। निर्ज्जित्य पृथिवीपालानवहत् पुष्करे-
क्षणः ॥ १० ॥ अमृष्यमाणा राजानो यस्य जात्या हया इव।
रथे वैवाहिके युक्ताः प्रतोदेन कृतव्रणाः ॥ ११ ॥ जरासन्धं महा-
बाहुमुपायेन जनार्द्दनः। परेण घातयामास समग्राक्षौहिणी-
पतिम् ॥ १२ ॥ चेदिराजञ्च विक्रान्तं राजसेनापतिं बली। अर्घ्ये
विवदमानञ्च जघान पशुवत्तदा ॥ १३ ॥ सौमं दैत्यपुरं खस्थं
शाल्वगुप्तं दुरासदम्। समुद्रकुक्षौ विक्रम्य पातयामास माधवः
॥ १४ ॥ अङ्गान् वङ्गान् कलिङ्गांश्च मागधान् काशिकोशलान्।
वात्स्यगार्ग्यकरूषांश्च पौण्ड्रांश्चाप्यजयद्रणे ॥ १५ ॥ आवन्त्यान्
दाक्षिणात्यांश्च पार्व्वतीयान् दशेरकान्। काश्मीरकानौरसिकान्
पिशाचांश्च समुद्गलान् ॥ १६ ॥ काम्बोजान् वाटधानांश्च चोलान्
पाण्ड्यांश्च सञ्जय। त्रिगर्त्तान्मालवांश्चैव दरदांश्च सुदुर्ज्जयान्
॥ १७ ॥ नानादिग्भ्यश्च सम्प्राप्तान् खसांश्चैव शकांस्तथा। जित-
वान् पुण्डरीकाक्षो यवनञ्च सहानुगम् ॥ १८ ॥ प्रविश्य मकरा-
वासं यादोभिरभिसंवृतम्। जिगाय वरुणं सङ्ख्ये सलिलान्त-

र्गतं पुरा ॥ १९ ॥ युधि पञ्चजनं हत्वा पातालतलवासिनम् । पाञ्चजन्यं हृषीकेशो दिव्यं शङ्खमवाप्तवान् ॥ २० ॥ खाण्डवे पार्थसहितस्तोषयित्वा हुताशनम् । आग्नेयमस्त्रं दुर्द्धर्षं चक्रं लेभे महाबलः ॥ २१ ॥ वैनतेयं समारुह्य त्रासयित्वामरावतीम् । महेन्द्रभवनाद्वीरः पारिजातमुपानयत् ॥ २२ ॥ तच्च मर्षितवान् शक्रो जानंस्तस्य पराक्रमम् । राज्ञां चाप्यजितं कञ्चित् कृष्णेनेह न शुश्रुम ॥ २३ ॥ यच्च तन्महदाश्चर्य्यं सभायां मम सञ्जय । कृतवान् पुण्डरीकाक्षः कस्तदन्य इहार्हति ॥ २४ ॥ यच्च भक्त्या प्रपन्नोऽहमद्राक्षं कृष्णमीश्वरम् । तन्मे सुविदितं सर्वं प्रत्यक्षमिव चागमात् ॥ २५ ॥ नान्तं विक्रमयुक्तस्य बुद्ध्या युक्तस्य वा पुनः । कर्म्मणा शक्यते गन्तुं हृषीकेशस्य सञ्जय ॥ २६ ॥ तथा गदश्च शाम्बश्च प्रद्युम्नोऽथ विदूरथः । अगावहोऽनिरुद्धश्च चारुदेष्णः ससारणः ॥ २७ ॥ उल्मुको निशठश्चैव झिल्लीबभ्रुश्च वीर्य्यवान् । पृथुश्च विपृथुश्चैव शमीकोऽथारिमेजयः ॥ २८ ॥ एतेऽन्ये बलवन्तश्च वृष्णिवीराः प्रहारिणः । कथञ्चित् पाण्डवानीके श्रयेयुः समरे स्थिताः ॥ २९ ॥ आहूता वृष्णिवीरेण केशवेन महात्मना । ततः संशयितं सर्वं भवेदिति मतिर्मम ॥ ३० ॥ नागायुतबलो वीरः कैलासशिखरोपमः । वनमाली हली रामस्तत्र यत्र जनार्द्दनः ॥ ३१ ॥ यमाहुः सर्वपितरं वासुदेवं द्विजातयः । अपि वा ह्येष पाण्डूनां योत्स्यतेऽर्थाय सञ्जय ॥ ३२ ॥ स यदा तात सन्नह्येत् पाण्डवार्थाय सञ्जय । न तदा प्रतिसंयोद्धा भविता तस्य कश्चन ॥ ३३ ॥ यदि स्म कुरवः सर्वे जयेयुर्नाम पाण्डवान् । वार्ष्णेयोऽर्थाय तेषां वै गृह्णीयाच्छस्त्रमुत्तमम् ॥ ३४ ॥ ततः सर्वान्नरव्याघ्रो हत्वा नरपतीन् रणे । कौरवांश्च महाबाहुः कुन्त्यै दद्यात् स मेदिनीम् ॥ ३५ ॥ यस्य यन्ता हृषीकेशो योद्धा यस्य धनञ्जयः । रथस्य तस्य कः सङ्ख्ये प्रत्यनीको भवेद्रथः

॥ ३६ ॥ न केनचिदुपायेन कुरूणां दृश्यते जयः। तस्मान्मे सर्व्वमाचक्ष्व यथा युद्धमवर्त्तत ॥ ३७ ॥ अर्जुनः केशवस्यात्मा कृष्णोऽप्यात्मा किरीटिनः। अर्जुने विजयो नित्यं कृष्णे कीर्त्तिश्च शाश्वती ॥ ३८ ॥ सर्व्वेष्वपि च लोकेषु वीभत्सुरपराजितः। प्राधान्येनैव भूयिष्ठममेयाः केशवे गुणाः ॥ ३९ ॥ मोहात् दुर्य्योधनः कृष्णं यो न वेत्तीह केशवम्। मोहितो दैवयोगेन मृत्युपाशपुरस्कृतः ॥ ४० ॥ न वेद कृष्णं दाशार्हमर्जुनं चैव पाण्डवम्। पूर्व्वदेवौ महात्मानौ नरनारायणावुभौ ॥ ४१ ॥ एकात्मानौ द्विधाभूतौ दृश्येते मानुषैर्भुवि। मनसापि हि दुर्द्धर्षौ सेनामेतां यशस्विनौ ॥ ४२ ॥ नाशयेतामिहेच्छन्तौ मानुषत्वाच्च नेच्छतः। युगस्येव विपर्य्यासो लोकानामिव मोहनम् ॥ ४३ ॥ भीष्मस्य च वधस्तात द्रोणस्य च महात्मनः। न ह्येव ब्रह्मचर्य्येण न वेदाध्ययनेन च ॥ ४४ ॥ न क्रियाभिर्न चास्त्रेण मृत्योः कश्चिन्निवार्य्यते। लोकसम्भावितौ वीरौ कृतास्त्रौ युद्धदुर्मदौ ॥ ४५ ॥ भीष्मद्रोणौ हतौ श्रुत्वा किं नु जीवामि सञ्जय। यान्तां श्रियमसूयाम पुरा दृष्ट्वा युधिष्ठिरे ॥ ४६ ॥ अद्य तामनुजीवामो भीष्मद्रोणवधेन ह। मत्कृते चाप्यनुप्राप्तः कुरूणामेष सङ्क्षयः ॥ ४७ ॥ पक्वानां हि वधे सूत वज्रायन्ते तृणान्यपि। अनन्तमिदमैश्वर्य्यं लोके प्राप्तो युधिष्ठिरः ॥ ४८ ॥ यस्य कोपान्महेष्वासौ भीष्मद्रोणौ निपातितौ। प्राप्तः प्रकृतितो धर्मो न धर्मो मामकान् प्रति ॥ ४९ ॥ क्रूरः सर्व्वविनाशाय कालोऽसौ नातिवर्त्तते। अन्यथा चिन्तिता ह्यर्था नरैस्तात मनस्विभिः ॥ ५० ॥ अन्यथैवं विपद्यन्ते दैवादिति मतिर्मम। तस्मादपरिहार्य्येऽर्थे सम्प्राप्ते कृच्छ्र उत्तमे। अपारणीये दुश्चिन्त्ये यथाभूतं प्रचक्ष्व मे ॥ ५१ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि धृतराष्ट्रविलापे एकादशोऽध्यायः ॥ ११ ॥

सञ्जय उवाच। हन्त ते कथयिष्यामि सर्वं प्रत्यक्षदर्शिवान्। यथा सन्न्यपतद्द्रोणः सादितः पाण्डुसृञ्जयैः॥ १॥ सेनापतित्वं सम्प्राप्य भारद्वाजो महारथः। मध्ये सर्वस्य सैन्यस्य पुत्रं ते वाक्यमब्रवीत्॥ २॥ यत् कौरवाणामृषभादापगेयादनन्तरम्। सैनापत्येन मां राजन्नद्य सत्कृतवानसि॥ ३॥ सदृशं कर्मणस्तस्य फलमाप्नुहि भारत। करोमि कामं कन्तेऽद्य प्रवृणीष्व यथेच्छसि॥ ४॥ ततो दुर्य्योधनो राजा कर्णदुःशासनादिभिः। तमथोवाच दुर्द्धर्षमाचार्य्यं जयतां वरम्॥ ५॥ ददासि चेद्वरं मह्यं जीवग्राहं युधिष्ठिरम्। गृहीत्वा रथिनां श्रेष्ठं मत्समीपमिहानय॥६॥ ततः कुरूणामाचार्य्यः श्रुत्वा पुत्रस्य ते वचः। सेनां प्रहर्षयन् सर्वामिदं वचनमब्रवीत्॥ ७॥ धन्यः कुन्तीसुतो राजा यस्य ग्रहणमिच्छसि। न वधार्थं सुदुर्द्धर्ष वरमन्यं प्रयाचसे॥ ८॥ किमर्थञ्च नरव्याघ्र न वधं तस्य काङ्क्षसि। नाशंससि क्रियामेतां मत्तो दुर्य्योधन ध्रुवम्॥ ९॥ आहोस्विद्धर्मराजस्य द्वेष्टा तस्य न विद्यते। यदिच्छसि त्वं जीवन्तं कुलं रक्षसि चात्मनः॥ १०॥ अथ वा भरतश्रेष्ठ निर्ज्जित्य युधि पाण्डवान्। राज्यं सम्प्रति दत्त्वा च सौभ्रात्रं कर्त्तुमिच्छसि॥ ११॥ धन्यः कुन्तीसुतो राजा सुजातञ्चास्य धीमतः। अजातशत्रुता तस्य सत्यं यत् स्निह्यते भवान्॥ १२॥ द्रोणेन त्वेवमुक्तस्य तव पुत्रस्य भारत। सहसा निःसृतो भावो योऽस्य नित्यं हृदि स्थितः॥ १३॥ नाकारो गूहितुं शक्यो वृहस्पतिसमैरपि। तस्मात्तव सुतो राजन् प्रहृष्टो वाक्यमब्रवीत्॥ १४॥ वधे कुन्तीसुतस्याजौ नाचार्य्य विजयो मम। हते युधिष्ठिरे पार्थो हन्यात् सर्वान् हि नो ध्रुवम्॥ १५॥ न च शक्या रणे सर्वे निहन्तुममरैरपि। य एव तेषां शेषः स्यात् स एवास्मानशेषयेत्॥ १६॥ सत्यप्रतिज्ञे त्वानीते पुनर्द्यूतेन निर्ज्जिते। पुनर्यास्यन्त्यरण्याय पाण्डवास्तमनुव्रताः॥१७॥

सोऽयं मम जयो व्यक्तं दीर्घकालं भविष्यति। अतो न वधमिच्छामि धर्मराजस्य कर्हिचित् ॥ १८ ॥ तस्य जिह्ममभिप्रायं ज्ञात्वा द्रोणोऽर्थतत्त्ववित्। तं वरं सान्तरं तस्मै ददौ सञ्चिन्त्य बुद्धिमान् ॥ १९ ॥

द्रोण उवाच। न चेद्युधिष्ठिरं वीरः पालयत्यर्जुनो युधि। मन्यस्व पाण्डवश्रेष्ठमानीतं वशमात्मनः ॥ २० ॥ न हि शक्यो रणे पार्थः सेन्द्रैर्देवासुरैरपि। प्रत्युद्यातुमतस्तात नैतदामर्षयाम्यहम् ॥ २१ ॥ असंशयं स शिष्यो मे मत्पूर्वश्चास्त्रकर्मणि। तरुणः सुकृतैर्युक्त एकायनगतश्च ह ॥ २२ ॥ अस्त्राणीन्द्राच्च रुद्राच्च भूयः स समवाप्तवान्। अमर्षितश्च ते राजन् ततो नामर्षयाम्यहम् ॥ २३ ॥ स चापक्राम्यतां युद्धात् येनोपायेन शक्यते। अपनीते ततः पार्थे धर्मराजो जितस्त्वया ॥ २४ ॥ ग्रहणे हि जयस्तस्य न वधे पुरुषर्षभ। एतेन चाप्युपायेन ग्रहणं समुपैष्यति ॥ २५ ॥ अहं गृहीत्वा राजानं सत्यधर्मपरायणम्। आनयिष्यामि ते राजन् वशमद्य न संशयः ॥२६॥ यदि स्थास्यति संग्रामे मुहूर्त्तमपि मेऽग्रतः। अपनीते नरव्याघ्रे कुन्तीपुत्रे धनञ्जये ॥ २७ ॥ फाल्गुनस्य समक्षन्तु न हि शक्यो युधिष्ठिरः। ग्रहीतुं समरे राजन् सेन्द्रैरपि सुरासुरैः ॥ २८ ॥

सञ्जय उवाच। सान्तरं तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे। गृहीतं तममन्यन्त तव पुत्राः सुबालिशाः ॥ २९ ॥ पाण्डवेषु च सापेक्षं द्रोणं जानाति ते सुतः। ततः प्रतिज्ञास्थैर्य्यार्थं स मन्त्रो बहुलीकृतः ॥ ३० ॥ ततो दुर्य्योधनेनापि ग्रहणं पाण्डवस्य तत्। सैन्यस्थानेषु सर्व्वेषु सुघोषितमरिन्दम ॥ ३१ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि द्रोणवरदाने द्वादशोऽध्यायः ॥ १२ ॥

सञ्जय उवाच। अन्तरे तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे। ततस्ते सैनिकाः श्रुत्वा तं युधिष्ठिरनिग्रहम्॥ १॥ सिंहनाद-रवांश्चक्रुर्बाणशङ्खरवैः सह। तत्तु सर्वं यथान्यायं धर्मराजेन भारत॥ २॥ आप्तैराशुपरिज्ञातं भारद्वाजचिकीर्षितम्। ततः सर्वान् समानाय्य भ्रातॄनन्यांश्च सर्वशः॥ ३॥ अब्रवीद्धर्मराजस्तु धनञ्जयमिदं वचः। श्रुतन्ते पुरुषव्याघ्र द्रोणस्याद्य चिकीर्षितम्॥ ४॥ यथा तन्न भवेत् सत्यं तथा नीतिर्विधीयताम्। सान्तरं हि प्रतिज्ञातं द्रोणेनामित्रकर्षिणा॥ ५॥ तच्चान्तरं महेष्वास त्वयि तेन समाहितम्। स तमद्य महाबाहो युध्यस्व मदनन्तरम्। यथा दुर्य्योधनः कामं नेमं द्रोणादवाप्नुयात्॥ ६॥

अर्जुन उवाच। यथा मे न बधः कार्य्य आचार्य्यस्य कदाचन। तथा तव परित्यागो न मे राजंश्चिकीर्षितम्॥ ७॥ अप्येवं पाण्डव प्राणानुत्सृजेयमहं युधि। प्रतीपो नाहमाचार्य्ये भवेयं वै कथञ्चन॥ ८॥ त्वां निगृह्याहवे राज्यं धार्त्तराष्ट्रोऽयमिच्छति। न स तं जीवलोकेऽस्मिन् कामं प्राप्ता कथञ्चन॥ ९॥ प्रपतेत् द्यौः सनक्षत्रा पृथिवी शकलीभवेत्। न त्वां द्रोणो निगृह्णीयात् जीवमाने मयि ध्रुवम्॥ १०॥ यदि तस्य रणे साह्यं कुरुते वज्रभृत् स्वयम्। विष्णुर्वा सहितो देवैर्न त्वां प्राप्स्यत्यसौ मृधे॥ ११॥ मयि जीवति राजेन्द्र न भयं कर्त्तुमर्हसि। द्रोणा-दस्त्रभृतां श्रेष्ठात् सर्वशस्त्रभृतामपि॥ १२॥ अन्यच्च ब्रूयां राजेन्द्र प्रतिज्ञा मम निश्चला। न स्मरास्यनृतां वाचं न स्मरामि पराजयम्। न स्मरामि प्रतिश्रुत्य किञ्चिदप्यनृतं कृतम्॥ १३॥

सञ्जय उवाच। ततः शङ्खाश्च भेर्य्यश्च मृदङ्गाश्चानकैः सह। प्रावाद्यन्त महाराज पाण्डवानां निवेशने॥ १४॥ सिंहनादश्च सञ्जज्ञे पाण्डवानां महात्मनाम्। धनुर्ज्यातलशब्दश्च गगनस्पृक् सुभैरवः॥ १५॥ तं श्रुत्वा शङ्खनिर्घोषं पाण्डवस्य महौजसः।

तद्योधेष्वप्यनीकेषु वादित्राण्यभिजघ्निरे ॥१६॥ ततो व्यूढान्यनी-
कानि तव तेषाञ्च भारत। शनैरुपेयुरन्योऽन्यं योत्स्यमानानि
संयुगे ॥ १७ ॥ ततः प्रववृते युद्धं तुमुलं लोमहर्षणम्। पाण्ड-
वानां कुरूणाञ्च द्रोणपाञ्चालयोरपि ॥ १८ ॥ यतमानाः प्रयत्नेन
द्रोणानीकविशातने। न शेकुः सृञ्जया युद्धे तद्धि द्रोणेन पालि-
तम् ॥ १९ ॥ तथैव तव पुत्रस्य रथोदाराः प्रहारिणः। न
शेकुः पाण्डवीं सेनां पाल्यमानां किरीटिना ॥ २० ॥ आस्तान्ते
स्तिमिते सेने रक्ष्यमाणे परस्परम्। सम्प्रसुप्ते यथा नक्तं वन-
राज्यौ सुपुष्पिते ॥ २१ ॥ ततो रुक्मरथो राजन्नर्केणेव विरा-
जता। वरूथिनीं विनिष्पिष्य व्यचरत् पृतनान्तरे ॥ २२ ॥ तमु-
द्यतरथेनैकमाशुकारिणमाहवे। अनेकमिव सन्त्रासे मेनिरे
पाण्डुसृञ्जयाः ॥ २३ ॥ तेन मुक्ताः शरा घोरा विचेरुः सर्वतो
दिशः। त्रासयन्तो महाराज पाण्डवेयस्य वाहिनीम् ॥ २४ ॥
मध्यन्दिनमनुप्राप्तो गभस्तिशतसंवृतः। यथा दृश्येत घर्मांशुस्तथा
द्रोणो व्यदृश्यत ॥ २५ ॥ न चैनं पाण्डवेयानां कश्चिच्छक्नोति
भारत। वीक्षितुं समरे क्रुद्धं महेन्द्रमिव मानवः ॥ २६ ॥ मोह-
यित्वा ततः सैन्यं भारद्वाजः प्रतापवान्। धृष्टद्युम्नबलं तूर्णं
व्यधमन्निशितैः शरैः ॥ २७ ॥ स दिशः सर्वतो रुद्धा संवृत्य
खमजिह्मगैः। पार्षतो यत्र तत्रैव ममृद्दे पाण्डुवाहिनीम् ॥२८॥

LIBRARY AUG 5 U.S. BUREAU of EDUCATION

इति द्रोणपर्वणि द्रोणाभिषेकपर्वणि युधिष्ठिरग्रहणप्रतिज्ञायां
त्रयोदशोऽध्यायः ॥ १३ ॥

---

सञ्जय उवाच। ततः स पाण्डवानीके जनयंस्तुमुलं महत्।
व्यचरत् पृतनां द्रोणो दहन् वृक्षमिवानलः ॥ १ ॥ निर्दहन्त-
मनीकानि साक्षादग्निमिवोत्थितम्। दृष्ट्वा रुक्मरथं क्रुद्धं सम-
कम्पन्त सृञ्जयाः ॥ २ ॥ प्रततं कृष्यतः सङ्ख्ये धनुषोऽस्यानु-

कारिणः। ज्याघोषः शुश्रुवेऽत्यर्थं विस्फूर्ज्जितमिवाशनेः ॥ ३ ॥ रथिनः सादिनश्चैव नागानश्वान् पदातिनः। रौद्रा हस्तवता मुक्ताः संमृद्नन्ति स्म सायकाः ॥४॥ नानद्यमानः पर्ज्जन्यः सानिलः शुचिसङ्क्षये। अश्मवर्षमिवावर्षन् परेषामवहद्भयम् ॥ ५ ॥ विचरन् स तदा राजन् सेनाः सङ्क्षोभयन् प्रभुः। वर्द्धयामास सन्त्रासं शात्रवाणाममानुषम् ॥ ६ ॥ तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतम्। भ्रमद्रथाम्बुदे तस्मिन् दृश्यते स्म पुनः पुनः ॥ ७ ॥ स वीरः सत्यवान् प्राज्ञो धर्मनित्यः सदा पुनः। युगान्तकाले संक्रुद्धां रौद्रां प्रावर्त्तयन्नदीम् ॥ ८ ॥ अमर्षवेगप्रभवां क्रव्याद्गणसङ्कुलाम्। बलौघैः सर्वतः पूर्णां वीरवृक्षापहारिणीम् ॥९॥ शोणितोदां रथावर्त्तां हस्त्यश्वकृतरोधसाम्। कवचोत्पलसंयुक्तां मांसपङ्कसमाकुलाम् ॥ १० ॥ मेदोमज्जास्थिसिकतामुष्णीषवरफेनिलाम्। संग्रामजलदापूर्णां प्रासमत्स्यसमाकुलाम् ॥ ११ ॥ नरनागाश्वकलिलां शरवेगौघवाहिनीम्। शरीरदारुसङ्घट्टां रथकच्छपसङ्कुलाम् ॥ १२ ॥ उत्तमाङ्गोपलतटां निस्त्रिंशझषसङ्कुलाम्। रथनागह्रदोपेतां नानाभरणभूषिताम् ॥ १३ ॥ महारथशतावर्त्तां भूमिरेणूर्मिमालिनीम्। महावीर्य्यवतां सङ्ख्ये सुतरां भीरुदुस्तराम् ॥ १४ ॥ शरीरशतसम्बाधां कङ्कगृध्रनिषेविताम्। महारथसहस्राणि नयन्तीं यमसादनम् ॥ १५ ॥ शूरव्यालसमाकीर्णां प्राणिराजिनिषेविताम्। छिन्नच्छत्रमहाहंसां मुकुटाण्डजसेविताम् ॥ १६ ॥ चक्रकूर्माङ्गदानक्रां शरक्षुद्रझषाकुलाम्। बलगृध्रशृगालानां घोरसङ्घैर्निषेविताम् ॥ १७ ॥ निहतान् प्राणिनः सङ्ख्ये द्रोणेन बलिना रणे। वहन्तीं पितृलोकाय शतशो राजसत्तम ॥ १८ ॥ शरीरशतसम्बाधां केशशैवालशाद्वलाम्। नदीं प्रावर्त्तयद्राजन् भीरूणां भयवर्द्धिनीम् ॥ १९ ॥ तज्जयन्तमनीकानि तानि तानि महारथम्। सर्वतोऽभ्यद्रवन्द्रोणं

युधिष्ठिरपुरोगमाः॥ २० ॥ तानभिद्रवतः शूरांस्तावका दृढ़विक्रमाः। सर्वतः प्रत्यगृह्णन्त तदभूल्लोमहर्षणम्॥ २१॥ शतमायस्तु शकुनिः सहदेवं समाद्रवत्। सनियन्तृध्वजरथं विव्याध निशितैः शरैः॥ २२॥ तस्य माद्रीसुतः केतुं धनुः सूतं हयानपि। नातिक्रुद्धः शरैश्छित्त्वा षष्ट्या विव्याध सौबलम्॥ २३॥ सौबलस्तु गदां गृह्य प्रचस्कन्द रथोत्तमात्। स तस्य गदया राजन् रथात् सूतमपातयत्॥ २४॥ ततस्तौ विरथौ राजन् गदाहस्तौ महाबलौ। चिक्रीड़तू रणे शूरौ सशृङ्गाविव पर्व्वतौ॥ २५॥ द्रोणः पञ्चालराजानं विद्ध्वा दशभिराशुगैः। बहुभिस्तेन चाभ्यस्तस्तं विव्याध ततोऽधिकैः॥ २६॥ विविंशतिं भीमसेनो विंशत्या निशितैः शरैः। बिद्ध्वा नाकम्पयद्वीरस्तदद्भुतमिवाभवत्॥ २७॥ विविंशतिस्तु सहसा व्यश्वकेतुशरासनम्। भीमं चक्रे महाराज ततः सैन्यान्यपूजयन्॥ २८॥ स तं न ममृषे वीरः शत्रोर्विक्रममाहवे। ततोऽस्य गदया दान्तान् हयान् सर्व्वानपातयत्॥ २९॥ हताश्वात् स रथाद्राजन् गृह्य चर्म्म महाबलः। अभ्ययाद्भीमसेनन्तु मत्तो मत्तमिव द्विपम्॥ ३०॥ शल्यस्तु नकुलं वीरः स्वस्रीयं प्रियमात्मनः। विव्याध प्रहसन् बाणैर्लालयन् कोपयन्निव॥ ३१॥ तस्याश्वानातपत्रञ्च ध्वजं सूतमथो धनुः। निपात्य नकुलः सङ्ख्ये शङ्खं दध्मौ प्रतापवान्॥ ३२॥ धृष्टकेतुः कृपेणास्तांश्छित्त्वा बहुविधान् शरान्। कृपं विव्याध सप्तत्या लक्ष्म चाप्यहनत्त्रिभिः॥ ३३॥ तं कृपः शरवर्षेण महता समवारयत्। निवार्य्य च रणे विप्रो धृष्टकेतुमयोधयत्॥ ३४॥ सात्यकिः कृतवर्म्माणं नाराचेन स्तनान्तरे। विद्ध्वा विव्याध सप्तत्या पुनरन्यैः स्मयन्निव॥ ३५॥ तं भोजः सप्तसप्तत्या विद्ध्वा सुनिशितैः शरैः। नाकम्पयत शैनेयं शीघ्रो वायुरिवाचलम्॥ ३६॥ सेनापतिः सुशर्म्माणं भृशं मर्म्मस्वताड़यत्। स चापि

तं तोमरेण जत्रुदेशेऽभ्यताड़यत् ॥ ३७ ॥ वैकर्त्तनन्तु समरे विराटः प्रत्यवारयत। सहमत्स्यैर्महावीर्य्यैस्तदद्भुतमिवाभवत् ॥ ३८ ॥ तत् पौरुषमभूत्तत्र सूतपुत्रस्य दारुणम्। यत् सैन्यं वारयामास शरैः सन्नतपर्वभिः ॥ ३९ ॥ द्रुपदस्तु स्वयं राजा भगदत्तेन सङ्गतः। तयोर्युद्धं महाराज चित्ररूपमिवाभवत् ॥४०॥ भगदत्तस्तु राजानं द्रुपदं नतपर्वभिः। सनियन्तृध्वजरथं विव्याध पुरुषर्षभः ॥ ४१ ॥ द्रुपदस्तु ततः क्रुद्धो भगदत्तं महारथम्। आजघानोरसि क्षिप्रं शरेणानतपर्वणा ॥ ४२ ॥ युद्धं योधवरौ लोके सौमदत्तिशिखण्डिनौ। भूतानां त्रासजननं चक्रातेऽस्त्रविशारदौ ॥ ४३ ॥ भूरिश्रवा रणे राजन् याज्ञसेनिं महारथम्। महता सायकौघेन छादयामास वीर्य्यवान् ॥ ४४ ॥ शिखण्डी तु ततः क्रुद्धः सौमदत्तिं विशाम्पते। नवत्या सायकानान्तु कम्पयामास भारत ॥ ४५ ॥ राक्षसौ रौद्रकर्माणौ हैड़िम्बालम्बुषावुभौ। चक्रातेऽत्यद्भुतं युद्धं परस्परजयैषिणौ ॥ ४६ ॥ मायाशतसृजौ दृप्तौ मायाभिरितरेतरौ। चक्रातेऽत्यद्भुतं युद्धं परस्परजयैषिणौ ॥ ४७ ॥ चेकितानोऽनुविन्देन युयुधे चातिभैरवः। अन्तर्हितौ चेरतुस्तौ भृशं विस्मयकारिणौ ॥ ४८ ॥ लक्ष्मणः क्षत्रदेवेन विमर्द्दमकरोद्भृशम्। यथा विष्णुः पुरा राजन् हिरण्याक्षेण संयुगे ॥ ४९ ॥ ततः प्रचलिताश्वेन विधिवत् कल्पितेन च। रथेनाभ्यपतद्राजन् सौभद्रं पौरवोऽनदत् ॥ ५० ॥ ततोऽभ्ययात् स त्वरितो युद्धाकाङ्क्षी महाबलः। तेन चक्रे महद्युद्धमभिमन्युररिन्दमः ॥ ५१ ॥ पौरवस्त्वथ सौभद्रं शरव्रातैरवाकिरत्। तस्यार्जुनिर्ध्वजं छत्रं हयांश्चोर्व्यामपातयत् ॥ ५२ ॥ सौभद्रः पौरवं त्वन्यैर्विद्धा सप्तभिराशुगैः। पञ्चभिस्तस्य विव्याध हयान् सूतञ्च सायकैः ॥ ५३ ॥ ततः प्रहर्षयन् सेनां सिंहवद्विनदन्मुहुः। समादत्तार्जुनिस्तूर्णं पौरवान्तकरं शरम् ॥ ५४ ॥ तन्तु

सन्धितमाज्ञाय सायकं घोरदर्शनम्। द्वाभ्यां शराभ्यां हार्द्दिक्य-स्चिच्छेद सशरं धनुः ॥ ५५ ॥ तदुत्सृज्य धनुश्छिन्नं भौमद्रः परवीरहा। उद्दवर्ह सितं खड्गमाददानः शरावरम् ॥ ५६ ॥ स तेनानेकतारेण चर्म्मणा कृतहस्तवत्। भ्रान्तासिरचरन्मार्गं दर्शयन् वीर्य्यमात्मनः ॥ ५७ ॥ भ्रामितं पुनरुद्भ्रान्तमाधतं पुन-रुत्थितम्। चर्मनिस्त्रिंशयोराजन् निर्विशेषमदृश्यत ॥ ५८ ॥ स पौरवरथस्येषामाप्लुत्य सहसा नदन्। पौरवं रथमास्थाय केश-पक्षे परामृशन् ॥ ५९ ॥ जघानास्य पदा सूतमसिनापातयत् ध्वजम्। विक्षोभ्याम्भोनिधिं तार्क्ष्यस्तन्नागमिव चाक्षिपत् ॥ ६० ॥ तमागलितकेशान्तं ददृशुः सर्व्वपार्थिवाः। उक्षाणमिव सिंहेन पात्यमानमचेतसम् ॥ ६१ ॥ तमार्जुनिवशं प्राप्तं कृष्यमाणमनाथ-वत्। पौरवं पतितं दृष्ट्वा नामृष्यत जयद्रथः ॥ ६२ ॥ सवर्हिणं महाराज किङ्किणीशतजालवत्। चर्म चादाय खड्गञ्च नदन् पर्य्यपतद्रथात् ॥ ६३ ॥ ततः सैन्धवमालोक्य कार्ष्णिरुत्सृज्य पौरवम्। उत्पपात रथात्तूर्णं श्येनवन्निपपात च ॥ ६४ ॥ प्रास-पट्टिशनिस्त्रिंशाञ्छत्रुभिः सम्प्रचोदितान्। चिच्छेदाथासिना कार्ष्णिश्चर्म्मणा संरुरोध च ॥ ६५ ॥ सन्दर्शयित्वा सैन्यानां स्ववाहु-बलमात्मनः। तमुद्यम्य महाखड्गं चर्म चाथ पुनर्बली ॥ ६६ ॥ वृद्धक्षत्रस्य दायादं पितुरत्यन्तवैरिणम्। ससाराभिमुखः शूरः शार्दूल इव कुञ्जरम् ॥ ६७ ॥ तौ परस्परमासाद्य खड्गदन्त-नखायुधौ। हृष्टवत् संप्रजह्राते व्याघ्रकेशरिणाविव ॥ ६८ ॥ सम्पातेष्वभिघातेषु निपातेष्वसिचर्म्मणोः। न तयोरन्तरं कश्चि-द्ददर्श नरसिंहयोः ॥ ६९ ॥ अवक्षेपोऽसिनिर्ह्रादः शस्त्रान्तरनिद-र्शनम्। वाह्यान्तरनिपातश्च निर्विसेषमदृश्यत ॥ ७० ॥ वाह्य-मभ्यन्तरञ्चैव चरन्तौ मार्गमुत्तमम्। ददृशाते महात्मानौ सपक्षा-विव पर्वतौ ॥ ७१ ॥ ततो विक्षिपतः खड्गं सौभद्रस्य यश-

स्विनः । शरावरणपक्षान्ते प्रजहार जयद्रथः ॥ ७२ ॥ रुक्म-पत्रान्तरे सक्तस्तस्मिन् चर्मणि भारत । सिन्धुराजबलोद्भूतः सोऽभज्यत महानसिः ॥ ७३ ॥ भग्नमाज्ञाय निस्त्रिंशं सोऽवप्लुत्य पदानि षट् । अदृश्यत निमेषेण स्वरथं पुनरास्थितः ॥ ७४ ॥ तं कार्ष्णिं समरान्मुक्तमास्थितं रथमुत्तमम् । सहिताः सर्वराजानः परिवव्रुः समन्ततः ॥ ७५ ॥ ततश्चर्म च खड्गञ्च समुत्क्षिप्य महाबलः । ननादार्जुनदायादः प्रेक्षमाणो जयद्रथम् ॥ ७६॥ सिन्धुराजं पराजित्य सौभद्रः परवीरहा । तापयामास तत्सैन्यं भुवनं भास्करो यथा ॥ ७७ ॥ तस्य सर्वायसीं शक्तिं शल्यः कनकभूषणाम् । चिक्षेप समरे घोरां दीप्तामग्निशिखामिव ॥ ७८ ॥ तामवप्लुत्य जग्राह विकोशं चाकरोदसिम् । वैनतेयो यथा कार्ष्णिः पतन्तमुरगोत्तमम् ॥ ७९ ॥ तस्य लाघवमाज्ञाय सत्त्वञ्चामिततेजसः । सहिताः सर्वराजानः सिंहनादमथानदन् ॥ ८० ॥ ततस्तामेव शल्यस्य सौभद्रः परवीरहा । मुमोच भुजवीर्य्येण वैदूर्य्यविकृताजिराम् ॥ ८१ ॥ सा तस्य रथमासाद्य निर्मुक्तभुजगोपमा । जघान सूतं शल्यस्य रथाच्चैनमपातयत् ॥ ८२ ॥ ततो विराटद्रुपदौ धृष्टकेतुर्युधिष्ठिरः । सात्यकिः कैकयो भीमो धृष्टद्युम्नशिखण्डिनौ ॥ ८३ ॥ यमौ च द्रौपदेयाश्च साधुसाध्विति चुक्रुशुः । वाणशब्दाश्च विविधाः सिंहनादाश्च पुष्कलाः ॥ ८४ ॥ प्रादुरासन् हर्षयन्तः सौभद्रमपलायिनम् । तन्नामृष्यन्त पुत्रास्ते शत्रोर्विजयलक्षणम् ॥ ८५ ॥ अथैनं सहसा सर्वे समन्तान्निशितैः शरैः । अभ्याकिरन् महाराज जलदा इव पर्वतम् ॥ ८६ ॥ तेषाञ्च प्रियमन्विच्छन् सूतस्य च पराभवम् । आर्त्तायनिरमित्रघ्नः क्रुद्धः सौभद्रमभ्ययात् ॥ ८७ ॥

इति द्रोणपर्वणि द्रोणाभिषेकपर्वणि अभिमन्युपराक्रमे चतुर्द्दशोऽध्यायः ॥ १४ ॥

धृतराष्ट्र उवाच। बहूनि भुवि चित्राणि द्वन्द्वयुद्धानि सञ्जय।
त्वयोक्तानि निशम्याहं स्पृहयामि सचक्षुषाम्॥ १॥ आश्चर्य्यभूतं
लोकेषु कथयिष्यन्ति मानवाः। कुरूणां पाण्डवानाञ्च युद्धं देवा-
सुरोपमम्॥ २॥ न हि मे तृप्तिरस्तीह शृण्वतो युद्धमुत्तमम्।
तस्मादार्त्तायनेर्युद्धं सौभद्रस्य च शंस मे॥ ३॥

सञ्जय उवाच। सादितं प्रेक्ष्य यन्तारं शल्यः सर्व्वायसीं
गदाम्। समुत्क्षिप्य नदन् क्रुद्धः प्रचस्कन्द रथोत्तमात्॥ ४॥
तं दीप्तमिव कालाग्निं दण्डहस्तमिवान्तकम्। जवेनाभ्यपतद्भीमः
प्रगृह्य महतीं गदाम्॥ ५॥ सौभद्रोऽप्यशनिप्रख्यां प्रगृह्य महतीं
गदाम्। एह्येहीत्यब्रवीच्छल्यं यत्नाद्भीमेन वारितः॥ ६॥ वार-
यित्वा तु सौभद्रं भीमसेनः प्रतापवान्। शल्यमासाद्य समरे
तस्थौ गिरिरिवाचलः॥ ७॥ तथैव मद्रराजोऽपि भीमं दृष्ट्वा
महाबलः। ससाराभिमुखस्तूर्णं शार्दूल इव कुञ्जरम्॥ ८॥
ततस्तूर्य्यनिनादश्च शङ्खानाञ्च सहस्रशः। सिंहनादश्च सञ्जज्ञे
भेरीणाञ्च महास्वनः॥ ९॥ पश्यतां शतशो ह्यासीदन्योऽन्यमभि-
धावताम्। पाण्डवानां कुरूणाञ्च साधुसाध्विति निःस्वनः॥१०॥
न हि मद्राधिपादन्यः सर्व्वराजसु भारत। सोढुमुत्सहते वेगं
भीमसेनस्य संयुगे॥ ११॥ तथा मद्राधिपस्यापि गदावेगं महा-
त्मनः। सोढमुत्सहते लोके युधि कोऽन्यो वृकोदरात्॥ १२॥
पट्टैर्जाम्बूनदैर्बद्धा बभूव जनहर्षिणी। प्रजज्वाल तदा विद्धा
भीमेन महती गदा॥ १३॥ तथैव चरतो मार्गान् मण्डलानि
विचेरतुः। आवर्त्तितगदाशृङ्गावुभौ शल्यवृकोदरौ॥ १४॥
मण्डलावर्त्तमार्गेषु गदाविहरणेषु च। निर्व्विशेषमभूद्युद्धं तयोः
पुरुषसिंहयोः॥ १५॥ ताड़िता भीमसेनेन शल्यस्य महती गदा।
साग्निज्वाला महारौद्रा तदा तूर्णमशीर्य्यत॥ १६॥ तथैव
भीमसेनस्य द्विषताभिहता गदा। वर्षाप्रदोषे खद्योतैर्वृतो वृक्ष

द्रुवावभौ ॥ १७ ॥ गदा चिप्ता तु समरे मद्रराजेन भारत। व्योम दीपयमाना सा ससृजे पावकं मुहुः ॥ १८ ॥ तथैव भीमसेनेन द्विषते प्रेषिता गदा। तापयामास तत्सैन्यं महोल्का पतती यथा ॥ १९ ॥ ते चैवोभे गदे श्रेष्ठे समासाद्य परस्परम्। श्वसन्त्यौ नागकन्येव ससृजाते विभावसुम् ॥ २० ॥ नखैरिव महाव्याघ्रौ दन्तैरिव महागजौ। तौ विचेरतुरासाद्य गदाग्राभ्यां परस्परम् ॥ २१ ॥ ततो गदाग्राभिहतौ क्षणेन रुधिरोचितौ। ददृशाते महात्मानौ पुष्पिताविव किंशुकौ ॥ २२ ॥ शुश्रुवे दिक्षु सर्वासु तयोः पुरुषसिंहयोः। गदाभिघातसंह्रादः शक्राशनिरवोपमः ॥ २३ ॥ गदया मद्रराजेन सव्यदक्षिणमाहतः। नाकम्पत तदा भीमो भिद्यमान इवाचलः ॥ २४ ॥ तथा भीमगदावेगैस्ताड्यमानो महाबलः। धैर्य्यान्मद्राधिपस्तस्थौ वज्रैरिव गिरिर्हतः ॥ २५ ॥ आपेततुर्महावेगौ समुच्छ्रितगदावुभौ। पुनरन्तरमार्गस्थौ मण्डलानि विचेरतुः ॥ २६ ॥ अथाप्लुत्य पदान्यष्टौ सन्निपत्य गजाविव। सहसा लोहदण्डाभ्यामन्योऽन्यमभिजघ्नतुः ॥ २७ ॥ तौ परस्परवेगाच्च गदाभ्याञ्च भृशाहतौ। युगपत् पेततुर्वीरौ चिताविन्द्रध्वजाविव ॥ २८ ॥ ततो विह्वलमानं तं निश्वसन्तं पुनः पुनः। शल्यमभ्यपतत्तूर्णं कृतवर्मा महारथः ॥ २९ ॥ दृष्ट्वा चैनं महाराज गदयाभिनिपीड़ितम्। विचेष्टन्तं यथा नागं मूर्च्छयाभिपरिप्लुतम् ॥ ३० ॥ ततः स्वरथमारोप्य मद्राणामधिपं रणे। अपोवाह रणात्तूर्णं कृतवर्मा महारथः ॥ ३१ ॥ क्षीबवद्विह्वलो वीरो निमेषात् पुनरुत्थितः। भीमोऽपि सुमहाबाहुर्गदापाणिरदृश्यत ॥ ३२ ॥ ततो मद्राधिपं दृष्ट्वा तव पुत्राः पराङ्मुखम्। सनागपत्त्यश्वरथाः समकम्पन्त मारिष। ॥ ३३ ॥ ते पाण्डवैरर्द्यमानास्तावका जितकाशिभिः। भीता दिशोऽन्वपद्यन्त वातनुन्ना घना इव ॥ ३४ ॥ निर्ज्जित्य पाण्डवेया-

स्तान् धार्त्तराष्ट्रान् महारथाः । व्यरोचन्त रणे राजन् दीप्य-
माना इवाग्नयः ॥ ३५ ॥ सिंहनादान् भृशं चक्रुः शङ्खान् दध्मुश्च
हर्षिताः । भेरीश्च वादयामासुर्मृदङ्गांश्चानकैः सह ॥ ३६ ॥

इति द्रोणपर्व्वणि द्रोणाभिषेकपर्व्वणि शल्यापयाने
पञ्चदशोऽध्यायः ॥ १५ ॥

---

सञ्जय उवाच । तद्बलं सुमहद्दीर्णं त्वदीयं प्रेच्य वीर्य्यवान् ।
दधारैको रणे राजन् वृषसेनोऽस्त्रमायया ॥ १ ॥ शरा दश-
दिशो मुक्ता वृषसेनेन संयुगे । विचेरुस्ते विनिर्भिद्य नरवाजि-
रथद्विपान् ॥ २ ॥ तस्य दीप्ता महावाणा विनिश्चेरुः सहस्रशः ।
भानोरिव महाराज घर्मकाले मरीचयः ॥ ३ ॥ तेनार्द्दिता महा-
राज रथिनः सादिनस्तथा । निपेतुरुर्व्व्यां सहसा वातभग्ना इव
द्रुमाः ॥ ४ ॥ हयौघांश्च रथौघांश्च गजौघांश्च महारथः । अपा-
तयद्रणे राजञ्छतशोऽथ सहस्रशः ॥ ५ ॥ दृष्ट्वा तमेकं समरे
विचरन्तमभीतवत् । सहिताः सर्वराजानः परिवव्रुः समन्ततः ॥६॥
नाकुलिस्तु शतानीको वृषसेनं समभ्ययात् । विव्याध दशभिश्चैनं
नाराचैर्मर्मभेदिभिः ॥ ७ ॥ तस्य कर्णात्मजश्चापं छित्त्वा केतु-
मपातयत् । तं भ्रातरं परीप्सन्तो द्रौपदेयाः समभ्ययुः ॥ ८ ॥
कर्णात्मजं शरव्रातैश्चक्रुश्चादृश्यमञ्जसा । तान्नदन्तोऽभ्यधावन्त
द्रोणपुत्रमुखा रथाः ॥ ९ ॥ छादयन्तो महाराज द्रौपदेयान्
महारथान् । शरैर्नानाविधैस्तूर्णं पर्वतान् जलदा इव ॥ १० ॥
तान् पाण्डवाः प्रत्यगृह्णंस्त्वरिताः पुत्रगृद्धिनः । पाञ्चालाः कैकेया
मत्स्याः सृञ्जयाश्चोद्यतायुधाः ॥ ११ ॥ तद्युद्धमभवद्घोरं सुमह-
ल्लोमहर्षणम् । त्वदीयैः पाण्डुपुत्राणां देवानामिव दानवैः ॥१२॥
एवं युयुधिरे वीराः संरब्धाः कुरुपाण्डवाः । परस्परमुदीक्षन्तः

परस्परकृतागसः ॥ १३ ॥ तेषां ददृशिरे कोपात् वपूंष्यमिततेजसाम्। युयुत्सूनामिवाकाशे पतत्रिवरभोगिनाम् ॥ १४ ॥ भीमकर्णकृपद्रोणद्रौणिपार्षतसात्यकैः। बभासे स रणोद्देशः कालसूर्य्य इवोदितः ॥१५॥ तदासीत् तुमुलं युद्धं निघ्नतामितरेतरम्। महाबलानां बलिभिर्दानवानां यथा सुरैः ॥ १६ ॥ ततो युधिष्ठिरानीकमुद्धूतार्णवनिस्वनम्। त्वदीयमवधीत् सैन्यं सम्प्रद्रुतमहारथम् ॥ १७ ॥ तत् प्रभग्नं बलं दृष्ट्वा शत्रुभिर्भृशविक्षतम्। अलं द्रुतेन वः शूरा इति द्रोणोऽभ्यभाषत ॥ १८ ॥ ततः शोणहयः क्रुद्धश्चतुर्दन्त इव द्विपः। प्रविश्य पाण्डवानीकं युधिष्ठिरमुपाद्रवत् ॥ १९ ॥ तमविध्यच्छितैर्बाणैः कङ्कपत्रैर्युधिष्ठिरः। तस्य द्रोणो धनुश्छित्त्वा तं द्रुतं समुपाद्रवत् ॥ २० ॥ चक्ररक्षः कुमारस्तु पाञ्चालानां यशस्करः। दधार द्रोणमायान्तं वेलेव सरितां पतिम् ॥ २१ ॥ द्रोणं निवारितं दृष्ट्वा कुमारेण द्विजर्षभम्। सिंहनादरवो ह्यासीत् साधुसाध्विति भाषितम् ॥ २२ ॥ कुमारस्तु ततो द्रोणं सायकेन महाहवे। विव्याधोरसि संक्रुद्धः सिंहवच्च नदन्मुहुः ॥ २३ ॥ संवार्य्य तु रणे द्रोणं कुमारस्तु महाबलः। शरैरनेकसाहस्रैः कृतहस्तो जितक्लमः ॥ २४ ॥ तं शूरमार्य्यव्रतिनं मन्त्रास्त्रकृतनिश्रमम्। चक्ररक्षं परामृद्नन् कुमारं द्विजपुङ्गवः ॥ २५ ॥ स मध्यं प्राप्य सैन्यानां सर्वाः प्रविचरन् दिशः। तव सैन्यस्य गोप्तासीत् भारद्वाजो द्विजर्षभः ॥ २६ ॥ शिखण्डिनं द्वादशभिर्विंशत्या चोत्तमौजसम्। नकुलं पञ्चभिर्विद्ध्वा सहदेवञ्च सप्तभिः ॥ २७ ॥ युधिष्ठिरं द्वादशभिर्द्रौपदेयांस्त्रिभिस्त्रिभिः। सात्यकिं पञ्चभिर्विद्ध्वा मत्स्यञ्च दशभिः शरैः ॥ २८ ॥ व्यक्षोभयद्रणे योधान् यथामुख्यमभिद्रवन्। अभ्यवर्त्तत सम्प्रेप्सुः कुन्तीपुत्रं युधिष्ठिरम् ॥ २९ ॥ युगन्धरस्ततो राजन् भारद्वाजं महारथम्। वारयामास संक्रुद्धं वातोद्धतमिवार्णवम् ॥ ३० ॥ युधि-

ष्ठिरं स विद्धा तु शरैः सन्नतपर्वभिः। युगन्धरन्तु भल्लेन रथ-
नीड़ादपातयत्॥ ३१॥ ततो विराटद्रुपदौ कैकेयाः सात्यकिः
शिविः। व्याघ्रदत्तश्च पाञ्चाल्यः सिंहसेनश्च वीर्य्यवान्॥ ३२॥
एते चान्ये च बहवः परीप्सन्तो युधिष्ठिरम्। आवव्रुस्तस्य
पन्थानं किरन्तः सायकान् बहून्॥ ३३॥ व्याघ्रदत्तस्तु पाञ्चाल्यो
द्रोणं विव्याध मार्गणैः। पञ्चाशद्भिः शितैराजंस्तत उच्चुक्रुशु-
र्ज्जनाः॥ ३४॥ त्वरितं सिंहसेनस्तु द्रोणं विद्धा महारथम्।
प्राहसत् सहसा हृष्टस्त्रासयन् वै महारथान्॥ ३५॥ ततो
विस्फार्य्य नयने धनुर्ज्यामवमृज्य च। तलशब्दं महत् कृत्वा
द्रोणस्तं समुपाद्रवत्॥ ३६॥ ततस्तु सिंहसेनस्य शिरः कायात्
सकुण्डलम्। व्याघ्रदत्तस्य चाक्रम्य भल्लाभ्यामाहरद्बली॥ ३७॥
तान् प्रमृद्य शरव्रातैः पाण्डवानां महारथान्। युधिष्ठिररथा-
भ्यासे तस्थौ मृत्युरिवान्तकः॥ ३८॥ ततोऽभवन्महाशब्दो राजन्
यौधिष्ठिरे वले। हतो राजेति योधानां समीपस्थे यतव्रते॥३९॥
अब्रुवन् सैनिकास्तत्र दृष्ट्वा द्रोणस्य विक्रमम्। अद्य राजा धार्त्त-
राष्ट्रः कृतार्थो वै भविष्यति॥ ४०॥ अस्मिन् मुहूर्त्ते द्रोणस्तु
पाण्डवं गृह्य हर्षितः। आगमिष्यति नो नूनं धार्त्तराष्ट्रस्य
संयुगे॥ ४१॥ एवं सञ्जल्पतां तेषां तावकानां महारथः।
आयाज्जवेन कौन्तेयो रथघोषेण नादयन्॥ ४२॥ शोणितोदां
रथावर्त्तां कृत्वा विशसने नदीम्। शूरास्थिचयसङ्कीर्णां प्रेतकूला-
पहारिणीम्॥ ४३॥ तां शरौघमहाफेनां प्रासमत्स्यसमाकुलाम्।
नदीमुत्तीर्य्य वेगेन कुरून् विद्राव्य पाण्डवः॥ ४४॥ ततः
किरीटी सहसा द्रोणानीकमुपाद्रवत्। छादयन्निषुजालेन महता
मोहयन्निव॥ ४५॥ शीघ्रमभ्यस्यतो वाणान् सन्दधानस्य चानि-
शम्। नान्तरं ददृशे कश्चित् कौन्तेयस्य यशस्विनः॥ ४६॥ न
दिशो नान्तरिक्षञ्च न द्यौर्नैव च मेदिनी। अदृश्यत महाराज

वाणभूता इवाभवत् ॥ ४७ ॥ नादृश्यत तदा राजंस्तत्र किञ्चन संयुगे। वाणान्धकारे महति कृते गाण्डीवधन्वना ॥ ४८ ॥ सूर्य्ये चास्तमनुप्राप्ते रजसा चाभिसंवृते। नाज्ञायत तदा शत्रुर्न सुहृन्न च कश्चन ॥ ४९ ॥ ततोऽवहारं चक्रुस्ते द्रोणदुर्य्योधनादयः। तान् विदित्वा पुनस्त्रस्तानयुद्धमनसः परान् ॥ ५० ॥ स्वान्यनीकानि वीभत्सुः शनकैरवहारयत्। ततोऽभितुष्टुवुः पार्थं प्रहृष्टाः पाण्डुसृञ्जयाः ॥ ५१ ॥ पाञ्चालाश्च मनोज्ञाभिर्वाग्भिः सूर्य्यमिवर्षयः। एवं स्वशिविरं प्रायाज्जित्वा शत्रून् धनञ्जयः। पृष्ठतस्तस्य सैन्यानां मुदितो वै सकेशवः ॥ ५२ ॥ मसारगल्वर्कसुवर्णरूप्यैर्वज्रप्रवालस्फटिकैश्च मुख्यैः। चित्रे रथे पाण्डुसुतो वभासे नक्षत्रचित्रे वियतीव चन्द्रः ॥ ५३ ॥

इति द्रोणपर्वणि द्रोणाभिषेकपर्वणि अर्जुनजये षोड़शोऽध्यायः। समाप्तञ्च द्रोणाभिषेकपर्व ॥ १६ ॥

---

## अथ संशप्तकवधपर्व ।

सञ्जय उवाच। ते सेने शिविरं गत्वा न्यविशेतां विशाम्पते। यथाभागं यथान्यायं यथागुल्मञ्च सर्वशः॥ १ ॥ कृत्वावहारं सैन्यानां द्रोणः परमदुर्मनाः। दुर्य्योधनमभिप्रेक्ष्य सव्रीड़मिदमब्रवीत् ॥ २ ॥ उक्तमेतन्मया पूर्वं न तिष्ठति धनञ्जये। शक्यो ग्रहीतुं सङ्ग्रामे देवैरपि युधिष्ठिरः ॥ ३ ॥ इति तद्वः प्रपततां कृतं पार्थेन संयुगे। माविशङ्कीर्वचोमह्यमजेयौ कृष्णपाण्डवौ ॥४॥ अपनीते तु योगेन केनचिच्छ्वेतवाहने। तत एष्यति ते राजन् वशमद्य युधिष्ठिरः ॥ ५ ॥ कश्चिदाह्वयतं सङ्ख्ये देशमन्यं प्रकर्षतु। तमजित्वा न कौन्तेयो बिवर्त्तेत कथञ्चन ॥ ६ ॥ एतस्मिन्नन्तरे शून्ये धर्म्मराजमहं नृप। ग्रहीष्यामि चमूं भित्त्वा धृष्ट-

द्युम्नस्य पश्यतः ॥ ७ ॥ एवन्तेऽह्व महाराज धर्मपुत्रं युधिष्ठिरम्। समानेष्यामि सगणं वशमद्य न संशयः ॥ ८ ॥ यदि तिष्ठति सङ्ग्रामे मुहूर्त्तमपि पाण्डवः। तमानयामि सङ्ग्रामाद्विजयात्तद्विंशिष्यते ॥ ९ ॥

सञ्जय उवाच। द्रोणस्य तद्वचः श्रुत्वा त्रिगर्त्ताधिपतिस्तथा। भ्रातृभिः सहितो राजन्निदं वचनमब्रवीत् ॥ १० ॥ वयं विनिकृता राजन् सदा गाण्डीवधन्वना। अनागःस्वपि चागस्कृदस्मासु भरतर्षभ ॥ ११ ॥ ते वयं स्मरमाणास्तान् विनिकारान् पृथग्विधान्। क्रोधाग्निना दह्यमाना न शेमहि सदा निशि ॥ १२ ॥ स नो दिष्ट्यास्त्रसम्पन्नश्चक्षुर्विषयमागतः। कर्त्तारः स्म वयं कर्म यच्चिकीर्षाम हृद्गतम् ॥ १३ ॥ भवतश्च प्रियं यत्स्याद्स्माकञ्च यशस्करम्। वयमेनं हनिष्यामो निष्कृष्यायोधनाद्बहिः ॥ १४ ॥ अद्यास्त्वनर्जुना भूमिरत्रिगर्त्ताथ वा पुनः। सत्यं ते प्रतिजानीमो नैतन्मिथ्या भविष्यति ॥ १५ ॥ एवं सत्यरथश्चोक्त्वा सत्यवर्मा च भारत। सत्यव्रतश्च सत्येषुः सत्यकर्मा तथैव च ॥ १६ ॥ सहिताः भ्रातरः पञ्च रथानामयुतेन च। न्यवर्त्तत महाराज कृत्वा शपथमाहवे ॥ १७ ॥ मालवस्तुण्डिकेरश्च रथानामयुतैस्त्रिभिः। सुशर्मा च नरव्याघ्रः त्रिगर्त्तः प्रस्थलाधिपः ॥ १८ ॥ मावेल्लकैर्ललित्यैश्च सहितो मद्रकैरपि। रथानामयुतेनैव सोऽगमत् भ्रातृभिः सह ॥ १९ ॥ नानाजनपदेभ्यश्च रथानामयुतेन च। समुत्थितं विशिष्टानां शपथार्थमुपागमत् ॥ २० ॥ ततो ज्वलनमानाय्य कृत्वा सर्वे पृथक् पृथक्। जगृहुः कुशचीराणि चित्राणि कवचानि च ॥ २१ ॥ ते च बद्धतनुत्राणा घृताक्ताः कुशचीरिणः। मौर्व्वीमेखलिनो वीराः सहस्रशतदक्षिणाः ॥ २२ ॥ यज्वानः पुत्रिणो लोक्याः कृतकृत्यास्तनुत्यजः। योक्ष्यमाणास्तदात्मानं यशसा विजयेन च ॥ २३ ॥ ब्रह्मचर्य्यश्रुतिमुखैः क्रतुभिश्चाप्तदक्षिणैः।

प्राप्यलोकान् सुयुद्धेन क्षिप्रमेव यियासवः ॥ २४ ॥ ब्राह्मणांस्तर्पयित्वा च निष्कान्दत्त्वा पृथक् पृथक्। गाश्च वासांसि च पुनः समाभाष्य परस्परम् ॥ २५ ॥ प्रज्वाल्य कृष्णवर्त्मानमुपगम्य रणे व्रतम्। तस्मिन्नग्नौ तदा चक्रुः प्रतिज्ञां दृढ़निश्चयाः ॥ २६ ॥ शृण्वतां सर्वभूतानामुच्चैर्वाचो बभाषिरे। धृतां धनञ्जयवधे प्रतिज्ञाञ्चापि चक्रिरे ॥ २७ ॥ ये वै लोकाश्चानृतिनां ये च वै ब्रह्मघातिनाम्। मद्यपस्य च लोका ये गुरुदाररतस्य च ॥ २८ ॥ ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः। शरणागतं वा त्यजतो याचमानं तथा घ्नतः ॥ २९ ॥ अगारदाहिनाञ्चैव ये च गां निघ्नतामपि। अपकारिणाञ्च ये लोका ये च ब्रह्मद्विषामपि ॥३०॥ स्वभार्य्यामृतुकालेषु यो मोहान्नाभिगच्छति। श्राद्धमैथुनिकानाञ्च ये चाप्यात्मापकारिणाम् ॥ ३१ ॥ न्यासापहारिणां ये च श्रुतं नाशयताञ्च ये। क्लीवेन युध्यमानानां ये च दीनानुसारिणाम् ॥ ३२ ॥ नास्तिकानाञ्च ये लोकां येऽग्निमातृपरित्यजाम्। तानाप्नुयामहे लोकान् ये च पापकृतामपि ॥ ३३ ॥ यद्यहत्वा वयं सर्वे निवर्त्तेम धनञ्जयम्। तेन वाभ्यर्द्दितास्त्रासाद्भवेमहि पराङ्मुखाः ॥ ३४ ॥ यदित्वसुकरं लोके कर्म कुर्य्याम संयुगे। इष्टान् लोकान् प्राप्नुयाम वयमद्य न संशयः ॥ ३५ ॥ एवमुक्त्वा ततो राजंस्तेऽभ्यवर्त्तन्त संयुगे। आह्वयन्तोऽर्जुनं वीराः पितृजुष्टां दिशं प्रति ॥ ३६ ॥ आहूतस्तैर्नरव्याघ्रः पार्थः परपुरञ्जयः। धर्म्मराजमिदं वाक्यमपदान्तरमब्रवीत् ॥ ३७ ॥ आहूतो न निवर्त्तेयमिति मे व्रतमाहितम्। संशप्तकाश्च मां राजन्नाह्वयन्ति महामृधे ॥ ३८ ॥ एष च भ्रातृभिः सार्द्धं सुशर्माह्वयते रणे। बधाय सगणस्यास्य मामनुज्ञातुमर्हसि ॥ ३९ ॥ नैतच्छक्नोमि संसोढुमाह्वानं पुरुषर्षभ। सत्यं ते प्रतिजानामि हतान् विद्धि परान् युधि ॥ ४० ॥

युधिष्ठिर उवाच। श्रुतन्ते तत्त्वतस्तात यद्द्रोणेन चिकीर्षितम्। यथा तदनृतं तस्य भवेत्तत् त्वं समाचर॥ ४१ ॥ द्रोणो हि बलवान् शूरः कृतास्त्रश्च जितश्रमः। प्रतिज्ञातञ्च तेनैतत् ग्रहणं मे महारथ॥ ४२ ॥

अर्जुन उवाच। अयं वै सत्यजिद्राजन्नद्य त्वां रक्षिता युधि। ध्रियमाणे तु पाञ्चाल्ये नाचार्य्यः काममाप्स्यति॥ ४३ ॥ हते तु पुरुषव्याघ्रे रणे सत्यजिति प्रभो। सर्व्वैरपि समेतैर्वा न स्थातव्यं कथञ्चन॥ ४४ ॥

सञ्जय उवाच। अनुज्ञातस्ततो राज्ञा परिष्वक्तश्च फाल्गुनः। प्रेम्ना दृष्टश्च बहुधा ह्याशिषस्तस्य योजिताः॥ ४५ ॥ विधायैवं ततः पार्थस्त्रिगर्त्तान् प्रत्ययाद्बली। क्षुधितः क्षुद्विघातार्थं सिंहो मृगगणानिव॥ ४६ ॥ ततो दौर्य्योधनं सैन्यं मुदा परमया युतम्। ऋतेऽर्जुनं भृशं क्रुद्धं धर्मराजस्य निग्रहे॥ ४७ ॥ ततोऽन्योन्येन ते सेने समाजग्मतुरोजसा। गङ्गासरय्वौ वेगेन प्रावृषीवोल्बणोदके॥ ४८ ॥

इति द्रोणपर्व्वणि संशप्तकबधपर्व्वणि धनञ्जययाने सप्तदशोऽध्यायः॥ १७ ॥

---

सञ्जय उवाच। ततः संशप्तका राजन् समे देशे व्यवस्थिताः। व्यूह्यानीकं रथैरेव चन्द्राकारं मुदा युताः॥ १ ॥ ते किरीटिनमायान्तं दृष्ट्वा हर्षेण मारिष। उदक्रोशन्नरव्याघ्राः शब्देन महता तदा॥ २ ॥ स शब्दः प्रदिशः सर्व्वा दिशः खञ्च समावृणोत्। आवृतत्वाच्च लोकस्य नासीत्तत्र प्रतिस्वनः॥ ३ ॥ सोऽतीवसम्प्रहृष्टांस्तानुपलभ्य धनञ्जयः। किञ्चिदभ्युत्स्मयन् कृष्णमिदं वचनमब्रवीत्॥ ४ ॥ पश्यैतान् देवकीमातर्मुमूर्षूनद्य

संयुगे। भ्रातृंस्त्रैगर्त्तकानेव रोदितव्ये प्रहर्षितान् ॥ ५ ॥ अथ
वा हर्षकालोऽयं त्रैगर्त्तानामसंशयम्। कुनरैर्दुरवापान् हि
लोकान् प्राप्स्यन्त्यनुत्तमान् ॥ ६ ॥ एवमुक्त्वा महाबाहुं हृषी-
केशं ततोऽर्जुनः। आससाद रणे व्यूढां त्रिगर्त्तानामनीकिनीम्
॥ ७ ॥ स देवदत्तमादाय शङ्खं हेमपरिष्कृतम्। दध्मौ वेगेन
महता घोषेणापूरयन् दिशः ॥ ८ ॥ तेन घोषेण सन्त्रस्ता संशप्तक-
वरूथिनी। निश्चेष्टावस्थिता सङ्ख्ये ह्यश्मसारमयी यथा ॥ ९ ॥
वाहास्तेषां विवृत्ताक्षास्तब्धकर्णशिरोधराः। विष्टब्धचरणा मूत्रं
रुधिरञ्च प्रसुस्रुवुः ॥ १० ॥ उपलभ्य ततः संज्ञामवस्थाप्य च
वाहिनीम्। युगपत् पाण्डुपुत्राय चिक्षिपुः कङ्कपत्रिणः ॥ ११ ॥
तान्यर्जुनः सहस्राणि दशपञ्चभिराशुगैः। अनागतान्येव शरै-
श्चिच्छेदाशुपराक्रमः ॥ १२ ॥ ततोऽर्जुनं शितैर्बाणैर्दशभिर्दशभिः
पुनः। प्रत्यविध्यंस्ततः पार्थस्तानाविध्यत् त्रिभिस्त्रिभिः ॥ १३ ॥
एकैकस्तु ततः पार्थं राजन् विव्याध पञ्चभिः। स च तान् प्रति-
विव्याध द्वाभ्यां द्वाभ्यां पराक्रमी ॥ १४ ॥ भूय एव तु संक्रुद्धा-
स्तेऽर्जुनं सहकेशवम्। आपूरयन् शरैस्तूर्णं तड़ागमिव वृष्टिभिः
॥ १५ ॥ ततः शरसहस्राणि प्रापतन्नर्जुनं प्रति। भ्रमराणा
मिव व्राताः फुल्लं द्रुमगणं वने ॥ १६ ॥ ततः सुबाहुस्त्रिंशद्भि-
रद्रिसारमयैः शरैः। आविध्यदिषुभिर्गाढं किरीटे सव्यसाचिनः
॥ १७ ॥ तैर्विषक्तैः किरीटस्थैर्हेमपुङ्खैरजिह्मगैः। शातकुम्भ
मयापीड़ो बभौ सूर्य्य इवोत्थितः ॥ १८ ॥ हस्तावापं सुबाहोस्तु
भल्लेन युधि पाण्डवः। चिच्छेद तञ्चैव पुनः शरवर्षैरवाकिरत्
॥ १९ ॥ ततः सुशर्मा दशभिः सुरथश्च किरीटिनम्। सुधर्मा
सुधनुश्चैव सुबाहुश्च समार्पयन् ॥ २० ॥ तांस्तु सर्वान् पृथग्बाणै-
र्वानरप्रवरध्वजः। प्रत्यविध्यद्ध्वजांश्चैषां भल्लैश्चिच्छेद काञ्चनान्
॥ २१ ॥ सुधन्वनो धनुश्छित्त्वा हयांश्चास्यावधीच्छरैः। अथास्य

सशिरस्त्राणं शिरः कायादपाहरत् ॥ २२ ॥ तस्मिन्निपतिते वीरे-
त्रस्तास्तस्य पदानुगाः। व्यद्रवन्त भयाद्भीता येन द्रौण्यौधनं
बलम् ॥ २३ ॥ ततो जघान संक्रुद्धो वासविस्तां महाचमूम्।
शरजालैरविच्छिन्नैस्तमः सूर्य्य इवांशुभिः ॥ २४ ॥ ततो भग्ने
बले तस्मिन् विप्रलीने समन्ततः। सव्यसाचिनि संक्रुद्धे त्रैगर्त्तान्
भयमाविशत् ॥ २५ ॥ ते वध्यमानाः पार्थेन शरैः सन्नतपर्वभिः।
अमुह्यंस्तत्र तत्रैव त्रस्ता मृगगणा इव ॥ २६ ॥ ततस्त्रिगर्त्तराट्
क्रुद्धस्तानुवाच महारथान्। अलं द्रुतेन वः शूरा न भयं कर्त्तु-
मर्हथ ॥ २७ ॥ शप्त्वाथ शपथान् घोरान् सर्वसैन्यस्य पश्यतः।
गत्वा द्रौण्यौधनं सैन्यं किं वा वक्ष्यथ मुख्यशः ॥ २८ ॥ नाव-
हास्याः कथं लोके कर्मणा तेन संयुगे। भवेम सहिताः सर्व्वे
निवर्त्तध्वं यथाबलम् ॥ २९ ॥ एवमुक्तास्तु ते राजन्नुदक्रोशन्मुहु-
र्मुहुः। शङ्खांश्च दध्मिरे वीरा हर्षयन्तः परस्परम् ॥ ३० ॥ ततस्ते
सन्न्यवर्त्तन्त संशप्तकगणाः पुनः। नारायणाश्च गोपाला मृत्युं
कृत्वा निवर्त्तनम् ॥ ३१ ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि सुधन्ववधे
अष्टादशोऽध्यायः ॥ १८ ॥

---

सञ्जय उवाच। दृष्ट्वा तु सन्निवृत्तांस्तान् संशप्तकगणान् पुनः।
वासुदेवं महात्मानमर्जुनः समभाषत ॥ १ ॥ चोदयाश्वान् हृषी-
केश संशप्तकगणान् प्रति। नैते हास्यन्ति सङ्ग्रामं जीवन्त इति
मे मतिः ॥ २ ॥ पश्य मेऽद्य बलं घोरं बाह्वोरिष्वासनस्य च।
अद्यैतान् पातयिष्यामि रुद्रः पशुगणानिव ॥ ३ ॥ ततः कृष्णः
स्मितं कृत्वा प्रतिनन्द्य शिवेन तम्। प्रावेशयत दुर्द्धर्षो यत्र

यतैश्छदर्जुनः ॥ ४ ॥ स रथो भ्राजतेऽत्यर्थमुह्यमाने रणे तदा ।
उह्यमानमिवाकाशं विमानैः पाण्डुरैर्हयैः ॥ ५ ॥ मण्डलानि
ततश्चक्रे गतप्रत्यागतानि च । यथा शक्ररथो राजन् युद्धे देवा-
सुरे पुरा ॥ ६ ॥ अथ नारायणाः क्रुद्धा विविधायुधपाणयः ।
छादयन्तः शरव्रातैः परिवव्रुर्धनञ्जयम् ॥ ७ ॥ अदृश्यञ्च मुहूर्त्तेन
चक्रुस्ते भरतर्षभ । कृष्णेन सहितं युद्धे कुन्तीपुत्रं धनञ्जयम्
॥ ८ ॥ क्रुद्धस्तु फाल्गुनः सङ्ग्रे द्विगुणीकृतविक्रमः । गाण्डीवं
धनुरामृज्य तूर्णं जग्राह संयुगे ॥ ९ ॥ बद्ध्वा च भ्रुकुटिं वक्त्रे
क्रोधस्य प्रतिलक्षणम् । देवदत्तं महाशङ्खं पूरयामास पाण्डवः
॥ १० ॥ अथास्त्रमरिसङ्घघ्नं त्वाष्ट्रमभ्यस्यदर्जुनः । ततो रूप-
सहस्राणि प्रादुरासन् पृथक् पृथक् ॥ ११ ॥ आत्मनः प्रतिरूपै-
स्तैर्नानारूपैर्विमोहिताः । अन्योन्यमर्जुनं मत्वा स्वमात्मानञ्च
जघ्निरे ॥ १२ ॥ अयमर्जुनोऽयं गोविन्द इमौ पाण्डवयादवौ ।
इति ब्रुवाणाः सम्मूढा जघ्नुरन्योऽन्यमाहवे ॥ १३ ॥ मोहिताः
परमास्त्रेण क्षयं जग्मुः परस्परम् । अशोभन्त रणे योधाः
पुष्पिता इव किंशुकाः ॥ १४ ॥ ततः शरसहस्राणि तैर्विमुक्तानि
भस्मसात् । कृत्वा तदस्त्रं तान् वीराननयद्यमसादनम् ॥ १५ ॥
अथ प्रहस्य बीभत्सुर्ललित्थान्मालवानपि । मावेल्लकांस्त्रिगर्त्तांश्च
यौधेयांश्चार्द्दयच्छरैः ॥ १६ ॥ ते हन्यमाना वीरेण क्षत्रियाः
कालचोदिताः । व्यसृजञ्छरजालानि पार्थे नानाविधानि च
॥ १७ ॥ ततो नैवार्जुनस्तत्र न रथो न च केशवः । प्रत्यदृश्यन्त
घोरेण शरवर्षेण सम्वृताः ॥ १८ ॥ ततस्ते लब्धलक्ष्यत्वादन्यो-
ऽन्यमभिचुक्रुशुः । हतौ कृष्णाविति प्रीता वासांस्यादुधुवुस्तदा
॥ १९ ॥ भेरीमृदङ्गशङ्खांश्च दध्मुर्वीराः सहस्रशः । सिंहनाद-
रवांश्चापि चक्रिरे तत्र मारिष ॥ २० ॥ ततः प्रसिस्विदे कृष्णः
खिन्नश्चार्जुनमब्रवीत् । क्वासि पार्थ न पश्ये त्वां कच्चिज्जीवसि

श्रतुद्दन् ॥ २१ ॥ तस्य तद्भाषितं श्रुत्वा त्वरमाणो धनञ्जयः। वायव्यास्त्रेण तैरस्तां शरवृष्टिमपाहरत् ॥ २२ ॥ ततः संशप्तक-व्रातान् साश्वद्विपरथायुधान्। उवाह भगवान् वायुः शुष्कपर्ण-चयानिव ॥ २३ ॥ उह्यमानास्तु ते राजन् व्यशोभन्त वायुना। उड्डीनाः पक्षिणः काले वृक्षेभ्य इव मारिष ॥ २४ ॥ तांस्तथा व्याकुलीकृत्य त्वरमाणो धनञ्जयः। जघान निशितैर्वाणैः सह-स्राणि शतानि च ॥ २५ ॥ शिरांसि भल्लैर्हृनद्वाहूनपि च सायु-धान्। हस्तिहस्तोपमांश्चोरूञ्छरैरुर्व्यामपातयत् ॥ २६ ॥ पृष्ठ-च्छिन्नान् विचरणान् बाहुपृष्ठेक्षणाकुलान्। नानाङ्गावयवैर्हीनान् चकारारीन् धनञ्जयः ॥ २७ ॥ गन्धर्वनगराकारान् विधिवत् कल्पितान् रथान्। शरैर्विशकलीकुर्वन् चक्रे व्यश्वरथद्विपान् ॥ २८ ॥ मुण्डतालवनानीव तत्र तत्र चकाशिरे। छिन्नध्वज-रथव्राताः केचित्तत्र क्वचित् क्वचित् ॥ २९ ॥ सोत्तरायुधिनो नागाः सपताकाङ्कुशध्वजाः। पेतुः शक्राशनिहता द्रुमवन्त इवा-चलाः ॥ ३० ॥ चामरापीड़कवचाः स्रस्तान्त्रनयनास्तवः। सारोहा-स्तुरगाः पेतुः पार्थवाणहताः क्षितौ ॥ ३१ ॥ विप्रविद्धासिनखरा-श्छिन्नवर्मास्थिसन्धयः। पत्तयश्छिन्नमर्माणः कृपणाः शेरते हताः ॥ ३२ ॥ तैर्हतैर्हन्यमानैश्च पतद्भिः पतितैरपि। भ्रमद्भिर्निष्टद्भिश्च क्रूरमायोधनं बभौ ॥ ३३ ॥ रजश्च महदुद्भूतं शान्तं रुधिर-वृष्टिभिः। मही चाप्यभवद्दुर्गा कबन्धशतसङ्कुला ॥ ३४ ॥ तदभौ रौद्रबीभत्सं वीभत्सोर्यानमाहवे। आक्रीड़ इव रुद्रस्य घ्नतः कालात्यये पशून् ॥ ३५ ॥ ते बध्यमानाः पार्थेन व्याकुलाश्वरथ-द्विपाः। तमेवाभिमुखाः क्षीणाः शक्रस्यातिथितां गताः ॥ ३६ ॥ सा भूमिर्भरतश्रेष्ठ निहतैस्तैर्महारथैः। आस्तीर्णा सम्बभौ सर्वा प्रेतीभूतैः समन्ततः ॥ ३७ ॥ एतस्मिन्नन्तरे चैव प्रमत्ते सव्यसाचिनि। व्यूढ़ानीकस्ततो द्रोणो युधिष्ठिरमुपाद्रवत् ॥ ३८ ॥

तं प्रत्यगृह्णंस्त्वरिता व्यूढ़ानीकाः प्रहारिणः। युधिष्ठिरं परीप्सन्तस्तदासीत्तुमुलं महत्॥ ३९॥

इति द्रोणपर्व्वणि संशप्तकवधपर्व्वणि अर्जुनयुद्धे
एकोनविंशोऽध्यायः॥ १९॥

---

सञ्जय उवाच। परिणाम्य निशान्तान्तु भारद्वाजो महारथः। उक्तस्तवाहं राजेन्द्र वचनं वै सुयोधनम्॥ १॥ विधाय योगं पार्थेन संशप्तकगणैः सह। निष्क्रान्ते च तदा पार्थे संशप्तकवधं प्रति॥ २॥ व्यूढ़ानीकस्ततो द्रोणः पाण्डवानां महाचमूम्। अभ्ययाद्भरतश्रेष्ठ धर्मराजजिघृक्षया॥ ३॥ व्यूढ़ं दृष्ट्वा सुपर्णन्तु भारद्वाजेन तत्तदा। व्यूहेन मण्डलार्द्धेन प्रत्यव्यूहद्युधिष्ठिरः॥ ४॥ मुखं त्वासीत् सुपर्णस्य भारद्वाजो महारथः। शिरो दुर्य्योधनो राजा सोदर्य्यैः सानुगैर्वृतः॥ ५॥ चक्षुषी कृतवर्मा च गौतमश्चास्य भास्वरः भूतशर्मा क्षेमशर्मा करकाक्षश्च वीर्य्यवान्॥ ६॥ कलिङ्गाः सिंहलाः प्राच्याः शूद्राभीरा दशेरकाः। शका यवनकाम्बोजास्तथा हंसपदाश्च ये॥ ७॥ ग्रीवायां शूरसेनास्तु दरदा मद्रकैकयाः। गजाश्वरथपत्त्यौघास्तस्थुः शतसहस्रशः॥ ८॥ भूरिश्रवास्तथा शल्यः सोमदत्तश्च वाह्लिकः। अक्षौहिण्या वृता वीरा दक्षिणं पार्श्वमाश्रिताः॥ ९॥ विन्दानुविन्दावावन्त्यौ काम्बोजश्च सुदक्षिणः। वामं पार्श्वं समाश्रित्य द्रोणपुत्राग्रतः स्थिताः॥ १०॥ पृष्ठे कलिङ्गाः साम्वष्ठा मागधाः पौण्ड्रमद्रकाः। गान्धाराः शकुनाः प्राच्याः पार्वतीया वशातयः॥ ११॥ पुच्छे वैकर्त्तनः कर्णः सपुत्रज्ञातिवान्धवः। महत्या सेनया तस्थौ नानाजनपदोत्थया॥ १२॥ जयद्रथो भीमरथः सम्पातिर्जभोजयः। भूमिञ्जयो वृषः क्राथो नैषधश्च महा-

बलः ॥ १३ ॥ वृता बलेन महता ब्रह्मलोकपरिष्कृताः । व्यूह-
स्यारक्षि ते राजन् स्थिता युद्धविशारदाः ॥ १४ ॥ द्रोणेन
विहितो व्यूहः पदात्यश्वरथद्विपैः । वातोद्धूतार्णवाकारः प्रनृत्य-
न्निव लक्ष्यते ॥ १५ ॥ तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः ।
सविद्युत्स्तनिता मेघाः सर्वदिग्भ्य इवोष्णगे ॥ १६ ॥ तस्य
प्राग्ज्योतिषो मध्ये विधिवत् कल्पितं गजम् । आस्थितः शुशुभे
राजन्नंशुमानुदये यथा ॥ १७ ॥ माल्यदामवता राजन् श्वेत-
च्छत्रेण धार्य्यता । कृत्तिकायोगयुक्तेन पौर्णमास्यामिवेन्दुना
॥ १८ ॥ नीलाञ्जनचयप्रख्यो मदान्धो द्विरदो बभौ । अभिवृष्टो
महामेघैर्यथा स्यात् पर्वतो महान् ॥ १९ ॥ नानानृपतिभिर्वीरै-
र्विविधायुधभूषणैः । समन्वितः पार्वतीयैः शक्रो देवगणैरिव
॥ २० ॥ ततो युधिष्ठिरः प्रेक्ष्य व्यूहं तमतिमानुषम् । अजय्य-
मरिभिः सङ्ख्ये पार्षतं वाक्यमब्रवीत् ॥ २१ ॥ ब्राह्मणस्य वशं
नाहमियामद्य यथा प्रभो । पारावतसवर्णाश्व तथा नीति-
र्विधीयताम् ॥ २२ ॥

धृष्टद्युम्न उवाच । द्रोणस्य यतमानस्य वशं नैष्यसि सुव्रत ।
अहमावारयिष्यामि द्रोणमद्य सहानुगम् ॥ २३ ॥ मयि जीवति
कौरव्य नोद्वेगं कर्त्तुमर्हसि । न हि शक्तो रणे द्रोणो विजेतुं
मां कथञ्चन ॥ २४ ॥

सञ्जय उवाच । एवमुक्त्वा किरन् बाणान् द्रुपदस्य सुतो
बली । पारावतसवर्णाश्वः स्वयं द्रोणमुपाद्रवत् ॥ २५ ॥ अनिष्ट-
दर्शनं दृष्ट्वा धृष्टद्युम्नमवस्थितम् । क्षणेनैवाभवद्द्रोणो नातिहृष्ट-
मना इव ॥ २६ ॥ तन्तु सम्प्रेक्ष्य पुत्रस्ते दुर्मुखः शत्रुकर्षणः ।
प्रियं चिकीर्षुर्द्रोणस्य धृष्टद्युम्नमवारयत् ॥ २७ ॥ स संप्रहार-
स्तुमुलः सुघोरः समपद्यत । पार्षतस्य च शूरस्य दुर्मुखस्य च
भारत ॥ २८ ॥ पार्षतः शरजालेन क्षिप्रं प्रच्छाद्य दुर्मुखम् ।

भारद्वाजं शरौघेण महता समवारयत्॥ २९॥ द्रोणमावारितं दृष्ट्वा भृशमाधात्तवात्मजः। नानालिङ्गैः शरव्रातैः पार्षतं सममोहयत्॥ ३०॥ तयोर्विषक्तयोः सङ्ग्रे पाञ्चाल्यकुरुमुख्ययोः। द्रोणो यौधिष्ठिरं सैन्यं बहुधा व्यधमच्छरैः॥ ३१॥ अनिलेन यथाभ्राणि विच्छिन्नानि समन्ततः। तथा पार्थस्य सैन्यानि विच्छिन्नानि क्वचित् क्वचित्॥ ३२॥ मुहूर्त्तमिव तद्युद्धमासीन्मधुरदर्शनम्। तत उन्मत्तवद्राजन् निर्मर्य्यादमवर्त्तत॥ ३३॥ नैव स्वे न परे राजन्नाज्ञायन्त परस्परम्। अनुमानेन संज्ञाभिर्युद्धं तत् समवर्त्तत॥ ३४॥ चूड़ामणिषु निष्केषु भूषणेष्वपि वर्मसु। तेषामादित्यवर्णाभा रश्मयः प्रचकाशिरे॥ ३५॥ तत् प्रकीर्णपताकानां रथवारणवाजिनाम्। बलाकाशबलाभ्राभं ददृशे रूपमाहवे॥ ३६॥ नरानेव नरा जघ्नुरुदग्राश्च हया हयान्। रथाश्च रथिनो जघ्नुर्वारणान् वरवारणाः॥ ३७॥ समुच्छ्रितपताकानां गजानां परमद्विपैः। क्षणेन तुमुलो घोरः सङ्ग्रामः समपद्यत॥ ३८॥ तेषां संसक्तगात्राणां वर्षतामितरेतरम्। दन्तसङ्घातसङ्घर्षात्सधूमोऽग्निरजायत॥ ३९॥ विप्रकीर्णपताकास्ते विषाणजनिताग्नयः। बभूवुः खं समासाद्य सविद्युत इवाम्बुदाः॥ ४०॥ विक्षिपद्भिर्नदद्भिश्च निपतद्भिश्च वारणैः। सम्बभूव मही कीर्णा मेघैर्द्यौरिव शारदी॥ ४१॥ तेषामाहन्यमानानां वाणतोमरवृष्टिभिः। वारणानां रवो जज्ञे मेघानामिव संप्लवे॥ ४२॥ तोमराभिहताः केचिद्वाणैश्च परमद्विपाः। वित्रेसुः सर्वनागानां शब्दमेवापरेऽव्रजन्॥ ४३॥ विषाणाभिहताश्चापि केचित्तत्र गजा गजैः। चक्रुरार्त्तस्वनं घोरमुत्पातजलदा इव॥ ४४॥ प्रतीपाः क्रियमाणाश्च वारणा वरवारणैः। उन्मथ्य पुनराजघ्नुः प्रेषिताः परमाङ्कुशैः॥ ४५॥ महामात्रैर्महामात्रास्ताड़िताः शरतोमरैः। गजेभ्यः पृथिवीं

जग्मुर्मुक्तप्रहरणाङ्कुशाः ॥ ४६ ॥ निर्मनुष्याश्च मातङ्गा विनदन्त-स्ततस्ततः । छिन्नाभ्राणीव सम्पेतुः सम्प्रविश्य परस्परम् ॥ ४७ ॥ हतान् परिवहन्तश्च पातितान् पतितायुधान् । दिशो जग्मुर्महानागाः केचिदेकचरा इव ॥ ४८ ॥ ताड़िताम्ताड्यमानाश्च तोमरर्ष्टिपरश्वधैः । पेतुरार्त्तस्वरं कृत्वा तदा विशसने गजाः ॥ ४९ ॥ तेषां शैलोपमैः कायैर्निपतद्भिः समन्ततः । आहता सहसा भूमिश्चकम्पे च ननाद च ॥ ५० ॥ सादितैः सगजारोहैः सपताकैः समन्ततः । मातङ्गैः शुशुभे भूमिर्विकीर्णैरिव पर्व्वतैः ॥ ५१ ॥ गजस्थाश्च महामात्रा निर्भिन्नहृदया रणे । रथिभिः पतिता भल्लैर्विकीर्णाङ्कुशतोमराः ॥ ५२ ॥ क्रौञ्चवद्विनदन्तोऽन्ये नाराचाभिहता गजाः । परान् स्वांश्चापि मृद्नन्तः परिपेतुर्द्दिशो दश ॥ ५३ ॥ गजाश्वरथयोधानां शरीरौघसमावृता । बभूव पृथिवी राजन् मांसशोणितकर्द्दमा ॥ ५४ ॥ प्रमथ्य च विषाणाग्रैः समुत्क्षिप्ताश्च वारणैः । सचक्राश्च विचक्राश्च रथैरेव महारथाः ॥ ५५ ॥ रथाश्च रथिभिर्हीना निर्मनुष्याश्च वाजिनः । हतारोहाश्च मातङ्गादिशो जग्मुर्भयातुराः ॥ ५६ ॥ जघानात्र पिता पुत्रं पुत्रश्च पितरं तथा । इत्यासीत्तुमुलं युद्धं न प्राज्ञायत किञ्चन ॥ ५७ । आगुल्फेभ्योऽवसीदन्ते नरा लोहितकर्द्दमैः । दीप्यमानैः परिक्षिप्ता दावैरिव महाद्रुमाः ॥ ५८ ॥ शोणितैः सिच्यमानानि वस्त्राणि कवचानि च । छत्राणि च पताकाश्च सर्व्वं रक्तमदृश्यत ॥ ५९ ॥ हयौघाश्च रथौघाश्च नरौघाश्च निपातिताः । संवृताः पुनरावृत्य बहुधा रथनेमिभिः ॥ ६० ॥ स गजौघमहावेगः परासुनरशैवलः । रथौघतुमुलावर्त्तः प्रबभौ सैन्यसागरः ॥ ६१ ॥ तं वाहनमहानौभिर्योधा जयधनैषिणः । अवगाह्याप्यमज्जन्तो वैरमोहं प्रचक्रिरे ॥ ६२ ॥ शरवर्षाभिवृष्टेषु योधेष्वाचितलक्ष्मसु । न तेषु चित्ततां लेभे कश्चिदाहत-

लक्षणः ॥ ६३ ॥ वर्त्तमाने तथा युद्धे घोररूपे भयङ्करे। मोह-यित्वा परान् द्रोणो युधिष्ठिरमुपाद्रवत् ॥ ६४ ॥

इति द्रोणपर्व्वणि संशप्तकवधपर्व्वणि सङ्कुलयुद्धे विंशोऽध्यायः ॥ २० ॥

---

सञ्जय उवाच। ततो युधिष्ठिरं द्रोणो दृष्ट्वान्तिकमुपागतम्। महता शरवर्षेण प्रत्यगृह्णादभीतवत् ॥ १ ॥ ततो हलहला-शब्द आसीद्यौधिष्ठिरे बले। जिघृक्षति महासिंहे गजानामिव यूथपम् ॥ २ ॥ दृष्ट्वा द्रोणं ततः शूरः सत्यजित् सत्यविक्रमः। युधिष्ठिरमभिप्रेप्सुराचार्य्यं समुपाद्रवत् ॥ ३ ॥ ततः आचार्य्य-पाञ्चाल्यौ युयुधाते महाबलौ। विक्षोभयन्तौ तत्सैन्यमिन्द्रवैरो-चनाविव ॥ ४ ॥ ततो द्रोणं महेष्वासः सत्यजित् सत्यविक्रमः। अविध्यन्निशिताग्रेण परमास्त्रं व्यदर्शयत् ॥ ५ ॥ तथास्य सारथेः पञ्च शरान् सर्पविषोपमान्। अमुच्यदन्तकप्रख्यान् सम्मुमोहास्य सारथिः ॥ ६ ॥ अथास्य सहसाविध्यद्धयान् दशभिराशुगैः। दशभिर्द्दशभिः क्रुद्ध उभौ च पार्ष्णिसारथी ॥ ७ ॥ मण्डलन्तु समावृत्य विचरन् पृतनामुखे। ध्वजं चिच्छेद च क्रुद्धो द्रोण-स्यामित्रकर्षणः ॥ ८ ॥ द्रोणस्तु तत् समालोक्य चरितं तस्य संयुगे। मनसा चिन्तयामास प्राप्तकालमरिन्दमः ॥ ९ ॥ ततः सत्यजितं तीक्ष्णैर्द्दशभिर्मर्मभेदिभिः। अविध्यच्छीघ्रमाचार्य्यश्छि-त्त्वास्य सशरं धनुः ॥ १० ॥ स शीघ्रतरमादाय धनुरन्यत् प्रताप-वान्। द्रोणमभ्यहनद्राजंस्त्रिंशद्भिः कङ्कपत्रिभिः ॥ ११ ॥ दृष्ट्वा सत्यजिता द्रोणं ग्रस्यमानमिवाहवे। चुक्रुशुः पाण्डवा राजन् वस्त्राणि दुधुवुश्च ह ॥ १२ ॥ वृकस्तु परमः क्रुद्धो द्रोणं

पृष्ट्रा स्तनान्तरे। विव्याध बलवान् राजंस्तदद्भुतमिवाभवत् ॥१३
द्रोणस्तु शरवर्षेण छाद्यमानो महारथः। वेगं चक्रे महावेगः
क्रोधादुद्वृत्य चक्षुषी ॥ १४ ॥ ततः सत्यजितश्चापं छित्त्वा द्रोणो
वृकस्य च। षड्भिः ससूतं सहयं शरैर्द्रोणोऽबधीद्वृकम् ॥ १५ ॥
अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरम्। साश्वं ससूतं विशिखै-
र्द्रोणं विव्याध सध्वजम् ॥ १६ ॥ स तं न ममृषे द्रोणः पाञ्चा-
ल्येनार्द्दितो मृधे। ततस्तस्य विनाशाय सत्वरं व्यसृजच्छरान्
॥ १७ ॥ हयान् ध्वजान् धनुर्मुष्टिमुभौ च पार्ष्णिसारथी। अवा-
किरत्ततो द्रोणः शरवर्षैः सहस्रशः ॥ १८ ॥ तथा सच्छिद्यमानेषु
कार्मुकेषु पुनः पुनः। पाञ्चाल्यः परमास्त्रज्ञः शोणिताश्वमयो-
धयत् ॥ १९ ॥ स सत्यजितमालोक्य तथोदीर्णं महाहवे। अर्द्ध-
चन्द्रेण चिच्छेद शिरस्तस्य महात्मनः ॥ २० ॥ तस्मिन् हते महा-
मात्रे पाञ्चालानां महारथे। अपायाज्जवनैरश्वैर्द्रोणात्त्रस्तो युधि-
ष्ठिरः ॥ २१ ॥ पाञ्चालाः केकया मत्स्याश्चेदिकारूषकोशलाः।
युधिष्ठिरमभीप्सन्तो हृष्टा द्रोणमुपाद्रवन् ॥ २२ ॥ ततो युधि-
ष्ठिरं प्रेप्सुराचार्य्यः शत्रुपूगहा। व्यधमत्तान्यनीकानि तूलराशि-
मिवानलः ॥ २३ ॥ निर्द्दहन्तमनीकानि तानि तानि पुनः पुनः।
द्रोणं मत्स्यादवरजः शतानीकोऽभ्यवर्त्तत ॥ २४ ॥ सूर्य्यरश्मि-
प्रतीकाशैः कर्म्मारपरिमार्ज्जितैः। षड्भिः ससूतं सहयं द्रोणं
विद्ध्वानदद्भृशम् ॥ २५ ॥ क्रूराय कर्मणे युक्तश्चिकीर्षुः कर्म
दुष्करम्। अवाकिरच्छरव्रातैर्भारद्वाजं महारथम् ॥ २६ ॥ तस्य
नानदतो द्रोणः शिरः कायात् सकुण्डलम्। क्षुरेणापाहरत्तूर्णं
ततो मत्स्याः प्रदुद्रुवुः ॥ २७ ॥ मत्स्यान् जित्वाजयच्चेदीन् कारू-
षान् कैकयानपि। पाञ्चालान् सृञ्जयान् पाण्डून् भारद्वाजः पुनः
पुनः ॥ २८ ॥ तं दहन्तमनीकानि क्रुद्धमग्निर्यथा वनम्। दृष्ट्वा
रुक्मरथं वीरं समकम्पन्त सृञ्जयाः ॥ २९ ॥ उत्तमं चाददानस्य

धनुरस्याशुकारिणः । ज्याघोषो निघ्नतोऽमित्रान् दिक्षु सर्वासु शुश्रुवे ॥ ३० ॥ नागानश्वान् पदातींश्च रथिनो गजसादिनः । रौद्रा हस्तवता मुक्ताः प्रमथ्नन्ति स्म सायकाः ॥ ३१ ॥ नानद्यमानः पर्जन्यो मिश्रवातो हिमात्यये । अश्मवर्षमिवावर्षन् परेषां भयमादधत् ॥ ३२ ॥ सर्वा दिशः समचलन् सैन्यं विक्षोभयन्निव । बली शूरो महेष्वासो मित्राणामभयङ्करः ॥ ३३ ॥ तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतम् । दिक्षु सर्वासु पश्याम द्रोणस्यामिततेजसः ॥ ३४ ॥ शोभमानां ध्वजे चास्य वेदीमद्राक्ष्म भारत । हिमवच्छिखराकारां चरतः संयुगे भृशम् ॥ ३५ ॥ द्रोणस्तु पाण्डवानीके चकार कदनं महत् । यथा दैत्यगणे विष्णुः सुरासुरनमस्कृतः ॥ ३६ ॥ स शूरः सत्यवाक् प्राज्ञो बलवान् सत्यविक्रमः । महानुभावः कल्पान्ते रौद्रीं भीरुविभीषणाम् ॥ ३७ ॥ कवचोर्मिध्वजावर्त्तां मर्त्त्यकूलापहारिणीम् । गजवाजिमहाग्राहामसिमीनां दुरासदाम् ॥ ३८ ॥ वीरास्थिशर्करां रौद्रां भेरीमुरजकच्छपाम् । चर्मवर्मप्लवां घोरां केशशैवलशाद्वलाम् ॥ ३९ ॥ शरौघिणीं धनुःस्रोतां बाहुपन्नगसङ्कुलाम् । रणभूमिवहां तीव्रां कुरुसृञ्जयवाहिनीम् ॥ ४० ॥ मनुष्यशीर्षपाषाणां शक्तिमीनां गदोडुपाम् । उष्णीषफेनवसनां विकीर्णान्त्रसरीसृपाम् ॥ ४१ ॥ वीरापहारिणीमुग्रां मांसशोणितकर्द्दमाम् । हस्तिग्राहां केतुवृक्षां क्षत्रियाणां निमज्जनीम् ॥ ४२ ॥ क्रूरां शरीरसङ्घट्टां सादिनक्रां दुरत्ययाम् । द्रोणः प्रावर्त्तयत्तत्र नदीमन्तकगामिनीम् ॥ ४३ ॥ क्रव्यादगणसञ्जुष्टां श्वशृगालगणायुताम् । निषेवितां महारौद्रैः पिशिताशैः समन्ततः ॥ ४४ ॥ तं दहन्तमनीकानि रथोदारं कृतान्तवत् । सर्वतोऽभ्यद्रवन् द्रोणं कुन्तीपुत्रपुरोगमाः ॥ ४५ ॥ ते द्रोणं सहिताः शूराः सर्वतः प्रत्यवारयन् । गभस्तिभिरिवादित्यं तपन्तं भुवनं यथा ॥ ४६ ॥ तन्तु शूरं महेष्वासं तावका-

श्च ुद्यतायुधाः । राजानो राजपुत्राश्च समन्तात् पर्य्यवारयन् ॥४७॥
शिखण्डी तु ततो द्रोणं पञ्चभिर्नतपर्वभिः । क्षत्रधर्मा च विंशत्या
वसुदानश्च पञ्चभिः ॥ ४८ ॥ उत्तमौजास्त्रिभिर्बाणैः क्षत्रदेवश्च
पञ्चभिः । सात्यकिश्च शतेनाजौ युधामन्युस्तथाष्टभिः ॥ ४९ ॥
युधिष्ठिरो द्वादशभिर्द्रोणं विव्याध सायकैः धृष्टद्युम्नश्च दशभि-
श्चेकितानस्त्रिभिः शरैः ॥ ५० ॥ ततो द्रोणः सत्यसन्धः प्रभिन्न
इव कुञ्जरः । अभ्यतीत्य रथानीकं दृढ़सेनमपातयत् ॥ ५१ ॥
ततो राजानमासाद्य प्रहरन्तमभीतवत् । अविध्यन्नवभिः क्षेमं स
हतः प्रापतद्रथात् ॥ ५२ ॥ समध्यं प्राप्य सैन्यानां सर्वाः प्रवि-
चरन् दिशः । त्राता ह्यभवदन्येषां न त्रातव्यः कथञ्चन ॥ ५२ ॥
शिखण्डिनं द्वादशभिर्विंशत्या चोत्तमौजसम् । वसुदानञ्च भल्लेन
प्रैषयद्यमसादनम् ॥ ५३ ॥ अशीत्या क्षेमवर्माणं षड्विंशत्या
सुदक्षिणम् । क्षत्रदेवन्तु भल्लेन रथनीड़ादपातयत् ॥ ५४ ॥
युधामन्युं चतुःषष्ट्या त्रिंशता चैव सात्यकिम् । विद्धा रुक्मरथ-
स्तूर्णं युधिष्ठिरमुपाद्रवत् ॥ ५५ ॥ ततो युधिष्ठिरः क्षिप्रं गुरुतो
राजसत्तमः । अपायाज्जवनैरश्वैः पाञ्चाल्यो द्रोणमभ्ययात् ॥५६॥
तं द्रोणः सधनुष्कन्तु साश्वयन्तारमाक्षिणोत् । स हतः प्रापत-
द्भूमौ रथाज्ज्योतिरिवाम्बरात् ॥ ३७ ॥ तस्मिन् हते राजपुत्रे
पाञ्चालानां यशस्करे । हतद्रोणं हतद्रोणमित्यासीन्निःस्वनो
महान् ॥ ५८ ॥ तांस्तथा भृशसंरब्धान् पाञ्चालान् मत्स्यकैक-
यान् । सृञ्जयान् पाण्डवांश्चैव द्रोणो व्यक्षोभयद्बली ॥ ५९ ॥
सात्यकिं चेकितानञ्च धृष्टद्युम्नशिखण्डिनौ । वार्द्धक्षेमिञ्चैत्रसेनिं
सेनाबिन्दुं सुवर्च्चसम् ॥ ६० ॥ एतांश्चान्यांश्च सुबहून्नानाजन-
पदेश्वरान् । सर्वान् द्रोणोऽजयद्युद्धे कुरुभिः परिवारितः
॥ ६१ ॥ तावकाश्च महाराज जयं लब्ध्वा महाहवे । पाण्ड-
वेयान् रणे जघ्नुर्द्रवमाणान् समन्ततः ॥ ६२ ॥ ते दानवा

द्रवेन्द्रेण वध्यमानाः समन्ततः। पाञ्चालाः कैकया मत्स्याः समकम्पत भारत ॥ ६४ ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि द्रोणयुद्धे
एकविंशोऽध्यायः ॥ २१ ॥

---

धृतराष्ट्र उवाच। भारद्वाजेन भग्नेषु पाण्डवेषु महामृधे। पाञ्चालेषु च सर्वेषु कश्चिदन्योऽभ्यवर्त्तत ॥ १ ॥ आर्य्यां युद्धे मतिं कृत्वा क्षत्रियाणां यशस्करीम्। असेवितां कापुरुषैः सेवितां पुरुषर्षभैः ॥ २ ॥ अहो नासीत् पुमान् कश्चिद्दृष्ट्वा द्रोणं व्यवस्थितम्। जृम्भमाणमिव व्याघ्रं प्रभिन्नमिव कुञ्जरम् ॥ ३ ॥ त्यजन्तमाहवे प्राणान् सन्नद्धं चित्रयोधिनम्। महेष्वासं नरव्याघ्रं द्विषतां भयवर्द्धनम् ॥ ४ ॥ कृतज्ञं सत्यनिरतं दुर्य्योधनहितैषिणम्। भारद्वाजं तथानीके दृष्ट्वा शूरमवस्थितम्। के वीराः संन्यवर्त्तन्त तन्ममाचक्ष्व सञ्जय ॥ ५ ॥

सञ्जय उवाच। तान् दृष्ट्वा चलितान् सङ्ख्ये प्रणुन्नान् द्रोणसायकैः। पाञ्चालान् पाण्डवान् मत्स्यान् सृञ्जयांश्चेदिकैकयान् ॥ ६ ॥ द्रोणचापविमुक्तेन शरौघेनाशुहारिणा। सिन्धोरिव महौघेन ह्रियमाणान् यथा प्लवान् ॥ ७ ॥ कौरवाः सिंहनादेन नानावाद्यस्वनेन च। रथद्विपनराश्चैव सर्वतः समवारयन् ॥ ८ ॥ तान् पश्यन् सैन्यमध्यस्थो राजा स्वजनसंवृतः। दुर्य्योधनोऽब्रवीत् कर्णं प्रहृष्टः प्रहसन्निव ॥ ९ ॥

दुर्य्योधन उवाच। पश्य राधेय पाञ्चालान् प्रणुन्नान् द्रोणसायकैः। सिंहेनेव मृगान् वन्यान् त्रासितान् दृढ़धन्विना ॥१०॥ नैते जातु पुनर्युद्धमीहेयुरिति मे मतिः। यथातु भग्ना द्रोणेन वातेनेव महाद्रुमाः ॥ ११ ॥ अर्द्यमानाः शरैरेतैरुक्मपुङ्खैर्महा-

त्मना। पथानेकेन गच्छन्ति घूर्णमानास्ततस्ततः ॥ १२ ॥ सं-
निरुद्धाश्च कौरव्यैर्द्रोणेन च महात्मना। एतेऽन्ये मण्डलीभूताः
पावकेनेव कुञ्जराः ॥ १३ ॥ भ्रमरैरिव चाविष्टा द्रोणस्य निशितैः
शरैः। अन्योऽन्यं समलीयन्त पलायनपरायणाः ॥ १४ ॥ एष
भीमो महाक्रोधी हीनः पाण्डवसृञ्जयैः। मदीयैरावृतोयोधैः
कर्णं नन्दयतीव माम् ॥ १५ ॥ व्यक्तं द्रोणमयं लोकमद्य पश्यति
दुर्मतिः। निराशो जीवितान्नूनमद्य राज्याच्च पाण्डवः ॥ १६ ॥

कर्ण उवाच। नैष जातु महावाहुर्जीवन्नाहवमुत्सृजेत्।
न चेमान् पुरुषव्याघ्रः सिंहनादान् सहिष्यति ॥ १७ ॥ न चापि
पाण्डवा युद्धे भज्येरन्निति मे मतिः। शूराश्च बलवन्तश्च कृतास्त्रा
युद्धदुर्मदाः ॥ १८ ॥ विषाग्निद्यूतसंक्लेशान् वनवासञ्च पाण्डवाः।
स्मरमाणा न हास्यन्ति सङ्ग्राममिति मे मतिः ॥ १९ ॥ निवृत्तो
हि महावाहुरमितौजा वृकोदरः। वरान् वरान् हि कौन्तेयो
रथोदारान् हनिष्यति ॥ २० ॥ असिना धनुषा शक्त्या हयैर्नागै-
र्नरैरथैः। आयसेन च दण्डेन व्रातान् व्रातान् हनिष्यति ॥ २१ ॥
तमेनमन्ववर्त्तन्त सात्यकिप्रमुखा रथाः। पाञ्चालाः केकया मत्स्याः
पाण्डवाश्च विशेषतः ॥ २२ ॥ शूराश्च बलवन्तश्च विक्रान्ताश्च
महारथाः। विशेषतश्च भीमेन संरब्धेनाभिचोदिताः ॥ २३ ॥
ते द्रोणमभिवर्त्तन्तः सर्वतः कुरुपुङ्गवाः। वृकोदरं परीप्सन्तः
सूर्य्यमभ्रगणा इव ॥ २४ ॥ एकायनगता ह्येते पीड़येयुर्यत-
व्रतम्। अरक्ष्यमाणं शलभा यथा दीपं मुमूर्षवः ॥ २५ ॥
असंशयं कृतास्त्राश्च पर्य्याप्ताश्चापि वारणे। अतिभारमहं मन्ये
भारद्वाजे समाहितम् ॥ २६ ॥ ते शीघ्रमनुगच्छामो यत्र द्रोणो
व्यवस्थितः। कोका इव महानागं मा वै हन्युर्यतव्रतम् ॥ २७ ॥

सञ्जय उवाच। राधेयस्य वचः श्रुत्वा राजा दुर्य्योधन-
स्ततः। भ्रातृभिः सहितो राजन् प्रायाद्द्रोणरथं प्रति ॥ २८ ॥

लिन्तु शतानीकं शालपुष्पनिभा हयाः । आदित्यतरुणप्रख्याः श्लाघनीयमुदावहन् ॥३०॥ काञ्चनप्रतिमैर्योक्त्रैर्मयूरग्रीवसन्निभाः । द्रौपदेयं नरव्याघ्रं श्रुतकर्माणमाहवे ॥ ३१ ॥ श्रुतकीर्त्तिं श्रुतनिधिं द्रौपदेयं हयोत्तमाः । ऊहुः पार्थसमं युद्धे चाषपत्रनिभा हयाः ॥ ३२ ॥ यमाहुरध्यर्द्धगुणं कृष्णात् पार्थाच्च संयुगे । अभिमन्युं पिशङ्गास्तं कुमारमवहन् रणे ॥ ३३ ॥ एकस्तु धार्त्तराष्ट्रेभ्यः पाण्डवान् यः समाश्रितः । तं वृहन्तो महाकाया युयुत्सुमवहन् रणे ॥ ३४ ॥ पलालकाण्डवर्णास्तु वार्द्धक्षेमिं तरस्विनम् । ऊहुः सुतुमुले युद्धे हया हृष्टाः स्वलङ्कृताः ॥ ३५ ॥ कुमारं शितिपादास्तु रुक्मपत्रैरुरश्छदैः सौचित्तिमवहन् युद्धे यन्तुः प्रेष्यकरा हयाः ॥ ३६ ॥ रुक्मपृष्ठावकीर्णास्तु कौशेयसदृशा हयाः सुवर्णमालिनः क्षान्ताः श्रेणिमन्तमुदावहन् ॥३७॥ अस्त्राणाञ्च धनुर्वेदे ब्राह्मे वेदे च पारगम् । तं सत्यधृतिमायान्तमरुणाः समुदावहन् ॥ ३८ ॥ यः स पाञ्चालसेनानीर्द्रोणमंशमकल्पयत् । पारावतसवर्णास्तं धृष्टद्युम्नमुदावहन् ॥ ३९ ॥ तमन्वयात् सत्यधृतिः सौचित्तिर्युद्धदुर्मदः । श्रेणिमान् वसुदानश्च पुत्रः काश्यस्य मे विभुः ॥ ४० ॥ युक्तैः परमकाम्बोजैर्जवनैर्हेममालिभिः भीषयन्तो द्विषां सैन्यं यमवैश्रवणोपमाः ॥ ४१ ॥ प्रभद्रकास्तु काम्बोजाः षट्सहस्राण्युदायुधाः । नानावर्णहयश्रेष्ठैर्हेमचित्रहयध्वजाः ॥ ४२ ॥ शरव्रातैर्विधुन्वन्तः शत्रून् विततकार्मुकाः । समानमृत्यवो भूत्वा धृष्टद्युम्नं समन्वयुः ॥ ४३ ॥ वभ्रुकौशेयवर्णास्तु सुवर्णवरमालिनः । ऊहुरग्लानमनसश्चेकितानं हयोत्तमाः ॥ ४४ ॥ इन्द्रायुधसवर्णैस्तु कुन्तिभोजो हयोत्तमैः । आयात् सदश्वैः पुरुजिन्मातुलः सव्यसाचिनः ॥ ४५ ॥ अन्तरिक्षसवर्णास्तु तारकाश्चित्रिता इव । राजानं रोचमानं ते हयाः सङ्ग्रामे समावहन् ॥ ४६ ॥ शवलोहितवर्णाश्च पाण्डुरो-

ङ्गतराजयः । पाञ्चाल्यं गोपतेः पुत्रं सिंहसेनमुदावहन् ॥ ४७ ॥ पाञ्चालानां नरव्याघ्रो यः ख्यातो जनमेजयः । तस्य सर्षपपुष्पाणां तुल्यवर्णा हयोत्तमाः ॥ ४८ ॥ माषवर्णाश्च जवना वृहन्तो हेममालिनः । दधिपृष्ठाश्चन्द्रमुखाः पाञ्चाल्यमवहन् द्रुतम् ॥ ४९ ॥ शूराश्च भद्रकाश्चैव शरकाण्डनिभा हयाः । पद्मकिञ्जल्कवर्णाभा दण्डधारमुदावहन् ॥ ५० ॥ रासभारुणवर्णाभाः पृष्ठतो मूषिकप्रभाः । वल्गन्त इव संयत्ता व्याघ्रदत्तमुदावहन् ॥ ५१ ॥ हरयः कालकाश्चित्राश्चित्रमाल्यविभूषिताः । सुधन्वानं नरव्याघ्रं पाञ्चाल्यं समुदावहन् ॥ ५२ ॥ इन्द्राशनिसमस्पर्शा इन्द्रगोपकसन्निभाः । कार्य्यैश्चित्रान्तराश्चित्राश्चित्रायुधमुदावहन् ॥ ५३ ॥ बिभ्रतो हेममालास्तु चक्रवाकोदरा हयाः । कोशलाधिपतेः पुत्रं सुक्षत्रं बाजिनोवहन् ॥ ५४ ॥ शवलास्तु वृहन्तोऽश्वा दान्ता जाम्बूनदस्रजः । युद्धे सत्यधृतिं क्षैमिमवहन् प्रांशव शुभाः ॥ ५५ ॥ एकवर्णेन सर्व्वेण ध्वजेन कवचेन च । अश्वैश्च धनुषा चैव शुक्लैः शुक्लोऽभ्यवर्त्तत ॥ ५६ ॥ समुद्रसेनपुत्रन्तु सामुद्रा रुद्रतेजसम् । अश्वाः शशाङ्कसदृशाश्चन्द्रसेनमुदावहन् ॥ ५७ ॥ नीलोत्पलसवर्णास्तु तपनीयविभूषिताः । शैव्यं चित्ररथं सङ्ख्ये चित्रमाल्यावहन् हयाः ॥ ५८ ॥ कलायपुष्पवर्णास्तु श्वेतलोहितराजयः । रथसेनं हयश्रेष्ठाः समूहुर्युद्धदुर्मदम् ॥ ५९ ॥ यन्तु सर्व्वमनुष्येभ्यः प्राहुः शूरतरं नृपम् । तं पटच्चरहन्तारं शुकवर्णावहन् हयाः ॥ ६० ॥ चित्रायुधं चित्रमाल्यं चित्रवर्मायुधध्वजम् । ऊहुः किंशुकवर्णानां समवर्णा हयोत्तमाः ॥ ६१ ॥ एकवर्णेन सर्व्वेण ध्वजेन कवचेन च । धनुषा रथवाहैश्च नीलैर्नीलोऽभ्यवर्त्तत ॥ ६२ ॥ नानारूपैरत्नचित्रैर्वरूथध्वजकार्मुकैः । वाजिध्वजपताकाभिश्चित्रैश्चित्रोऽभ्यवर्त्तत ॥ ६३ ॥ ये तु पुष्करवर्णस्य तुल्यवर्णा हयोत्तमाः । ते रोचमानस्य सुतं हेमवर्णमुदावहन् ॥ ६४ ॥

योधश्च भद्राकारश्च शरदण्डानुदण्डयः। श्वेताण्डाः कुक्कुटाण्डाश्च दण्डकेतुं हयावहन्॥ ६५ ॥ केशवेन हते सङ्ख्ये पितर्य्यथ नराधिप। भिन्ने कपाटे पाण्ड्यानां विद्रुतेषु च बन्धुषु॥ ६६ ॥ भीष्मादवाप्य चास्त्राणि द्रोणाद्रामात् कृपात्तथा। अस्त्रैः समत्वं सम्प्राप्य रुक्मिकर्णार्जुनाच्युतैः॥ ६७ ॥ इयेष द्वारकां हन्तुं कृत्स्नां जेतुञ्च मेदिनीम्। निवारितस्ततः प्राज्ञैः सुहृद्भिर्हित-काम्यया॥ ६८ ॥ वैरानुबन्धमुत्सृज्य स्वराज्यमनुशास्ति यः। स सारङ्गध्वजः पाण्ड्यश्चन्द्ररश्मिनिभैर्हयैः॥ ६९ ॥ वैदूर्य्यजाल-सञ्छन्नैर्वीर्य्यद्रविणमाश्रितः। दिव्यं विस्फारयंश्चापं द्रोणमभ्य-द्रवद्बली॥ ७० ॥ आटरूषकवर्णाभा हयाः पाण्ड्यानुयायि-नाम्। अवहन् रथमुख्यानामयुतानि चतुर्द्दश॥ ७१ ॥ नानावर्णेन रूपेण नानाकृतिमुखा हयाः। रथचक्रध्वजं वीरं घटोत्कचमुदावहन्॥ ७२ ॥ भरतानां समेतानामुत्सृज्यैको मतानि यः। गतो युधिष्ठिरं भक्त्या त्यक्त्वा सर्व्वमभीप्सितम्॥ ७३ ॥ लोहिताक्षं महाबाहुं वृहन्तं तमरिध्वजाः। महा-सत्त्वा महाकायाः सौवर्णस्यन्दन स्थितम्॥ ७४ ॥ सुवर्णवर्णा धर्म्मज्ञमनीकस्थं युधिष्ठिरम्। राजश्रेष्ठं हयश्रेष्ठाः सर्व्वतः पृष्ठ-तोऽन्वयुः॥ ७५ ॥ वर्णैरुच्चावचैरन्यैः सदश्वानां प्रभद्रकाः। संन्यवर्त्तन्त युद्धाय बहवो देवरूपिणः॥ ७६ ॥ ते यत्ता भीम-सेनेन सहिताः काञ्चनध्वजाः। प्रत्यदृश्यन्त राजेन्द्र सेन्द्रा इव दिवौकसः॥ ७७ ॥ प्रत्यरोचत तान् सर्व्वान् धृष्टद्युम्नः समा-गतान्। सर्व्वाण्यति च सैन्यानि भारद्वाजो व्यरोचत॥ ७८ ॥ अतीव शुशुभे तस्य ध्वजः कृष्णाजिनोत्तरः। कमण्डलुर्महाराज जातरूपमयः शुभः॥ ७९ ॥ ध्वजन्तु भीमसेनस्य वैदूर्य्यमणि-लोचनम्। भ्राजमानं महासिंहं राजतं दृष्टवानहम्॥ ८० ॥ ध्वजन्तु कुरुराजस्य पाण्डवस्य महौजसः। दृष्टवानस्मि सौवर्णं

सौमं ग्रहगणान्वितम्॥ ८१ ॥ मृदङ्गौ चात्र विपुलौ दिव्यौ नन्दोपनन्दकौ। यन्त्रेणाहन्यमानौ च सुखनौ हर्षवर्द्धनौ॥८२॥ शरभं पृष्ठसौवर्णं नकुलस्य महाध्वजम्। अपश्याम रथेऽत्युग्रं भीषणार्थमवस्थितम्॥ ८३ ॥ हंसस्तु राजतः श्रीमान् ध्वजे घण्टापताकवान्। सहदेवस्य दुर्द्धर्षो द्विषतां शोकवर्द्धनः॥ ८४ ॥ पञ्चानां द्रौपदेयानां प्रतिमाध्वजभूषणम्। धर्ममारुतशक्राणामश्विनोश्च महात्मनाः॥ ८५ ॥ अभिमन्योः कुमारस्य शार्ङ्गपक्षी हिरण्मयः। रथे ध्वजवरो राजंस्तप्तचामीकरोज्ज्वलः॥ ८६ ॥ घटोत्कचस्य राजेन्द्र ध्वजे गृध्रो व्यरोचत। अश्वाश्च कामगास्तस्य रावणस्य यथा पुरा॥ ८७ ॥ माहेन्द्रञ्च धनुर्द्दिव्यं धर्मराजे युधिष्ठिरे। वायव्यं भीमसेनस्य धनुर्द्दिव्यमभून्नृप॥ ८८॥ त्रैलोक्यरक्षणार्थाय ब्रह्मणा सृष्टमायुधम्। तद्दिव्यमजरञ्चैव फाल्गुनार्थाय वै धनुः॥ ८९॥ वैष्णवं नकुलार्थाय सहदेवाय चाश्विनम्। घटोत्कचाय पौलस्त्यं धनुर्द्दिव्यं भयानकम्॥ ९० ॥ रौद्रमाग्नेयकौवेर्य्यं याम्यं गिरिशमेव च। पञ्चानां द्रौपदेयानां धनूरत्नानि भारत॥ ९१ ॥ रौद्रं धनुर्वरं श्रेष्ठं लेभे यं रोहिणीसुतः। तं तुष्टः प्रददौ रामः सौभद्राय महात्मने॥ ९२॥ एते चान्ये च बहवो ध्वजा हेमविभूषिताः। तत्रादृश्यन्त शूराणां द्विषतां शोकवर्द्धनाः॥ ९३ ॥ तदभूद्ध्वजसम्बाधमकापुरुषसेवितम्। द्रोणानीकं महाराज पटे चित्रमिवार्पितम्॥ ९४ ॥ शुश्रुवुर्नामगोत्राणि वीराणां संयुगे तदा। द्रोणमाद्रवतां राजन् स्वयम्बरमिवाहवे॥ ९५ ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि ध्वजादिकथने त्रयोविंशोऽध्यायः॥ २३ ॥

धृतराष्ट्र उवाच। व्यथयेयुरिमे सेनां देवानामपि सञ्जय। आहवे ये न्यवर्त्तन्त वृकोदरमुखा नृपाः॥ १॥ संप्रयुक्तः किलैवायं दिष्टे भवति पूरुषः। तस्मिन्नेव च सर्वार्थाः प्रदृश्यन्ते पृथग्विधाः॥ २॥ दीर्घं विप्रोषितः कालमरण्ये जटिलोऽजिनी। अज्ञातश्चैव लोकस्य विजहार युधिष्ठिरः॥ ३॥ स एव महतीं सेनां समावर्त्तयदाहवे। किमन्यद्दैवसंयोगान्मम पुत्रस्य चाभवत्॥ ४॥ युक्त एव हि भाग्येन ध्रुवमुत्पद्यते नरः। स तथा कृष्यते तेन न यथा स्वयमिच्छति॥ ५॥ द्यूतव्यसनमासाद्य क्लेशितो हि युधिष्ठिरः। स पुनर्भागधेयेन सहायानुपलब्धवान्॥ ६॥ अद्य मे केकया लब्धाः कौशिकाः कोशलाश्च ये। चेदयश्चापरे वङ्गा मामेव समुपाश्रिताः॥ ७॥ पृथिवी भूयसी तात मम पार्थस्य नो तथा। इति मामब्रवीत् सूत मन्दो दुर्योधनः पुरा॥ ८॥ तस्य सेनासमूहस्य मध्ये द्रोणः सुरक्षितः। निहतः पार्षतेनाजौ किमन्यद्भागधेयतः॥ ९॥ मध्ये राज्ञां महाबाहुं सदा युद्धाभिनन्दिनम्। सर्वास्त्रपारगं द्रोणं कथं मृत्युमुपेयिवान्॥ १०॥ समनुप्राप्तकृच्छ्रोऽहं मोहं परममागतः। भीष्मद्रोणौ हतौ श्रुत्वा नाहं जीवितुमुत्सहे॥ ११॥ यन्मां क्षत्ताब्रवीत्तात प्रपश्यन् पुत्रगृद्धिनम्। दुर्योधनेन तत्सर्वं प्राप्तं सूत मया सह॥ १२॥ नृशंसन्तु परं नु स्यात् शक्त्या दुर्योधनं यदि। पुत्रशेषं चिकीर्षेयं कृत्स्नेन मरणं व्रजेत्॥ १३॥ यो हि धर्मं परित्यज्य भवत्यर्थपरो नृपः। सोऽस्माच्च हीयते लोकात् क्षुद्रभावञ्च गच्छति॥ १४॥ अद्य चाप्यस्य राष्ट्रस्य हतोत्साहस्य सञ्जय। अवशेषं न पश्यामि ककुदे मृदिते सति॥ १५॥ कथं स्यादवशेषाद्धि धुर्य्ययोरभ्यतीतयोः। यौ नित्यमुपजीवामः क्षमिणौ पुरुषर्षभौ॥ १६॥ व्यक्तमेव च मे शंस यथायुद्धमवर्त्तत। केऽयुध्यन् केऽव्यपाकर्षन् के क्षुद्राः प्राद्रवन् भयात्॥ १७॥

धनञ्जयञ्च मे शंसे यद्यच्चक्रे रथर्षभः । तस्माद्भयं नो भूयिष्ठं भ्रातृव्याच्च वृकोदरात् ॥ १८ ॥ यथासीच्च निवृत्तेषु पाण्डवेयेषु सञ्जय । मम सैन्यावशेषस्य सन्निपातः सुदारुण ॥ १९ ॥ कथञ्च वो मनस्तात निवृत्तेष्वभवत्तदा । मामकानाञ्च के शूरास्तेषां तत्र न्यवारयन् ॥ २० ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि धृतराष्ट्रवाक्ये चतुर्विंशोऽध्यायः ॥ २४ ॥

---

सञ्जय उवाच । महद्भैरवमासीन्नः सन्निवृत्तेषु पाण्डुषु । दृष्ट्वा द्रोणं छाद्यमानं तैर्भास्करमिवाम्बुदैः ॥ १ ॥ तैश्चोद्धूतं रजस्तीव्रमवचक्रे चमूस्तव । ततो हतममंस्याम द्रोणं दृष्टिपथे हते ॥ २ ॥ तांस्तु शूरान् महेष्वासान् क्रूरं कर्म चिकीर्षतः । दृष्ट्वा दुर्य्योधनस्तूर्णं स्वसैन्यं समचूचुदत् ॥ ३ ॥ यथाशक्ति यथोत्साहं यथासत्त्वं नराधिपाः । वारयध्वं यथायोगं पाण्डवानामनीकिनीम् ॥ ४ ॥ ततो दुर्मर्षणो भीममभ्यगच्छत् सुतस्तव । आराद्दृष्ट्वा किरन् वाणैरिच्छन् द्रोणस्य जीवितम् ॥ ५ ॥ वाणैः समाचिनोद्भीमं क्रुद्धो मृत्युरिवाहवे । तञ्च भीमोऽनुदद्वाणैस्तदासीत्तुमुलं महत् ॥ ६ ॥ त ईश्वरसमादिष्टाः प्राज्ञाः शूराः प्रहारिणः । राज्यं मृत्युभयं त्यक्त्वा प्रत्यतिष्ठन् परान् युधि ॥ ७ ॥ कृतवर्मा शिनेः पौत्रं मत्तो मत्तमिव द्विपम् । सैन्धवः क्षत्रवर्माणमायान्तं निशितैः शरैः ॥ ८ ॥ उग्रधन्वा महेष्वासं यत्तो द्रोणादवारयत् । कृतवर्मा सिन्धुपतेश्छित्त्वा केतनकार्मुके ॥ ९ ॥ नाराचैर्दशभिः क्रुद्धः सर्वमर्मस्वताड़यत् । अथान्यद्धनु-

रादाय सैन्धवः कृतहस्तवत् ॥ १० ॥ विव्याध चत्रवर्माणं रणे
सर्वायसैः शरैः । युयुत्सुं पाण्डवार्थाय यतमानं महारथम् ॥ ११ ॥
सुबाहुर्भ्रातरं शूरं यत्तो द्रोणादवारयत् । सुबाहोः सधनुर्बाणौ
व्यस्यतः परिघोपमौ ॥ १२ ॥ युयुत्सुः सितपीताभ्यां क्षुराभ्या-
मच्छिनद्भुजौ राजानं पाण्डवश्रेष्ठं धर्मात्मानं युधिष्ठिरम् ॥ १३ ॥
वेलेव सागरं क्षुब्धं मद्रराट् समवारयत् । तं धर्मराजो बहुभि-
र्मर्मविद्भिरवाकिरत् ॥ १४ ॥ मद्रेशस्तं चतुःषष्ट्या शरैर्विद्धोऽन-
दद्भृशम् । तस्य नानदतः केतुमुच्चकर्त्त च कार्मुकम् ॥ १५ ॥
क्षुराभ्यां पाण्डवश्रेष्ठस्तत उच्चुक्रुशुर्जनाः । तथैव राजा वाह्लिको
राजानं द्रुपदं शरैः ॥ १६ ॥ आद्रवन्तं सहानीको महानीकं
न्यवारयत् । तद्युद्धमभवद्घोरं वृद्धयोः सहसेनयोः ॥ १७ ॥ यथा
महायूथपयोर्द्विपयोः सम्प्रभिन्नयोः । विन्दानुविन्दावावन्त्यौ
विराटं मत्स्यमार्च्छताम् ॥ १८ ॥ सह सैन्यैः सहानीकं यथे-
न्द्राग्नी पुरा बलिम् । तदुत्पिञ्जलकं युद्धमासीद्देवासुरोपमम्
॥ १९ ॥ मत्स्यानां कैकयैः सार्द्धमभीताश्वरथद्विपम् । नाकुलिन्तु
शतानीकं भूतकर्मा सभापतिः ॥ २० ॥ अस्यन्तमिषुजालानि यान्तं
द्रोणादवारयत् । ततो नकुलदायादस्त्रिभिर्भल्लैः सुसंशितैः ॥ २१ ॥
चक्रे विबाहुशिरसं भूतकर्माणमाहवे । सुतसोमन्तु विक्रान्त-
मायान्तं तं शरौघिणम् ॥ २२ ॥ द्रोणायाभिमुखं वीरं विविं-
शतिरवारयत् । सुतसोमस्तु संक्रुद्धः स्वपितृव्यमजिह्मगैः ॥ २३ ॥
विविंशतिं शरैर्भित्त्वा नाभ्यवर्त्तत दंशितः । अथ भीमरथः शाल्व-
माशुगैरायसैः शितैः ॥ २४ ॥ षड्भिः साश्वनियन्तारमनय-
द्यमसादनम् । श्रुतकर्माणमायान्तं मयूरसदृशैर्हयैः ॥ २५ ॥
चित्रसेनिर्महाराज तव पुत्रमवारयत् । तौ पौत्रौ तव दुर्द्धर्षौ
परस्परवधैषिणौ ॥ २६ ॥ पितृणामर्थसिद्ध्यर्थं चक्रतुर्युद्धमुत्तमम् ।
तिष्ठन्तमग्रे तं दृष्ट्वा प्रतिविन्ध्यं महाहवे ॥ २७ ॥ द्रौणिर्मानं

पितुः कुर्वन् मार्गणैः समवारयत् । तं क्रुद्धं प्रतिविव्याध प्रतिविन्ध्यः शितैः शरैः ॥ २८ ॥ सिंहलाङ्गूललक्ष्माणं पितुरर्थे व्यवस्थितम् । प्रवपन्निव वीजानि वीजकाले नरर्षभ ॥ २९ ॥ द्रोणायणिं द्रौपदेयाः शरवर्षैरवाकिरन् । आर्ज्जुनिं श्रुतकीर्त्तिन्तु द्रौपदेयं महारथम् ॥ ३० ॥ द्रोणायाभिमुखं यान्तं दौःशासनिरवारयत् । तस्य कृष्णसमः कार्ष्णिस्त्रिभिर्भल्लैः सुसंशितैः ॥ ३१ ॥ धनुर्ध्वजञ्च सूतञ्च छित्त्वा द्रोणान्तिकं ययौ । यस्तु शूरतमो राजन्नुभयोः सेनयोर्मतः ॥ ३२ ॥ तं पटच्चरहन्तारं लक्ष्मणः समवारयत् । स लक्ष्मणस्येष्वसनं छित्त्वा लक्ष्म च भारत ॥ ३३ ॥ लक्ष्मणे शरजालानि विसृजन् वह्वशोभत । विकर्णस्तु महाप्राज्ञो याज्ञसेनिं शिखण्डिनम् ॥ ३४ ॥ पर्य्यवारयदायान्तं युवानं समरे युवा । ततस्तमिषुजालेन याज्ञसेनिः समावृणोत् ॥ ३५ ॥ विधूय तद्वाणजालं वभौ तव सुतो वली । अङ्गदोऽभिमुखं वीरमुत्तमौजसमाहवे ॥ ३६ ॥ द्रोणायाभिमुखं यान्तं शरौघेण न्यवारयत् । ससम्प्रहारस्तुमुलस्तयोः पुरुषसिंहयोः ॥ ३७ ॥ सैनिकानाञ्च सर्वेषां तयोश्च प्रीतिवर्द्धनः । दुर्मुखश्च महेष्वासो वीरं पुरुजितं वली ॥ ३८ ॥ द्रोणायाभिमुखं यान्तं वत्सदन्तैरवारयत् । सदुर्मुखं भ्रुवोर्मध्ये नाराचेनाभ्यताड़यत् ॥ ३९ ॥ तस्य तद्विवभौ वक्त्रं सनालमिव पङ्कजम् । कर्णस्तु कैकयान् भ्रातॄन् पञ्च लोहितकध्वजान् ॥ ४० ॥ द्रोणायाभिमुखं यान्तं शरवर्षैरवारयत् । ते चैनं भृशसन्तप्ताः शरवर्षैरवाकिरन् ॥ ४१ ॥ स च तान् छादयामास शरजालैः पुनः पुनः । नैव कर्णो न ते पञ्च ददृशुर्वाणसम्वृताः ॥ ४२ ॥ साश्वसूतध्वजरथाः परस्परशराचिताः । पुत्रास्ते दुर्ज्जयश्चैव जयश्च विजयश्च ह ॥ ४३ ॥ नीलकाश्यजयत्सेनांस्त्रयस्त्रीन् प्रत्यवारयन् । तद्युद्धमभवद्घोरमीक्षितृप्रीतिवर्द्धनम् ॥ ४४ ॥ सिंहव्याघ्रतरक्षूणां यथर्क्षमहिषर्षभैः । क्षेम-

धृष्टद्युम्नौ तु भ्रातरौ सात्वतं युधि ॥ ४५ ॥ द्रोणाभिमुखमायान्तं शरैस्तीक्ष्णैस्ततक्षतुः। तयोस्तस्य च तद्युद्धमत्यद्भुतमिवाभवत् ॥ ४६ ॥ सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां यथा वने। राजानन्तु तथाम्बष्ठमेकं युद्धाभिनन्दिनम् ॥ ४७ ॥ चेदिराजः शरानस्य क्रुद्धो द्रोणादवारयत्। ततोऽम्बष्ठोऽस्थिभेदिन्या निरभिद्यच्छलाकया ॥ ४८ ॥ स त्यक्त्वा सशरं चापं रथात् भूमिमुपागमत्। वार्द्धक्षेमिन्तु वार्ष्णेयं कृपः शारद्वतः शरैः ॥ ४९ ॥ अक्षुद्रः क्षुद्रकैर्बाणैः क्रुद्धरूपमवारयत्। युध्यन्तौ कृपवार्ष्णेयौ येऽपश्यंश्चित्रयोधिनौ ॥ ५० ॥ ते युद्धासक्तमनसो नान्यां बुबुधिरे क्रियाम्। सौमदत्तिस्तु राजानं मणिमन्तमतन्द्रितम् ॥ ५१ ॥ पर्य्यवारयदायान्तं यशो द्रोणस्य वर्द्धयन्। स सौमदत्तिस्त्वरितस्तस्येष्वसनकेतने ॥ ५२ ॥ पुनः पताकां सूतञ्च छत्रं चापातयद्रथात्। अथाप्लुत्य रथात्तूर्णं यूपकेतुरमित्रहा ॥ ५३ ॥ साश्वसूतध्वजरथं तं चकर्त्त वरासिना। रथञ्च स्वं समास्थाय धनुरादाय चापरम् ॥ ५४ ॥ स्वयं यच्छन् हयान् राजन् व्यधमत् पाण्डवीं चमूम्। पाण्ड्यमिन्द्रमिवायान्तमसुरान् प्रति जघ्नुषम् ॥ ५५ ॥ समर्थः सायकौघेन वृषसेनो न्यवारयत्। गदापरिघनिस्त्रिंशपट्टिशायोघनप्लवैः ॥ ५६ ॥ मुषलैर्मुद्गरैश्चक्रैर्भिन्दिपालपरश्वधैः। पांशुवाताग्निसलिलैर्भस्मलोष्ट्रतृणद्रुमैः ॥५७ आरुजन् प्ररुजन् भञ्जन् विघ्नन् विद्रावयन् क्षिपन्। सेना विभीषयन्नायाद्द्रोणं प्रेप्सुर्घटोत्कचः ॥ ५८ ॥ तन्तु नानाप्रहरणैर्नानायुद्धविशेषणैः। राक्षसं राक्षसः क्रुद्धः समाजघ्ने ह्यलम्बुषः ॥ ५९ ॥ तयोस्तदभवद्युद्धं रक्षोग्रामणिमुख्ययोः। तादृक् यादृक् पुरा वृत्तं शम्वरामरराजयोः ॥ ६० ॥ एवं द्वन्द्वशतान्यासन् रथवारणवाजिनाम्। पदातीनाञ्च भद्रन्ते तव तेषाञ्च सङ्कुले ॥६१॥ नैतादृशो दृष्टपूर्व्वः सङ्ग्रामो नैव च श्रुतः। द्रोणस्याभावभावे तु

प्रसक्तानां यथाभवत् ॥ ६२ ॥ इदं घोरमिदं चित्रमिदं रौद्रमिति प्रभो । तत्र युद्धान्यदृश्यन्त प्रततानि बहूनि च ॥ ६३ ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि द्वन्द्वयुद्धे पञ्चविंशोऽध्यायः ॥ २५ ॥

---

धृतराष्ट्र उवाच। तेष्वेवं सन्निवृत्तेषु प्रत्युद्यातेषु भागश । कथं युयुधिरे पार्था मामकाश्च तरस्विनः ॥ १ ॥ किमर्जुनश्चाप्यकरोत् संशप्तकरथं प्रति । संशप्तका वा पार्थस्य किमकुर्वत सञ्जय ॥ २ ॥

सञ्जय उवाच। तथा तेषु निवृत्तेषु प्रत्युद्यातेषु भागशः। स्वयमभ्यद्रवद्भीमं नागानीकेन ते सुतः ॥ ३ ॥ सनाग इव नागेन गोवृषेणेव गोवृषः। समाहूतः स्वयं राज्ञा नागानीकमुपाद्रवत् ॥ ४ ॥ स युद्धकुशलः पार्थो बाहुवीर्य्येण चान्वितः। अभिनत् कुञ्जरानीकमचिरेणैव मारिष ॥ ५ ॥ ते गजा गिरिसङ्काशाः क्षरन्तः सर्वतोमदम्। भीमसेनस्य नाराचैर्विमुखा विह्वलीकृताः ॥ ६ ॥ विधमेदभ्रजालानि यथा वायुः समुद्गतः। व्यधमत्तान्यनीकानि तथैव पवनात्मजः ॥ ७ ॥ स तेषु विसृजन् बाणान् भीमो नागेष्वशोभत। भुवनेष्विव सर्वेषु गभस्तीनुदितो रविः ॥ ८ ॥ ते भीमबाणाभिहताः संसक्ता विबभुर्गजाः। गभस्तिभिरिवार्कस्य व्योम्नि नानाबलाहकाः ॥ ९ ॥ तथा गजानां कदनं कुर्वाणमनिलात्मजम्। क्रुद्धो दुर्य्योधनोऽभ्येत्य प्रत्यविध्यत् शितैः शरैः ॥ १० ॥ ततः क्षणेन क्षितिपं क्षतजप्रतिमेक्षणः। क्षयं निनीषुर्निशितैर्भीमो विव्याध पत्रिभिः ॥ ११ ॥ स शरार्पितसर्वाङ्गः क्रुद्धो विव्याध पाण्डवम्। नाराचैरर्करश्म्याभैर्भीमसेनं स्मयन्निव ॥ १२ ॥ तस्य नागं मणिमयं रत्नचित्रं ध्वजे स्थितम्।

भल्लाभ्यां कार्मुकञ्चैव चिप्रं चिच्छेद पाण्डवः ॥ १३ ॥ दुर्य्योधनं पीड्यमानं दृष्ट्वा भीमेन मारिष । चुक्षोभयिषुरभ्यागाद्वङ्गो मातङ्गमास्थितः ॥ १४ ॥ तमापतन्तं नागेन्द्रमम्बुदप्रतिमस्वनम् । कुम्भान्तरे भीमसेनो नाराचेनार्द्दयद्युधम् ॥ १५ ॥ तस्य कायं विनिर्भिद्य न्यमज्जद्धरणीतले । ततः पपात द्विरदो वज्राहत इवाचलः ॥ १६ ॥ तस्यावर्जितनागस्य म्लेच्छस्य च पतिष्यतः । शिरश्चिच्छेद भल्लेन चिप्रकारी वृकोदरः ॥ १७ ॥ तस्मिन्निपतिते वीरे सम्प्राद्रवत सा चमूः । सम्भ्रान्ताश्वद्विपरथा पदातीनवमृद्नती ॥ १८ ॥ तेष्वनीकेषु भग्नेषु विद्रवत्सु समन्ततः । प्राग्ज्योतिषस्ततो भीमं कुञ्जरेण समाद्रवत् ॥ १९ ॥ चरणाभ्यामथो हाभ्यां संहतेन करेण च । व्यावृत्तनयनः क्रुद्धः प्रदहन्निव पाण्डवम् ॥ २० ॥ वृकोदररथं साश्वमविशेषमचूर्णयत् । पद्भ्यां भीमोऽप्यथोधावन् तस्य गात्रेष्वलीयत ॥ २१ ॥ जानन्नञ्जलिकावेधं न व्यक्रामत पाण्डवः । गात्राभ्यन्तरगो भूत्वा करेण ताड़यन्मुहुः ॥ २२ ॥ कालयामास तं नागं बधाकाङ्क्षिणमव्ययम् । कुलालचक्रवन्नागस्तदा तूर्णमथाभ्रमत् ॥ २३ ॥ नागायुतबली श्रीमान् कालयानो वृकोदरः । भीमोऽपि निष्क्रम्य ततः सुप्रतीकाग्रतोऽभवत् ॥ २४ ॥ भीमं करेणावनम्य जानुभ्यामभ्यपातयत् । ग्रीवायां वेष्टयित्वैनं सगजो हन्तुमैहत ॥ २५ ॥ करवेष्टं भीमसेनो भ्रमं दत्त्वा व्यमोचयत् । पुनर्गात्राणि नागस्य प्रविवेश वृकोदरः ॥ २६ ॥ यावत् प्रतिगजायातं स्वबलस्थमवैक्षत । भीमोऽपि नागगात्रेभ्यो विनिष्क्रम्य ययौ जवात् ॥ २७ ॥ ततः सर्वस्य सैन्यस्य नादः समभवन्महान् । अहो धिग्निहतो भीमः कुञ्जरेणेति मारिष ॥ २८ ॥ तेन नागेन सन्त्रस्ता पाण्डवानामनीकिनी । सहसाभ्यद्रवद्राजन् यत्र तस्थौ वृकोदरः ॥ २९ ॥ ततो युधिष्ठिरो राजा हतं मत्वा वृकोदरम् । भगदत्तं सपा-

च्छाल्यः सर्वतः समवारयत्॥ ३०॥ तं रथैरथिनां श्रेष्ठः परि-
वार्य्य समन्ततः। अवाकिरच्छरैस्तीक्ष्णैः शतशोऽथ सहस्रशः
॥ ३१॥ स विघातं पृषत्कानामङ्कुशेन समाचरन्। गजेन पाण्डु-
पाञ्चालान् व्यधमत् पर्वतेश्वरः॥ ३२॥ तदद्भुतमपश्याम भग-
दत्तस्य संयुगे। तथा वृद्धस्य चरितं कुञ्जरेण विशाम्पते॥ ३३॥
ततो राजा दशार्णानां प्राग्ज्योतिषमुपाद्रवत्। तिर्य्यग्गमेन
नागेन समदेनाशुगामिना॥ ३४॥ तयोर्युद्धं समभवन्नागयो-
र्भीमरूपयोः। सपक्षयोः पर्वतयोर्यथा सद्रुमयोः पुरा॥ ३५॥
प्राग्ज्योतिषपतेर्नागः सन्निवृत्यापवृत्य च। पार्श्वे दशार्णाधि-
पतेर्भित्त्वा नागमघातयत्॥ ३६॥ तोमरैः सूर्य्यरश्म्याभैर्भग-
दत्तोऽथ सप्तभिः। जघान द्विरदस्थं तं शत्रुं प्रचलितासनम्॥३७॥
व्यवच्छिद्य तु राजानं भगदत्तं युधिष्ठिरः रथानीकेन महता
सर्वतः पर्य्यवारयत्॥ ३८॥ सकुञ्जरस्थो रथिभिः शुशुभे सर्वतो-
वृतः। पर्वते वनमध्यस्थो ज्वलन्निव हुताशनः॥ ३९॥ मण्डलं
सर्वतः श्लिष्टं रथिनामुग्रधन्विनाम्। किरतां शरवर्षाणि सनागः
पर्य्यवस्थितः॥ ४०॥ ततः प्राग्ज्योतिषो राजा परिगृह्य महा-
गजम्। प्रेषयामास तं नागं युयुधानरथं प्रति॥ ४१॥ शिनेः
पौत्रस्य तु रथं परिगृह्य महाद्विपः। अतिचिक्षेप वेगेन युयु-
धानस्त्वपाक्रमत्॥ ४२॥ बृहतः सैन्धवानश्वान् समुत्थाप्याथ
सारथिः। तस्थौ सात्यकिमासाद्य स प्लुतस्तं रथं प्रति॥ ४४॥
स तु लब्ध्वान्तरं नागस्त्वरितो रथमण्डलात्। निश्चक्राम ततः
सर्वान् परिचिक्षेप पार्थिवान्॥ ४५॥ ते त्वाशुगतिना तेन
त्रास्यमाना नरर्षभाः। तमेकं द्विरदं सङ्ख्ये मेनिरे शतशो
द्विपान्॥ ४६॥ ते गजस्थेन काल्यन्ते भगदत्तेन पाण्डवाः। तेषां
प्राद्रवतां भीमः पाञ्चालानामितस्ततः॥ ४७॥ गजवाजिकृतः
शब्दः सुमहान् समजायत। भगदत्तेन समरे काल्यमानेषु पाण्डुषु

॥ ४८ ॥ प्राग्ज्योतिषमतिक्रम्य पुनर्भीमः समभ्ययात्। तस्याभिद्रवतो वाहान् हस्तमुक्तेन वारिणा ॥ ४९ ॥ सिक्त्वा व्यत्रासयन्नागस्तं भीमः प्राकिरत्ततः। ततस्तमभ्ययात्तूर्णं रुचिपर्वा कृतीसुतः ॥ ५० ॥ प्रवर्षन् शरवर्षेण रथस्थोऽन्तकसन्निभः। ततः स रुचिपर्वाणं शरेणानतपर्वणा ॥ ५१ ॥ सुवर्चाः पर्वतपतिर्निन्ये वैवस्वतक्षयम्। तस्मिन्निपतिते वीरे सौभद्रो द्रौपदीसुताः ॥ ५२ ॥ चेकितानो धृष्टकेतुर्युयुत्सुश्चार्दयन् द्विपम्। त एनं शरधाराभिर्धाराभिरिव तोयदाः ॥ ५३ ॥ सिषिचुर्भैरवान्नादान् विनदन्तो जिघांसवः। ततः पार्ष्ण्यङ्कुशाङ्गुष्ठैः कृतिना चोदितो द्विपः ॥५४॥ प्रसारितकरः प्रायात् स्तब्धकर्णेक्षणो द्रुतम्। सोऽधिष्ठाय पदा वाहान् युयुत्सोः सूतमारुजत् ॥ ५५ ॥ युयुत्सुस्तु रथाद्राजन्नपाक्रामत् त्वरान्वितः। ततः पाण्डवयोधास्ते नागराजं शरैर्द्रुतम् ॥ ५६ ॥ सिषिचुर्भैरवान्नादान् विनदन्तो जिघांसवः। पुत्रस्तु तव सम्भ्रान्तः सौभद्रस्य द्रुतो रथम् ॥ ५७ ॥ स कुञ्जरस्थो विसृजन्निषूनरिषु पार्थिवः। बभौ रश्मीनिवादित्यो भुवनेषु समुत्सृजन् ॥ ५८ ॥ तमार्जुनिर्द्वादशभिर्युयुत्सुर्दशभिः शरैः। त्रिभिस्त्रिभिर्द्रौपदेया धृष्टकेतुश्च विव्यधुः ॥ ५९ ॥ सोऽतियत्नार्पितैर्बाणैराचितो द्विरदो बभौ। संस्यूत इव सूर्यस्य रश्मिभिर्जलदो महान् ॥ ६० ॥ नियन्तुः शिल्पयत्नाभ्यां प्रेरितोऽरिशरार्दितः। परिचिक्षेप तान्नागः स रिपून् सव्यदक्षिणम् ॥६१॥ गोपाल इव दण्डेन यथा पशुगणान् वने। आवेष्टयत तां सेनां भगदत्तस्तथा मुहुः ॥ ६२ ॥ क्षिप्रं श्येनाभिपन्नानां वायसानामिव स्वनः। बभूव पाण्डवेयानां भृशं विद्रवतां स्वनः ॥ ६३ ॥ स नागराजः प्रवराङ्कुशाहतः पुरा सपक्षोऽद्रिवरो यथा नृप। भयं तदा रिपुषु समादधद्भृशं वणिग्जनानामभितो यथार्णवः ॥ ६४ ॥ ततोध्वनिर्द्विरदरथाश्वपार्थिवैर्भयाद्द्रवद्भिर्जनितोऽति-

भैरवः । क्षितिं वियद्दा विदिशो दिशस्तथा समावृणोत् पार्थिव संयुगे ततः ॥ ६५ ॥ स तेन नागप्रवरेण पार्थिवो भृशं जगाह द्विषतामनीकिनीम् । पुरा सुगुप्तां विबुधैरिवाहवे विरोचनो देववरूथिनीमिव ॥ ६६ ॥ भृशं ववौ ज्वलनसखो वियद्रजः समावृणोन्मुहुरपि चैव सैनिकान् । तमेव नागं गणशो यथा गजान् समन्ततो द्रुतमथ मेनिरे जनाः ॥ ६७ ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि भगदत्तयुद्धे षड्विंशोऽध्यायः ॥ २६ ॥

---

सञ्जय उवाच । यन्मां पार्थस्य सङ्ग्रामे कर्म्माणि परिपृच्छसि । तच्छृणुष्व महाबाहो पार्थो यदकरोन्मृधे ॥ १ ॥ रजो दृष्ट्वा समुद्भूतं श्रुत्वा च जननिस्वनम् । भगदत्ते विकुर्वाणे कौन्तेयः कृष्णमब्रवीत् ॥ २ ॥ यथा प्राग्ज्योतिषो राजा गजेन मधुसूदन । त्वरमाणोऽभिनिष्क्रान्तो ध्रुवं तस्यैष निस्वनः ॥ ३ ॥ इन्द्रादनवरः सङ्ख्ये गजयानविशारदः । प्रथमो वा द्वितीयो वा पृथिव्यामिति मे मतिः ॥ ४ ॥ स चापि द्विरदश्रेष्ठः सदाप्रतिगजो युधि । सर्व्वशस्त्रातिगः सङ्ख्ये कृतकर्म्मा जितक्लमः ॥ ५ ॥ सोढ़ा शस्त्रनिपातानामग्निस्पर्शस्य चानघ । स पाण्डवबलं सर्व्वमद्यैको नाशयिष्यति ॥ ६ ॥ न चावाभ्यामृतेऽन्योऽस्ति शक्तस्तं प्रतिबाधितुम् । त्वरमाणस्ततो याहि यतः प्राग्ज्योतिषाधिपः ॥ ७ ॥ दृप्तं सङ्ख्ये द्विपबलं वयसा चापि विस्मितम् । अद्यैनं प्रेषयिष्यामि बलहन्तुः प्रियातिथिम् ॥ ८ ॥ वचनादथ कृष्णस्तु प्रययौ सव्यसाचिनः । दीर्य्यते भगदत्तेन यत्र पाण्डववाहिनी ॥ ९ ॥ तं प्रयान्तं ततः पश्चादाह्वयन्तो महारथाः । संशप्तकाः समारोहन् सहस्राणि चतुर्द्दश ॥ १० ॥ दशैव तु सहस्राणि

त्रिगर्त्तानां महारथाः। चत्वारि च सहस्राणि वासुदेवस्य चानुगाः॥ ११ ॥ दीर्य्यमाणां चमूं दृष्ट्वा भगदत्तेन मारिष। आहूयमानस्य च तैरभवद्धृदयं द्विधा॥ १२॥ किन्नु श्रेयस्करं कर्म भवेदद्येति चिन्तयन्। इह वा विनिवर्त्तेयं गच्छेयं वा युधिष्ठिरम्॥ १३॥ तस्य बुद्ध्या विचार्य्यैवमर्जुनस्य कुरूद्वह। अभवद्भूयसी बुद्धिः संशप्तकबधे स्थिरा॥ १४॥ स सन्निवृत्तः सहसा कपिप्रवरकेतनः। एको रथसहस्राणि निहन्तुं वासवी रणे॥ १५॥ साहि दुर्य्योधनस्यासीन्मतिः कर्णस्य चोभयोः। अर्जुनस्य वधोपाये तेन द्वैधमकल्पयत्॥ १६॥ स तु दोलायमानो वा द्वैधीभावेन पाण्डवः। वधेन तु नराग्र्याणामकरोत्तां मृषा तदा॥ १७॥ ततः शतसहस्राणि शराणां नतपर्वणाम्। व्यसृजन्नर्जुने राजन् संशप्तकमहारथाः॥ १८॥ नैव कुन्तीसुतः पार्थो नैव कृष्णो जनार्द्दनः। न हया न रथो राजन् दृश्यन्ते स्म शरैश्चिताः॥ १९॥ यदा मोहमनुप्राप्तः सस्वेदश्च जनार्द्दनः। ततस्तान् प्रायशः पार्थो ब्रह्मास्त्रेण निजघ्निवान्॥ २०॥ शतशः पाणयश्छिन्नाः सेषुज्यातलकार्मुकाः। केतवो वाजिनः सूता रथिनश्चापतन् क्षितौ॥ २१॥ द्रुमाचलाग्राम्बुधरैः समकायाः सुकल्पिताः। हतारोहाः क्षितौ पेतुर्द्विपाः पार्थशराहताः॥२२॥ विप्रविद्धकुथावल्लाश्छिन्नभाण्डाः परासवः। सारोहास्तुरगाः पेतुर्मथिता मार्गणैर्भृशम्॥ २३॥ सर्ष्टिप्रासासिनखराः समुद्गरपरश्वधाः। सञ्छिन्ना बहवः पेतुर्नृणां भल्लैः किरीटिना॥२४॥ बालादित्याम्बुजेन्दूनां तुल्यरूपाणि मारिष। सञ्छिन्नान्यर्जुनशरैः शिरांस्युर्व्वीं प्रपेदिरे॥ २५॥ जज्वालालङ्कृतैः सेना पत्रिभिः प्राणभोजनैः। नानारूपस्तदामित्रान् क्रुद्धे निघ्नति फाल्गुने॥२६॥ क्षोभयन्तं तथा सेनां द्विरदं नलिनीमिव। धनञ्जयं भूतगणाः साधुसाध्वित्यपूजयन्॥ २७॥ दृष्ट्वा तत् कर्म पार्थस्य वासवस्येव

माधवः। विस्मयं परमं मत्वा प्राञ्जलिस्तमुवाच ह ॥ २८ ॥ कर्म्मैतत् पार्थ शक्रेण यमेन धनदेन च। दुष्करं समरे यत्ते कृतमद्येति मे मतिः ॥ २९ ॥ युगपत् समरे यत्ते शतशोऽथ सहस्रशः। पतिता एव मे दृष्टाः संशप्तकमहारथाः ॥ ३० ॥ ततः संशप्तकान् हत्वा भूयिष्ठं ये व्यवस्थिताः। भगदत्ताय याहीति कृष्णं पार्थोऽभ्यचोदयत् ॥ ३१ ॥

इति द्रोणपर्व्वणि संशप्तकबधपर्व्वणि संशप्तकबधे सप्तविंशोऽध्यायः ॥ २७ ॥

---

सञ्जय उवाच। यियासतस्ततः कृष्णः पार्थस्याश्वान् मनोजवान्। सम्प्रैषीद्धेमसञ्छन्नान् द्रोणानीकाय पाण्डुरान् ॥ १ ॥ तं प्रयान्तं कुरुश्रेष्ठं स्वान् भ्रातॄन् द्रोणतापितान्। सुशर्म्मा भ्रातृभिः सार्द्धं युद्धार्थी पृष्ठतोऽन्वयात् ॥ २ ॥ ततः श्वेतहयः कृष्णमब्रवीदजितञ्जयः। एष मां भ्रातृभिः सार्द्धं सुशर्म्माह्वयतेऽच्युत ॥ ३ ॥ दीर्य्यते चोत्तरेणैव तत्सैन्यं मधुसूदन। द्वैधीभूतं मनो मेऽद्य कृतं संशप्तकैरिदम् ॥ ४ ॥ किन्नु संशप्तकान् हन्मि स्वान् रक्षाम्यहिताहितान्। इति मे त्वं मतं वेत्थ तत्र किं सुकृतं भवेत् ॥ ५ ॥ एवमुक्तस्तु दाशार्हः स्यन्दनं प्रत्यवर्त्तयत्। येन त्रिगर्त्ताधिपतिः पाण्डवं समुपाह्वयत् ॥ ६ ॥ ततोऽर्जुनः सुशर्म्माणं विद्ध्वा सप्तभिराशुगैः। ध्वजं धनुश्चास्य रथे क्षुराभ्यां समकृन्तत ॥ ७ ॥ त्रिगर्त्ताधिपतेश्चापि भ्रातरं षड्भिराशुगैः। साश्वं ससूतं त्वरितः पार्थः प्रैषीद्यमक्षयम् ॥ ८ ॥ ततो भुजगसङ्काशां सुशर्म्मा शक्तिमायसीम्। चिक्षेपार्जुनमादिश्य वासुदेवाय तोमरम् ॥ ९ ॥ शक्तिं त्रिभिः शरैश्छित्त्वा तोमरं त्रिभिरर्जुनः। सुशर्म्माणं शरव्रातैर्मोहयित्वा न्यवर्त्तयत् ॥ १० ॥ तं वासव-

मिवायान्तं भूरिवर्षशरौघिणम्। राजंस्तावकसैन्यानां नोग्रं कश्चिद्वारयत्॥ ११॥ ततो धनञ्जयो बाणैः सर्वानेव महारथान्। आयाद्विनिघ्नन् कौरव्यान् दहन् कक्षमिवानलः॥ १२॥ तस्य वेगमसह्यं तु कुन्तीपुत्रस्य धीमतः। नाशक्नुवंस्ते संसोढुं स्पर्शमग्नेरिव प्रजाः॥ १३॥ संवेष्टयन्ननीकानि शरवर्षेण पाण्डवः। सुपर्णपातवद्राजन् प्रायात् प्राग्ज्योतिषं प्रति॥ १४॥ यत्तदा नाम यज्जिष्णुर्भरतानामपायिनाम्। धनुः क्षेमकरं सङ्ख्ये द्विषतामश्रुवर्द्धनम्॥ १५॥ तदेव तव पुत्रस्य राजन् दुर्द्युतदेविनः। कृते क्षत्रविनाशाय धनुरायच्छदर्जुनः॥ १६॥ तथाविक्षोभ्यमाणा सा पार्थेन तव वाहिनी। व्यशीर्य्यत महाराजन् नौरिवासाद्य पर्वतम्॥ १७॥ ततो दशसहस्राणि न्यवर्त्तन्त धनुष्मताम्। मतिं कृत्वा रणे क्रूरा वीरा जयपराजये॥ १८॥ व्यपेतहृदयत्रासा आवव्रुस्तं महारथाः। अथ पार्थो गुरुं भारं सर्वभारसहो युधि॥ १९॥ यथा पद्मवनं क्रुद्धः प्रविष्टः षष्टिहायनः। मृद्नीयात्तद्वदायस्तः पार्थोऽमृद्नाच्चमूं तव॥ २०॥ तस्मिन् प्रमथिते सैन्ये भगदत्तो नराधिपः। तेन नागेन सहसा धनञ्जयमुपाद्रवत्॥ २१॥ तं रथेन नरव्याघ्रः प्रत्यगृह्णाद्धनञ्जयः। स सन्निपातस्तुमुलो बभूव रथनागयोः॥ २२॥ कल्पिताभ्यां यथाशास्त्रं रथेन च गजेन च। सङ्ग्रामे चेरतुर्वीरौ भगदत्तधनञ्जयौ॥ २३॥ ततो जीमूतसङ्काशान्नागादिन्द्र इव प्रभुः। अभ्यवर्षच्छरौघेण भगदत्तो धनञ्जयम्॥ २४॥ स चापि शरवर्षं तत् शरवर्षेण वासविः। अप्राप्तमेव चिच्छेद भगदत्तस्य वीर्य्यवान्॥ २५॥ ततः प्राग्ज्योतिषो राजा शरवर्षं निवार्य्य तत्। शरैर्जघ्ने महाबाहुं पार्थं कृष्णञ्च मारिष॥ २६॥ ततः स शरजालेन महताभ्यवकीर्य्य तौ। चोदयामास तं नागं वधायाच्युतपार्थयोः॥ २७॥ तमापतन्तं

द्विरदं दृष्ट्वा क्रुद्धमिवान्तकम्। चक्रेऽपसव्यं त्वरितः स्यन्दनेन जनार्द्दनः ॥ २८ ॥ तम्प्राप्तमपि नेयेष परावृत्तं महाद्विपम्। सारोहं मृत्युसात्कर्त्तुं स्मरन् धर्मं धनञ्जयः ॥ २९ ॥ स तु नागो द्विपरथान् हयांश्चारुज्य मारिष। प्राहिणोन्मृत्युलोकाय ततः क्रुद्धो धनञ्जयः ॥ ३० ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि भगदत्तयुद्धे अष्टाविंशोऽध्यायः ॥ २८ ॥

---

धृतराष्ट्र उवाच। पार्थः क्रुद्धः किमकरोद्भगदत्तस्य पाण्डवः। प्राग्ज्योतिषो वा पार्थस्य तन्मे शंस यथातथम् ॥ १ ॥

सञ्जय उवाच। प्राग्ज्योतिषेण संसक्तावुभौ दाशार्ह-पाण्डवौ। मृत्युदंष्ट्रान्तिकं प्राप्तौ सर्वभूतानि मेनिरे ॥ २ ॥ तथा स्म शरवर्षाणि पातयत्यनिशं प्रभो। गजस्कन्धान्महाराज कृष्णयोः स्यन्दनस्थयोः ॥ ३ ॥ अथ कार्ष्णायसैर्बाणैः पूर्णकार्मुक-निःसृतैः। अविध्यद्देवकीपुत्रं हेमपुङ्खैः शिलाशितैः ॥ ४ ॥ अग्नि-स्पर्शसमाकीर्णा भगदत्तेन चोदिताः। निर्भिद्य देवकीपुत्रं क्षितिं जग्मुः सुवाससः ॥ ५ ॥ तस्य पार्थो धनुश्छित्त्वा परिचारं निहत्य च। लालयन्निव राजानं भगदत्तमयोधयत् ॥ ६ ॥ सोऽर्करश्मिनिभांस्तीक्ष्णांस्तोमरान् वै चतुर्द्दश। प्रेरयन् सव्यसाची तु त्रिधैकैकमथाच्छिनत् ॥ ७ ॥ ततो नागस्य तद्वर्म व्यधमत् पाकशासनिः। शरजालेन महता तद्व्यशीर्य्यत भूतले ॥ ८ ॥ विशीर्णवर्मा स गजः शरैः सुभृशमर्द्दितः। बभौ धारानिपाताक्तो व्यभ्रः पर्वतराडिव ॥ ९ ॥ ततः प्राग्ज्योतिषः शक्तिं हेमदण्ड-मयोमयीम्। व्यसृजद्वासुदेवाय द्विधा तामर्जुनोऽच्छिनत् ॥१०॥ ततश्छत्रं ध्वजञ्चैव छित्त्वा राज्ञोऽर्ज्जुनः शरैः। विव्याध दशभि-

स्तूर्णमुत्स्मयन् पर्वतेश्वरम्॥ ११॥ सोऽतिविद्धोऽर्ज्जुनशरैः सुपुङ्खैः कङ्कपत्रिभिः। भगदत्तस्ततः क्रुद्धः पाण्डवस्य जनाधिप॥ १२॥ व्यसृजत्तोमरान्मूर्द्ध्नि श्वेताश्वस्योन्ननाद च। तैरर्ज्जुनस्य समरे किरीटं परिवर्त्तितम्॥ १३॥ परिवृत्तकिरीटं तत् यमयित्वैव फाल्गुनः। सुदृष्टः क्रियतां लोक इति राजानमब्रवीत्॥ १४॥ एवमुक्तस्तु संक्रुद्धः शरवर्षेण पाण्डवम्। अभ्यवर्षत् स गोविन्दं धनुरादाय भास्वरम्॥ १५॥ तस्य पार्थो धनुश्छित्त्वा तूणीरान् सन्निकृत्य च। त्वरमाणो द्विसप्तत्या सर्वमर्म्मस्वताड़यत्॥ १६॥ विद्धस्ततो विव्यथितो वैष्णवास्त्रमुदीरयन्। अभिमन्त्र्याङ्कुशं क्रुद्धो व्यसृजत् पाण्डवोरसि॥ १७॥ विसृष्टं भगदत्तेन तदस्त्रं सर्वघाति वै। उरसा प्रतिजग्राह पार्थं सञ्छाद्य केशवः॥ १८॥ वैजयन्त्यभवन्माला तदस्त्रं केशवोरसि। ततोऽर्ज्जुनः क्लान्तमनाः केशवं प्रत्यभाषत॥ १९॥ अयुध्यमानस्तुरगान् संयन्तास्मि तवानघ। इत्युक्त्वा पुण्डरीकाक्ष प्रतिज्ञां स्वां न रक्षसि॥ २०॥ यद्यहं व्यसनी वा स्यामशक्तो वा निवारणे। ततस्त्वयैव कार्य्यं स्यान्न तत् कार्य्यं मयि स्थिते॥ २१॥ सवाणः सधनुश्चाहंससुरासुरमानुषान्। शक्तो लोकानिमान् जेतुं तच्चापि विदितं तव॥ २२॥ ततोऽर्ज्जुनं वासुदेवः प्रत्युवाचाथ तद्वचः। शृणु गुह्यमिदं पार्थ पुरावृत्तं यथानघ॥ २३॥ चतुर्मूर्त्तिरहं शश्वल्लोकत्राणार्थमुद्यतः। आत्मानं परिभज्येह लोकानां हितमादधे॥ २४॥ एका मूर्त्तिस्तपश्चर्य्यां कुरुते मे भुवि स्थिता। अपरा पश्यति जगत् कुर्वाणं साध्वसाधुनी॥ २५॥ अपरा कुरुते कर्म्म मानुषं लोकमाश्रिता। शेते चतुर्थी त्वपरा निद्रां वर्षसहस्रिकीम्॥ २६॥ यासौ वर्षसहस्रान्ते मूर्त्तिरुत्तिष्ठते मम। वरार्हेभ्यो वरान् श्रेष्ठान् तस्मिन् काले ददाति सा॥ २७॥ तन्तु कालमनुप्राप्तं विदित्वा पृथिवी तदा। अयाचत

वरं यन्मां नरकार्थाय तच्छृणु॥ २८॥ देवानामसुराणाञ्च ह्यवध्यस्तनयोऽस्तु मे। उपेतो वैष्णवास्त्रेण तन्मे त्वं दातुमर्हसि॥ २९॥ एवं वरमहं श्रुत्वा जगत्यास्तनये तदा। अमोघमस्त्रं प्रायच्छं वैष्णवं परमं पुरा॥ ३०॥ अवोचं चैतदस्त्रं वै ह्यमोघं भवतु क्षिते। नरकस्याभिरक्षार्थं नैनं कश्चिद्वधिष्यति॥३१॥ अनेनास्त्रेण ते गुप्तः सुतः परबलार्द्दनः। भविष्यति दुराधर्षः सर्वलोकेषु सर्वदा॥ ३२॥ तथेत्युक्त्वा गता देवी कृतकामा मनस्विनी। स चाप्यासीद्दुराधर्षो नरकः शत्रुतापनः॥ ३३॥ तस्मात् प्राग्ज्योतिषं प्राप्तं तदस्त्रं पार्थ मामकम्। नास्यावध्योऽस्ति लोकेषु सेन्द्ररुद्रेषु मारिष॥ ३४॥ तन्मया त्वत्कृते ह्येतदन्यथा व्यपनायितम्। विमुक्तं परमास्त्रेण जहि पार्थ महासुरम्॥ ३५॥ वैरिणं युधि दुर्द्धर्षं भगदत्तं सुरद्विषम्। यथाहं जघ्निवान् पूर्वं हितार्थं नरकन्तथा॥ ३६॥ एवमुक्तस्तदा पार्थः केशवेन महात्मना। भगदत्तं शितैर्वाणैः सहसा समवाकिरत्॥ ३७॥ ततः पार्थो महाबाहुरसंभ्रान्तो महामनाः। कुम्भयोरन्तरे नागं नाराचेन समार्पयत्॥ ३८॥ स समासाद्य तं नागं वाणो वज्र इवाचलम्। अभ्यगात् सह पुङ्खेन वल्मीकमिव पन्नगः॥ ३९॥ स गजो भगदत्तेन प्रेर्य्यमाणो मुहुर्मुहुः। न करोति वचस्तस्य दरिद्रस्येव योषितः॥ ४०॥ स तु विष्टभ्य गात्राणि दन्ताभ्यामवनिं ययौ। नदन्नार्त्तस्वरं प्राणानुत्ससर्ज्ज महाद्विपः॥ ४१॥ ततश्चन्द्रार्द्धबिम्बेन वाणेनानतपर्व्वणा। बिभेद हृदयं राज्ञो भगदत्तस्य पाण्डवः॥ ४२॥ स भिन्नहृदयो राजा भगदत्तः किरीटिना। शरासनं शरांश्चैव गतासुः प्रमुमोच ह॥४३॥ शिरसस्तस्य विभ्रष्टं पपात वरांशुकम्। नालताड़नविभ्रष्टं पलाशं नलिनादिव॥ ४४॥ स हेममाली तपनीयभाण्डात् पपात नागाद्गिरिसन्निकाशात्। सुपुष्पितो मारुतवेगरुग्णो महीधराग्रा-

इव कर्णिकारः॥ ४५॥ निहत्य तं नरपतिमिन्द्रविक्रमं सखायमिन्द्रस्य तदैन्द्रिराहवे। ततोऽपरांस्तवजयकाङ्क्षिणो नरान् बभञ्ज वायुर्बलवान् द्रुमानिव॥ ४६॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि भगदत्तवधे
एकोनत्रिंशोऽध्यायः॥ २९॥

---

सञ्जय उवाच। प्रियमिन्द्रस्य सततं सखायममितौजसम्। हत्वा प्राग्ज्योतिषं पार्थः प्रदक्षिणमवर्त्तत॥ १॥ ततो गान्धारराजस्य सुतौ परपुरञ्जयौ। आर्द्दतामर्ज्जुनं सङ्ख्ये भ्रातरौ वृषकाचलौ॥ २॥ तौ समेत्यार्जुनं वीरौ पुरः पश्चाच्च धन्विनौ। अविध्येतां महावेगैर्निशितैराशुगैर्भृशम्॥ ३॥ वृषकस्य हयान् सूतं धनुश्छत्रं ध्वजं रथम्। तिलशो व्यधमत् पार्थः सौबलस्य शितैः शरैः॥ ४॥ ततोऽर्जुनः शरव्रातैर्नानाप्रहरणैरपि। गान्धारानाकुलांश्चक्रे सौबलप्रमुखान् पुनः॥ ५॥ ततः पञ्चशतान् वीरान् गान्धारानुद्यतायुधान्। प्राहिणोन्मृत्युलोकाय क्रुद्धो बाणैर्धनञ्जयः॥ ६॥ हताश्वात्तु रथात्तूर्णमवतीर्य्य महाभुजः। आरुरोह रथं भ्रातुरन्यच्च धनुराददे॥ ७॥ तावेकं रथमारूढौ भ्रातरौ वृषकाचलौ। शरवर्षेण वीभत्सुमविध्येतां मुहुर्मुहुः॥ ८॥ स्यालौ तव महात्मानौ राजानौ वृषकाचलौ। भृशं निजघ्नतुः पार्थमिन्द्रं वृत्रबला इव॥ ९॥ लब्धलक्षौ तु गान्धारावहतौ पाण्डवं पुनः। निदाघवार्षिकौ मासौ लोकं घर्माम्बुभिर्यथा॥ १०॥ तौ रथस्थौ नरव्याघ्रौ राजानौ वृषकाचलौ। संश्लिष्टाङ्गौ स्थितौ राजन् जघानैकेषुणार्ज्जुनः॥ ११॥ तौ रथात् सिंहसङ्काशौ लोहिताक्षौ महाभुजौ। गतासू पेततुर्वीरौ सोदर्य्यावेकलक्षणौ॥ १२॥ तयोर्भूमिं गतौ देहौ रथाद्-

बन्धुजनप्रियौ। यशो दशदिशः पुण्यं गमयित्वा व्यवस्थितौ ॥ १३ ॥ दृष्ट्वा विनिहतौ वीरौ मातुलावपलायिनौ। भृशं मुमुचुरस्त्राणि पुत्रास्तव विशाम्पते ॥ १४ ॥ निहतौ भ्रातरौ दृष्ट्वा मायाशतविशारदः। कृष्णौ सम्मोहयन्मायां विदधे शकुनिस्ततः ॥ १५ ॥ लगुड़ायोगुड़ाश्मानः शतघ्न्यश्च सशक्तयः। गदापरिघनिस्त्रिंशशूलमुद्गरपट्टिशाः ॥ १६ ॥ सकम्पनर्ष्टिनखरा मुशलानि परश्वधाः। क्षुरा क्षुरप्रनालीका वत्सदन्तास्थिसन्धयः ॥ १७ ॥ चक्राणि विशिखाः प्रासा विविधान्यायुधानि च। प्रपेतुः सर्वतो दिग्भ्यः प्रदिग्भ्यश्चार्जुनं प्रति ॥ १८ ॥ खरोष्ट्रमहिषाव्याघ्राः सिंहाः सृमरचिल्लकाः। ऋक्षाः शालावृका गृध्राः कपयश्च सरीसृपाः ॥ १९ ॥ विविधानि च रक्षांसि क्षुधितान्यर्जुनं प्रति। संक्रुद्धान्यभ्यधावन्त विविधानि वयांसि च ॥ २० ॥ ततो दिव्यास्त्रविच्छूरः कुन्तीपुत्रो धनञ्जयः। विसृजन्निषुजालानि सहसा तान्यताड़यत् ॥ २१ ॥ ते हन्यमानाः शूरेण प्रवरैः सायकैर्दृढ़ैः। विरुवन्तो महारावं विनेशुः सर्वतो हताः ॥ २२ ॥ ततस्तमः प्रादुरभूदर्जुनस्य रथं प्रति। तस्माच्च तमसो वाचः क्रूरा पार्थमभर्त्सयन् ॥ २३ ॥ तत्तमो भैरवं घोरं भयकर्त्तृ महाहवे। उत्तमास्त्रेण महता ज्योतिष्केनार्जुनोऽवधीत् ॥ २४ ॥ हते तस्मिन् जलौघास्तु प्रादुरासन् भयानकाः। अम्भसान्तु विनाशार्थमादित्यास्त्रमथार्जुनः ॥ २५ ॥ प्रायुङ्क्ताम्भस्ततस्तेन प्रायशोऽस्त्रेण शोषितम्। एवं बहुविधा माया सौबलस्य कृताः कृताः ॥ २६ ॥ जघानास्त्रबलेनाशु प्रहसन्नर्जुनस्तदा। तथा हतासु मायासु त्रस्तोऽर्जुनशराहतः ॥ २७ ॥ अपायाज्जवनैरश्वैः शकुनिः प्राकृतो यथा। ततोऽर्जुनोऽस्त्रविच्छैघ्र्यं दर्शयन्नात्मनोऽरिषु ॥ २८ ॥ अभ्यवर्षच्छरौघेण कौरवाणामनीकिनीम्। सा हन्यमाना पार्थेन तव पुत्रस्य वाहिनी ॥ २९ ॥ द्वैधीभूता

महाराज गङ्गेवासाद्य पर्वतम् । द्रोणमेवान्वपद्यन्त केचित्तत्र
नरर्षभाः ॥ ३० ॥ केचिद्दुर्योधनं राजन्नर्द्यमानाः किरीटिना ।
नापश्यामस्ततस्त्वेनं सैन्ये वै रजसावृते ॥ ३१ ॥ गाण्डीवस्य च
निर्घोषः श्रुतो दक्षिणतो मया । शङ्खदुन्दुभिनिर्घोषं वादि-
त्राणाञ्च निःस्वनम् ॥ ३२ ॥ गाण्डीवस्य तु निर्घोषो व्यतिक्रम्स्या-
स्पृशद्दिवम् । ततः पुनर्दक्षिणतः सङ्ग्राममचित्रयोधिनाम् ॥ ३३ ॥
सुयुद्धं चार्जुनस्यासीदहन्तु द्रोणमन्वयाम् । यौधिष्ठिराण्यनी-
कानि प्रहरन्ति ततस्ततः ॥ ३४ ॥ नानाविधान्यनीकानि पुत्राणां
तव भारत । अर्जुनो व्यधमत् काले दिवीवाभ्राणि मारुतः ॥३५॥
तं वासवमिवायान्तं भूरिवर्षं शरौघिणम् । महेष्वासं नरव्याघ्रं
नोग्रं कश्चिदवारयत् ॥ ३६ ॥ ते हन्यमानाः पार्थेन त्वदीया
व्यथिता भृशम् । स्वानेव बहवो जघ्नुर्विद्रवन्तस्ततस्ततः ॥ ३७ ॥
तेऽर्जुनेन शरा मुक्ताः कङ्कपत्रास्तनुच्छिदः । शलभा इव सम्पेतुः
संवृण्वाना दिशो दश ॥ ३८॥ तुरङ्गं रथिनं नागं पादातिमपि
मारिष । विनिर्भिद्य क्षितिं जग्मुर्वल्मीकमिव पन्नगाः ॥ ३९ ॥
न च द्वितीयं व्यसृजत् कुञ्जराश्वनरेषु सः । पृथगेकशराद्धग्ना
निपेतुस्ते गतासवः ॥ ४० ॥ हतैर्मनुष्यैर्द्विरदैश्च सर्वतः शराभि-
सृष्टैश्च हयैर्निपातितैः । तदाश्वगोमायुबलाभिनादितं विचित्र-
मायोधशिरो बभूव तत् ॥ ४१ ॥ पिता सुतं त्यज्य सुहृद्वरं
सुहृत्तथैव पुत्रं पितरः शरातुराः । स्वरक्षणे कृतमतयस्तदा
जनास्त्यजन्ति वाहानपि पार्थपीड़िताः ॥ ४२ ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि शकुनिपलायने
त्रिंशोऽध्यायः ॥ ३० ॥

धृतराष्ट्र उवाच। तेष्वनीकेषु भग्नेषु पाण्डुपुत्रेण सञ्जय। चलितानां द्रुतानाञ्च कथमासीन्मनो हि वः॥ १॥ अनीकानां प्रभग्नानामवस्थानमपश्यताम्। दुष्करं प्रतिसन्धानं तन्ममाचक्ष्व सञ्जय॥ २॥

सञ्जय उवाच। तथापि तव पुत्रस्य प्रियकामा विशाम्पते। यशःप्रवीरा लोकेषु रक्षन्तो द्रोणमन्वयुः॥ ३॥ समुद्यतेषु चास्त्रेषु सम्भ्रान्ते च युधिष्ठिरे। अकुर्वन्नार्य्यकर्म्माणि भैरवे सत्यभीतवत्॥ ४॥ अन्तरं भीमसेनस्य प्रापतन्नमितौजसः। सात्यकेश्चैव वीरस्य धृष्टद्युम्नस्य वा विभो॥ ५॥ द्रोणं द्रोणमिति क्रूराः पाञ्चाला समचोदयन्। मा द्रोणमिति पुत्रास्ते कुरून् सर्व्वानचोदयन्॥ ६॥ द्रोणं द्रोणमिति ह्येके मा द्रोणमिति चापरे। कुरूणां पाण्डवानाञ्च द्रोणद्यूतमवर्त्तत॥ ७॥ यं यं प्रमथते द्रोणः पाञ्चालानां रथव्रजम्। तत्र तत्र तु पाञ्चाल्यो धृष्टद्युम्नोऽभ्यवर्त्तत॥ ८॥ तथा भागविपर्य्यासे सङ्ग्रामे भैरवे सति। वीराः समासदन् वीरान् कुर्व्वन्तो भैरवं रवम्॥ ९॥ अकम्पनीयाः शत्रूणां बभूवुस्तत्र पाण्डवाः। अकम्पयन्त्यनीकानि स्मरन्तः क्लेशमात्मनः॥ १०॥ तेऽमर्षवशसम्प्राप्ता ह्रीमन्तः सत्त्वचोदिताः। त्यक्त्वा प्राणान् न्यवर्त्तन्त घ्नन्तो द्रोणं महाहवे॥ ११॥ अयसामिव सम्पातः शिलानामिव चाभवत्। दीव्यतां तुमुले युद्धे प्राणैरमिततेजसाम्॥ १२॥ न तु स्मरन्ति सङ्ग्राममपि वृद्धास्तथाविधम्। दृष्टपूर्व्वं महाराज श्रुतपूर्व्वमथापि वा॥ १३॥ प्रकम्पते च पृथिवी तस्मिन् वीरावसादने। निवर्त्तता बलौघेन महता भारपीड़िता॥ १४॥ घूर्णतोऽपि बलौघस्य दिवं स्तब्ध्वेव निःस्वनः। अजातशत्रोस्तत् सैन्यमाविवेश सुभैरवः॥ १५॥ तमासाद्य तु पाण्डूनामनीकानि सहस्रशः। द्रोणेन चरता सङ्ग्रे प्रभग्नानि शितैः शरैः॥ १६॥ तेषु प्रमथ्यमानेषु द्रोणेनाद्भुत-

कर्मणा। पर्य्यवारयदाचार्य्यो द्रौणं सेनापतिः स्वयम्॥ १७॥ तदद्भुतमपश्याम द्रोणपाञ्चाल्ययोस्तदा। नैव तस्योपमा काचिद्विति मे निश्चिता मतिः॥ १८॥ ततो नीलोऽनलप्रख्यो ददाह कुरुवाहिनीम्। शरस्फुलिङ्गश्चापार्च्चिर्द्दहन् कक्षमिवानलः॥१९॥ तं दहन्तमनीकानि द्रोणपुत्त्रः प्रतापवान्। पूर्व्वाभिलाषी सुश्लक्ष्णं स्मयमानोऽभ्यभाषत॥ २०॥ नील किम्बहुभिर्द्दग्धैस्तव योधैः शरार्च्चिषा। मयैकेन हि युध्यस्व क्रुद्धः प्रहर चाशु माम्॥ २१॥ तं पद्मनिकराकारं पद्मपत्त्रनिभेक्षणम्। व्याकोषपद्माभिमुखो नीलो विव्याध सायकैः॥ २२॥ तेनातिविद्धः सहसा द्रौणिर्भल्लैः शितैस्त्रिभिः। धनुर्ध्वजञ्च छत्त्रञ्च द्विषतः समकृन्तत॥ २३॥ सोऽवप्लुत्य रथात्तस्मान्नीलश्चर्म्मवरासिभृत्। द्रोणायनेः शिरः कायाद्धर्त्तुमैच्छत् पतत्त्रिवत्॥ २४॥ तस्योद्यतासेः सुनसं शिरः कायात् सकुण्डलम्। भल्लेनापाहरद्द्रौणिः स्मयमान इवानघ॥ २५॥ सम्पूर्णचन्द्राभमुखः पद्मपत्त्रनिभेक्षणः। प्रांशुरुत्पलपत्त्राभो निहतो न्यपतत् क्षितौ॥ २६॥ ततः प्रविव्यथे सेना पाण्डवी भृशमाकुला। आचार्य्यपुत्त्रेण हते नीले ज्वलिततेजसि॥ २७॥ अचिन्तयंश्च ते सर्व्वे पाण्डवानां महारथाः। कथं नो वासविस्त्रायाच्छत्रुभ्य इति मारिष॥ २८॥ दक्षिणेन तु सेनायाः कुरुते कदनं बली। संशप्तकावशेषस्य नारायणबलस्य च॥ २९॥

इति द्रोणपर्व्वणि संशप्तकवधपर्व्वणि नीलवधे एकत्रिंशोऽध्यायः॥ ३१॥

---

सञ्जय उवाच। प्रतिघातन्तु सैन्यस्य नामृष्यत वृकोदरः। सोऽभ्यहन् वाह्लिकं षष्ट्या कर्णञ्च दशभिः शरैः॥ १॥ तस्य

द्रोणः शितैर्बाणैस्तीक्ष्णधारैरजिह्मगैः । जीवितान्तमभिप्रेप्सु-र्मर्माण्याशु जघान ह ॥ २ ॥ पुनश्चाग्निसमस्पर्शैराशीविषविषो-पमैः । आनन्त्यमभिप्रेप्सुः षड्विंशत्या समार्पयत् । कर्णो द्वादशभिर्बाणैरश्वत्थामा च सप्तभिः ॥ ३ ॥ षड्भिर्दुर्य्योधनो राजा तत एनमथाकिरत् । भीमसेनोऽपि तान् सर्वान् प्रत्य-विध्यन्महाबलः ॥ ४ ॥ द्रोणं पञ्चाशतेषूणां कर्णञ्च दशभिः शरैः । दुर्य्योधनं द्वादशभिर्द्रौणिं चाष्टभिराशुगैः ॥ ५ ॥ आरावं तुमुलं कुर्वन्नभ्यवर्त्तत तद्रणे । तस्मिन् सन्त्यजति प्राणान् मृत्यु-साधारणीकृते ॥ ६ ॥ अजातशत्रुस्तान् योधान् भीमं त्रातेत्य-चोदयत् । ते ययुर्भीमसेनस्य समीपममितौजसः ॥ ७ ॥ युयु-धानप्रभृतयो माद्रीपुत्रौ च पाण्डवौ । ते समेत्य सुसंरब्धाः सहिताः पुरुषर्षभाः ॥ ८ ॥ महेष्वासवरैर्गुप्तं द्रोणानीकं विभि-त्सवः । समापेतुर्महावीर्य्या भीमप्रभृतयो रथाः ॥ ९ ॥ तान् प्रत्यगृह्णादव्यग्रो द्रोणोऽपि रथिनां वरः । महारथानतिबलान् वीरान् समरयोधिनः ॥ १० ॥ राज्यं मृत्युभयं त्यक्त्वा तावकाः पाण्डवान् ययुः । सादिनः सादिनोऽभ्यघ्नं स्तथैव रथिनो रथान् ॥ ११ ॥ आसीच्छक्त्यसिसम्पातो युद्धमासीत् परश्वधैः । प्रकृष्ट-मसियुद्धञ्च बभूव कटुकोदयम् ॥ १२ ॥ कुञ्जराणाञ्च सम्पातै-र्युद्धमासीत् सुदारुणम् । अपतत् कुञ्जरादन्यो हयादन्यस्त्ववाक्-शिराः ॥ १३ ॥ नरो बाणविनिर्भिन्नो रथादन्यश्च मारिष । तत्रान्यस्य च सम्मर्द्दे पतितस्य विवर्मणः ॥ १४ ॥ शिरः प्रध्वं-सयामास वक्षस्याक्रम्य कुञ्जरः । अपरांश्चापरेऽमृदन् वारणाः पातितान् नरान् ॥ १५ ॥ विषाणैश्चावनिं गत्वा व्यभिन्दन् रथिनो बहून् । नाराचैः केचिदपरे विषाणालग्नसंस्रवैः ॥ १६ ॥ बभ्रमुः समरे नागा मृद्नन्तः शतशो नरान् । कार्ष्णायसतनुत्राणान्नराश्व-रथकुञ्जरान् ॥ १७ ॥ पतितान् पोथयाञ्चक्रुर्द्विपाः स्थूलनला-

निव। रथपत्ताधिवासांसि शयनानि नराधिपाः॥ १८॥ क्षीमन्तः कालसम्पर्कात् सुदुःखान्यध्यशेरत। हन्ति स्मात्र पिता पुत्रं रथेनाभ्यतिवर्त्तते॥ १९॥ पुत्रश्च पितरं मोहान्निर्मर्य्यादमवर्त्तत। अक्षो भग्नो ध्वजश्छिन्नश्छत्रमुर्व्वां निपातितम्॥ २०॥ युगार्द्धं छिन्नमादाय प्रदुद्राव तथा हयः। सासिर्वाहुर्न्निपतितः शिरश्छिन्नं सकुण्डलम्॥ २१॥ गजेनाक्षिप्य वलिना रथः सञ्चूर्णितः क्षितौ। सारोहश्चापतद्वाजी गजेनाभ्याहतो भृशम्॥ २२॥ निर्मर्य्यादं महद्युद्धमवर्त्तत सुदारुणम्। हा तात हा पुत्र सखे क्वासि तिष्ठ क्व धावसि॥ २३॥ प्रहराहर जह्येनं स्मितक्ष्वेडितगर्ज्जितैः। इत्येवमुच्चरन्तिस्म श्रूयन्ते विविधा गिरः॥ २४॥ नरस्याश्वस्य नागस्य समसज्जत शोणितम्। उपाशाम्यद्रजो भौमं भीरून् कश्मलमाविशत्॥ २५॥ चक्रेण चक्रमासाद्य वीरो वीरस्य संयुगे। अतीतेऽस्त्रपथे काले जहार गदया शिरः॥ २६॥ आसीत् केशपरामर्शो मुष्टियुद्धं सुदारुणम्। नखैर्द्दन्तैश्च शूराणामद्वीपे द्वीपमिच्छताम्॥ २७॥ तत्राच्छिद्यत शूरस्य सखड्गो बाहुरुद्यतः। सधनुश्चापरस्यापि सशरः साङ्कुशस्तथा॥ २८॥ आक्रोशदन्यमन्योऽत्र तथान्यो विमुखोऽभवत्। अन्यः प्राप्तस्य चान्यस्य शिरः कायादपाहरत्॥ २९॥ शब्दमभ्यद्रवच्चान्यः शब्दादन्योऽत्रसद्भृशम्। स्वानन्योऽथ परानन्यो जघान निशितैः शरैः॥ ३०॥ गिरिशृङ्गोपमश्चात्र नाराचेन निपातितः। मातङ्गो न्यपतद्भूमौ नदीरोध इवोष्णगे॥ ३१॥ तथैव रथिनं नागः क्षरन् गिरिरिवारुजन्। अध्यतिष्ठत् पदा भूमौ सहाश्वं सहसारथिम्॥ ३२॥ शूरान् प्रहरतो दृष्ट्वा कृतास्त्रान् रुधिरोक्षितान्। बहूनप्याविशन्मोहो भीरून् हृदयदुर्वलान्॥ ३३॥ सर्वमाविग्नमभवन्नाप्राज्ञायत किञ्चन। सैन्येन रजसा ध्वस्तं निर्मर्य्यादमवर्त्तत॥ ३४॥ ततः सेनापतिः शीघ्र-

स्वयं काल इति ब्रुवन्। नित्याभिलषितानेव लक्ष्यामास पाण्ड-
वान् ॥ ३५ ॥ कुर्वन्तः शासनं तस्य पाण्डवा बाहुशालिनः।
सरो हंसा इवापेतुर्घ्नन्तो द्रोणरथं प्रति ॥ ३६ ॥ गृह्णीताद्रवता-
न्योऽन्यं माविभीत निकृन्तत। इत्यासीत्तुमुलः शब्दो दुर्द्धर्षस्य
रथं प्रति ॥ ३७ ॥ ततो द्रोणः कृपः कर्णो द्रौणी राजा जय-
द्रथः। विन्दानुविन्दावावन्त्यौ शल्यश्च तानवारयत् ॥ ३८ ॥ ते
त्वार्य्यधर्मसंरब्धा दुर्निवारा दुरासदाः। शरार्त्ता न जहुर्द्रोणं
पाञ्चालाः पाण्डवैः सह ॥ ३९ ॥ ततो द्रोणोऽतिसंक्रुद्धो विसृ-
जञ्छतशः शरान्। चेदिपाञ्चालपाण्डूनामकरोत् कदनं महत्
॥ ४० ॥ तस्य ज्यातलनिर्घोषः शुश्रुवे दिक्षु मारिष। वज्र-
संह्रादसङ्काशस्त्रासयन्मानवान् बहून् ॥ ४१ ॥ एतस्मिन्नन्तरे
जिष्णुर्जित्वा संशप्तकान् बहून्। अभ्ययात्तत्र यत्रासौ द्रोणः
पाण्डून् प्रमर्द्दति ॥ ४२ ॥ तान् शरौघमहावर्त्तान् शोणितोदा-
न्महाह्रदान्। तीर्त्त्वा संशप्तकान् हत्वा प्रत्यदृश्यत फाल्गुनः
॥ ४३ ॥ तस्य कीर्त्तिमतो लक्ष्म सूर्य्यप्रतिमतेजसः। दीप्यमान-
मपश्याम तेजसा वानरध्वजम् ॥ ४४ ॥ संशप्तकसमुद्रं तमुच्छो-
ष्यास्त्रगभस्तिभिः। स पाण्डवयुगान्तार्कः कुरूनप्यभ्यतीतपत् ॥४५॥
प्रददाह कुरून् सर्वानर्जुनः शस्त्रतेजसा। युगान्ते सर्वभूतानि
धूमकेतुरिवोत्थितः ॥ ४६ ॥ तेन बाणसहस्रौघैर्गजाश्वरथ-
योधिनः। ताड्यमानाः क्षितिं जग्मुर्मुक्तकेशाः शरार्द्दिताः ॥४७॥
केचिदार्त्तस्वरं चक्रुर्विनेदुरपरे पुनः। पार्थबाणहताः केचिन्नि-
पेतुर्विगतासवः ॥ ४८ ॥ तेषामुत्पतितान् कांश्चित् पतितांश्च परा-
ङ्मुखान्। न जघानार्जुनो योधान् योधव्रतमनुस्मरन् ॥ ४९ ॥
ते विकीर्णरथाश्चित्राः प्रायशश्च पराङ्मुखाः। कुरवः कर्ण कर्णेति
हाहेति च विचुक्रुशुः ॥ ५० ॥ तमाधिरथिराक्रन्दं विज्ञाय
शरणैषिणाम्। माभैष्टेति प्रतिश्रुत्य ययावभिमुखोऽर्जुनम् ॥५१॥

स भारतरथश्रेष्ठः सर्वभारतहर्षणः। प्रादुश्चक्रे तदाग्नेयमस्त्रमस्त्रविदां वरः॥ ५२॥ तस्य दीप्तशरौघस्य दीप्तचापधरस्य च। शरौघान् शरजालेन विदुद्राव धनञ्जयः॥ ५३॥ तथैवाधिरथिस्तस्य वाणान् ज्वलिततेजसः। अस्त्रमस्त्रेण संवार्य्य प्राणदद्विसृजन् शरान्॥ ५४॥ धृष्टद्युम्नश्च भीमश्च सात्यकिश्च महारथः। विव्यधुः कर्णमासाद्य त्रिभिस्त्रिभिरजिह्मगैः॥ ५५॥ अर्जुनास्त्रन्तु राधेयः संवार्य्य शरवृष्टिभिः। तेषां त्रयाणां चापानि चिच्छेद विशिखैस्त्रिभिः॥ ५६॥ ते निकृत्तायुधा वीरा निर्विषा भुजगा इव। रथात् शक्तीः समुत्क्षिप्य भृशं सिंहा इवानदन्॥ ५७॥ ता भुजाग्रैर्महावेगा विसृष्टा भुजगोपमाः। दीप्यमाना महाशक्तयो जग्मु राधिरथिं प्रति॥ ५८॥ ता निकृत्य शरव्रातैस्त्रिभिस्त्रिभिरजिह्मगैः। ननाद बलवान् कर्णः पार्थाय विसृजञ्छरान्॥५९॥ अर्जुनश्चापि राधेयं विद्धा सप्तभिराशुगैः। कर्णादवरजं वाणैर्जघान निशितैस्त्रिभिः॥ ६०॥ ततः शत्रुञ्जयं हत्वा पार्थः षड्भिरजिह्मगैः। जहार सद्यो भल्लेन विपाटस्य शिरो रथात्॥ ६१॥ पश्यतां धार्त्तराष्ट्राणामेकेनैव किरीटिना। प्रमुखे सूतपुत्रस्य सोदर्य्या निहतास्त्रयः॥ ६२॥ ततो भीमः समुत्पत्य स्वरथाद्वैनतेयवत्। वरासिना कर्णपक्षान् जघान दश पञ्च च॥ ६३॥ पुनः स्वरथमास्थाय धनुरादाय चापरम्। विव्याध दशभिः कर्णं सूतमश्वांश्च पञ्चभिः॥ ६४॥ धृष्टद्युम्नोऽप्यसिवरं चर्म चादाय भास्वरम्। जघान चन्द्रवर्माणं वृहत्क्षत्रञ्च नैषधम्॥ ६५॥ ततः स्वरथमास्थाय पाञ्चाल्योऽन्यच्च कार्मुकम्। आदाय कर्णं विव्याध त्रिसप्तत्या नदन् रणे॥ ६६॥ शैनेयोऽप्यन्यदादाय धनुरिन्द्रसमद्युतिः। सूतपुत्रञ्चतुःषष्ट्या विद्धा सिंह इवानदत्॥ ६७॥ भल्लाभ्यां साधुमुक्ताभ्यां छित्त्वा कर्णस्य कार्मुकम्। पुनः कर्णं त्रिभिर्वाणैर्वाह्वोरुरसि चार्पयत्॥ ६८॥ ततो

दुर्य्योधनो राजा द्रोणश्चैव जयद्रथः । निमज्जमानं राधेयमुज्जह्रुः सात्यकार्णवात् ॥६९॥ पत्त्यश्वरथमातङ्गास्त्वदीयाः शतशोऽपरे । कर्णमेवाभ्यधावन्त त्रासयानाः प्रहारिणः ॥ ७० ॥ धृष्टद्युम्नश्च भीमश्च सौभद्रोऽर्जुन एव च । नकुलः सहदेवश्च सात्यकिं जगुपूरणे ॥ ७१ ॥ एवमेष महारौद्रः चयार्थं सर्वधन्विनाम् । तावकानां परेषाञ्च त्यक्त्वा प्राणानभूद्रणः ॥ ७२ ॥ पदातिरथनागाश्वा गजाश्वरथपत्तिभिः । रथिनो नागपत्त्यश्वैरथपत्ती रथद्विपैः ॥ ७३ ॥ अश्वैरश्वा गजैर्नागा रथिनो रथिभिः सह । संयुक्ताः समदृश्यन्त पत्तयश्चापि पत्तिभिः ॥ ७४ ॥ एवं सुकलितं युद्धमासीत् क्रव्यादहर्षणम् । महद्भिस्तैरभीतानां यमराष्ट्रविवर्द्धनम् ॥ ७५ ॥ ततो हता नररथवाजिकुञ्जरैरनेकशो द्विपरथपत्तिवाजिनः । गजैर्गजा रथिभिरुदायुधारथाईयैर्हयाः पत्तिगणैश्च पत्तयः ॥ ७६ ॥ रथैर्द्विपा द्विरदवरैर्महाहया हयैर्नरा वररथिभिश्च वाजिनः । निरस्तजिह्वादशनेचणाः चितौ चयं गताः प्रमथितवर्मभूषणाः ॥ ७७ ॥ तथापरैर्बहुकरणैर्वरायुधैर्हता गताः प्रतिभयदर्शनाः चितिम् । विपोथिता हयगजपादताड़िता भृशाकुलारथखरनेमिभिः चताः ॥ ७८ ॥ प्रमोदने श्वापदपचिरचसां जनचये वर्त्तति तत्र दारुणे । महाबलास्ते कुपिताः परस्परं निषूदयन्तः प्रविचेरुरोजसा ॥ ७९ ॥ ततो बले भृशलुलिते परस्परं निरीच्यमाणे रुधिरौघसंप्लुते । दिवाकरेऽस्तं गिरिमास्थिते शनैरुभे प्रयाते शिविराय भारत ॥ ८० ॥

इति द्रोणपर्वणि संशप्तकवधपर्वणि सङ्कुलयुद्धे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

समाप्तञ्च संशप्तकवधपर्व ।

---

## अथाभिमन्युवधपर्व।

सञ्जय उवाच। पूर्वमस्मासु भग्नेषु फाल्गुनेनामितौजसा।
द्रोणे च मोघसङ्कल्पे रक्षिते च युधिष्ठिरे॥ १॥ सर्वे विध्वस्त-
कवचास्तावका युधि निर्जिताः। रजस्वला भृशोद्विग्ना वीक्ष-
माणा दिशो दश॥ २॥ अवहारं ततः कृत्वा भारद्वाजस्य सम्मते।
लब्धलक्षैः परैर्हीना भृशावहसिता रणे॥ ३॥ श्लाघमानेषु
भूतेषु फाल्गुनस्यामितान् गुणान्। केशवस्य च सौहार्दे कीर्त्य-
मानेऽर्जुनं प्रति॥४॥ अभिशस्ता इवाभूवन् ध्यानमूकत्वमास्थिताः।
ततः प्रभातसमये द्रोणं दुर्योधनोऽब्रवीत्॥ ५॥ प्रणयादभि-
मानाच्च द्विषद्वृद्ध्या च दुर्मनाः। शृण्वतां सर्वयोधानां संरब्धो
वाक्यकोविदः॥ ६॥ नूनं वयं वध्यपक्षे भवतो द्विजसत्तम।
तथाहि नाग्रहीः प्राप्तं समीपेऽद्य युधिष्ठिरम्॥ ७॥ इच्छतस्ते
न मुच्येत चक्षुःप्राप्तो रणे रिपुः। जिघृक्षतो रक्ष्यमाणः सामरै-
रपि पाण्डवैः॥ ८॥ वरं दत्त्वा मम प्रीतः पश्चाद्विकृतवानसि।
आशाभङ्गं न कुर्वन्ति भक्तस्यार्य्याः कथञ्चन॥ ९॥ ततोऽप्रीत-
स्तथोक्तः सन् भारद्वाजोऽब्रवीन्नृपम्। नार्हसे मां तथा ज्ञातुं
घटमानं तव प्रिये॥ १०॥ ससुरासुरगन्धर्वाः सयक्षोरगराक्षसाः।
नालं लोका रणे जेतुं पाल्यमानं किरीटिना॥ ११॥ विश्व-
सृट् यत्र गोविन्दः पृतनानीस्तथार्जुनः। तत्र कस्य बलं क्रामे-
दन्यत्र त्र्यम्बकात् प्रभो॥ १२॥ सत्यं तात ब्रवीम्यद्य नैतज्जा-
त्वन्यथा भवेत्। अथैषां प्रवरं वीरं पातयिष्ये महारथम्॥१३॥
तञ्च व्यूहं विधास्यामि योऽभेद्यस्त्रिदशैरपि। योगेन केनचि-
द्राजन्नर्जुनस्त्वपनीयताम्॥ १४॥ न ह्यज्ञातमसाध्यं वा तस्य
सङ्ख्येऽस्ति किञ्चन। तेन ह्युपात्तं सकलं सर्वं ज्ञानमितस्ततः
॥ १५॥ द्रोणेन व्याहृते त्वेवं संशप्तकगणाः पुनः। आह्वयन्तो-
ऽर्जुनं सङ्ख्ये दक्षिणामभितो दिशम्॥ १६॥ ततोऽर्जुनस्याथ

परैः सार्द्धं समभवद्रणः। तादृशो यादृशो नान्यः श्रुतो दृष्टोऽपि वा क्वचित्॥ १७॥ तत्र द्रोणेन विहितो व्यूहो राजन्नशोभत। चरन् मध्यन्दिने सूर्य्यः प्रतपन्निव दुर्दृशः॥ १८॥ तञ्चाभिमन्यु-र्वचनात् पितुर्ज्येष्ठस्य भारत। विभेद दुर्भिदं सङ्ख्ये चक्रव्यूह-मनेकधा॥ १९॥ स कृत्वा दुष्करं कर्म हत्वा वीरान् सहस्रशः। षट्सु वीरेषु संसक्तो दौःशासनिवशङ्गतः॥ २०॥ सौभद्रः पृथिवीपाल जहौ प्राणान् परन्तप। वयं परमसंहृष्टाः पाण्डवाः शोककर्षिताः। सौभद्रे राजन्नवहारमकुर्महि॥ २१॥

धृतराष्ट्र उवाच। पुत्रं पुरुषसिंहस्य सञ्जयाप्राप्तयौवनम्। रणे विनिहतं श्रुत्वा भृशं मे दीर्य्यते मनः॥ २२॥ दारुणः क्षत्रधर्म्मोऽयं विहितो धर्म्मकर्त्तृभिः। यत्र राज्येप्सवः शूरा बाले शस्त्रमपातयन्॥ २३॥ बालमत्यन्तसुखिनं विचरन्तमभीत-वत्। कृतास्त्रा बहवो जघ्नुर्ब्रूहि गावल्गणे कथम्॥ २४॥ विभित्सुना रथानीकं सौभद्रेणामितौजसा। विक्रीड़ितं यथा सङ्ख्ये तन्ममाचक्ष्व सञ्जय॥ २५॥

सञ्जय उवाच। यन्मां पृच्छसि राजेन्द्र सौभद्रस्य निपा-तनम्। तत्ते कार्त्स्न्येन वक्ष्यामि शृणु राजन् समाहितः॥ २६॥ विक्रीड़ितं कुमारेण यथानीकं विभित्सता। आरु-ग्णाश्च यथा वीरा दुरावारा जयिष्णवः॥ २७॥ दावाग्न्यभि-परीतानां भूरिगुल्मतृणद्रुमे। वनौकसामिवारण्ये त्वदीयाना-मभूद्भयम्॥ २८॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि चक्रव्यूहनिर्म्माण-परामर्शे त्रयस्त्रिंशोऽध्यायः॥ ३३॥

सञ्जय उवाच। समरेऽत्युग्रकर्माणः कर्मभिर्व्यञ्जितश्रमाः। सकृष्णाः पाण्डवाः पञ्च देवैरपि दुरासदाः॥ १॥ सत्त्वकर्मान्वयैर्बुद्ध्या कीर्त्त्या च यशसा श्रिया। नैव भूतो न भविता नैव तुल्यगुणः पुमान्॥ २॥ सत्यधर्मारतो दान्तो विप्रपूजादिभिर्गुणैः। सदैव त्रिदिवं प्राप्तो राजा किल युधिष्ठिरः॥ ३॥ युगान्ते चान्तको राजन् जामदग्न्यश्च वीर्य्यवान्। रथस्थो भीमसेनश्च कथ्यन्ते सदृशास्त्रयः॥ ४॥ प्रतिज्ञाकर्म्मदक्षस्य रणे गाण्डीवधन्वनः। उपमां नाधिगच्छामि पार्थस्य सदृशीं क्षितौ॥ ५॥ गुरुवात्सल्यमत्यन्तं नैभृत्यं विनयो दमः। नकुलेऽप्रतिरूपञ्च शौर्य्यञ्च नियतानि षट्॥ ६॥ श्रुतगाम्भीर्य्यमाधुर्य्यसत्त्वरूपपराक्रमैः। सदृशो देवयोर्वीरः सहदेवः किलाश्विनोः॥ ७॥ ये च कृष्णे गुणाः स्फीताः पाण्डवेषु च ये गुणाः। अभिमन्यौ किलैकस्था दृश्यन्ते गुणसञ्चयाः॥ ८॥ युधिष्ठिरस्य धैर्य्येण कृष्णस्य चरितेन च। कर्मभिर्भीमसेनस्य सदृशो भीमकर्म्मणः॥९॥ धनञ्जयस्य रूपेण विक्रमेण श्रुतेन च। विनयात् सहदेवस्य सदृशो नकुलस्य च॥ १०॥

धृतराष्ट्र उवाच। अभिमन्युमहं सूत सौभद्रमपराजितम्। श्रोतुमिच्छामि कार्त्स्न्येन कथमायोधने हतः॥ ११॥

सञ्जय उवाच: स्थिरो भव महाराज शोकं धारय दुर्द्धरम्। महान्तं बन्धनाशन्ते कथयिष्यामि तच्छृणु॥ १२॥ चक्रव्यूहो महाराज आचार्य्येणाभिकल्पितः। तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः॥ १३॥ द्वारस्थानेषु निन्यस्ताः कुमाराः सूर्य्यवर्च्चसः। सङ्घातो राजपुत्राणां सर्व्वेषामभवत्तदा॥ १४॥ कृताभिसमयाः सर्व्वे सुवर्णचित्रतध्वजाः। रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥ १४॥ सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः। चन्दनागुरुदिग्धाङ्गाः स्रग्विनः सूक्ष्मवाससः॥ १५॥ सहिताः

पर्य्यधावन्त कार्ष्णिं प्रति युयुत्सवः । तेषां दशसहस्राणि बभूवु-
र्दृढधन्विनाम् ॥ १६ ॥ पौत्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्श-
नम् । अन्योऽन्यसमदुःखास्ते अन्योऽन्यसमसाहसाः ॥ १७ ॥
अन्योऽन्यस्पर्द्धमानाश्च अन्योऽन्यस्य हिते रताः । दुर्य्योधनस्तु
राजेन्द्र सैन्यमध्ये व्यवस्थितः ॥ १८ ॥ कर्णदुःशासनकृपैर्वृतो
राजा महारथैः । देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः
॥ १९ ॥ चामरव्यजनाक्षेपैरुदयन्निव भास्करः । प्रमुखे तस्य
सैन्यस्य द्रोणोऽवस्थितनायकः ॥ २० ॥ सिन्धुराजस्तथातिष्ठत्
श्रीमान्मेरुरिवाचलः । सिन्धुराजस्य पार्श्वस्था ह्यश्वत्थामपुरो-
गमाः ॥२१॥ सुतास्तव महाराज त्रिंशत्त्रिदशसन्निभाः । गान्धार-
राजः कितवः शल्यो भूरिश्रवास्तथा ॥ २२ ॥ पार्श्वतः सिन्धु-
राजस्य व्यराजन्त महारथाः । ततः प्रववृते युद्धं तुमुलं लोम-
हर्षणम् । तावकानां परेषाञ्च मृत्युं कृत्वा निवर्त्तनम् ॥ २३ ॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि चक्रव्यूहनिर्माणे
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

---

सञ्जय उवाच । तदनीकमनाधृष्यं भारद्वाजेन पालितम् ।
पार्थाः समभ्यवर्त्तन्त भीमसेनपुरोगमाः ॥ १ ॥ सात्यकिश्चेकि-
तानश्च धृष्टद्युम्नश्च पार्षतः । कुन्तिभोजश्च विक्रान्तो द्रुपदश्च महा-
रथः ॥ २ ॥ आर्जुनिः क्षत्रधर्मा च बृहत्क्षत्रश्च वीर्य्यवान् ।
चेदिपो धृष्टकेतुश्च माद्रीपुत्रौ घटोत्कचः ॥ ३ ॥ युधामन्युश्च
विक्रान्तः शिखण्डी चापराजितः । उत्तमौजाश्च दुर्द्धर्षो विराटश्च
महारथः ॥ ४ ॥ द्रौपदेयाश्च संरब्धाः शैशुपालिश्च वीर्य्यवान् ।
केकयाश्च महावीर्य्याः सृञ्जयाश्च सहस्रशः ॥ ५ ॥ एते चान्ये च

सगणाः कृतास्त्रा युद्धदुर्मदाः। समभ्यधावन् सहसा भारद्वाजं युयुत्सवः॥ ६॥ समीपे वर्त्तमानांस्तान् भारद्वाजोऽपि वीर्य्यवान्। असम्भ्रान्तः शरौघेण महता समवारयत्॥ ७॥ महौघः सलिलस्येव गिरिमासाद्य दुर्भिदम्। द्रोणं तेनाभ्यवर्त्तन्त वेलामिव जलाशयाः॥ ८॥ पीड्यमानाः शरै राजन् द्रोणचापविनिःसृतैः। न शेकुः प्रमुखे स्थातुं भारद्वाजस्य पाण्डवाः॥ ९॥ तदद्भुतमपश्याम द्रोणस्य भुजयोर्बलम्। यदेनं नाभ्यवर्त्तन्त पाञ्चालाः सृञ्जयैः सह॥ १०॥ तमायान्तमभिक्रुद्धं द्रोणं दृष्ट्वा युधिष्ठिरः। बहुधा चिन्तयामास द्रोणस्य प्रतिवारणम्॥ ११॥ अशक्यन्तु तमन्येन द्रोणं मत्वा युधिष्ठिरः। अविषह्यं गुरुं भारं सौभद्रे समवासृजत्॥ १२॥ वासुदेवादनवरं फाल्गुनाच्चामितौजसम्। अब्रवीत् परवीरघ्नमभिमन्युमिदं वचः॥ १३॥ एत्य नो नार्जुनो गर्हेद्यथा तात तथा कुरु। चक्रव्यूहस्य न वयं विद्म भेदं कथञ्चन॥ १४॥ त्वं वार्जुनो वा कृष्णो वा भिन्द्यात् प्रद्युम्न एव वा। चक्रव्यूहं महाबाहो पञ्चमो नोपपद्यते॥ १५॥ अभिमन्यो वरं तात याचतां दातुमर्हसि। पितॄणां मातुलानाञ्च सैन्यानां चैव सर्वशः॥ १६॥ धनञ्जयो हि नस्तात गर्हयेदेत्य संयुगात्। क्षिप्रमस्त्रं समादाय द्रोणानीकं विशातय॥ १७॥

अभिमन्युरुवाच। द्रोणस्य दृढमत्युग्रमनीकप्रवरं युधि। पितॄणां जयमाकाङ्क्षन्नवगाहेऽविलम्बितम्॥ १८॥ उपदिष्टो हि मे पित्रा योगोऽनीकविशातने। नोत्सहे तु विनिर्गन्तुमहं कस्याञ्चिदापदि॥ १९॥

युधिष्ठिर उवाच। भिन्ध्यनीकं युधां श्रेष्ठ द्वारं सञ्जनयस्व नः। वयं त्वानुगमिष्यामो येन त्वं तात यास्यसि॥ २०॥ धनञ्जयसमं युद्धे त्वां वयं तात संयुते। प्रणिधायानुयास्यामो रक्षन्तः सर्वतोमुखाः॥ २१॥

भीम उवाच। अहं त्वानुगमिष्यामि धृष्टद्युम्नोऽथ सात्यकिः। पाञ्चालाः केकया मत्स्यास्तथा सर्व्वे प्रभद्रकाः॥ २२॥ सकृद्भिन्नं त्वया व्यूहं तत्र तत्र पुनः पुनः। वयं प्रध्वंसयिष्यामो निघ्नमाना वरान् वरान्॥ २३॥

अभिमन्युरुवाच। अहमेतत् प्रवेच्यामि द्रोणानीकं दुरासदम्। पतङ्ग इव संक्रुद्धो ज्वलन्तं जातवेदसम्॥ २४॥ तत् कर्म्माद्य करिष्यामि हितं यद्वंशयोर्द्वयोः। मातुलस्य च यत् प्रीतिं करिष्यामि पितुश्च मे॥ २५॥ शिशुनैकेन सङ्ग्रामे काल्यमानानि सङ्घशः। द्रच्यन्ति सर्व्वभूतानि द्विषत् सैन्यानि वै मया॥ २६॥ नाहं पार्थेन जातः स्यां न च जातः सुभद्रया। यदि मे संयुगे कश्चिज्जीवितान्नाद्य मुच्यते॥ २७॥ यदि नैकरथेनाहं समग्रं चत्रमण्डलम्। न करोम्यष्टधा युद्धे न भवाम्यर्ज्जुनात्मजः॥ २८॥

युधिष्ठिर उवाच। एवन्ते भाषमाणस्य वलं सौभद्र वर्द्धताम्। यस्त्वमुत्सहसे भेत्तुं द्रोणानीकं दुरासदम्॥ २९॥ रक्षितं पुरुषव्याघ्रैर्महेष्वासैर्महाबलैः। साध्यरुद्रमरुत्कल्पैर्वसुभिरग्न्यादित्यविक्रमैः॥ ३०॥

सञ्जय उवाच। तस्य तद्वचनं श्रुत्वा स यन्तारमचोदयत्। सुमित्राश्वान् रणे चिप्रं द्रोणानीकाय चोदय॥ ३१॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि अभिमन्युप्रतिज्ञायां पञ्चत्रिंशोऽध्यायः॥ ३५॥

---

सञ्जय उवाच। सौभद्रस्तद्वचः श्रुत्वा धर्म्मराजस्य धीमतः। अचोदयत यन्तारं द्रोणानीकाय भारत॥ १॥ तेन सञ्चोद्यमानस्तु याहि याहीति सारथिः। प्रत्युवाच ततो राजन्नभि-

मन्युमिदं वचः ॥ २ ॥ अतिभारोऽयमायुष्मन्नाहित स्त्वयि पाण्डवैः।
सम्प्रधार्य क्षमं बुद्ध्या ततस्त्वं योद्धुमर्हसि ॥ ३ ॥ आचार्यो हि
कृती द्रोणः परमास्त्रे कृतश्रमः। अत्यन्तसुखसंवृद्धस्त्वञ्चात्यन्त-
विशारदः ॥ ४ ॥ ततोऽभिमन्युः प्रहसन् सारथिं वाक्यमब्रवीत्।
सारथे कोन्वयं द्रोणः समग्रं क्षत्रमेव वा ॥ ५ ॥ ऐरावतगतं शक्रं
सहामरगणैरहम्। योधयेयं रणमुखे न मे क्षत्रेऽद्य विस्मयः
॥ ६ ॥ न ममैतद्द्विषत्सैन्यं कलामर्हति षोड़शीम्। अपि
विश्वजितं विष्णुं मातुलं प्राप्य सूतज ॥ ७ ॥ पितरं चार्जुनं युद्धे
न भीर्मामनुयास्यति। ततोऽभिमन्युस्तां वाचं कदर्थीकृत्य सारथेः
॥ ८ ॥ याहीत्येवाब्रवीदेनं द्रोणानीकाय माचिरम्। ततः
सञ्चोदयामास हयानस्य त्रिहायणान् ॥ ९ ॥ नातिहृष्टमनाः
सूतो हेमभाण्डपरिच्छदान्। ते प्रेषिताः सुमित्रेण द्रोणानीकाय
वाजिनः ॥ १० ॥ द्रोणमभ्यद्रवन्राजन् महावेगपराक्रमाः। तमु-
द्वीक्ष्य तथायान्तं सर्वे द्रोणपुरोगमाः। अभ्यवर्त्तन्त कौरव्याः
पाण्डवाश्च तमन्वयुः ॥ ११ ॥ स कर्णिकारप्रवरोच्छ्रितध्वजः सुवर्म-
वर्मार्जुनिरर्जुनावरः। युयुत्सया द्रोणमुखानभीतवत् समा-
सदत् सिंहशिशुर्यथा द्विपान् ॥ १२ ॥ ते विशन्तं मुदा युक्ताः
सम्प्रहारं प्रचक्रिरे। आसीत् गाङ्ग इवावर्त्तो मुहूर्त्तमुदधाविव
॥ १३ ॥ शूराणां युध्यमानानां निघ्नतामितरेतरम्। सङ्ग्राम-
स्तुमुलो राजन् प्रावर्त्तत सुदारुणः ॥ १४ ॥ प्रवर्त्तमाने सङ्ग्रामे
तस्मिन्नतिभयङ्करे। द्रोणस्य मिषतो व्यूहं भित्त्वा प्राविशदार्जुनिः
॥ १५ ॥ तं प्रविष्टं विनिघ्नन्तं शत्रुमध्ये महाबलम्। हस्त्यश्व-
रथपत्त्यौघाः परिवव्रुर्मुदान्विताः ॥ १६ ॥ नानावादित्रनिर्घोषैः
क्ष्वेड़ितास्फोटगर्ज्जितैः। हुङ्कारैः सिंहनादैश्च तिष्ठ तिष्ठेति
निःस्वनैः ॥ १७ ॥ घोरैर्हलहलाशब्दैर्मागास्तिष्ठेहि मामिति।
असावहममुत्रेति प्रवदन्ति मुहुर्मुहुः ॥ १८ ॥ बृंहितैः शिञ्जितैः

ह्वांसैः खुरनेमिस्वनैरपि। सन्नादयन्तो वसुधामभिदुद्रुवुरार्ज्जु-
निम् ॥ १९ ॥ तेषामापततां वीरः शीघ्रं पूर्व्वमथो दृढम्।
चिप्रास्त्रो न्यवधीद्व्रातन् मर्म्मज्ञो मर्म्मभेदिभिः ॥ २० ॥ ते हन्य-
माना विवशा नानालिङ्गैः शितैः शरैः। अभिपेतुस्तमेवाजौ
शलभा इव पावकम् ॥ २१ ॥ ततस्तेषां शरीरैश्च शरीरावयवैश्च
सः। सन्तस्तार तदा भूमिं कुशैर्व्वेदीमिवाध्वरे ॥ २२ ॥ बद्ध-
गोधाङ्गुलित्राणान् सशरासनसायकान्। साश्विचर्म्माङ्कुशाभीषून्
सतोमरपरश्वधान् ॥ २३ ॥ सगदायोगुड़प्रासान् सर्ष्टितोमर-
पट्टिशान्। सभिन्दिपालपरिघान् सशक्तिशरकम्पनान् ॥ २४ ॥
सप्रतोदमहाशङ्खान् सकुन्तान् सकचग्रहान्। समुद्गरचेपणीयान्
सपाशपरिघोपलान् ॥ २५ ॥ सकेयूराङ्गदान् बाहून् हृद्यगन्धा-
नुलेपनान्। स चिच्छेदार्ज्जुनिस्तूर्णं त्वदीयानां सहस्रशः ॥ २६ ॥
तैः स्फुरद्भिर्म्महाराज शुशुभे भूः सलोहितैः। पञ्चास्यैः पन्नगै-
श्छिन्नैर्गरुड़ेनेव मारिष ॥ २७ ॥ सुनासाननकेशान्तैरव्रणैश्चारु-
कुण्डलैः। सन्दष्टौष्ठपुटैः क्रोधात् चरद्भिः शोणितं बहु ॥ २८ ॥
चारुस्रग्मुकुटोष्णीषैर्म्मणिरत्नविराजितैः। विनालनलिनाकारै-
र्द्दिवाकरशशिप्रभैः ॥ २९ ॥ हितप्रियंवदैः काले बहुभिः पुण्य-
गन्धिभिः। द्विषच्छिरोभिः पृथिवीमवतस्तार फाल्गुनिः ॥ ३० ॥
गन्धर्व्वनगराकारान् विविधान् कल्पितान् रथान्। ईषामुखान्
चित्रवेणून् न्यस्तदण्डकबन्धुरान् ॥ ३१ ॥ विजङ्घांश्च वरांस्तत्र
विनासादशनादपि। विचक्रोपस्करोपस्थान् भग्नोपकरणानपि
॥ ३२ ॥ प्रपातितोपस्तरणान् हतयोधान् सहस्रशः। शरै-
र्व्विशकलीकुर्व्वन् दिक्षु सर्व्वासु भारत ॥ ३३ ॥ पुनर्द्विपान् द्विपा-
रोहान् वैजयन्त्यङ्कुशध्वजान्। तूणवर्म्माण्यथो कक्षान् ग्रैवेया-
ण्यथ कम्बलान् ॥ ३४ ॥ घण्टाः शुण्डान् विषाणाग्रान् गज-
मालापदानुगान्। शरैर्न्निशितधाराग्रैः शातयामशातयत् ॥ ३५

वानायुजान् पार्वतीयान् काम्बोजानथ वाह्लिकान्। स्थिरबाल-धिकर्णाक्षान् जवनान् साधुवाहिनः॥ ३६॥ आरूढ़ान् शिक्षितै-र्योधैः शक्त्यृष्टिप्रासयोधिभिः। विध्वस्तचारुमुकुटान् विप्रविद्ध-प्रकीर्णकान्॥ ३७॥ निरस्तजिह्वानयनान् निष्कीर्णान्त्रयकृद्-युतान्। हतारोहान् भिन्नघण्ठान् क्रव्यादगणमोदनान्॥ ३८॥ निकृत्तचर्मकवचान् शकृन्मूत्रासृगाप्लुतान्। निपातयन्नागगणां-स्तावकान् स व्यरोचत॥ ३९॥ एको विष्णुरिवाचिन्त्यः कृत्वा प्राक्कर्म्म दुष्करम्। तथा विमथितं तेन त्र्यङ्गं तव बलं महत्॥ ४०॥ यथासुरबलं घोरं त्र्यम्बकेनामितौजसा। कृत्वा कर्म रणेऽसह्यं परैरार्जुनिराहवे॥ ४१॥ अभिनत् स पदात्त्योघान् त्वदीयानेव सर्वशः। एवमेकेन तां सेनां सौभद्रेण शितैः शरैः॥ ४२॥ भृशं विप्रहतां दृष्ट्वा स्कन्देनेवासुरीं चमूम्। त्वदीया-स्तव पुत्राश्च वीक्षमाणा दिशो दश॥ ४३॥ संशुष्कास्याश्चल-न्नेत्राः प्रस्विन्ना लोमहर्षणाः। पलायनकृतोत्साहा निरुत्साहा द्विषज्जये॥ ४४॥ गोत्रनामभिरन्योऽन्यैः क्रन्दन्तो जीवितैषिणः। हतान् पुत्रान् पितॄन् भ्रातॄन् बन्धून् सम्बन्धिनस्तथा। प्राति-ष्ठन्त समुत्सृज्य त्वरयन्तो हयद्विपान्॥ ४५॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे षट्त्रिंशोऽध्यायः॥ ३६॥

---

सञ्जय उवाच। तां प्रभग्नां चमूं दृष्ट्वा सौभद्रेणामितौ-जसा। दुर्य्योधनो भृशं क्रुद्धः स्वयं सौभद्रमन्वयात्॥ १॥ ततो राजानमावृत्तं सौभद्रं प्रति संयुगे। दृष्ट्वा द्रोणोऽब्रवीद्योधान् पर्य्याप्नुतनराधिपान्॥ २॥ पुरोऽभिमन्युर्लक्षं नः पश्यन्तं हन्ति

वीर्य्यवान् । तमाद्रवत माभैष्ट क्षिप्रं रक्षत कौरवम् ॥ ३ ॥ ततः कृतास्त्रा बलिनः सुहृदो जितकाशिनः । त्रास्यमाना भयाद्वीरं परिवव्रुस्तवात्मजम् ॥ ४ ॥ द्रोणो द्रौणिः कृपः कर्णः कृतवर्म्मा च सौबलः । वृहद्बलो मद्रराजो भूरिर्भूरिश्रवाः शल ॥ ५ ॥ पौरवो वृषसेनश्च विसृजन्तः शिताञ्छरान् । सौभद्रं शरवर्षेण महता समवारयत् ॥ ६ ॥ सम्मोहयित्वा तमथो दुर्य्योधनममोचयत् । आस्याद्ग्रासमिवाक्षिप्तं ममृषे नार्जुनात्मजः ॥ ७ ॥ तान् शरौघेण महता साश्वसूतान्महारथान् । विमुखीकृत्य सौभद्रः सिंहनादमथानदत् ॥ ८ ॥ तस्य नादं ततः श्रुत्वा सिंहस्येवामिषैषिणः । नामृष्यन्त सुसंरब्धाः पुनर्द्रोणमुखा रथाः ॥ ९ ॥ त एनं कोष्ठकीकृत्य रथवंशेन मारिष । व्यसृजन्निषुजालानि नानालिङ्गानि सङ्घशः ॥ १० ॥ तान्यन्तरीक्षे चिच्छेद पौत्रस्तव शितैः शरैः । तांश्चैव प्रतिविव्याध तदद्भुतमिवाभवत् ॥ ११ ॥ ततस्ते कोपितास्तेन शरैराशीविषोपमैः । परिवव्रुर्जिघांसन्तः सौभद्रमपलायिनम् ॥ १२ ॥ समुद्रमिव पर्य्यस्तं त्वदीयं तं बलार्णवम् । दधारैकोऽर्जुनिर्बाणैर्वेलेव भरतर्षभ ॥ १३ ॥ शूराणां युध्यमानानां निघ्नतामितरेतरम् । अभिमन्योः परेषाञ्च नासीत् कश्चित् पराङ्मुखः ॥ १४ ॥ तस्मिंस्तु घोरसङ्ग्रामे वर्त्तमाने भयङ्करे । दुःसहो नवभिर्बाणैरभिमन्युमविध्यत ॥ १५ ॥ दुःशासनो द्वादशभिः कृपः शारद्वतस्त्रिभिः । द्रोणस्तु सप्तदशभिः शरैराशीविषोपमैः ॥ १६ ॥ विविंशतिश्च सप्तत्या कृतवर्म्मा च सप्तभिः । वृहद्बलस्तथाष्टाभिरश्वत्थामा च सप्तभिः ॥ १७ ॥ भूरिश्रवास्त्रिभिर्बाणैर्मद्रजः षड्भिराशुगैः । द्वाभ्यां शराभ्यां शकुनिस्त्रिभिर्दुर्य्योधनो नृप ॥ १८ ॥ स तु तान् प्रतिविव्याध त्रिभिस्त्रिभिरजिह्मगैः । नृत्यन्निव महाराज चापहस्तः प्रतापवान् ॥ १९ ॥ ततोऽभिमन्युः संक्रुद्धस्त्रास्यमानस्तवा-

त्मजैः। विदर्शयन् वै सुमहच्छिक्षाभ्यासकृतम्बलम् ॥ २० ॥
गरुड़ानिलरंहोभिर्यन्तुर्वाक्यकरैर्हयैः। दान्तैरश्मकदायादं त्वर-
माणमवारयत् ॥ २१ ॥ स्थित्वा तस्याग्रतः श्रीमानश्मकस्य सुतो
बली। विव्याध दशभिर्बाणैस्तिष्ठतिष्ठेति चाब्रवीत् ॥ २२ ॥
तस्याभिमन्युर्दशभिर्बाणैः सूतं हयान् ध्वजान्। बाहू धनुः
शिरश्चोर्व्यां स्मयमानो न्यपातयत् ॥ २३ ॥ ततस्तस्मिन् हते वीरे
सौभद्रेणाश्मकेश्वरे। सञ्चचाल बलं सर्वं पलायनपरायणम्
॥ २४ ॥ ततः कर्णः कृपो द्रोणो द्रौणिर्गान्धारराट् शलः। शल्यो
भूरिश्रवाः क्राथः सोमदत्तो विविंशतिः ॥ २५ ॥ वृषसेनः सुषे-
णश्च कुण्डभेदी प्रतर्दनः। वृन्दारको ललित्थश्च प्रबाहुर्दीर्घलोचनः
॥ २६ ॥ दुर्य्योधनश्च संक्रुद्धः शरवर्षैरवाकिरन्। सोऽतिविद्धो
महेष्वासैरभिमन्युरजिह्मगैः ॥ २७ ॥ शरमादत्त कर्णाय वर्म-
कायावभेदिनम्। तस्य भित्त्वा तनुत्राणं देहं निर्भिद्य चाशुगः
॥ २८ ॥ प्राविशद्धरणीं राजन् वल्मीकमिव पन्नगः। स तेनाति-
प्रहारेण व्यथितो विह्वलन्निव ॥ २९ ॥ सञ्चचाल रणे कर्णः
क्षितिकम्पे यथाचलः। तथान्यैर्निशितैर्बाणैः सुषेणं दीर्घलोच-
नम् ॥ ३० ॥ कुण्डभेदिञ्च संक्रुद्धस्त्रिभिस्त्रीनवधीद्बली। कर्ण-
स्तम्पञ्चविंशत्या नाराचानां समार्पयत् ॥ ३१ ॥ अश्वत्थामा च
विंशत्या कृतवर्मा च सप्तभिः। स शराचितसर्वाङ्गः क्रुद्धः शक्रा-
त्मजात्मजः ॥ ३२ ॥ विचरन् दृदृशे सैन्यैः पाशहस्त इवान्तकः।
शल्यञ्च शरवर्षेण समीपस्थमवाकिरत् ॥ ३३ ॥ उदक्रोशन्महा-
बाहुस्तव सैन्यानि भीषयन्। ततः स विद्धोऽस्त्रविदा मर्मभिद्भि-
रजिह्मगैः ॥ ३४ ॥ शल्यो राजन् रथोपस्थे निषसाद मुमोह च।
तं हि दृष्ट्वा तथा विद्धं सौभद्रेण यशस्विना ॥ ३५ ॥ सम्प्राद्रव-
च्चमूः सर्वा भारद्वाजस्य पश्यतः। तं प्रेक्षन्तं महाबाहुं रुक्मपुङ्खैः
समावृतम्। त्वदीयाः प्रपलायन्ते मृगाः सिंहार्दिता इव ॥ ३६ ॥

स तु रणयशसाभिपूज्यमानः पितृसुरचारणसिद्धसङ्घैः। अवनि-
तलविगतैश्च भूतसङ्घैरभिवभौ हुतभुग्यथाज्यसिक्तः ॥ ३७ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

---

धृतराष्ट्र उवाच। तथा प्रमथमानं तं महेष्वासानजिह्मगैः।
आर्जुनिं मामकाः सङ्ग्रे के त्वेनं समवारयन् ॥ १ ॥
सञ्जय उवाच। शृणु राजन् कुमारस्य रणे विक्रीड़ितं
महत्। विभित्सतो रथानीकं भारद्वाजेन रक्षितम् ॥ २ ॥ मद्रेशं
सादितं दृष्ट्वा सौभद्रेणाशुगैरणे। शल्यादवरजः क्रुद्धः किरन्
वाणान् समभ्ययात् ॥ ३ ॥ तस्यार्जुनिः शिरोग्रीवं पाणिपादं
धनुर्हयान्। छत्रं ध्वजं नियन्तारं त्रिवेणुं कल्पमेव च ॥ ४ ॥
चक्रं युगेषातूणीरानुपाकर्षञ्च सायकैः। पताकां चक्रगोप्तारौ
सर्वोपकरणानि च ॥ ५ ॥ लघुहस्तः प्रचिच्छेद ददृशे तं न
कश्चन। स पपात क्षितौ क्षीणः प्रविद्धाभरणाम्बरः ॥ ६ ॥
वायुनेव महाशैलः सम्भग्नोऽमिततेजसा। अनुगाश्चापि वित्रस्ताः
प्राद्रवन् सर्वतो दिशः ॥ ७ ॥ आर्ज्जुनेः कर्म तद्दृष्ट्वा सम्प्रणेदुः
समन्ततः। नादेन सर्वभूतानि साधु साध्विति भारत ॥ ८ ॥
शल्यभ्रातर्य्यथारुग्णे बहुशस्तस्य सैनिकाः। कुलाधिवासनामानि
श्रावयन्तोऽर्जुनात्मजम् ॥ ९ ॥ अभ्यधावन्त संक्रुद्धा विविधायुध-
पाणयः। रथैरश्वैर्गजैश्चान्ये पद्भिश्चान्ये बलोत्कटाः ॥ १० ॥
वाणशब्देन महता रथनेमिस्वनेन च। हुङ्कारैः क्ष्वेड़ितोत्क्रुष्टैः
सिंहनादैश्च गर्ज्जितैः ॥ ११ ॥ ज्यातलप्रस्वनैरन्यैर्गर्ज्जन्तोऽर्जुन-
नन्दनम्। ब्रुवन्तश्च न नो जीवन्मोक्ष्यसे जीवितादपि ॥ १२ ॥

तांस्तथाब्रुवतो दृष्ट्वा सौभद्रः प्रहसन्निव। यो यस्य प्राहरत् पूर्वं तं तं विव्याध पत्रिभिः ॥ १३ ॥ सन्दर्शयिष्यन्नस्त्राणि विचित्राणि लघूनि च। आर्जुनिः समरे शूरो मृदुपूर्वमयुध्यत ॥ १४ ॥ वासुदेवादुपात्तं यदस्त्रं यच्च धनञ्जयात्। अदर्शयत तत् कार्ष्णिः कृष्णाभ्यामविशेषवत् ॥ १५ ॥ दूरमस्य गुरुं भारं साध्वजञ्च पुनः पुनः। सन्दधद्विसृजंश्चेषून् निर्विशेषमदृश्यत ॥ १६ ॥ चापमण्डलमेवास्य विस्फुरद्दिक्षु दृश्यत। सुदीप्तस्य शरत्काले सवितुर्मण्डलं यथा ॥ १७ ॥ ज्याशब्दः शुश्रुवे तस्य तलशब्दश्च भारत। महाशनिमुचः काले पयोदस्येव निस्वनः ॥ १८ ॥ ह्रीमानमर्षी सौभद्रो मानकृत् प्रियदर्शनः। सम्मिमानयिषुर्वीरानिष्वस्त्रैश्चाप्ययुध्यत ॥ १९ ॥ मृदुर्भूत्वा महाराज दारुणः समपद्यत। वर्षाभ्यतीतो भगवान् शरदीव दिवाकरः ॥ २० ॥ शरान् विचित्रान् बहुशो रुक्मपुङ्खान् शिलाशितान्। मुमोच शतशः क्रुद्धो गभस्तीनिव भास्करः ॥ २१ ॥ क्षुरप्रैर्वत्सदन्तैश्च विपाठैश्च महायशाः। नाराचैरर्द्धचन्द्राभैर्भल्लैरञ्जलिकैरपि ॥ २२ ॥ अवाकिरद्रथानीकं भारद्वाजस्य पश्यतः। ततस्तत्सैन्यमभवद्विमुखं शरपीड़ितम् ॥२३॥

इति द्रोणपर्वणि अभिमन्युबधपर्वणि अभिमन्युपराक्रमे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

---

धृतराष्ट्र उवाच। द्वैधीभवति मे चित्तं ह्रिया तुष्ट्या च सञ्जय। मम पुत्रस्य यत्सैन्यं सौभद्रः समवारयत् ॥ १ ॥ विस्तरेणैव मे शंस सर्वङ्गावल्गणे पुनः। विक्रीड़ितं कुमारस्य स्कन्दस्येवासुरैः सह ॥ २ ॥

सञ्जय उवाच। हन्त ते सम्प्रवक्ष्यामि विमर्द्दमतिदारुणम्।

एकस्य च बहूनाञ्च यथासीत्तुमुलो रणः ॥ ३ ॥ अभिमन्युः कृतोत्साहः कृतोत्साहानरिन्दमान् । रथस्थो रथिनः सर्वांस्ताव-कानभ्यवर्षयत् ॥ ४ ॥ द्रोणं कर्णं कृपं शल्यं द्रौणिं भोजं बृह-द्बलम् । दुर्य्योधनं सौमदत्तिं शकुनिञ्च महाबलम् ॥ ५ ॥ नाना-नृपान्नृपसुतान् सैन्यानि विविधानि च । अलातचक्रवत् सर्वान् त्वरमाणः समार्पयत् ॥ ६ ॥ निघ्नन्नमित्रान् सौभद्रः परमास्त्रैः प्रतापवान् । अदर्शयत तेजस्वी दिक्षु सर्वासु भारत ॥ ७ ॥ तद्दृष्ट्वा चरितं तस्य सौभद्रस्यामितौजसः । समकम्पन्त सैन्यानि त्वदीयानि पुनः पुनः ॥ ८ ॥ अथाब्रवीन्महाप्राज्ञो भारद्वाजः प्रतापवान् । हर्षेणोत्फुल्लनयनः कृपमाभाष्य सत्वरम् ॥ ९ ॥ घटयन्निव मर्म्माणि पुत्रस्य तव भारत । अभिमन्युं रणे दृष्ट्वा तदा रणविशारदम् ॥ १० ॥ एष पृच्छति सौभद्रः पार्थाना-मग्रतो युवा । नन्दयन् सुहृदः सर्वान् राजानञ्च युधिष्ठिरम् ॥ ११ ॥ नकुलं सहदेवञ्च भीमसेनञ्च पाण्डवम् । बन्धून् सम्ब-न्धिनश्चान्यान्मध्यस्थान् सुहृदस्तथा ॥ १२ ॥ नास्य युद्धे समं मन्ये कञ्चिदन्यं धनुर्द्धरम् । इच्छन् हन्यादिमां सेनां किमर्थमपि नेच्छति ॥ १३ ॥ द्रोणस्य प्रीतिसंयुक्तं श्रुत्वा वाक्यं तवात्मजः । आर्जुनिं प्रति संक्रुद्धो द्रोणं दृष्ट्वा स्मयन्निव ॥ १४ ॥ अथ दुर्य्यो-धनः कर्णमब्रवीद्बाह्लिकं नृपम् । दुःशासनं मद्रराजं तांस्तान् चान्यान्महारथान् ॥ १५ ॥ सर्वमूर्द्धाभिषिक्तानामाचार्य्यो ब्रह्म-वित्तमः । अर्ज्जुनस्य सुतं मूढ़ो नायं हन्तुमिहेच्छति ॥ १६ ॥ न ह्यस्य समरे मुच्येदन्तकोऽप्याततायिनः । किमङ्ग पुनरेवान्यो मर्त्यः सत्यं ब्रवीमि वः ॥ १७ ॥ अर्ज्जुनस्य सुतं त्वेष शिष्यत्वादभि-रक्षति । शिष्याः पुत्राश्च दयितास्तदपत्यञ्च धर्म्मिणम् ॥ १८ ॥ संरक्ष्यमाणो द्रोणेन मन्यते वीर्य्यमात्मनः । आत्मसम्भावितो मूढ़स्तं प्रमथ्नीत माचिरम् ॥ १९ ॥ एवमुक्तास्तु ते राजन् सात्वती-

पुत्रमभ्ययुः। संरब्धास्ते जिघांसन्तो भारद्वाजस्य पश्यत॥ २०॥ दुःशासनस्तु तच्छ्रुत्वा दुर्य्योधनवचस्तदा। अब्रवीत् कुरुशार्दूलो दुर्य्योधनमिदं वचः॥ २१॥ अहमेनं हनिष्यामि महाराज ब्रवीमि ते। मिषतां पाण्डुपुत्राणां पाञ्चालानाञ्च पश्यताम्॥ २२॥ ग्रसिष्याम्यद्य सौभद्रं यथाराहुर्द्दिवाकरम्। उत्क्रुश्य चाब्रवीद्वाक्यं कुरुराजमिदं पुनः॥ २३॥ श्रुत्वा कृष्णौ मया ग्रस्तं सौभद्रमतिमानिनौ। गमिष्यतः प्रेतलोकं जीवलोकान्न संशयः॥ २४॥ तौ च श्रुत्वा मृतौ व्यक्तं पाण्डोः क्षेत्रोद्भवाः सुताः। एकाह्ना ससुहृद्वर्गाः क्लैव्याद्धास्यन्ति जीवितम्॥ २५॥ तस्मादस्मिन् हते शत्रौ हताः सर्व्वेऽहितास्तव। शिवेन ध्याहि मां राजन्नेष हन्मि रिपूंस्तव॥ २६॥ एवमुक्त्वा नदन् राजन् पुत्रो दुःशासनस्तव। सौभद्रमभ्ययात् क्रुद्धः शरवर्षैरवाकिरत्॥ २७॥ तमतिक्रुद्धमायान्तं तव पुत्रमरिन्दम। अभिमन्युः शरैस्तीक्ष्णैः षड्विंशत्या समार्पयत्॥ २८॥ दुःशासनस्तु संक्रुद्धः प्रभिन्न इव कुञ्जरः। अयोधयत सौभद्रमभिमन्युश्च तं रणे॥ २९॥ तौ मण्डलानि चित्राणि रथाभ्यां सव्यदक्षिणम्। चरमाणावयुध्येतां रथशिक्षाविशारदौ॥ ३०॥ अथ पणवमृदङ्गदुन्दुभीनां क्रकचमहानकभेरिझर्झराणाम्। निनदमतिभृशं नराः प्रचक्रुर्लवणजलोद्भवसिंहनादमिश्रम्॥ ३१॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि दुःशासनयुद्धे एकोनचत्वारिंशोऽध्यायः॥ ३९॥

---

सञ्जय उवाच। शरविक्षतगात्रस्तु प्रत्यमित्रमवस्थितम्। अभिमन्युः स्मयन् धीमान् दुःशासनमथाब्रवीत्॥ १॥ दिष्ट्या पश्यामि सङ्ग्रामे मानिनं शूरमागतम्। निष्ठुरन्त्यक्तधर्माणमा-

क्रोशनपरायणम् ॥ २ ॥ यत् सभायां त्वया राज्ञो धृतराष्ट्रस्य शृण्वतः। कोपितः परुषैर्वाक्यैर्धर्मराजो युधिष्ठिरः ॥ ३ ॥ बलोन्मत्तेन भीमस्य विह्वलेन भाषितः। अक्षकूटं समाश्रित्य सौबलस्यात्मनो बलम् ॥ ४ ॥ तत्त्वयेदमनुप्राप्तं प्रकोपात् वै महात्मनाम्। परवित्तापहारस्य क्रोधस्याप्रशमस्य च ॥ ५ ॥ लोभस्य ज्ञाननाशस्य द्रोहस्यात्याहितस्य च। पितॄणां मम राज्यस्य हरण स्योग्रधन्विनाम् ॥ ६ ॥ सद्यस्तोग्रमधर्मस्य फलं प्राप्नुहि दुर्मते। शासितास्म्यद्य ते बाणैः सर्वसैन्यस्य पश्यतः ॥ ७ ॥ अद्याहमनृणस्तस्य कोपस्य भविता रणे। अमर्षितायाः कृष्णायाः काङ्क्षितस्य च मे पितुः ॥ ८ ॥ अद्य कौरव्य भीमस्य भवितास्म्यनृणो युधि। न हि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे रणम् ॥ ९ ॥ एवमुक्त्वा महाबाहुर्बाणं दुःशासनान्तकम्। सन्दधे परवीरघ्नः कालाग्न्यनिलवर्च्चसम् ॥ १० ॥ तस्योरस्तूर्णमासाद्य जत्रुदेशे विभिद्य तम्। जगाम सह पुङ्खेन वल्मीकमिव पन्नगः ॥ ११ ॥ अथैनं पञ्चविंशत्या पुनरेव समार्पयत्। शरैरग्निसमस्पर्शैराकर्णसमचोदितैः ॥ १२ ॥ स गाढ़विद्धो व्यथितो रथोपस्थ उपाविशत्। दुःशासनो महाराज कश्मलं चाविशन्महत् ॥ १३ ॥ सारथिस्त्वरमाणस्तु दुःशासनमचेतनम्। रणमध्यादपोवाह सौभद्रशरपीड़ितम् ॥ १४ ॥ पाण्डवो द्रौपदेयाश्च विराटश्च समीक्ष्य तम्। पाञ्चालाः केकयाश्चैव सिंहनादमथानदन् ॥ १५ ॥ वादित्राणि च सर्वाणि नानालिङ्गानि सर्वशः। प्रावादयन्त संहृष्टाः पाण्डूनां तत्र सैनिकाः ॥ १६ ॥ अपश्यन् स्मयमानास्ते सौभद्रस्य विचेष्टितम्। अत्यन्तवैरिणं दृप्तं दृष्ट्वा शत्रुं पराजितम् ॥ १७ ॥ धर्ममारुतशक्राणामश्विनोः प्रतिमास्तथा। धारयन्तो ध्वजाग्रेषु द्रौपदेया महारथाः ॥ १८ ॥ सात्यकिश्चेकितानश्च धृष्टद्युम्नशिखण्डिनौ। केकया धृष्टकेतुश्च मत्स्यपाञ्चालसृञ्जयाः ॥ १९ ॥

पाण्डवाश्च मुदा युक्ता युधिष्ठिरपुरोगमाः । अभ्यद्रवन्त त्वरिता द्रोणानीकं विभित्सवः ॥ २० ॥ ततोऽभवन्महायुद्धं त्वदीयानां परैः सह । जयमाकाङ्क्षमाणानां शूराणामनिवर्त्तिनाम् ॥ २१ ॥ तथा तु वर्त्तमाने वै सङ्ग्रामेऽतिभयङ्करे । दुर्य्योधनो महाराज राधेयमिदमब्रवीत् ॥ २२ ॥ पश्य दुःशासनं वीरमभिमन्युवशं गतम् । प्रतपन्तमिवादित्यं निघ्नन्तं शात्रवान् रणे ॥ २३ ॥ अथ चैते सुसंरब्धाः सिंहा इव बलोत्कटाः । सौभद्रमुद्यतास्त्रातुमभ्यधावन्त पाण्डवाः ॥ २४ ॥ ततः कर्णः शरैस्तीक्ष्णैरभिमन्युं दुरासदम् । अभ्यवर्षत संक्रुद्धः पुत्रस्य हितकृत्तव ॥ २५ ॥ तस्य चानुचरांस्तीक्ष्णैर्विव्याध परमेषुभिः । अवज्ञापूर्वकं शूरः सौभद्रस्य रणाजिरे ॥ २६ ॥ अभिमन्युस्तु राधेयं त्रिसप्तत्या शिलीमुखैः । अविध्यत्त्वरितो राजन् द्रोणं प्रेप्सुर्महामनाः ॥ २७ ॥ तं तदा नाशकत् कश्चिद्द्रोणाद्दारयितुं रथी । आरुजन्तं रथश्रेष्ठान् वज्रहस्तात्मजात्मजम् ॥ २८ ॥ ततः कर्णो जयप्रेप्सुर्मानी सर्वधनुर्भृताम् । सौभद्रं शतशोऽविध्यदुत्तमास्त्राणि दर्शयन् ॥ २९ ॥ सोऽस्त्रैरस्त्रविदां श्रेष्ठो रामशिष्यः प्रतापवान् । समरे शत्रुदुर्द्धर्षमभिमन्युमपीड़यत् ॥ ३० ॥ स तथा पीड्यमानस्तु राधेयेनास्त्रवृष्टिभिः । समरेऽमरसङ्काशः सौभद्रो न व्यशीर्य्यत ॥ ३१ ॥ ततः शिलाशितैस्तीक्ष्णैर्भल्लैरानतपर्वभिः । छित्त्वा धनूंषि शूराणामार्जुनिः कर्णमार्द्दयत् ॥ ३२ ॥ धनुर्मण्डलनिर्मुक्तैः शरैराशीविषोपमैः । सच्छत्रध्वजयन्तारं साश्वमाशु स्मयन्निव ॥ ३३ ॥ कर्णः पञ्चास्य चिक्षेप वाणान् सन्नतपर्वणः । असम्भ्रान्तश्च तान् सर्वानग्रह्णात् फाल्गुनात्मजः ॥ ३४ ॥ ततो मुहूर्त्तात् कर्णस्य वाणेनैकेन वीर्य्यवान् । सध्वजं कार्मुकं वीरश्छित्त्वा भूमावपातयत् ॥ ३५ ॥ ततः कृच्छ्रगतं कर्णं दृष्ट्वा कर्णादनन्तरः । सौभद्रमभ्ययात्तूर्णं दृढ़मायम्य कार्मुकम् ॥ ३६ ॥ तत उच्चुक्रुशुः पार्था-

स्तेषां चानुचरा जनाः। वादित्राणि च सञ्जघ्नुः सौभद्रञ्चापि तुष्टुवुः ॥ ३७ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि दुःशासनकर्णपराजये चत्वारिंशोऽध्यायः ॥ ४० ॥

---

सञ्जय उवाच। सोऽनुगर्ज्जन् धनुष्पाणिर्ज्यां विकर्षन् पुनः पुनः। तयोर्महात्मनोस्तूर्णं रथान्तरमपातयत् ॥ १ ॥ सोऽविध्यद्दशभिर्बाणैरभिमन्युं दुरासदम्। सच्छत्रध्वजयन्तारं साश्वमाशु स्मयन्निव ॥ २ ॥ पितृपैतामहं कर्म्म कुर्वाणमतिमानुषम्। दृष्ट्वार्द्दितं शरैः कार्ष्णिं त्वदीया हृषिताभवन् ॥ ३ ॥ तस्याभिमन्युरायम्य स्मयन्नेकेन पत्रिणा। शिरः प्रच्यावयामास तद्रथात् प्रापतद्भुवि ॥ ४ ॥ कर्णिकारमिवाधूतं वातेनापतितं नगात्। भ्रातरं निहतं दृष्ट्वा राजन् कर्णो व्यथां ययौ ॥ ५ ॥ विमुखीकृत्य कर्णन्तु सौभद्रः कङ्कपत्रिभिः। अन्यानपि महेष्वासान् तूर्णमेवाभिदुद्रुवे ॥ ६ ॥ ततस्तद्विविधं सैन्यं हस्त्यश्वरथपत्तिमत्। क्रुद्धोऽभिमन्यूरभिनत्तिग्मतेजा महायशाः ॥ ७ ॥ कर्णस्तु बहुभिर्बाणैरर्द्यमानोऽभिमन्युना। अपाताज्जवनैरश्वैस्ततोऽनीकमभज्यत ॥ ८ ॥ शलभैरिव चाकाशे धाराभिरिव चावृते। अभिमन्योः शरै राजन्नाप्राज्ञायत किञ्चन ॥ ९ ॥ तावकानान्तु योधानां बध्यतां निशितैः शरैः। अन्यत्र सैन्धवाद्राजन् नस्म कश्चिदतिष्ठत ॥ १० ॥ सौभद्रस्तु ततः शङ्खं प्रध्माप्य पुरुषर्षभः। शीघ्रमभ्यपतत् सेनां भारतीं भरतर्षभ ॥ ११ ॥ सकक्षेऽग्निरिवोत्सृष्टो निर्द्दहंस्तरसा रिपून्। मध्ये भारतसैन्यानामार्जुनिः पर्य्यवर्त्तत ॥ १२ ॥ रथनागाश्वमनुजानर्द्दयन्निशितैः शरैः। सम्प्रविश्याकरोद्भूमिं कबन्धगणसङ्कुलाम् ॥ १३ ॥ सौभद्रचापप्रभवैर्निकृत्ताः परमेषुभिः।

स्वानेवाभिमुखान् घ्नन्तः प्राद्रवन् जीवितार्थिनः ॥ १४ ॥ ते घोरा रौद्रकर्माणो विपाठा बहवः शिताः । निघ्नन्तो रथनागाश्वान् जघ्नुरासन् वसुन्धराम् ॥ १५ ॥ सायुधाः साङ्गुलित्राणाः सगदाः साङ्गदा रणे । दृश्यन्ते बाहवश्छिन्ना हेमाभरणभूषिता ॥ १६ ॥ शरांश्चापानि खड्गांश्च शरीराणि शिरांसि च । सकुण्डलानि स्रग्वीणि भूमावासन् सहस्रशः ॥ १७ ॥ सोपस्करैरधिष्ठानै-रीषादण्डकबन्धुरैः । अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा युगैः ॥१८॥ शक्तिचापासिभिश्चैव पतितैश्च महाध्वजैः । चर्मचापशरैश्चैव व्यप-कीर्णैः समन्ततः ॥ १९ ॥ निहतैः क्षत्रियैरश्वैर्वारणैश्च विशा-म्पते । अगम्यकल्पा पृथिवी क्षणेनासीत् सुदारुणा ॥ २० ॥ बध्यतां राजपुत्राणां क्रन्दतामितरेतरम् । प्रादुरासीन्महाशब्दो भीरूणां भयवर्द्धनः ॥ २१ ॥ स शब्दो भरतश्रेष्ठ दिशः सर्वा व्यनादयत् । सौभद्रश्चाद्रवत् सेनां घ्नन् वराश्वरथद्विपान् ॥ २२ ॥ कक्षमग्निरिवोत्सृष्टो निर्द्दहंस्तरसा रिपून् । मध्ये भारतसैन्याना-मार्जुनिः प्रत्यदृश्यत ॥ २३ ॥ विचरन्तं दिशः सर्वाः प्रदिशश्चापि भारत । तं तदा नानुपश्यामः सैन्येन रजसा वृतः ॥ २४ ॥ आददानं गजाश्वानां नृणाञ्चायूंषि भारत । क्षणेन भूयः पश्यामि सूर्य्यं मध्यन्दिने यथा ॥ २५ ॥ अभिमन्युं महाराज पतपन्तं द्विषद्गणान् । स वासवसमः सङ्ख्ये वासवस्यात्मजात्मजः । अभिमन्युर्महाराज सैन्यमध्ये व्यरोचत ॥ २६ ॥

इति द्रोणपर्वणि अभिमन्युबधपर्वणि अभिमन्युपराक्रमे
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

---

धृतराष्ट्र उवाच । बालमत्यन्तसुखिनं स्वबाहुबलदर्पितम् । युद्धेषु कुशलं वीरं कुलपुत्रं तनुत्यजम् ॥ १ ॥ गाहमानमनीकानि

सदश्वैश्च विहायसैः। अपि यौधिष्ठिरात् सैन्यात् कश्चिदन्व-
पतद्बली ॥ २ ॥

सञ्जय उवाच। युधिष्ठिरो भीमसेनः शिखण्डी सात्यकि-
र्यमौ। धृष्टद्युम्नो विराटश्च द्रुपदश्च सकैकयः ॥ ३ ॥ धृष्टकेतुश्च
संरब्धो मत्स्याश्चाभ्यपतन् रणे। तेनैव तु पथायाताः पितरो
मातुलैः सह ॥ ४ ॥ अभ्यद्रवन् परीप्सन्तो व्यूढ़ानीकाः प्रहा-
रिणः। तान् दृष्ट्वा द्रवतः शूरान् त्वदीया विमुखाभवन् ॥ ५ ॥
ततस्तद्विमुखं दृष्ट्वा तव सूनोर्महद्बलम्। जामाता तव तेजस्वी
विष्टम्भयिषुराद्रवत् ॥ ६ ॥ सैन्धवस्य महाराज पुत्रो राजा जय-
द्रथः। सपुत्रगृद्धिनः पार्थान् सह सैन्यानवारयत् ॥ ७ ॥ उग्र-
धन्वा महेष्वासो दिव्यमस्त्रमुदीरयन्। वार्ड्डक्षत्रिरुपासेधत् प्रव-
णादिव कुञ्जरः ॥ ८ ॥

धृतराष्ट्र उवाच। अतिभारमहं मन्ये सैन्धवे सञ्जयाहितम्।
यदेकः पाण्डवान् क्रुद्धान् पुत्रप्रेप्सूनवारयत् ॥ ९ ॥ अत्यद्भुत-
महं मन्ये बलं शौर्य्यञ्च सैन्धवे। तस्य प्रब्रूहि मे वीर्य्यं कर्म्मः
चाग्र्यं महात्मनः ॥ १० ॥ किं दत्तं हुतमिष्टं वा सुतप्तमथ वा
तपः। सिन्धुराजो हि येनैकः क्रुद्धान् पार्थानवारयत् ॥ ११ ॥

सञ्जय उवाच। द्रौपदीहरणे यत्तत् भीमसेनेन निर्ज्जितः।
मानात् स तप्तवान् राजा वरार्थी सुमहत्तपः ॥ १२ ॥ इन्द्रि-
याणीन्द्रियार्थेभ्यः प्रियेभ्यः सन्निवर्त्त्य सः। क्षुत्पिपासातपसहः
कृशो धमनिसन्ततः ॥ १३ ॥ देवमाराधयच्छर्व्वं गृणन् ब्रह्म सना-
तनम्। भक्तानुकम्पी भगवान् तस्य चक्रे ततो दयाम् ॥ १४ ॥
स्वप्नान्तेऽप्यथ चैवाह हरः सिन्धुपतेः सुतम्। वरं वृणीष्व
प्रीतोऽस्मि जयद्रथ किमिच्छसि ॥ १५ ॥ एवमुक्तस्तु शर्व्वेण सिन्धु-
राजो जयद्रथः। उवाच प्रणतो रुद्रं प्राञ्जलिर्नियतात्मवान्
॥ १६ ॥ पाण्डवेयानहं सङ्ख्ये भीमवीर्य्यपराक्रमान्। वारयामि

रथेनैकः समस्तानिति भारत ॥ १७ ॥ एवमुक्तस्तु देवेशो जयद्रथमथाब्रवीत् । ददामि ते वरं सौम्य विना पार्थं धनञ्जयम् ॥ १८ ॥ वारयिष्यसि सङ्ग्रामे चतुरः पाण्डुनन्दनान् । एवमस्त्विति देवेशमुक्त्वाबुध्यत पार्थिवः ॥ १९ ॥ स तेन वरदानेन दिव्येनास्त्रबलेन च । एकः सन्धारयामास पाण्डवानामनीकिनीम् ॥ २० ॥ तस्य ज्यातलघोषेण क्षत्रियान् भयमाविशत् । परांस्तव तु सैन्यस्य हर्षः परमकोऽभवत् ॥ २१ ॥ दृष्ट्वा तु क्षत्रिया भारं सैन्धवे सर्वमर्पितम् । उत्क्रुश्याभ्यद्रवन् राजन् येन यौधिष्ठिरं बलम् ॥ २२ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि जयद्रथयुद्धे
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

---

सञ्जय उवाच । यन्मां पृच्छसि राजेन्द्र सिन्धुराजस्य विक्रमम् । शृणु तत् सर्वमाख्यास्ये यथा पाण्डूनयोधयत् ॥ १ ॥ तमूहुः सारथेर्वश्याः सैन्धवाः साधुवाहिनः । विकुर्वाणा बृहन्तोऽश्वाः श्वसनोपमरंहसः ॥ २ ॥ गन्धर्वनगराकारं विधिवत् कल्पितं रथम् । तस्याभ्यशोभयत् केतुर्वाराहो राजतो महान् ॥३॥ श्वेतच्छत्रपताकाभिश्चामरव्यजनेन च । स बभौ राजलिङ्गैस्तैस्तारापतिरिवाम्बरे ॥ ४ ॥ मुक्तावज्रमणिस्वर्णैर्भूषितन्तमयस्मयम् । वरूथं विबभौ तस्य ज्योतिर्भिः खमिवावृतम् ॥ ५ ॥ स विस्फार्य्य महच्चापं किरन्निषुगणान् बहून् । तं व्यूहं पूरयामास यद्दारं व्यदारयदार्ज्जुनिः ॥ ६ ॥ स सात्यकिं त्रिभिर्वाणैरष्टाभिश्च वृकोदरम् । धृष्टद्युम्नं तथा षष्ट्या विराटं दशभिः शरैः ॥ ७ ॥ द्रुपदं पञ्चभिस्तीक्ष्णैर्दशभिश्च शिखण्डिनम् । कैकयान् पञ्चविंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः ॥ ८ ॥ युधिष्ठिरं तु सप्तत्या ततः शेषानुपानुदत् । इषुजालेन महता तदद्भुतमिवाभवत् ॥ ९ ॥ अथास्य सितपीतेन

भल्लेनादिश्य कार्मुकम् । चिच्छेद प्रहसन् राजन् धर्मपुत्रः प्रतापवान् ॥ १० ॥ अक्ष्णोर्निमेषमात्रेण सोऽन्यदादाय कार्मुकम् । विव्याध दशभिः पार्थं तांश्चैवान्यांस्त्रिभिस्त्रिभिः ॥ ११ ॥ तस्य तल्लाघवं ज्ञात्वा भीमो भल्लैस्त्रिभिः पुनः । धनुर्ध्वजञ्च छत्रञ्च क्षितौ क्षिप्रमपातयत् ॥ १२ ॥ सोऽन्यदादाय बलवान् सज्यं कृत्वा च कार्मुकम् । भीमस्यापातयत् केतुं धनुरश्वांश्च मारिष ॥ १३ ॥ स हताश्वादवप्लुत्य छिन्नधन्वा रथोत्तमात् । सात्यकेराप्लुतो यानं गिर्य्यग्रमिव केशरी ॥ १४ ॥ ततस्त्वदीयाः संहृष्टाः साधु-साध्विति चुक्रुशुः । सिन्धुराजस्य तत् कर्म पूजयन्तो मुहुर्मुहुः ॥ १५ ॥ संक्रुद्धान् पाण्डवानेको यद्दधारास्त्रतेजसा । तत्तस्य कर्म भूतानि सर्वाण्येवाभ्यपूजयन् ॥ १६ ॥ सौभद्रेण हतैः पूर्वं सोत्तरायुधिभिर्द्विपैः । पाण्डूनां दर्शितः पन्थाः सैन्धवेन निवारितः ॥ १७ ॥ यतमानास्तु ते वीरा मत्स्यपाञ्चालकेकयाः । पाण्डवा-श्चान्वपद्यन्त प्रतिशेकुर्न्न सैन्धवम् ॥ १८ ॥ यो योहि यतते भेत्तुं द्रोणानिकं तवाहितः । तन्तमेव वरं प्राप्य सैन्धवः प्रत्यवारयत्॥१९॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि जयद्रथयुद्धे
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

---

सञ्जय उवाच । सैन्धवेन निरुद्धेषु जयगृद्धिषु पाण्डुषु । सुघोरमभवद्युद्धं त्वदीयानां परैः सह ॥ १ ॥ प्रविश्याथार्ज्जुनिः सेनां सत्यसन्धो दुरासदः । व्यक्षोभयत तेजस्वी मकरः सागरं यथा ॥ २ ॥ तन्तथा शरवर्षेण क्षोभयन्तमरिन्दमम् । यथा-प्रधानं सौभद्रमभ्ययुर्न्नरसत्तमाः ॥ ३ ॥ तेषां तस्य च सम्मर्द्दो दारुणः समपद्यत । सृजतां शरवर्षाणि प्रसक्तममितौजसाम् ॥४॥ रथव्रजेन संरुद्धस्तैरमित्रैस्तथार्ज्जुनिः । वृषसेनस्य यन्तारं हत्वा

चिच्छेद कार्मुकम् ॥ ५ ॥ तस्य विव्याध वलवान् शरैरश्वानजिह्मगैः। वातायमानैरथ तैरश्वैरवहृतो रणात् ॥ ६ ॥ तेनान्तरेणाभिमन्युर्यन्तापासारयद्रथम्। रथव्रजास्ततो हृष्टाः साधुसाध्विति चुक्रुशुः ॥ ७ ॥ तं सिंहमिव संक्रुद्धं प्रमथन्तं शरैररीन्। आरादायान्तमभ्येत्य वसातीयोऽभ्ययाद्द्रुतम् ॥८॥ सोऽभिमन्युं शरैः षष्ट्या रुक्मपुङ्खैरवाकिरत्। अब्रवीच्च न मे जीवन् जीवतो युधि मोक्ष्यसे ॥ ९ ॥ तमयस्मयवर्माणमिषुणा दूरपातिना। विव्याध हृदि सौभद्रः स पपात व्यसुः क्षितौ ॥१०॥ वसातीयं हतं दृष्ट्वा क्रुद्धाः क्षत्रियपुङ्गवाः। परिवव्रुस्तथा राजंस्तव पौत्रजिघांसवः ॥ ११ ॥ विस्फारयन्तश्चापानि नानारूपाण्यनेकशः। तद्युद्धमभवद्रौद्रं सौभद्रस्यारिभिः सह ॥ १२ ॥ तेषां शरान् सेष्वसनान् शरीराणि शिरांसि च। सकुण्डलानि स्रग्वीणि क्रुद्धश्चिच्छेद फाल्गुनिः ॥ १३ ॥ सखड्गाः साङ्गुलित्राणाः सपट्टिशपरश्वधाः। अदृश्यन्त भुजाश्छिन्ना हेमाभरणभूषिताः ॥१४॥ स्रग्भिराभरणैर्वस्त्रैः पातितैश्च महाध्वजैः। वर्मभिश्चर्मभिर्हारैर्मुकुटैश्छत्रचामरैः ॥ १५ ॥ उपस्करैरधिष्ठानैरीषादण्डकवन्धुरैः। अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा युगैः ॥ १६ ॥ अनुकर्षैः पताकाभिस्तथासारथिवाजिभिः। रथैश्च भग्नैर्नागैश्च हयैः कीर्णाभवन्मही ॥ १७ ॥ निहतैः क्षत्रियैः शूरैर्नानाजनपदेश्वरैः। जयगृद्धैर्वृता भूमिर्दारुणा समपद्यत ॥ १८ ॥ दिशो विचरतस्तस्य सर्वाश्च प्रदिशस्तथा। रणेऽभिमन्योः क्रुद्धस्य रूपमन्तरधीयत ॥१९॥ काञ्चनं यद्यदस्यासीद्वर्म चाभरणानि च। धनुषश्च शराणाञ्च तदपश्याम केवलम् ॥ २० ॥ तं तदा नाशकत् कश्चित् चक्षुर्भ्यामभिवीक्षितुम्। आददानं शरैर्योधान् मध्ये सूर्य्यमिव स्थितम् ॥२१॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

सञ्जय उवाच। आददानस्तु शूराणामायूंष्यमवदार्ज्जुनिः। अन्तकः सर्व्वभूतानां प्राणान् काल इवागते॥ १॥ स शक्र इव विक्रान्तः शक्रसूनोः सुतो बली। अभिमन्युस्तदानीकं लोड़यन् बह्वशोभत॥ २॥ प्रविश्य स तु राजेन्द्र क्षत्रियेन्द्रान्तकोपमः। सत्यश्रवसमादत्त व्याघ्रो मृगमिवोल्बणः॥ ३॥ सत्यश्रवसि चाक्षिप्ते त्वरमाणा महारथाः। प्रगृह्य विविधं शस्त्रमभिमन्युमुपाद्रवन्॥ ४॥ अहं पूर्व्वमहं पूर्व्वमिति क्षत्रियपुङ्गवाः। स्पर्द्धमानाः समाजग्मुर्ज्जिघांसन्तोऽर्ज्जुनात्मजम्॥ ५॥ क्षत्रियाणामनीकानि प्रद्रुतान्यभिधावताम्। जगाम तिमिरासाद्य क्षुद्रमत्स्यानिवार्णवे॥ ६॥ ये के चनागतास्तस्य समीपमपलायिनः। न ते प्रतिन्यवर्त्तन्त समुद्रादिव सिन्धवः॥ ७॥ महावातगृहीतेव वातवेगभयार्द्दिता। समकम्पय सा सेना विभ्रान्ता नौरिवार्णवे॥ ८॥ अथ रुक्मरथो नाम मद्रेश्वरसुतो बली। त्रस्तामाश्वासयन् सेनामत्रस्तो वाक्यमब्रवीत्॥ ९॥ अलं त्रासेन वः शूरा नैष कश्चिन्मयि स्थिते। अहमेनं ग्रहीष्यामि जीवग्राहं न संशयः॥१०॥ एवमुक्त्वा तु सौभद्रमभिदुद्राव वीर्य्यवान्। सुकल्पितेनोह्यमानः स्यन्दनेन विराजता॥ ११॥ सोऽभिमन्युं त्रिभिर्व्बाणैर्भित्त्वा वक्षस्यथानदत्। त्रिभिश्च दक्षिणे वाहौ सव्ये च निशितैस्त्रिभिः॥ १२॥ स तस्येष्वासनं छित्त्वा फाल्गुनिः सव्यदक्षिणौ। भुजौ शिरश्च स्वक्षिभ्रु क्षितौ क्षिप्रमपातयत्॥ १३॥ दृष्ट्वा रुक्मरथं भग्नं पुत्रं शल्यस्य मानिनम्। जीवग्राहं जिघृक्षन्तं सौभद्रेण यशस्विना॥ १४॥ सङ्ग्रामदुर्म्मदा राजन् राजपुत्राः प्रहारिणः। वयस्याः शल्यपुत्रस्य सुवर्णविकृतध्वजाः॥ १५॥ तालमात्राणि चापानि विकर्षन्तो महारथाः। आर्ज्जुनिं शरवर्षेण समन्तात् पर्य्यवारयन्॥ १६॥ शूरैः शिक्षावलोपेतैस्तरुणैरत्यमर्षणैः। दृष्ट्वैकं समरे शूरं सौभद्रमपराजितम्॥ १७॥ छाद्यमानं शर-

आर्तैर्हृष्टो दुर्योधनोऽभवत्। वैवस्वतस्य च गृहं गतं ह्येनममन्यतः
॥ १८ ॥ सुवर्णपुङ्खैरिषुभिर्नानालिङ्गैस्त्रिभिस्त्रिभिः। अदृश्य-
मार्जुनिं चक्रुर्निमेषान्ते नृपात्मजाः ॥ १९ ॥ ससूतश्च ध्वजं तस्य
स्यन्दनं तञ्च मारिष। आचितं समपश्याम श्वाविद्धं शलभैरिव
॥ २० ॥ स गाढ़विद्धः क्रुद्धस्तु तोत्त्रैर्गज इवार्दितः। गान्धर्व
मस्त्रमायच्छद्रथमायाञ्च भारत ॥ २१ ॥ अर्जुनेन तपस्तप्त्वा गन्ध-
र्वेभ्यो यदाहृतम्। तुम्बुरुप्रमुखेभ्यो वै तेनामोहयताहितान्
॥ २२ ॥ एकधा शतधा राजन् दृश्यते स्म सहस्रधा। अलात-
चक्रवत्सङ्ख्ये क्षिप्रमस्त्राणि दर्शयन् ॥ २३ ॥ रथचर्मास्त्रमायाभि-
र्मोहयित्वा परान्नृप। बिभेद शतधा राजन् शरीराणि महो-
क्षिताम् ॥ २४ ॥ प्राणाः प्राणभृतां चैव प्रेषिता निशितैः शरैः।
राजन् प्रापुरमुं लोकं शरीराण्यवनिं ययुः ॥ २५ ॥ धनूंष्यश्वा-
न्नियन्तृंश्च ध्वजान् बाहूंश्च साङ्गदान्। शिरांसि च शितैर्भल्लै-
स्तेषां चिच्छेद फाल्गुनिः ॥ २६ ॥ चूतारामो यथा भग्नः पञ्च-
वर्षफलोद्गमः। राजपुत्रशतं तद्वत् सौभद्रेणापतद्धतम् ॥ २७ ॥
क्रुद्धाशीविषसङ्काशान् सुकुमारान् यथोचितान्। एकेन निहता-
न्दृष्ट्वा भीतो दुर्योधनोऽभवत् ॥ २८ ॥ रथिनः कुञ्जरानश्वान्
पदातींश्चावमर्द्दितः। दृष्ट्वा दुर्योधनः क्षिप्रमुपायात्तममर्षितः
॥ २९ ॥ तयो रणमिवापूर्णः सङ्ग्रामस्तुमुलोऽभवत्। अथा-
भवत्ते विमुखः पुत्रः शरशतार्द्दितः ॥ ३० ॥

इति द्रोणपर्व्वणि अभिमन्युबधपर्व्वणि दुर्योधनपराजये
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

---

धृतराष्ट्र उवाच। यथा वदसि मे सूत एकस्य बहुभिः सह।
सङ्ग्रामं तुमुलं घोरं जयञ्चैव महात्मनः ॥ १ ॥ अश्रद्धेयमिवाश्चर्य्यं

सौभद्रस्याथ विक्रमम् । किन्तु नात्यद्भुतं मन्ये येषां धर्मो व्यपाश्रयः ॥ २ ॥ दुर्य्योधने तु विमुखे राजपुत्रशते हते । सौभद्रे प्रतिपत्तिं कां प्रत्यपद्यन्त मामकाः ॥ ३ ॥

सञ्जय उवाच । संशुष्कास्याश्चलन्नेत्राः प्रस्विन्ना लोमहर्षणाः । पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ॥ ४ ॥ हतान् भ्रातॄन् पितॄन् पुत्रान् सुहृत्सम्बन्धिबान्धवान् । उत्सृज्योत्सृज्य सञ्जग्मुस्त्वरयन्तो हयद्विपान् ॥ ५ ॥ तान् प्रभग्नांस्ततो दृष्ट्वा द्रोणो द्रौणिर्बृहद्बलः । कृपो दुर्य्योधनः कर्णः कृतवर्मा च सौबलः ॥ ६ ॥ अभ्यधावन् सुसंक्रुद्धाः सौभद्रमपराजितम् । तेऽपि पौत्रेण ते राजन् प्रायशो विमुखीकृताः ॥ ७ ॥ एकस्तु सुखसंवृद्धो बाल्याद्दर्पाच्च निर्भयः । इष्वस्त्रविन्महातेजा लक्ष्मणोऽर्जुनिमभ्ययात् ॥ ८ ॥ तमन्वगेवास्य पिता पुत्रगृद्धी न्यवर्त्तत । अनु दुर्य्योधनं चान्ये न्यवर्त्तन्त महारथाः ॥ ९ ॥ तन्तेऽभिषिषिचुर्बाणैर्मेघा गिरिमिवाम्बुभिः । स च तान् प्रममाथैको विष्वग्वातो यथाम्बुदान् ॥ १० ॥ पौत्रन्तु तव दुर्द्धर्षं लक्ष्मणं प्रियदर्शनम् । पितुः समीपे तिष्ठन्तं शूरमुद्यतकार्मुकम् ॥ ११ ॥ अत्यन्तसुखसंवृद्धं धनेश्वरसुतोपमम् । आससाद रणे कार्ष्णिर्मत्तोमत्तमिव द्विपम् ॥ १२ ॥ लक्ष्मणेन तु सङ्गम्य सौभद्रः परवीरहा । शरैः सुनिशितैस्तीक्ष्णैर्बाह्वोरुरसि चार्पितः ॥ १३ ॥ संक्रुद्धो वै महाबाहुर्दण्डाहत इवोरगः । पौत्रस्तव महाराज तव पौत्रमभाषत ॥ १४ ॥ सुदृष्टः क्रियतां लोको ह्यमुं लोकं गमिष्यसि । पश्यतां बान्धवानां त्वां नयामि यमसादनम् ॥ १५ ॥ एवमुक्त्वा ततो भल्लं सौभद्रः परवीरहा । उद्ववर्ह महाबाहुर्निर्मुक्तोरगसन्निभम् ॥ १६ ॥ स तस्य भुजनिर्मुक्तो लक्ष्मणस्य सुदर्शनम् । सुनसं सुभ्रुकेशान्तं शिरोऽहार्षीत् सकुण्डलम् ॥ १७ ॥ लक्ष्मणं निहतं दृष्ट्वा हाहेत्युचुक्रुशुर्ज्जनाः । ततो दुर्य्योधनः

क्रुद्धः प्रिये पुत्रे निपातिते ॥ १८ ॥ हतैनमिति चुक्रोश क्षत्रियान् क्षत्रियर्षभः। ततो द्रोणः कृपः कर्णो द्रोणपुत्रो बृहद्वलः ॥ १९ ॥ कृतवर्मा च हार्द्दिक्यः षड्रथाः पर्य्यवारयन्। स तान् विद्धा शितैर्बाणैर्विमुखीकृत्य चार्जुनिः ॥ २० ॥ वेगेनाभ्यपतत् क्रुद्धः सैन्धवस्य महद्वलम्। आवब्रुस्तस्य पन्थानं गजानीकेन दंशिताः ॥ २१ ॥ कालिङ्गाश्च निषादाश्च क्राथपुत्रश्च वीर्य्यवान्। तत्प्रसक्तमिवात्यर्थं युद्धमासीद्विशाम्पते ॥ २२ ॥ ततश्च कुञ्जरानीकं व्यधमद्धृष्टमार्जुनिः। यथावायुर्नित्यगतिर्ज्जलदान् शतशोऽम्बरे ॥ २३ ॥ ततः क्राथः शरव्रातैरार्जुनिं समवारयत्। अथेतरे सन्निवृत्ताः पुनर्द्रोणमुखा रथाः ॥ २४ ॥ परमास्त्राणि तन्वानाः सौभद्रमभिदुद्रुवुः। तान्निवार्य्यार्जुनिर्बाणैः क्राथपुत्रमथार्द्दयत् ॥ २५ ॥ शरौघेणाप्रमेयेण त्वरमाणो जिघांसया। स धनुर्बाणकेयूरौ बाहू समुकुटं शिरः ॥ २६ ॥ छत्रं ध्वजं नियन्तारमश्वांश्चास्य न्यपातयत्। कुलशीलश्रुतबलैः कीर्त्त्या चास्त्रबलेन च। युक्ते तस्मिन् हते वीराः प्रायशो विमुखाभवन् ॥२७॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि क्राथपुत्रवधे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

---

धृतराष्ट्र उवाच। तथा प्रविष्टं तरुणं सौभद्रमपराजितम्। कुलानुरूपं कुर्वाणं सङ्ग्रामेष्वपलायिनम् ॥ १ ॥ आजानेयैस्तु बलिभिर्यान्तमश्वैस्त्रिहायणैः। प्लवमानमिवाकाशे के शूराः पर्य्यवारयन् ॥ २ ॥

सञ्जय उवाच। अभिमन्युः प्रविश्यैव तावकान्निशितैः शरैः। अकरोद्विमुखान् सर्वान् पार्थिवान् पाण्डुनन्दनः ॥ ३ ॥ तं तु द्रोणः कृपः कर्णो द्रोणिश्च स बृहद्वलः। कृतवर्मा च हार्द्दिक्यः

प्रद्रुथाः पर्य्यवारयन् ॥ ४ ॥ दृष्ट्वा तु सैन्धवे भारमतिमात्रं समा-
हितम्। सैन्यं तव महाराज युधिष्ठिरमुपाद्रवत् ॥ ५ ॥ सौभद्र-
मितरे वीरमभ्यवर्षञ्छराम्बुभिः। तालमात्राणि चापानि विक-
र्षन्तो महाबलाः ॥ ६ ॥ तांस्तु सर्वान् महेष्वासान् सर्वविद्यासु
निष्ठितान्। व्यष्टम्भयद्रणे बाणैः सौभद्रः परवीरहा ॥ ७ ॥
द्रोणं पञ्चाशताविध्यत् विंशत्या च वृहद्बलम्। अशीत्या कृत-
वर्माणं कृपं षष्ट्या शिलीमुखैः ॥ ८ ॥ रुक्मपुङ्खैर्महावेगैराकर्ण-
समचोदितैः। अविध्यद्दशभिर्बाणैरश्वत्थामानमार्जुनिः ॥ ९ ॥ स
कर्णं कर्णिना कर्णे पीतेन च शितेन च। फाल्गुनिर्द्विषतां मध्ये
विव्याध परमेषुणा ॥ १० ॥ पातयित्वा कृपस्याश्वान् तथोभौ
पार्ष्णिसारथी। अथैनं दशभिर्बाणैः प्रत्यविध्यत् स्तनान्तरे ॥ ११ ॥
ततो वृन्दारकं वीरं कुरूणां कीर्त्तिवर्द्धनम्। पुत्राणां तव वीराणां
पश्यतामवधीद्बली ॥ १२ ॥ तं द्रौणिः पञ्चविंशत्या क्षुद्रकाणां
समार्पयत्। वरं वरममित्राणामारुजन्तमभीतवत् ॥ १३ ॥ स
तु बाणैः शितैस्तूर्णं प्रत्यविध्यत मारिष। पश्यतां धार्त्तराष्ट्राणा-
मश्वत्थामानमार्जुनिः ॥ १४ ॥ षष्ट्या शराणां तं द्रौणिस्तिग्मग्-
धारैः सुतेजनैः। उग्रैर्नाकम्पयद्विद्वा मैनाकमिव पर्वतम् ॥ १५ ॥
स तु द्रौणिं त्रिसप्तत्या हेमपुङ्खैरजिह्मगैः। प्रत्यविध्यन्महातेजा
बलवानपकारिणम् ॥ १६ ॥ तस्मिन् द्रोणो बाणशतं पुत्रगृद्धी
न्यपातयत्। अश्वत्थामा तथा षष्टिं परीप्सन् पितरं रणे ॥ १७ ॥
कर्णो द्वाविंशतिं भल्लान् कृतवर्मा चतुर्द्दश। वृहद्बलस्तु पञ्चाशत्
कृपः शारद्वतो दश ॥ १८ ॥ तांस्तान् प्रत्यवधीत् सर्वान् दशभि-
र्द्दशभिः शरैः। तं कोशलानामधिपः कर्णिनाताड़यद्धृदि ॥१९॥
स तस्याश्वान् ध्वजं चापं सूतञ्चापातयत् क्षितौ। अथ कोशल-
राजस्तु विरथः खड्गचर्मभृत् ॥ २० ॥ इयेष फाल्गुनेः कायात्
शिरो हर्त्तुं सकुण्डलम्। कोशलानां स भर्त्तारं राजपुत्रं वृह-

हलम् ॥ २१ ॥ हृदि विव्याध बाणेन स भिन्नहृदयोऽपतत् ।
बभञ्ज च सहस्राणि दश राज्ञां महात्मनाम् ॥ २२ ॥ सृजता-
मशिवा वाचः खड्गकार्मुकधारिणाम् । तथा बृहद्बलं हत्वा
सौभद्रो व्यचरद्रणे । व्यष्टम्भयन्महेष्वासान् योधांस्तव शरा-
म्बुभिः ॥ २३ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि बृहद्बलजये
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

---

सञ्जय उवाच । स कर्णं कर्णिना कर्णे पुनर्विव्याध फाल्गुनिः ।
शरैः पञ्चाशता चैनमविध्यत् कोपयन् भृशम् ॥ १ ॥ प्रतिविव्याध
राधेयस्तावद्भिरथ तं पुनः । शरैराचितसर्वाङ्गो बह्वशोभत भारत
॥ २ ॥ कर्णश्चाथ शरान् क्रुद्धो रुधिरोत्पीड़वाहिनम् । कर्णोऽपि
विबभौ शूरः शरैश्छिन्नोऽसृगाप्लुतः ॥ ३ ॥ तौ तथा शरचित्राङ्गौ
रुधिरेण समुक्षितौ । बभूवतुर्महात्मानौ पुष्पिताविव किंशुकौ
॥ ४ ॥ अथ कर्णस्य सचिवान् षट्शूरांश्चित्रयोधिनः । साश्व-
सूतध्वजरथान् सौभद्रो निजघान ह ॥ ५ ॥ तथैवेतान्महेष्वासान्
दशभिर्दशभिः शरैः । प्रत्यविध्यदसम्भ्रान्तस्तदद्भुतमिवाभवत् ॥ ६ ॥
मागधस्य पुनः पुत्रं हत्वा षड्भिरजिह्मगैः । साश्वं ससूतं
तरुणमश्वकेतुमपातयत् ॥ ७ ॥ मार्त्तिकावतिकं भोजं ततः
कुञ्जरकेतनम् । क्षुरप्रेण समुन्मथ्य ननाद विसृजन् शरान् ॥ ८ ॥
तस्य दौःशासनिर्विद्धा चतुर्भिश्चतुरो हयान् । सूतमेकेन विव्याध
दशभिश्चार्जुनात्मजम् ॥ ९ ॥ ततो दौःशासनिं कार्ष्णिर्विद्धा
दशभिराशुगैः । संरम्भाद्रक्तनयनो वाक्यमुच्चैरयाब्रवीत् ॥ १० ॥
पिता तवाहवं त्यक्त्वा गतः कापुरुषो यथा । दिष्ट्या त्वमपि
जानीषे योद्धुं न त्वद्य मोक्ष्यसे ॥ ११ ॥ एतावदुक्त्वा वचनं

कर्मारपरिमार्ज्जितम्। नाराचं विससर्ज्जाशु तं द्रौणिस्त्रिभि-
राच्छिनत्॥ १२॥ तस्यार्जुनिर्वर्ज्जयित्वा शल्यं त्रिभिरताड़यत्।
तं शल्यो नवभिर्बाणैर्गार्द्धपत्रैरताड़यत्॥ १३॥ स्वप्यसम्भ्रान्त-
वद्राजन् तदद्भुतमिवाभवत्। तस्यार्जुनिर्धनुश्छित्त्वा हत्वोभौ
पार्ष्णिसारथी॥ १४॥ तं विव्याधायसैः षड्भिः सोऽपाक्रामत्
रथान्तरम्। शत्रुञ्जयं चन्द्रकेतुं महामेघं सुवर्च्चसम्॥ १५॥
सूर्य्यभासञ्च पञ्चैतान् हत्वा विव्याध सौबलम्। तं सौबल स्त्रिभि-
र्विद्ध्वा दुर्य्योधनमथाब्रवीत्॥ १६॥ सर्व एनं प्रमथ्नीमः पुरैकैकं-
हिनस्ति नः। बधोपायं चिन्त्यतां वै नृप द्रोणकृपादिभिः॥१७॥
अथाब्रवीत्ततो द्रोणं कर्णो वैकर्त्तनो रणे। पुरा सर्वान् प्रम-
थ्नाति ब्रूह्यस्य बधमाशु नः॥ १८॥ ततो द्रोणो महेष्वासः सर्वां-
स्तान् प्रत्यभाषत। अस्ति चास्यान्तरं किञ्चित् कुमारस्यापि
पश्यत॥ १९॥ अन्वप्यस्यान्तरं ह्यद्य चरतः सर्वतो दिशम्।
शीघ्रतां नरसिंहस्य पाण्डवेयस्य पश्यत॥ २०॥ धनुर्मण्डल-
मेवास्य रथमार्गेषु दृश्यते। सन्दधानस्य विशिखान् शीघ्रञ्चैव
विमुञ्चतः॥ २१॥ आरुजन्नपि मे प्राणान् मोहयन्नपि सायकैः।
प्रहर्षयति मां भूयः सौभद्रः परवीरहा॥ २२॥ अति मां
नन्दयत्येष सौभद्रो विचरन्रणे। अन्तरं यस्य संरब्धा न पश्यन्ति
महारथाः॥ २३॥ अस्यतो लघुहस्तस्य दिशः सर्वा महेषुभिः।
न विशेषं प्रपश्यामि रणे गाण्डीवधन्वनः॥ २४॥ अथ कर्णः
पुनर्द्रोणमाहार्जुनिशराहतः। स्थातव्यमिति तिष्ठामि पीड्य-
मानोऽभिमन्युना॥ २५॥ तेजस्विनः कुमारस्य शराः परम-
दारुणाः। क्षिण्वन्ति हृदयं मेऽद्य घोराः पावकतेजसः॥ २६॥
तमाचार्य्योऽब्रवीत् कर्णं शनकैः प्रहसन्निव। अभेद्यमस्य कवचं
युवा चाशुपराक्रमः॥ २७॥ उपदिष्टा मया ह्यस्य पितुः कवच-
धारणा। तामेष निखिलां वेत्ति ध्रुवं परपुरञ्जयः॥ २८॥

शक्यं तस्य धनुश्छेत्तुं ज्याञ्च वाणैः समाहितः। अभीषूंश्च हयांश्चैव तथोभौ पार्ष्णिसारथी॥ २९॥ एतत् कुरु महेष्वास राधेय यदि शक्यसे। अथैनं विमुखीकृत्य पश्चात् प्रहरणं कुरु॥ ३०॥ सधनुष्को न शक्योऽयमपि जेतुं सुरासुरैः। विरथं विधनुष्कञ्च कुरुष्वैनं यदीच्छसि॥ ३१॥ तदाचार्य्यवचः श्रुत्वा कर्णो वैकर्त्तनस्त्वरन्। अस्यतो लघुहस्तस्य पृषत्कैर्द्धनुराच्छिनत्॥ ३२॥ अश्वानस्यावधीद्भोजो गौतमः पार्ष्णिसारथी। शेषास्तु छिन्नधन्वानं शरवर्षैरवाकिरन्॥ ३३॥ त्वरमाणास्त्वराकाले विरथं षण्महारथाः। शरवर्षैरकरुणा बालमेकमवाकिरन्॥ ३४॥ स छिन्नधन्वा विरथः स्वं धर्ममनुपालयन्। खड्गचर्मधरः श्रीमानुत्पपात विहायसा॥ ३५॥ मार्गैः स कौशिकाद्यैश्च लाघवेन बलेन च। आर्जुनिर्व्यचरद्‌व्योम्नि भृशं वै पक्षिराडिव॥ ३६॥ मय्येव निपतत्येष सासिरित्यूर्द्ध्वदृष्टयः। विव्यधुस्तं महेष्वासाः समरे छिद्रदर्शिनः॥ ३७॥ तस्य द्रोणोऽच्छिनन्मुष्टौ खड्गं मणिमयत्सरुम्। क्षुरप्रेण महातेजास्त्वरमाणः सपत्नजित्॥ ३८॥ राधेयो निशितैर्वाणैर्व्यधमच्चर्म चोत्तमम्। व्यसिचर्म्मेषु पूर्णाङ्गः सोऽन्तरीक्षात् पुनः क्षितिम्। आस्थितश्चक्रमुद्यम्य द्रोणं क्रुद्धोऽभ्यधावत॥ ३९॥ सचक्ररेणूज्ज्वलशोभिताङ्गो बभावतीवोन्नतचक्रपाणिः। रणेऽभिमन्युः क्षणमास रौद्रः स वासुदेवानुकृतिं प्रकुर्वन्॥ ४०॥ स्रुतरुधिरकृतैकरागवक्त्रो भ्रुकुटिपुटाकुटिलोऽतिसिंहनादः। प्रभुरमितबलो रणेऽभिमन्युर्नृपवरमध्यगतो विराजते स्म॥ ४१॥

इति द्रोणपर्वणि अभिमन्युबधपर्वणि अभिमन्युयुद्धे अष्टचत्वारिंशोऽध्यायः॥ ४८॥

सञ्जय उवाच । विष्णोः स्वसुर्नन्दकरः सविष्ण्वायुधभूषितः । रराजातिरथः सङ्ख्ये जनार्द्दन इवापरः ॥ १ ॥ मारुतोद्धूतकेशान्तमुद्यतासिवरायुधम् । वपुः समीक्ष्य पृथ्वीशा दुःसमीक्ष्यं सुरैरपि ॥ २ ॥ तच्चक्रं भृशमुद्विग्नाः सञ्छिच्छिदुरनेकधा । महारथस्तथा कार्ष्णिः सञ्जग्राह महागदाम् ॥ ३ ॥ विधनुःस्यन्दनासिस्तैर्विचक्रश्चारिभिः कृतः । अभिमन्युर्महाबाहुरश्वत्थामानमाद्रवत् ॥ ४ ॥ स गदामुद्यतां दृष्ट्वा ज्वलन्तीमशनीमिव । अपाक्रमद्रथोपस्थाद्विक्रमांस्त्रीन्नरर्षभः ॥ ५ ॥ तस्याश्वान् गदया हत्वा तथोभौ पार्ष्णिसारथी । शराचिताङ्गः सौभद्रः श्वाविद्वत् प्रत्यदृश्यत ॥ ६ ॥ ततः सुवलदायादं कालिकेयमपोथयत् । जघान चास्यानुचरान् गान्धारान् सप्तसप्ततिम् ॥७॥ पुनर्ब्रह्मवसातीयान् जघान रथिनो दश । कैकेयानां रथान् सप्त हत्वा च दश कुञ्जरान् ॥ ८ ॥ दौःशासनिरथं साश्वं गदया समपोथयत् । ततो दौःशासनिः क्रुद्धो गदामुद्यम्य मारिष ॥ ९ ॥ अभिदुद्राव दुर्द्धर्षस्तिष्ठतिष्ठेति चाब्रवीत् । तावुद्यतगदौ वीरावन्योऽन्यवधकाङ्क्षिणौ ॥ १० ॥ भ्रातृव्यौ सम्प्रजह्राते पुरेव त्र्यम्बकान्धकौ । तावन्योऽन्यं गदाग्राभ्यामाहत्य पतितौ क्षितौ ॥ ११ ॥ इन्द्रध्वजाविवोत्सृष्टौ रणमध्ये परन्तपौ । दौःशासनिरथोत्थाय कुरूणां कीर्त्तिवर्द्धनः ॥ १२ ॥ उत्तिष्ठमानं सौभद्रं गदया मूर्द्ध्न्यताड़यत् । गदावेगेन महता व्यायामेन च मोहितः ॥ १३ ॥ विचेता न्यपतद्भूमौ सौभद्रः परवीरहा । एवं विनिहतो राजन् एको वहुभिराहवे ॥ १४ ॥ क्षोभयित्वा चमूं सर्वां नलिनीमिव कुञ्जरः । अशोभत हतो वीरो व्याधैर्वनगजो यथा ॥ १५ ॥ तं तथा पतितं शूरं तावकाः पर्य्यवारयन् । दावं दग्ध्वा यथा शान्तं पावकं शिशिरात्यये ॥ १६ ॥ विमृद्य तरुशृङ्गाणि सन्निवृत्तमिवानिलम् । अस्तं गतमिवादित्यं तप्त्वा भारतवाहिनीम् ॥ १७ ॥

उपप्लुतं यथा सोमं संशुष्कमिव सागरम् । पूर्णचन्द्राभवदनं काकपक्षवृताक्षिकम् ॥ १८ ॥ तं भूमौ पतितं दृष्ट्वा तावकास्ते महारथाः । मुदा परमया युक्ताश्चुक्रुशुः सिंहवन्मुहुः ॥ १९ ॥ आसीत् परमको हर्षस्तावकानां विशाम्पते । इतरेषान्तु वीराणां नेत्रेभ्यः प्रापतज्जलम् ॥ २० ॥ अन्तरीक्षे च भूतानि प्राक्रोशन्त विशाम्पते । दृष्ट्वा निपतितं शूरं च्युतं चन्द्रमिवाम्बरात् ॥ २१ ॥ द्रोणकर्णमुखैः षड्भिर्धार्त्तराष्ट्रैर्महारथैः । एकोऽयं निहतः शेते नैष धर्मो मतो हि नः ॥ २२ ॥ तस्मिंस्तु निहते वीरे बह्व-शोभत मेदिनी । द्यौर्यथा पूर्णचन्द्रेण नक्षत्रगणमालिनी ॥२३॥ रुक्मपुङ्खैश्च सङ्कीर्णा रुधिरौघैश्च संप्लुता । उत्तमाङ्गैश्च वीराणां भ्राजमानैः सकुण्डलैः ॥ २४ ॥ विचित्रैश्च महोष्णीषैः पाताका-भिश्च संवृता । चामरैश्च कुथाभिश्च प्रविद्धैश्चोत्तमायुधैः ॥ २५ ॥ रथाश्वनरनागानामलङ्कारैश्च सुप्रभैः । खड्गैश्च निशितैः पीतै-र्निर्मुक्तभुजगैरिव ॥ २६ ॥ चापैश्च विशिखैश्छिन्नैः शक्त्यृष्टिप्रास-कम्पनैः । विविधैश्चायुधैश्चान्यैः संवृता भूरशोभत ॥ २७ ॥ वाजि-भिश्चापि निर्जीवैः श्वसद्भिः शोणितोक्षितैः । सारोहैर्विषमा भूमिः सौभद्रेण निपातितैः ॥ २८ ॥ साङ्कुशैः समहामात्रैः सु-चर्मायुधकेतुभिः । पर्वतैरिव विध्वस्तैर्विशिखोन्मथितैर्गजैः ॥२९॥ पृथिव्यामनुकीर्णैश्च साश्वसारथियोधिभिः । ह्रदैरिव प्रक्षुभितै-र्हतनागैरथोत्तमैः ॥ ३० ॥ पदातिसङ्घैश्च हतैर्विविधायुधभूषणैः । भीरूणां त्रासजननी घोररूपाभवन्मही ॥ ३१ ॥ तं दृष्ट्वा पतितं भूमौ चन्द्रार्कसदृशद्युतिम् । तावकानां परा प्रीतिः पाण्डूनाञ्चा-भवद्व्यथा ॥ ३२ ॥ अभिमन्यौ हते राजन् शिशुकेऽप्राप्तयौवने । सम्प्राद्रवच्चमूः सर्वा धर्मराजस्य पश्यतः ॥ ३३ ॥ दीर्य्यमानं बलं दृष्ट्वा सौभद्रे विनिपातिते । अजातशत्रुस्तान् वीरानिदं बचनमब्रवीत् ॥ ३४ ॥ स्वर्गमेष गतः शूरो यो हतो न परा-

न्मुखः । संस्तम्भयत माभैष्ट विजेष्यामो वयं रिपून्॥ ३५ ॥
इत्येवं स महातेजा दुःखितेभ्यो महाद्युतिः । धर्मराजो युधां
श्रेष्ठो ब्रुवन् दुःखमपानुदत् ॥ ३६ ॥ युद्धे ह्याशीविषाकारान्
राजपुत्रान् रणे रिपून् । पूर्वं निहत्य सङ्ग्रामे पश्चादार्जुनिरन्व-
यात् ॥ ३७ ॥ हत्वा दशसहस्राणि कौशल्यञ्च महारथम् ।
कृष्णार्जुनसमः कार्ष्णिः शक्रसद्मगतो ध्रुवम् ॥ ३८ ॥ रथाश्वनर-
मातङ्गान् विनिहत्य सहस्रशः । अवितृप्तः ससङ्ग्रामादशोच्यः पुण्य-
कर्मकृत् । गतः पुण्यकृताल्लोकान् भास्वरान् पुण्यनिर्ज्जितान् ॥३९॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युवधे
एकोनपञ्चाशोऽध्यायः ॥ ५१ ॥

---

सञ्जय उवाच । वयन्तु प्रवरं हत्वा तेषां तैः शरपीड़िताः ।
निवेशायाभ्युपायामः सायाह्ने रुधिरोक्षिताः ॥ १ ॥ निरीक्ष्य-
माणास्तु वयं परे चायोधनं शनैः । अपायाता महाराज ग्लानिं
प्राप्ता विचेतसः ॥ २ ॥ ततो निशाया दिवसस्य चाशिवः शिवा-
रुतैः सन्धिरवर्त्तताद्भुतः । कुशेशयापीड़निभे दिवाकरे विलम्ब-
मानेऽस्तमुपेत्य पर्वतम् ॥ ३ ॥ वरासिशक्त्यृष्टिवरूथचर्मणां विभू-
षणानाञ्च समाक्षिपन् प्रभाः । दिवञ्च भूमिञ्च समानयन्निव प्रियां
तनुं भानुरुपैति पावकं ॥ ४ ॥ महाभ्रकूटाचलशृङ्गसन्निभैर्द्विपैः
रनेकैरिव वज्रपातितैः । सवैजयन्त्यङ्कुशवर्मयन्तृभिर्निपातितै-
र्नष्टगतिश्चिता क्षितिः ॥ ५ ॥ हतेश्वरैश्चूर्णितयन्त्रुपस्करैर्हताश्व-
सूतैर्विपताककेतुभिः । महारथैर्भूः शुशुभे विचूर्णितैः शरै-
रिवामित्रहतैर्नराधिप ॥ ६ ॥ तथाश्ववृन्दैः सहसादिभिर्हतैः
प्रविद्धभाण्डास्तरणैः पृथग्विधैः । निरस्तजिह्वादशनान्त्रलोचनै-
र्धरा बभौ घोरविरूपदर्शना ॥ ७ ॥ प्रविद्धचर्माभरणाम्बरायुधा

विपन्नहस्त्यश्वरथानुगा नराः। महार्हशय्यास्तरणोचितास्तदा
ह्युचितावनाथा इव शेरते हताः॥ ८॥ अतीव हृष्टाः श्वशृगाल-
वायसा वकाः सुपर्णाः सवृकास्तरक्षवः। वयांस्यसृक्पान्यथ
रक्षसां गणाः पिशाचसङ्घाश्च सुदारुणा रणे॥ ९॥ त्वचो विनि-
र्भिद्य पिवन् वशामसृक् तथैव मज्जाः पिशितानि चाप्नुवन्।
वपां विलुम्पन्ति हसन्ति राक्षसाः प्रकर्षमाणाः कुणपान्यनेकशः
॥ १०॥ शरीरसङ्घातवहा ह्यसृग्जला रथोडुपाः कुञ्जरशैल-
सङ्कटा। मनुष्यशीर्षोत्पलमांसकर्द्दमा प्रविद्धनानाविधशस्त्रमालिनी
॥ ११॥ भयावहा वैतरणीव दुस्तरा प्रवर्त्तिता योधवरैस्तदा
नदी। उवाह मध्येन रणाजिरं भृशं भयावहा जीवमृतप्रवा-
हिनी॥ १२॥ पिबन्ति चाश्नन्ति च यत्र दुर्दृशाः पिशाचसङ्घाश्च
नदन्ति भैरवाः। सुनन्दिताः प्राणभृतां भयङ्कराः समानभक्षाः
श्वशृगालपक्षिणः॥ १३॥ तथा तदायोधनमुग्रदर्शनं निशा-
मुखे पितृपतिराष्ट्रवर्द्धनम्। निरीक्षमाणाः शनकैर्जहुर्नराः समु-
त्थितोन्नृत्यकबन्धसङ्कुलम्॥ १४॥ अपेतविद्धस्तमहार्हभूषणं
निपातितं शक्रसमं महारथम्। रणेऽभिमन्युं ददृशुस्तदा जना
व्यपेतहव्यं सदसीव पावकम्॥ १५॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि समरभूमिवर्णने
पञ्चाशोऽध्यायः॥ ५०॥

---

सञ्जय उवाच। तस्मिंस्तु निहते वीरे सौभद्रे रथयूथपे।
विमुक्तरथसन्नाहाः सर्वे निक्षिप्तकार्मुकाः॥ १॥ उपोपविष्टा
राजानं परिवार्य्य युधिष्ठिरम्। तदेव दुःखं ध्यायन्तः सौभद्र-
गतमानसाः॥ २॥ ततो युधिष्ठिरो राजा विललाप सुदुः-
खितः। अभिमन्यौ हते वीरे भ्रातृपुत्रे महारथे॥ ३॥

द्रोणानीकमसम्बाधं मम प्रियचिकीर्षया। भित्त्वा व्यूहं प्रविष्टो-
ऽसौ गोमध्यमिव केशरी॥ ४॥ यस्य शूरा महेष्वासाः प्रत्य-
नीकगता रणे। प्रभग्ना विनिवर्त्तन्ते कृतास्त्रा युद्धदुर्मदाः॥ ५॥
अत्यन्तशत्रुरस्माकं येन दुःशासनः शरैः। क्षिप्रं ह्यभिमुखः सङ्ख्ये
विसंज्ञो विमुखीकृतः॥ ६॥ स तीर्त्वा दुस्तरं वीरो द्रोणानीक-
महार्णवम्। प्राप्य दौःशासनिं कार्ष्णिर्यातो वैवस्वतक्षयम्॥७॥
कथं द्रक्ष्यामि कौन्तेयं सौभद्रे निहतेऽर्ज्जुनम्। सुभद्रां वा महा-
भागां प्रियं पुत्रमपश्यतीम्॥ ८॥ किंस्विद्वयमपेतार्थमश्लिष्टमसम-
ञ्जसम्। तावुभौ प्रतिवक्ष्यामो हृषीकेशधनञ्जयौ॥ ९॥ अह-
मेव सुभद्रायाः केशवार्ज्जुनयोरपि। प्रियकामो जयाकाङ्क्षी कृत-
वानिदमप्रियम्॥ १०॥ न लुब्धो बुध्यते दोषान्मोहाल्लोभः प्रव-
र्त्तते। मधुलिप्सुर्हि नापश्यं प्रपातमहमीदृशम्॥ ११॥ योहि
भोज्ये पुरस्कार्य्यो यानेषु शयनेषु च। भूषणेषु च सोऽस्माभि-
र्बालो युधि पुरस्कृतः॥ १२॥ कथं हि बालस्तरुणो युद्धानाम-
विशारदः। सदश्व इव सम्बाधे विषमे क्षेममर्हति॥ १३॥
अहोऽद्य वयमप्येनं महीमनुशयीमहि। बीभत्सोः कोपदीप्तस्य
दग्धाः कृपणचक्षुषा॥ १४॥ अलुब्धो मतिमान् ह्रीमान् क्षमा-
वान् रूपवान् बली। वपुष्मान्मानकृद्वीरः प्रियः सत्यपरायणः॥१५॥
यस्य श्लाघन्ति विबुधाः कर्माण्यूर्ज्जितकर्मणः। निवातकवचान्
जघ्ने कालकेयांश्च वीर्य्यवान्॥ १६॥ महेन्द्रशत्रवो येन हिरण्य-
पुरवासिनः। अक्ष्णोर्निमेषमात्रेण पौलोमाः सगणा हताः॥१७॥
परेभ्योऽप्यभयार्थिभ्यो यो ददात्यभयं विभुः। तस्यास्माभिर्न
शकितस्त्रातुमद्यात्मजो भयात्॥ १८॥ भयन्तु सुमहत् प्राप्तं धार्त्त-
राष्ट्रान्महाबलात्। पार्थः पुत्रवधात् क्रुद्धः कौरवान् शोषयिष्यति
॥ १९॥ क्षुद्रः क्षुद्रसहायश्च स्वपक्षक्षयकारकः। व्यक्तं दुर्य्यो-
धनो दृष्ट्वा शोचन् हास्यति जीवितम्॥ २०॥ न मे जयः प्रीति-

कर्त्तो न राज्यं न चामरत्वं न सुरैः सलोकता। इमं समीक्ष्याप्रतिवीर्य्यपौरुषं निपातितं देववराम्बुजाम्बुजम्॥ २१॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि युधिष्ठिरविलापे एकपञ्चाशोऽध्यायः॥ ५१॥

---

सञ्जय उवाच। अथैनं विलपन्तं तं कुन्तीपुत्रं युधिष्ठिरम्। कृष्णद्वैपायनस्तत्र आजगाम महानृषिः॥ १॥ तमर्च्चित्वा यथान्यायमुपविष्टो युधिष्ठिरः। अब्रवीच्छोकसन्तप्तो भ्रातुः पुत्रवधेन सः॥ २॥ अधर्म्मयुक्तैर्बहुभिः परिवार्य्य महारथैः। युध्यमानो महेष्वासैः सौभद्रो निहतो रणे॥ ३॥ बालश्चाबालबुद्धिश्च सौभद्रः परवीरहा। अनुपायेन सङ्ग्रामे युध्यमानो विशेषतः॥ ४॥ मयाप्युक्तः स सङ्ग्रामे द्वारं सञ्जनयस्व नः। प्रविष्टेऽभ्यन्तरे तस्मिन् सैन्धवेन निवारिताः॥ ५॥ ननु नाम समं युद्धमेष्टव्यं युद्धजीविभिः। इदन्त्वैवासमं युद्धमीदृशं यत् कृतं परैः॥ ६॥ तेनास्मि भृशसन्तप्तः शोकबाष्पसमाकुलः। शमं नैवाधिगच्छामि चिन्तयानः पुनः पुनः॥ ७॥

सञ्जय उवाच। तं तथा विलपन्तं वै शोकवेगसमाकुलम्। उवाच भगवान् व्यासो युधिष्ठिरमिदं वचः॥ ८॥

व्यास उवाच। युधिष्ठिर महाप्राज्ञ सर्व्वशास्त्रविशारद। व्यसनेषु न मुह्यन्ति त्वादृशा भरतर्षभ॥ ९॥ स्वर्गमेष गतः शूरः शत्रून् हत्वा बहून् रणे। अबालसदृशं कर्म्म कृत्वा वै पुरुषोत्तमः॥ १०॥ अनतिक्रमणीयो वै विधिरेष युधिष्ठिर। देवदानवगन्धर्व्वान् मृत्युर्हरति भारत॥ ११॥

युधिष्ठिर उवाच। इमे वै पृथिवीपालाः शेरते पृथिवीतले।

निहताः पृतनामध्ये मृतसंज्ञा महाबलाः ॥ १२ ॥ नागायुतबला-श्चान्ये वायुवेगबलास्तथा । तत्र ते निहताः सङ्ख्ये तुल्यरूपा नरैर्नराः ॥ १३ ॥ नैषां पश्यामि हन्तारं प्राणिनां संयुगे क्वचित् । विक्रमेणोपपन्ना हि तेजोबलसमन्विताः ॥ १४ ॥ जेतव्यमिति चान्योऽन्यं नित्यं येषां हृदि स्थितम् । अथ चेमे हताः प्राज्ञाः शेरते विगतायुषः ॥ १५ ॥ मृता इति च शब्दोऽयं वर्त्तते च ततोऽर्थवत् इमे मृता महीपालाः प्रायशो भीमविक्रमाः ॥ १६ ॥ निश्चेष्टा निरभीमानाः शूराः शत्रुवशङ्गताः । राजपुत्राश्च संरब्धा वैश्वानरमुखङ्गताः ॥ १७ ॥ अत्र मे संशयः प्राप्तः कुतः संज्ञा मृता इति । कस्य मृत्युः कुतो मृत्युः कथं संहरते प्रजाः । हर-त्यमरसङ्काश तन्मे ब्रूहि पितामह ॥ १८ ॥

सञ्जय उवाच । तन्तथा परिपृच्छन्तं कुन्तीपुत्रं युधिष्ठिरम् । आश्वासनमिदं वाक्यमुवाच भगवानृषिः ॥ १९ ॥

व्यास उवाच । अत्राप्युदाहरन्तीममितिहासं पुरातनम् । अकम्पनस्य कथितं नारदेन पुरा नृप ॥ २० ॥ स चापि राजा राजेन्द्र पुत्रव्यसनमुत्तमम् । अप्रसह्यतमं लोके प्राप्तवानिति मे मतिः ॥ २१ ॥ तदहं संप्रवक्ष्यामि मृत्योः प्रभवमुत्तमम् । ततस्त्वं मोक्ष्यसे दुःखात्स्नेहबन्धनसंश्रयात् ॥ २२ ॥ पुरावृत्तमिदं तात शृणु कीर्त्तयतो मम । धन्यमाख्यानमायुष्यं शोकघ्नं पुष्टिवर्द्धनम् । ॥ २३ ॥ पवित्रमरिसङ्घघ्नं मङ्गलानाञ्च मङ्गलम् । यथैव वेदा-ध्ययनमुपाख्यानमिदन्तथा ॥ २४ ॥ श्रवणीयं महाराज प्रात-र्नित्यं द्विजोत्तमैः । पुत्रानायुष्मतो राज्यमीहमानैः श्रियन्तथा ॥ २५ ॥ पुरा कृतयुगे तात ह्यासीद्राजा ह्यकम्पनः । स शत्रु-वशमापन्नो मध्ये सङ्ग्राममूर्द्धनि ॥ २६ ॥ तस्य पुत्रो हरिर्नाम नारायणसमो बले । श्रीमान् कृतास्त्रो मेधावी युधि शक्रोपमो बली ॥ २७ ॥ स शत्रुभिः परिवृतो बहुधा रणमूर्द्धनि । व्यस्यन्

बाणसहस्राणि योधेषु च गजेषु च ॥ २८ ॥ स कर्म दुष्करं कृत्वा सङ्ग्रामे शत्रुतापनः । शत्रुभिर्निहतः सङ्ख्ये पृतनायां युधिष्ठिर ॥ २९ ॥ स राजा प्रेतकर्माणि तस्य कृत्वा शुचान्वितः । शोचन्नहनि रात्रौ च नालभत्सुखमात्मनः ॥ ३० ॥ तस्य शोकं विदित्वा तु पुत्रव्यसनसम्भवम् । अथाजगाम देवर्षिर्नारदोऽस्य समीपतः ॥ ३१ ॥ स तु राजा महाभागो दृष्ट्वा देवर्षिमागतम् । पूजयित्वा यथान्यायं कथामकथयत्तदा ॥ ३२ ॥ सर्वं तस्य समाचष्ट यथावृत्तं नरेश्वरः । शत्रुभिर्विजयं सङ्ख्ये पुत्रस्य च वधन्तथा ॥ ३३ ॥ मम पुत्रो महावीर्य्य इन्द्रविष्णुसमद्युतिः । शत्रुभिर्बहुभिः सङ्ख्ये पराक्रम्य हतो बली ॥ ३४ ॥ क एष मृत्युर्भगवन् किम्वीर्य्यबलपौरुषः । एतदिच्छामि तत्त्वेन श्रोतुं मतिमताम्बर ॥ ३५ ॥ तस्य तद्वचनं श्रुत्वा नारदो वरदः प्रभुः । आख्यानमिदमाचष्ट पुत्रशोकापहं महत् ॥ ३६ ॥

नारद उवाच । शृणु राजन्महाबाहो व्याख्यानं बहुविस्तरम् । यथा वृत्तं श्रुतं चैव मयापि वसुधाधिप ॥ ३७ ॥ प्रजाः सृष्ट्वा तदा ब्रह्मा ह्यादिसर्गे पितामहः । असंहृतं महातेजा दृष्ट्वा जगदिदं पुनः ॥ ३८ ॥ तस्य चिन्ता समुत्पन्ना संहारं प्रति पार्थिव । चिन्तयन्न ह्यसौ वेद संहारं वसुधाधिप ॥ ३९ ॥ तस्य रोषान्महाराज खेभ्योऽग्निरुदतिष्ठत । तेन सर्वा दिशो व्याप्ताः सान्तर्देशान् दिधक्षत ॥ ४० ॥ ततो दिवं भुवं खञ्च ज्वालामालासमाकुलम् । चराचरं जगत् सर्वं ददाह भगवान् प्रभुः ॥ ४१ ॥ ततो हतानि भूतानि चराणि स्थावराणि च । महता क्रोधवेगेन त्रासयन्निव वीर्य्यवान् ॥ ४२ ॥ ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः । जगाम शरणं देवं ब्रह्माणं परमेष्ठिनम् ॥ ४३ ॥ तस्मिन्निपतिते स्थाणौ प्रजानां हितकाम्यया । अब्रवीत् परमो देवो ज्वलन्निव महामुनिः ॥ ४४ ॥

किं कुर्मः कामं कामार्ह कामाज्जातोऽसि पुत्रक। करिष्यामि प्रियं सर्वं ब्रूहि स्थाणो यदिच्छसि ॥ ४५ ॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि शोकापनोदने द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

---

स्थाणुरुवाच। प्रजासर्गनिमित्तं हि कृतो यत्नस्त्वया विभो। त्वया सृष्टाश्च वृद्धाश्च भूतग्रामाः पृथग्विधाः ॥ १ ॥ तास्तवेह पुनः क्रोधात् प्रजा दह्यन्ति सर्वशः। ता दृष्ट्वा मम कारुण्यं प्रसीद भगवन् प्रभो ॥ २ ॥

ब्रह्मोवाच। संहर्त्तुं न च कामो मे एतदेवं भवेदिति। पृथिव्या हितकामं तु ततो मां मन्युराविशत् ॥ ३ ॥ इयं हि मां सदा देवी भारार्त्ता समचूचुदत्। संहारार्थं महादेव भारेणाभिहता सती ॥ ४ ॥ ततोऽहं नाधिगच्छामि तथा बहुविधन्तदा। संहारमप्रमेयस्य ततो मां मन्युराविशत् ॥ ५ ॥

रुद्र उवाच। संहारार्थं प्रसीदस्व मा रुषो वसुधाधिप। मा प्रजाः स्थावराश्चैव जङ्गमाश्च व्यनीनशः ॥ ६ ॥ तव प्रसादाद्भगवन्निदं वर्त्तेत्त्रिधा जगत्। अनागतमतीतञ्च यच्च सम्प्रति वर्त्तते ॥ ७ ॥ भगवान् क्रोधसन्दीप्तः क्रोधादग्निमिवासृजत्। सदहत्यश्मकूटानि द्रुमांश्च सरितस्तथा ॥ ८ ॥ पल्वलानि च सर्वाणि सर्वं चैव तृणालयाः। स्थावरं जङ्गमञ्चैव निःशेषं कुरुते जगत् ॥ ९ ॥ तदेतद्भस्मसाद्भूतं जगत् स्थावरजङ्गमम्। प्रसीद भगवन् सर्वं रोषो न स्याद्वरो मम ॥ १० ॥ सर्वे हि नष्टा नश्यन्ति तव देव कथञ्चन। तस्मान्निवर्त्ततां तेजस्त्वय्येवेह प्रलीयताम् ॥ ११ ॥ तत् पश्य देव सुभृशं प्रजानां हितकाम्यया। यथेमे प्राणिनः सर्वे निवर्त्तेरंस्तथा कुरु ॥ १२ ॥ अभावं नेह गच्छेयुरुच्छन्न-

जननाः प्रजाः। अधिदैवे नियुक्तोऽस्मि त्वया लोकेषु लोककृत् ॥ १३ ॥ मा विनश्येज्जगन्नाथ जगत् स्थावरजङ्गमम्। प्रसादाभिमुखं देवं तस्माद्देवं ब्रवीम्यहम् ॥ १४ ॥

नारद उवाच। श्रुत्वा हि वचनन्देवः प्रजानां हितकाम्यया। तेजः सन्धारयामास पुनरेवान्तरात्मनि ॥ १५ ॥ ततोऽग्निमुपसंहृत्य भगवाँल्लोकसत्कृतः। प्रवृत्तञ्च निवृत्तञ्च कथयामास स प्रभुः ॥ १६ ॥ उपसंहरतस्तस्य तमग्निं रोषजं तदा। प्रादुर्बभूव विश्वेभ्यो गोभ्यो नारी महात्मनः ॥ १७ ॥ कृष्णा रक्ता तथा पिङ्गा रक्तजिह्वास्यलोचना। कुण्डलाभ्यां च राजेन्द्र तप्ताभ्यां तप्तभूषणा ॥ १८ ॥ सा निःसृत्य तथा खेभ्यो दक्षिणां दिशमाश्रिता। स्मयमाना च सावेक्ष्य देवौ विश्वेश्वरावुभौ ॥ १९ ॥ तामाहूय तदा देवो लोकादिनिधनेश्वरः। मृत्यो इति महीपाल जहि चेमाः प्रजा इति ॥ २० ॥ त्वं हि संहारबुद्ध्याथ प्रादुर्भूता रुषो मम। तस्मात्संहर सर्वांस्त्वं प्रजाः सजडपण्डिताः ॥ २१ ॥ मम त्वं हि नियोगेन ततः श्रेयो ह्यवाप्स्यसि। एवमुक्ता तु सा तेन मृत्युः कमललोचना ॥ २२ ॥ दध्यौ चात्यर्थमबला प्ररुरोद च सुस्वरम्। पाणिभ्यां प्रतिजग्राह तान्यश्रूणि पितामहः। सर्वभूतहितार्थाय तां चाप्यनुनयंस्तदा ॥ २३ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि मृत्यूत्पत्तिकथने त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

---

नारद उवाच। विनीय दुःखमबला आत्मन्येव प्रजापतिम्। उवाच प्राञ्जलिर्भूत्वा लतेवावर्जिता पुनः ॥ १ ॥

मृत्युरुवाच। त्वया सृष्टा कथं नारी ईदृशी वदताम्वर। क्रूरं कर्माहितं कुर्य्यां तदेव किमु जानती ॥ २ ॥ बिभेम्यहमध-

नीद्धि प्रसीद भगवन् प्रभो। प्रियान् पुत्रान् वयस्यांश्च भ्रातॄन्
पितॄन् पतींस्तथा ॥ ३ ॥ अपध्यास्यन्ति मे देव मृतेभ्येभ्यो विभे-
म्यहम्। कृपणानां विरुदतां ये पतन्त्यश्रुविन्दवः ॥ ४ ॥ तेभ्यो-
ऽहं भगवन् भीता शरणं त्वाहमागता। यमस्य भवनन्देव न
गच्छेयं सुरोत्तम ॥ ५ ॥ प्रसादये त्वां वरद मूर्द्धोंदग्रनखेन च।
एतदिच्छाम्यहं कामं त्वत्तो लोकपितामह ॥ ६ ॥ इच्छेयं त्वत्-
प्रसादाहं तपस्तप्तुं प्रजेश्वर। प्रदिशेमम्वरं देव त्वं मह्यं भगवन्
प्रभो ॥ ७ ॥ त्वया ह्युक्ता गमिष्यामि धेनुकाश्रमसुत्तमम्। तत्र
तप्स्ये तपस्तीव्रं तवैवाराधने रता ॥ ८ ॥ न हि शक्यामि देवेश
प्राणान् प्राणभृतां प्रियान्। हन्तुं विलपमानानामधर्मोत्त्वभि-
रक्ष माम् ॥ ९ ॥

ब्रह्मोवाच। मृत्यो सङ्कल्पितासि त्वं प्रजासंहारहेतुना।
गच्छ संहर सर्वांस्त्वं प्रजा मा ते विचारणा ॥ १० ॥ भविता
त्वेतदेवं हि नैतज्जात्वन्यथा भवेत्। भवत्वनिन्दिता लोके कुरुष्व
वचनं मम ॥ ११ ॥

नारद उवाच। एवमुक्ताभवत् प्रीता प्राञ्जलिर्भगवन्मुखी।
संहारे नाकरोद्बुद्धिं प्रजानां हितकाम्यया ॥ १२ ॥ तूष्णीमासी-
त्तदा देवः प्रजानामीश्वरेश्वरः। प्रसादञ्चागमत् क्षिप्रमात्मनैव
पितामहः ॥ १३ ॥ स्मयमानश्च लोकेशो लोकान् सर्वानवेक्ष्य च।
लोकाश्चासन् यथा पूर्वं दृष्टास्ते नापमृत्युना ॥ १४ ॥ निवृत्तरोषे
तस्मिंस्तु भगवत्यपराजिते। सा कन्यापजगामाथ समीपात्तस्य
धीमतः ॥ १५ ॥ अपसृत्याप्रतिश्रुत्य प्रजासंहरणं तदा। त्वर-
माणा च राजेन्द्र मृत्युर्द्धेनुकमभ्यगात् ॥ १६ ॥ सा तत्र परमं
तीव्रं चचार व्रतमुत्तमम्। सा तदा ह्येकपादेन तस्थौ पद्मानि
षोड़श ॥ १७ ॥ पञ्च चाब्दानि कारुण्यात् प्रजानाञ्च हितैषिणी।
इन्द्रियाणीन्द्रियार्थेभ्यः प्रजाः प्य सन्निवर्त्य सा ॥ १८ ॥ तत-

स्वेकेन पादेन पुण्यारण्यानि सप्त वै । तस्थौ पद्मानि षट् चैव सप्त चैकञ्च पार्थिव ॥ १९ ॥ ततः पद्मायुतञ्चैव मृगैः सह चचार सा । पुनर्गत्वा ततो नन्दां पुण्यां शीतामलोदकाम् ॥ २० ॥ अप्सु वर्षसहस्राणि सप्त चैकञ्च सानयत् । धारयित्वा तु नियमं नन्दायां वीतकल्मषा ॥ २१ ॥ सा पूर्वं कौशिकीं पुण्यां जगाम नियमे स्थिता । तत्र वायुजलाहारा चचार नियमं पुनः ॥ २२ ॥ पञ्चगङ्गेषु सा पुण्या कन्या वेतसकेषु च । तपो विशेषैर्बहुभिः कर्षयद्देहमात्मनः ॥ २३ ॥ ततो गत्वाथ गङ्गां सा महामेरुञ्च केवलम् । तस्थौ चाश्मेव निश्चेष्टा प्राणायामपरायणा ॥ २४ ॥ पुनर्हिमवतो मूर्द्ध्नि यत्र देवाः पुरायजन् । तत्राङ्गुष्ठेन सा तस्थौ निखर्वं परमा शुभा ॥ २५ ॥ पुष्करेष्वथ गोकर्णे नैमिषे मलये तथा । अपाकर्षत् स्वकं देहं नियमैर्मनसः प्रियैः ॥ २६ ॥ अनन्यदेवता नित्यं दृढ़भक्त्या पितामहे । तस्थौ पितामहञ्चैव तोषयामास सर्वतः ॥ २७ ॥ ततस्तामब्रवीत् प्रीतो लोकानां प्रभवोऽव्ययः । सौम्येन मनसा राजन् प्रीतः प्रीतमनास्तदा ॥२८॥ मृत्यो किमिदमत्यर्थं तपांसि चरसीति ह । ततोऽब्रवीत् पुनर्मृत्युर्भगवन्तं पितामहम् ॥ २९ ॥ नाहं हन्यां प्रजा देव स्वस्थाश्चाक्रोशतीस्तदा । एतदिच्छामि सर्वेश त्वत्तो वरमहं प्रभो ॥३०॥ अधर्मभयभीतास्मि ततोऽहं तप आस्थिता । भीतायास्तु महाभाग प्रयच्छाभयमव्ययम् ॥ ३१ ॥ आर्त्ता चानागसी नारी याचामि भव मे गतिः । तामब्रवीत्ततो देवो भूतभव्यभविष्यवित् ॥ ३२ ॥ अधर्मो नास्ति ते मृत्यो संहरन्त्या इमाः प्रजाः । मया चोक्तं मृषा भद्रे भविता न कथञ्चन ॥ ३३ ॥ तस्मात् संहर कल्याणि प्रजाः सर्वाश्चतुर्विधाः । धर्मः सनातनश्च त्वां सर्वथा पावयिष्यति ॥ ३४ ॥ लोकपालो यमश्चैव सहाया व्याधयश्च ते । अहञ्च विबुधाश्चैव पुनर्दास्यामि ते वरम् ॥ ३५ ॥ यथा

त्वमेनसा युक्ता विरजा ख्यातिमेष्यसि। सैवमुक्ता महाराज कृताञ्जलिरिदं विभुम् ॥ ३६ ॥ पुनरेवाब्रवीद्वाक्यं प्रसाद्य शिरसा तदा। यद्येवमेतत् कर्त्तव्यं मया नस्याद्विना विभो ॥ ३७ ॥ तवाज्ञा मूर्द्ध्नि मे न्यस्ता यत्तु वक्ष्यामि तच्छृणु। लोभः क्रोधोऽभ्यसूयेर्ष्या द्रोहो मोहश्च देहिनाम्। अह्रीश्चान्योऽन्यपरुषा देहं भिन्द्युः पृथग्विधाः ॥ ३८ ॥

ब्रह्मोवाच। तथा भविष्यते मृत्यो साधु संहर वै प्रजाः। अधर्मस्ते न भविता नापध्यास्याम्यहं शुभे ॥ ३९ ॥ यान्यश्रुबिन्दूनि करे ममासते ते व्याधयः प्राणिनामात्मजाताः। ते मारयिष्यन्ति नरान् गतासून्नाधर्मस्ते भविता मास्मभैषीः ॥ ४० ॥ नाधर्मस्ते भविता प्राणिनां वै त्वं वै धर्मस्त्वं हि धर्मस्य चेशा। धर्म्या भूत्वा धर्मनित्या धरित्री तस्मात् प्राणान् सर्वथेमान्नियच्छ ॥ ४१ ॥ सर्वेषां वै प्राणिनां कामरोषौ सन्त्यज्य त्वं संहरस्वेह जीवम्। एवं धर्मस्त्वां भजिष्यत्यनन्तो मिथ्यावृत्तान् मारयिष्यत्यधर्मः ॥ ४२ ॥ तेनात्मानं पावयस्वात्मना त्वं पापेनात्मानं मज्जयिष्यत्यसन्तम्। तस्मात् कामं रोषमप्यागतं त्वं सन्त्यज्यातः संहरस्वेति जीवान् ॥ ४३ ॥

नारद उवाच। सा वै भीता मृत्युसंज्ञोपदेशाच्छापाद्भीता बाढ़मित्यब्रवीत्तम्। सा च प्राणं प्राणिनामन्तकाले कामक्रोधौ त्यज्य हरत्यसक्ता ॥ ४४ ॥ मृत्युस्तेषां व्याधयस्तत् प्रसूता व्याधी रोगो रुज्यते येन जन्तुः। सर्वेषां वै प्राणिनां प्रायणान्ते तस्माच्छोकं मा कृथा निष्फलं त्वम् ॥ ४५ ॥ सर्वे देवाः प्राणिभिः प्रायणान्ते गत्वा वृत्ताः सन्निवृत्तास्तथैव। एवं सर्वे प्राणिनस्तत्र गत्वा वृत्ता देवा मर्त्तवद्राजसिंह ॥ ४६ ॥ वायुर्भीमो भीमनादो महौजा भेत्ता देहान् प्राणिनां सर्वगोऽसौ। नोवा वृत्तिं नैव वृत्तं कदाचित् प्राप्नोत्युग्रोऽनन्ततेजो विशिष्टः ॥ ४७ ॥ सर्वे देवा-

मत्तास्संज्ञाविशिष्टास्तस्मात् पुत्रं माशुचो राजसिंह। स्वर्गं प्राप्तो मोदते त्वत्तनूजो नित्यं रम्यान् वीरलोकानवाप्य ॥ ४८ ॥ त्यक्त्वा दुःखं सङ्गतः पुण्यकृद्भिरेषा मृत्युर्दैवदिष्टा प्रजानाम्। प्राप्ते काले संहरन्ती यथावत् स्वयं कृता प्राणहरा प्रजानाम् ॥ ४९ ॥ आत्मानं वै प्राणिनो घ्नन्ति सर्वे नैनं मृत्युर्दण्डपाणिर्हिनस्ति। तस्मान्मृतान्नानुशोचन्ति धीराः सत्यं ज्ञात्वा निश्चयं ब्रह्म-सृष्टम्। इत्थं सृष्टिं दैवक्लृप्तां विदित्वा पुत्रान्नष्टाच्छोकमाशु त्यजस्व ॥ ५० ॥

व्यास उवाच। एतच्छ्रुत्वार्थवद्वाक्यं नारदेन प्रकाशितम्। उवाचाकम्पनो राजा सखायं नारदन्तथा ॥ ५१ ॥ व्यपेतशोकः प्रीतोऽस्मि भगवन्नृषिसत्तम। श्रुत्वेतिहासं त्वत्तस्तु कृतार्थो-ऽस्म्यभिवादये ॥ ५२ ॥ तथोक्तो नारदस्तेन राज्ञा ऋषिवरो-त्तमः। जगाम नन्दनं शीघ्रं देवर्षिरमितात्मवान् ॥ ५३ ॥ पुण्यं यशस्यं स्वर्ग्यञ्च धन्यमायुष्यमेव च। अस्येतिहासस्य सदा श्रवणं श्रावणं तथा ॥ ५४ ॥ एतदर्थपदं श्रुत्वा तदा राजा युधिष्ठिरः। क्षत्रधर्मं च विज्ञाय शूराणां च पराङ्गतिम् ॥ ५५ ॥ सम्प्राप्तोऽसौ महावीर्य्यः स्वर्गलोकं महारथः। अभिमन्युः परान् हत्वा प्रमुखे सर्वधन्विनाम् ॥ ५६ ॥ युध्यमानो महेष्वासो हतः सोऽभिमुखो रणे। असिना गदया शक्त्या धनुषा च महारथः ॥ ५७ ॥ विरजाः सोमसूनुः स पुनस्तत्र प्रलीयते। तस्मात् परां धृतिं कृत्वा भ्रातृभिः सह पाण्डवः। अप्रमत्तः सुसंक्रुद्धः शीघ्रं योद्धु-मुपाक्रमत् ॥ ५८ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि मृत्युप्रजापतिसंवादे चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

---

सञ्जय उवाच । श्रुत्वा मृत्युसमुत्पत्तिं कर्माण्यनुपमानि च । धर्मराजः पुनर्वाक्यं प्रसाद्यैनमथाब्रवीत् ॥ १ ॥

युधिष्ठिर उवाच । गुरवः पुण्यकर्माणः शक्रप्रतिमविक्रमाः । स्थाने राजर्षयो ब्रह्मन्ननघाः सत्यवादिनः ॥ २ ॥ भूय एव तु मां तथ्यैर्वचोभिरभिबृंहय । राजर्षीणां पुराणानां समाश्वासय कर्मभिः ॥ ३ ॥ कियन्त्यो दक्षिणा दत्ताः कैश्च दत्ता महात्मभिः । राजर्षिभिः पुण्यकृद्भिस्तद्भवान् प्रब्रवीतु मे ॥ ४ ॥

व्यास उवाच । श्वित्यस्य नृपतेः पुत्रः सृञ्जयो नाम नामतः । सखायौ तस्य चैवोभौ ऋषी पर्वतनारदौ ॥ ५ ॥ तौ कदाचिद्गृहं तस्य प्रविष्टौ तद्दिदृक्षया । विधिवच्चार्च्चितौ तेन प्रीतौ तत्रोषतुः सुखम् ॥ ६ ॥ तङ्कदाचित् सुखासीनं ताभ्यां सह शुचिस्मिता । दुहिताभ्यागमत् कन्या सृञ्जयस्य वरवर्णिनी ॥ ७ ॥ तथाभिवादितः कन्यामभ्यनन्दद्यथाविधि । तत्सलिङ्गाभिराशीर्भिरिष्टाभिरभितः स्थिताम् ॥८॥ तान्निरीक्ष्याब्रवीद्वाक्यं पर्वतः प्रहसन्निव । कस्येयं चञ्चलापाङ्गी सर्वलक्षणसम्मता ॥ ९ ॥ उताहो भाः स्विदर्कस्य ज्वलनस्य शिखा त्वियम् । श्रीर्ह्रीः कीर्त्तिर्धृतिः पुष्टिः सिद्धिश्चन्द्रमसः प्रभाः ॥ १० ॥ एवं ब्रुवाणं देवर्षिं नृपतिः सृञ्जयोऽब्रवीत् । ममेयम्भगवन् कन्या मत्तो वरमभीप्सति ॥११॥ नारदस्त्वब्रवीदेनं देहि मह्यमिमां नृप । भार्य्यार्थं सुमहच्छ्रेयः प्राप्तञ्चेदिच्छसे नृप ॥ १२ ॥ ददानीत्येव संहृष्टः सृञ्जयः प्राह नारदम् । पर्वतस्तु सुसंक्रुद्धो नारदं वाक्यमब्रवीत् ॥ १३ ॥ हृदयेन मया पूर्वं वृतां वै वृतवानसि । यस्माद्वृता त्वया विप्र मागाः स्वर्गं यथेप्सया ॥ १४ ॥ एवमुक्तो नारदस्तं प्रत्युवाचोत्तरं वचः । मनोवाग्बुद्धिसम्भाषा दत्ता चोदकपूर्वकम् ॥ १५ ॥ पाणिग्रहणमन्त्राश्च प्रथितं वरलक्षणम् । नन्वेषां निश्चितां निष्ठा निष्ठा सप्तपदी स्मृता ॥ १६ ॥ अनुत्पन्ने च कार्य्यार्थे माम्त्वं

व्याहृतवानसि। तस्मात्त्वमपि न स्वर्गं गमिष्यसि मया विना ॥१७॥ अन्योऽन्यमेवं शप्त्वा वै तस्थतुस्तत्र तावृषी। अथ सोऽसि नृपो विप्रान् पानाच्छादनभोजनैः ॥ १८ ॥ पुत्रकामः परं शक्त्या यत्नेनोपाचरच्छुचिः। तस्य प्रसन्ना विप्रेन्द्राः कदाचित् पुत्रमीप्सवः ॥ १९ ॥ तपः स्वाध्यायनिरता वेदवेदाङ्गपारगाः। सहिता नारदं प्राहुर्देह्यस्मै पुत्रमीप्सितम् ॥ २० ॥ तथेत्युक्त्वा द्विजैस्तैः स्वयं नारदोऽब्रवीत्। तुभ्यं प्रसन्ना राजर्षे पुत्रमीप्सन्ति ब्राह्मणाः ॥ २१ ॥ वरं वृणीष्व भद्रं ते यादृशं पुत्रमीप्सितम्। तथोक्तः प्राञ्जली राजा पुत्रं वव्रे गुणान्वितम् ॥२२॥ यशस्विनं कीर्तिमन्तं तेजस्विनमरिन्दमम्। यस्य मूत्रं पुरीषञ्च क्लेदः स्वेदश्च काञ्चनम् ॥ २३ ॥ सुवर्णष्ठीविरित्येवं तस्य नामाभवत् क्षितौ। तस्मिन् वरप्रदानेन वर्द्धयत्यमितन्धनम् ॥ २३ ॥ कारयामास नृपतिः सौवर्णं सर्वमीप्सितम्। गृहप्राकारदुर्गाणि ब्राह्मणावसथान्यपि ॥ २५ ॥ शय्यासनानि यानानि स्थालीपिठरभाजनम्। तस्य राज्ञोऽपि यद्वेश्म बाह्यांश्चोपस्करांश्च ये ॥ २६ ॥ सर्वं तत् काञ्चनमयं कालेन परिवर्द्धितम्। अथ दस्युगणाः श्रुत्वा दृष्ट्वा चैनं तथाविधम् ॥ २७ ॥ सम्भूय तस्य नृपतेः समारब्धाश्चिकीर्षितुम्। केचित्तत्राब्रुवन् राज्ञः पुत्रं गृह्णीम वै स्वयम् ॥ २८ ॥ सोऽस्याकरः काञ्चनस्य तस्य यत्नञ्चरामहे। ततस्ते दस्यवो लुब्धाः प्रविश्य नृपतेर्गृहम् ॥ २९ ॥ राजपुत्रं ततो जह्रुः सुवर्णष्ठीविनं बलात्। गृहीत्वैनमनुपायज्ञा नीत्वारण्यमचेतसः ॥ ३० ॥ हत्वा विशस्य चापश्यन्न लुब्धा वसु किञ्चन। तस्य प्राणैर्विमुक्तस्य नष्टन्तद्वरदं वसु ॥ ३१ ॥ दस्यवश्च तथान्योऽन्यं जघ्नुर्मूर्खा विचेतसः। हत्वा परस्परं नष्टाः कुमारं चाद्भुतं भुवि ॥ ३२ ॥ असम्भाव्यं गता घोरं नरकन्दुष्टकारिणः। तं दृष्ट्वा निहतं पुत्रं वरदत्तं महातपाः ॥ ३३ ॥

विललाप सुदुःखार्त्तो बहुधा करुणं नृपः। विलपन्तं निशम्याथ पुत्रशोकहतं नृपम् ॥ ३४ ॥ प्रत्यदृश्यत देवर्षिर्नारदो नृपसन्निधौ। उवाच चैनं दुःखार्त्तं विलपन्तमचेतसम् ॥ ३५ ॥ सृञ्जयं नारदोऽभ्येत्य तन्निबोध युधिष्ठिर। कामानामवितृप्तस्त्वं सृञ्जयेह मरिष्यसि ॥ ३६ ॥ यस्य चैते वयञ्चेहे उषिता ब्रह्मवादिनः। आविक्षितं मरुत्तञ्च मृतं सृञ्जय शुश्रुम ॥ ३७ ॥ सम्वर्त्तं याजयामास स्पर्द्धया वै वृहस्पतेः। यस्मै राजर्षये प्रादाद्धनं स भगवान् प्रभुः ॥ ३८ ॥ हैमं हिमवतः पादं यियक्षोर्विविधैः सवैः। यस्य सेन्द्रामरगणा वृहस्पतिपुरोगमाः ॥ ३९ ॥ देवा विश्वसृजः सर्व्वे यजनान्ते समासते। यज्ञवाटस्य सौवर्णाः सर्व्वे चासन् परिच्छदाः ॥ ४० ॥ यस्य सर्वं तदा ह्यन्नं मनोऽभिप्रायगं शुचि। कामतो बुभुजुर्विप्राः सर्व्वे चान्नार्थिनो द्विजाः ॥ ४१ ॥ पयोदधिघृतं क्षौद्रभक्ष्यभोज्यञ्च शोभनम्। यस्य यज्ञेषु सर्व्वेषु वासांस्याभरणानि च ॥ ४२ ॥ तृप्सितान्युपतिष्ठन्ते प्रहृष्टान् वेदपारगान्। मरुतः परिवेष्टारो मरुत्तस्याभवन् गृहे ॥ ४३ ॥ आविक्षितस्य राजर्षेर्विश्वे देवाः सभासदः। यस्य वीर्य्यवतो राज्ञः सुवृष्ट्या शस्यसम्पदः ॥ ४४ ॥ हविर्भिस्तर्पिता येन सम्यक् तृप्तैर्दिवौकसः। ऋषीणाञ्च पितॄणाञ्च देवानां सुखजीविनाम् ॥ ४५ ॥ ब्रह्मचर्य्यश्रुतिमुखैः सर्व्वदानैश्च सर्व्वदा। शयनासनयानानि स्वर्णराशीश्च दुस्त्यजा ॥ ४६ ॥ तत् सर्व्वममितं वित्तन्दत्तं विप्रेभ्य इच्छया। सोऽनुध्यातस्तु शक्रेण प्रजाः कृत्वा निरामयाः ॥ ४७ ॥ श्रद्दधानो जितांल्लोकान् गतः पुण्यदुहोऽक्षयान्। सप्रजः सनृपामात्यसदारापत्यवान्धवः ॥ ४८ ॥ यौवनेन सहस्राब्दं मरुत्तो राज्यमन्वशात्। स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ॥ ४९ ॥ पुत्रात् पुण्यतर-

स्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ ५०॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके
पञ्चपञ्चाशोऽध्यायः॥ ५५॥

---

नारद उवाच। सुहोत्रं नाम राजानं मृतं सृञ्जय शुश्रुम। एकवीरमधृष्यन्तममरैरभिवीक्षितम्॥ १॥ यः प्राप्य राज्यं धर्मेण ऋत्विग्ब्रह्मपुरोहितान्। अपृच्छदात्मनः श्रेयः दृष्ट्वा तेषां मते स्थितः॥ २॥ प्रजानां पालनं धर्मो दानमिज्या द्विषज्जयः। एतत् सुहोत्रो विज्ञाय धर्मेणैच्छद्धनागमम्॥ ३॥ धर्मेणाराधयत् देवान् वाणैः शत्रून् जयंस्तथा। सर्वाण्यपि च भूतानि स्वगुणैरप्यरञ्जयत्॥ ४॥ यो भुक्त्वेमां वसुमतीं म्लेच्छाटविकवर्जिताम्। यस्मै ववर्ष पर्जन्यो हिरण्यं परिवत्सरान्॥ ५॥ हैरण्यास्तत्र वाहिन्यः स्वैरिण्योह्यभवन् पुरा। ग्राहान् कर्कटकांश्चैव मत्स्यांश्च विविधान् बहून्॥ ६॥ कामान् वर्षति पर्जन्यो रूपाणि विविधानि च। सौवर्णान्यप्रमेयाणि वाप्यश्च क्रोशसम्मिताः॥ ७॥ सहस्रवामनान् कुब्जान् नक्रान् मकरकच्छपान्। सौवर्णान् विहितान् दृष्ट्वा ततोऽस्मयत वै तदा॥ ८॥ तत् सुवर्णमपर्य्यन्तं राजर्षिः कुरुजाङ्गले। ईजानो वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत॥ ९॥ सोऽश्वमेधसहस्रेण राजसूयशतेन च। पुण्यैः क्षत्रिययज्ञैश्च प्रभूतवरदक्षिणैः॥ १०॥ काम्यनैमित्तिकाजस्रैरिष्टाङ्गतिमवाप्नुयात्। स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया॥ ११॥ पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ १२॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके
षट्पञ्चाशोऽध्यायः॥ ५६॥

नारद उवाच । राजानं पौरवं वीरं मृतं सृञ्जय शुश्रुम । यः सहस्रं सहस्राणां श्वेतानश्वानवासृजत् ॥ १ ॥ तस्याश्वमेधे राजर्षेर्देशाद्देशात् समेयुषाम् । शिक्षाक्षरविधिज्ञानां नासीत् सङ्ख्या विपश्चिताम् ॥ २ ॥ वेदविद्याव्रतस्नाता वदान्याः प्रियदर्शनाः । सुभिक्षाच्छादनगृहाः सुशय्यासनवाहनाः ॥ ३ ॥ नटनर्त्तकगन्धर्वैः पूर्णकैर्वर्द्धमानकैः नित्योद्योगैश्च क्रीड़द्भिस्तत्र स्म परिहर्षिताः ॥ ४ ॥ यज्ञे यज्ञे यथा कालं दक्षिणाः सोऽत्यकालयत् । द्विपा दशसहस्राख्याः प्रमदाः काञ्चनप्रभाः ॥ ५ ॥ सध्वजाः सपताकाश्च रथा हेममयास्तथा । यः सहस्रं सहस्राणां कन्या हेमविभूषिताः ॥ ६ ॥ धुर्य्यश्वाश्वगजारूढ़ाः सगृहक्षेत्रगोशताः । शतं शतसहस्राणि स्वर्णमाली महात्मनाम् ॥ ७ ॥ गवां सहस्रानुचरान् दक्षिणामत्यकालयत् । तत्रास्य गाथा गायन्ति ये पुराणविदो जनाः ॥ ८ ॥ हेमशृङ्गो रौप्यखुराः सवत्साः कांस्यदोहनाः । दासीदासखरोष्ट्रांश्च प्रादादाजाविकं बहु ॥ ९ ॥ रत्नानां विविधानाञ्च विविधांश्चान्नपर्वतान् । तस्मिन् संवितते यज्ञे दक्षिणामत्यकालयत् ॥ १० ॥ अङ्गस्य यजमानस्य स्वधर्माधिगताः शुभाः । गुणोत्तरास्तु क्रतवस्तस्यासन् सार्वकामिकाः ॥ ११ ॥ स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः । अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ १२ ॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि षोड़शराजिके सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

---

नारद उवाच । शिबिमौशीनरञ्चापि मृतं सृञ्जय शुश्रुम । य इमां पृथिवीं सर्वाञ्चर्मवत् पर्य्यवेष्टयत् ॥ १ ॥ साद्रिद्वीपार्णव-

वनां रथघोषेण नादयन्। स शिबिर्य्यद्रिपून्नित्यं मुख्यान्निघ्नन्
सपत्नजित्॥ २॥ तेन यज्ञैर्बहुविधैरिष्टं पर्य्याप्तदक्षिणैः। स
राजा वीर्य्यवान् धीमानवाप्य वसु पुष्कलम्॥ ३॥ सर्वमूर्द्धाभि-
षिक्तानां सम्मतः सोऽभवद्युधि। अयजच्चाश्वमेधैर्य्यो विजित्य
पृथिवीमिमाम्॥४॥ निरर्गलैर्बहुफलैर्निष्ककोटिसहस्रदः। हस्त्य-
श्वपशुभिर्धान्यैर्मृगैर्गोऽजातिभिस्तथा॥ ५॥ विविधां पृथिवीं
पुण्यां शिविर्ब्राह्मणसातकरोत्। यावत्यो वर्षतो धारा यावत्यो
दिवि तारकाः॥ ६॥ यावत्यः सिकतागाङ्ग्यो यावन्मेरोर्महो-
पलाः। उदन्वति च यावन्ति रत्नानि प्राणिनोऽपि च॥ ७॥
तावतीरददद्गा वै शिविरौशीनरोऽध्वरे। नो यन्तारं धुरन्तस्य
कञ्चिदन्यं प्रजापतिः॥ ८॥ भूतं भव्यं भवन्तं वा नाध्यगच्छ-
न्नरेश्वरम्। तस्यासन् विविधा यज्ञाः सर्वकामैः समन्विताः
॥९॥ हेमयूपासनगृहा हेमप्राकारतोरणाः। शुचि स्वाद्वन्नपानञ्च
ब्राह्मणाः प्रयुतायुताः॥ १०॥ नानाभक्ष्यैः प्रियकथाः पयोदधि-
महाह्रदाः। तस्यासन् यज्ञवाटेषु नद्यः शुभ्रान्नपर्वताः॥ ११॥
पिवत स्नात खादध्वमिति यत्रोचते जनाः। तस्मै प्रादाद्वरं रुद्र-
स्तुष्टः पुण्येन कर्मणा॥ १२॥ अक्षयं ददतो वित्तं श्रद्धा कीर्त्ति-
स्तथा क्रियाः। यथोक्तमेव भूतानां प्रियत्वं सर्वमूत्तमम्॥ १३॥
एताल्लब्ध्वा वरानिष्टान् शिविः काले दिवङ्गतः। स चेन्ममार
सृञ्जय चतुर्भद्रतरस्त्वया॥ १४॥ पुत्रात् पुण्यतरस्तुभ्यं मा पुत्र-
मनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ १५॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके
अष्टपञ्चाशोऽध्यायः॥ ५८॥

नारद उवाच। रामं दाशरथिञ्चैव मृतं सृञ्जय शुश्रुम।
यं प्रजा अन्वमोदन्त पिता पुत्रानिवौरसान् ॥ १ ॥ असङ्ख्येया
गुणा यस्मिन्नासन्नमिततेजसि। यश्चतुर्द्दशवर्षाणि निदेशात् पितु-
रच्युतः ॥ २ ॥ वने वनितया सार्द्धमवसल्लक्ष्मणाग्रजः। जघान
च जनस्थाने राक्षसान् मनुजर्षभः ॥ ३ ॥ तपस्विनां रक्षणार्थं
सहस्राणि चतुर्द्दश। तत्रैव वसतस्तस्य रावणो नाम राक्षसः ॥४॥
जहार भार्य्यां वैदेहीं सम्मोह्यैनं सहानुगम्। तमागस्कारिणं
रामः पौलस्त्यमजितं परैः ॥ ५ ॥ जघान समरे क्रुद्धः पुरेव
त्र्यम्बकोऽन्धकम्। सुरासुरैरबध्यन्तं देवब्राह्मणकण्टकम् ॥ ६ ॥
जघान स महाबाहुः पौलस्त्यं सगणं रणे। स प्रजानुग्रहं कृत्वा
त्रिदशैरभिपूजितः ॥ ७ ॥ व्याप्य कृत्स्नं जगत् कीर्त्त्या सुरर्षि-
गणसेवितः। स प्राप्य विविधं राज्यं सर्व्वभूतानुकम्पकः ॥ ८ ॥
आजहार महायज्ञं प्रजा धर्म्मेण पालयन्। निरर्गलं सजारूथ्य-
मश्वमेधशतं विभुः ॥ ९ ॥ आजहार सुरेशस्य हविषामुद्माव-
हत्। अन्यैश्च विविधैर्यज्ञैरीजे बहुगुणैर्नृप ॥ १० ॥ क्षुत्-
पिपासेऽजयद्रामः सर्व्वरोगांश्च देहिनाम्। सततं गुणसम्पन्नो
दीप्यमानः स्वतेजसा ॥ ११ ॥ अतिसर्व्वाणि भूतानि रामो दाश-
रथिर्बभौ। ऋषीणां देवतानाञ्च मानुषाणाञ्च सर्व्वशः ॥ १२ ॥
पृथिव्यां सह वासोऽभूद्रामे राज्यं प्रशासति। नाहीयन्त तदा
प्राणाः प्राणिनां न तदन्यथा ॥ १३ ॥ प्राणापानसमानाश्च रामे
राज्यं प्रशासति। पर्य्यदीप्यन्त तेजांसि तथानर्थाश्च नाभवन् ॥१४॥
दीर्घायुषः प्रजाः सर्व्वा युवा न म्रियते तदा। वेदैश्चतुर्भिः सुप्रीताः
प्राप्नुवन्ति दिवौकसः ॥ १५ ॥ हव्यं कव्यञ्च विविधं निष्पूर्त्तं हुत-
मेव च। अदंशमशका देशा नष्टव्यालसरीसृपाः ॥ १६ ॥ नापसु
प्राणभृतां मृत्युर्नाकाले ज्वलनोऽदहत्। अधर्म्मरुचयो लुब्धा
मूर्खा वा नाभवंस्तदा ॥ १७ ॥ प्रजाः शिष्टेष्टकर्म्माणः सर्व्वे वर्णा-

स्तदाभवन् । स्वधां पूजाञ्च रक्षोभिर्ज्जनस्थाने प्रणाशिते ॥ १८ ॥ प्रादान्निहत्य रक्षांसि पितृदेवेभ्य ईश्वरः । सहस्रपुत्राः पुरुषा दशवर्षशतायुषः ॥ १९ ॥ न च ज्येष्ठाः कनिष्ठेभ्यस्तदा श्राद्धान्यकारयन् । युवा श्यामो लोहिताक्षो मत्तमातङ्गविक्रमः ॥ २० ॥ आजानुबाहुः सुभुजः सिंहस्कन्धो महाबलः । दशवर्षसहस्राणि दशवर्षशतानि च ॥ २१ ॥ सर्वभूतमनःकान्तो रामो राज्यमकारयत् । रामो रामो राम इति प्रजानामभवत् कथा ॥ २२ ॥ रामात् रामं जगदभूद्रामे राज्यं प्रशासति । चतुर्विधाः प्रजा रामः स्वर्गं नीत्वा दिवं गतः ॥ २३ ॥ आत्मानं सम्प्रतिष्ठाप्य राजवंशमिहाष्टधा । स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ॥२४॥ पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः । अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ २५ ॥

इति द्रोणपर्वणि अभिमन्युबधपर्वणि षोड़शराजिके एकोनषष्ठोऽध्यायः ॥ ५९ ॥

---

नारद उवाच । भगीरथञ्चेद्राजानं मृतं सृञ्जय शुश्रुम । येन भागीरथी गङ्गा चयनैः काञ्चनैश्चिता ॥ १॥ यः सहस्रं सहस्राणां कन्या हेमविभूषिताः । राज्ञश्च राजपुत्रांश्च ब्राह्मणेभ्यो ह्यमन्यत ॥ २ ॥ सर्वा रथगताः कन्या रथाः सर्वे चतुर्युजः । रथे रथे शतं नागाः सर्वे वै हेममालिनः ॥ ३ ॥ सहस्रमश्वाश्चैकैकं राजानं पृष्ठतोऽन्वयुः । अश्वे अश्वे शतं गावो गवां पश्चादजाविकम् ॥ ४ ॥ तेनाक्रान्ता जलौघेन दक्षिणा भूयसीर्द्ददत् । उपह्वरेऽतिव्यथिता तस्याङ्के निषसादह ॥ ५ ॥ तथा भागीरथी गङ्गा उर्वशी चाभवत् पुरा । दुहितृत्वं गता राज्ञः पुत्रत्वमगमत्तदा ॥ ६ ॥ तान्तु गाथां जगुः प्रीता गन्धर्वाः सूर्य्यवर्च्चसः ।

पितृदेवमनुष्याणां शृखतां वल्गुवादिनाम् ॥ ७ ॥ भगीरथं यज-मानमैच्वाकं भूरिदक्षिणम् । गङ्गा समुद्रगा देवी वव्रे पितर-मीश्वरम् ॥ ८ ॥ तस्य सेन्द्रैः सुरगणैर्देवैर्यज्ञः स्वलङ्कृतः । सम्यक् परिगृहीतश्च शान्तविघ्नो निरामयः ॥ ९ ॥ यो य इच्छेत विप्रो वै यत्र यत्रात्मनः प्रियम् । भगीरथस्तथा प्रीतस्तत्र तत्रानयद्वशी ॥ १० ॥ नादेयं ब्राह्मणेष्वासीत् यस्य यत् स्यात् प्रियं धनम् । सोऽपि विप्रप्रसादेन ब्रह्मलोकगतो नृपः ॥ ११ ॥ येन यातौ मखमुखौ दिशावाविहपादपाः । तेनावस्थातुमिच्छन्ति तं गत्वा-राजमीश्वरम् ॥ १२ ॥ स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः । अयज्वानमदाक्षिण्य-मभिश्वैत्येति व्याहरन् ॥ १३ ॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि षोड़शराजिके षष्टितमोऽध्यायः ॥ ६० ॥

---

नारद उवाच । दिलीपं वै चैलविलं मृतं सृञ्जय शुश्रुम । यस्य यज्ञशतेष्वासन् प्रयुतायुतशो द्विजाः ॥ १ ॥ तत्त्वज्ञानार्थ-सम्पन्ना यज्वानः पुत्रपौत्रिणः । य इमां वसुसम्पूर्णां वसुधां वसुधाधिपः ॥ २ ॥ ईजानो विविधैर्यज्ञैर्ब्राह्मणेभ्यो ह्यमन्यत । दिलीपस्य च यज्ञेषु कृतः पन्था हिरण्मयः ॥ ३ ॥ तं धर्म्ममिव कुर्व्वाणाः सेन्द्रा देवाः समागमन् । चषालं प्रचषालञ्च यस्य यूपे हिरण्मये ॥ ४ ॥ रागखाण्डवभोज्यैश्च मत्ताः पथिषु शेरते । तदेतदद्भुतं मन्ये अन्यैर्न सदृशं नृपैः ॥ ५ ॥ यदप्सु युध्य-मानस्य चक्रे न परिपेततुः । राजानं दृढ़धन्वानं दिलीपं सत्य-वादिनम् ॥ ६ ॥ येऽपश्यन् भूरिदाक्षिण्यं तेऽपि स्वर्गजितो नराः । पञ्चशब्दा न जीर्य्यन्ते खट्टाङ्गस्य निवेशने ॥ ७ ॥ स्वाध्याय-

घोषो ज्याघोषः पिबताश्नीत खादत। स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ॥ ८ ॥ पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ ९ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके
एकषष्टोऽध्यायः ॥ ६१ ॥

---

नारद उवाच। मान्धाता चेद्यौवनाश्वं मृतं सृञ्जय शुश्रुम। देवासुरमनुष्याणां त्रैलोक्यविजयी नृपः ॥ १ ॥ यं देवावश्विनौ गर्भात् पितुः पूर्वं चकर्षतुः। मृगयां विचरन् राजा तृषितः श्रान्तवाहनः ॥ २ ॥ धूमं दृष्ट्वागमत् सत्रं पृषदाज्यमवाप सः। तं दृष्ट्वा युवनाश्वस्य जठरे सूनुतां गतम् ॥ ३ ॥ गर्भाद्दिजह्रतुर्देवावश्विनौ भिषजाम्वरौ। तं दृष्ट्वा पितुरुत्सङ्गे शयानं देववर्चसम् ॥ ४ ॥ अन्योऽन्यमब्रुवन् देवाः कमयं धास्यतीति वै। मामेवायं धयत्वग्रे इति ह स्माह वासवः ॥ ५ ॥ ततोऽङ्गुलिभ्यो चौन्द्रस्य प्रादुरासीत् पयोऽमृतम्। मां धास्यतीति कारुण्यात् यदीन्द्रोह्यन्वकम्पयत् ॥ ६ ॥ तस्मात्तु मान्धातेत्येवं नाम तस्य तु तैः कृतम्। ततस्तु धाराः पयसो घृतस्य च महात्मनः ॥ ७ ॥ तस्यास्ये यौवनाश्वस्य पाणिरिन्द्रस्य चास्रवत्। अपिबत् पाणिमिन्द्रस्य तमासाद्य व्यवर्द्धत ॥ ८ ॥ सोऽभवद्द्वादशसमो द्वादशाहेन वीर्य्यवान्। इमाञ्च पृथिवीं कृत्स्नामेकाह्ना स व्यजीजयत् ॥९॥ धर्मात्मा धृतिमान् वीरः सत्यसन्धो जितेन्द्रियः। जनमेजय सुधन्वानं गयं भूलं वृहद्रथम् ॥ १० ॥ असितञ्च नृगञ्चैव मान्धाता धनुषाजयत्। उदेति च यतः सूर्य्यो यत्र च प्रतितिष्ठति ॥ ११ ॥ तत् सर्वं यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते। सोऽश्वमेधशतैरिष्ट्वा राजसूयशतेन च ॥ १२ ॥ अददद्रोहितान्मत्स्यान् ब्राह्म-

णेभ्यो विप्राम्यते। हैरण्यान् योजनोत्सेधान् आयतान् दश-
योजनम्॥ १३॥ वज्रप्राकारान् सुस्वादून् भक्ष्यभोज्यान्नपर्वतान्।
अतिरिक्तं ब्राह्मणेभ्यो भुञ्जन्नाद्रीयते जनः॥ १४॥ भक्ष्यान्न-
पाननिचयाः शुशुभुस्त्वन्नपर्वताः। घृतह्रदाः सूपपङ्का दधिफेणा
गुड़ोदकाः॥ १५॥ रुरुधुः पर्वतान् नद्यो मधुक्षीरवहाः शुभाः।
देवासुरनरा यक्षा गन्धर्वोरगपक्षिणः॥ १६॥ विप्रास्तत्रागता-
स्त्वासन् वेदवेदाङ्गपारगाः। ब्राह्मणा ऋषयश्चापि नासंस्तत्रा-
विपश्चितः॥ १७॥ समुद्रान्तां वसुमतीं वसुपूर्णाञ्च सर्वतः। स
तां ब्राह्मणसात् कृत्वा जगामास्तं तदा नृपः॥ १८॥ गतः
पुण्यकृतांल्लोकान् सुव्याप्य यशसा दिशः। स चेन्ममार सृञ्जय
चतुर्भद्रतरस्त्वया॥ १९॥ पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनु-
तप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ २०॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके
द्विषष्ठोऽध्यायः॥ ६२॥

---

नारद उवाच। ययातिं नाहुषञ्चैव मृतं सृञ्जय शुश्रुम।
राजसूयशतैरिष्ट्वा सोऽश्वमेधशतेन च॥ १॥ पुण्डरीकसहस्रेण
वाजपेयशतैस्तथा। अतिरात्रसहस्रेण चातुर्मास्यैश्च कामतः॥२॥
अग्निष्टोमैश्च विविधैः सत्रैश्च प्राज्यदक्षिणैः। अब्राह्मणानां यद्वित्तं
पृथिव्यामस्ति किञ्चन॥ ३॥ तत् सर्वं परिसङ्ख्याय ततो ब्राह्मण-
सात्करोत्। व्यूढ़े देवासुरे युद्धे कृत्वा देवसहायताम्॥ ४॥
चतुर्द्धा व्यभजत् सर्वां चतुर्भ्यः पृथिवीमिमाम्। यज्ञैर्नानाविधै-
रिष्ट्वा प्रजामुत्पाद्य चोत्तमाम्॥ ५॥ देवयान्याञ्चौशनस्यां शर्मि-
ष्ठायाञ्च धर्मतः। देवारण्येषु सर्वेषु विजह्रारामरोपमः॥ ६॥
आत्मनः कामचारेण द्वितीय इव वासवः। यदा नाध्यागमच्छान्तिं

कामानां सर्ववेदवित्॥ ७ ॥ ततो गाथामिमां गीत्वा सदारः प्राविशद्वनम्। यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ॥ ८॥ नालमेकस्य तत् सर्वमिति मत्वा शमं व्रजेत्। एवं कामान् परित्यज्य ययातिर्धृतिमेत्य च॥ ९॥ पूरुं राज्ये प्रतिष्ठाप्य प्रयातो वनमीश्वरः। स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया॥ १० ॥ पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन्॥ ११ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके त्रिषष्टोऽध्यायः॥ ६३ ॥

---

नारद उवाच। नाभागमम्बरीषञ्चेन्मृतं सृञ्जय शुश्रुम। यः सहस्रं सहस्राणां राज्ञाञ्चैकस्त्वयोधयत्॥ १॥ जिगीषमाणान् सङ्ग्रामे समन्ताद्वैरिणोऽभ्ययात्। अस्त्रयुद्धविदो घोराः सृजन्तस्त्वाशिवा गिरः॥ २॥ बललाघवमास्थाय तेषां सोऽस्त्रबलेन च। छत्रायुधध्वजरथान् छित्त्वा प्राणान् गतव्यथः॥ ३॥ त एनं मुक्तसन्नाहाः प्रार्थयन् जीवितैषिणः। शरण्यमीयुः शरणं तव स्म इति वादिनः॥ ४॥ स तु तान् वशगान् कृत्वा जित्वा चेमां वसुन्धराम्। ईजे यज्ञशतैरिष्टैर्यथाशास्त्रं तथानघ॥ ५॥ बुभुजुः सर्वसम्पन्नमन्नमन्ये जनास्तदा। तस्मिन् यज्ञे तु विप्रेन्द्राः सुतृप्ताः परमार्च्चिताः॥ ६॥ मोदकान् पूरिकान् पूपान् स्वादुपूर्णाश्च शष्कुलीः। करम्भान् पृथुमृद्वीका अन्नानि सुकृतानि च॥ ७॥ सूपान् मैरेयकान् पूपान् रागखाण्डवपानकान्। मिष्टान्नानि सुयुक्तानि मृदूनि सुरभीणि च॥ ८॥ घृतं मधु पयस्तोयं दधीनि रसवन्ति च। फलं मूलञ्च सुस्वादु द्विजास्तत्रोपभुञ्जते॥ ९ ॥ मादनीयानि पानानि विदित्वा चात्मनः

सुखम् । आपिबन्ति यथाकालं पानपा गीतवादितैः ॥ १० ॥
यत्र स्म गाथा गायन्ति क्षीवा हृष्टाः पतन्ति च । नाभागस्तुति-
संयुक्ता ननृतुश्च सहस्रशः ॥ ११ ॥ तेषु यज्ञेष्वम्बरीषो दक्षिणा
मत्यकालयत् । राज्ञां शतसहस्राणि दशप्रयुतयाजिनाम् ॥ १२ ॥
हिरण्यकवचान् सर्वान् श्वेतच्छत्रप्रकीर्णकान् । हिरण्यंस्यन्दना-
रूढ़ान् सानुयात्रपरिच्छदान् ॥ १३ ॥ ईजानो विविधैर्यज्ञै-
र्दक्षिणामत्यकालयत् । मूर्द्धाभिषिक्तांश्च नृपान् राजपुत्रशतानि
च ॥ १४ ॥ सदण्डकोषनिचयान् ब्राह्मणेभ्यो ह्यमन्यत । नैवं
पूर्व्वजनाश्चक्रुर्न करिष्यन्ति चापरे ॥ १५ ॥ यदम्बरीषो नृपतिः
करोत्यमितदक्षिणः । इत्येवमनुमोदन्ते प्रीता यस्य महर्षयः ॥१६
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात् पुण्यतरस्तुभ्यं मा
पुत्रमनुतप्यथाः । अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥१७

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि षोड़शराजिके
चतुःषष्टोऽध्यायः ॥ ६४ ॥

---

नारद उवाच । शशविन्दुं च राजानं मृतं सृञ्जय शुश्रुम ।
ईजे स विविधैर्यज्ञैः श्रीमान् सत्यपराक्रमः ॥ १ ॥ तस्य भार्य्या-
सहस्राणां शतमासीन्महात्मनः । एकैकस्याञ्च भार्य्यायां सहस्रं
तनयाभवन् ॥ २ ॥ ते कुमाराः पराक्रान्ताः सर्व्वे नियुतयाजिनः ।
राजानः क्रतुभिर्मुख्यैरीजाना वेदपारगाः ॥ ३ ॥ हिरण्यकवचाः
सर्व्वे सर्व्वे चोत्तमधन्विनः । सर्व्वेऽश्वमेधैरीजानाः कुमाराः शाश-
विन्दवाः ॥ ४ ॥ तानश्वमेधे राजेन्द्रो ब्राह्मणेभ्योऽददत् पिता ।
शतं शतं रथगजा एकैकं पृष्ठतोऽन्वयुः ॥ ५ ॥ राजपुत्रं तदा
कन्यास्तपनीयस्वलङ्कृताः । कन्यां कन्यां शतं नागा नागे नागे
शतं रथाः ॥ ६ ॥ रथे रथे शतञ्चाश्वा वाजिनो हेममालिनः ।

अश्वे अश्वे सहस्राङ्गा गवां पञ्चाशदाधिकाः ॥ ७ ॥ एतद्धनमप-श्यन्तमश्वमेधे महामखे। ते तथैव पुनश्चान्ये तावन्तः काञ्चना-भवन् ॥ ८ ॥ भक्ष्यान्नपाननिचयाः पर्वताः क्रोशमुच्छ्रिताः। तस्याश्वमेधे निर्वृत्ते राज्ञः शिष्टास्त्रयोदश ॥ ९ ॥ तुष्टपुष्टजना-कीर्णाः शान्तविघ्नास्त्वनामयाः। शशबिन्दुरिमां भूमिं चिरं भुक्त्वा दिवं गतः ॥ १० ॥ स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्य-मभिश्वैत्येति व्याहरन् ॥ ११ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके
पञ्चषष्टोऽध्यायः ॥ ६५ ॥

---

नारद उवाच। गयञ्चामूर्त्तरयसं मृतं सृञ्जय शुश्रुम। यो वै वर्षशतं राजा हुतशिष्टाशनोऽभवत् ॥ १ ॥ तस्मै ह्यग्निर्वरं प्रादात्ततो वव्रे वरं गयः। तपसा ब्रह्मचर्य्येण व्रतेन नियमेन च ॥ २ ॥ गुरूणाञ्च प्रसादेन वेदानिच्छामि वेदितुम्। स्वधर्म-णाविहिंस्यान्यान् धनमिच्छामि चाक्षयम् ॥ ३ ॥ विप्रेषु ददतश्चैव श्रद्धा भवति नित्यशः। अनन्यासु सवर्णासु पुत्रजन्म च मे भवेत् ॥ ४ ॥ अन्नं मे ददतः श्रद्धा धर्मे मे रमतां मनः। अविघ्नं चास्तु मे नित्यं धर्मकार्य्येषु पावकः ॥ ५ ॥ तथा भविष्यतीत्युक्त्वा तत्रैवान्तरधीयत। गयो ह्यवाप्य तत् सर्वं धर्मेणारीनजीजयत् ॥ ६ ॥ स दर्शपौर्णमासाभ्यां कालेष्वाग्रयणेषु च। चातुर्मास्यैश्च विविधैर्यज्ञैश्चावाप्तदक्षिणैः ॥ ७ ॥ अयजच्छ्रद्धया राजा परि-सम्वत्सरान् शतम्। गवां शतसहस्राणि शतमश्वशतानि च ॥८॥ शतं निष्कसहस्राणि गवाञ्चाप्ययुतानि षट्। उत्थायोत्थाय संप्रादात् परिसम्वत्सरान् शतम् ॥ ९ ॥ नक्षत्रेषु च सर्वेषु दद-

न्नवदक्षिणाः। ईजे च विविधैर्यज्ञै र्यथा सोमोऽङ्गिरा यथा ॥ १० ॥ सौवर्णां पृथिवीं कृत्वा य इमां मणिशर्कराम्। विप्रेभ्यः प्रादद्राजा अश्वमेधे महामखे ॥ ११ ॥ जाम्बूनदमया यूपाः सर्व्वे रत्नपरिच्छदाः। गयस्यासन् समृद्धास्तु सर्व्वभूतमनोहराः ॥ १२ ॥ सर्व्वकामसमृद्धांश्च प्रादात्तांश्च गयस्तथा। ब्राह्मणेभ्यः प्रहृष्टेभ्यः सर्व्वभूतेभ्य एव च ॥ १३ ॥ ससमुद्रवनद्वीपनदीनदवनेषु च। नगरेषु च राष्ट्रेषु दिवि व्योम्नि च येऽवसन् ॥ १४ ॥ भूतग्रामाश्च विविधाः सन्तृप्ता यज्ञसम्पदा। गयस्य सदृशो यज्ञो नास्त्यन्य इति तेऽब्रुवन् ॥ १५ ॥ षड्विंशद्योजनायामा त्रिंशद्योजनमायता। पश्चात् पुरश्चतुर्विंशद्वेदी ह्यासीद्धिरण्मयी ॥१६॥ गयस्य यजमानस्य मुक्तावज्रमणिस्तृता। प्रादात् स ब्राह्मणेभ्योऽथ वासांस्याभरणानि च ॥ १७ ॥ यथोक्ता दक्षिणाश्चान्या विप्रेभ्यो भूरिदक्षिणः। यत्र भोजनशिष्टस्य पर्व्वताः पञ्चविंशतिः ॥ १८ ॥ कुल्याः कुशरवाहिन्यो रसानामभवंस्तदा। वस्त्राभरणगन्धानां राशयश्च पृथग्विधाः ॥ १९ ॥ यस्य प्रभावाच्च गयस्त्रिषु लोकेषु विश्रुतः। वटश्चाक्षय्यकरणः पुण्यं ब्रह्मसरश्च तत् ॥ २० ॥ स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया। पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ २१ ॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि षोड़शराजिके षट्षष्टोऽध्यायः ॥ ६६ ॥

---

नारद उवाच। साङ्कृतिं रन्तिदेवञ्च मृतं सृञ्जय शुश्रुम। यस्य द्विशतसाहस्रा आसन् सूदा महात्मनः ॥ १ ॥ गृहानभ्यागतान् विप्रानतिथीन् परिवेशकाः। पक्वापक्वं दिवारात्रमपर्य्याप्तं

धनं तदा॥ २॥ न्यायेनाधिगतं वित्तं ब्राह्मणेभ्यो ह्यमन्यत। वेदानधीत्य धर्मेण यस्त्रे द्विषतो वशे॥ ३॥ उपस्थिताश्च पशवः स्वयं यं संशितव्रतम्। बहवः स्वर्गमिच्छन्तो विधिवत् सत्रयाजिनम्॥ ४॥ नदी महानसाद्यस्य प्रवृत्ता चर्मराशितः। तस्माच्चर्मण्वती पूर्वमग्निहोत्रेऽभवत् पुरा॥ ५॥ ब्राह्मणेभ्योऽददन्निष्कं सौवर्णस्य प्रभावतः। तुभ्यन्निष्कन्तुभ्यन्निष्कमिति स्म प्रभाषते॥ ६॥ तुभ्यं तुभ्यमिति प्रादात् निष्कान् निष्कान् सहस्रशः। ततः पुनः समाश्वास्य निष्कानेव प्रयच्छति॥ ७॥ अल्पं दत्तं मयाद्येति निष्ककोटिं प्रदाय सः। एकाह्ना दास्यति पुनः कोऽन्यस्तत् सम्प्रदास्यति॥ ८॥ द्विजपाणिवियोगेन दुःखं मे शाश्वतं महत्। भविष्यति न सन्देह एवं राजाददद्वसु॥ ९॥ सहस्रशश्च सौवर्णान्वृषभान् गोशतानुगान्। साष्टं शतं सुवर्णानां निष्कमाहुर्धनं तदा॥ १०॥ अध्यर्द्धमासमददद्ब्राह्मणेभ्यः समाः शतम्। अग्निहोत्रोपकरणं यज्ञोपकरणञ्च यत्॥ ११॥ ऋषिभ्यः करकान् कुम्भान् स्थालीः पिठरमेव च। शयनासनयानानि प्रासादांश्च गृहाणि च॥ १२॥ वृक्षांश्च विविधान् दद्यादन्नानि विविधानि च। सर्वं सौवर्णमेवासीद्रन्तिदेवस्य धीमतः॥ १३॥ तत्र स्म गाथा गायन्ति ये पुराणविदो जनाः। रन्तिदेवस्य तान् दृष्ट्वा समृद्धिमतिमानुषीम्॥ १४॥ नैतादृशं दृष्टपूर्वं कुबेरसदनेष्वपि। धनञ्च पूर्य्यमाणं नः किं पुनर्मनुजेष्वपि॥ १५॥ व्यक्तं वस्वौकसारेयमित्यूचुस्तत्र विस्मिताः। साङ्कृतेरन्तिदेवस्य यां रात्रिमतिथिर्वसेत्॥ १६॥ आलभ्यन्त तदा गावः सहस्राण्येकविंशतिः। तत्र स्म सूदाः क्रोशन्ति सुमृष्टमणिकुण्डलाः॥ १७॥ सूपं भूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा। रन्तिदेवस्य यत्किञ्चित् सुवर्णमभवत्तदा॥ १८॥ तत् सर्वं वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत। प्रत्यक्षं तस्य हव्यानि प्रतिगृह्णन्ति

देवताः ॥ १९ ॥ कव्यानि पितरः काले सर्वकामान् द्विजोत्तमाः।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ॥ २० ॥ पुत्रात् पुण्यतर-
स्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति
व्याहरन् ॥ २१ ॥

इति द्रोणपर्वणि अभिमन्युबधपर्वणि षोड़शराजिके
सप्तषष्टोऽध्यायः ॥ ६७ ॥

---

नारद उवाच। दौष्मन्तीं भरतञ्चापि मृतं सृञ्जय शुश्रुम।
कर्माण्यसुकराण्यन्यैः कृतवान् यः शिशुर्वने ॥ १ ॥ हिमावदातान्
यः सिंहान्नखदंष्ट्रायुधान् बली। निर्वीर्य्यांस्तरसा कृत्वा विच-
कर्ष बबन्ध च ॥ २ ॥ क्रूरांश्चोग्रतरान् व्याघ्रान् दमित्वा चाकरो-
द्वशे। मनःशिलासमायुक्तान् सम्पृक्तान् धातुराशिभिः ॥ ३ ॥
व्यालादींश्चातिबलवान् सुप्रतीकान् गजानिति। दंष्ट्रासु दृह्य
विमुखान् शुष्कास्यानकरोद्वशे ॥ ४ ॥ महिषानप्यतिबलान् बलिनो
विचकर्ष ह। सिंहानां च सुदृप्तानां शतान्यदमयद्बलात् ॥ ५ ॥
बलिनः सृमरान् खड़्गान्नानासत्त्वानि चाप्युत। कृच्छ्रप्राणां
गले बद्ध्वा दमयित्वाप्यवासृजत् ॥ ६ ॥ तं सर्वदमनेत्याहुस्ते
द्विजास्तेन कर्मणा। तम्प्रत्यषेधज्जननी मा सत्त्वानि विजीजहि
॥ ७ ॥ सोऽश्वमेधशतेनेष्ट्वा यमुनामनुवीर्य्यवान्। त्रिशताश्वान्
सरस्वत्यां गङ्गामनु चतुःशतान् ॥ ८ ॥ सोऽश्वमेधसहस्रेण राज-
सूयशतेन च। पुनरीजे महायज्ञैः समाप्तवरदक्षिणैः ॥ ९ ॥
अग्निष्टोमातिरात्राभ्यामुक्थ्या विश्वजिता अपि। वाजपेयसह-
स्राणां सहस्रैश्च सुसंवृतैः ॥ १० ॥ इष्ट्वा शाकुन्तलो राजा तर्प-
यित्वा द्विजान् धनैः। सहस्रं यत्र पद्मानां कण्वाय भरतो ददौ
॥ ११ ॥ जाम्बूनदस्य शुद्धस्य कनकस्य महायशाः। यस्य यूपः
शतव्यामः परिणाहेन काञ्चनः ॥ १२ ॥ समागम्य द्विजैः सार्द्धं

सैन्द्रैर्देवैः समुच्छ्रितः। अलङ्कृतान् राजमानान् सर्वरत्नैर्मनोहरैः ॥ १३ ॥ हैरण्यानश्वान् द्विरदान् रथानुष्ट्रानजाविकम्। दासीदासं धनं धान्यं गाः सवत्साः पयस्विनीः ॥ १४ ॥ ग्रामान् गृहाणि क्षेत्राणि विविधांश्च परिच्छदान्। कोटीशतायुतांश्चैव ब्राह्मणेभ्यो ह्यमन्यत ॥ १५ ॥ चक्रवर्त्ती ह्यदीनात्मा जितारिर्ह्यजितः परैः। सचेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ॥ १६ ॥ पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः। अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ १७ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिके अष्टषष्टोऽध्यायः ॥ ६८ ॥

---

नारद उवाच। पृथुं वैण्यञ्च राजानं मृतं सृञ्जय शुश्रुम। यमभ्यषिञ्चन् साम्राज्ये राजसूये महर्षयः ॥१॥ यत्नतः प्रथितेत्यूचुः सर्वानभिभवन् पृथुः। क्षतान्नस्त्रास्यते सर्वान् इत्येवं क्षत्रियोऽभवत् ॥२॥ पृथुं वैण्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन्। ततो राजेति नामास्य ह्यनुरागादजायत ॥३॥ अकृष्टपच्या पृथिवी आसीद्वैण्यस्य कामधुक्। सर्वाः कामदुघा गावः पुटके पुटके मधु ॥ ४ ॥ आसन् हिरण्मया दर्भाः सुखस्पर्शाः सुखावहाः। तेषां चीराणि संवीताः प्रजास्तेष्वेव शेरते ॥ ५ ॥ फलान्यमृतकल्पानि स्वादूनि च मृदूनि च। तासामासीत्तदाहारो निराहाराश्च नाभवन् ॥ ६ ॥ अरोगाः सर्वसिद्धार्था मनुष्या ह्यकुतोभयाः। न्यवसन्त यथाकामं वृक्षेषु च गुहासु च ॥ ७ ॥ प्रविभागो न राष्ट्राणां पुराणाञ्चाभवत्तदा। यथासुखं यथाकामं तथैता मुदिताः प्रजाः ॥ ८ ॥ तस्य संस्तम्भिता ह्यापः समुद्रानभियास्यतः। पर्वताश्च ददुर्मार्गं ध्वजभङ्गश्च नाभवत् ॥ ९ ॥ तं वनस्पतयः शैलादेवासुरनरोरगाः। सप्तर्षयः

पुण्यजना गन्धर्वाप्सरसोऽपि च ॥ १० ॥ पितरश्च सुखासीनमभिगम्येदमब्रुवन् । सम्राड़सि क्षत्रियोऽसि राजा गोप्ता पितासि नः ॥ ११ ॥ इच्छसुभं त्र महाराज प्रभुः सन्नीप्सितान् वरान् । यैर्वयं शाश्वतीस्तृप्तिर्वर्त्तयिष्यामहे सुखम् ॥ १२ ॥ तथेत्युक्त्वा पृथुर्वैण्यो गृहीत्वाजगवं धनुः । शरांश्चाप्रतिमान् घोरान् चिन्तयित्वाब्रवीन्महीम् ॥ १३ ॥ एह्येहि वसुधे क्षिप्रं क्षरेभ्यः काङ्क्षितं पयः । ततो दास्यामि भद्रं ते अन्नं यस्य यथेप्सितम् ॥ १४ ॥

वसुधोवाच । दुहितृत्वेन मां वीर सङ्कल्पयितुमर्हसि । तथेत्युक्त्वा पृथुः सर्वं विधानमकरोद्वशी ॥ १५ ॥ ततो भूतनिकायास्तां वसुधां दुदुहुस्तदा । तां वनस्पतयः पूर्वं समुत्तस्थुर्दुधुक्षव ॥१६॥ सातिष्ठद्वत्सला वत्सं दोग्ध्रीन् पात्राणि चेच्छती । वत्सोऽभूत्पुष्पितः शालः प्लक्षो दोग्धाभवत्तदा ॥ १७ ॥ छिन्नप्ररोहणं दुग्धं पात्रमौदुम्बरं शुभम् । उदयः पर्वतो वत्सो मेरुर्दोग्धा महागिरिः ॥ १८ ॥ रत्नान्योषधयो दुग्धं पात्रमश्ममयं तदा । दोग्धा चासीत्तदा देवो दुग्धमूर्ज्जस्करं प्रियम् ॥ १९ ॥ असुरा दुदुहुर्मद्यमामपात्रे तु ते तदा । दोग्धा द्विमूर्द्धा तत्रासीद्वत्सश्चासीद्विरोचनः ॥ २० ॥ कृषिञ्च शस्यञ्च नरा दुदुहुः पृथिवीतले । स्वायम्भुवो मनुर्वत्सस्तेषां दोग्धाभवत् पृथुः ॥ २१ ॥ अलावुपात्रे च तदा विषं दुग्धा वसुन्धरा । धृतराष्ट्रोऽभवद्दोग्धा तेषां वत्सस्तु तक्षकः ॥ २२ ॥ सप्तर्षिभिर्ब्रह्म दुग्धं तथाचाक्लिष्टकर्मभिः । दोग्धा बृहस्पतिः पात्रं छन्दो वत्सश्च सोमराट् ॥ २३ ॥ अन्तर्द्धानं चामपात्रे दुग्धं पुण्यजनैर्विराट् । दोग्धा वैश्रवणस्तेषां वत्सश्चासीद्वृषध्वजः ॥ २४ ॥ पुण्यगन्धान् पद्मपात्रे गन्धर्वाप्सरसोऽदुहन् । वत्सश्चित्ररथस्तेषां दोग्धा विश्वरुचिः प्रभुः ॥ २५ ॥ स्वधां रजतपात्रेषु दुदुहुः पितरश्च ताम् । वत्सो वैवस्वतस्तेषां यमो दोग्धान्तकस्तदा ॥ २६ ॥ एवं निकायैस्तैर्दुग्धा पयोभीष्टानि

सा विराट् । यैर्वर्त्तयन्ति ते ह्यद्य पात्रैर्वैन्यस्य नित्यशः ॥ २७ ॥ यज्ञैश्च विविधैरिष्ट्वा पृथुर्वैण्यः प्रतापवान् । सन्तर्पयित्वा भूतानि सर्वैः कामैर्मनः प्रियैः ॥ २८ ॥ हैरण्यानकरोद्राजा ये केचित् पार्थिवा भुवि । तान् ब्राह्मणेभ्यः प्रायच्छदश्वमेधे महामखे ॥ २९ ॥ षष्टिनागसहस्राणि षष्टिनागशतानि च । सौवर्णानकरोद्राजा ब्राह्मणेभ्यश्च तान् ददौ ॥ ३० ॥ इमाञ्च पृथिवीं सर्वां मणिरत्नविभूषिताम् । सौवर्णीमकरोद्राजा ब्राह्मणेभ्यश्च तां ददौ ॥ ३१ ॥ स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया । पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः । अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ ३२ ॥

इति द्रोणपर्व्वणि अभिमन्युबधपर्व्वणि षोड़शराजिके
एकोनसप्ततोऽध्यायः ॥ ६९ ॥

---

नारद उवाच । रामो महातपाः शूरो वीरलोकनमस्कृतः । जामदग्न्योऽप्यतियशा अवितृप्तो मरिष्यति ॥ १ ॥ यस्मायमनुपर्य्येति भूमिं कुर्वन्निमां सुखाम् । न चासीद्विक्रिया यस्य प्राप्य श्रियमनुत्तमाम् ॥ २ ॥ यः क्षत्रियैः परामृष्टे वत्से पितरि चाब्रुवन् । ततोऽबधीत् कार्त्तवीर्य्यमजितं समरे परैः ॥ ३ ॥ क्षत्रियाणां चतुःषष्टिमयुतानि सहस्रशः । तदा मृत्योः समेतानि ह्येकेन धनुषाजयत् ॥ ४ ॥ ब्रह्मद्विषाञ्चाथ तस्मिन् सहस्राणि चतुर्द्दश । पुनरन्यानि जग्राह दन्तकूलं जघान ह ॥ ५ ॥ सहस्रं मुषलेनाघ्नन् सहस्रमसिनाबधीत् । उद्बन्धनात् सहस्रन्तु हैहयाः समरे हताः ॥ ६ ॥ सरथाश्वगजा वीरा निहतास्तत्र शेरते । पितुर्वधामर्षितेन जामदग्न्येन धीमता ॥ ७ ॥ निजघ्ने दशसाहस्रान् रामः परशुना तदा । न ह्यमृष्यन्त ता वाचो यास्ते-

भृशमुदीरिताः ॥ ८ ॥ भृगो रामाभिधावेति यदाक्रन्दन् द्विजोत्तमाः । ततः काश्मीरदरदान् कुन्तिक्षुद्रकमालवान् ॥ ९ ॥ अङ्गवङ्गकलिङ्गांश्च विदेहान् ताम्रलिप्तकान् । रक्षोवाहान् वीतहोत्रान् त्रिगर्त्तान् मार्त्तिकावतान् ॥ १० ॥ शिवीनन्यांश्च राजन्यान् देशाद्देशात् सहस्रशः । निजघान शितैर्वाणैर्जामदग्न्यः प्रतापवान् ॥ ११ ॥ कोटीशतसहस्राणि क्षत्रियाणां सहस्रशः । इन्द्रगोपकवर्णस्य वन्धुजीवनिभस्य च ॥ १२ ॥ रुधिरस्य परीवाहान् पूरयित्वा सरांसि च । सर्वानष्टादशद्वीपान् वशमानीय भार्गवः ॥ १३ ॥ ईजे क्रतुशतैः पुण्यैः समाप्तवरदक्षिणैः । वेदीमष्टनलोत्सेधां सौवर्णां विधिनिर्मिताम् ॥ १४ ॥ सर्वरत्नशतैः पूर्णां पताकाशतमालिनीम् । ग्राम्यारण्यैः पशुगणैः सम्पूर्णाञ्च महीमिमाम् ॥ १५ ॥ रामस्य जामदग्न्यस्य प्रतिजग्राह कश्यपः । ततः शतसहस्राणि द्विपेन्द्रान् हेमभूषणान् ॥ १६ ॥ निर्दस्युं पृथिवीं कृत्वा शिष्टेष्टजनसङ्कुलाम् । कश्यपाय ददौ रामो हयमेधे महामखे ॥ १७ ॥ त्रिसप्तवारान् पृथिवीं कृत्वा निःक्षत्रियां प्रभुः । इष्ट्वा क्रतुशतैर्वीरो ब्राह्मणेभ्यो ह्यमन्यत ॥ १८ ॥ सप्तद्वीपां वसुमतीं मारीचोऽगृह्णत द्विजः । रामं प्रोवाच निर्गच्छ वसुधातो ममाज्ञया ॥ १९ ॥ स कश्यपस्य वचनात् प्रोत्सार्य्य सरितां पतिम् । इषुपातैर्युधां श्रेष्ठः कुर्वन् ब्राह्मणशासनम् ॥२०॥ अध्यावसद्गिरिश्रेष्ठं महेन्द्रं पर्वतोत्तमम् । एवं गुणशतैर्जुष्टो भृगूणां कीर्त्तिवर्द्धनः ॥ २१ ॥ जामदग्न्योऽप्यतियशा मरिष्यति महाद्युतिः । त्वया चतुर्भद्रतरः पुत्रात् पुण्यतरस्तव ॥ २२ ॥ अयज्वानमदाक्षिण्यं मा पुत्रमनुतप्यथाः । एते चतुर्भद्रतरास्त्वया भद्रशताधिकाः । मृता नरवरश्रेष्ठा मरिष्यन्ति च सृञ्जय ॥ २३ ॥

इति द्रोणपर्वणि अभिमन्युवधपर्वणि षोड़शराजिय सप्ततितमोऽध्यायः ॥ ७० ॥

व्यास उवाच। पुण्यमाख्यानमायुष्यं श्रुत्वा षोड़शराजिकम्। अव्याहरन्नरपतिस्तूष्णीमासीत् स सृञ्जयः॥ १॥ तमब्रवीत्तथासीनं नारदो भगवानृषिः। श्रुतं कीर्त्तयतो मह्यं ग्रहीतन्ते महाद्युते॥ २॥ आहोस्विदं ततो नष्टं श्राद्धं शूद्रापतेरिव। स एवमुक्तः प्रत्याह प्राञ्जलिः सृञ्जयस्तदा॥ ३॥ एतत् श्रुत्वा महाबाहो धन्यमाख्यानमुत्तमम्। राजर्षीणां पुराणानां यज्वनां दक्षिणावताम्॥ ४॥ विस्मयेन हते शोके तमसीवार्क्कतेजसा। विपाप्मास्म्यव्यथोपेतो ब्रूहि किं करवाण्यहम्॥ ५॥

नारद उवाच। दिष्ट्यापहृतशोकस्त्वं वृणीष्वेह यदिच्छसि। तत्तत् प्रपत्स्यते सर्वं न मृषावादिनो वयम्॥ ६॥

सृञ्जय उवाच। एतेनैव प्रतीतोऽहं प्रसन्नो यद्भवान्मम। प्रसन्नो यस्य भगवान् न तस्यास्तीह दुर्लभम्॥ ७॥

नारद उवाच। पुनः ददामि ते पुत्रं दस्युभिर्निहतं वृथा। उद्धृत्य नरकात् कष्टात् पशुवत् प्रोक्षितं यथा॥ ८॥

व्यास उवाच। प्रादुरासीत्ततः पुत्रः सृञ्जयस्याद्भुतप्रभः। प्रसन्नेनर्षिणा दत्तः कुवेरतनयोपमः॥ ९॥ ततः सङ्गम्य पुत्रेण प्रीतिमानभवन्नृपः। ईजे च क्रतुभिः पुण्यैः समाप्तवरदक्षिणैः॥ १०॥ अकृतार्थश्च भीतश्च न च सान्नाहिको हतः। अयज्वाह्यनपत्यश्च ततोऽसौ जीवितः पुनः॥ ११॥ शूरो वीरः कृतार्थश्च प्रताप्यारीन् सहस्रशः। अभिमन्युर्गतो वीरः पृतनाभिमुखो हतः॥ १२॥ ब्रह्मचर्य्येण यान् कांश्चित् प्रज्ञया च श्रुतेन च। इष्टैश्च क्रतुभिर्यान्ति तांस्ते पुत्रोऽक्षयान् गतः॥ १३॥ विद्वांसः कर्मभिः पुण्यैः स्वर्गमीहन्ति नित्यशः। न तु स्वर्गादयं लोकः काम्यते स्वर्गवासिभिः॥ १४॥ तस्मात् स्वर्गगतं पुत्रमर्जुनस्य हतं रणे। न चेहानयितुं शक्यं किञ्चिदप्राप्य मोहितम्॥ १५॥ या योगिनो ध्यानविविक्तदर्शनाः प्रयान्ति याश्चोत्तम-

यज्विनो जनाः । तपोभिरिद्धैरनुयान्ति यान्तथा तामक्षयां ते तनयो गतो गतिम् ॥ १६ ॥ अन्तात् पुनर्भावगतो विराजते राजेव वीरो ह्यमृतात्मरश्मिभिः । तामैन्दवीमात्मतनुं द्विजैर्धितां गतोऽभिमन्युर्न स शोकमर्हति ॥ १७ ॥ एवं ज्ञात्वा स्थिरो भूत्वा जह्यरीन् धैर्य्यमाप्नुहि । जीवन्त एव नः शोच्या न तु स्वर्गगतानघ ॥ १८ ॥ शोचतो हि महाराज अघमेव विवर्द्धते । तस्माच्छोकं परित्यज्य श्रेयसे प्रयतेद्बुधः ॥ १९ ॥ प्रहर्षमभिमानञ्च सुखप्राप्तिञ्च चिन्तयेत् । एतद्बुद्ध्वा बुधाः शोकं न शोकः शोक उच्यते ॥ २० ॥ एवं विद्धि समुत्तिष्ठ प्रयतो भव मा शुचः । श्रुतस्ते सम्भवो मृत्योस्तपांस्यनुपमानि च ॥ २१ ॥ सर्वभूतमनत्वञ्च चञ्चलाश्च बिभूतयः । सृञ्जयस्य तु तं पुत्रं मृतं सञ्जीवितं पुनः ॥ २२ ॥ एवं विद्वन् महाराज मा शुचः साधु यास्यहम् । एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत ॥ २३ ॥ वागीशाने भगवति व्यासे व्यभ्रनभःप्रभे । गते मतिमतां श्रेष्ठे समाश्वास्य युधिष्ठिरम् ॥ २४ ॥ पूर्वेषां पार्थिवेन्द्राणां महेन्द्रप्रतिमौजसाम् । न्यायाधिगतवित्तानां तां श्रुत्वा यज्ञसम्पदम् ॥ २५ ॥ सम्पूज्य मनसा विद्वन् विशोकोऽभूद्युधिष्ठिरः । पुनश्चाचिन्तयद्दीनः किं स्विद्वक्ष्ये धन[illegible]यम् ॥ २६ ॥

इति द्रोणपर्व्वणि अभिमन्युवधपर्व्वणि षोड़शराजिके एकसप्ततोऽध्यायः ॥ ७१ ॥ समाप्तञ्च अभिमन्युवधपर्व्व ।

---

## अथ प्रतिज्ञापर्व्व ।

सञ्जय उवाच । तस्मिन्नहनि निर्वृत्ते घोरे प्राणभृतां क्षये । आदित्येऽस्तं गते श्रीमत् सन्ध्याकाल उपस्थिते ॥ १ ॥ व्यपयातेषु वासाय सैन्येषु भरतर्षभ । हत्वा संशप्तकव्रातान् दिव्यै-

रस्त्वैः कपिध्वजः ॥ २ ॥ प्रायात् स्वशिविरं जिष्णुर्जैत्रमास्थाय तं रथम् । गच्छन्नेव च गोविन्दं साश्रुकण्ठोऽभ्यभाषत ॥ ३ ॥ किं नु मे हृदयं त्रस्तं वाक् च सज्जति केशव । स्पन्दन्ति चाप्यनिष्टानि गात्रं सीदति चाप्युत ॥ ४ ॥ अनिष्टञ्चैव मे श्लिष्टं हृदयान्नापसर्पति । भुवि ये दिक्षु चात्युग्रा उत्पातास्त्रासयन्ति माम् ॥ ५ ॥ बहुप्रकारा दृश्यन्ते सर्वत्र वाघशंसिनः । अपि स्वस्ति भवेद्राज्ञः सामात्यस्य गुरोर्मम ॥ ६ ॥

वासुदेव उवाच । व्यक्तं शिवं तव भ्रातुः सामात्यस्य भविष्यति । मा शुचः किञ्चिदेवान्यत् स्तोकानिष्टं भविष्यति ॥ ७ ॥

सञ्जय उवाच । ततः सन्ध्यामुपास्यैव वीरौ वीरावसादने । कथयन्तौ रणे वृत्तं प्रयातौ रथमास्थितौ ॥ ८ ॥ ततः स्वशिविरं प्राप्तौ हतानन्दं हतत्विषम् । वासुदेवोऽर्जुनश्चैव कृत्वा कर्म सुदुष्करम् ॥ ९ ॥ ध्वस्ताकारं समालक्ष्य शिविरं परवीरहा । वीभत्सुरब्रवीत् कृष्णमस्वस्थहृदयस्ततः ॥ १० ॥ नदन्ति नाद्य तूर्य्याणि माङ्गल्यानि जनार्द्दन । मिश्रादुन्दुभिनिर्घोषैः शङ्खाश्चाडम्बरैः सह ॥ ११ ॥ वीणा नैवाद्य वाद्यन्ते शम्यातालस्वनैः सह । मङ्गल्यानि च गीतानि न गायन्ति पठन्ति च ॥ १२ ॥ स्तुतियुक्तानि रम्याणि ममानीकेषु वन्दिनः । योधाश्चापि हि मां दृष्ट्वा निवर्त्तन्ते ह्यधोमुखाः ॥ १३ ॥ कर्माणि च यथापूर्वं कृत्वा नाभिवदन्ति माम् । अपिस्वस्ति भवेदद्य भ्रातृभ्यो मम माधव ॥ १४ ॥ न हि शुध्यति मे भावो दृष्ट्वा स्वजनमाकुलम् । अपि पाञ्चालराजस्य विराटस्य च मानद ॥ १५ ॥ सर्वेषाञ्चैव योधानां सामग्र्यं स्यान्ममाच्युत । न च मामद्य सौभद्रः प्रहृष्टो भ्रातृभिः सह । रणादायान्तमुदितं प्रत्युद्याति हसन्निव ॥ १६ ॥

सञ्जय उवाच । एवं सङ्कथयन्तौ तौ प्रविष्टौ शिविरं स्वकम् । ददृशाते भृशास्वस्थान् पाण्डवान्नष्टचेतसः ॥ १७ ॥ दृष्ट्वा भ्रातॄंश्च

पुत्रांश्च विमना वानरध्वजः । अपश्यंश्चैव सौभद्रमिदं वचनमब्रवीत्
॥ १८ ॥ मुखवर्णोऽप्रसन्नो वः सर्वेषामेव लक्ष्यते । न चाभि-
मन्युं पश्यामि न च मां प्रतिनन्दथः ॥ १९ ॥ मया श्रुतश्च द्रोणेन
चक्रव्यूहो विनिर्मितः । न च वस्तस्य भेत्तास्ति विना सौभद्र-
मर्भकम् ॥ २० ॥ न चोपदिष्टस्तस्याःसौत्मयानीकाद्विनिर्गमः ।
कच्चिन्न बालो युष्माभिः परानीकं प्रवेशितः ॥ २१ ॥ भित्त्वानीकं
महेष्वासः परेषां बहुशो युधि । कच्चिन्न निहतः सङ्ख्ये सौभद्रः
परवीरहा ॥ २२ ॥ लोहिताक्षं महाबाहुं जातं सिंहमिवाद्रिषु ।
उपेन्द्रसदृशं ब्रूत कथमायोधने हतः ॥ २३ ॥ सुभद्रायाः प्रियं
पुत्रं द्रौपद्याः केशवस्य च । अम्बायाश्च प्रियं नित्यं कोऽवधीत्
कालमोहितः ॥ २४ ॥ सदृशो वृष्णिवीरस्य केशवस्य महात्मनः ।
विक्रमश्रुतिमाहात्म्यैः कथमायोधने हतः ॥ २५ ॥ वार्ष्णेयीदयितं
शूरं मया सततलालितम् । यदि पुत्रं न पश्यामि पश्यामि यम-
सादनम् ॥ २६ ॥ मृदुकुञ्चितकेशान्तं बालं बालमृगेक्षणम् ।
मत्तद्विरदविक्रान्तं शालपोतमिवोद्गतम् ॥ २७ ॥ स्मिताभिभाषिणं
शान्तं गुरुवाक्यकरं सदा । बाल्येऽप्यबालकर्माणं प्रियवाक्य-
ममत्सरम् ॥ २८ ॥ महोत्साहं महावीर्य्यं दीर्घराजीवलोचनम् ।
भक्तानुकम्पिनं दान्तं न च नीचानुसारिणम् ॥ २९ ॥ कृतज्ञं
ज्ञानसम्पन्नं कृतास्त्रमनिवर्त्तिनम् । युद्धाभिनन्दिनं नित्यं द्विषतां
भयवर्द्धनम् ॥ ३० ॥ स्वेषां प्रियहिते युक्तं पितॄणां जयगृद्धिनम् ।
न च पूर्वप्रहन्तारं सङ्ग्रामे नष्टसम्भ्रमम् ॥ ३१ ॥ यदि पुत्रं न
पश्यामि यास्यामि यमसादनम् । रथेषु गण्यमानेषु गणितं तं
महारथम् ॥ ३२ ॥ मयाध्यर्द्धगुणं सङ्ख्ये तरुणं बाहुशालिनम् ।
प्रद्युम्नस्य प्रियं नित्यं केशवस्य ममैव च ॥ ३३ ॥ यदि पुत्रं न
पश्यामि यास्यामि यमसादनम् । सुनसं सुललाटान्तं स्वक्षिभ्रू-
दशनच्छदम् ॥ ३४ ॥ अपश्यतस्तद्वदनं का शान्तिर्हृदयस्य मे ।

तन्त्रीस्वनसुखं रम्यं पुंस्कोकिलसमध्वनिम् ॥ ३५ ॥ अशृण्वतस्तस्य स्वनं का शान्तिर्हृदयस्य मे। रूपं चाप्रतिमं तस्य त्रिदशेष्वतिदुर्लभम् ॥ ३६ ॥ अपश्यतो हि वीरस्य का शान्तिर्हृदयस्य मे। अभिवादनदक्षं तं पितृणां वचने रतम् ॥ ३७ ॥ नाद्याहं यदि पश्यामि का शान्तिर्हृदयस्य मे। सुकुमारः सदा वीरो महार्हशयनोचितः ॥ ३८ ॥ भूमावनाथवच्छेते नूनं नाथवतां वरः। शयानं समुपासन्ति यं पुरा परमस्त्रियः ॥ ३९ ॥ भ्रमन्त्यो विप्रविद्धाङ्गमुपासन्त्यशिवाः शिवाः। यः पुरा बोध्यते सुप्तः सूतमागधवन्दिभिः ॥ ४० ॥ बोधयन्त्यद्य तं नूनं श्वापदा विकृतैः स्वनैः। छत्रच्छायासमुचितं तस्य तद्वदनं शुभम् ॥ ४१ ॥ नूनमद्य रजोध्वस्तं रणे रेणुः करिष्यति। हा पुत्रकावितृप्तस्य सततं पुत्रदर्शने ॥ ४२ ॥ भाग्यहीनस्य कालेन यथा मे नीयसे बलात्। साद्य संयमनी नूनं सदा सुकृतिनां गतिः ॥ ४३ ॥ स्वभाभिर्मोदिता रम्या त्वयात्यर्थं विराजते। नूनं वैवस्वतश्च त्वां वरुणश्च प्रियातिथिम् ॥ ४४ ॥ शतक्रतुर्धनेशश्च प्राप्तमर्चन्त्यभीरुकम्। एवं विलप्य बहुधा भिन्नपोतो वणिग्यथा ॥ ४५ ॥ दुःखेन महताविष्टो युधिष्ठिरमपृच्छत। कच्चित् स कदनं कृत्वा परेषां कुरुनन्दन ॥ ४६ ॥ स्वर्गतोऽभिमुखः सङ्ख्ये युध्यमानो नरर्षभैः। स नूनं बहुभिर्यत्तैर्युध्यमानो नरर्षभैः ॥ ४७ ॥ असहायः सहायार्थी मामनुध्यातवान् ध्रुवम्। पीड्यमानः शरैस्तीक्ष्णैः कर्णद्रोणकृपादिभिः ॥ ४८ ॥ नानालिङ्गैः सुधौताग्रैर्मम पुत्रोऽल्पचेतनः। इह मे स्यात् परित्राणं पितेति स पुनः पुनः ॥ ४९ ॥ इति विप्रलपन् मन्ये नृशंसैर्भुवि पातितः। अथवा मत्प्रसूतः स स्वस्रीयो माधवस्य च ॥ ५० ॥ सुभद्रायाञ्च संभूतो न चैवं वक्तुमर्हति। वज्रसारमयं नूनं हृदयं सुदृढं मम ॥ ५१ ॥ अपश्यतो दीर्घबाहुं रक्ताक्षं यन्न दीर्यते। कथम्बाले

महेष्वासा नृशंसा मर्म्मभेदिनः ॥ ५२ ॥ स्वस्रीये वासुदेवस्य मम पुत्रेऽक्षिपन् शरान् । यो मां नित्यमदीनात्मा प्रत्युद्गम्याभिनन्दति ॥ ५३ ॥ उपयान्तं रिपून् हत्वा सोऽद्य मां किं न पश्यति । नूनं स पतितः शेते धरायां रुधिरोक्षितः ॥ ५४ ॥ शोभयन्मेदिनीं गात्रैरादित्य इव पातितः । सुभद्रामनुशोचामि या पुत्रमपलायिनम् ॥ ५५ ॥ रणेऽभिनिहतं श्रुत्वा शोकार्त्ता वै विनङ्क्ष्यति । सुभद्रा वक्ष्यते किं मां अभिमन्युमपश्यती ॥ ५६ ॥ द्रौपदी चैव दुःखार्त्ते तेऽपि वक्ष्यामि किन्वहम् । वज्रसारमयं नूनं हृदयं यन्न यास्यति ॥ ५७ ॥ सहस्रधा वधूं दृष्ट्वा रुदतीं शोककर्षिताम् । दृप्तानां धार्त्तराष्ट्राणां सिंहनादो मया श्रुतः ॥ ५८ ॥ युयुत्सुश्चापि कृष्णेन श्रुतो वीरानुपालभन् । अशक्नुवन्तो वीभत्सुं बालं हत्वा महारथाः ॥ ५९ ॥ किं मोदध्वमधर्म्मज्ञाः पाण्डवं दृश्यतां बलम् । किन्तयोर्विप्रियं कृत्वा केशवार्ज्जुनयोर्मृधे ॥ ६० ॥ सिंहवन्नदथ प्रीताः शोककाल उपस्थिते । आगमिष्यति वः क्षिप्रं फलं पापस्य कर्म्मणः ॥ ६१ ॥ अधर्म्मोऽहि कृतस्तीव्रः कथं स्यादफलश्चिरम् । इति तान् परिभाषन् वै वैश्यापुत्रो महामतिः ॥ ६२ ॥ अपायाच्छस्त्रमुत्सृज्य कोपदुःखसमन्वितः । किमर्थमेतन्नाख्यातं त्वया कृष्ण रणे मम । अधक्ष्यन्तानहं क्रूरांस्तदा सर्व्वान् महारथान् ॥ ६३ ॥

सञ्जय उवाच । पुत्रशोकार्द्दितं पार्थं ध्यायन्तं साश्रुलोचनम् । निगृह्य वासुदेवस्तं पुत्राधिभिरभिप्लुतम् ॥ ६४ ॥ मैवमित्यब्रवीत् कृष्णस्तीव्रशोकसमन्वितम् । सर्व्वेषामेष वै पन्थाः शूराणामनिवर्त्तिनाम् ॥ ६५ ॥ क्षत्रियाणां विशेषेण येषां युद्धेन जीविका । एषा वै युद्ध्यमानानां शूराणामनिवर्त्तिनाम् ॥ ६६ ॥ विहिता धर्म्मशास्त्रज्ञैर्गतिर्म्मतिमतां वर । ध्रुवं हि युद्धे मरणं शूराणामपलायिनाम् ॥ ६७ ॥ गतः पुण्यकृतांल्लोकानभिमन्युर्न्न संशयः ।

एतच्च सर्ववीराणां काङ्क्षितं भरतर्षभ ॥ ६८ ॥ सङ्ग्रामेऽभिमुखो मृत्युं प्राप्नुयादिति मानद। स च वीरान् रणे हत्वा राजपुत्रान् महाबलान् ॥ ६९ ॥ वीरैराकाङ्क्षितं मृत्युं सम्प्राप्तोऽभिमुखं रणे। मा शुचः पुरुषव्याघ्र पूर्वैरेष सनातनः ॥ ७० ॥ धर्म्मकृद्भिः कृतो धर्मः क्षत्रियाणां रणे क्षयः। इमे ते भ्रातरः सर्वे दीना भरतसत्तम ॥ ७१ ॥ त्वयि शोकसमाविष्टे नृपाश्च सुहृदस्तव। एतांश्च वचसा साम्ना समाश्वासय मानद ॥ ७२ ॥ विदितं वेदितव्यं ते न शोकं कर्त्तुमर्हसि। एवमाश्वासितः पार्थः कृष्णेनाद्भुतकर्मणा ॥ ७३ ॥ ततोऽब्रवीत्तदा भ्रातॄन् सर्वान् पार्थः सगद्गदान्। स दीर्घबाहुः पृथ्वीस दीर्घराजीवलोचनः ॥ ७४ ॥ अभिमन्युर्यथावृत्तः श्रोतुमिच्छाम्यहं तथा। सनागस्यन्दनहयान् द्रक्ष्यध्वं निहतान्मया ॥ ७५ ॥ सङ्ग्रामे सानुबन्धांस्तान् मम पुत्रस्य वैरिणः। कथञ्च वः कृतास्त्राणां सर्वेषां शस्त्रपाणिनाम् ॥ ७६ ॥ सौभद्रो निधनं गच्छेद्वज्रिणापि समागतः। यद्येवमहमज्ञास्यमशक्तान्रक्षणे मम ॥ ७७ ॥ पुत्रस्य पाण्डुपाञ्चालान् मया गुप्तो भवेत्ततः। कथञ्च वै रथस्थानां शरवर्षाणि मुञ्चताम् ॥ ७८ ॥ नीतोऽभिमन्युर्निधनं कदर्थीकृत्य वः परैः। अहो वः पौरुषं नास्ति न च वोऽस्ति पराक्रमः ॥ ७९ ॥ यत्राभिमन्युः समरे पश्यतां वो निपातितः। आत्मानमेव गर्हेयं यदहं वै सुदुर्बलान् ॥ ८० ॥ युष्मानाज्ञाय निर्यातो भीरूनकृतनिश्चयान्। आहोस्वित् भूषणार्थानि वर्मशस्त्रायुधानि वः ॥ ८१ ॥ वाचश्च वक्तुं संसत्सु मम पुत्रमरक्षताम्। एवमुक्त्वा ततो वाक्यं तिष्ठंश्चापवरासिमान् ॥ ८२ ॥ न स्माशक्यत बीभत्सुः केनचित् प्रसमीक्षितुम्। तमन्तकमिव क्रुद्धं निःश्वसन्तं मुहुर्मुहुः ॥ ८३ ॥ पुत्रशोकाभिसन्तप्तमश्रुपूर्णमुखन्तदा। न भाषितुं शक्नुवन्ति द्रष्टुं वा सुहृदोऽर्जुनम् ॥ ८४ ॥ अन्यत्र वासुदेवाद्वा ज्येष्ठाद्वा पाण्डु-

नन्दनात् । सर्वास्ववस्थासु हि तावर्ज्जुनस्य मनोऽनुगौ ॥ ८५ ॥
बहुमानात् प्रियत्वाच्च तावेनं वक्तुमर्हतः । ततस्तं पुत्रशोकेन भृशं
पीड़ितमानसम् । राजीवलोचनं क्रुद्धं राजा वचनमब्रवीत् ॥८६॥

इति द्रोणपर्वणि प्रतिज्ञापर्वणि अर्ज्जुनकोपे
द्विसप्ततोऽध्यायः ॥ ७२ ॥

---

युधिष्ठिर उवाच । त्वयि याते महाबाहो संशप्तकबलं प्रति ।
स यत्नमकरोत्तीव्रमाचार्य्यो ग्रहणे मम ॥ १ ॥ व्यूढ़ानीकं वयं
द्रोणं वारयामः स्म सर्वशः । प्रतिव्यूह्य रथानीकं यतमानं तथा-
रणे ॥ २ ॥ स वार्य्यमाणो बहुभिर्मयि चापि सुरक्षिते । अस्मा-
नभिजघानाशु पीड़यन्निशितैः शरैः ॥ ३ ॥ ते पीड्यमाना द्रोणेन
द्रोणानीकं न शक्नुमः । प्रतिवीक्षितुमप्याजौ भेत्तुं तत् कुत एव
तु ॥ ४ ॥ वयं त्वप्रतिमं वीर्य्ये सर्वे सौभद्रमात्मजम् । उक्तवन्तः
स्म तं तात भिन्ध्यनीकमिति प्रभो ॥ ५ ॥ स तथा चोदितोऽस्माभिः
सदश्व इव वीर्य्यवान् । असह्यमपि तं भारं वोढुमेवोपचक्रमे ॥६॥
स तपास्त्रोपदेशेन वीर्य्येण च समन्वितः । प्राविशत्तद्बलं बालः
सुपर्ण इव सागरम् ॥ ७ ॥ तेऽनुयाता वयं वीरं सात्वतीपुत्र-
माहवे । प्रवेष्टुकामास्तेनैव येन स प्राविशच्चमूम् ॥ ८ ॥ ततः
सैन्धवको राजा क्षुद्रस्तात जयद्रथः । वरदानेन रुद्रस्य सर्वान्नः
समवारयत् ॥ ९ ॥ ततो द्रोणः कृपः कर्णो द्रौणिः कौशल्य एव
च । कृतवर्म्मा च सौभद्रं षड्रथाः पर्य्यवारयन् ॥ १० ॥ परि-
वार्य्य तु तैः सर्वैर्युधि बालो महारथैः । यतमानः परं शक्त्या
बहुभिर्विरथीकृतः ॥ ११ ॥ ततो दौःशासनिः क्षिप्रं ततस्तै-
र्विरथीकृतम् । संशयं परमं प्राप्य दिष्टान्तेनाभ्ययोजयत् ॥ १२ ॥
स तु हत्वा सहस्राणि नराश्वरथदन्तिनाम् । अष्टौ रथसहस्राणि

नव दन्तिशतानि च ॥ १३ ॥ राजपुत्रसहस्रे द्वे वीरांश्चालक्षितान् बहून्। वृहद्दलञ्च राजानं स्वर्गनाशौ प्रयोज्य ह ॥ १४ ॥ ततः परमधर्मात्मा दिष्टान्तमुपजग्मिवान्। एतावदेव निर्वृत्तमस्माकं शोकवर्द्धनम् ॥ १५ ॥ स चैवं पुरुषव्याघ्रः स्वर्गलोकमवाप्तवान्। ततोऽर्ज्जुनो वचः श्रुत्वा धर्मराजेन भाषितम् ॥ १६ ॥ हा पुत्र इति निःश्वस्य व्यथितो न्यपतद्भुवि। विषण्णवदनाः सर्वे परिवार्य्य धनञ्जयम् ॥ १७ ॥ नेत्रैरनिमिषैर्दीनाः प्रत्यवैक्षन् परस्परम्। प्रतिपद्य ततः संज्ञां वासविः क्रोधमूर्च्छितः ॥ १८ ॥ कम्पमानो ज्वरेणेव निःश्वसंश्च मुहुर्मुहुः। पाणिं पाणौ विनिष्पिष्य श्वसमानोऽश्रुनेत्रवान्। उन्मत्त इव विप्रेक्षन् इदं वचनमब्रवीत् ॥ १९ ॥

अर्ज्जुन उवाच। सत्यं वः प्रतिजानामि श्वो निहन्ता जयद्रथम्। न चेद्वधभयाद्भीतो धार्त्तराष्ट्रान् प्रहास्यति ॥ २० ॥ न चास्मान् शरणं गच्छेत् कृष्णं वा पुरुषोत्तमम्। भवन्तं वा महाराज श्वोऽस्मि हन्ता जयद्रथम् ॥ २१ ॥ धार्त्तराष्ट्रप्रियकरं मयि विस्मृतसौहृदम्। पापं बालवधे हेतुं सोऽस्मि हन्ता जयद्रथम् ॥ २२ ॥ रक्षमाणाश्च तं सङ्ख्ये ये मां योत्स्यन्ति केचन। अपि द्रोणः कृपो राजन् छादयिष्यामि तान् शरैः॥ २३ ॥ यद्येतदेवं सङ्ग्रामे न कुर्य्यां पुरुषर्षभाः। मा स्म पुण्यकृतांल्लोकान् प्राप्नुयां शूरसत्तमाः॥ २४ ॥ ये लोका मातृहन्तॄणां ये चापि पितृघातिनाम्। गुरुदाररतानां ये पिशुनानाञ्च ये सदा ॥ २५ ॥ साधूनसूयतां ये च ये चापि परिवादिनाम्। ये च निक्षेपहर्त्तॄणां ये च विश्वासघातिनाम् ॥ २६ ॥ भुक्तपूर्वां स्त्रियं ये च निन्दतामघशंसिनाम्। ब्रह्मघ्नानाञ्च ये लोका ये च गोघातिनामपि ॥ २७ ॥ पायसं वा यवान्नं वा शाकं कृशरमेव वा। संयावापूपमांसानि ये च लोका वृथाश्नताम् ॥ २८ ॥ तानद्यै-

माधिगच्छेयं न चेद्धन्यां जयद्रथम् । वेदाध्यायिनमत्यर्थं संशितं
वा द्विजोत्तमम् ॥ २९ ॥ अवमन्यमानो यान् याति वृद्धान् साधून्
गुरूंस्तथा । स्पृशतो ब्राह्मणान् गाञ्च पादेनाग्निञ्च या भवेत्
॥ ३० ॥ अप्सु श्लेष्म पुरीषञ्च मूत्रं च मुञ्चतां गतिम् । तां
गच्छेयं गतिं कष्टां न चेद्धन्यां जयद्रथम् ॥ ३१ ॥ नग्नस्य स्नाय-
मानस्य या च वन्ध्यातिथेर्गतिः । उत्कोचिनां मृषोक्तीनां वञ्च-
कानां च या गतिः ॥ ३२ ॥ स्वात्मापहारिणां या च या च
मिथ्याभिशंसिनाम् । भृत्यैः सन्दृश्यमानानां पुत्रदाराश्रितैस्तथा
॥ ३३ ॥ असंविभज्य क्षुद्राणां या गतिर्मिष्टमश्नताम । तां
गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथम् ॥ ३४ ॥ संश्रितं चापि
यस्त्यक्त्वा साधुं तद्वचने रतम् । न बिभर्त्ति नृशंसात्मा निन्दते
चोपकारिणम् ॥ ३५ ॥ अर्हते प्रातिवेश्याय श्राद्धं यो न ददाति
च । अनर्हेभ्यश्च यो दद्याद्वृषलीपतयस्तथा ॥ ३६ ॥ मद्यपो
भिन्नमर्य्यादः कृतघ्नो भ्रातृनिन्दकः । तेषां गतिमियां क्षिप्रं न
चेद्धन्यां जयद्रथम ॥ ३७ ॥ धर्म्मादपेता ये चान्ये मया नात्रानु-
कीर्त्तिताः । ये चानुकीर्त्तितास्तेषां गतिं क्षिप्रमवाप्नुयाम् ॥३८॥
यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथम । इमां चाप्यपरां
भूयः प्रतिज्ञां मे निबोधत ॥ ३९ ॥ यद्यस्मिन्न हते पापे सूर्य्यो-
ऽस्तमुपयास्यति । इहैव सम्प्रवेष्टाहं ज्वलितं जातवेदसम् ॥४०॥
असुरसुरमनुष्याः पक्षिणो वोरगा वा पितृरजनिचरा वा ब्रह्म-
देवर्षयो वा । चरमचरमपीदं यत् परं चापि तस्मात्तदपि मम
रिपुं तं रक्षितुं नैव शक्ताः ॥ ४१ ॥ यदि विशति रसातलं
तदग्र्यं वियदपि देवपुरं दितेः पुरं वा । तदपि शरशतैरहं
प्रभाते भृशमभिमन्युरिपोः शिरोऽभिहर्त्ता ॥ ४२ ॥ एवमुक्त्वा
विचिक्षेप गाण्डीवं सव्यदक्षिणम् । तस्य शब्दमतिक्रम्य धनुः-
शब्दोऽस्पृशद्दिवम् ॥ ४३ ॥ अर्जुनेन प्रतिज्ञाते पाञ्चजन्यं जना-

ईनः । प्रदध्मौ तत्र संक्रुद्धो देवदत्तञ्च फाल्गुनः ॥ ४४ ॥ स पाञ्चजन्योऽच्युतवक्त्रवायुना भृशं सुपूर्णोदरनिःसृतध्वनिः । जगत् स पातालवियद्दिगीश्वरं प्रकम्पयामास युगात्यये यथा ॥ ४५ ॥ ततो वादित्रघोषाश्च प्रादुरासन् सहस्रशः । सिंहनादाश्च पाण्डूनां प्रतिज्ञाते महात्मना ॥ ४६ ॥

इति द्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनप्रतिज्ञायां
त्रिसप्ततोऽध्यायः ॥ ७३ ॥

---

सञ्जय उवाच। श्रुत्वा तु तं महाशब्दं पाण्डूनां जयवृद्धिनाम् । चारैः प्रवेदिते तत्र समुत्थाय जयद्रथः ॥ १ ॥ शोकसम्मूढ़हृदयो दुःखेनाभिपरिप्लुतः । मज्जमान इवागाधे विपुले शोकसागरे ॥ २ ॥ जगाम समितिं राज्ञां सैन्धवो विमृशन् बहु । स तेषां नरदेवानां सकाशे परिदेवयन् ॥ ३ ॥ अभिमन्योः पितुर्भीतः सव्रीड़ो वाक्यमब्रवीत् । योऽसौ पाण्डोः किल क्षेत्रे जातः शक्रेण कामिना ॥ ४ ॥ स निनीषति दुर्बुद्धिर्मां किलैष यमक्षयम् । तत् स्वस्ति वोऽस्तु यास्यामि स्वगृहं जीवितेप्सया ॥५॥ अथवास्त्रप्रतिबलास्त्रात मां क्षत्रियर्षभाः । पार्थेन प्रार्थितं वीरास्ते सन्दत्त ममाभयम् ॥ ६ ॥ द्रोणदुर्य्योधनकृपाः कर्णमद्रेशवाह्लिकाः । दुःशासनादयः शक्तास्त्रातुमप्यन्तकार्द्दितम् ॥ ७ ॥ किमङ्ग पुनरेकेन फाल्गुनेन जिघांसता । न त्रायेयुर्भवन्तो मां समस्ताः पतयः क्षितेः ॥ ८ ॥ प्रहर्षं पाण्डवेयानां श्रुत्वा मम महद्भयम् । सीदन्ति मम गात्राणि मुमूर्षोरिव पार्थिवाः ॥ ९ ॥ वधो नूनं प्रतिज्ञातो मम गाण्डीवधन्वना । तथाहि हृष्टाः क्रोशन्ति शोककाले स्म पाण्डवाः ॥ १० ॥ तत्र देवा न गन्धर्वा नासुरोरगराक्षसाः । उत्सहन्तेऽन्यथाकर्त्तुं कुत एव नराधिपाः ॥ ११ ॥

तस्मान्मामनुजानीत भद्रं वोऽस्तु नरर्षभाः । अदर्शनं गमिष्यामि न मां द्रक्ष्यन्ति पाण्डवाः ॥ १२ ॥ एवं विलपमानं तं भया द्व्याकुलचेतसम् । आत्मकार्य्यगरीयस्त्वाद्राजा दुर्य्योधनोऽब्रवीत् ॥ १३ ॥ न भेतव्यं नरव्याघ्र कोहि त्वां पुरुषर्षभ । मध्ये क्षत्रियवीराणां तिष्ठन्तं प्रार्थयेद्युधि ॥ १४ ॥ अहं वैकर्त्तनः कर्णश्चित्रसेनो विविंशतिः । भूरिश्रवाः शलः शल्यो वृषसेनो दुरासदः ॥ १५ ॥ पुरुमित्रो जयो भोजः काम्बोजश्च सुदक्षिणः । सत्यव्रतोमहाबाहुर्विकर्णो दुर्मुखश्च ह ॥ १६ ॥ दुःशासनः सुबाहुश्च कलिङ्गश्चाप्युदायुधः । विन्दानुविन्दावावन्त्यौ द्रोणो द्रौणिश्च सौवलः ॥ १७ ॥ एते चान्ये च बहवो नानाजनपदेश्वराः । ससैन्यास्त्वाभियास्यन्ति व्येतु ते मनसो ज्वरः ॥ १८ ॥ त्वञ्चापि रथिनां श्रेष्ठः स्वयं शूरोऽमितद्युते । स कथं पाण्डवेयेभ्यो भयं पश्यसि सैन्धव ॥ १९ ॥ अक्षौहिण्यो दशैका च मदीयास्तव रक्षणे । यत्नाद्योत्स्यन्ति माभैस्त्वं सैन्धव व्येतु ते भयम् ॥ २० ॥

सञ्जय उवाच । एवमाश्वासितो राजन् पुत्रेण तव सैन्धवः । दुर्य्योधनेन सहितो द्रोणं रात्रावुपागमत् ॥ २१ ॥ उपसङ्ग्रहणं कृत्वा द्रोणाय च विशाम्पते । उपोपविश्य प्रणतः पर्य्यपृच्छदिदं तदा ॥ २२ ॥ निमित्ते दूरपातित्वे लघुत्वे दृढ़वेधने । मम ब्रवीतु भगवान् विशेषं फाल्गुनस्य च ॥ २३ ॥ विद्याविशेषमिच्छामि ज्ञातुमाचार्य्य तत्त्वतः । अर्जुनस्यात्मनश्चैव यथातथ्यं प्रचक्ष्व मे ॥२४॥

द्रोण उवाच । सममाचार्य्यकं तात तव चैवार्जुनस्य च । योगाद्दुःखोषितत्वाच्च तस्मात्त्वत्तोधिकोऽर्जुनः ॥ २५ ॥ न तु ते युधि सन्त्रासः कार्य्यः पार्थात् कथञ्चन । अहं हि रक्षिता तात भयात्त्वां नात्र संशयः ॥ २६ ॥ न हि मद्बाहुगुप्तस्य प्रभवन्त्यमरा अपि । व्यूहयिष्यामि तं व्यूहं यं पार्थो न तरिष्यति ॥ २७ ॥ तस्माद्युध्यस्व माभैस्त्वं स्वधर्ममनुपालयन् । पितृपैतामहं मार्ग-

महुयाहि महारथ॥ २८॥ अधीत्य विधिवद्वेदानग्नयः सुहुता-स्त्वया। इष्टं च बहुभिर्यज्ञैर्न ते मृत्युर्भयङ्करः॥ २९॥ दुर्लभं मानुषैर्मन्दैर्महाभाग्यमवाप्य तु। भुजवीर्य्यार्जितान् लोकान् दिव्यान् प्राप्स्यस्यनुत्तमान्॥ ३०॥ कुरवः पाण्डवाश्चैव वृष्णयोऽन्ये च मानवाः। अहञ्च सहपुत्रेण अध्रुवा इति चिन्त्यताम्॥ ३१॥ पर्य्यायेण वयं सर्वे कालेन बलिना हताः। परलोकं गमिष्यामः स्वैः स्वैः कर्मभिरन्विताः॥ ३२॥ तपस्तप्त्वा तु यान् लोकान् प्राप्नुवन्ति तपस्विनः। क्षत्रधर्माश्रिता वीराः क्षत्रियाः प्राप्नुवन्ति तान्॥ ३३॥ एवमाश्वासितो राजा भारद्वाजेन सैन्धवः। अपानुदद्भयं पार्थाद्युद्धाय च मनो दधे॥ ३४॥ ततः प्रहर्षः सैनानां तवाप्यासीद्विशाम्पते। वादित्राणां ध्वनिश्चोग्रः सिंहनादरवैः सह॥ ३५॥

इति द्रोणपर्वणि प्रतिज्ञापर्वणि जयद्रथाश्वासे चतुःसप्ततोऽध्यायः॥ ७४॥

---

सञ्जय उवाच। प्रतिज्ञाते तु पार्थेन सिन्धुराजवधे तदा। वासुदेवो महाबाहुर्धनञ्जयमभाषत॥ १॥ भ्रातॄणां मतमाज्ञाय त्वया चापि प्रतिश्रुतम्। सैन्धवञ्चास्मि हन्तेति तत्साहसमिदं कृतम्॥ २॥ असम्मन्त्र्य मया सार्द्धमतिभारोऽयमुद्यतः। कथं नु सर्वलोकस्य नावहास्या भवेमहि॥ ३॥ धार्त्तराष्ट्रस्य शिविरे मया प्रणिहिताश्चराः। त इमे शीघ्रमागम्य प्रवृत्तिं वेदयन्ति नः॥ ४॥ त्वया वै सम्प्रतिज्ञाते सिन्धुराजवधे प्रभो। सिंहनादः सवादित्रः सुमहानिह तैः श्रुतः॥ ५॥ तेन शब्देन वित्रस्ता धार्त्तराष्ट्राः सबान्धवाः। नाकस्मात् सिंहनादोऽयमिति मत्वा व्यवस्थिताः॥ ६॥ सुमहाञ्छब्दसम्पातः कौरवाणां महाभुज।

आसीन्नागाश्वपत्तीनां रथघोषश्च भैरवः॥ ७॥ अभिमन्योर्वधं श्रुत्वा ध्रुवमार्त्तो धनञ्जयः। रात्रौ निर्य्यास्यति क्रोधादिति मत्वा व्यवस्थिताः॥ ८॥ तैस्तद्भिरियं सत्या श्रुता सत्यव्रतैस्तव। प्रतिज्ञा सिन्धुराजस्य वधे राजीवलोचन॥ ९॥ ततो विमनसः सर्व्वे त्रस्ताः क्षुद्रमृगा इव। आसन् सुयोधनामात्याः स च राजा जयद्रथः॥ १०॥ अथोत्थाय सहामात्यैर्दीनः शिविरमात्मनः। आयात् सौवीरसिन्धूनामीश्वरो भृशदुःखितः॥ ११॥ समन्त्रकाले सम्मन्त्र्य सर्व्वानैश्रेयसीः क्रियाः। सुयोधनमिदं वाक्यमब्रवीद्राजसंसदि॥ १२॥ ममासौ पुत्रहन्तेति श्वोऽभियाता धनञ्जयः। प्रतिज्ञातो हि सेनाया मध्ये तेन वधो मम॥ १३॥ तान्न देवा न गन्धर्व्वा नासुरोरगराक्षसाः। उत्सहन्तेऽन्यथाकर्त्तुं प्रतिज्ञां सव्यसाचिनः॥ १४॥ ते मां रक्षत सङ्ग्रामे मा वो मूर्द्ध्नि धनञ्जयः। पदं कृत्वाप्नुयाल्लक्ष्यं तस्मादत्र विधीयताम्॥ १५॥ अथरक्षा न मे सम्यक् क्रियते कुरुनन्दन। अनुजानीहि मां राजन् गमिष्यामि गृहान् प्रति॥ १६॥ एवमुक्तस्त्ववाक्शीर्षो विमनाः स सुयोधनः। श्रुत्वा तं सभयं तस्य ध्यानमेवान्वपद्यत॥ १७॥ तमार्त्तमभिसम्प्रेक्ष्य राजा किल ससैन्धवः। मृदु चात्महितं चैव सापेक्षमिदमुक्तवान्॥ १८॥ नेह पश्यामि भवतां तथा वीर्य्यं धनुर्द्धरम्। योऽर्जुनस्यास्त्रमस्त्रेण प्रतिहन्यान्महाहवे॥ १९॥ वासुदेवसहायस्य गाण्डीवन्धुन्वतो धनुः। कोऽर्जुनस्याग्रतस्तिष्ठेत् साक्षादपि शतक्रतुः॥ २०॥ महेश्वरोऽपि पार्थेन श्रूयते योधितः पुरा। पदातिना महावीर्य्यो गिरौ हिमवति प्रभुः॥ २१॥ दानवानां सहस्राणि हिरण्यपुरवासिनाम्। जघानैकरथेनैव देवराजप्रचोदितः॥२२॥ समायुक्तो हि कौन्तेयो वासुदेवेन धीमता। सामरानथ लोकांस्त्रीन् हन्यादिति मतिर्मम॥ २३॥ सोऽहमिच्छाम्यनुज्ञातुं रक्षितं वा महात्मना।

द्रोणेन सहपुत्रेण वीरेण यदि मन्यसे ॥ २४ ॥ स राजा स्वयमाचार्य्यं भृशमभ्यर्थितोऽर्जुन । सन्निधानं च विहितं रथाश्वाः किल सज्जिताः ॥ २५ ॥ कर्णो भूरिश्रवा द्रौणिर्वृषसेनश्च दुर्जयः कृपश्च मद्रराजश्च षडेते स्युः पुरोगमाः ॥ २६ ॥ शकटः पद्मकश्चार्द्धव्यूहो द्रोणेन निर्मितः । पद्मकर्णिकमध्यस्थः सूचीपार्श्वे जयद्रथः ॥ २७ ॥ स्थास्यते रक्षितो वीरैः सिन्धुराट् युद्धदुर्मदः । धनुष्यस्त्रे च वीर्य्ये च प्राणे चैव तथौरसे ॥ २८ ॥ अविषह्यतमा ह्येते निश्चिताः पार्थ षड्रथाः । एतानजित्वा षड्रथान् नैव प्राप्यो जयद्रथः ॥ २९ ॥ तेषामेकैकशो वीर्य्यं षण्णान्त्वमनुचिन्तय । सहिता हि नरव्याघ्र न शक्या जेतुमञ्जसा ॥ ३० ॥ भूयस्तु मन्त्रयिष्यामो नीतिमात्महिताय वै । मन्त्रज्ञैः सचिवैः सार्द्धं सुहृद्भिः कार्य्यसिद्धये ॥ ३१ ॥

इति द्रोणपर्वणि प्रतिज्ञापर्वणि कृष्णवाक्ये
पञ्चसप्ततोऽध्यायः ॥ ७५ ॥

---

अर्जुन उवाच । षड्रथान् धार्त्तराष्ट्रस्य मन्यसे यान् बलाधिकान् । तेषां वीर्य्यं ममार्द्धेन न तुल्यमिति मे मतिः ॥ १ ॥ अस्त्रमस्त्रेण सर्व्वेषामेतेषां मधुसूदन । मया द्रक्ष्यन्ति निर्भिन्नं जयद्रथवधैषिणा ॥ २ ॥ द्रोणस्य मिषतश्चाहं सगणस्य विलप्यतः । मूर्द्धानं सिन्धुराजस्य पातयिष्यामि भूतले ॥ ३ ॥ यदि साध्याश्च रुद्राश्च वसवश्च सहाश्विनः । मरुतश्च सहेन्द्रेण विश्वेदेवाः सहेश्वराः ॥ ४ ॥ पितरः सहगन्धर्वाः सुपर्णाः सागराद्रयः । द्यौर्वियत् पृथिवी चेयं दिशश्च सदिगीश्वराः ॥ ५ ॥ ग्राम्यारण्यानि भूतानि स्थावराणि चराणि च । त्रातारः सिन्धुराजस्य भवन्ति मधुसूदन ॥ ६ ॥ तथापि वाणैर्निहतं श्वो द्रष्टासि मया

रणे। सत्येन च शपे कृष्ण तथैवायुधमालभे ॥ ७ ॥ यस्य गोप्ता
महेष्वासस्तस्य पापस्य दुर्मतेः। तमेव प्रथमं द्रोणमभियास्यामि
केशव ॥ ८ ॥ तस्मिन् द्यूतमिदं बद्धं मन्यते स सुयोधनः।
तस्मात्तस्यैव सेनाग्रं भित्त्वा यास्यामि सैन्धवम् ॥ ९ ॥ द्रष्टासि
श्वो महेष्वासान् नाराचैस्तिग्मतेजितैः। शृङ्गाणीव गिरेर्वज्रै-
र्दीर्य्यमाणान्मया युधि ॥ १० ॥ नरनागाश्वदेहेभ्यो विस्रविष्यति
शोणितम्। पतद्भिः पतितेभ्यश्च विभिन्नेभ्यः शितैः शरैः ॥ ११ ॥
गाण्डीवप्रेषिता बाणाः मनोऽनिलसमा जवे। नृनागाश्वान्
विदेहासून् कर्त्तारश्च सहस्रशः ॥ १२ ॥ यमात् कुवेराद्वरुणा-
दिन्द्राद्रुद्राच्च यन्मया। उपात्तमस्त्रं घोरं तद्द्रष्टारोऽत्र नरा
युधि ॥ १३ ॥ ब्राह्मेणास्त्रेण चास्त्राणि हन्यमानानि संयुगे।
मया द्रष्टासि सर्व्वेषां सैन्धवस्याभिरक्षिणाम् ॥ १४ ॥ शरवेग-
समुत्कृत्तैराज्ञां केशव मूर्द्धभिः। आस्तीर्य्यमाणां पृथिवीं द्रष्टासि
श्वो मया युधि ॥ १५ ॥ क्रव्यादांस्तर्पयिष्यामि द्रावयिष्यामि
शात्रवान्। सुहृदो नन्दयिष्यामि प्रमथिष्यामि सैन्धवम् ॥ १६ ॥
वह्वागस्कृत्कुसम्बन्धी पापदेशसमुद्भवः। मया सैन्धवको राजा हतः
स्वान् शोचयिष्यति ॥ १७ ॥ सर्व्वक्षीराणि भोक्तारं पापाचारं
रणाजिरे। मया सराजकं बाणैर्भिन्नं द्रक्ष्यसि सैन्धवम् ॥ १८ ॥
तथा प्रभाते कर्त्तास्मि यथा कृष्ण सुयोधनः। नान्यं धनुर्द्धरं
लोके मंस्यते मत्समं युधि ॥ १९ ॥ गाण्डीवञ्च धनुर्द्दिव्यं योद्धा
चाहं नरर्षभ। त्वञ्च यन्ता हृषीकेश किं नु स्यादजितं मया ॥२०॥
तव प्रसादाद्भगवन् किं नावाप्तं रणे मम। अविषह्यं हृषीकेश
किञ्जानन्मां विगर्हसे ॥ २१ ॥ यथा लक्ष्मीः स्थिरा चन्द्रे समुद्रे
च यथा जलम्। एवमेतां प्रतिज्ञां मे सत्यां विद्धि जनार्द्दन ॥ २२ ॥
मावमंस्था ममास्त्राणि मावमंस्था धनुर्दृढम्। मावमंस्था बलं
वाह्वोर्मावमंस्था धनञ्जयम् ॥ २३ ॥ तथाभियामि सङ्ग्रामं न

जीर्य्यं जयामि च। तेन सत्येन सङ्ग्रामे हतं विद्धि जयद्रथम् ॥ २४ ॥ ध्रुवं वै ब्राह्मणे सत्यं ध्रुवा साधुषु सन्नतिः। श्रीर्ध्रुवापि च यज्ञेषु ध्रुवो नारायणे जयः ॥ २५ ॥

सञ्जय उवाच। एवमुक्त्वा हृषीकेशं स्वयमात्मानमात्मनः। सन्दिदेशार्जुनो नर्दन् वासविः केशवं प्रभुम् ॥ २६ ॥ यथा प्रभातां रजनीं कल्पितः स्याद्रथो मम। तथा कृष्ण त्वया कार्य्यं कार्य्यं हि महदुद्यतम् ॥ २७ ॥

इतिद्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनवाक्ये षट्सप्ततोऽध्यायः ॥ ७६ ॥

---

सञ्जय उवाच। तां निशां शोकदुःखार्त्तौ निश्वसन्ताविवोरगौ। निद्रां नैवोपलेभाते वासुदेवधनञ्जयौ ॥ १ ॥ नरनारायणौ क्रुद्धौ ज्ञात्वा देवाः सवासवाः। व्यथिताश्चिन्तयामासुः किंस्विदेतद्भविष्यति ॥ २ ॥ ववुश्च दारुणा वाता रूक्षा घोराभिशंसिनः। सकबन्धस्तथादित्ये परिघः समदृश्यत ॥ ३ ॥ शुष्काशन्यश्च निष्पेतुः सनिर्घाताः सविद्युतः। चचाल चापि पृथिवी सशैलवनकानना ॥ ४ ॥ चुक्षुभुश्च महाराज सागरा मकरालयाः। प्रतिस्रोतः प्रवृत्ताश्च तथा गन्तुं समुद्रगाः ॥ ५ ॥ रथाश्वनरनागानां प्रवृत्तमधरोत्तरम्। क्रव्यादानां प्रमोदार्थं यमराष्ट्रविवृद्धये ॥ ६ ॥ वाहनानि शकृन्मूत्रे मुमुचू रुरुदुश्च ह। तान्दृष्ट्वा दारुणान् सर्व्वानुत्पातान् लोमहर्षणान् ॥ ७ ॥ सर्व्वे ते व्यथिताः सैन्यास्त्वदीया भरतर्षभ। श्रुत्वा महाबलस्योग्रां प्रतिज्ञां सव्यसाचिनः ॥ ८ ॥ अथ कृष्णं महाबाहुरब्रवीत्पाकशासनिः। आश्वासय सुभद्रां त्वं भगिनीं स्नुषया सह ॥ ९ ॥ स्नुषाश्वास्या वयस्याश्च विशोकाः कुरु माधव। साम्ना सत्येन

युक्तेन वचसाश्वासय प्रभो ॥ १० ॥ ततोऽर्जुनगृहं गत्वा वासुदेवः सुदुर्मनाः । भगिनीं पुत्रशोकार्त्तामाश्वासयत दुःखिताम् ॥ ११ ॥

वासुदेव उवाच । मा शोकं कुरु वार्ष्णेयि कुमारं प्रति सस्नुषा । सर्वेषां प्राणिनां भीरु निष्ठैका कालनिर्मिता ॥ १२ ॥ कुलेजातस्य धीरस्य क्षत्रियस्य विशेषतः । सदृशं मरणं ह्येतत्तव पुत्रस्य माशुचः ॥ १३ ॥ दिष्ट्या महारथो धीरः पितुस्तुल्यपराक्रमः । क्षात्रेण विधिना प्राप्तो वीराभिलषितां गतिम् ॥ १४ ॥ जित्वा सुबहुशः शत्रून् प्रेषयित्वा च मृत्यवे । गतः पुण्यकृतान् लोकान् सर्वकामदुहोऽक्षयान् ॥ १५ ॥ तपसा ब्रह्मचर्य्येण श्रुतेन प्रज्ञयापि च । सन्तो यां गतिमिच्छन्ति तां प्राप्तस्तव पुत्रकः ॥ १६ ॥ वीरसूर्वीरपत्नी त्वं वीरजा वीरबान्धवा । माशुचस्तनयं भद्रे गतः स परमां गतिम् ॥ १७ ॥ प्राप्स्यते चाप्यसौ पापः सैन्धवो बालघातकः । अस्यावलेपस्य फलं ससुहृद्गणबान्धवः ॥ १८ ॥ व्युष्टायान्तु वरारोहे रजन्यां पापकर्मकृत् । न हि मोक्ष्यति पार्थात् स प्रविष्टोऽप्यमरावतीम् ॥ १९ ॥ श्वः श्रोष्यसे शिरस्तस्य सैन्धवस्य रणे हृतम् । स्यमन्तपञ्चकात् वाह्यं विशोका भव मारुदः ॥ २० ॥ क्षत्रधर्मं पुरस्कृत्य गतः शूरः सतां गतिम् । यां वयं प्राप्नुयामेह ये चान्ये शस्त्रजीविनः ॥ २१ ॥ व्यूढ़ोरस्को महाबाहुरनिवर्त्ती रथप्रणुत् । गतस्तव वरारोहे पुत्रः स्वर्गं ज्वरं जहि ॥ २२ ॥ अनुयातश्च पितरं मातृपक्षं च वीर्य्यवान् । सहस्रशो रिपून् हत्वा हतः शूरो महारथः ॥ २३ ॥ आश्वासय स्नुषां राज्ञि मा शुचः क्षत्रिये भृशम् । श्वः प्रियं सुमहच्छ्रुत्वा विशोका भव नन्दिनि ॥ २४ ॥ यत् पार्थेन प्रतिज्ञातं तत्तथा न तदन्यथा । चिकीर्षितं हि ते भर्त्तुर्न भविष्यातु निष्फलः ॥ २५ ॥ यदि च मनुजपन्नगाः पिशाचा रजनीचराः पतगाः सुरा-

सुराश्च। रणगतमभियान्ति सिन्धुराजं न स भविता सहितैरपि प्रभाते॥ २६॥

इति द्रोणपर्वणि प्रतिज्ञापर्वणि सुभद्राश्वासने
सप्तसप्ततोऽध्यायः॥ ७७॥

---

सञ्जय उवाच। एतच्छ्रुत्वा वचस्तस्य केशवस्य महात्मनः। सुभद्रा पुत्रशोकार्त्ता विललाप सुदुःखिता॥ १॥ हा पुत्र मम मन्दायाः कथमेत्यासि संयुगम्। निधनं प्राप्तवांस्तात पितुस्तुल्य-पराक्रम॥ २॥ कथमिन्दीवरश्यामं सुदंष्ट्रं चारुलोचनम्। मुखं ते दृश्यते वत्स गुण्ठितं रणरेणुना॥ ३॥ नूनं शूरं निपतितं त्वां पश्यत्यनिवर्त्तिनम्। सुशिरोग्रीवबाहुं संव्यूढ़ोरस्कं नतोदरम्॥४॥ चारूपचितसर्वाङ्गं स्वक्षं शस्त्रक्षतोक्षितम्। भूतानि त्वां निरीक्षन्ते नूनं चन्द्रमिवोदितम्॥ ५॥ शयनीयं पुरा यस्य स्पर्द्धास्तरणसंवृतम्। भूमावद्य कथं शेषे विप्रविद्धः सुखोचितः॥ ६॥ योऽन्वास्यत पुरा वीरो वरस्त्रीभिर्महाभुजः। कथमन्वास्यते सोऽद्य शिवाभिः पतितो मृधे॥ ७॥ योऽस्तूयत पुरा हृष्टैः सूतमागधवन्दिभिः। सोऽद्य क्रव्यादगणैर्घोरैर्विनदद्भिरुपास्यते॥८॥ पाण्डवेषु च नाथेषु वृष्णिवीरेषु वा विभो। पाञ्चालेषु च सर्व्वेषु हतः केनास्यनाथवत्॥ ९॥ अतृप्तदर्शना पुत्र दर्शनस्य तवानघ। मन्दभाग्या गमिष्यामि व्यक्तमद्य यमक्षयम्॥ १०॥ विशालाक्षं सुकेशान्तं चारुवाक्यं सुगन्धि च। तव पुत्र कदा भूयो मुखं द्रक्ष्यामि निर्व्रणम्॥ ११॥ धिग्बलं भीमसेनस्य धिक् पार्थस्य धनुष्मताम्। धिग्वीर्य्यं वृष्णिवीराणां पाञ्चालानाञ्च धिग्बलम्॥ १२॥ धिक्केकयांस्तथा चेदीन् मत्स्यांश्चैवाथ सृञ्जयान्। ये त्वां रणगतं वीरं न शेकुरभिवीक्षितुम्॥ १३॥ अद्य पश्यामि

पृथिवीं शून्यामिव हतत्विषम्। अभिमन्युमपश्यन्ती शोकव्याकुललोचना ॥ १४ ॥ स्वस्रीयं वासुदेवस्य पुत्रं गाण्डीवधन्वनः। कथं त्वातिरथं वीरं द्रक्ष्याम्यद्य निपातितम् ॥ १५ ॥ हा वीर दृष्टो नष्टश्च धनं स्वप्न इवासि मे। अहो ह्यनित्यं मानुष्यं जलबुद्बुदचञ्चलम् ॥ १६ ॥ इमां ते तरुणीं भार्य्यां तवाधिभिरभिप्लुताम्। कथं सन्धारयिष्यामि विवत्सामिव धेनुकाम् ॥ १७ ॥ अहो ह्यकाले प्रस्थानं कृतवानसि पुत्रक। विहाय फलकाले मां सुगृद्धां तव दर्शने ॥ १८ ॥ नूनं गतिः कृतान्तस्य प्राज्ञैरपि सुदुर्विदा। यत्र त्वं केशवे नाथे सङ्ग्रामेऽनाथवद्धतः ॥ १९ ॥ यज्वनां दानशीलानां ब्राह्मणानां कृतात्मनाम्। चरितब्रह्मचर्य्याणां पुण्यतीर्थावगाहिनाम् ॥ २० ॥ कृतज्ञानां वदान्यानां गुरुशुश्रूषिणामपि। सहस्रदक्षिणानाञ्च या गतिस्तामवाप्नुहि ॥ २१ ॥ या गतिर्युध्यमानानां शूराणामनिवर्त्तिनाम्। हत्वारीन्निहतानाञ्च संग्रामे ताङ्गतिं व्रज ॥ २२ ॥ गोसहस्रप्रदातॄणां क्रतुदानाञ्च या गतिः। नैवेशिकं चाभिमतं ददतां या गतिः शुभा ॥ २३ ॥ ब्राह्मणेभ्यः शरण्येभ्यो विधिं विदधताञ्च या। या चापि न्यस्तदण्डानां तां गतिं व्रज पुत्रक ॥ २४ ॥ ब्रह्मचर्य्येण या यान्ति मुनयः शंसितव्रताः। एकपत्न्यश्च यां यान्ति तां गतिं व्रज पुत्रक ॥ २५ ॥ राज्ञां सुचरितैर्य्या च गतिर्भवति शाश्वती। चातुराश्रमिणां पुण्यैः पावितानां सुरक्षितैः ॥ २६ ॥ दीनानुकम्पिनां या च सततं संविभागिनाम्। पैशुन्याच्च निवृत्तानां गतिं तां व्रज पुत्रक ॥ २७ ॥ व्रतिनां धर्मशीलानां गुरुशुश्रूषिणामपि। अमोघातिथिनां या च तां गतिं व्रज पुत्रक ॥ २८ ॥ कृच्छ्रेषु या धारयतामात्मानं व्यसनेषु च। गतिः शोकाग्निदग्धानां तां गतिं व्रज पुत्रक ॥ २९ ॥ मातापित्रोश्च शुश्रूषां कल्पयन्तीह ये सदा। स्वदारनिरतानाञ्च या गतिस्तामवाप्नुहि ॥ ३० ॥

ऋतुकाले स्वकां भार्य्यां गच्छतां या मनीषिणाम् । परस्त्रीभ्यो निवृत्तानां तां गतिं व्रज पुत्रक ॥ ३१ ॥ साम्ना ये सर्व्वभूतानि पश्यन्ति गतमत्सराः । नारुन्तुदानां क्षमिणां या गतिस्तामवाप्नुहि ॥ ३२ ॥ मधुमांसनिवृत्तानां मदाद्दम्भात्तथानृतात् । परोपतापत्यक्तानां तां गतिं व्रज पुत्रक ॥ ३३ ॥ ह्रीमन्तः सर्व्वशास्त्रज्ञा ज्ञानतृप्ता जितेन्द्रियाः । यां गतिं साधवो यान्ति तां गतिं व्रज पुत्रक ॥ ३४ ॥ एवं विलपतीं दीनां सुभद्रां शोककर्षिताम् । अन्वपद्यत पाञ्चाली वैराटीसहिता तदा ॥ ३५ ॥ ताः प्रकामं रुदित्वा च विलप्य च सुदुःखिताः । उन्मत्तावत्तदा राजन् विसंज्ञा न्यपतन् क्षितौ ॥ ३६ ॥ सोपचारस्तु कृष्णश्च दुःखितां भृशदुःखितः । सिक्त्वाम्भसा समाश्वास्य तत्तदुक्त्वा हितं वचः ॥ ३७ ॥ विसंज्ञकल्पां रुदतीं मर्म्मविद्धां प्रवेपतीम् । भगिनीं पुण्डरीकाक्ष इदं वचनमब्रवीत् ॥ ३८ ॥ सुभद्रे माशुचः पुत्रं पाञ्चाल्याश्वासयोत्तराम् । गतोऽभिमन्युः प्रथितां गतिं क्षत्रियपुङ्गवः ॥ ३९ ॥ ये चान्येऽपि कुले सन्ति पुरुषा नो वरानने । सर्व्वे ते तां गतिं यान्तु याभिमन्योर्यशस्विनः ॥ ४० ॥ कुर्य्याम तदयं कर्म्म क्रियासु सुहृदश्च नः । कृतवान् यादृशं ह्येकस्तव पुत्रो महारथः ॥ ४१ ॥ एवमाश्वास्य भगिनीं द्रौपदीमपि चोत्तराम् । पार्थस्यैव महाबाहुः पार्श्वमागादरिन्दमः ॥ ४२ ॥ ततोऽभ्यनुज्ञाय नृपान् कृष्णो बन्धूंस्तथार्जुनम् । विवेशान्तःपुरे राजंस्ते च जग्मुर्यथालयम् ॥ ४३ ॥

इति द्रोणपर्व्वणि प्रतिज्ञापर्व्वणि सुभद्राविलापे अष्टसप्ततोऽध्यायः ॥ ७८ ॥

---

सञ्जय उवाच। ततोऽर्ज्जुनस्य भवनं प्रविश्याप्रतिमं विभुः।
स्पृष्ट्वाम्भः पुण्डरीकाक्षः स्थण्डिले शुभलक्षणे ॥ १ ॥ सन्तस्तार
शुभां शय्यां दर्भैर्वैदूर्य्यसन्निभैः। ततो माल्येन विधिवल्लाजैर्गन्धैः
सुमङ्गलैः ॥ २ ॥ अलञ्चकार तां शय्यां परिवार्य्यायुधोत्तमैः।
ततः स्पृष्टोदके पार्थे विनीताः परिचारकाः ॥ ३ ॥ निशायां
नैत्यिकं चक्रुर्न्नैशन्त्यैयम्बकं बलिम्। ततः प्रीतमनाः पार्थो गन्ध-
माल्यैश्च माधवम् ॥ ४ ॥ अलङ्कृत्योपहारन्तन्नैशं तस्मै न्यवेदयत्।
स्मयमानस्तु गोविन्दः फाल्गुनं प्रत्यभाषत ॥ ५ ॥ सुप्यतां पार्थ
भद्रन्ते कल्याणाय व्रजाम्यहम्। स्थापयित्वा ततो द्वास्थान् गोप्तृ-
श्चात्तायुधान्नरान् ॥ ६ ॥ दारुकानुगतः श्रीमान् विवेश शिविरं
स्वकम्। शिश्ये च शयने शुभ्रे बहुकृत्यं विचिन्तयन् ॥ ७ ॥
पार्थाय सर्वं भगवान् शोकदुःखापहं विधिम्। व्यदधात् पुण्डरी-
काक्षस्तेजोद्युतिविवर्द्धनम् ॥ ८ ॥ योगमास्थाय युक्तात्मा सर्वेषा-
मीश्वरेश्वरः। श्रेयस्कामः पृथुयशा विष्णुर्जिष्णुः प्रियङ्करः ॥ ९ ॥
न पाण्डवानां शिविरे कश्चित् सुष्वाप तां निशाम्। प्रजागरः
सर्वजनं ह्याविवेश विशाम्पते ॥ १० ॥ पुत्रशोकाभितप्तेन प्रति-
ज्ञातो महात्मना। सहसा सिन्धुराजस्य वधो गाण्डीवधन्वना
॥ ११ ॥ तत् कथं सुमहाबाहुर्वासविः परवीरहा। प्रतिज्ञां
सफलां कुर्य्यादिति ते समचिन्तयन् ॥ १२ ॥ कष्टं हीदं व्यवसितं
पाण्डवेन महात्मना। स च राजा महावीर्य्यः पारयत्वर्जुनः स
ताम् ॥ १३ ॥ पुत्रशोकाभितप्तेन प्रतिज्ञा महती कृता। भ्रातर-
श्चापि विक्रान्ता बहुलानि बलानि च ॥ १४ ॥ धृतराष्ट्रस्य पुत्रेण
सर्वं तस्मै निवेदितम्। स हत्वा सैन्धवं सङ्ख्ये पुनरेतु धनञ्जयः
॥ १५ ॥ जित्वा रिपुगणांश्चैव पारयन्नर्जुनो व्रतम्। श्वोऽहत्वा
सिन्धुराजस्य धूमकेतुं प्रवेक्ष्यति ॥ १६ ॥ न ह्यसावनृतं कर्त्तुमलं
पार्थो धनञ्जयः। धर्मपुत्रः कथं राजा भविष्यति मृतेऽर्जुने ॥१७॥

तस्मिन् हि विजयः कृत्स्नः पाण्डवेन समाहितः। यदि नोऽस्ति
कृतं किञ्चिद्यदि दत्तं हुतं यदि॥ १८॥ फलेन तस्य सर्वस्य
सव्यसाची जयत्वरीन्। एवं कथयतां तेषां जयमाशंसतां प्रभो
॥ १९॥ कृच्छ्रेण महता राजन् रजनी व्यत्यवर्त्तत। तस्या
रजन्या मध्ये तु प्रतिबुद्धो जनार्द्दनः॥ २०॥ स्मृत्वा प्रतिज्ञां पार्थस्य
दारुकं प्रत्यभाषत। अर्जुनेन प्रतिज्ञातमार्त्तेन हतबन्धुना॥ २१॥
जयद्रथं वधिष्यामि श्वो भूत इति दारुक। तत्तु दुर्य्योधनः श्रुत्वा
मन्त्रिभिर्मन्त्रयिष्यति॥ २२॥ यथा जयद्रथं पार्थो न हन्यादिति
संयुगे। अक्षौहिण्यो हि ताः सर्वा रक्षिष्यन्ति जयद्रथम्॥२३॥
द्रोणश्च सह पुत्रेण सर्वास्त्रविधिपारगः। एको वीरः सहस्राक्षो
दैत्यदानवदर्पहा॥ २४॥ सोऽपि तन्नोत्सहेताजौ हन्तुं द्रोणेन
रक्षितम्। श्वोऽहं श्वस्तत् करिष्यामि यथा कुन्तीसुतोऽर्जुनः॥२५॥
अप्राप्तेऽस्तन्दिनकरे हनिष्यति जयद्रथम्। न हि दारा न मित्राणि
ज्ञातयो न च बान्धवाः॥ २६॥ कश्चिदन्यः प्रियतरः कुन्तीपुत्रा-
न्ममार्जुनात्। अनर्जुनमिमं लोकं मुहूर्त्तमपि दारुक॥ २७॥
उद्वीक्षितुं न शक्तोऽहं भविता न च तत्तथा। अहं विजित्य तान्
सर्वान् सहसा सहयद्विपान्॥ २८॥ अर्जुनार्थे हनिष्यामि सकर्णान्
ससुयोधनान्। श्वो निरीक्षन्तु मे वीर्य्यं त्रयो लोका महाहवे
॥ २९॥ धनञ्जयार्थे समरे पराक्रान्तस्य दारुक। श्वो नरेन्द्र-
सहस्राणि राजपुत्रशतानि च॥ ३०॥ साश्वद्विपरथान्याजौ
विद्रविष्यन्ति दारुक। श्वस्ताञ्चक्रप्रमथितां द्रक्ष्यसे नृपवाहिनीम्
॥ ३१॥ मया क्रुद्धेन समरे पाण्डवार्थे निपातिताम्। श्वः
सदेवाः सगन्धर्वाः पिशाचोरगराक्षसाः॥ ३२॥ ज्ञास्यन्ति लोका
सर्वे मां सुहृदं सव्यसाचिनः। यस्तं द्वेष्टि स मां द्वेष्टि यस्तं चानु
स मामनु॥ ३३॥ इति सङ्कल्पतां बुद्ध्या शरीरार्द्धं ममार्जुनः।
यथा त्वं मे प्रभातायामस्यां निशि रथोत्तमम्॥ ३४॥ कल्प-

यित्वा यथाशास्त्रमादाय व्रज संयुतः। गदां कौमदकीं दिव्यां शक्तिचक्रं धनुःशरान् ॥ ३५ ॥ आरोप्य वै रथे सूत सर्वोपकरणानि च। स्थानञ्च कल्पयित्वाथ रथोपस्थे ध्वजस्य मे ॥ ३६ ॥ वैनतेयस्य वीरस्य समरे रथशोभिनः। छत्रं जाम्बूनदैर्जालैरर्कज्वलनसप्रभैः ॥ ३७ ॥ विश्वकर्मकृतैर्दिव्यैरश्वानपि विभूषितान्। बलाहकं मेघपुष्पं शैव्यं सुग्रीवमेव च ॥ ३८ ॥ युक्तान् वाजिवरान् यत्तः कवची तिष्ठ दारुक। पाञ्चजन्यस्य निर्घोषमार्षभेणैव पूरितम् ॥ ३९ ॥ श्रुत्वा च भैरवं नादमुपायास्त्वं जवेन माम्। एकाह्नाहममर्षञ्च सर्वदुःखानि चैव ह ॥ ४० ॥ भ्रातुः पैतृष्वसेयस्य व्यपनेष्यामि दारुक। सर्वोपायैर्यतिष्यामि यथा वीभत्सुराहवे ॥ ४१ ॥ पश्यतां धार्त्तराष्ट्राणां हनिष्यति जयद्रथम्। यस्य यस्य च वीभत्सुर्बधे यत्नं करिष्यति। आशंसे सारथे तत्र भविताऽस्य ध्रुवो जयः ॥ ४२ ॥

दारुक उवाच। जय एव ध्रुवस्तस्य कुत एव पराजयः। यस्य त्वं पुरुषव्याघ्र सारथ्यमुपजग्मिवान् ॥ ४३ ॥ एवं चैतत् करिष्यामि यथा मामनुशाससि। सुप्रभातामिमां रात्रिं जयाय विजयस्य ह ॥ ४४ ॥

इति द्रोणपर्वणि प्रतिज्ञापर्वणि कृष्णदारुकसम्भाषणे ऊनसप्ततोऽध्यायः ॥ ७९ ॥

---

सञ्जय उवाच। कुन्तीपुत्रस्तु तं मन्त्रं स्मरन्नेव धनञ्जयः। प्रतिज्ञामात्मनो रक्षन् मुमोहाचिन्त्यविक्रमः ॥ १ ॥ तन्तु शोकेन सन्तप्तं स्वप्ने कपिवरध्वजम्। आससाद महातेजा ध्यायन्तं गरुड़ध्वजः ॥ २ ॥ प्रत्युत्थानञ्च कृष्णस्य सर्वावस्थां धनञ्जयः। न लोपयति धर्मात्मा भक्त्या प्रेम्णा च सर्वदा ॥ ३ ॥ प्रत्युत्थाय च

गोविन्दं स तस्मै आसनं ददौ। न चासने स्वयं बुद्धिं बीभत्सु-
र्व्यदधात्तदा ॥ ४ ॥ यतः कृष्णो महातेजा जानन् पार्थस्य
निश्चयम्। कुन्तीपुत्रमिदं वाक्यमासीनः स्थितमब्रवीत् ॥ ५ ॥
मा विषादे मनः पार्थ कृथाः कालो हि दुर्जयः। कालः सर्वाणि
भूतानि नियच्छति परे विधौ ॥ ६ ॥ किमर्थञ्च विषादस्ते तद्-
ब्रूहि द्विपदाम्बर। न शोच्यं विदुषां श्रेष्ठ शोकः कार्य्यविनाशनः
॥ ७ ॥ यत्तु कार्य्यं भवेत् कार्य्यं कर्मणा तत् समाचर। हीन-
चेष्टस्य यः शोकः स हि शत्रुर्धनञ्जय ॥ ८ ॥ शोचन्नन्दयते शत्रून्
कर्षयत्यपि बान्धवान्। क्षीयते च नरस्तस्मान्न त्वं शोचितुमर्हसि
॥ ९ ॥ इत्युक्तो वासुदेवेन बीभत्सुरपराजितः। आबभाषे तदा
विद्वान् इदं वचयमर्थवत् ॥ १० ॥ मया प्रतिज्ञा महती जय-
द्रथवधे कृता। श्वोऽस्मि हन्ता दुरात्मानं पुत्रघ्नमिति केशव
॥ ११ ॥ यत्प्रतिज्ञाविघातार्थं धार्त्तराष्ट्रैः किलाच्युत। पृष्ठतः
सैन्धवः कार्य्यः सर्वैर्गुप्तो महारथैः ॥ १२ ॥ दश चैका च ताः
कृष्ण अक्षौहिण्यः सुदुर्जयाः। हतावशेषास्तत्रेमा हन्त माधव
सङ्ख्यया ॥ १३ ॥ ताभिः परिवृतः सङ्ख्ये सर्वैश्चैव महारथैः।
कथं शक्येत सन्द्रष्टुं दुरात्मा कृष्ण सैन्धवः ॥ १४ ॥ प्रतिज्ञापारणं
चापि न भविष्यति केशव। प्रतिज्ञायां च हीनायां कथं जीवति
मद्विधः ॥ १५ ॥ दुःखोपायस्य मे वीर विकाङ्क्षा परिवर्त्तते।
द्रुतञ्च याति सविता तत एतद्ब्रवीम्यहम् ॥ १६ ॥ शोकस्थानन्तु
तच्छ्रुत्वा पार्थस्य द्विजकेतनः। संस्पृश्याम्भस्ततः कृष्णः प्राङ्मुखः
समवस्थितः ॥ १७ ॥ इदं वाक्यं महातेजा बभाषे पुष्करेक्षणः।
हितार्थं पाण्डुपुत्रस्य सैन्धवस्य बधे धृतः ॥ १८ ॥ पार्थ पाशुपतं
नाम परमास्त्रं सनातनम्। येन सर्वान् मृधे दैत्यान् जघ्ने देवो
महेश्वरः ॥ १९ ॥ यदि तद्विदितं तेऽद्य श्वो हन्तासि जय-
द्रथम्। अथाज्ञातं प्रपद्यस्व मनसा वृषभध्वजम् ॥ २० ॥ तं देवं

मनसा ध्यात्वा जोषमास्व धनञ्जय। ततस्तस्य प्रसादात्त्वं भक्तः प्राप्स्यसि तन्महत् ॥ २१ ॥ ततः कृष्णवचः श्रुत्वा संस्पृश्याम्भो धनञ्जयः। भूमावासीनमेकाग्रो जगाम मनसा भवम् ॥ २२ ॥ ततः प्रणिहिते ब्राह्मे मुहूर्त्ते शुभलक्षणे। आत्मानमर्जुनोऽपश्यद्गगने सह केशवम् ॥ २३ ॥ पुण्यं हिमवतः पादं मणिमन्तञ्च पर्वतम्। ज्योतिर्भिश्च समाकीर्णं सिद्धचारणसेवितम् ॥ २४ ॥ वायुवेगगतिः पार्थः खम्भेजे सह केशवः। केशवेन गृहीतः स दक्षिणे विभुना भुजे ॥ २५ ॥ प्रेक्षमाणो बहून् भावान् जगामाद्भुतदर्शनान्। उदीच्यां दिशि धर्म्मात्मा सोऽपश्यच्छ्वेतपर्वतम् ॥ २६ ॥ कुवेरस्य विहारे च नलिनीं पद्मभूषिताम्। सरिच्छ्रेष्ठाञ्च ताङ्गङ्गां वीक्षमाणो बहूदकाम् ॥ २७ ॥ सदा पुष्पफलैर्वृक्षैरुपेतां स्फटिकोपलाम्। सिंहव्याघ्रसमाकीर्णां नानामृगसमाकुलाम् ॥ २८ ॥ पुण्याश्रमवतीं रम्यां मनोज्ञाण्डजसेविताम्। मन्दरस्य प्रदेशांश्च किन्नरोद्गीतनादिताम् ॥ २९ ॥ हेमरूप्यमयैः शृङ्गैर्नानौषधिविदीपिताम्। तथा मन्दारवृक्षैश्च पुष्पितैरुपशोभिताम् ॥ ३० ॥ स्निग्धाञ्जनचयाकारं सम्प्राप्तः कालपर्वतम्। ब्रह्मतुङ्गं नदीश्चान्यास्तथा जनपदानपि ॥ ३१ ॥ सुतुङ्गं शतशृङ्गञ्च शर्य्यातिवनमेव च। पुण्यमश्वशिरःस्थानं स्थानमाथर्वणस्य च ॥ ३२ ॥ वृषदंशञ्च शैलेन्द्रं महामन्दरमेव च। अप्सरोभिः समाकीर्णं किन्नरैश्चैव शोभितम् ॥ ३३ ॥ तस्मिन् शैले व्रजन् पार्थः सकृष्णः समवैक्षत। शुभैः प्रस्रवणैर्जुष्टां हेमधातुविभूषिताम् ॥ ३४ ॥ चन्द्ररश्मिप्रतापाङ्गीं पृथिवीं पुरमालिनीम्। समुद्रांश्चाद्भुताकारानपश्यन् बहुलाकरान् ॥ ३५ ॥ वियद्द्यां पृथिवीं चैव तथा विष्णुपदं व्रजन्। विस्मितः सह कृष्णेन क्षिप्तो बाण इवाभ्यगात् ॥ ३६ ॥ ग्रहनक्षत्रसोमानां सूर्य्याग्न्योश्च समत्विषम्। अपश्यत तदा पार्थो ज्वलन्तमिव पर्वतम् ॥ ३७ ॥

समासाद्य तु तं शैलं शैलाग्रे समवस्थितम् । तपोनित्यं महा-
त्मानमपश्यद्वृषभध्वजम् ॥ ३८ ॥ सहस्रमिव सूर्य्याणां दीप्यमानं
स्वतेजसा । शूलिनं जटिनं गौरं वल्कलाजिनवाससम् ॥ ३९ ॥
नयनानां सहस्रैश्च विचित्राङ्गं महौजसम् । पार्वत्या सहितं देव-
भूतसङ्घैश्च भास्वरैः ॥ ४० ॥ गीतवादित्रसन्नादैर्हास्यलास्यसम-
न्वितैः । वल्गितास्फोटितोत्क्रुष्टैः पुण्यैर्गन्धैश्च शोभितम् ॥ ४१ ॥
स्तूयमानं स्तवैर्दिव्यैर्ऋषिभिर्ब्रह्मवादिभिः । गोप्तारं सर्वभूताना-
मिष्वासधरमच्युतम् ॥ ४२ ॥ वासुदेवस्तु तं दृष्ट्वा जगाम शिरसा
क्षितिम् । पार्थेन सह धर्मात्मा गृणन् ब्रह्म सनातनम् ॥ ४३ ॥
लोकादिं विश्वकर्माणमजमीशानमव्ययम् । मनसः परमां योनिं
खम्वायुं ज्योतिषां निधिम् ॥ ४४ ॥ स्रष्टारं वारिधाराणां भुवश्च
प्रकृतिं पराम् । देवदानवयक्षाणां मानवानां च साधनम् ॥४५॥
योगीनाञ्च परं ब्रह्म दृष्टं ब्रह्मविदान्निधिम् । चराचरस्य स्रष्टारं
प्रतिहर्त्तारमेव च ॥ ४६ ॥ कालकोपं महात्मानं शक्रसूर्य्यगुणो-
दयम् । ववन्दे तं तदा कृष्णो वाङ्मनोबुद्धिकर्मभिः ॥ ४७ ॥
यम्प्रपश्यन्ति विद्वांसः सूक्ष्माध्यात्मपदैषिणः । तमजं कारणा-
त्मानं जग्मतुः शरणं भवम् ॥ ४८ ॥ अर्जुनश्चापि तन्देवं भूयो
भूयोऽभ्यवन्दत । ज्ञात्वा तं सर्वभूतादिं भूतभव्यभवोद्भवम् ॥ ४९ ॥
ततस्तावागतौ दृष्ट्वा नरनारायणावुभौ । सुप्रसन्नमनाः शर्वः
प्रोवाच प्रहसन्निव ॥ ५० ॥ स्वागतं वा नरश्रेष्ठावुत्तिष्ठेतां गत-
क्लमौ । किञ्च वामीप्सितं वीरौ मनसः क्षिप्रमुच्यताम् ॥ ५१ ॥
येन कार्य्येण सम्प्राप्तौ युवान्तत्साधयामि किम् । व्रियतामात्मनः
श्रेयस्तत्सर्वं प्रददामि वाम् ॥ ५२ ॥ ततस्तद्वचनं श्रुत्वा प्रत्युत्थाय
कृताञ्जली । वासुदेवार्जुनौ शर्वं तुष्टुवाते महामती । भक्त्या
स्तवेन दिव्येन महात्मानमनिन्दितौ ॥ ५३ ॥

कृष्णार्जुनावूचतुः । नमो भवाय शर्वाय रुद्राय वरदाय च ।

पशूनां पतये नित्यमुग्राय च कपर्द्दिने। महादेवाय भीमाय त्र्यम्बकाय च शान्तये॥ ५४॥ ईशानाय भगघ्नाय नमोऽस्त्वन्धकघातिने। कुमारगुरवे तुभ्यं नीलग्रीवाय वेधसे॥ ५५॥ पिनाकिने हविष्याय सत्याय विभवे सदा। विलोहिताय धूम्राय व्याधाय नपराजिते॥ ५६॥ नित्यं नीलशिखण्डाय शूलिने दिव्यचक्षुषे। होत्रे पोत्रे त्रिनेत्राय व्याधये वसुरेतसे॥ ५७॥ अचिन्त्यायाम्बिकाभर्त्त्रे सर्व्वदेवस्तुताय च। वृषध्वजाय मुण्डाय जटिने ब्रह्मचारिणे॥ ५८॥ तप्यमानाय सलिले ब्रह्मण्यायाजिताय च। विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते॥ ५९॥ नमो नमस्ते सेव्याय भूतानाम्प्रभवे सदा। ब्रह्मवक्त्राय सर्व्वाय शङ्कराय शिवाय च॥ ६०॥ नमोऽस्तु वाचाम्पतये प्रजानां पतये नमः। नमो विश्वस्य पतये महतां पतये नमः॥ ६१॥ नमः सहस्रशिरसे सहस्रभुजमन्यवे। सहस्रनेत्रपादाय नमोऽसङ्ख्येयकर्म्मणे॥ ६२॥ नमो हिरण्यवर्णाय हिरण्यकवचाय च। भक्तानुकम्पिने नित्यं सिद्ध्यतां नौ वरः प्रभो॥ ६३॥

सञ्जय उवाच। एवं स्तुत्वा महादेवं वासुदेवः सहार्ज्जुनः। प्रसादयामास भवं तदा शस्त्रोपलब्धये॥ ६४॥

इति द्रोणपर्व्वणि प्रतिज्ञापर्व्वणि अर्ज्जुनस्वप्नदर्शने अशीतितमोऽध्यायः॥ ८०॥

---

सञ्जय उवाच। ततः पार्थः प्रसन्नात्मा प्राञ्जलिर्वृषभध्वजम्। ददर्शोत्फुल्लनयनः समस्ततेजसां निधिम्॥ १॥ तञ्चोपहारं स्वकृतं नैशं नैत्यकमात्मनः। ददर्श त्र्यम्बकाभ्यासे वासुदेवनिवेदितम्॥ २॥ ततोऽभिपूज्य मनसा कृष्णं सर्व्वञ्च पाण्डवः। इच्छाम्यहं दिव्यमस्त्रमित्यभाषत शङ्करम्॥ ३॥ ततः पार्थस्य

विज्ञाय वरार्थं वचनं तदा । वासुदेवार्जुनौ देवः स्मयमानोऽभ्य-
भाषत ॥ ४ ॥ स्वागतं वां नरश्रेष्ठौ विज्ञातं मनसेप्सितम् ।
येन कामेन सम्प्राप्तौ भवद्भ्यां तद्ददाम्यहम् ॥ ५ ॥ सरोऽमृत-
मयं दिव्यमभ्यासे मधुसूदनौ । तत्र मे तद्धनुर्दिव्यं शरश्च निहितः
पुरा ॥ ६ ॥ येन देवारयः सर्वे मया युधि निपातिताः । तत
आनीयतां कृष्णौ सशरं धनुरुत्तमम् ॥ ७ ॥ तथेत्युक्त्वा तु तौ
वीरौ सर्वपारिषदैः सह । प्रस्थितौ तत्सरो दिव्यं दिव्याश्चर्य-
शतैर्युतम् ॥ ८ ॥ निर्दिष्टं यद्वृषाङ्केण पुण्यं सर्वार्थसाधकम् ।
तौ जग्मतुरसंभ्रान्तौ नरनारायणावृषी ॥ ९ ॥ ततस्तौ तत्सरो
गत्वा सूर्यमण्डलसन्निभम् । नागमन्तर्जले घोरं ददृशातेऽर्जुना-
च्युतौ ॥ १० ॥ द्वितीयं चापरं नागं सहस्रशिरसं वरम् । वमन्तं
विपुलां ज्वालां ददृशातेऽग्निवर्चसम् ॥ ११ ॥ ततः कृष्णश्च पार्थश्च
संस्पृश्यापः कृताञ्जली । तौ नागावुपतस्थाते नमस्यन्तौ वृष-
ध्वजम् ॥ १२ ॥ गृणन्तौ वेदविद्वांसौ तद्ब्रह्म शतरुद्रियम् ।
अप्रमेयं प्रणमन्तौ गत्वा सर्वात्मना भवम् ॥ १३ ॥ ततस्तौ रुद्र-
माहात्म्याद्धित्वा रूपं महोरगौ । धनुर्बाणश्च शत्रुघ्नं तद्द्वन्द्वं
समपद्यत ॥ १४ ॥ तौ तज्जगृहतुः प्रीतौ धनुर्बाणं च सुप्रभम् ।
जह्रतुश्च महात्मानौ ददतुश्च महात्मने ॥ १५ ॥ ततः पार्श्वाद्
वृषाङ्कस्य ब्रह्मचारी न्यवर्त्तत । पिङ्गाक्षस्तपसः क्षेत्रं बलवा-
न्नीललोहितः ॥ १६ ॥ स तद्गृह्य धनुःश्रेष्ठं तस्थौ स्थानं समा-
हितः । विचकर्षाथ विधिवत् सशरन्धनुरुत्तमम् ॥ १७ ॥ तस्य
मौर्वीञ्च मुष्टिञ्च स्थानं चालक्ष्य पाण्डवः । श्रुत्वा मन्त्रं भवप्रोक्तं
जग्राहाचिन्त्यविक्रमः ॥ १८ ॥ स सरस्येव तं बाणं मुमोचातिबलः
प्रभुः । चकार च पुनर्वीरस्तस्मिन् सरसि तद्धनुः ॥ १९ ॥ ततः
प्रीतं भवं ज्ञात्वा स्मृतिमानर्जुनस्तदा । वरमारण्यके दत्तं दर्शनं
शङ्करस्य च ॥ २० ॥ मनसा चिन्तयामास तन्मे सम्पद्यतामिति ।

तस्य तन्मतमाज्ञाय प्रीतः प्रादाद्वरम्भवः ॥ २१ ॥ तच्च पाशुपतं घोरं प्रतिज्ञायाश्च पारणम्। ततः पाशुपतं दिव्यमवाप्य पुनरीश्वरात् ॥ २२ ॥ संहृष्टरोमा दुर्द्धर्षः कृतं कार्य्यममन्यत। ववन्दतुश्च संहृष्टौ शिरोभ्यान्तं महेश्वरम् ॥ २३ ॥ अनुज्ञातौ क्षणे तस्मिन् भवेनार्ज्जुनकेशवौ। प्राप्तौ स्वशिविरं वीरौ मुदा परमया युतौ ॥ २४ ॥ तथा भवेनानुमतौ महासुरनिघातिना। इन्द्रविष्णू यथा प्रीतौ जम्भस्य बधकाङ्क्षिणौ ॥ २५ ॥

इति द्रोणपर्व्वणि प्रतिज्ञापर्व्वणि पाशुपतास्त्रप्राप्तौ एकाशीतोऽध्यायः ॥ ८१ ॥

---

सञ्जय उवाच। तयोः सम्वदतोरेवं कृष्णादारुकयोस्तदा। सात्यगाद्रजनी राजन्नथ राजान्वबुध्यत ॥ १ ॥ पठन्ति पाणिस्वनिका मागधा मधुपर्किकाः। वैतालिकाश्च सूताश्च तुष्टुवुः पुरुषर्षभम् ॥ २ ॥ नर्त्तकाश्चाप्यनृत्यन्त जगुर्गीतानि गायकाः। कुरवंशस्तवार्थानि मधुरं रक्तकण्ठिनः ॥ ३ ॥ मृदङ्गा झर्झरा भेर्य्यः पणवानकगोमुखाः। आडम्बराश्च शङ्खाश्च दुन्दुभ्यश्च महास्वनाः ॥ ४ ॥ एवमेतानि सर्व्वाणि तथान्यानपि भारत। वादयन्ति सुसंहृष्टाः कुशलाः साधुशिक्षिताः ॥ ५ ॥ स मेघस्वननिर्घोषो महाशब्दोऽस्पृशद्दिवम्। पार्थिवप्रवरं सुप्तं युधिष्ठिरमबोधयत् ॥ ६ ॥ प्रतिबुद्धः सुखं सुप्तो महार्हे शयनोत्तमे। उत्थायावश्यकार्य्यार्थं ययौ स्नानगृहं नृपः ॥ ७ ॥ ततः शुक्लाम्बराः स्नातास्तरुणाः शतमष्ट च। स्नातकाः काञ्चनैः कुम्भैः पूर्णैः समुपतस्थिरे ॥ ८ ॥ भद्रासनेषूपविष्टः परिधायाम्बरं लघु। सस्नौ चन्दनसंयुक्तैः पानीयैरभिमन्त्रितैः ॥ ९ ॥ उत्सादितः कषायेण बलवद्भिः सुशिक्षितैः। आप्लुतः साधिवासेन जलेन सुसुगन्धिना

॥ १० ॥ राजहंसनिभं प्राप्य उष्णीषं शिखिनार्पितम्। जल-
क्षयनिमित्तं वै वेष्टयामास मूर्द्धनि ॥ ११ ॥ हरिणा चन्दनेनाङ्ग-
मुपलिप्य महाभुजः। स्रग्वी चाक्लिष्टवसनः प्राङ्मुखः प्राञ्जलिः
स्थितः ॥ १२ ॥ जजाप जप्यं कौन्तेयः सतां मार्गमनुष्ठितः।
तत्राग्निशरणं दीप्तं प्रविवेश विनीतवत् ॥ १३ ॥ समिद्भिः सु-
पवित्राभिरग्निमाहुतिभिस्तथा। मन्त्रपूताभिरर्चित्वा निश्चक्राम
गृहात्ततः ॥ १४ ॥ द्वितीयां पुरुषव्याघ्रः कक्षान्निर्गम्य पार्थिवः।
ततो वेदविदो वृद्धानपश्यद्‌ब्राह्मणर्षभान् ॥ १५ ॥ दान्तान् वेद-
व्रतस्नातान् स्नातानवभृथेषु च। सहस्रानुचरान् पौरान् सहस्रं
चाष्ट चापरान् ॥ १६ ॥ अक्षतैः सुमनोभिश्च वाचयित्वा महा-
भुजः। तान् द्विजान्मधुसर्पिर्भ्यां फलश्रेष्ठैः सुमङ्गलैः ॥ १७ ॥
प्रादात् काञ्चनमेकैकं निष्कं विप्राय पाण्डवः। अलङ्कृतं चाश्व-
शतं वासांसीष्टाश्च दक्षिणाः ॥ १८ ॥ तथा गाः कपिला दोग्ध्रीः
सवत्साः पाण्डुनन्दनः। हेमशृङ्गी रौप्यखुरा दत्त्वा चक्रे प्रद-
क्षिणम् ॥ १९ ॥ स्वस्तिकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्चनान्।
माल्यञ्च जलकुम्भांश्च ज्वलितं च हुताशनम् ॥ २० ॥ पूर्णान्यक्षत-
पात्राणि रुचका रोचनांस्तथा। स्वलङ्कृताः शुभाः कन्या दधि-
सर्पिर्मधूदकम् ॥ २१ ॥ मङ्गल्यान् पक्षिणश्चैव यद्यान्यदपि पूजि-
तम्। दृष्ट्वा स्पृष्ट्वा च कौन्तेयो वाह्यां कक्षां ततोऽगमत् ॥ २२ ॥
ततस्तस्यां महाबाहोस्तिष्ठन्तः परिचारकाः। सौवर्णं सर्वतोभद्रं
मुक्तावैदूर्य्यमण्डितम् ॥ २३ ॥ परार्द्ध्यास्तरणास्तीर्णं सोत्तर-
च्छदमृद्धिमत्। विश्वकर्म्मकृतं दिव्यमुपजह्रुर्वरासनम् ॥ २४ ॥
तत्र तस्योपविष्टस्य भूषणानि महात्मनः। उपजह्रुर्महार्हाणि
प्रेष्याः शुभ्राणि सर्वशः ॥ २५ ॥ मुक्ताभरणवेशस्य कौन्तेयस्य
महात्मनः। रूपमासीन्महाराज द्विषतां शोकवर्द्धनम् ॥ २६ ॥
पाण्डुरैश्चन्द्ररश्म्याभैर्हेमदण्डैश्च चामरैः। दोधूयमानैः शुशुभे

सविद्युदिव तोयदः॥ २७॥ संस्तूयमानो भूतैश्च वन्द्यमानश्च वन्दिभिः। उपगीयमानो गन्धर्वैरास्ते स्म कुरुनन्दनः॥२८॥ ततो मुहूर्त्तादासीत्तु वन्दिनां निस्वनो महान्। नेमिघोषश्च रथिनां खुरघोषश्च वाजिनाम्॥ २९॥ ह्रादेन गजघण्टानां शङ्खानां निस्वनेन च। नराणां पदशब्देन कम्पतीव च मेदिनी॥ ३०॥ ततः शुद्धान्तमासाद्य जानुभ्यां भूतले स्थितः। शिरसा वन्दनीयन्तमभिवाद्य जनेश्वरम्॥ ३१॥ कुण्डली बद्धनिस्त्रिंशः सन्नद्धकवचो युवा। अभिप्रणम्य शिरसा द्वाःस्थो धर्मात्मजाय वै॥ ३२॥ न्यवेदयद्धृषीकेशमुपायातं महात्मने। सोऽब्रवीत् पुरुषव्याघ्रः स्वागतेनैव माधवम्॥ ३३॥ अर्घ्यञ्चैवासनं चास्मै दीयतां परमार्च्चितम्। ततः प्रवेश्य वार्ष्णेयमुपवेश्य वरासने। पूजयामास विधिवद्धर्मराजो युधिष्ठिरः॥ ३४॥

इति द्रोणपर्व्वणि प्रतिज्ञापर्व्वणि युधिष्ठिरसज्जायां द्व्यशीतोऽध्यायः॥ ८२॥

---

सञ्जय उवाच। ततो युधिष्ठिरो राजा प्रतिनन्द्य जनार्द्दनम्। उवाच परमप्रीतः कौन्तेयो देवकीसुतम्॥ १॥ सुखेन रजनी व्युष्टा कच्चित्ते मधुसूदन। कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि तवाच्युत॥ २॥ वासुदेवोऽपि तद्युक्तं पर्य्यपृच्छद्युधिष्ठिरम्। ततश्च प्रकृतीः क्षत्ता न्यवेदयदुपस्थिताः॥ ३॥ अनुज्ञातश्च राज्ञा स प्रावेशयत तं जनम्। विराटं भीमसेनञ्च धृष्टद्युम्नं च सात्यकिम्॥ ४॥ चेदिपं धृष्टकेतुञ्च द्रुपदञ्च महारथम्। शिखण्डिनं यमौ चैव चेकितानं सकैकयम्॥ ५॥ युयुत्सुञ्चैव कौरव्यं पाञ्चाल्यं चोत्तमौजसम्। युधामन्युं सुबाहुञ्च द्रौपदेयांश्च सर्वशः॥ ६॥ एते चान्ये च बहवः क्षत्रियाः क्षत्रियर्षभम्।

उपतस्थुर्महात्मानं विविशुश्चासने शुभे ॥ ७ ॥ एकस्मिन्नासने वीरावुपविष्टौ महाबलौ। कृष्णश्च युयुधानश्च महात्मानौ महाद्युती ॥ ८॥ ततो युधिष्ठिरस्तेषां शृखतां मधुसूदनम्। अब्रवीत् पुण्डरीकाक्षं सम्भाष्य मधुरं वचः ॥ ९ ॥ एकं त्वां वयमाश्रित्य सहस्राक्षमिवामराः। प्रार्थयामो जयं युद्धे शाश्वतानि सुखानि च ॥ १० ॥ त्वं हि राज्यविनाशञ्च द्विषद्भिश्च निराक्रियाम्। क्लेशांश्च विविधान् कृष्ण सर्वांस्तानपि वेद नः ॥ ११ ॥ त्वयि सर्वेश सर्वेषामस्माकं भक्तवत्सल। सुखमायत्तमत्यर्थं यात्रा च मधुसूदन ॥ १२ ॥ स तथा कुरु वार्ष्णेय यथा त्वयि मनो मम। अर्जुनस्य यथा सत्या प्रतिज्ञा स्याच्चिकीर्षिता ॥ १३ ॥ स भवांस्तारयत्वस्माद्दुःखामर्षमहार्णवात्। पारन्तितीर्षतामद्य प्लवो नो भव माधव ॥ १४ ॥ न हि तत् कुरुते सङ्ख्ये रथी रिपुवधोद्यतः। यथा वै कुरुते कृष्ण सारथिर्यत्नमास्थितः ॥१५॥ यथैव सर्वास्वापत्सु पासि वृष्णीन् जनार्द्दन। तथैवास्मान्महाबाहो वृजिनात्त्रातुमर्हसि ॥ १६ ॥ त्वमगाधेऽप्लवे मग्नान् पाण्डवान् कुरुसागरे। समुद्धर प्लवो भूत्वा शङ्खचक्रगदाधर ॥ १७ ॥ नमस्ते देवदेवेश सनातन विशातन। विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम ॥ १८ ॥ नारदस्त्वां समाचख्यौ पुराणमृषिसत्तमम्। वरदं शार्ङ्गिणां श्रेष्ठं तत् सत्यं कुरु माधव ॥ १९ ॥ इत्युक्तः पुण्डरीकाक्षो धर्मराजेन संसदि। तोयमेघस्वनो वाग्मी प्रत्युवाच युधिष्ठिरम् ॥ २० ॥

कृष्ण उवाच। सामरेष्वपि लोकेषु सर्वेषु न तथाविधः। शरासनधरः कश्चिद्यथा पार्थो धनञ्जयः ॥ २१ ॥ वीर्य्यवानस्त्रसम्पन्नः पराक्रान्तो महाबलः। युद्धशौण्डः सदामर्षी तेजस्वी परमो नृणाम् ॥ २२ ॥ स युवा वृषभस्कन्धो दीर्घबाहुर्महाबलः। सिंहर्षभगतिः श्रीमान् द्विषतस्ते हनिष्यति ॥ २३ ॥ अहञ्च तत्

करिष्यामि यथा कुन्तीसुतोऽर्जुनः। धार्त्तराष्ट्रस्य सैन्यानि धच्य-
त्यग्निरिवोत्थितः ॥ २४ ॥ अद्य तं पापकर्माणं चुद्रं सौभद्र-
घातिनम्। अपुनर्दर्शनं मार्गमिषुभिः चिप्यतेऽर्जुनः ॥ २५ ॥
तस्याद्य गृध्राः श्येनाश्च चण्डगोमायवस्तथा। भचयिष्यन्ति मांसानि
ये चान्ये पुरुषादकाः॥ २६ ॥ यद्यस्य देवा गोप्तारः सेन्द्राः
सर्वे युधिष्ठिर। राजधानीं यमस्याद्य हतः प्राप्स्यति सङ्कुले
॥ २७ ॥ निहत्य सैन्धवं जिष्णुरद्य त्वामुपयास्यति। विशोको
विज्वरो राजन् भव भूतिपुरस्कृतः॥ २८ ॥

इति द्रोणपर्व्वणि प्रतिज्ञापर्व्वणि कृष्णवाक्ये
त्र्यशीतोऽध्यायः ॥ ८३ ॥

---

सञ्जय उवाच। तथा संवदतां तेषां प्रादुरासीद्धनञ्जयः।
दिदृक्षुर्भरतश्रेष्ठं राजानं ससुहृद्गणम् ॥ १ ॥ तं प्रविष्टं शुभां
कच्चामभिवन्द्याग्रतः स्थितम्। समुत्थायार्जुनं प्रेम्णा सस्वजे पाण्डव-
र्षभः ॥ २ ॥ मूर्द्ध्नि चैनमुपाघ्राय परिष्वज्य च बाहुना। आशिषः
परमाः प्रोच्य स्मयमानोऽभ्यभाषत ॥ ३ ॥ व्यक्तमर्ज्जुन सङ्ग्रामे
ध्रुवस्ते विजयो महान्। यादृग्रूपा च ते छाया प्रसन्नश्च जनार्द्दनः
॥ ४ ॥ तमब्रवीत्ततो जिष्णुर्महदाश्चर्य्यमुत्तमम्। दृष्टवानस्मि
भद्रन्ते केशवस्य प्रसादजम् ॥ ५ ॥ ततस्तत् कथयामास यथादृष्टं
धनञ्जयः। आश्वासनार्थं सुहृदां त्र्यम्बकेन समागमम् ॥ ६ ॥
ततः शिरोभिरवनिं स्पृष्ट्वा सर्वे च विस्मिताः। नमस्कृत्य वृषा-
ङ्काय साधुसाध्विति चाब्रुवन् ॥ ७ ॥ अनुज्ञातस्ततः सर्वे सुहृदो
धर्मसूनुना। त्वरमाणाः सुसंरब्धा हृष्टा युद्धाय निर्ययुः ॥ ८ ॥
अभिवाद्य तु राजानं युयुधानाच्युतार्जुनाः। हृष्टा विनिर्ययुस्ते
वै युधिष्ठिरनिवेशनात् ॥ ९ ॥ रथेनैकेन दुर्द्धर्षौ युयुधानजना-

र्द्दनौ। जग्मतुः सहितौ वीरावर्जुनस्य निवेशनम्॥१०॥ तत्र
गत्वा हृषीकेशः कल्पयामास सूतवत्। रथं रथवरस्याजौ वानर-
र्षभलक्षणम्॥११॥ स मेघस्वननिर्घोषस्तप्तकाञ्चनसुप्रभः। बभौ
रथवरः कॢप्तः शिशुर्द्दिवसकृद्यथा॥१२॥ ततः पुरुषशार्दूलः
सज्जं सज्जपुरःसरः। कृताह्निकाय पार्थाय न्यवेदयत तं रथम्
॥१३॥ तन्तु लोके वरं पुंसां किरीटी हेमवर्म्मभृत्। चापबाण-
धरो वाहं प्रदक्षिणमवर्त्तत॥१४॥ तपोविद्यावयोवृद्धैः क्रिया-
वद्भिर्ज्जितेन्द्रियैः। स्तूयमानो जयाशीर्भिरारुरोह महारथम्
॥१५॥ जैत्रैः साङ्ग्रामिकैर्म्मन्त्रैः पूर्व्वमेव रथोत्तमम्। अभि-
मन्त्रितमर्च्चिष्मानुदयं भास्करो यथा॥१६॥ स रथे रथिनां
श्रेष्ठः काञ्चनैः काञ्चनावृतः। विबभौ विमलोऽर्च्चिष्मान्मेराविव
दिवाकरः॥१७॥ अन्वारुरुहतुः पार्थं युयुधानजनार्द्दनौ।
शर्य्यातेर्यज्ञमायान्तं यथेन्द्रं देवमश्विनौ॥१८॥ अथ जग्राह
गोविन्दो रश्मीन् रश्मिभृताम्वरः। मातलिर्वासवमिव वृत्रं हन्तुं
प्रयास्यतः॥१९॥ स ताभ्यां सहितः पार्थो रथप्रवरमास्थितः।
सहितो बुधशुक्राभ्यां तमो निघ्नन् यथा शशी॥२०॥ सैन्धवस्य
वधं प्रेप्सुः प्रयातः शत्रुपूगहा। सहाम्बुपतिमित्राभ्यां यथेन्द्र-
स्तारकामये॥२१॥ ततो वादित्रघोषैश्च माङ्गल्यैश्च स्तवैः शुभैः।
प्रयान्तमर्ज्जुनं वीरं मागधाश्चैव तुष्टुवुः॥२२॥ सजयाशीः सुपु-
ण्याहः सूतमागधनिस्वनः। युक्तो वादित्रघोषेण तेषां रति-
करोऽभवत्॥२३॥ तमनुप्रयतो वायुः पुण्यगन्धवहः शुभः।
ववौ संहर्षयन् पार्थं द्विषतश्चापि शोषयन्॥२४॥ ततस्तस्मिन्
क्षणे राजन् विविधानि शुभानि च। प्रादुरासन् निमित्तानि
विजयाय बहूनि च॥२५॥ पाण्डवानां त्वदीयानां विपरीतानि
मारिष। दृष्ट्वार्ज्जुनो निमित्तानि विजयाय प्रदक्षिणम्॥२६॥
युयुधानं महेष्वासमिदं वचनमब्रवीत्। युयुधानाद्य युद्धे मे दृश्यते

विजयो ध्रुवः ॥ २७ ॥ यथाह्यीमानि लिङ्गानि दृश्यन्ते शिनि-
पुङ्गव । सोऽहं तत्र गमिष्यामि यत्र सैन्धवको नृपः ॥ १८ ॥
यियासुर्यमलोकाय मम वीर्य्यं प्रतीक्षते । यथा परमकं कृत्यं
सैन्धवस्य वधो मम ॥ २९ ॥ तथैव सुमहत्कृत्यं धर्मराजस्य
रक्षणम् । स त्वमद्य महाबाहो राजानं परिपालय ॥ ३० ॥
यथैव हि मया गुप्तस्त्वया गुप्तो भवेत्तथा । न पश्यामि च तं
लोके यस्त्वां युद्धे पराजयेत् ॥ ३१ ॥ वासुदेवसमं सङ्ख्ये स्वय-
मप्यमरेश्वरः । त्वयि चाहं पराश्वस्य प्रद्युम्ने वा महारथे ॥ ३३ ॥
शक्नुयां सैन्धवं हन्तुमनपेक्षो नरर्षभ । मय्यपेक्षा न कर्त्तव्या कथ-
ञ्चिदपि सात्वत ॥ ३४ ॥ राजन्येव परा गुप्तिः कार्य्या सर्वात्मना
त्वया । न हि यत्र महाबाहुर्वासुदेवो व्यवस्थितः ॥ ३५ ॥ किञ्चि-
द्व्यापद्यते तत्र यत्राहमपि च ध्रुवम् । एवमुक्तस्तु पार्थेन सात्यकिः
परवीरहा । तथेत्युक्त्वागमत्तत्र यत्र राजा युधिष्ठिरः ॥ ३६ ॥

इति द्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनवाक्ये
चतुरशीतोऽध्यायः ॥ ८४ ॥ समाप्तञ्च प्रतिज्ञापर्व ।

---

## अथ जयद्रथवधपर्व ।

धृतराष्ट्र उवाच । श्वोभूते किमकार्षुस्ते दुःखशोकसमन्विताः ।
अभिमन्यौ हते तत्र के वायुध्यन्त मामकाः ॥ १ ॥ जानन्तस्तस्य
कर्म्माणि कुरवः सव्यसाचिनः । कथं तत् किल्बिषं कृत्वा निर्भया
ब्रूहि मामकाः ॥ २ ॥ पुत्रशोकाभिसन्तप्तं क्रुद्धं मृत्युमिवान्तकम् ।
आयान्तं पुरुषव्याघ्रं कथं ददृशुराहवे ॥ ३ ॥ कपिराजध्वजं
सङ्ख्ये विधुन्वानं महद्धनुः । दृष्ट्वा पुत्रपरिद्यूनं किमकुर्वत मामकाः
॥ ४ ॥ किन्नु सञ्जय सङ्ग्रामे वृत्तं दुर्य्योधनं प्रति । परिदेवो
महानत्र श्रुतो मे नाभिनन्दनम् ॥५॥ बभूवुर्य्ये मनोग्राह्याः शब्दाः

श्रुतिसुखावहाः। न श्रूयन्तेऽद्य ते सर्वे सैन्धवस्य निवेशने ॥ ६ ॥ स्तुवतां नाद्य श्रूयन्ते पुत्राणां शिविरे मम। सूतमागधसङ्घानां नर्त्तकानाञ्च सर्वशः ॥ ७ ॥ शब्देन नादिताभीक्ष्णमभवद्यत्र मे श्रुतिः। दीनानामद्य तं शब्दं न शृणोमि समीरितम् ॥ ८ ॥ निवेशने सत्यधृतेः सोमदत्तस्य सञ्जय। आसीनोऽहं पुरा तात शब्दमश्रौषमुत्तमम् ॥ ९ ॥ तदद्य पुण्यहीनोऽहमार्त्तस्वरनिनादितम्। निवेशनं गतोत्साहं पुत्राणां मम लक्षये ॥ १० ॥ विविंशतेर्दुर्मुखस्य चित्रसेनविकर्णयोः। अन्येषाञ्च सुतानां मे न तथा श्रूयते ध्वनिः ॥ ११ ॥ ब्राह्मणाः क्षत्रिया वैश्या यं शिष्याः पर्य्युपासते। द्रोणपुत्रं महेष्वासं पुत्राणां मे परायणम् ॥ १२ ॥ वितण्डालापसंलापैर्द्रुतवादित्रनादितैः। गीतैश्च विविधैरिष्टैरमते यो दिवानिशम् ॥ १३ ॥ उपास्यमानो बहुभिः कुरुपाण्डवसात्वतैः। सूत तस्य गृहे शब्दो नाद्य द्रौणेर्यथा पुरा ॥ १४ ॥ द्रोणपुत्रं महेष्वासं गायना नर्त्तकाश्च ये। अत्यर्थमुपतिष्ठन्ति तेषां न श्रूयते ध्वनिः ॥ १५ ॥ विन्दानुविन्दयोः सायं शिविरे यो महाध्वनिः। श्रूयते सोऽद्य न तथा कैकेयानाञ्च वेश्मसु ॥ १६ ॥ नित्यं प्रमुदितानाञ्च तालगीतस्वनो महान्। नृत्यतां श्रूयते तात गणानां सोऽद्य न स्वनः ॥ १७ ॥ सप्ततन्तून्वितन्वाना याजका यमुपासते। सौमदत्तिं श्रुतनिधिं तेषां न श्रूयते ध्वनिः ॥ १८ ॥ ज्याघोषो ब्रह्मघोषश्च तोमरासिरथध्वनिः। द्रोणस्यासीदविरतो गृहे तन्न शृणोम्यहम् ॥ १९ ॥ नानादेशसमुत्थानां गीतानां योऽभवत् स्वनः। वादित्रनादितानां च सोऽद्य न श्रूयते महान् ॥ २० ॥ यदा प्रभृत्युपप्लव्याच्छान्तिमिच्छन् जनार्द्दनः। आगतः सर्वभूतानामनुकम्पार्थमच्युतः ॥ २१ ॥ ततोऽहमब्रुवं सूत मन्दं दुर्य्योधनं तदा। वासुदेवेन तीर्थेन पुत्र संशाम्य पाण्डवैः ॥ २२ ॥ कालप्राप्तमहं मन्ये मा त्वं दुर्य्यो-

धनातिगाः । अमं चैयाचमानं त्वं प्रत्याख्यास्यसि केशवम् ॥२३॥
हितार्थमभिजल्पन्तं न तवास्ति रणे जयः । प्रत्याचष्ट स दाशार्ह-
मृषभं सर्व्वधन्विनाम् ॥ २४ ॥ अनुनेयानि जल्पन्तमनयान्नान्व-
पद्यत । ततो दुःशासनस्यैव कर्णस्य च मतन्द्वयोः ॥ २५ ॥ अन्व-
वर्त्तत मां हित्वा ग्रस्तः कालेन दुर्मतिः । न ह्यहं द्यूतमिच्छामि
विदुरो न प्रशंसति ॥ २६ ॥ सैन्धवो नेच्छति द्यूतं भीष्मो न
द्यूतमिच्छति । शल्यो भूरिश्रवाश्चैव पुरुमित्रो जयस्तथा ॥ २७ ॥
अश्वत्थामा कृपो द्रोणो द्यूतं नेच्छन्ति सञ्जय । एतेषां मतमादाय
यदि वर्त्तेत पुत्रकः ॥ २८ ॥ सज्ञातिमित्रः ससुखं चिरञ्जीवे-
दनामयः । श्लक्ष्णामधुरसम्भाषा ज्ञातिमध्ये प्रियम्वदाः ॥ २९ ॥
कुलीनाः सम्मताः प्राज्ञाः सुखं प्राप्स्यन्ति पाण्डवाः । धर्मापेक्षी
नरो नित्यं सर्व्वत्र लभते सुखम् ॥ ३० ॥ प्रेत्यभावे च कल्याणं
प्रसादं प्रतिपद्यते । अर्हन्त्यर्द्धं पृथिव्यास्ते भोक्तुं सामर्थ्यसाधनाः
॥ ३१ ॥ तेषामपि समुद्रान्ता पितृपैतामही मही । नियुज्य-
मानाः स्थास्यन्ति पाण्डवा धर्म्मवर्त्मनि ॥ ३२ ॥ सन्ति मे ज्ञातय-
स्तात येषां श्रोष्यन्ति पाण्डवाः । शल्यस्य सोमदत्तस्य भीष्मस्य च
महात्मनः ॥ ३३ ॥ द्रोणस्याथ विकर्णस्य वाह्लीकस्य कृपस्य च ।
अन्येषाञ्चैव वृद्धानां भारतानां महात्मनाम् ॥ ३४ ॥ त्वदर्थं
ब्रुवतां तात करिष्यन्ति वचोहितम् । किं वा त्वं मन्यसे तेषां
यस्त्वं ब्रूयादतोऽन्यथा ॥ ३५ ॥ कृष्णो धर्मं न सञ्जह्यात् सर्व्वे ते
हि तदन्वयाः । मयापि चोक्तास्ते वीरा वचनं धर्म्मसंहितम्
॥ ३६ ॥ नान्यथा प्रकरिष्यन्ति धर्म्मात्मानो हि पाण्डवाः । इत्यहं
विलपन् सूत बहुशः पुत्रमुक्तवान् ॥ ३७ ॥ न च मे श्रुतवान्मूढो
मन्ये कालस्य पर्य्ययम् । वृकोदरार्जुनौ यत्र वृष्णिवीरश्च सात्यकिः
॥ ३८ ॥ उत्तमौजाश्च पाञ्चाल्यो युधामन्युश्च दुर्ज्जयः । धृष्ट-
द्युम्नश्च दुर्द्धर्षः शिखण्डी चापराजितः ॥ ३९ ॥ अश्मकाः कैकया-

श्चैव क्षत्रधर्मा च सौमकिः। चैद्यश्च चेकितानश्च पुत्रः काश्यस्य वा विभुः॥ ४०॥ द्रौपदेया विराटश्च द्रुपदश्च महारथः। यमौ च पुरुषव्याघ्रौ मन्त्री च मधुसूदनः॥ ४१॥ क एतान जातु युध्येत लोकेऽस्मिन् वै जिजीविषुः। दिव्यमस्त्रं विकुर्वाणान् प्रसहेद्दा परान्मम॥ ४२॥ अन्यो दुर्य्योधनात् कर्णात् शकुनेश्चापि सौबलात्। दुःशासनचतुर्थानां नान्यं पश्यामि पञ्चमम्॥ ४३॥ येषामभीषुहस्तः स्याद्विष्वक्सेनो रथे स्थितः। सन्नद्धश्चार्जुनो योद्धा तेषां नास्ति पराजयः॥ ४४॥ तेषां मम विलापानां नायं दुर्य्योधनः स्मरेत्। हतौ हि पुरुषव्याघ्रौ भीष्मद्रोणौ त्वमात्थ वै॥ ४५॥ तेषां विदुरवाक्यानामुक्तानां दीर्घदर्शिना। दृष्ट्वेमां फलनिर्वृत्तिं मन्ये शोचन्ति पुत्रकाः॥ ४६॥ सेनां दृष्ट्वाभिभूतां मे शैनेयेनार्जुनेन च। शून्यान् दृष्ट्वा रथोपस्थान् मन्ये शोचन्ति पुत्रकाः॥ ४७॥ हिमात्यये यथा कक्षं शुष्कं वातेरितो महान्। अग्निर्द्दहेत्तथा सेनां मामिकां स धनञ्जयः॥ ४८॥ आचक्ष्व मम तत् सर्वं कुशलो ह्यसि सञ्जय। यदुपायात्तु सायाह्ने कृतं पार्थस्य किल्विषम्॥ ४९॥ अभिमन्यौ हते तात कथमासीन्मनो हि वः। न जातु तस्य कर्माणि युधि गाण्डीवधन्वनः॥ ५०॥ अपकृत्य महत्तात सोढुं शक्ष्यन्ति मामकाः। किन्नु दुर्य्योधनः कृत्यं कर्णः कृत्यं किमब्रवीत्॥ ५१॥ दुःशासनः सौबलश्च तेषामेवं गते ह्यपि। सर्वेषां समवेतानां पुत्राणां मम सञ्जय॥ ५२॥ यद्वृत्तं तात सङ्ग्रामे मन्दस्यापनयैर्भृशम्। लोभानुगस्य दुर्बुद्धेः क्रोधेन विकृतात्मनः॥ ५३॥ राज्यकामस्य मूढस्य रागोपहतचेतसः। दुर्नीतं वा सुनीतं वा तन्ममाचक्ष्व सञ्जय॥ ५४॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि धृतराष्ट्रानुतापे पञ्चाशीतोऽध्यायः॥ ८५॥

---

सञ्जय उवाच। हन्त ते सम्प्रवक्ष्यामि सर्वं प्रत्यक्षदर्शिवान्। शुश्रूषस्व स्थिरो भूत्वा तव ह्यपनयो महान्॥ १॥ गतोदके सेतुबन्धो यादृक् तादृगयन्तव। विलापो निष्फलो राजन् मा शुचो भरतर्षभ॥ २॥ अनतिक्रमणीयोऽयं कृतान्तस्याद्भुतो विधिः। माशुचो भरतश्रेष्ठ दृष्टमेतत् पुरातनम्॥ ३॥ यदि त्वं हि पुरा द्यूतात् कुन्तीपुत्रं युधिष्ठिरम्। निवर्त्तयेथाः पुत्रांश्च न त्वां व्यसनमाव्रजेत्॥ ४॥ युद्धकाले पुनः प्राप्ते तदैव भवता यदि। निवर्त्तिताः स्युः संरब्धान्न त्वां व्यसनमाव्रजेत्॥ ५॥ दुर्य्योधनो चाविधेयं बध्नीतेति पुरा यदि। कुरूनवानोदयिष्यस्त्वं न त्वां व्यसनमाव्रजेत्॥ ६॥ न ते बुद्धिव्यभीचारमुपालप्स्यन्ति पाण्डवाः। पाञ्चाला वृष्णयः सर्वे ये चान्येऽपि नराधिपाः॥ ७॥ स कृत्वा पितृकर्म त्वं पुत्रं संस्थाप्य सत्पथे। वर्त्तेथा यदि धर्म्मेण न त्वां व्यसनमाव्रजेत्॥ ८॥ त्वन्तु प्राज्ञतमो लोके हित्वा धर्मं सनातनम्। दुर्य्योधनस्य कर्णस्य शकुनेश्चान्वगा मतम्॥ ९॥ तत्ते विलपितं सर्वं मया राजन्निशामितम्। अर्थं निविशमानस्य विषमिश्रं यथा मधु॥ १०॥ नामन्यत तदा कृष्णो राजानं पाण्डवं पुरा। न भीष्मं नैव च द्रोणं यथा त्वां मन्यते नृप॥११॥ अजानत् स यदा तु त्वां राजधर्मादधश्च्युतम्। तदाप्रभृति कृष्णस्त्वां न तथा बहु मन्यते॥ १२॥ परुषाण्युच्यमानांश्च यदा पार्थानुपेक्षसे। तस्यानुबन्धः प्राप्तस्त्वां पुत्राणां राज्यकामुक॥१३॥ पितृपैतामहं राज्यमपवृत्तं तवानघ। अथ पार्थैर्ज्जितां कृत्स्नां पृथिवीं प्रत्यपद्यथाः॥ १४॥ पाण्डुना निर्ज्जितं राज्यं कौरवाणां यशस्तथा। ततश्चाप्यधिकं भूयः पाण्डवैर्धर्मचारिभिः॥१५॥ तेषां तत्तादृशं कर्म त्वामासाद्य सुनिष्फलम्। यत् पित्र्याद्भ्रंशिता राज्यात्त्वयेहामिषगृद्धिना॥ १६॥ यत् पुनर्युद्धकाले तु पुत्रान् गर्हयसे नृप। बहुधा व्याहरन्दोषान्न तदद्योपपद्यते॥ १७॥

न हि रक्षन्ति राजानो युध्यन्तो जीवितं रणे। चमूं विगाह्य पार्थानां युध्यन्ते क्षत्रियार्षभाः ॥ १८ ॥ यान्तु कृष्णार्जुनौ सेनां यां सात्यकिवृकोदरौ। रक्षेरन् को नु तां युध्येच्चमूमन्यत्र कौरवैः ॥ १९ ॥ येषां योद्धा गुडाकेशो येषां मन्त्री जनार्द्दनः। येषां च सात्यकिर्गोप्ता येषां गोप्ता वृकोदरः ॥ २० ॥ को हि तान् विषहेद्योद्धुं मर्त्यधर्मा धनुर्द्धरः। अन्यत्र कौरवेयेभ्यो ये वा तेषां वशानुगाः ॥ २१ ॥ यावत्तु शक्यते कर्त्तुमनुरक्तैर्जनाधिपैः। क्षत्रधर्मपरैः शूरैस्तावत् कुर्वन्ति कौरवाः ॥ २२ ॥ यथा तु पुरुषव्याघ्रैर्युद्धं परमसङ्कटम्। कुरूणां पाण्डवैः सार्द्धं तत्सर्वं शृणु तत्त्वतः ॥ २३ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सञ्जयवाक्ये षड़शीतोऽध्यायः ॥ ८६ ॥

---

सञ्जय उवाच। तस्यां निशायां व्युष्टायां द्रोणः शस्त्रभृतां वरः। स्वान्यनीकानि सर्वाणि प्राक्रामद्व्यूहितुं ततः ॥ १ ॥ शूराणां गर्ज्जतां राजन् संक्रुद्धानाममर्षिणाम्। श्रूयन्ते स्म गिरश्चित्राः परस्परवधैषिणाम् ॥ २ ॥ विस्फार्य्य च धनूंष्यन्ये ज्याः करैः परिमृज्य च। विनिःश्वसन्तः प्राक्रोशन् क्वेदानीं स धनञ्जयः ॥ ३ ॥ विकोषान् सुत्सरूनन्ये कृतधारान् समाहितान्। पीतानाकाशसंकाशानसीन् केचिच्च चिक्षिपुः ॥ ४ ॥ चरन्तस्त्वसिमार्गांश्च शिक्षया। सङ्ग्रामममनसः शूरा दृश्यन्ते स्म सहस्रशः ॥५॥ सघण्टाश्चन्दनादिग्धाः स्वर्णवज्रविभूषिताः। समुत्क्षिप्य गदाश्चान्ये पर्य्यपृच्छन्त पाण्डवम् ॥ ६ ॥ अन्ये बलमदोन्मत्ताः परिघैर्बाहुशालिनः। चक्रुः सम्बाधमाकाशमुच्छ्रितेन्द्रध्वजोपमैः ॥७॥ नानाप्रहरणैश्चान्ये विचित्रस्रगलङ्कृताः। सङ्ग्राममनसः शूरास्तत्र

तत्र व्यवस्थिता ॥ ८ ॥ क्वार्जुनः क्व स गोविन्दः क्व च मानी वृकोदरः क्व च ते सुहृदस्तेषामाह्वयन्तो रणे तदा ॥ ९ ॥ ततः शङ्खमुपाध्माय त्वरयन् वाजिनः स्वयम्। इतस्ततस्तान्रचयन् द्रोणश्चरति वेगितः ॥ १० ॥ तेष्वनीकेषु सर्व्वेषु स्थितेष्वाहवनन्दिषु। भारद्वाजो महाराज जयद्रथमथाब्रवीत् ॥ ११ ॥ त्वं चैव सौमदत्तिश्च कर्णश्चैव महारथैः। अश्वत्थामा च शल्यश्च वृषसेनः कृपस्तथा ॥ १२ ॥ शतं चाश्वसहस्राणां रथानामयुतानि षट्। द्विरदानां प्रभिन्नानां सहस्राणि चतुर्द्दश ॥ १३ ॥ पदातीनां सहस्राणि दंशितान्येकविंशतिः। गव्यूतिषु त्रिमात्रासु मामनासाद्य तिष्ठत ॥ १४ ॥ तत्रस्थं त्वां न संसोढुं शक्ता देवाः सवासवाः। किं पुनः पाण्डवाः सर्व्वे समाश्वसिहि सैन्धव ॥ १५ ॥ एवमुक्तः समाश्वस्तः सिन्धुराजो जयद्रथः। सम्प्रायात् सह गान्धारैर्वृतस्तैश्च महारथैः ॥ १६ ॥ वर्म्मिभिः सादिभिर्यत्तैः प्रासपाणिभिरास्थितैः। चामरापीड़िनः सर्व्वे जाम्बूनदविभूषिताः ॥ १७ ॥ जयद्रथस्य राजेन्द्र हयाः साधुप्रवाहिनः। ते चैव सप्तसाहस्रास्त्रिसाहस्राश्च सैन्धवाः ॥ १८ ॥ मत्तानां सुविरूढ़ानां हस्त्यारोहैर्विशारदैः। नागानां भीमरूपाणां वर्म्मिणां रौद्रकर्म्मिणाम् ॥ १९ ॥ अध्यर्द्धेन सहस्रेण पुत्रो दुर्म्मर्षणस्तव। अग्रतः सर्व्वसैन्यानां युध्यमानो व्यवस्थितः ॥ २० ॥ ततो दुःशासनश्चैव विकर्णश्च तवात्मजौ सिन्धुराजार्थसिद्ध्यर्थमग्रानीके व्यवस्थितौ ॥ २१ ॥ दीर्घो द्वादशगव्यूतिः पश्चार्द्धे पञ्चविस्तृतः। व्यूहः सचक्रशकटो भारद्वाजेन निर्म्मितः ॥ २२ ॥ नानानृपतिभिर्वीरैस्तत्र तत्र व्यवस्थितैः। रथाश्वगजपत्त्यौघैर्द्रोणेन विहितः स्वयम् ॥२३॥ पश्चार्द्धे तस्य पद्मस्य गर्भव्यूहः सुदुर्भिदः। सूचीपद्मस्य गर्भस्थो गूढ़ो व्यूहः कृतः पुनः ॥ २४ ॥ एवमेतं महाव्यूहं व्यूह्य द्रोणो व्यवस्थितः। सूचीमुखे महेष्वासः कृतवर्म्मा व्यवस्थितः ॥ २५ ॥

अनन्तरञ्च काम्बोजो जलसन्धश्च मारिष। दुर्य्योधनश्च कर्णश्च तदनन्तरमेव च ॥ २६ ॥ ततः शतसहस्राणि योधानामनिवर्त्तिनाम्। व्यवस्थितानि सर्वाणि शकटे सुखरक्षिणाम् ॥ २७ ॥ तेषाञ्च पृष्ठतो राजा बलेन महता वृतः। जयद्रथस्ततो राजा सूचीपार्श्वे व्यवस्थितः ॥ २८ ॥ शकटस्य तु राजेन्द्र भारद्वाजो मुखे स्थितः। अनु तस्याभवद्भोजो जुगोपैनं ततः स्वयम् ॥ २९ ॥ श्वेतवर्मा वरोष्णीषो व्यूढोरस्को महाभुजः। धनुर्विस्फारयन् द्रोणस्तस्थौ क्रुद्ध इवान्तकः ॥ ३० ॥ पताकिनं शोणहयं वेदीकृष्णाजिनध्वजम्। द्रोणस्य रथमालोक्य प्रहृष्टाः कुरवोऽभवन् ॥ ३१ ॥ सिद्धचारणसङ्घानां विस्मयः सुमहानभूत्। द्रोणेन विहितं दृष्ट्वा व्यूहं क्षुब्धार्णवोपमम् ॥ ३२ ॥ सशैलसागरवनां नानाजनपदाकुलाम्। ग्रसेद्व्यूहः क्षितिं सर्वामिति भूतानि मेनिरे ॥३३॥ बहुरथमनुजाश्वपत्तिनागं प्रतिभयनिस्वनमद्भुताानुरूपम्। अहितहृदयभेदनं महद्वै शकटमवेक्ष्य कृतं ननन्द राजा ॥ ३४ ॥

इतिद्रोणपर्वणि जयद्रथवधपर्वणि कौरवव्यूहनिर्माणे सप्ताशीतोऽध्यायः ॥ ८७ ॥

---

सञ्जय उवाच। ततो व्यूढेष्वनीकेषु समुत्क्रुष्टेषु मारिष। ताड्यमानासु भेरीषु मृदङ्गेषु नदत्सु च ॥ १ ॥ अनीकानाञ्च संह्रादे वादित्राणां च निस्वने। प्रध्मापितेषु शङ्खेषु सन्नादे लोमहर्षणे ॥ २ ॥ आवारयत्सु शनकैर्भरतेषु युयुत्सुषु। रौद्रे मुहूर्त्ते संप्राप्ते सव्यसाची व्यदृश्यत ॥ ३ ॥ बलानां वायसानाञ्च पुरस्तात् सव्यसाचिनः। बहुलानि सहस्राणि प्राक्रीडंस्तत्र भारत ॥ ४ ॥ मृगाश्च घोरसन्नादाः शिवाश्चाशिवदर्शनाः। दक्षिणेन प्रयातानामस्माकं प्राणदंस्तथा ॥ ५ ॥ सनिर्घाता ज्वलन्त्यश्च

पेतुरुल्काः सहस्रशः। चचाल च मही कृत्स्ना भये घोरे समु-
त्थिते॥ ६ ॥ विष्वग्वाताः सनिर्घाता रूक्षाः शर्करकर्षिणः।
ववुरायाति कौन्तेय सङ्ग्रामे समुपस्थिते॥ ७ ॥ नाकुलिश्च शता-
नीको धृष्टद्युम्नश्च पार्षतः। पाण्डवानामनीकानि प्राज्ञौ तौ
व्यूहतुस्तदा ॥ ८॥ ततो रथसहस्रेण द्विरदानां शतेन च।
त्रिभिरश्वसहस्रैश्च पदातीनां शतैः शतैः॥ ९॥ अध्यर्द्धमात्रे धनुषां
सहस्रे तनयस्तव। अग्रतः सर्वसैन्यानां स्थितो दुर्मर्षणोऽब्रवीत्
॥ १० ॥ अद्य गाण्डीवधन्वानं तपन्तं युद्धदुर्मदम्। अहमावा-
रयिष्यामि वेलेव मकरालयम्॥ ११ ॥ अद्य पश्यन्तु सङ्ग्रामे धन-
ञ्जयममर्षणम्। विषक्तमपि दुर्द्धर्षमश्मकूटमिवाश्मनि ॥ १२ ॥
तिष्ठध्वं रथिनो यूयं सङ्ग्राममभिकाङ्क्षिणः। युध्यामि संहतानेता-
न्यशो मानं च वर्द्धयन्॥ १३ ॥ एवं ब्रुवन् महाराज महात्मा स
महामतिः। महेष्वासैर्वृतो राजन् महेष्वासो व्यवस्थितः॥१४॥
ततोऽन्तक इव क्रुद्धः सवज्र इव वासवः। दण्डपाणिरिवासह्यो
मृत्युः कालेन चोदितः॥ १५ ॥ शूलपाणिरिवाक्षोभ्यो वरुणः
पाशवानिव। युगान्ताग्निरिवार्च्चिष्मान् प्रधक्ष्यन् वै पुनः प्रजाः
॥ १६ ॥ क्रोधामर्षबलोद्धूतो निवातकवचान्तकः। जयो जेता
स्थितः सत्ये पारयिष्यन्महाव्रतम्॥ १७ ॥ आमुक्तकवचः खड्गी
जाम्बूनदकिरीटभृत्। शुभ्रमाल्याम्बरधरो स्वङ्गदश्चारुकुण्डलः
॥ १८ ॥ रथप्रवरमास्थाय नरो नारायणानुगः। विधुन्वन्
गाण्डिवं सङ्ख्ये बभौ सूर्य्य इवोदितः॥ १९ ॥ सोऽग्रानीकस्य
महत इषुपाते धनञ्जयः। व्यवस्थाप्य रथं राजन् शङ्खं दध्मौ
प्रतापवान्॥ २० ॥ अथ कृष्णोऽप्यसंभ्रान्तः पार्थेन सह मारिष।
प्राध्मापयत् पाञ्चजन्यं शङ्खप्रवरमोजसा॥ २१ ॥ तयोः शङ्खप्रणा-
देन तव सैन्ये विशाम्पते। आसन् संहृष्टरोमाणः कम्पिता गत-
चेतसः॥ २२॥ यथा त्रस्यन्ति भूतानि सर्वाण्यशनिनिस्वनात्।

तथा शङ्खप्रणादेन वित्रेषुस्तव सैनिकाः॥ २३॥ प्रसुस्रुवुः शकृन्मूत्रं वाहनानि च सर्वशः। एवं सवाहनं सर्वमाविग्नमभवद्बलम्॥ २४॥ सीदन्ति स्म नरा राजन् शङ्खशब्देन मारिष। विसंज्ञाश्चाभवन् केचित् केचिद्राजन् वितत्रसुः॥ २५॥ ततः कपिर्महानादं सह भूतैर्ध्वजालयैः। अकरोद्व्यादितास्यश्च भीषयंस्तव सैनिकाः॥ २६॥ ततः शङ्खाश्च भेर्यश्च मृदङ्गाश्चानकैः सह। पुनरेवाभ्यहन्यन्त तव सैन्यप्रहर्षणाः॥ २७॥ नानावादित्रसंह्रादैः क्ष्वेडितास्फोटिताकुलैः। सिंहनादैः समुत्क्रुष्टैः समाहूतैर्महारथैः॥ २८॥ तस्मिंस्तु तुमुले शब्दे भीरूणां भयवर्द्धने। अतीव हृष्टो दाशार्हमब्रवीत् पाकशासनिः॥ २९॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि अर्जुनरणप्रवेशे अष्टाशीतितमोऽध्यायः॥ ८८॥

---

अर्जुन उवाच। चोदयाश्वान् हृषीकेश यत्र दुर्मर्षणः स्थितः। एतद्भित्त्वा गजानीकं प्रवेक्ष्याम्यरिवाहिनीम्॥ १॥

सञ्जय उवाच। एवमुक्तो महाबाहुः केशवः सव्यसाचिना। अचोदयद्धयान् तत्र यत्र दुर्मर्षणः स्थितः॥ २॥ स सम्प्रहारस्तुमुलः सम्प्रवृत्तः सुदारुणः। एकस्य च बहूनाञ्च रथनागनरक्षयः॥ ३॥ ततः सायकवर्षेण पर्जन्य इव वृष्टिमान्। परानवाकिरत् पार्थः पर्वतानिव नीरदः॥ ४॥ ते चापि रथिनः सर्वे त्वरिताः कृतहस्तवत्। अवाकिरन् वाणजालैस्ततः कृष्णाधनञ्जयौ॥ ५॥ ततः क्रुद्धो महाबाहुर्वार्य्यमाणः परैर्युधि। शिरांसि रथिनां पार्थः कायेभ्योऽपाहरच्छरैः॥ ६॥ उद्भ्रान्तनयनैर्वक्त्रैः सन्दष्टौष्ठपुटैः शुभैः। सकुण्डलशिरस्त्राणैर्वसुधा समकीर्य्यत॥ ७॥ पुण्डरीकवनानीव विध्वस्तानि समन्ततः। विनि

कीर्णानि योधनां वदनानि चक्राशिरे ॥ ८ ॥ तपनीयतनुत्राणाः संसिक्ता रुधिरेण च। संसक्ता इव दृश्यन्ते मेघसङ्घाः सविद्युतः ॥ ९ ॥ शिरसां पततां राजन् शब्दोऽभूद्वसुधातले। कालेन परिपक्वानां तालानां पततामिव ॥ १० ॥ ततः कबन्धं किञ्चित्तु धनुरालम्ब्य तिष्ठति। किञ्चित् खड्गं विनिष्कृष्य भुजेनोद्यम्य तिष्ठति ॥ ११ ॥ पतितानि न जानन्ति शिरांसि पुरुषर्षभाः। अमृष्यमाणाः सङ्ग्रामे कौन्तेयं जयगृद्धिनः ॥ १२ ॥ हयानामुत्तमाङ्गैश्च हस्तिहस्तैश्च मेदिनी। बाहुभिश्च शिरोभिश्च वीराणां समकीर्य्यत ॥ १३ ॥ अयं पार्थः कुतः पार्थ एष पार्थ इति प्रभो। तव सैन्येषु योधानां पार्थभूतमिवाभवत् ॥ १४ ॥ अन्योऽन्यमपि चाजघ्नुरात्मानमपि चापरे। पार्थभूतममन्यन्त जगत् कालेन मोहिताः ॥ १५ ॥ निष्टनन्तः सरुधिरा विसंज्ञा गाढ़वेदनाः। शयाना बहवो वीराः कीर्त्तयन्तः स्वबान्धवान् ॥ १६ ॥ सभिन्दिपालाः सप्रासाः सशक्त्यृष्टिपरश्वधाः। सनिर्व्यूहाः सनिस्त्रिंशाः सशरासनतोमराः ॥ १७ ॥ सबाणवर्माभरणाः सगदाः साङ्गदा रणे। महाभुजगसङ्काशा बाहवः परिघोपमाः ॥ १८ ॥ उद्वेष्टन्ति विचेष्टन्ति सञ्चेष्टन्ति च सर्वशः। वेगं कुर्वन्ति संरब्धा निकृत्ताः परमेषुभिः ॥ १९ ॥ यो यः स्म समरे पार्थं प्रतिसंरभते नरः। तस्य तस्यान्तको बाणः शरीरमुपसर्पति ॥ २० ॥ नृत्यतो रथमार्गेषु धनुर्व्याक्षिपतस्तथा। न कश्चित्तत्र पार्थस्य ददर्शान्तरमण्वपि ॥ २१ ॥ यत्तस्य घटमानस्य क्षिप्रं विसृजतः शरान्। लाघवात् पाण्डुपुत्रस्य व्यस्मयन्त परे जनाः ॥ २२ ॥ हस्तिनं हस्तियन्तारमश्वमाश्विकमेव च। अभिनत् फाल्गुन बाणै रथिनञ्च ससारथिम् ॥ २३ ॥ आवर्त्तमानमावृत्तं युध्यमानञ्च पाण्डवः। प्रमुखे तिष्ठमानञ्च न किञ्चिन्न निहन्ति सः ॥ २४ ॥ यथोदयन् वै गगने सूर्य्यो हन्ति महत्तमः। तथार्जुनो गजा-

नीकमवधीत् कङ्कपत्रिभिः ॥ २५ ॥ हस्तिभिः पतितैर्भिन्नैस्तव सैन्यमदृश्यत । अन्तकाले यथाभूमिर्व्यवकीर्णा महीधरैः ॥ २६ ॥ यथा मध्यन्दिने सूर्य्यो दुष्प्रेक्ष्यः पाणिभिः सदा । तथा धनञ्जयः क्रुद्धो दुष्प्रेक्ष्यो युधि शत्रुभिः ॥ २७ ॥ तत्तथा तव पुत्रस्य सैन्यं युधि परन्तप । प्रभग्नन्द्रुतमाविग्नमतीव शरपीड़ितम् ॥ २८ ॥ मारुतेनेव महता मेघानीकं व्यदीर्य्यत । प्रकाल्यमानं तत् सैन्यं नाशकत् प्रतिवीक्षितुम ॥ २९ ॥ प्रतोदैश्चापि कोटीभिर्हुङ्कारैः साधुवाहितः । कशापार्ष्ण्यभिघातैश्च वाग्भिरुग्राभिरेव च ॥३०॥ चोदयन्तो हयांस्तूर्णं पलायन्ते स्म तावकाः । सादिनो रथिनश्चैव पत्तयश्चार्ज्जुनार्द्दिताः ॥ ३१ ॥ पार्ष्ण्यङ्गुष्ठाङ्कुशैर्नागं चोदयन्तस्तथा परे । सम्मोहिताः शरैश्चान्ये तमेवाभिमुखा ययुः । तव योधा हतोत्साहा विभ्रान्तमनसस्तदा ॥ ३२ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि अर्जुनयुद्धे
एकोननवतोऽध्यायः ॥ ८९ ॥

---

धृतराष्ट्र उवाच । तस्मिन् प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना । के तु तत्र रणे वीराः प्रत्युदीयुर्द्धनञ्जयम् ॥ १ ॥ आहोस्विच्छकटव्यूहं प्रविष्टा मोघनिश्चयाः । द्रोणमाश्रित्य तिष्ठन्तः प्राकारमकुतोभयम् ॥ २ ॥

सञ्जय उवाच । तवार्ज्जुनेन सम्भग्ने तस्मिंस्तव बलेऽनघ । हतवीरे हतोत्साहे पलायनकृतक्षणे ॥ ३ ॥ पाकशासनिनाभीक्ष्णं वध्यमाने शरोत्तमैः । न तत्र कश्चित् सङ्ग्रामे शशाकार्ज्जुनमीक्षितुम् ॥ ४ ॥ ततस्तव सुतो राजन् दृष्ट्वा सैन्यन्तथागतम् । दुःशासनो भृशं क्रुद्धो युद्धायार्ज्जुनमभ्यगात् ॥ ५ ॥ स काञ्चनविचित्रेण कवचेन समावृतः । जाम्बूनदशिरस्त्राणः शूरस्तीव्रपराक्रमः ॥ ६ ॥

नागानीकेन महता ग्रसन्निव महीमिमाम्। दुःशासनो महाराज सव्यसाचिनमावृणोत् ॥ ७ ॥ क्रादेन गजघण्टानां शङ्खानां निनदेन च। ज्याक्षेपनिनदैश्चैव विरावेण च दन्तिनाम् ॥ ८ ॥ भूर्दिशश्चान्तरिक्षञ्च शब्देनासीत् समावृतम्। स मुहूर्त्तः प्रतिभयो दारुणः समपद्यत ॥ ९ ॥ तान्दृष्ट्वापततस्तूर्णमङ्कुशैरभिचोदितान्। व्यालम्बहस्तान् संरब्धान् सपक्षानिव पर्वतान् ॥ १० ॥ सिंहनादेन महता नरसिंहो धनञ्जयः। गजानीकममित्राणामभितो व्यधमच्छरैः ॥ ११ ॥ महोर्म्मिणमिवोद्धूतं श्वसनेन महार्णवम्। किरीटी तद्गजानीकं प्राविशन्मकरो यथा ॥ १२ ॥ काष्ठातीत इवादित्यः प्रतपन् स युगक्षये। ददृशे दिक्षु सर्व्वासु पार्थः परपुरञ्जयः ॥ १३ ॥ खुरशब्देन चाश्वानां नेमिघोषेण तेन च। तेन चोत्क्रुष्टशब्देन ज्यानिनादेन तेन च ॥ १४ ॥ नानावादित्रशब्देन पाञ्चजन्यस्वनेन च। देवदत्तस्य घोषेण गाण्डीवनिनदेन च ॥ १५ ॥ मन्दवेगा नरा नागा बभूवुस्ते विचेतसः। शरैराशीविषस्पर्शैर्निर्भिन्नाः सव्यसाचिना ॥ १६ ॥ ते गजा विशिखैस्तीक्ष्णैर्युधि गाण्डीवचोदितैः। अनेकशतसाहस्रैः सर्व्वाङ्गेषु समर्पिताः ॥ १७ ॥ आरावं परमं कृत्वा वध्यमानाः किरीटिना। निपेतुरनिशं भूमौ छिन्नपक्षा इवाद्रयः ॥ १८ ॥ अपरे दन्तवेष्टेषु कुम्भेषु च कटेषु च। शरैः समर्पिता नागा क्रौञ्चवद्व्यनदन्मुहुः ॥ १९ ॥ गजस्कन्धगतानाञ्च पुरुषाणां किरीटिना। छिद्यन्ते चोत्तमाङ्गानि भल्लैः सन्नतपर्वभिः ॥ २० ॥ सकुण्डलानां पततां शिरसां धरणीतले। पद्मानामिव सङ्घातैः पार्थश्चक्रे निवेदनम् ॥ २१ ॥ यन्त्रबद्धा विकवचा व्रणार्त्ता रुधिरोक्षिताः। भ्रमत्सु युधि नागेषु मनुष्या विललम्बिरे ॥ २२ ॥ केचिदेकेन वाणेन सुमुक्तेन सुपत्रिणा। द्वौ त्रयश्च विनिर्भिन्ना निपेतुर्धरणीतले ॥ २३ ॥ अतिविद्धाश्च नाराचैर्वमन्तो रुधिरं मुखैः। सारोहा

न्यपतन् भूमौ द्रुमवन्त इवाचलाः ॥ २४ ॥ मौर्वीं ध्वजन्धनुश्चैव युगमीषां तथैव च। रथिनां कुट्टयामास भल्लैः सन्नतपर्वभिः ॥ २५ ॥ न सन्दधन्न चाकर्षन् न विमुञ्चन् न चोद्वहन्। मण्डलेनैव धनुषा नृत्यन् पार्थः स्म दृश्यते ॥ २६ ॥ अतिविद्धाश्च नाराचैर्वमन्तो रुधिरं मुखैः। मुहूर्त्तान्न्यपतन्नन्ये वारणा वसुधातले ॥ २७ ॥ उत्थितान्यगणेयानि कबन्धानि समन्ततः। अदृश्यन्त महाराज तस्मिन् परमसङ्कुले ॥ २८ ॥ सचापाः साङ्गुलित्राणाः सखड्गाः साङ्गदा रणे। अदृश्यन्त भुजाश्छिन्ना हेमाभरणभूषिताः ॥ २९ ॥ स्वपस्करैरधिष्ठानैरीषादण्डकबन्धुरैः। चक्रैर्विमथितैरक्षैर्भग्नैश्च बहुधा युगैः ॥ ३० ॥ चर्मचापधरैश्चैव व्यवकीर्णैस्ततस्ततः। स्रग्भिराभरणैर्वस्त्रैः पतितैश्च महाध्वजैः ॥३१॥ निहतैर्वारणैरश्वैः क्षत्रियैश्च निपातितैः। अदृश्यत मही तत्र दारुणप्रतिदर्शना ॥ ३२ ॥ एवं दुःशासनबलं बध्यमानं किरीटिना। सम्प्राद्रवन्महाराज व्यथितं सहनायकम् ॥ ३३ ॥ ततो दुःशासनस्त्रस्तः सहानीकः शरार्द्दितः। द्रोणं त्रातारमाकाङ्क्षन् शकटव्यूहमभ्यगात् ॥ ३४ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि दुःशासनसैन्यपराभवे नवतितमोऽध्यायः ॥ ९० ॥

---

सञ्जय उवाच। दुःशासनबलं हत्वा सव्यसाची महारथः। सिन्धुराजं परीप्सन् वै द्रोणानीकमुपाद्रवत् ॥ १ ॥ स तु द्रोणं समासाद्य व्यूहस्य प्रमुखे स्थितम्। कृताञ्जलिरिदं वाक्यं कृष्णस्यानुमतेऽब्रवीत् ॥ २ ॥ शिवेन ध्याहि मां ब्रह्मन् स्वस्ति चैव वदस्व मे। भवत् प्रासादादिच्छामि प्रवेष्टुं दुर्भिदां चमूम् ॥ ३ ॥ भवान् पितृसमो मह्यं धर्मराजसमोऽपि च। तथा

कृष्णसमश्चैव सत्यमेतद्ब्रवीमि ते ॥ ४ ॥ अश्वत्थामा यथा तात रक्षणीयस्त्वयानघ। तथाहमपि ते रक्ष्यः सदैव द्विजसत्तम ॥५॥ तव प्रसादादिच्छेयं सिन्धुराजानमाहवे। निहन्तुं द्विपदां श्रेष्ठ प्रतिज्ञां रक्ष मे विभो ॥ ६ ॥

सञ्जय उवाच । एवमुक्तस्तदाचार्य्यः प्रत्युवाच स्मयन्निव। मामजित्वा न वीभत्सो शक्यो जेतुं जयद्रथः ॥ ७ ॥ एतावदुक्त्वा तं द्रोणः शरव्रातैरवाकिरत्। सरथाश्वध्वजं तीक्ष्णैः प्रहसन् वै ससारथिम् ॥ ८ ॥ ततोऽर्जुनः शरव्रातान् द्रोणस्याचार्य्यसायकैः। द्रोणमभ्यद्रवद्वाणैर्घोररूपैर्महत्तरैः ॥ ९ ॥ विव्याध च रणे द्रोण-मनुमान्य विशाम्पते। क्षत्रधर्मं समास्थाय नवभिः सायकैः पुनः ॥ १० ॥ तस्येषुमिषुभिश्छित्त्वा द्रोणो विव्याध तावुभौ। विषाग्नि-ज्वलितप्रख्यैरिषुभिः कृष्णपाण्डवौ ॥ ११ ॥ इयेष पाण्डवस्तस्य वाणैश्छेत्तुं शरासनम्। तस्य चिन्तयतस्त्वेवं फाल्गुनस्य महा-त्मनः ॥ १२ ॥ द्रोणः शरैरसंभ्रान्तो ज्यां चिच्छेदाशु वीर्य्यवान्। विव्याध च हयानस्य ध्वजं सारथिमेव च ॥ १३ ॥ अर्जुनश्च शरै-र्वीरः स्मयमानोऽभ्यवाकिरत्। एतस्मिन्नन्तरे पार्थः सज्यं कृत्वा महद्धनुः ॥ १४ ॥ विशेषयिष्यन्नाचार्य्यं सर्वास्त्रविदुषां वरः। मुमोच षट्शतान् वाणान् गृहीत्वैकमिव द्रुतम् ॥ १५ ॥ पुनः सप्तशतानन्यान् सहस्राश्चानिवर्त्तिनाम्। चिक्षेपायुतशश्चान्यांस्तेऽघ्नन् द्रोणस्य तां चमूम् ॥ १६ ॥ तैः सम्यगस्तैर्बलिना कृतिना चित्र-योधिना। मनुष्यवाजिमातङ्गा विद्धाः पेतुर्गतासवः ॥ १७ ॥ विसूताश्वध्वजाः पेतुः सञ्छिन्नायुधजीविताः। रथिनो रथमुख्येभ्यः सहसा शरपीड़िताः ॥ १८ ॥ चूर्णिताक्षिप्तदग्धानां वज्रानिल-हुताशनैः। तुल्यरूपा गजाः पेतुर्गिर्य्यग्राम्बुदवेश्मनाम् ॥ १९ ॥ पेतुरश्वसहस्राणि प्रहतान्यर्जुनेषुभिः । हंसा हिमवतः प्रस्थे वारिविप्रहता इव ॥ २० ॥ रथाश्वद्विपपत्त्योघाः सलिलौघा

इवाद्भुताः। युगान्तादित्यरश्म्याभैः पाण्डवास्त्वशरैर्हताः ॥ २१ ॥ तं पाण्डवादित्यशरांशुजालं कुरुप्रवीरान् युधि निष्टपन्तम्। स द्रोणमेघः शरवृष्टिवेगैः प्राच्छादयन्मेघ इवार्करश्मीन् ॥ २२ ॥ अथात्यर्थं विसृष्टेन द्विषतामसुभोजिना। आजघ्ने वक्षसि द्रोणो नाराचेन धनञ्जयम् ॥ २३ ॥ स विह्वलितसर्वाङ्गः क्षितिकम्पे यथाचलः। धैर्यमालम्ब्य बीभत्सुर्द्रोणं विव्याध पत्रिभिः ॥ २४ ॥ द्रोणस्तु पञ्चभिर्बाणैर्वासुदेवमताडयत्। अर्जुनञ्च त्रिसप्तत्या ध्वजञ्चास्य त्रिभिः शरैः ॥ २५ ॥ विशेषयिष्यन् शिष्यञ्च द्रोणो राजन् पराक्रमी। अदृश्यमर्जुनं चक्रे निमेषाच्छरवृष्टिभिः ॥ २६ ॥ प्रसक्तान् पततोऽद्राक्ष्म भारद्वाजस्य सायकान्। मण्डलीकृतमेवास्य धनुश्चादृश्यताद्भुतम् ॥ २७ ॥ तेऽभ्ययुः समरे राजन् वासुदेवधनञ्जयौ। द्रोणसृष्टाः सुबहवः कङ्कपत्रपरिच्छदाः ॥२८॥ तद्दृष्ट्वा तादृशं युद्धं द्रोणपाण्डवयोस्तदा। वासुदेवो महाबुद्धिः कार्य्यवत्तामचिन्तयत् ॥ २९ ॥ ततोऽब्रवीद्वासुदेवो धनञ्जयमिदं वचः। पार्थ पार्थ महाबाहो न नः कालव्ययो भवेत् ॥ ३० ॥ द्रोणमुत्सृज्य गच्छामः कृत्यमेतन्महत्तरम्। पार्थश्चाप्यब्रवीत् कृष्णं यथेष्टमिति केशव ॥ ३१ ॥ ततः प्रदक्षिणं कृत्वा द्रोणं प्रायान्महाभुजम्। परिवृत्तश्च बीभत्सुरगच्छद्विसृजन् शरान् ॥३२॥ ततोऽब्रवीत् स्वयं द्रोणः क्वेदं पाण्डव गम्यते। ननु नाम रणे शत्रुमजित्वा न निवर्त्तसे ॥ ३३ ॥

अर्जुन उवाच। गुरुर्भवान्न मे शत्रुः शिष्यः पुत्रसमोऽस्मि ते। न चास्ति स पुमांल्लोके यस्त्वां युधि पराजयेत् ॥ ३४ ॥

सञ्जय उवाच। एवं ब्रुवाणो बीभत्सुर्जयद्रथवधोत्सुकः। त्वरायुक्तो महाबाहुस्तत् सैन्यं समुपाद्रवत् ॥ ३५ ॥ तं चक्ररक्षौ पाञ्चाल्यौ युधामन्यूत्तमौजसौ। अन्वयातां महात्मानौ विशन्तं तावकं बलम् ॥ ३६ ॥ ततो जयो महाराज कृतवर्म्मा च सात्त्वतः।

काम्बोजश्च श्रुतायुश्च धनञ्जयमवारयन् ॥ ३७ ॥ तेषां दशसहस्राणि रथानामनुयायिनाम् । अभीषाहाः शूरसेनाः शिवयोऽथ वशातयः ॥ ३८ ॥ मावेल्लका ललित्थाश्च कैकया मद्रकास्तथा । नारायणाश्च गोपालाः काम्बोजानाञ्च ये गणाः ॥ ३९ ॥ कर्णेन विजिताः पूर्वं सङ्ग्रामे शूरसम्मताः । भारद्वाजं पुरस्कृत्य हृष्टात्मानोऽर्जुनं प्रति ॥ ४० ॥ पुत्रशोकाभिसन्तप्तं क्रुद्धं मृत्युमिवान्तकम् । त्यजन्तं तुमुले प्राणान् सन्नद्धं चित्रयोधिनम् ॥ ४१ ॥ गाहमानमनीकानि मातङ्गमिव यूथपम् । महेष्वासं पराक्रान्तं नरव्याघ्रमवारयन् ॥ ४२ ॥ ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् । अन्योऽन्यं वै प्रार्थयतां योधानामर्जुनस्य च ॥ ४३ ॥ जयद्रथवधं प्रेप्सुमायान्तं पुरुषर्षभम् । न्यवारयन्त सहिताः क्रिया व्याधिमिवोत्थितम् ॥ ४४ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि द्रोणातिक्रमे
एकनवतोऽध्यायः ॥ ९१ ॥

---

सञ्जय उवाच । सन्निरुद्धस्तु तैः पार्थो महाबलपराक्रमः । द्रुतं समनुयातश्च द्रोणेन रथिनां वरः ॥ १ ॥ किरन्निषुगणान् तीक्ष्णान् स रश्मीनिव भास्करः । तापयामास तत् सैन्यं देहं व्याधिगणो यथा ॥ २ ॥ अश्वो विद्धो रथश्छिन्नः सारोहः पातितो गजः । छत्राणि चापविद्धानि रथाश्चक्रैर्विनाकृताः ॥ ३ ॥ विद्रुतानि च सैन्यानि शरार्त्तानि समन्ततः । इत्यासीत्तुमुलं युद्धं न प्राज्ञायत किञ्चन ॥ ४ ॥ तेषां संयच्छतां सङ्ख्ये परस्परमजिह्मगैः । अर्जुनो ध्वजिनीं राजन् अभीक्ष्णं समकम्पयत् ॥ ५ ॥ सत्यां चिकीर्षमाणस्तु प्रतिज्ञां सत्यसङ्गरः । अभ्यद्रवद्रथश्रेष्ठं शोणाश्वं श्वेतवाहनः ॥ ६ ॥ तं द्रोणः पञ्चविंशत्या

मर्म्मभिद्भिरजिह्मगैः। अन्तेवासिनमाचार्य्यो महेष्वासं समार्पयत्
॥ ७॥ तं तूर्णमिव बीभत्सुः सर्व्वशस्त्रभृतां वरः। अभ्यधाव-
दिषूनस्यन्निषुवेगविघातकान् ॥ ८॥ तस्याशुक्षिप्तान् भल्लान् हि
भल्लैः सन्नतपर्व्वभिः। प्रत्यविध्यदमेयात्मा ब्रह्मास्त्रं समुदीरयन्
॥ ९॥ तदद्भुतमपश्याम द्रोणस्याचार्य्यकं युधि। यतमानो युवा
नैनं प्रत्यविध्यद्यदर्जुनः॥ १०॥ क्षरन्निव महामेघो वारिधाराः
सहस्रशः। द्रोणमेघः पार्थशैलं ववर्ष शरवृष्टिभिः ॥ ११ ॥
अर्जुनः शरवर्षन्तं ब्रह्मास्त्रेणैव मारिष। प्रतिजग्राह तेजस्वी
बाणान् बाणैर्विशातयन् ॥ १२ ॥ द्रोणस्तु पञ्चविंशत्या श्वेत-
वाहनमार्द्दयत्। वासुदेवञ्च सप्तत्या बाह्वोरुरसि चाशुगैः ॥१३॥
पार्थस्तु प्रहसन् धीमानाचार्य्यं सशरौघिणम्। विसृजन्तं शितान्
बाणानवारयत तं युधि॥ १४॥ अथ तौ वध्यमानौ तु द्रोणेन
रथसत्तमौ। आवर्ज्जयेतां दुर्द्धर्षं युगान्ताग्निमिवोत्थितम् ॥ १५॥
वर्ज्जयन्निशितान् बाणान् द्रोणचापविनिःसृतान्। किरीटमाली
कौन्तेयो भोजानीकं व्यशातयत्॥ १६॥ सोऽन्तरा कृतवर्म्माणं
काम्बोजञ्च सुदक्षिणम्। अभ्ययाद्वर्ज्जयं द्रोणं मैनाकमिव पर्व्व-
तम्॥ १७॥ ततो भोजो नरव्याघ्रो दुर्द्धर्षं कुरुसत्तमम्। अविध्य-
त्तूर्णमव्यग्रो दशभिः कङ्कपत्रिभिः॥ १८॥ तमर्जुनः शतेनाजौ
राजन् विव्याध पत्रिणा। पुनश्चान्यैस्त्रिभिर्बाणैर्म्मोहयन्निव सात्त्व-
तम्॥ १९॥ भोजस्तु प्रहसन् पार्थं वासुदेवञ्च माधवम्। एकैकं
पञ्चविंशत्या सायकानां समार्पयत्॥ २०॥ तस्यार्ज्जुनो धनुश्छित्त्वा
विव्याधैनं त्रिसप्तभिः। शरैरग्निशिखाकारैः क्रुद्धाशीविषसन्निभैः
॥ २१ ॥ अथान्यद्धनुरादाय कृतवर्म्मा महारथः। पञ्चभिः
सायकैस्तूर्णं विव्याधोरसि भारत॥ २२॥ पुनश्च निशितैर्बाणैः
पार्थं विव्याध पञ्चभिः। तं पार्थो नवभिर्बाणैराजघान स्तनान्तरे
॥ २३ ॥ दृष्ट्वा विषक्तं कौन्तेयं कृतवर्म्मरथं प्रति। चिन्तयामास

वार्ष्णेयो न नः कालात्ययो भवेत् ॥ २४ ॥ ततः कृष्णोऽब्रवीत् पार्थं कृतवर्म्मणि मा दयाम्। कुरु सम्बन्धकं कृत्वा प्रमथ्यैनं विशातय ॥ २५ ॥ ततः स कृतवर्म्माणं मोहयित्वार्ज्जुनः शरैः। अभ्यगाज्जवनैरश्वैः काम्बोजानामनीकिनीम् ॥ २६ ॥ अमर्षितस्तु हार्द्दिक्यः प्रविष्टे श्वेतवाहने। विधुन्वन् सशरं चापं पाञ्चाल्याभ्यां समागतः ॥ २७ ॥ चक्ररक्षौ तु पाञ्चाल्यावर्ज्जुनस्य पदानुगौ। पर्य्यवारयदायान्तौ कृतवर्म्मा तथेषुभिः ॥ २८ ॥ तावविध्यत् ततो भोजः कृतवर्म्मा शितैः शरैः। त्रिभिरेव युधामन्युं चतुर्भिश्चोत्तमौजसम् ॥ २९ ॥ तावप्येनं विविधतुर्द्दशभिर्द्दशभिः शरैः। त्रिभिरेव युधामन्युरुत्तमौजास्त्रिभिस्तथा ॥ ३० ॥ सञ्चिच्छिदतुरप्यस्य ध्वजं कार्म्मुकमेव च। अथान्यद्धनुरादाय हार्द्दिक्यः क्रोधमूर्च्छितः ॥ ३१ ॥ कृत्वा विधनुषौ वीरौ शरवर्षैरवाकिरत्। तावन्ये धनुषी सज्ये कृत्वा भोजं विजघ्नतुः ॥ ३२ ॥ तेनान्तरेण वीभत्सुर्विवेशामित्रवाहिनीम्। न लेभाते तु तौ द्वारं वारितौ कृतवर्म्मणा ॥ ३३ ॥ धार्त्तराष्ट्रेष्वनीकेषु यतमानौ नरर्षभौ। अनीकान्यर्द्दयन् युद्धे त्वरितः श्वेतवाहनः ॥ ३४ ॥ नावधीत् कृतवर्म्माणं प्राप्तमप्यरिसूदनः। तं दृष्ट्वा तु तथायान्तं शूरो राजा श्रुतायुधः ॥ ३५ ॥ अभ्यद्रवत् सुसंक्रुद्धो विधुन्वानो महद्धनुः। स पार्थं त्रिभिरानर्च्छत् सप्तत्या च जनार्द्दनम् ॥ ३६ ॥ क्षुरप्रेण सुतीक्ष्णेन पार्थकेतुमताड़यत्। ततोऽर्ज्जुनो नवत्या तु शराणां नतपर्व्वणाम् ॥ ३७ ॥ आजघान भृशं क्रुद्धस्तोत्रैरिव महाद्विपम्। स तं न ममृषे राजन् पाण्डवेयस्य विक्रमम् ॥ ३८ ॥ अथैनं सप्तसप्तत्या नाराचानां समार्पयत्। तस्यार्ज्जुनो धनुश्छित्त्वा शरावापं निकृत्य च ॥ ३९ ॥ आजघानोरसि क्रुद्धः सप्तभिर्नतपर्व्वभिः। अथान्यद्धनुरादाय स राजा क्रोधमूर्च्छितः ॥ ४० ॥ वासविं नवभिर्बाणैर्बाह्वोरुरसि चार्पयत्। ततोऽर्ज्जुनः स्मयन्नेव श्रुतायुध-

मरिन्दमः ॥ ४१ ॥ शरैरनेकसाहस्रैः पीड़यामास भारत। अश्वांश्चास्यावधीत्तूर्णं सारथिञ्च महारथः ॥ ४२ ॥ विव्याध चैनं सप्तत्या नाराचानां महाबलः। हताश्वं रथमुत्सृज्य स तु राजा श्रुतायुधः ॥ ४३ ॥ अभ्यद्रवद्रणे पार्थं गदामुद्यम्य वीर्य्यवान्। वरुणस्यात्मजो वीरः स तु राजा श्रुतायुधः ॥ ४४ ॥ पर्णाशा जननी यस्य शीततोया महानदी। तस्य माताब्रवीद्राजन् वरुणं पुत्रकारणात् ॥ ४५ ॥ अवध्योऽयं भवेल्लोके शत्रूणां तनयो मम। वरुणस्त्वब्रवीत् प्रीतो ददाम्यस्मै वरं हितम् ॥ ४६ ॥ दिव्यमस्त्रं सुतस्तेऽयं येनावध्यो भविष्यति। नास्ति चाप्यमरत्वं वै मनुष्यस्य कथञ्चन ॥ ४७ ॥ सर्व्वेणावश्यमर्त्तव्यं जातेन सरिताम्वरे। दुर्द्धर्ष-स्त्वेष शत्रुणां रणेषु भविता सदा ॥ ४८ ॥ अस्त्रस्यास्य प्रभावाद्वै व्येतु ते मनसो ज्वरः। इत्युक्त्वा वरुणः प्रादात् गदां मन्त्रपुर-स्कृताम् ॥ ४९ ॥ यामासाद्य दुराधर्षः सर्व्वलोके श्रुतायुधः। उवाच चैनं भगवान् पुनरेव जलेश्वरः ॥ ५० ॥ अयुध्यति न मोक्तव्या सा त्वय्येव पतेदिति। हन्यादेषा प्रतीपं हि प्रयोक्तार-मपि प्रभो ॥ ५१ ॥ न चाकरोत् स तद्वाक्यं प्राप्ते काले श्रुतायुधः। स तया वीरघातिन्या जनार्द्दनमताड़यत् ॥ ५२ ॥ प्रतिजग्राह तां कृष्णः पीनेनांसेन वीर्य्यवान्। नाकम्पयत शौरिं सा विन्ध्यं गिरिमिवानिलः ॥ ५३ ॥ प्रत्युद्यान्ती तमेवैषा कृत्येव दुरधिष्ठिता। जघान चास्थितं वीरं श्रुतायुधममर्षणम् ॥ ५४ ॥ हत्वा श्रुतायुधं वीरं धरणीमन्वपद्यत। गदां निवर्त्तितां दृष्ट्वा निहतञ्च श्रुता-युधम् ॥ ५५ ॥ हाहाकारो महांस्तत्र सैन्यानां समजायत। स्वेनास्त्रेण हतं दृष्ट्वा श्रुतायुधमरिन्दमम् ॥ ५६ ॥ अयुध्यमानाय ततः केशवाय नराधिप। क्षिप्ता श्रुतायुधेनाथ तस्मात्तमवधीद्गदा ॥ ५७ ॥ यथोक्तं वरुणेनाजौ तथा स निधनं गतः। व्यसु-श्चाप्यपतद्भूमौ प्रेक्षतां सर्व्वधन्विनाम् ॥ ५८ ॥ पतमानस्तु स बभौ

पर्णाशायाः प्रियः सुतः । स भग्न इव वातेन बहुशाखो वनस्पतिः ॥ ५९ ॥ ततः सर्वाणि सैन्यानि सेनामुख्याश्च सर्वशः । प्राद्रवन्त हतं दृष्ट्वा श्रुतायुधमरिन्दमम् ॥ ६० ॥ ततः काम्बोजराजस्य पुत्रः शूरः सुदक्षिणः । अभ्ययाज्जवनैरश्वैः फाल्गुनं शत्रुसूदनम् ॥६१॥ तस्य पार्थः शरान् सप्त प्रेषयामास भारत । ते तं शूरं विनिर्भिद्य प्राविशन् धरणीतलम् ॥ ६२ ॥ सोऽतिविद्धः शरैस्तीक्ष्णैर्गाण्डीव-प्रेषितैर्मृधे । अर्ज्जुनं प्रतिविव्याध दशभिः कङ्कपत्रिभिः ॥ ६३ ॥ वासुदेवं त्रिभिर्विद्ध्वा पुनः पार्थञ्च पञ्चभिः । तस्य पार्थो धनुश्छित्त्वा केतुं चिच्छेद मारिष ॥ ६४ ॥ भल्लाभ्यां भृशतीक्ष्णाभ्यां तञ्च विव्याध पाण्डव.। स तु पार्थं त्रिभिर्विद्ध्वा सिंहनादमथानदत् ॥ ६५ ॥ सर्वपारशवीञ्चैव शक्तिं शूरः सुदक्षिणः । सघण्टां प्राहिणोद्घोरां क्रुद्धो गाण्डीवधन्वने ॥ ६६ ॥ सा ज्वलन्ती महोल्केव तमासाद्य महारथम् । सविस्फुलिङ्गा निर्भिद्य निपपात महीतले ॥ ६७ ॥ शक्त्या त्वभिहतो गाढं मूर्च्छयातिपरिप्लुतः । समाश्वस्य महातेजाः सृक्कणी परिलेलिहन् ॥ ६८ ॥ तं चतुर्द्दशभिः पार्थो नाराचैः कङ्कपत्रिभिः । साश्वध्वजधनुःसूतं विव्याधाचिन्त्यविक्रमः ॥ ६९ ॥ रथञ्चान्यैः सुबहुभिश्चक्रे विशकलं शरैः । सुदक्षिणन्तं काम्बोजं मोघसङ्कल्पविक्रमम् ॥ ७० ॥ बिभेद हृदि वाणेन पृथुधारेण पाण्डवः । स भिन्नवर्म्मा स्रस्ताङ्गः प्रभ्रष्टमुकुटाङ्गदः ॥ ७१ ॥ पपाताभिमुखः शूरो यन्त्रमुक्त इव ध्वजः । गिरेः शिखरजः श्रीमान् सुशाखः सुप्रतिष्ठितः ॥ ७२ ॥ निर्भग्न इव वातेन कर्णिकारो हिमात्यये । शेते स्म निहतो भूमौ काम्बोजास्तरणोचितः ॥ ७३ ॥ महार्हाभरणोपेतः सानुमानिव पर्व्वतः । सुदर्शनीयस्ताम्राक्षः कर्णिना स सुदक्षिणः ॥ ७४ ॥ पुत्रः काम्बोजराजस्य पार्थेन विनिपातितः । धारयन्नग्निसङ्काशां शिरसा काञ्चनीं स्रजम् ॥ ७५ ॥ अशोभत महाबाहुर्व्यसुर्भूमौ

निपातितः। ततः सर्वाणि सैन्यानि व्यद्रवन्त सुतस्य ते। हतं श्रुतायुधं दृष्ट्वा काम्बोजञ्च सुदक्षिणम् ॥ ७६ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि श्रुतायुधसुदक्षिणवधे द्विनवतोऽध्यायः ॥ ९२ ॥

---

सञ्जय उवाच। हते सुदक्षिणे राजन् वीरे चैव श्रुतायुधे। जवेनाभ्यद्रवन् पार्थं कुपिताः सैनिकास्तव ॥ १ ॥ अभीषाहाः शूरसेनाः शिवयोऽथ वशातयः। अभ्यवर्षंस्ततो राजन् शरवर्षैर्धनञ्जयम् ॥ २ ॥ तेषां षष्टिशतानन्यान् प्राधमत् पाण्डवः शरैः। ते स्म भीताः पलायन्ते व्याघ्रात् क्षुद्रमृगा इव ॥ ३ ॥ ते निवृत्ताः पुनः पार्थं सर्वतः पर्य्यवारयन्। रणे सपत्नान्निघ्नन्तं जिगीषन्तं परान् युधि ॥ ४ ॥ तेषामापततां तूर्णं गाण्डीवप्रेषितैः शरैः। शिरांसि पातयामास बाहूंश्चापि धनञ्जयः ॥ ५ ॥ शिरोभिः पतितैस्तत्र भूमिरासीन्निरन्तरा। अभ्रच्छायेव चैवासीद्ध्वाङ्क्षगृध्रवलैर्युधि ॥ ६ ॥ तेषु तूत्साद्यमानेषु क्रोधामर्षसमन्वितौ। श्रुतायुश्चाच्युतायुश्च धनञ्जयमयुध्यताम् ॥ ७ ॥ बलिनौ स्पर्द्धिनौ वीरौ कुलजौ बाहुशालिनौ। तावेनं शरवर्षाणि सव्यदक्षिणमस्यताम् ॥ ८ ॥ त्वरायुक्तौ महाराज प्रार्थयानौ महद्यशः। अर्जुनस्य वधप्रेप्सू पुत्रार्थं तव धन्विनौ ॥ ९ ॥ तावर्जुनं सहस्रेण पत्रिणां नतपर्वताम्। पूरयामासतुः क्रुद्धौ तड़ागं जलदौ यथा ॥ १० ॥ श्रुतायुश्च ततः क्रुद्धस्तोमरेण धनञ्जयम्। आजघान रथश्रेष्ठः पीतेन निशितेन च ॥ ११ ॥ सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्षणः। जगाम परमं मोहं मोहयन् केशवं रणे ॥ १२ ॥ एतस्मिन्नेव काले तु सोऽच्युतायुर्महारथः। शूलेन भृशतीक्ष्णेन ताड़यामास पाण्डवम् ॥ १३ ॥ क्षते क्षारं हि स ददौ पाण्डवस्य

महात्मनः। पार्थोऽपि भृशसंविद्धो ध्वजयष्टिं समाश्रितः ॥१४॥
ततः सर्व्वस्य सैन्यस्य तावकस्य विशाम्पते। सिंहनादो महानासीत्
हतं मत्वा धनञ्जयम् ॥ १५ ॥ कृष्णाय भृशसन्तप्तो दृष्ट्वा पार्थं विचे-
तनम्। आश्वासयत् सुहृद्याभिर्वाग्भिस्तत्र धनञ्जयम् ॥ १६ ॥
ततस्तौ रथिनां श्रेष्ठौ लब्धलक्ष्यौ धनञ्जयम्। वासुदेवञ्च वार्ष्णेयं
शरवर्षैः समन्ततः ॥ १७ ॥ सचक्रकूवररथं साश्वध्वजपताकिनम्।
अदृश्यं चक्रतुर्युद्धे तदद्भुतमिवाभवत् ॥१८॥ प्रत्याश्वस्तस्तु बीभत्सुः
शनकैरिव भारत। प्रेतराजपुरं प्राप्य पुनः प्रत्यागतो यथा ॥२०॥
संछन्नं शरजालेन रथं दृष्ट्वा सकेशवम्। शत्रू चाभिमुखौ दृष्ट्वा
दीप्यमानाविवानलौ ॥ २१ ॥ प्रादुश्चक्रे ततः पार्थः शाक्रमस्त्रं
महारथः। तस्मादासन् सहस्राणि शराणां नतपर्व्वणाम् ॥ २२ ॥
ते जघ्नुस्तौ महेष्वासौ ताभ्यां मुक्ताश्च सायकाः। विविशुराकाश-
गताः पार्थवाणविदारिताः ॥ २३ ॥ प्रतिहत्य शरांस्तूर्णं शर-
वेगेन पाण्डवः। प्रतस्थे तत्र तत्रैव योधयन् वै महारथान् ॥२४॥
तौ च फाल्गुनवाणौघैर्व्विबाहुशिरसौ कृतौ। वसुधामन्वपद्येतां
वातनुन्नाविव द्रुमौ ॥ २५ ॥ श्रुतायुषस्य निधनं बधश्चैवाच्युतायुषः।
लोकविस्मापनमभूत् समुद्रस्येव शोषणम् ॥ २६ ॥ तयोः पदा-
नुगान् हत्वा पुनः पञ्चाशतं रथान्। प्रत्यगात् भारतीं सेनां
निघ्नन् पार्थो वरान् वरान् ॥ २७ ॥ श्रुतायुषञ्च निहतं प्रेक्ष्य
चैवाच्युतायुषम्। नियतायुश्च संक्रुद्धो दीर्घायुश्चैव भारत ॥२८॥
पुत्रौ तयोर्नरश्रेष्ठौ कौन्तेयं प्रतिजग्मतुः। किरन्तौ विविधान्
वाणान् पितृव्यसनकर्षितौ ॥ २९ ॥ तावर्ज्जुनो मुहूर्त्तेन शरैः
सन्नतपर्व्वभिः। प्रैषयत् परमक्रुद्धो यमस्य सदनं प्रति ॥ ३० ॥
लोड़यन्तमनीकानि द्विपं पद्मसरो यथा। नाशक्नुवन् वारयितुं
पार्थं क्षत्रियपुङ्गवाः ॥ ३१ ॥ अङ्गास्तु गजवारेण पाण्डवं पर्य्य-
वारयन्। क्रुद्धाः सहस्रशो राजन् शिक्षिता हस्तिसादिनः ॥३२॥

दुर्य्योधनसमादिष्टाः कुञ्जरैः पर्व्वतोपमैः। प्राच्याश्च दाक्षिणा-
त्याश्च कलिङ्गप्रमुखा नृपाः॥ ३३ ॥ तेषामापततां शीघ्रं गाण्डीव-
प्रेषितैः शरैः। निचकर्त्त शिरांस्युग्रो बाहूनपि सभूषणान्॥३४॥
तैः शिरोभिर्म्मही कीर्णा बाहुभिश्च सहाङ्गदैः। बभौ कनक-
पाषाणा भुजगैरिव संवृता॥ ३५॥ बाहवो विशिखैश्छिन्नाः
शिरांस्युन्मथितानि च। पतमानान्यदृश्यन्त द्रुमेभ्य इव पक्षिणः
॥ ३६ ॥ शरैः सहस्रशो विद्धा द्विपाः प्रसृतशोणिताः। अदृश्य-
न्ताद्रयः काले गैरिकाम्बुस्रवा इव॥ ३७ ॥ निहताः शेरते स्मान्ये
बीभत्सोर्निशितैः शरैः। गजपृष्ठगता म्लेच्छा नानाविकृतदर्शनाः
॥ ३८ ॥ नानावेशधरा राजन् नानाशस्त्रौघसंवृताः। रुधिरे-
णानुलिप्ताङ्गा भान्ति चित्रैः शरैर्हताः॥ ३९ ॥ शोणितं निर्वमन्ति
स्म द्विपाः पार्थशराहताः। सहस्रशश्छिन्नगात्राः सारोहाः
सपदानुगाः॥ ४० ॥ चुक्रुशुश्च निपेतुश्च बभ्रमुश्चापरे दिशः।
भृशं त्रस्ताश्च बहवः स्वानेव ममृदुर्गजाः॥ ४१ ॥ सान्तरायुधिन-
श्चैव द्विपास्तीक्ष्णविषोपमाः। विदन्त्यसुरमायां ये सुघोरा घोर-
चक्षुषः॥ ४२ ॥ यवनाः पारदाश्चैव शकाश्च सह बाह्लिकैः। गो-
योनिप्रभवा म्लेच्छाः कालकल्पाः प्रहारिणः॥ ४३ ॥ दार्व्वाति-
साराः दरदाः पुण्ड्राश्चैव सहस्रशः। ते न शक्याः स्म सङ्ख्यातुं
व्राताः शतसहस्रशः॥ ४४ ॥ अभ्यवर्षन्त ते सर्व्वे पाण्डवं निशितैः
शरैः। अवाकिरंश्च ते म्लेच्छा नानायुद्धविशारदाः॥ ४५ ॥ तेषा-
मपि ससर्ज्जाशु शरवृष्टिं धनञ्जयः। सृष्टिस्तथाविधा ह्यासी-
च्छलभानामिवायतिः॥ ४६ ॥ अभ्रच्छायामिव शरैः सैन्ये कृत्वा
धनञ्जयः। मुण्डार्द्धमुण्डान् जटिलान् शुचीजटिलाननान्॥४७
म्लेच्छानघातयत् सर्व्वान् समेतानस्त्रतेजसा। शरैश्च शतशो विद्धास्ते
सङ्घा गिरिचारिणः॥ ४७ ॥ प्राद्रवन्त रणे भीता गिरिगह्वर-
वासिनः। गजाश्वसादिम्लेच्छानां पतितानां शितैः शरैः॥ ४९ ॥

वलाः कङ्का वृका भूमावपिवन् रुधिरं मुदा। पत्तग्रश्वरथनागैश्च प्रच्छन्नकृतसङ्क्रमाम् ॥ ५० ॥ शरवर्षप्लवां घोरां केशशैवलशाद्वलाम्। प्रावर्त्तयन्नदीमुग्रां शोणितौघतरङ्गिणीम् ॥ ५१ ॥ छिन्नाङ्गुलिक्षुद्रमत्स्यां युगान्ते कालसन्निभाम्। अकरोद्गजसम्बाधां नदीमुत्तरशोणिताम् ॥ ५२ ॥ देहेभ्यो राजपुत्राणां नागाश्वरथसादिनाम्। यथा स्थलञ्च निम्नञ्च न स्यादर्षति वासवे ॥५३॥ तथासीत् पृथिवी सर्वा शोणितेन परिप्लुता। षट्सहस्रान् हयान् वीरान् पुनर्द्दशशतान् वरान् ॥ ५४ ॥ प्राहिणोन्मृत्युलोकाय चत्रियान् चत्रियर्षभः। शरैः सहस्रशो विद्धा विधिवत् कल्पिता द्विपाः ॥ ५५ ॥ शेरते भूमिमासाद्य शैला वज्रहता इव। सवाजिरथमातङ्गान् निघ्नन् व्यचरदर्जुनः ॥ ५६ ॥ प्रभिन्न इव मातङ्गो मृद्नन् नलवनं यथा। भूरिद्रुमलतागुल्मं शुष्केन्धनतृणोलपम् ॥ ५७ ॥ निर्द्दहेदनलोऽरण्यं यथा वायुसमीरितः। सैनारण्यं तव तथा कृष्णानिलसमीरितः ॥ ५८ ॥ शरार्च्चिरदहत् क्रुद्धः पाण्डवाग्निर्द्धनञ्जयः। शून्यान् कुर्व्वन् रथोपस्थान् मानवैः संस्तरन्महीम् ॥ ५९ ॥ प्रानृत्यदिव सम्बाधे चापहस्तो धनञ्जयः। वज्रकल्पैः शरैर्भूमिं कुर्व्वन्नुत्तरशोणिताम् ॥ ६० ॥ प्राविशद्भारतीं सेनां संक्रुद्धो वै धनञ्जयः। तं श्रुतायुस्तथाम्बष्ठो व्रजमानं न्यवारयत् ॥ ६१ ॥ तस्यार्ज्जुनः शरैस्तीक्ष्णैः कङ्कपत्रपरिच्छदैः। न्यपातयद्धयान् शीघ्रं यतमानस्य मारिष ॥ ६२ ॥ धनुश्चास्यापरैश्छित्त्वा शरैः पार्थो विचक्रमे। अम्बष्ठस्तु गदां गृह्य क्रोधपर्य्याकुलेक्षणः ॥ ६३ ॥ आससाद रणे पार्थं केशवञ्च महारथम्। ततः सम्प्रहरन् वीरो गदामुद्यम्य भारत ॥ ६४ ॥ रथमावार्य्य गदया केशवं समताड़यत्। गदया ताड़ितं दृष्ट्वा केशवं परवीरहा ॥ ६५ ॥ अर्ज्जुनोऽथ भृशं क्रुद्धः सोऽम्बष्ठं प्रति भारत। ततः शरैर्हेमपुङ्खैः सगदं रथिनां वरम् ॥ ६६ ॥ छादयामास

समरे मेघः सूर्य्येनिवोदितम् । अथापरैः शरैश्चापि गदां तस्य महात्मनः ॥ ६७ ॥ अचूर्णयत्तदा पार्थस्तदद्भुतमिवाभवत् । अथ तां पतितां दृष्ट्वा गृह्यान्यां च महागदाम् ॥ ६८ ॥ अर्जुनं वासुदेवञ्च पुनः पुनरताड़यत् । तस्यार्जुनः क्षुरप्राभ्यां सगदावुद्यतौ भुजौ ॥ ६९ ॥ चिच्छेदेन्द्रध्वजाकारौ शिरश्चान्येन पत्रिणा । स पपात हतो राजन् वसुधामनुनादयन् ॥ ७० ॥ इन्द्रध्वज इवोत्सृष्टो यन्त्रनिर्मुक्तबन्धनः । रथानीकावगाढश्च वारणाश्वशतैर्वृतः । अदृश्यत तदा पार्थो घनैः सूर्य्य इवावृतः ॥ ७१ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि अम्बष्ठवधे
त्रिनवतोऽध्यायः ॥ ९३ ॥

———

सञ्जय उवाच । ततः प्रविष्टे कौन्तेये सिन्धुराजजिघांसया । द्रोणानीकं विनिर्भिद्य भोजानीकञ्च दुस्तरम् ॥ १ ॥ काम्बोजस्य च दायादे हते राजन् सुदक्षिणे । श्रुतायुधे च विक्रान्ते निहते सव्यसाचिना ॥ २ ॥ विप्रद्रुतेष्वनीकेषु विध्वस्तेषु समन्ततः । प्रभग्नं स्वदलं दृष्ट्वा पुत्रस्ते द्रोणमभ्ययात् ॥ ३ ॥ त्वरन्नेकरथेनैव समेत्य द्रोणमब्रवीत् । गतः स पुरुषव्याघ्रः प्रमथ्येमां महाचमूम् ॥ ४ ॥ अत्र बुद्ध्या समीक्षस्व किन्नु कार्य्यमनन्तरम् । अर्जुनस्य विघाताय दारुणेऽस्मिन् जनक्षये ॥ ५ ॥ यथा स पुरुषव्याघ्रो न हन्येत जयद्रथम् । तथा विधत्स्व भद्रं ते त्वं हि नः परमा गतिः ॥ ६ ॥ असौ धनञ्जयाग्निर्हि कोपमारुतचोदितः । सेनाकक्षं दहति मे वह्निः कक्षमिवोत्थितः ॥ ७ ॥ अतिक्रान्ते हि कौन्तेये भित्त्वा सैन्यं परन्तप । जयद्रथस्य गोप्तारः संशयं परमं गताः ॥ ८ ॥ स्थिरा बुद्धिर्नरेन्द्राणां आसीद्ब्रह्मविदाम्वर ।

नातिक्रमिष्यति द्रोणं जातु जीवन् धनञ्जयः ॥ ९ ॥ योऽसौ पार्थो व्यतिक्रान्तो मिषतस्ते महाद्युते। सर्व्वं ह्यद्यातुरं मन्ये नैतदस्ति बलं मम ॥ १० ॥ जानामि त्वां महाभाग पाण्डवानां हिते रतम्। तथा मुह्यामि च ब्रह्मन् कार्य्यवत्तां विचिन्तयन् ॥ ११ ॥ यथाशक्ति च ते ब्रह्मन् वर्त्तये वृत्तिमुत्तमाम्। प्रीणामि च यथाशक्ति तच्च त्वं नावबुध्यसे ॥ १२ ॥ अस्मान्न त्वं सदा भक्तानिच्छस्यमितविक्रम। पाण्डवान् सततं प्रीणास्यस्माकं विप्रिये रतान् ॥ १३ ॥ अस्मानेवोपजीवंस्त्वमस्माकं विप्रिये रतः। न ह्यहं त्वां विजानामि मधुदिग्धमिव क्षुरम् ॥ १४ ॥ नादास्यच्चेद्वरं मह्यं भवान् पाण्डवनिग्रहे। नावारयिष्यं गच्छन्तमहं सिन्धुपतिं गृहान् ॥ १५ ॥ मया त्वाशंसमानेन त्वत्तस्त्राणमबुद्धिना। आश्वासितः सिन्धुपतिर्मोहाद्दत्तश्च मृत्यवे ॥ १६ ॥ यमदंष्ट्रान्तरंप्राप्तो मुच्येतापि हि मानवः। नार्ज्जुनस्य वशं प्राप्तो मुच्येताजौ जयद्रथः ॥ १७ ॥ स तथा कुरु शोणाश्व यथा मुच्येत सैन्धवः। मम चार्त्तप्रलापानां माक्रुधः पाहि सैन्धवम् ॥ १८ ॥

द्रोण उवाच। नाभ्यसूयामि ते वाक्यमश्वत्थाम्नापि मे समः। सत्यं तु मे प्रवक्ष्यामि तज्जुषस्व विशाम्पते ॥ १९ ॥ सारथिप्रवरः कृष्णः शीघ्राश्चास्य हयोत्तमाः। अल्पञ्च विवरं कृत्वा तूर्णं याति धनञ्जयः ॥ २० ॥ किन्न पश्यसि वाणौघान् क्रोशमात्रे किरीटिनः। पश्चाद्रथस्य पतितान् क्षिप्तान् शीघ्रं हि गच्छतः ॥ २१ ॥ न चाहं शीघ्रयानेऽद्य समर्थो वयसान्वितः। सेनामुखे च पार्थानामेतद्बलमुपस्थितम् ॥ २२ ॥ युधिष्ठिरश्च मे ग्राह्यो मिषतां सर्व्वधन्विनाम्। एवं मया प्रतिज्ञातं क्षत्रमध्ये महाभुज ॥ २३ ॥ धनञ्जयेन चोत्सृष्टो वर्त्तते प्रमुखे नृप। तस्माद्व्यूहमुखं हित्वा नाहं योत्स्यामि फाल्गुनम् ॥ २४ ॥ तुल्याभिजनकर्म्माणं शत्रुमेकं सहायवान्। गत्वा योधय माभैस्त्वं त्वं ह्यस्य जगतः पतिः ॥२५॥

राजा शूरः कृती दक्षो जेतुं परपुरञ्जय। वीरः स्वयं प्रयाह्यत्र यत्र पार्थो धनञ्जयः॥ २६॥

दुर्य्योधन उवाच। कथं त्वामप्यतिक्रान्तः सर्व्वशस्त्रभृतांवरम्। धनञ्जयो मया शक्य आचार्य्य प्रतिवाधितुम्॥ २७॥ अपि शक्यो रणे जेतुं वज्रहस्तः पुरन्दरः। नार्जुनः समरे शक्यो जेतुं परपुरञ्जयः॥ २८॥ येन भोजश्च हार्द्दिक्यो भवांश्च त्रिदशोपमः। अस्त्रप्रतापेन जितौ श्रुतायुश्च निवर्हितः॥ २९॥ सुदक्षिणश्च निहतः स च राजा श्रुतायुधः। श्रुतायुश्चाच्युतायुश्च म्लेच्छाश्चायुतशो हताः॥ ३०॥ तं कथं पाण्डवं युद्धे दहन्तमिव पावकम्। प्रतियोत्स्यामि दुर्द्धर्षं तमहं शस्त्रकोविदम्॥ ३१॥ क्षमञ्च मन्यसे युद्धं मम तेनाद्य संयुगे। परवानस्मि भवति प्रेष्यवद्रक्ष मे यशः॥३२

द्रोण उवाच। सत्यं वदसि कौरव्य दुराधर्षो धनञ्जयः। अहन्तु तत् करिष्यामि यथैनं प्रसहिष्यसि॥ ३३॥ अद्भुतञ्चाद्य पश्यन्तु लोके सर्व्वधनुर्द्धराः। विषक्तं त्वयि कौन्तेयं वासुदेवस्य पश्यतः॥ ३४॥ एष ते कवचं राजंस्तथा बध्नामि काञ्चनम्। यथा नराणां नास्त्राणि प्रहरिष्यन्ति ते रणे॥ ३५॥ यदि त्वां सासुरसुराः सयक्षोरगराक्षसाः। योधयन्ति त्रयो लोकाः सनरा नास्ति ते भयम्॥ ३६॥ न कृष्णो न च कौन्तेयो न चान्यः शस्त्रभृद्रणे। शरानर्पयितुं कश्चित् कवचे तव शक्ष्यति॥ ३७॥ स त्वं कवचमास्थाय क्रुद्धमद्य रणेऽर्जुनम्। त्वरमाणः स्वयं याहि न त्वासौ विसहिष्यति॥ ३८॥

सञ्जय उवाच। एवमुक्त्वा त्वरन्द्रोणः स्पृष्ट्वाम्भो वर्म्म भास्वरम्। आवबन्धाद्भुततमं जपन् मन्त्रान् यथाविधि॥ ३९॥ रणे तस्मिन् सुमहति विजयस्य सुतस्य ते। विसिस्मापयिषुर्ल्लोकान् विद्यया ब्रह्मवित्तमः॥ ४०॥

द्रोण उवाच। करोतु स्वस्ति ते ब्रह्म ब्रह्मा चापि द्विजा-

तयः । सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति भारत ॥ ४१ ॥
ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः । तुभ्यं राजर्षयः सर्व्वे
स्वस्ति कुर्व्वन्तु सर्व्वशः ॥ ४२ ॥ स्वस्ति तेऽस्त्वेकपादेभ्यो बहुपादेभ्य
एव च । स्वस्त्यस्त्वपादकेभ्यश्च नित्यं तव महारणे ॥ ४३ ॥ स्वाहा
स्वधा शची चैव स्वस्ति कुर्व्वन्तु ते सदा । लक्ष्मीररुन्धती चैव
कुरुतां स्वस्ति तेऽनघ ॥ ४४ ॥ असितो देवलश्चैव विश्वामित्र-
स्तथाङ्गिराः । वशिष्ठः कश्यपश्चैव स्वस्ति कुर्व्वन्तु ते नृप ॥ ४५ ॥
धाता विधाता लोकेशो दिशश्च सदिगीश्वराः । स्वस्ति तेऽद्य
प्रयच्छन्तु कार्त्तिकेयश्च षट्मुखः ॥ ४६ ॥ विवस्वान् भगवान्
स्वस्ति करोतु तव सर्व्वशः । दिग्गजाश्चैव चत्वार क्षितिश्च गगनं
ग्रहाः ॥ ४७ ॥ अधस्ताद्धरणीं योऽसौ सदा धारयते नृप ।
शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥ ४८ ॥ गान्धारे युधि
विक्रम्य निर्ज्जिताः सुरसत्तमाः । पुरा वृत्रेण दैत्येन भिन्नदेहाः
सहस्रशः ॥ ४९ ॥ हृततेजोबलाः सर्व्वे तदा सेन्द्रा दिवौकसः ।
ब्रह्माणं शरणं जग्मुर्वृत्राद्भीता महासुरात् ॥ ५० ॥

देवा ऊचुः । प्रमर्द्दितानां वृत्रेण देवानां देवसत्तम । गति-
र्भव सुरश्रेष्ठ त्राहि नो महतो भयात् ॥ ५१ ॥ अथ पार्श्वे स्थितं
विष्णुं शक्रादींश्च सुरोत्तमान् । प्राह तथ्यमिदं वाक्यं विषण्णान्
सुरसत्तमान् ॥ ५२ ॥ रक्ष्या मे सततं देवा महेन्द्राः सहिजातयः ।
त्वष्टुः सुदुर्द्धरं तेजो येन वृत्रो विनिर्मितः ॥ ५३ ॥ त्वष्ट्रा पुरा
तपस्तप्त्वा वर्षायुतशतं तदा । वृत्रो विनिर्मितो देवाः प्राप्यानुज्ञां
महेश्वरात् ॥ ५४ ॥ स तस्यैव प्रसादाद्वो हन्यादेव रिपुबली ।
नागत्वा शङ्करस्थानं भगवान् दृश्यते हरः ॥ ५५ ॥ दृष्ट्वा जेष्यथ
वृत्रं तं क्षिप्रं गच्छत मन्दरम् । तत्रास्ते तपसां योनिर्द्दक्षयज्ञ-
विनाशनः ॥ ५६ ॥ पिनाकी सर्व्वभूतेशो भगनेत्रनिपातनः । ते
गत्वा सहिता देवा ब्रह्मणा सह मन्दरम् ॥ ५७ ॥ अपश्यं

स्तेजसां राशिं सूर्य्यकोटिसमप्रभम् । सोऽब्रवीत् स्वागतं देवा ब्रूत किङ्करवाण्यहम् ॥ ५८ ॥ अमोघं दर्शनं मह्यं कामप्राप्तिरतोऽस्तु वः । एवमुक्तास्तु ते सर्वे प्रत्यूचुस्तं दिवौकसः ॥ ५९ ॥ तेजो हृतं नो वृत्रेण गतिर्भव दिवौकसाम् । मूर्त्तीरीक्षस्व नो देव प्रहारैर्जर्जरीकृताः । शरणं त्वां प्रपन्नाः स्म गतिर्भव महेश्वर ॥ ६० ॥

शर्व उवाच । विदितं वो यथा देवाः कृत्येयं सुमहाबला । त्वष्टुस्तेजोभवा घोरा दुर्निवार्य्या कृतात्मभिः ॥ ६१ ॥ अवश्यन्तु मया कार्य्यं साह्यं सर्वदिवौकसाम् । ममेदं गात्रजं शक्र कवचं गृह्य भास्वरम् । दधानोऽनेन मन्त्रेण मानसेन सुरेश्वर ॥ ६२ ॥

द्रोण उवाच । इत्युक्त्वा वरदः प्रादात् वर्म तन्मन्त्रमेव च । स तेन वर्मणा गुप्तः प्रायाद्वृत्रचमूं प्रति ॥ ६३ ॥ नानाविधैश्च शस्त्रौघैः पात्यमानैर्महारणे । न सन्धिः शक्यते भेत्तुं वर्मबन्धस्य तस्य तु ॥ ६४ ॥ ततो जघान समरे वृत्रं देवपतिः स्वयम् । तच्च मन्त्रमयं बन्धं वर्म चाङ्गिरसे ददौ ॥ ६५ ॥ अङ्गिराः प्राह पुत्रस्य मन्त्रज्ञस्य बृहस्पतेः । बृहस्पतिरथोवाच अग्निवेश्याय धीमते ॥ ६६ ॥ अग्निवेश्यो मम प्रादात्तेन बध्नामि वर्म ते । तवाद्य देहरक्षार्थं मन्त्रेण नृपसत्तम ॥ ६७ ॥

सञ्जय उवाच । एवमुक्त्वा ततो द्रोणस्तव पुत्रं महाद्युतिम् । पुनरेव वचः प्राह शनैराचार्य्यपुङ्गवः ॥ ६८ ॥ ब्रह्मसूत्रेण बध्नामि कवचं तव पार्थिव । हिरण्यगर्भेण तथा बद्धं विष्णोः पुरा रणे ॥ ६९ ॥ यथा च ब्रह्मणा बद्धं सङ्ग्रामे तारकामये । शक्रस्य कवचं दिव्यं तथा बध्नाम्यहं तव ॥ ७० ॥ बद्ध्वा तु कवचं तस्य मन्त्रेण विधिपूर्वकम् । प्रेषयामास राजानं युद्धाय महते द्विजः ॥ ७१ ॥ स सन्नद्धो महाबाहुराचार्य्येण महात्मना । रथानाञ्च सहस्रेण त्रिगर्त्तानां प्रहारिणाम् ॥ ७२ ॥ तथा दन्तिसहस्रेण

मत्तानां वीर्य्यशालिनाम्। अश्वानां नियुतेनैव तथान्यैश्च महारथैः ॥ ७३ ॥ ततः प्रायान्महाबाहुरर्जुनस्य रथं प्रति। नानावादित्रघोषेण यथा वैरोचनिस्तथा ॥ ७४ ॥ ततः शब्दो महानासीत् सैन्यानां तव भारत। अगाधं प्रस्थितं दृष्ट्वा समुद्रमिव कौरवम् ॥ ७५

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि दुर्य्योधनकवचबन्धे चतुर्नवतोऽध्यायः ॥ ९४ ॥

---

सञ्जय उवाच। प्रविष्टयोर्म्महाराज पार्थवार्ष्णेययो रणे। दुर्य्योधने प्रयाते च पृष्ठतः पुरुषर्षभे ॥ १ ॥ जवेनाभ्यद्रवद्द्रोणं महता निस्वनेन च। पाण्डवाः सोमकैः सार्द्धं ततो युद्धमवर्त्तत ॥ २ ॥ तद्युद्धमभवत्तीव्रं तुमुलं लोमहर्षणम्। कुरूणां पाण्डवानाञ्च व्यूहस्य पुरतोऽद्भुतम् ॥ ३ ॥ राजन् कदाचिन्नास्माभिर्दृष्टं तादृक् न च श्रुतम्। यादृङ्मध्यगते सूर्य्ये युद्धमासीद्विशाम्पते ॥ ४ ॥ धृष्टद्युम्नमुखाः पार्था व्यूढानीका प्रहारिणः। द्रोणस्य सैन्यं ते सर्व्वे शरवर्षैरवाकिरन् ॥ ५ ॥ वयं द्रोणं पुरस्कृत्य सर्व्वशस्त्रभृतां वरम्। पार्षतप्रमुखान् पार्थानभ्यवर्षाम सायकैः ॥ ६ ॥ महामेघाविवोदीर्णौ मिश्रवातौ हिमात्यये। सेनाग्रे प्रचकाशेते रुचिरे रथभूषिते ॥ ७ ॥ समेत्य तु महासेने चक्रतुर्व्वेगमुत्तमम्। जाह्नवीयमुने नद्यौ प्रावृषीवोल्बणोदके ॥ ८ ॥ नानाशस्त्रपुरोवातो द्विपाश्वरथसंवृतः। गदाविद्युन्महारौद्रः सङ्ग्रामजलदो महान् ॥ ९ ॥ भारद्वाजानिलोद्धूतः शरधारासहस्रवान्। अभ्यवर्षन्महासैन्यः पाण्डुसेनाग्निमुद्धतम् ॥ १० ॥ समुद्रमिव घर्मान्ते विशन् घोरो महानिलः। व्यक्षोभयदनीकानि पाण्डवानां द्विजोत्तमः ॥ ११ ॥ तेऽपि सर्व्वप्रयत्नेन द्रोणमेव समाद्रवन्। विभित्सन्तो महासेतुं वार्य्यौघाः प्रबला इव ॥ १२ ॥

वारयामास तान् द्रोणो जलौघमचलो यथा । पाण्डवान् समरे क्रुद्धान् पाञ्चालांश्च सकेकयान् ॥ १३ ॥ अथापरे च राजानः परिवृत्य समन्ततः । महाबला रणे शूराः पाञ्चालानन्ववारयन् ॥ १४ ॥ ततो रणे नरव्याघ्रः पार्षतः पाण्डवैः सह । सञ्जघा-नास्कद्द्रोणं विभित्सुररिवाहिनीम् ॥ १५ ॥ यथैव शरवर्षाणि द्रोणो वर्षति पार्षते । तथैव शरवर्षाणि धृष्टद्युम्नोऽप्यवर्षत ॥१६॥ सनिस्त्रिंशपुरोवातः शक्तिप्रासर्ष्टिसंवृतः । ज्याविद्युच्चापसंह्रादो धृष्टद्युम्नबलाहकः ॥ १७ ॥ शरधाराश्मवर्षाणि व्यसृजत् सर्वतो दिशम् । निघ्नन् रथवराश्वौघान् प्लावयामास वाहिनीम् ॥ १८ ॥ यं यमार्च्छच्छरैर्द्रोणः पाण्डवानां रथव्रजम् । ततस्ततः शरै-र्द्रोणमपाकर्षत पार्षतः ॥ १९ ॥ तथा तु यतमानस्य द्रोणस्य युधि भारत । धृष्टद्युम्नं समासाद्य त्रिधा सैन्यमभिद्यत ॥ २० ॥ भोजमेकेऽभ्यवर्त्तन्त जलसन्धं तथापरे । पाण्डवैर्हन्यमानाश्च द्रोण-मेवापरे ययुः ॥ २१ ॥ सङ्घटयति सैन्यानि द्रोणस्तु रथिनाम्वरः । व्यधमच्चापि तान्यस्य धृष्टद्युम्नो महारथः ॥ २२ ॥ धार्त्तराष्ट्रा-स्त्रिधाभूता बध्यन्ते पाण्डुसृञ्जयैः । अगोपाः पशवोऽरण्ये बहुभिः श्वापदैरिव ॥२३॥ कालः सङ्ग्रसते योधान् धृष्टद्युम्नेन मोहितान् । सङ्ग्रामे तुमुले तस्मिन्निति संमेनिरे जनाः ॥ २४ ॥ कुनृपस्य यथा राज्यं दुर्भिक्षव्याधितस्करैः । द्राव्यते तद्वदापन्ना पाण्डवैस्तव वाहिनी ॥ २५ ॥ अर्करश्मिविमिश्रेषु शस्त्रेषु कवचेषु च । चक्षूंषि प्रत्यहन्यन्त सैन्येन रजसा तथा ॥ २६ ॥ त्रिधाभूतेषु सैन्येषु बध्य-मानेषु पाण्डवैः । अमर्षितस्ततो द्रोणः पाञ्चालान् व्यधमच्छरैः ॥ २७ ॥ मृद्नतस्तान्यनीकानि निघ्नतश्चापि सायकैः । बभूव रूपं द्रोणस्य कालाग्नेरिव दीप्यतः ॥ २८ ॥ रथं नागं हयञ्चापि पत्तिनञ्च विशाम्पते । एकैकेनेषुणा सङ्ख्ये निर्बिभेद महारथः ॥ २९ ॥ पाण्डवानान्तु सैन्येषु नास्ति कश्चित् स भारत । दधार

यौ रथे वाणान् द्रोणचापच्युतान् प्रभो ॥ ३० ॥ तत् पच्यमान-
मर्केण द्रोणसायकतापितम् । बभ्राम पाण्डवं सैन्यं तत्र तत्रैव
भारत ॥ ३१ ॥ तथैव पार्षतेनापि काल्यमानं बलं तव । अभ-
वत् सर्वतो दीप्तं शुष्कं वनमिवाग्निना ॥ ३२ ॥ बध्यमानेषु सैन्येषु
द्रोणपार्षतसायकैः । त्यक्त्वा प्राणान् परं शक्त्या युध्यन्ते सर्वतो-
मुखाः ॥ ३३ ॥ तावकानां परेषाञ्च युध्यतां भरतर्षभ । नासीत्
कश्चिन्महाराज योऽत्याक्षीत् संयुगं भयात् ॥ ३४ ॥ भीमसेनन्तु
कौन्तेयं सोदर्य्याः पर्य्यवारयन् । विविंशतिश्चित्रसेनो विकर्णश्च
महारथः ॥ ३५ ॥ विन्दानुविन्दावावन्त्यौ क्षेमधूर्त्तिश्च वीर्य्यवान् ।
त्रयाणां तव पुत्राणां त्रय एवानुयायिनः ॥ ३६ ॥ वाह्लीकराज-
स्तेजस्वी कुलपुत्रो महारथः । सहसेनः सहामात्यो द्रौपदेया-
नवारयत् ॥ ३७ ॥ शैब्यो गोवासनो राजा योधैर्दशशतावरैः ।
काश्यस्याभिभुवः पुत्रं पराक्रान्तमवारयत् ॥ ३८ ॥ अजातशत्रुं
कौन्तेयं ज्वलन्तमिव पावकम् । मद्राणामीश्वरः शल्यो राजा
राजानमावृणोत् ॥ ३९ ॥ दुःशासनस्त्ववस्थाप्य स्वमनीकमम-
र्षणः । सात्यकिं प्रययौ क्रुद्धः शूरो रथवरं युधि ॥ ४० ॥
स्वकेनाहमनीकेन सन्नद्धः कवचावृतः । चतुःशतैर्महेष्वासैश्चेकि-
तानमवारयत् ॥ ४१ ॥ शकुनिस्तु सहानीको माद्रीपुत्रमवारयत् ।
गान्धारकैः सप्तशतैश्चापशक्त्यसिपाणिभिः ॥ ४२ ॥ विन्दानुविन्दा-
वावन्त्यौ विराटं मत्स्यमार्च्छताम् । प्राणांस्त्यक्त्वा महेष्वासौ
मित्रार्थेऽभ्युद्यतायुधौ ॥ ४३ ॥ शिखण्डिनं याज्ञसेनिं रुन्धान-
मपराजितम् । वाह्लीकः प्रतिसंयत्तः पराक्रान्तमवारयत् ॥४४॥
धृष्टद्युम्नं तु पाञ्चाल्यं क्रूरैः सार्द्धं प्रभद्रकैः । आवन्त्यः सह
सौवीरैः क्रुद्धरूपमवारयत् ॥ ४५ ॥ घटोत्कचं तथा शूरं राक्षसं
क्रूरकर्म्मिणम् । अलायुधोऽद्रवत्तूर्णं क्रुद्धमायान्तमाहवे ॥ ४६ ॥
अलम्बुषं राक्षसेन्द्रं कुन्तिभोजो महारथः । सैन्येन महता युक्तः

क्रूररूपमवारयत् ॥ ४७ ॥ एवं द्वन्द्वशतान्यासंस्तव तेषाञ्च भारत ।
सैन्धवः पृष्ठतस्त्वासीत् सर्वसैन्यस्य भारत । रक्षितः परमेष्वासैः
कृपप्रभृतिभीरथैः ॥ ४८ ॥ यस्यास्तां चक्ररक्षौ द्वौ सैन्धवस्य वृष-
स्तमौ । द्रौणिर्दक्षिणतो राजन् सूतपुत्रश्च वामतः ॥ ४९ ॥ पृष्ठ-
गोपास्तु तस्यासन् सौमदत्तिपुरोगमाः । कृपश्च वृषसेनश्च शलः
शल्यश्च दुर्जयः ॥५०॥ नीतिमन्तो महेष्वासाः सर्वे युद्धविशारदाः ।
सैन्धवस्य विधायैवं रक्षां युयुधिरे ततः ॥ ५१ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सङ्कुलयुद्धे
पञ्चनवतोऽध्यायः ॥ ९५ ॥

---

सञ्जय उवाच । राजन् सङ्ग्राममाश्चर्यं शृणु कीर्त्तयतो मम ।
कुरूणां पाण्डवानाञ्च यथा युद्धमवर्त्तत ॥ १ ॥ भारद्वाजं समा-
साद्य व्यूहस्य प्रमुखे स्थितम् । अयोधयन्रणे पार्था द्रोणानीकं
बिभित्सवः ॥ २ ॥ रक्षमाणः स्वकं व्यूहं द्रोणोऽपि सह सैनिकैः ।
अयोधयद्रणे पार्थान् पार्थयानो महद्यशः ॥ ३ ॥ विन्दानुविन्दा-
वावन्त्यौ विराटं दशभिः शरैः । आजघ्नतुः सुसंक्रुद्धौ तव पुत्र-
हितैषिणौ ॥ ४ ॥ विराटश्च महाराज तावुभौ समरे स्थितौ ।
पराक्रान्तौ समासाद्य योधयामास सानुगौ ॥ ५ ॥ तेषां युद्धं सम-
भवद्दारुणं शोणितोदकम् । सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां
यथा वने ॥६॥ वाह्लीकं रभसं युद्धे याज्ञसेनिर्महाबलः । आजघ्ने
विशिखैस्तीक्ष्णैर्घोरैर्मर्मास्थिभेदिभिः ॥७॥ वाह्लीको याज्ञसेनिन्तु
हेमपुङ्खैः शिलाशितैः । आजघान भृशं क्रुद्धो नवभिर्नतपर्वभिः
॥ ८ ॥ तद्युद्धमभवद्घोरं शरशक्तिसमाकुलम् । भीरूणां त्रास-
जननं शूराणां हर्षवर्द्धनम् ॥ ९ ॥ ताभ्यां तत्र शरैर्मुक्तैरन्तरीक्ष-
न्दिशस्तथा । अभवत् संवृतं सर्वं न प्राज्ञायत किञ्चन ॥ १० ॥

शैब्यो गोवासनो युद्धे काश्यपुत्रं महारथम्। स शैन्यो योधयामास गजः प्रतिगजं यथा॥ ११॥ वाह्लीकराजः संक्रुद्धो द्रौपदेयान्महारथान्। मनःपञ्चेन्द्रियाणीव शुशुभे योधयन् रणे॥ १२॥ अयोधयंस्ते सुभृशं तं शरौघैः समन्ततः। इन्द्रियार्था यथा देहं शश्वद्देहवतांवर॥ १३॥ वार्ष्णेयं सात्यकिं युद्धे पुत्रो दुःशासनस्तव। आजघ्ने सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः॥ १४॥ सोऽतिविद्धो बलवता महेष्वासेन धन्विना। ईषन्मूर्च्छां जगामाशु सात्यकिः सत्यविक्रमः॥ १५॥ समाश्वस्तस्तु वार्ष्णेयस्तव पुत्रं महारथम्। विव्याध दशभिस्तूर्णं सायकैः कङ्कपत्रिभिः॥ १६॥ तावन्योऽन्यं दृढं विद्धावन्योऽन्यशरपीड़ितौ। रेजतुः समरे राजन् पुष्पिताविव किंशुकौ॥ १७॥ अलम्बुषस्तु संक्रुद्धः कुन्तिभोजशरार्द्दितः। अशोभत भृशं लक्ष्म्या पुष्पाढ्य इव किंशुकः॥ १८॥ कुन्तिभोजं ततो रक्षो विद्ध्वा बहुभिराशुगैः। अनदद्भैरवं नादं वाहिन्याः प्रमुखे तव॥ १९॥ ततस्तौ समरे शूरौ योधयन्तौ परस्परम्। ददृशुः सर्वसैन्यानि शक्रजम्भौ यथा पुरा॥ २०॥ शकुनिं रभसं युद्धे कृतवैरञ्च भारत। माद्रीपुत्रौ सुसंरब्धौ शरैश्चार्द्दयताम्भृशम्॥ २१॥ तुमुलः स महाराज प्रावर्त्तत जनक्षयः। त्वया सञ्जनितोऽत्यर्थं कर्णेन च विवर्द्धितः॥२२॥ रक्षितस्तव पुत्रैश्च क्रोधमूलो हुताशनः। य इमां पृथिवीं राजन् दग्धुं सर्वां समुद्यतः॥ २३॥ शकुनिः पाण्डुपुत्राभ्यां कृतः स विमुखः शरैः। न स्म जानाति कर्त्तव्यं युद्धे किञ्चित् पराक्रमम्॥ २४॥ विमुखं चैनमालोक्य माद्रीपुत्रौ महारथौ। ववर्षतुः पुनर्वाणैर्यथामेघौ महागिरिम्॥ २५॥ स बध्यमानो बहुभिः शरैः सन्नतपर्वभिः। सम्प्रायाज्जवनैरश्वैर्द्रोणानीकाय सौवलः॥ २६॥ घटोत्कचस्तथा शूरो राक्षसं तमलायुधम्। अभ्ययाद्भृशसंयुद्धे वेगमास्थाय मध्यमम्॥ २७॥ तयोर्युद्धं महाराज

चित्ररूपमिवाभवत्। यादृशं हि पुरा वृत्तं रामरावणयोर्मृधे ॥२८॥ ततो युधिष्ठिरो राजा मद्रराजानमाहवे। विध्वा पञ्चशतैर्बाणैः पुनर्विव्याध सप्तभिः ॥ २९ ॥ ततः प्रववृते युद्धं तयोरत्यद्भुतं नृप। यथा पूर्वमभूद्युद्धं शम्बरामरराजयोः ॥ ३० ॥ विविंशतिश्चित्रसेनो विकर्णश्च तवात्मजः। अयोधयन् भीमसेनं महत्या सेनया वृताः ॥ ३१ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सङ्कुलयुद्धे षण्णवतोऽध्यायः ॥ ९६ ॥

---

सञ्जय उवाच। तथा तस्मिन् प्रवृत्ते तु सङ्ग्रामे लोमहर्षणे। कौरवेयांस्त्रिधाभूतान् पाण्डवाः समुपाद्रवन् ॥ १ ॥ जलसन्धं महाबाहुं भीमसेनोऽभ्यवर्त्तत। युधिष्ठिरः सहानीकः कृतवर्माणमाहवे ॥ २ ॥ किरंस्तु शरवर्षाणि रोचमान इवांशुमान्। धृष्टद्युम्नो महाराज द्रोणमभ्यद्रवद्रणे ॥ ३ ॥ ततः प्रववृते युद्धं त्वरतां सर्वधन्विनाम्। कुरूणां पाण्डवानाञ्च संक्रुद्धानां परस्परम् ॥ ४ ॥ सङ्क्षये तु तथाभूते वर्त्तमाने महाभये। द्वन्द्वीभूतेषु सैन्येषु युध्यमानेष्वभीतवत् ॥ ५ ॥ द्रोणः पाञ्चालपुत्रेण बली बलवता सह। यदक्षिपत् सायकौघांस्तदद्भुतमिवाभवत् ॥ ६ ॥ पुण्डरीकवनानीव विध्वस्तानि समन्ततः। चक्राते द्रोणपाञ्चाल्यौ नृणां शीर्षाण्यनेकशः ॥ ७ ॥ विनिकीर्णानि वीराणामनीकेषु समन्ततः। वस्त्राभरणशस्त्राणि ध्वजवर्मायुधानि च ॥ ८ ॥ तपनीयतनुत्राणाः संसिक्ता रुधिरेण च। संसक्ता इव दृश्यन्ते मेघसङ्घाः सविद्युतः ॥ ९ ॥ कुञ्जराश्वनरानन्ये पातयन्ति स्म पत्रिभिः। तालमात्राणि चापानि विकर्षन्तो महारथाः ॥१०॥ असिचर्माणि चापानि शिरांसि कवचानि च। विप्रकीर्य्यन्त शूराणां सम्प्रहारे महात्मनाम् ॥ ११ ॥ उत्थितान्यगणेयानि कबन्धानि

समन्ततः । अदृश्यन्त महाराज तस्मिन् परमसङ्कुले ॥ १२ ॥ गृध्राः कङ्का बकाः श्येना वायसा जाम्बुकास्तथाः । बहवः पिशिताशाश्च तत्रादृश्यन्त मारिष ॥ १३ ॥ भक्षयन्तश्च मांसानि पिबन्तश्चापि शोणितम् । विलुम्पन्तश्च केशांश्च मज्जाश्च बहुधा नृप ॥१४॥ आकर्षन्तः शरीराणि शरीरावयवांस्तथा । नराश्वगजसङ्घानां शिरांसि च ततस्ततः ॥ १५ ॥ कृतास्त्रा रणदीक्षाभिर्दीक्षिता रणशालिनः । रणे जयं प्रार्थयन्तो भृशं युयुधिरे तदा ॥ १६ ॥ असिमार्गान् बहुविधान् बिचेरुः सैनिका रणे । ऋष्टिभिः शक्तिभिः प्रासैः शूलतोमरपट्टिशैः ॥ १७ ॥ गदाभिः परिघैश्चान्यैरायुधैश्च भुजैरपि । अन्योऽन्यं जघ्निरे क्रुद्धा युद्धरङ्गगतानराः ॥ १८ ॥ रथिनो रथिभिः सार्द्धं अश्वारोहांश्च सादिभिः । मातङ्गा वरमातङ्गैः पदाताश्च पदातिभिः ॥ १९ ॥ क्षीबा इवान्ये चोन्मत्ता रङ्गेष्विव च वारणाः । उच्चुक्रुशुरथान्योऽन्यं जघ्नुरन्योऽन्यमाहवे ॥ २० ॥ वर्त्तमाने तथा युद्धे निर्मर्य्यादे विशाम्पते । धृष्टद्युम्नो हयानश्वैर्द्रोणस्य व्यत्यमिश्रयत् ॥ २१ ॥ ते हयाः साध्वशोभन्त मिश्रिता वातरंहसः । पारावतसवर्णाश्च रक्तशोणाश्च संयुगे ॥२२॥ हयाः शुशुभिरे राजन् मेघा इव सविद्युतः । धृष्टद्युम्नस्तु संप्रेक्ष्य द्रोणमभ्याससमागतम् ॥ २३ ॥ असिचर्मादद वीरो धनुरुत्सृज्य भारत । चिकीर्षुर्दुष्करं कर्म पार्षतः परवीरहा ॥२४॥ ईषया समतिक्रम्य द्रोणस्य रथमाविशत् । अतिष्ठद्युगमध्ये स युगसन्नहनेषु च ॥ २५ ॥ जघनार्द्धेषु चाश्वानां तत्सैन्यान्यभ्यपूजयन् । खड्गेन चरतस्तस्य शोणाश्वानधितिष्ठतः ॥ २६ ॥ न ददर्शान्तरं द्रोणस्तदद्भुतमिवाभवत् । यथा श्येनस्य पतनं वनेष्वामिषगृद्धिनः ॥ २७ ॥ तथैवासीदभीसारस्तस्य द्रोणं जिघांसतः । ततः शरशतेनास्य शतचन्द्रं समाक्षिपत् ॥ २८ ॥ द्रोणो द्रुपदपुत्रस्य खड्गञ्च दशभिः शरैः । हयांश्चैव चतुःषष्ट्या शराणां

जघ्निवान् बली ॥ २९ ॥ ध्वजं चवञ्च भल्लाभ्यां तथोभौ पार्ष्णि-सारथी । अथास्मै त्वरितो बाणमपरं जीवितान्तकम् ॥ ३० ॥ आकर्णपूर्णं चिक्षेप वज्रं वज्रधरो यथा । तं चतुर्द्दशभिस्तीक्ष्णै-र्बाणैश्चिच्छेद सात्यकिः ॥ ३१ ॥ ग्रस्तमाचार्य्यमुख्येन धृष्टद्युम्न-ममोचयत् । सिंहेनेव मृगं ग्रस्तं नरसिंहेन मारिष ॥ ३२ ॥ द्रोणेन मोचयामास पाञ्चाल्यं शिनिपुङ्गवः । सात्यकिं प्रेक्ष्य गोप्तारं पाञ्चाल्यञ्च महाहवे ॥ ३३ ॥ शराणां त्वरितो द्रोणः षड्विंशत्या समार्पयत् । ततो द्रोणं शिनेः पौत्रो ग्रसन्तमिव सृञ्जयान् ॥ ३४ ॥ प्रत्यविध्यच्छितैर्बाणैः षड्विंशत्या स्तनान्तरे । ततः सर्वे रथास्तूर्णं पाञ्चाल्या जयगृद्धिनः । सात्वताभिसृते द्रोणे धृष्टद्युम्नमवाक्षिपन् ॥ ३५ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सङ्कुलयुद्धे सप्तनवतोऽध्यायः ॥ ९७ ॥

---

धृतराष्ट्र उवाच । बाणे तस्मिन्निकृत्ते तु धृष्टद्युम्ने च मोक्षिते । तेन वृष्णिप्रवीरेण युयुधानेन सञ्जय ॥ १ ॥ अमर्षितो महेष्वासः सर्वशस्त्रभृताम्वरः नरव्याघ्रे शिने. पौत्रे द्रोणः किमकरोद्-युधि ॥ २ ॥

सञ्जय उवाच । स प्रद्रुतः क्रोधविषो व्यादितास्यशरासनः । तीक्ष्णधारेषुदशनः शितनाराचदंष्ट्रवान् ॥ ३ ॥ संरम्भामर्ष-ताम्राक्षो महोरग इव श्वसन् । नरवीरः प्रमुदितःशोणैरश्वै-र्महाजवैः ॥ ४ ॥ उत्पतद्भिरिवाकाशं क्रामद्भिरिव पर्वतम् । रुक्मपुङ्खान् शरानस्यन् युयुधानमुपाद्रवत् ॥ ५ ॥ शरपातमहा-वर्षं रथघोषवलाहकम् । कार्मुकाकर्षविक्षेपं नाराचबहुविद्युतम् ॥ ६ ॥ शक्तिखड्गाशनिधरं क्रोधवेगसमुत्थितम् । द्रोणमेघ-

मनावाय्यं हयमारुतचोदितम् ॥ ७ ॥ दृष्ट्वैवाभिपतन्तं तं शूरः परपुरञ्जयः । उवाच सूतं शैनेयः प्रहसन् युद्धदुर्मदः ॥ ८ ॥ एनं वै ब्राह्मणं शूरं स्वकर्मण्यनवस्थितम् । आश्रयं धार्त्तराष्ट्रस्य राज्ञो दुःखभयापहम् ॥ ९ ॥ शीघ्रं प्रजवितैरश्वैः प्रत्युद्याहि प्रहृष्टवत् । आचार्य्यं राजपुत्राणां सततं शूरमानिनम् ॥ १० ॥ ततो रजतसङ्काशा माधवस्य हयोत्तमाः । द्रोणस्याभिमुखाः शीघ्रमगच्छन् वातरंहसः ॥ ११ ॥ ततस्तौ द्रोणशैनेयौ युयुधाते परन्तपौ । शरैरनेकसाहस्रैस्ताडयन्तौ परस्परम् ॥ १२ ॥ इषुजालावृतं व्योम चक्रतुः पुरुषर्षभौ । पूरयामासतुर्वीरावुभौ दशदिशः शरैः ॥ १३ ॥ मेघाविवातपापाये धाराभिरितरेतरम् । न स्म सूर्य्यस्तदा भाति न ववौ च समीरणः ॥ १४ ॥ इषुजालावृतं घोरमन्धकारमनन्तरम् । अनाधृष्यमिवान्येषां शूराणामभवत्तदा ॥ १५ ॥ अन्धकारीकृते लोके द्रोणशैनेययोः शरैः । तयोः शीघ्रास्त्रविदुषो द्रोणसात्वतयोस्तदा ॥ १६ ॥ नान्तरं शरवृष्टीनां ददृशे नरसिंहयो । इषूणां सन्निपातेन शब्दो धाराभिघातजः ॥ १७ ॥ शुश्रुवे शक्रमुक्तानामशनीनामिव स्वनः । नाराचैर्व्यतिविद्धानां शूराणां रूपमाबभौ ॥ १८ ॥ आशीविषविदष्टानां सर्पाणामिव भारत । तयोर्ज्यातलनिर्घोषः शुश्रुवे युद्धशौण्डयोः ॥ १९ ॥ अजस्रं शैलशृङ्गाणां वज्रेणाहन्यतामिव । उभयोस्तौ रथौ राजन् ते चाश्वास्तौ च सारथी ॥ २० ॥ रुक्मपुङ्खैः शरैश्छिन्नाश्चित्ररूपा बभुस्तदा । निर्म्मलानामजिह्मानां नाराचानां विशाम्पते ॥ २१ ॥ निर्मुक्ताशीविषाभानां सम्पातोऽभूत् सुदारुणः । उभयोः पतिते छत्रे तथैव पतितौ ध्वजौ ॥ २२ ॥ उभौ रुधिरसिक्ताङ्गावुभौ च विजयैषिणौ । स्रवद्भिः शोणितं गात्रैः प्रस्रुताविव वारणौ ॥ २३ ॥ अन्योऽन्यमभ्यविध्येतां जीवितान्तकरैः शरैः । गर्ज्जितोत्क्रुष्टसन्नादाः शङ्खदुन्दुभिनिस्वना ॥ २४ ॥

अपारमन्महाराज व्याजहार न कश्चन । तूष्णीम्भूतान्यनीकानि
योधा युद्धादुपारमन् ॥ २५ ॥ ददृशं द्वैरथं ताभ्यां जातकौतूहलो
जनः । रथिनो हस्तियन्तारो हयारोहाः पदातिनः ॥ २६ ॥
अवैक्षन्ताचलैर्नेत्रैः परिवार्य्य नरर्षभौ । हस्त्यनीकान्यतिष्ठन्त
तथानीकानि वाजिनाम् ॥ २७ ॥ तथैव रथवाहिन्यः प्रतिव्यूह्य
व्यवस्थिताः । मुक्ताविद्रुमचित्रैश्च मणिकाञ्चनभूषितैः ॥ २८ ॥
ध्वजैराभरणैश्चित्रैः कवचैश्च हिरण्मयैः । वैजयन्तीपताकाभिः
परिस्तोमाङ्गकम्बलैः ॥ २९ ॥ विमलैर्निशितैः शस्त्रैर्हयानाञ्च
प्रकीर्णकैः । जातरूपमयीभिश्च राजतीभिश्च मूर्द्धसु ॥ ३० ॥
गजानां कुम्भमालाभिर्दन्तवेष्टैश्च भारत । सबलाका सखद्योता
ऐरावतशतह्रदाः ॥ ३१ ॥ अदृश्यन्तोष्णपर्य्याये मेघानामिव
वागुराः । अपश्यन्नस्मदीयाश्च ते च यौधिष्ठिरादयः ॥ ३२ ॥
तद्युद्धं युयुधानस्य द्रोणस्य च महात्मनः । विमानाग्रगता देवा
ब्रह्मसोमपुरोगमाः ॥ ३३ ॥ सिद्धचारणसङ्घाश्च विद्याधरमहो-
रगाः । गतप्रत्यागताक्षेपैश्चित्रैः शस्त्रविघातिभिः ॥ ३४ ॥ विविधै-
र्विस्मयं जग्मुस्तयोः पुरुषसिंहयोः । हस्तलाघवमस्त्रेषु दर्शयन्तौ
महाबलौ ॥ ३५ ॥ अन्योऽन्यमभ्यविध्येतां शरैस्तौ द्रोणसात्यकी ।
ततो द्रोणस्य दाशार्हः शरांश्चिच्छेद संयुगे ॥ ३६ ॥ पत्रिभिः
सुदृढैराशु धनुश्चैव महाद्युते । निमेषान्तरमात्रेण भारद्वाजो-
ऽपरन्धनुः ॥ ३७ ॥ सज्यं चकार तदपि चिच्छेदास्य स सात्यकिः ।
ततस्त्वरन् पुनर्द्रोणो धनुर्हस्तोव्यतिष्ठत ॥ ३८ ॥ सज्यं सज्यं
धनुश्चास्य चिच्छेद नव सप्त च । ततोऽस्य संयुगे द्रोणो दृष्ट्वा
कर्मातिमानुषम् ॥ ३९ ॥ युयुधानस्य राजेन्द्र मनसैतदचिन्तयत् ।
एतदस्त्रबलं रामे कार्त्तवीर्य्ये धनञ्जये ॥ ४० ॥ भीष्मे च पुरुष-
व्याघ्रे यदिदं सात्वतां वरे । तञ्चास्य मनसा द्रोणः पूजयामास
विक्रमम् ॥ ४१ लाघवं वासवस्येव सम्प्रेक्ष्य द्विजसत्तमः ।

तुतोषास्त्रविदां श्रेष्ठस्तथा देवाः सवासवाः ॥ ४२ ॥ न तामा-लोकयामासुर्लंघुतां शीघ्रचारिणः । देवाश्च युयुधानस्य गन्धर्वाश्च विशाम्पते ॥ ४३ ॥ सिद्धचारणसङ्घाश्च विदुर्द्रोणस्य कर्म तत् । ततोऽन्यद्धनुरादाय द्रोणः क्षत्रियमर्द्दनः ॥ ४४ ॥ अस्त्रैरस्त्रविदां श्रेष्ठो योजयामास भारत । तस्यास्त्राण्यस्त्रमायाभिः प्रतिहत्य स सात्यकिः ॥ ४५ ॥ जघान निशितैर्बाणैस्तदद्भुतमिवाभवत् । तस्यातिमानुषं कर्म दृष्ट्वान्यैरसमं रणे ॥ ४६ ॥ युक्तं योगेन योगज्ञास्तावकाः समपूजयन् । यदस्त्रमस्यति द्रोणस्तदेवास्यति सात्यकिः ॥ ४७ ॥ तमाचार्य्योऽथ सम्भ्रान्तोऽयोधयच्छत्रुतापनः । ततः क्रुद्धो महाराज धनुर्वेदस्य पारगः ॥ ४८ ॥ वधाय युयु-धानस्य दिव्यमस्त्रमुदैरयत् । तदाग्नेयं महाघोरं रिपुघ्नमुपलक्ष्य सः ॥ ४९ ॥ दिव्यमस्त्रं महेष्वासो वारुणं समुदैरयत् । हाहा-कारो महानासीद्दृष्ट्वा दिव्यास्त्रधारिणौ ॥ ५० ॥ न विचेरु-स्तयाकाशे भूतान्याकाशगान्यपि । अस्त्रे ते वारुणाग्नेये ताभ्यां बाणसमाहिते ॥ ५१ ॥ तत्तावदभिपद्येतां व्यावर्त्तदथ भास्करः । ततो युधिष्ठिरो राजा भीमसेनश्च पाण्डवः ॥ ५२ ॥ नकुलः सह-देवश्च पर्य्यरक्षन्त सात्यकिम् । धृष्टद्युम्नमुखैः सार्द्धं विराटश्च सकेकयः ॥ ५३ ॥ मत्स्याः शाल्वेयसेनाश्च द्रोणमाजग्मुरञ्जसा । दुःशासनं पुरस्कृत्य राजपुत्राः सहस्रशः ॥ ५४ ॥ द्रोणमभ्युप-पद्यन्त सपत्नैः परिवारितम् । ततो युद्धमभूद्राजन् तेषां तव च धन्विताम् ॥ ५५ ॥ रजसा सम्वृते लोके शरजालसमावृते । सर्व्व-माविग्नमभवन्न प्राज्ञायत किञ्चन । सैन्ये च रजसा ध्वस्ते निर्मर्य्यादमवर्त्तत ॥ ५६ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि द्रोणसात्यकियुद्धे अष्टनवतोऽध्यायः ॥ ९८ ॥

---

सञ्जय उवाच। विवर्त्तमाने त्वादित्ये तत्रास्तशिखरं प्रति। रजसा कीर्य्यमाणे च मन्दीभूते दिवाकरे॥१॥ तिष्ठतां युध्यमानानां पुनरावर्त्ततामपि। भज्यतां जयताञ्चैव जगाम तदहः शनैः॥२॥ तथा तेषु विषक्तेषु सैन्येषु जयगृद्धिषु। अर्जुनो वासुदेवश्च सैन्धवायैव जग्मतुः॥३॥ रथमार्गप्रमाणन्तु कौन्तेयो निशितैः शरैः। चकार तत्र पन्थानं ययौ येन जनार्द्दनः॥४॥ यत्र यत्र रथो याति पाण्डवस्य महात्मनः। तत्र तत्रैव दीर्य्यन्ते सेनास्तव विशाम्पते॥५॥ रथशिक्षान्तु दाशार्हो दर्शयामास वीर्य्यवान्। उत्तमाधममध्यानि मण्डलानि विदर्शयन्॥६॥ ते तु नामाङ्किताः पीताः कालज्वलनसन्निभाः। स्नायनद्धाः सुपर्वाणः पृथवो दीर्घगामिनः॥७॥ वैणवाश्चायसाश्चोग्रा ग्रसन्तो विविधानरीन्। रुधिरं पतगैः सार्द्धं प्राणिनां पपुराहवे॥८॥ रथस्थितोऽग्रतः क्रोशं यानस्यत्यर्ज्जुनः शरान्। रथे क्रोशमतिक्रान्ते तस्य ते घ्नन्ति शात्रवान्॥९॥ तार्क्ष्यमारुतरंहोभिर्वाजिभिर्धुर्य्यवाहिभिः। तदागच्छद्धृषीकेशः कृत्स्नं विस्मापयन् जगत्॥१०॥ न तथा गच्छति रथस्तपनस्य विशाम्पते। वेन्द्रस्य च न रुद्रस्य नापि वैश्रवणस्य च॥११॥ नान्यस्य समरे राजन् गतपूर्वस्तथा रथः। यथा ययावर्ज्जुनस्य मनोऽभिप्रायशीघ्रगः॥१२॥ प्रविश्य तु रणे राजन् केशवः परवीरहा। सेनामध्ये हयांस्तूर्णं चोदयामास भारत॥१३॥ ततस्तस्य रथौघस्य मध्यं प्राप्य हयोत्तमाः। कृच्छ्रेण रथमूहुस्तं क्षुत्पिपासाश्रमन्विताः॥१४॥ क्षताश्च बहुभिः शस्त्रैर्युद्धशौण्डैरनेकशः। मण्डलानि विचित्राणि विचेरुस्ते मुहुर्मुहुः॥१५॥ हतानां वाजिनागानां रथानाञ्च नरैः सह। उपरिष्टादतिक्रान्ताः शैलभानां सहस्रशः॥१६॥ एतस्मिन्नन्तरे वीरावावन्त्यौ भ्रातरौ नृप। सहसेनौ समर्च्छेतां पाण्डवं क्लान्तवाहनम्॥१७॥ तावर्ज्जुनं

चतुःषष्ट्या सप्तत्या च जनार्द्दनम् । शराश्चाश्वशतैरश्वानविध्येतां मुदान्वितौ ॥ १८ ॥ तावर्ज्जुनो महाराज नवभिर्नतपर्वभिः । आजघान रणे क्रुद्धो मर्मज्ञो मर्मभेदिभिः ॥ १९ ॥ ततस्तौ तु शरौघेण वीभत्सुं सहकेशवम् । आच्छादयेतां संरब्धौ सिंहनादञ्च चक्रतुः ॥ २० ॥ तयोस्तु धनुषी चित्रे भल्लाभ्यां श्वेतवाहनः । चिच्छेद समरे तूर्णं ध्वजौ च कनकोज्ज्वलौ ॥ २१ ॥ अथान्यद्धनुषी राजन् प्रगृह्य समरे तदा । पाण्डवं भृशसंक्रुद्धावर्द्दयामासतुः शरैः ॥ २२ ॥ तयोस्तु भृशसंक्रुद्धः शराभ्यां पाण्डुनन्दनः । धनुषी चिच्छिदे तूर्णं भूय एव धनञ्जयः ॥ २३ ॥ तथान्यैर्विशिखैस्तूर्णं रुक्मपुङ्खैः शिलाशितैः । जघानाश्वांस्तथा सूतौ पार्ष्णी च सपदानुगौ ॥ २४ ॥ ज्येष्ठस्य च शिरः कायात् क्षुरप्रेण न्यकृन्तत । स पपात हतः पृथ्व्यां वातभग्न इव द्रुमः ॥ २५ ॥ विन्दन्तु निहतं दृष्ट्वा ह्यनुविन्दः प्रतापवान् । हताश्वं रथमुत्सृज्य गदां गृह्य महाबलः ॥ २६ ॥ अभ्यवर्त्तत सङ्ग्रामे भ्रातुर्वधमनुस्मरन् । गदया रथिनां श्रेष्ठो नृत्यन्निव महारथः ॥ १७ ॥ अनुविन्दस्तु गदया ललाटे मधुसूदनम् । स्पृष्ट्वा नाकम्पयत् क्रुद्धो मैनाकमिव पर्वतम् ॥ २८ ॥ तस्यार्जुनः शरैः षड्भिर्ग्रीवां पादौ भुजौ शिरः । विचकर्त्त स संच्छिन्नः पपाताद्रिचयो यथा ॥ २९ ॥ ततस्तौ निहतौ दृष्ट्वा तयोराजन् पदानुगाः । अभ्यद्रवन्त संक्रुद्धाः किरन्तः शतशः शरान् ॥ ३० ॥ तानर्जुनः शरैस्तूर्णं निहत्य भरतर्षभ । व्यरोचत यथा वह्निर्दावन्दग्ध्वा हिमात्यये ॥ ३१ ॥ तयोः सेनामतिक्रम्य कृच्छ्रादिव धनञ्जयः । विबभौ जलदं हित्वा दिवाकर इवोदितः ॥ ३२ ॥ तं दृष्ट्वा कुरवस्त्रस्ताः प्रहृष्टाश्चाभवन् पुनः । अभ्यवर्त्तन्त पार्थञ्च समन्ताद्भरतर्षभ ॥ ३३ ॥ श्रान्तञ्चैनं समालक्ष्य ज्ञात्वा दूरे च सैन्धवम् । सिंहनादेन महता सर्वतः पर्य्यवारयन् ॥ ३४ ॥ तांस्तु दृष्ट्वा सुसंरब्धानुत्स्मयन् पुरुषर्षभः ।

शनकैरिव दाशार्हमर्जुनो वाक्यमब्रवीत् ॥ ३५ ॥ शराहिताश्च ग्लानाश्च हया दूरे च सैन्धवः। किमिहानन्तरं कार्य्यं ज्यायिष्ठं तव रोचते ॥ ३६ ॥ ब्रूहि कृष्ण यथा तत्त्वं त्वं हि प्राज्ञतमः सदा। भवन्नेत्रा रणे शत्रून् विजेष्यन्तीह पाण्डवाः ॥ ३७ ॥ मम त्वनन्तरं कृत्यं यद्वै तत्त्वं निबोध मे। हयान् विमुच्य हि सुखं विशल्यान् कुरु माधव ॥ ३८ ॥ एवमुक्तस्तु पार्थेन केशवः प्रत्युवाच तम्। ममाप्येतन्मतं पार्थ यदिदं ते प्रभाषितम् ॥ ३९ ॥

अर्जुन उवाच। अहमावारयिष्यामि सर्वसैन्यानि केशव। त्वमप्यत्र यथान्यायं कुरु कार्य्यमनन्तरम् ॥ ४० ॥

सञ्जय उवाच। सोऽवतीर्य्य रथोपस्थादसम्भ्रान्तो धनञ्जयः। गाण्डीवं धनुरादाय तस्थौ गिरिरिवाचलः ॥ ४१ ॥ तमभ्यधावन् क्रोशन्तः क्षत्रिया जयकाङ्क्षिणः। इदं छिद्रमिति ज्ञात्वा धरणीस्थं धनञ्जयम् ॥ ४२ ॥ तमेकं रथवंशेन महता पर्य्यवारयन्। विकर्षन्तश्च चापानि विसृजन्तश्च सायकान् ॥ ४३ ॥ शस्त्राणि च विचित्राणि क्रुद्धास्तत्र व्यदर्शयन्। छादयन्तः शरैः पार्थं मेघा इव दिवाकरम् ॥ ४४ ॥ अभ्यद्रवन्त वेगेन क्षत्रियाः क्षत्रियर्षभम्। नरसिंहं रथोदाराः सिंहं मत्ता इव द्विपाः ॥ ४५ ॥ तत्र पार्थस्य भुजयोर्महद्बलमदृश्यत। यः क्रुद्धो बहुलाः सेनाः सर्वतः समवारयत् ॥ ४६ ॥ अस्त्रैरस्त्राणि संवार्य्य द्विषतां सर्वतो विभुः। इषुभिर्बहुभिस्तूर्णं सर्वानेव समावृणोत् ॥ ४७ ॥ तत्रान्तरीक्षे बाणानां प्रगाढ़ानां विशाम्पते। सङ्घर्षेण महार्च्चिष्मान् पावकः समजायत ॥ ४८ ॥ तत्र तत्र महेष्वासैः श्वसद्भिः शोणितोक्षितैः। हयैर्नागैश्च सम्भिन्नैर्नदद्भिश्चारिकर्षणैः ॥ ४९ ॥ संरब्धैश्चारिभिर्वीरैः प्रार्थयद्भिर्जयं मृधे। एकस्थैर्बहुभिः क्रुद्धैरूष्मेव समजायत ॥ ५० ॥ शरोर्म्मिणं ध्वजावर्त्तं नागनक्रं दुरत्ययम्। पदातिमत्स्यकलिलं शङ्खदुन्दुभिनिस्वनम् ॥ ५१ ॥

शरछन्नमपारञ्च रथोर्म्मिणमतीव च । उष्णीषकमठं छत्रपताका-फेनमालिनम् ॥ ५२ ॥ रथसागरमक्षोभ्यं मातङ्गाङ्गशिलान्वितम् । वेलाभूतस्तदा पार्थः पत्रिभिः समवारयत् ॥ ५३ ॥ ततो जनार्द्दनः सङ्ख्ये प्रियं पुरुषमुत्तमम् । असम्भ्रान्तो महाबाहुरर्ज्जुनं वाक्यमब्रवीत् ॥ ५४ ॥ उदपानमिहाश्वानां नालमस्ति रणेऽर्ज्जुन । परीप्सन्ते जलं चेमे पेयं न त्ववगाहनम् ॥ ५५ ॥ इदमस्तीत्यसम्भ्रान्तो ब्रुवन्नस्त्रेण मेदिनीम् । अभिहत्यार्ज्जुनश्चक्रे वाजिपानसरः शुभम् ॥ ५६ ॥ हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम् । सुविस्तीर्णं प्रसन्नाम्भः प्रफुल्लवरपङ्कजम् ॥ ५७ ॥ कूर्म्ममत्स्यगणाकीर्णमगाधमृषिसेवितम् । आगच्छन्नारदमुनिर्द्दर्शनार्थं कृतं क्षणात् ॥ ५८ ॥ शरवंशं शरस्थूणं शराच्छादनमद्भुतम् । शरवेश्माकरोत् पार्थस्त्वष्टेवाद्भुतकर्म्मकृत् ॥ ५९ ॥ ततः प्रहस्य गोविन्दः साधुसाध्विति चाब्रवीत् । शरवेश्मनि पार्थेन कृते तस्मिन् महात्मना ॥ ६० ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि दुःशासनकर्णपराजये एकोनशततोऽध्यायः ॥ ९९ ॥

---

सञ्जय उवाच । सलिले जनिते तस्मिन् कौन्तेयेन महात्मना । निवारिते द्विषत्सैन्ये कृते च शरवेश्मनि ॥ १ ॥ वासुदेवो रथात्तूर्णमवतीर्य्य महाद्युतिः । मोचयामास तुरगान् विनुन्नान् कङ्कपत्रिभिः ॥ २ ॥ अदृष्टपूर्व्वं तं दृष्ट्वा साधुवादो महानभूत् । सिद्धचारणसङ्घानां सैनिकानाञ्च सर्व्वशः ॥ ३ ॥ पदातीनां तु कौन्तेयं युद्ध्यमानं महारथाः । नाशक्नुवन् वारयितुं तदद्भुतमिवाभवत् ॥ ४ ॥ आपतत्सु रथौघेषु प्रभूतगजवाजिषु । न सम्भ्रमन्तदा पार्थस्तदस्य पुरुषानति ॥ ५ ॥ व्यसृजन्त शरौ-

षांस्ते पाण्डवं प्रति पार्थिवाः । न चाव्यथत धर्मात्मा वासविः
परवीरहा ॥ ६ ॥ शतानि शरजालानि गदाः प्रासांश्च वीर्य्य-
वान् । आगतान्यग्रसत् पार्थः सरितः सागरो यथा ॥ ७ ॥
अस्त्रवेगेन महता पार्थो बाहुबलेन च । सर्वेषां पार्थिवेन्द्राणा-
मग्रसत्ताञ्छरोत्तमान् ॥ ८ ॥ स पार्थः पार्थिवान् सर्वान् भूमि-
ष्ठोऽपि रथस्थितान् । एको निवारयामास लोभः सर्वगुणानिव
॥ ९ ॥ तत्र पार्थस्य विक्रान्तं वासुदेवस्य चोभयोः । अपूजयन्
महाराज कौरवा महदद्भुतम् ॥ १० ॥ किमद्भुततमं लोके
भविताप्यथवा ह्यभूत् । यदश्वान् पार्थगोविन्दौ मोचयामासतू-
रणे ॥ ११ ॥ भयं विपुलमस्मासु तावधत्तां नरोत्तमौ । तेजो
विदधतुश्चोग्रं विस्रब्धौ रणमूर्द्धनि ॥ १२ ॥ अथ स्मयन् हृषी-
केशः स्त्रीमध्य इव भारत । अर्जुनेन कृते सङ्ख्ये शरगर्भगृहे
तदा ॥ १३ ॥ उदावर्त्तयदव्यग्रस्तानश्वान् पुष्करेक्षणः । मिषतां
सर्वसैन्यानां त्वदीयानां विशाम्पते ॥ १४ ॥ तेषां श्रमञ्च ग्लानिञ्च
वेपथुञ्च पृथुव्रणात् । सर्वं व्यपानुदत् कृष्णः कुशलो ह्यश्वकर्मणि
॥ १५ ॥ शल्यानुद्धृत्य पाणिभ्यां परिमृज्य च तान् हयान् ।
उपावर्त्त्य यथान्यायं पाययामास वारि सः ॥ १६ ॥ स ता-
ल्लब्धोदकान् स्नातान् जग्धान्नान् विगतक्लमान् । योजयामास
संहृष्टः पुनरेव रथोत्तमे ॥ १७ ॥ स तं रथवरं शौरिः सर्व-
शस्त्रभृताम्वरः । समास्थाय महातेजाः सार्जुनः प्रययौ द्रुतम्
॥ १८ ॥ रथं रथवरस्याजौ युक्तं लब्धोदकैर्हयैः । दृष्ट्वा कुरु-
बलश्रेष्ठाः पुनर्विमनसोऽभवन् ॥ १९ ॥ विनिश्वसन्तस्ते राजन्
भग्नदंष्ट्रा इवोरगाः । धिगहो धिग्गतः पार्थः कृष्णश्चेत्यब्रुवन्
पृथक् ॥ २० ॥ सर्वक्षत्रस्य मिषतो रथेनैकेन दंशितौ । बाल-
क्रीड़नकेनेव कदर्थीकृत्य नो बलम् ॥ २१ ॥ क्रोशतां यत्नमानाना-
मसंसक्तौ परन्तपौ । दर्शयित्वात्मनो वीर्य्यं प्रयातौ सर्व-

राजसु ॥ २२ ॥ तौ प्रयातौ पुनर्दृष्ट्वा तदान्ये सैनिकाब्रुवन् ।
त्वरध्वं कुरवः सर्व्वे वधे कृष्णकिरीटिनोः ॥ २३ ॥ रथं युक्त्वा हि
दाशार्हो मिषतां सर्व्वधन्विनाम् । जयद्रथे प्रयात्येव कदर्थीकृत्य
नो रणे ॥ २४ ॥ तत्र केचिन्मिथो राजन् समभाषन्त भूमिपाः ।
अदृष्टपूर्व्वं सङ्ग्रामे तद्दृष्ट्वा महदद्भुतम् ॥ २५ ॥ सर्व्वसैन्यानि राजा
च धृतराष्ट्रोऽत्ययं गतः । दुर्य्योधनापराधेन क्षत्रं कृत्स्ना च
मेदिनी ॥ २६ ॥ विलयं समनुप्राप्ता तच्च राजा न बुध्यते ।
इत्येवं क्षत्रियास्तत्र ब्रुवन्त्यन्ये च भारत ॥ २७ ॥ सिन्धुराजस्य
यत् कृत्यं गतस्य यमसादनम् । तत् करोतु वृथादृष्टिर्धार्त्तराष्ट्रो-
ऽनुपायवित् ॥ २८ ॥ ततः शीघ्रतरं प्रायात् पाण्डवः सैन्धवं
प्रति । विवर्त्तमाने तिग्मांशौ हृष्टैः पीतोदकैर्हयैः ॥ २९ ॥ तं
प्रयान्तं महाबाहुं सर्व्वशस्त्रभृताम्वरम् । नाशक्नुवन् वारयितुं
योधाः क्रुद्धमिवान्तकम् ॥ ३० ॥ विद्राव्य तु ततः सैन्यं पाण्डवः
शत्रुतापनः । यथा मृगगणान् सिंहः सैन्धवार्थे व्यलोड़यत् ॥३१॥
गाहमानस्त्वनीकानि तूर्णमश्वानचोदयत् । बलाकाभन्तु दाशार्हः
पाञ्चजन्यं व्यनादयत् ॥ ३२ ॥ कौन्तेयेनाग्रतः सृष्टा न्यपतन्
पृष्ठतः शराः । तूर्णात्तूर्णतरं ह्यश्वा प्रावहन् वातरंहसः ॥ ३३ ॥
ततो नृपतयः क्रुद्धाः परिवव्रुर्धनञ्जयम् । क्षत्रिया बहवश्चान्ये
जयद्रथवधैषिणम् ॥ ३४ ॥ सैन्येषु विप्रयातेषु धिष्ठितं पुरुष-
र्षभम् । दुर्य्योधनोऽन्वयात् पार्थं त्वरमाणो महाहवे ॥ ३५ ॥
वातोद्धूतपताकन्तं रथं जलदनिस्वनम् । घोरं कपिध्वजं दृष्ट्वा
विषण्णा बहवोऽभवन् ॥ ३६ ॥ दिवाकरेऽथ रजसा सर्व्वतः संवृते
भृशम् । शरार्त्तांश्च रणे योधाः शेकुः कृष्णौ न वीक्षितुम् ॥ ३७ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि सैन्यविस्मये
शततमोऽध्यायः ॥ १०० ॥

---

सञ्जय उवाच । श्रंसन्त इव राजानस्तावकानां भयान्नृप । तौ दृष्ट्वा समतिक्रान्तौ वासुदेवधनञ्जयौ ॥ १ ॥ सर्वे तु प्रतिसंरब्धा ह्रीमन्तः सत्त्वचोदिताः । स्थिरीभूता महात्मानः प्रत्यगच्छन्धनञ्जयम् ॥ २ ॥ ये गताः पाण्डवं युद्धे रोषामर्षसमन्विताः । तेऽद्यापि न निवर्त्तन्ते सिन्धवः सागरादिव ॥ ३ ॥ असन्तस्तु न्यवर्त्तन्ते वेदेभ्य इव नास्तिकाः । नरकं भजमानास्ते प्रत्यपद्यन्त किल्बिषम् ॥ ४ ॥ तावतीत्य रथानीकं विमुक्तौ पुरुषर्षभौ । ददृशाते यथा राहोरास्यान्मुक्तौ प्रभाकरौ ॥ ५ ॥ मत्स्याविव महाजालं विदार्य्य विगतक्लमौ । तथा कृष्णावदृश्येतां सेनाजालं विदार्य्य तत् ॥ ६ ॥ विमुक्तौ शस्त्रसम्बाधाद्द्रोणानीकात् सुदुर्भिदात् । अदृश्येतां महात्मानौ कालसूर्य्याविवोदितौ ॥ ७ ॥ अस्त्रसम्बाधनिर्मुक्तौ विमुक्तौ शस्त्रसङ्कटात् । अदृश्येतां महात्मानौ शत्रुसम्बाधकारिणौ ॥ ८ ॥ विमुक्तौ ज्वलनस्पर्शान्मकरास्याज्झषाविव । व्यक्षोभयेतां सेनां तौ समुद्रं मकराविव ॥ ९ ॥ तावकास्तव पुत्राश्च द्रोणानीकस्थयोस्तयोः । नैतौ तरिष्यतो द्रोणमिति चक्रुस्तदा मतिम् ॥ १० ॥ तौ तु दृष्ट्वा व्यतिक्रान्तौ द्रोणानीकं महाद्युती । नाशशंसुर्महाराज सिन्धुराजस्य जीवितम् ॥ ११ ॥ आशा बलवती राजन् सिन्धुराजस्य जीविते । द्रोणहार्द्दिक्ययोः कृष्णौ न मोक्ष्येते इति प्रभो ॥ १२ ॥ तामाशां विफलीकृत्य सन्तीर्णौ तौ परन्तपौ । द्रोणानीकं महाराज भोजानीकञ्च दुस्तरम् ॥ १३ ॥ अथ दृष्ट्वा व्यतिक्रान्तौ ज्वलिताविव पावकौ । निराशाः सिन्धुराजस्य जीवितं नाशशंसिरे ॥ १४ ॥ मिथश्च समभाषेतामभीतौ भयवर्द्धनौ । जयद्रथवधे वाचस्तास्ताः कृष्णधनञ्जयौ ॥ १५ ॥ असौ मध्ये कृतः षड्भिर्धार्त्तराष्ट्रैर्महारथैः । चक्षुर्विषयसम्प्राप्तो न मे मोक्ष्यति सैन्धवः ॥ १६ ॥ यद्यस्य समरे गोप्ता शक्रो देवगणैः सह ।

तथाप्येनं निहंस्याव इति कृष्णावभाषताम् ॥ १७ ॥ इति कृष्णौ महाबाहू मिथः कथयतां तदा । सिन्धुराजमवेक्षन्तौ तत्पुत्रा बहु चुक्रुशुः ॥ १८ ॥ अतीत्य मरुधन्वानन्तृषितौ त्वरितौ गजौ । पीत्वा वारि समाश्वस्तौ तथैवास्तामरिन्दमौ ॥ १९ ॥ व्याघ्रसिंहगजाकीर्णानतिक्रम्य च पर्वतान् । वणिजाविव दृश्येतां हीनमृत्युजरातिगौ ॥ २० ॥ तथाहि मुखवर्णोऽयमनयोरिति मेनिरे । तावका वीक्ष्य मुक्तौ तौ विक्रोशन्ति स्म सर्वतः ॥ २१ ॥ द्रोणादाशीविषाकाराज्ज्वलितादिव पावकात् । अन्येभ्यः पार्थिवेभ्यश्च भास्वन्ताविव भास्करौ ॥ २२ ॥ विमुक्तौ सागरप्रख्याद्द्रोणानीकादरिन्दमौ । अदृश्येतां मुदा युक्तौ समुत्तीर्य्यार्णवं यथा ॥ २३ ॥ अस्त्रौघान्महतो मुक्तौ द्रोणहार्द्दिक्यरक्षितात् । रोचमानावदृश्येतामिन्द्राग्न्योः सदृशौ रणे ॥ २४ ॥ उद्भिन्नरुधिरौ कृष्णौ भारद्वाजस्य सायकैः । शितैश्चितौ व्यरोचेतां कर्णिकारैरिवाचलौ ॥ २५ ॥ द्रोणग्राहह्रदान्मुक्तौ शक्त्याशीविषसङ्कटात् । अयःशिरोऽग्रमकरात् क्षत्रियप्रवराम्भसः ॥ २६ ॥ ज्याघोषतलनिर्ह्रादाद्गदानिस्त्रिंशविद्युतः । द्रोणास्त्रमेघान्निर्मुक्तौ सूर्य्येन्दू तिमिरादिव ॥ २७ ॥ बाहुभ्यामिव संतीर्णौ सिन्धुषष्ठाः समुद्रगाः । तपान्ते सरितः पूर्णा महाग्राहसमाकुलाः ॥ २८ ॥ इति कृष्णौ महेष्वासौ यशसा लोकविश्रुतौ । सर्वभूतान्यमन्यन्त द्रोणास्त्रबलविस्मयात् ॥ २९ ॥ जयद्रथं समीपस्थमवेक्षन्तौ जिघांसया । रुरुं निपातेलिप्सन्तौ व्याघ्रवत्तावतिष्ठताम् ॥ ३० ॥ यथाहि मुखवर्णोऽमनयोरिति मेनिरे । तव योधा महाराज हतमेव जयद्रथम् ॥ ३१ ॥ लोहिताक्षौ महाबाहू संयुक्तौ कृष्णपाण्डवौ । सिन्धुराजमभिप्रेक्ष्य हृष्टौ व्यनदतां मुहुः ॥ ३२ ॥ शौरेरभीषुहस्तस्य पार्थस्य च धनुष्मतः । तयोरासीत् प्रभा राजन् सूर्य्यपावकयोरिव ॥ ३३ ॥ हर्ष एव तयोरासीद्द्रोणानीकप्रमु-

ञ्जयोः । समीपे सैन्धवं दृष्ट्वा श्येनयोरामिषं यथा ॥ ३४ ॥ तौ तु सैन्धवमालोक्य वर्त्तमानमिवान्तके । सहसा पेततुः क्रुद्धौ क्षिप्रं श्येनाविवामिषम् ॥ ३५ ॥ तौ तु दृष्ट्वा व्यतिक्रान्तौ हृषीकेशधनञ्जयौ । सिन्धुराजस्य रक्षार्थं पराक्रान्तः सुतस्तव ॥ ३६ ॥ द्रोणेनाबद्धकवचो राजा दुर्य्योधनस्तदा । ययावेकरथेनाजौ हयसंस्कारवित् प्रभो ॥ ३७ ॥ कृष्णपार्थौ महेष्वासौ व्यतिक्रम्याथ ते सुतः । अग्रतः पुण्डरीकाक्षं प्रतीयाय नराधिपः ॥ ३८ ॥ ततः सर्वेषु सैन्येषु वादित्राणि प्रहृष्टवत् । प्रावाद्यन्त ह्यतिक्रान्ते तव पुत्रे धनञ्जये ॥ ३९ ॥ सिंहनादरवाश्चासन् शङ्खशब्दविमिश्रिताः । दृष्ट्वा दुर्य्योधनं तत्र कृष्णयोः प्रमुखे स्थितम् ॥ ४० ॥ ये च ते सिन्धुराजस्य गोप्तारः पावकोपमाः । तेऽप्यहृष्यन्त समरे दृष्ट्वा पुत्रं तव प्रभो ॥ ४१ ॥ दृष्ट्वा दुर्य्योधनं कृष्णो व्यतिक्रान्तं सहानुगम् । अब्रवीदर्जुनं राजन् प्राप्तकालमिदं वचः ॥ ४२ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि दुर्य्योधनागमने एकाधिकशततोऽध्यायः ॥ १०१ ॥

---

वासुदेव उवाच । सुयोधनमतिक्रान्तमेनं पश्य धनञ्जय । अत्यद्भुतमिमं मन्ये नास्त्यस्य सदृशो रथः ॥ १ ॥ दूरपाती महेष्वासः कृतास्त्रो युद्धदुर्मदः । दृढास्त्रश्चित्रयोधी च धार्त्तराष्ट्रो महाबलः ॥ २ ॥ अत्यन्तसुखसम्वृद्धो मानितश्च महारथैः । कृती च सततं पार्थ नित्यं द्वेष्टि च पाण्डवान् ॥ ३ ॥ तेन युद्धमिमं मन्ये प्राप्तकालं तवानघ । अत्र वा द्यूतमायत्तं विजयायेतराय च ॥४॥ अत्र क्रोधविषं पार्थ विमुञ्च चिरसम्भृतम् । एष मूलमनर्थानां पाण्डवानां महारथः ॥ ५ ॥ सोऽयं प्राप्तस्तवाक्षेपे पश्य साफल्यमात्मनः । कथं हि राजा राज्यार्थी त्वया गच्छेत संयुगम् ॥ ६ ॥

दिष्ट्या त्विदानीं संप्राप्त एष ते बाणगोचरम् । यथायं जीवितं जह्यात्तथा कुरु धनञ्जय ॥ ७ ॥ ऐश्वर्य्यमदसम्मूढ़ो नैष दुःखमुपेयिवान् । न च ते संयुगे वीर्य्यं जानाति पुरुषर्षभ ॥ ८ ॥ त्वां हि लोकास्त्रयः पार्थ ससुरासुरमानुषाः । नोत्सहन्ते रणे जेतुं किमुतैकः सुयोधनः ॥ ९ ॥ स दिष्ट्या समनुप्राप्तस्तव पार्थ रथान्तिकम् । जह्येनं त्वं महाबाहो यथा वृत्रं पुरन्दरः ॥ १० ॥ एष ह्यनर्थे सततं पराक्रान्तस्तवानघ । निकृत्या धर्मराजञ्च द्यूते वञ्चितवानयम् ॥ ११ ॥ बहूनि सुनृशंसानि कृतान्ये तेन मानद । युष्मासु पापमतिना ह्यपापेष्वेव नित्यदा ॥ १२ ॥ तमनार्य्यं सदा क्रुद्धं पुरुषं कामरूपिणम् । आर्य्यां युद्धे मतिं कृत्वा जहि पार्थाविचारयन् ॥ १३ ॥ निकृत्या राज्यहरणं बनवासञ्च पाण्डव । परिक्लेशञ्च कृष्णाया हृदि कृत्वा पराक्रम ॥ १४ ॥ दिष्ट्यैष तव बाणानां गोचरे परिवर्त्तते । प्रतिघाताय कार्य्यस्य दिष्ट्या च यततेऽग्रतः ॥ १५ ॥ दिष्ट्या जानाति सङ्ग्रामे योद्धव्यं हि त्वया सह । दिष्ट्या च सफलाः पार्थ सर्व्वे कामा ह्यकामिताः ॥ १६ ॥ तस्माज्जहि रणे पार्थ धार्त्तराष्ट्रं कुलाधमम् । यथेन्द्रेण हतः पूर्व्वं जम्भो देवासुरे मृधे ॥ १७ ॥ अस्मिन् हते त्वया सैन्यमनाथं भिद्यतामिदम् । वैरस्यास्यस्त्ववभृथो मूलं छिन्धि दुरात्मनाम् ॥१८

सञ्जय उवाच । तं तथेत्यब्रवीत् पार्थः कृत्यरूपमिदं मम । सर्व्वमन्यदनादृत्य गच्छ यत्र सुयोधनः ॥ १९ ॥ येनैतद्दीर्घकालं नो भुक्तं राज्यमकण्टकम् । अप्यस्य युधि विक्रम्य छिन्द्यां मूर्द्धानमाहवे ॥ २० ॥ अपि तस्या ह्यनर्हायाः परिक्लेशस्य माधव । कृष्णायाः शक्नुयां गन्तुं पदं केशप्रधर्षणे ॥ २१ ॥ इत्येवं वादिनौ कृष्णौ हृष्टौ श्वेतान् हयोत्तमान् । प्रेषयामासतुः सङ्ख्ये प्रेप्सन्तौ तं नराधिपम् ॥ २२ ॥ तयोः समीपं सम्प्राप्य पुत्रस्ते भरतर्षभ । न चकार भयं प्राप्ते भये महति मारिष ॥ २३ ॥

तदस्य क्षत्रियास्तत्र सर्वं एवाभ्यपूजयन्। यदर्ज्जुनहृषीकेशौ प्रत्युद्यातो न्यवारयत्॥ २४॥ ततः सर्व्वस्य सैन्यस्य तावकस्य विशाम्पते। महानादो ह्यभूत्तत्र दृष्ट्वा राजानमाहवे॥ २५॥ तस्मिन् जनसमुन्नादे प्रवृत्ते भैरवे सति। कदर्थीकृत्य ते पुत्रः प्रतिमित्रमवारयत्॥ २६॥ आवारितस्तु कौन्तेयस्तव पुत्रेण धन्विना। संरम्भमगमद्भूयः स च तस्मिन् परन्तपः॥ २७॥ तौ दृष्ट्वा प्रतिसंरब्धौ दुर्य्योधनधनञ्जयौ। अभ्यवैक्षन्त राजानो भीमरूपाः समन्ततः॥ २८॥ दृष्ट्वा तु पार्थं संरब्धं वासुदेवञ्च मारिष। प्रहसन्नेव पुत्रस्ते योद्धुकामः समाह्वयत्॥ २९॥ ततः प्रहृष्टो दाशार्हः पाण्डवश्च धनञ्जयः। व्यक्रोशेतां महानादं दध्मतुश्चाम्बुजत्तमौ॥ ३०॥ तौ हृष्टरूपौ सम्प्रेक्ष्य कौरवेयास्तु सर्व्वशः। निराशाः समपद्यन्त पुत्रस्य तव जीविते॥ ३१॥ शोक-मापुः परे चैव कुरवः सर्वं एव ते। अमन्यन्त च पुत्रन्ते वैश्वा-नरमुखे हुतम्॥ ३२॥ तथा तु दृष्ट्वा योधास्ते प्रहृष्टौ कृष्ण-पाण्डवौ। हतो राजा हतो राजेत्यूचिरे च भयार्द्दिताः॥ ३३॥ जनस्य सन्निनादन्तु श्रुत्वा दुर्य्योधनोऽब्रवीत्। व्येतु वो भीरहं कृष्णौ प्रेषयिष्यामि मृत्यवे॥ ३४॥ इत्युक्त्वा सैनिकान् सर्वान् जयापेक्षी नराधिपः। पार्थमाभाष्य संरम्भादिदं वचनमब्रवीत् ३५ पार्थ यत् शिक्षितं तेऽस्त्रं दिव्यं पार्थिवमेव च। तद्दर्शय मयि क्षिप्रं यदि जातोऽसि पाण्डुना॥ ३६॥ यद्बलं तव वीर्य्यञ्च केशवस्य तथैव च। तत् कुरुष्व मयि क्षिप्रं पश्यामस्तव पौरुषम्॥३७ अस्मत्परोक्षं कर्म्माणि कृतानि प्रवदन्ति ते। स्वामिसत्कारयुक्तानि यानि तानीह दर्शय॥ ३८॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि दुर्य्योधनदम्भवाक्ये द्व्यधिकशततोऽध्यायः॥ १०२॥

सञ्जय उवाच। एवमुक्त्वार्जुनं राजा त्रिभिर्मर्मातिगैः शरैः। अभ्यविध्यन्महावेगैश्चतुर्भिश्चतुरो हयान् ॥ १ ॥ वासुदेवञ्च दशभिः प्रत्यविध्यत् स्तनान्तरे। प्रतोदं चास्य भल्लेन छित्त्वा भूमावपातयत् ॥ २ ॥ तञ्चतुर्द्दशभिः पार्थश्चित्रपुङ्खैः शिलाशितैः। अविध्यत्तूर्णमव्यग्रस्ते चाभ्रश्यन्त वर्म्मणि ॥ ३ ॥ तेषां नैष्फल्यमालोक्य पुनर्नव च पञ्च च। प्राहिणोन्निशितान् वाणान् ते चाभ्रश्यन्त वर्म्मणः ॥ ४ ॥ अष्टाविंशत्तु तान् वाणानस्तान् विप्रेच्य निष्फलान्। अब्रवीत् परवीरघ्नः कृष्णोऽर्जुनमिदं वचः ॥ ५ ॥ अदृष्टपूर्व्वं पश्यामि शिलानामिव सर्पणम्। त्वया सम्प्रेरिताः पार्थ नार्थं कुर्व्वन्ति पत्रिणः ॥ ६ ॥ कच्चिद्गाण्डीवतः प्राणस्तथैव भरतर्षभ। मुष्टिश्च ते यथा पूर्व्वं भुजयोश्च वलं तव ॥ ७ ॥ न वा कच्चिदयं कालः प्राप्तः स्यादद्य पश्चिमः। तव चैवास्य शत्रोश्च तन्ममाचच्व पृच्छतः ॥ ८ ॥ विस्मयो मे महान् पार्थ तव दृष्ट्वा शरानिमान्। व्यर्थान् निपतितान् दृष्ट्वा दुर्य्योधनरथं प्रति ॥ ९ ॥ वज्राशनिसमा घोराः परकायावभेदिनः। शराः कुर्व्वन्ति ते नार्थं पार्थ काद्य विड़म्वना ॥ १० ॥

अर्जुन उवाच। द्रोणेनैषा मतिः कृष्ण धार्त्तराष्ट्रे निवेशिता। अभेद्या हि ममास्त्राणामेषा कवचधारणा ॥ ११ ॥ अास्मिन्नन्तर्हितं कृष्ण त्रैलोक्यमपि कर्म्मणि। एको द्रोणो हि वेदैतदहं तस्माच्च सत्तमात् ॥ १२ ॥ न शक्यमेतत् कवचं वाणैर्भेत्तुं कथञ्चन। अपि वज्रेण गोविन्द स्वयं मघवता युधि ॥१३॥ जानंस्त्वमपि वै कृष्ण मां विमोहयसे कथम्। यद्वृत्तं त्रिषु लोकेषु यच्च केशव वर्त्तते ॥ १४ ॥ तथा भविष्यच्चैव तत् सर्व्वं विदितं तव। न त्विदं वेद वै कश्चित् यथा त्वं मधुसूदन ॥ १५ ॥ एष दुर्य्योधनः कृष्ण द्रोणेन विहितामिमाम्। तिष्ठत्यभीतवत् सङ्ख्ये विभ्रत् कवचधारणाम् ॥ १६ ॥ यत्त्वत्र विहितं कार्य्यं नैष

तद्देत्ति माधव। स्त्रीवद्दैष विभर्त्त्येतां युक्तां कवचधारणाम् ॥१७॥
पश्य बाह्वोश्च मे वीर्य्यं धनुषश्च जनार्द्दन। पराजयिष्ये कौरव्यं
कवचेनापि रक्षितम् ॥ १८ ॥ इदमङ्गिरसे प्रादाद्देवशो वर्म
भास्वरम्। तस्माद्वृहस्पतिः प्राप ततः प्राप पुरन्दरः ॥ १९ ॥
पुनर्द्ददौ सुरपतिर्मह्यं वर्म ससंग्रहम्। दैवं यद्यस्य वर्मैतद्ब्रह्मणा
वा स्वयं कृतम्। नैनं गोपस्यति दुर्बुद्धिमद्य वाणहतं मया ॥२०॥
सञ्जय उवाच। एवमुक्त्वार्जुनो वाणानभिमन्त्र्य व्यकर्षयत्।
विकृष्यमाणांस्तेनैव धनुर्मध्यगतांश्चरान् ॥ २१ ॥ तानस्यास्त्रेण
चिच्छेद द्रौणिः सर्वास्त्रघातिना। तान्निकृत्तानिषून् दृष्ट्वा दूरतो
ब्रह्मवादिना ॥ २२ ॥ न्यवेदयत् केशवाय विस्मितः श्वेतवाहनः।
नैतदस्त्रं मया शक्यं द्विः प्रयोक्तुं जनार्द्दन ॥ २३ ॥ अस्त्रं मामेव
हन्याद्धि हन्याच्चापि बलं मम। ततो दुर्य्योधनः कृष्णौ नवभि-
र्नवभिः शरैः ॥ २४ ॥ अविध्यत रणे राजञ्छरैराशीविषो-
पमैः। भूय एवाभ्यवर्षञ्च समरे कृष्णपाण्डवौ ॥ २५ ॥ शर-
वर्षेण महता ततोऽहृष्यन्त तावकाः। चक्रुर्वादित्रनिनदान् सिंह-
नादरवांस्तथा ॥ २६ ॥ ततः क्रुद्धो रणे पार्थः सृक्कणी परि-
संलिहन्। नापश्यच्च ततोऽस्याङ्गं यन्न स्याद्दर्मरक्षितम् ॥ २७ ॥
ततोऽस्य निशितैर्वाणैः सुमुक्तैरन्तकोपमैः। हयांश्चकार निर्द्देहा-
नुभौ च पार्ष्णिसारथी ॥ २८ ॥ धनुरस्याच्छिनत्तूर्णं हस्तावापञ्च
वीर्य्यवान्। रथञ्च शकलीकर्त्तुं सव्यसाची प्रचक्रमे ॥ २९ ॥
दुर्य्योधनञ्च वाणाभ्यां तीक्ष्णाभ्यां विरथीकृतम्। आविध्यद्धस्त-
तलयोरुभयोरर्जुनस्तथा ॥ ३० ॥ तं कृच्छ्रामापदं प्राप्तं दृष्ट्वा
परमधन्विनम्। समापेतुः परीप्सन्तो धनञ्जयशरार्द्दितम् ॥ ३१ ॥
तं रथैर्वहुसाहस्रैः कल्पितैः कुञ्जरैर्हयैः। पदात्योघैश्च संरब्धैः
परिवव्रुर्धनञ्जयम् ॥ ३२ ॥ अथ नार्जुनगोविन्दौ न रथो वा
व्यदृश्यत। अस्त्रवर्षेण महता जनौघैश्चापि संवृतौ ॥ ३३ ॥

ततोऽर्जुनोऽस्त्रवीर्य्येण निजघ्ने तां वरूथिनीम् । तत्र व्यङ्गीकृताः पेतुः शतशोऽथ रथद्विपाः ॥ ३४ ॥ ते हता हन्यमानाश्च न्यगृह्णंस्तं रथोत्तमम् । स रथस्तम्भितस्तस्थौ क्रोशमात्रे समन्ततः ॥ ३५ ॥ ततोऽर्जुनं वृष्णिवीरस्त्वरितो वाक्यमब्रवीत् । धनुर्विस्फारयात्यर्थमहं ध्मास्यामि चाम्बुजम् ॥ ३६ ॥ ततो विस्फार्य्य बलवत् गाण्डीवं जघ्निवान् रिपून् । महता शरवर्षेण तलशब्देन चार्जुनः ॥ ३७ ॥ पाञ्चजन्यञ्च बलवान्दध्मौ तारेण केशवः । रजसा ध्वस्तपक्ष्माग्रः प्रस्विन्नवदनो भृशम् ॥ ३८ ॥ तस्य शङ्खस्य नादेन धनुषो निस्वनेन च । निःसत्त्वाश्च ससत्त्वाश्च क्षितौ पेतुस्तदा जनाः ॥ ३९ ॥ तैर्विमुक्तो रथो रेजे वाय्वीरित इवाम्बुदः । जयद्रथस्य गोप्तारस्ते वै क्रुद्धाः सहानुगाः ॥ ४० ॥ ते दृष्ट्वा सहसा पार्थं गोप्तारः सैन्धवस्य तु । चक्रुर्नादान् महेष्वासाः कम्पयन्तो वसुन्धराम् ॥ ४१ ॥ वाणशब्दरवांश्चोग्रान् विमिश्राञ्छङ्खनिस्वनैः । प्रादुश्चक्रुर्महात्मानः सिंहनादरवानपि ॥ ४२ ॥ तं श्रुत्वा निनदं घोरं तावकानां समुत्थितम् । प्रदध्मतुः शङ्खवरौ वासुदेवधनञ्जयौ ॥ ४३ ॥ तेन शब्देन महता पूरितेव वसुन्धरा । सशैला सार्णवद्वीपा सपाताला विशाम्पते ॥ ४४ ॥ स शब्दो भरतश्रेष्ठ व्याप्य सर्वा दिशो दश । प्रतिसस्वान तत्रैव कुरुपाण्डवयोर्बले ॥ ४५ ॥ तावका रथिनस्तत्र दृष्ट्वा कृष्णधनञ्जयौ । सम्भ्रमं परमं प्राप्तास्त्वरमाणा महारथाः ॥ ४६ ॥ अथ कृष्णौ महाभागौ तावका वीक्ष्य दंशितौ । अभ्यद्रवन्त संक्रुद्धौ तदद्भुतमिवाभवत् ॥ ४७ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि दुर्य्योधनपराजये त्र्यधिकशततोऽध्यायः ॥ १०३ ॥

---

सञ्जय उवाच। तावका हि समीक्ष्यैव वृष्ण्यन्धककुरूत्तमौ। प्रागत्वरन् जिघांसन्तस्तथैव विजयः परान् ॥१॥ सुवर्णचित्रैर्वैयाघ्रैः स्वनवद्भिर्महारथैः। दीपयन्तो दिशः सर्वा ज्वलद्भिरिव पावकैः ॥ २ ॥ रुक्मपृष्ठैश्च दुष्प्रेक्ष्यैः कार्मुकैः पृथिवीपते। कूजद्भिरतुलान्नादान् कोपितैस्तुरगैरिव ॥ ३ ॥ भूरिश्रवाः शलः कर्णो वृषसेनो जयद्रथः। कृपश्च मद्रराजश्च द्रौणिश्च रथिनाम्वरः ॥ ४ ॥ ते पिवन्त इवाकाशमश्वैरष्टौ महारथाः। व्यराजयन् दश दिशो वैयाघ्रैर्हेमचन्द्रकैः ॥ ५ ॥ ते दंशिताः सुसंरब्धा रथैर्मेघौघनिस्वनैः। समावृण्वन् दश दिशः पार्थस्य निशितैः शरैः ॥ ६ ॥ कुलीनाश्च हयास्तित्रा वहन्तस्तान् महारथान्। व्यशोभन्त तदा शीघ्रा दीपयन्तो दिशो दश ॥ ७ ॥ आजानेयैर्महावेगैर्नानादेशसमुत्थितैः। पार्वतीयैर्नदीजैश्च सैन्धवैश्च हयोत्तमैः ॥ ८ ॥ कुरुयोधवरा राजंस्तव पुत्रं परीप्सवः। धनञ्जयरथं शीघ्रं सर्वतः समुपाद्रवन् ॥ ९ ॥ ते प्रगृह्य महाशङ्खान् दध्मुः पुरुषसत्तमाः। पूरयन्तो दिवं राजन् पृथिवीञ्च ससागराम् ॥ १० ॥ तथैव दध्मतुः शङ्खौ वासुदेवधनञ्जयौ। प्रवरौ सर्वदेवानां सर्वशङ्खवरौ भुवि ॥ ११ ॥ देवदत्तञ्च कौन्तेयः पाञ्चजन्यञ्च केशवः। शब्दस्तु देवदत्तस्य धनञ्जयसमीरितः ॥ १२ ॥ पृथिवीञ्चान्तरीक्षञ्च दिशश्चैव समावृणोत्। तथैव पाञ्चजन्योऽपि वासुदेवसमीरितः ॥ १३ ॥ सर्वशब्दानतिक्रम्य पूरयामास रोदसी। तस्मिंस्तथा वर्त्तमाने दारुणे नादसङ्कुले ॥ १४ ॥ भीरूणां त्रासजनने शूराणां हर्षवर्द्धने। प्रवादितासु भेरीषु झर्झरेष्वानकेषु च ॥ १५ ॥ मृदङ्गेष्वपि राजेन्द्र वाद्यमानेष्वनेकशः। महारथाः समाहूता दुर्य्योधनहितैषिणः ॥ १६ ॥ अमृष्यमाणास्तं शब्दं क्रुद्धाः परमधन्विनः। नानादेश्या महीपालाः स्वसैन्यपरि-

रक्षिणः ॥ १७ ॥ अमर्षिता महाशङ्खान् दध्मुर्वीरा महारथाः । कृते प्रतिकरिष्यन्तः केशवस्यार्ज्जुनस्य च ॥ १८ ॥ बभूव तत्र तत् सैन्यं शङ्खशब्दसमीरितम् । उद्विग्नरथनागाश्वमस्वस्थमिव वा विभो ॥ १९ ॥ तत् प्रविद्धमिवाकाशं शूरैः शङ्खनिनादितम् । बभूव भृशमुद्विग्नं निर्घातैरिव नादितम् ॥ २० ॥ स शब्दः सुमहान् राजन् दिशः सर्व्वा व्यनादयत् । त्रासयामास तत् सैन्यं युगान्त इव सम्भृतः ॥ २१ ॥ ततो दुर्य्योधनोऽष्टौ च राजानस्ते महारथाः । जयद्रथस्य रक्षार्थं पाण्डवं पर्य्यवारयन् ॥ २२ ॥ ततो द्रौणिस्त्रिसप्तत्या वासुदेवमताड़यत् । अर्ज्जुनञ्च त्रिभिर्भल्लैर्ध्वजमश्वांश्च पञ्चभिः ॥ २३ ॥ तमर्ज्जुनः पृषत्कानां शतैः षड्भिरताड़यत् । अत्यर्थमिव संक्रुद्धः प्रतिविद्धे जनार्द्दने ॥ २४ ॥ कर्णं स दशभिर्विद्ध्वा वृषसेनं त्रिभिस्तथा । शल्यस्य सशरञ्चापं मुष्टौ चिच्छेद वीर्य्यवान् ॥ २५ ॥ गृहीत्वा धनुरन्यत्तु शल्यो विव्याध पाण्डवम् । भूरिश्रवास्त्रिभिर्वाणैर्हेमपुङ्खैः शिलाशितैः ॥ २६ ॥ कर्णो द्वात्रिंशता चैव वृषसेनश्च सप्तभिः । जयद्रथस्त्रिसप्तत्या कृपश्च दशभिः शरैः ॥ २७ ॥ मद्रराजश्च दशभिर्विव्यधुः फाल्गुनं रणे । ततः शराणां षष्ट्या तु द्रौणिः पार्थमवाकिरत् ॥ २८ ॥ वासुदेवञ्च विंशत्या पुनः पार्थञ्च पञ्चभिः । प्रहसंस्तु नरव्याघ्रः श्वेताश्वः कृष्णसारथिः ॥ २९ ॥ प्रत्यविध्यत् स तान् सर्व्वान् दर्शयन् पाणिलाघवम् । कर्णं द्वादशभिर्विद्ध्वा वृषसेनं त्रिभिः शरैः ॥ ३० ॥ शल्यस्य सशरञ्चापं मुष्टिदेशे व्यकृन्तत । सौमदत्तिं त्रिभिर्विद्ध्वा शल्यञ्च दशभिः शरैः ॥ ३१ ॥ शितैरग्निशिखाकारैर्द्रौणिं विव्याध चाष्टभिः । गौतमं पञ्चविंशत्या सैन्धवञ्च शतेन ह ॥ ३२ ॥ पुनर्द्रौणिञ्च सप्तत्या शराणां सोऽभ्यताड़यत् । भूरिश्रवास्तु संक्रुद्धः प्रतोदञ्चिच्छिदे हरेः ॥ ३३ ॥ अर्ज्जुनञ्च त्रिसप्तत्या बाणानामाजघान ह । ततः शरशतैस्तीक्ष्णै-

स्तानरीन् श्वेतवाहनः। प्रत्यषेधद्द्रुतं क्रुद्धो महावातो घना-
निव॥ ३४॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सङ्कुलयुद्धे
चतुरधिकशततोऽध्यायः॥ १०४॥

---

धृतराष्ट्र उवाच। ध्वजान् बहुविधाकारान् भ्राजमानानति-
श्रिया। पार्थानां मामकानाञ्च तान् ममाचक्ष्व सञ्जय॥ १॥
सञ्जय उवाच। ध्वजान् बहुविधाकारान् शृणु तेषां महा-
त्मनाम् रूपतो वर्णतश्चैव नामतश्च निबोध मे॥ २॥ तेषान्तु
रथमुख्यानां रथेषु विविधा ध्वजाः। प्रत्यदृश्यन्त राजेन्द्र ज्वलिता
इव पावकाः॥ ३॥ काञ्चनाः काञ्चनापीड़ा काञ्चनस्रगलङ्कृताः।
काञ्चनानीव शृङ्गाणि काञ्चनस्य महागिरेः॥ ४॥ अनेकवर्णा
विविधा ध्वजाः परमशोभनाः। ते ध्वजाः संवृतास्तेषां पता-
काभिः समन्ततः॥ ५॥ नानावर्णविरागाभिः शुशुभुः सर्वतो
वृताः। पताकाश्च ततस्तास्तु श्वसनेन समीरिताः॥ ६॥ नृत्य-
माना व्यदृश्यन्त रङ्गमध्ये विलासिकाः। इन्द्रायुधसवर्णाभाः
पताका भरतर्षभ॥ ७॥ दोधूयमाना रथिनां शोभयन्ति महा-
रथान्। सिंहलाङ्गूलमुग्रास्यं ध्वजं वानरलक्षणम्॥ ८॥ धन-
ञ्जयस्य सङ्ग्रामे प्रत्यदृश्यत भैरवम्। स वानरवरो राजन् पता-
काभिरलङ्कृतः॥ ९॥ त्रासयामास तत्सैन्यं ध्वजो गाण्डीव-
धन्वनः। तथैव सिंहलाङ्गूलं द्रोणपुत्रस्य भारत॥ १०॥ ध्वजाग्रं
समपश्याम बालसूर्य्यसमप्रभम्। काञ्चनं पवनोद्धूतं शक्रध्वजसम-
प्रभम्॥ ११॥ नन्दनं कौरवेन्द्राणां द्रौणेर्लक्ष्म समुच्छ्रितम्।
हस्तिकक्षा पुनर्हैमी बभूवाधिरथेर्ध्वजः॥ १२॥ आहवे खं
महाराज ददृशे पूरयन्निव। पताका काञ्चनी स्रग्वी ध्वजः कर्णस्य

संयुगे ॥ १३ ॥ नृत्यतीव रथोपस्थे श्वसनेन समीरिता । आचा-
र्य्यस्य च पाण्डूनां ब्राह्मणस्य तपस्विनः ॥ १४ ॥ गोवृषो गौतम-
स्यासीत् कृपस्य सुपरिष्कृतः । स तेन भ्राजते राजन् गोवृषेण
महात्मवान् ॥ १५ ॥ त्रिपुरघ्नरथो यद्वद्गोवृषेण विराजता ।
मयूरो वृषसेनस्य काञ्चनो मणिरत्नवान् ॥ १६ ॥ व्याहरिष्य-
न्निवातिष्ठत् सेनाग्रमुपशोभयन् । तेन तस्य रथो भाति मयूरेण
महात्मनः ॥ १७ ॥ यथा स्कन्दस्य राजेन्द्र मयूरेण विराजता ।
मद्रराजस्य शल्यस्य ध्वजाग्रेऽग्निशिखामिव ॥ १८ ॥ सौवर्णीं
प्रतिपश्याम सीतामप्रतिमां शुभाम् । सा सीता भ्राजते तस्य
रथमास्थाय मारिष ॥ १९ ॥ सर्व्ववीजविरूढेव यथा सीता श्रिया
वृता । वराहः सिन्धुराजस्य राजतोऽभिविराजते ॥ २० ॥
ध्वजाग्रे लोहिताकाभो हेमजालपरिष्कृतः । शुशुभे केतुना तेन
राजतेन जयद्रथः ॥ २१ ॥ यथा देवासुरे युद्धे पुरा पूषा स्म
शोभते । सौमदत्तेः पुनर्यूपो यज्ञशीलस्य धीमतः ॥ २२ ॥ ध्वजः
सूर्य्य इवाभाति सोमश्चात्र प्रदृश्यते । स यूपः काञ्चनो राजन्
सौमदत्तेर्व्विराजते ॥ २३ ॥ राजसूये मखश्रेष्ठे यथा यूपः समु-
च्छ्रितः । शल्यस्य तु महाराज राजतो द्विरदो महान् ॥ २४ ॥
केतुः काञ्चनचित्राङ्गैर्मयूरैरुपशोभितः । स केतुः शोभयामास
सैन्यं ते भरतर्षभ ॥ २५ ॥ यथा श्वेतो महानागो देवराजचमूं
तथा । नागो मणिमयो राज्ञो ध्वजः कनकसम्वृतः ॥ २६ ॥
किङ्किणीशतसंह्रादो राजंश्चित्रो रथोत्तमे । व्यभ्राजत भृशं
राजन् पुत्रस्तव विशाम्पते ॥ २७ ॥ ध्वजेन महता सङ्ख्ये कुरू-
णामृषभस्तदा । नवैते तव वाहिन्यामुच्छ्रिताः परमध्वजाः ॥२८॥
व्यदीपयंस्ते पृतनां युगान्तादित्यसन्निभाः । दशमस्त्वर्ज्जुनस्यासी-
देक एव महाकपिः ॥ २९ ॥ अदीप्यतार्ज्जुनो येन हिमवानिव
वह्निना । ततश्चित्राणि शुभ्राणि सुमहान्ति महारथाः ॥ ३० ॥

कार्मुकाण्याददुस्तूर्णमर्जुनार्थे परन्तपाः । तथैव धनुरायच्छत् पार्थः शत्रुविनाशनम् ॥ ३१ ॥ गाण्डीवं दिव्यकर्मा तद्राजन् दुर्मन्त्रिते तव । तवापराधाद्राजानो निहता बहुशो युधि ॥ ३२ ॥ नानादिग्भ्यः समाहूताः सहयाः सरथद्विपाः । तेषामासीत् प्रतिद्विपो गर्ज्जतामितरेतरम् ॥ ३३ ॥ दुर्य्योधनमुखानाञ्च पाण्डूनामृषभस्य च । तत्राद्भुतं परञ्चक्रे कौन्तेयः कृष्णसारथिः ॥३४॥ यदेको बहुभिः सार्द्धं समागच्छदभीतवत् । अशोभत महाबाहुर्गाण्डीवं विक्षिपन् धनुः ॥ ३५ ॥ जिगीषुस्तान्नरव्याघ्रान् जिघांसुश्च जयद्रथम् । तत्रार्जुनो नरव्याघ्रः शरैर्मुक्तैः सहस्रशः ॥ ३६ ॥ अदृश्यांस्तावकान् योधान् प्रचक्रे शत्रुतापनः । ततस्तेऽपि नरव्याघ्राः पार्थं सर्वे महारथाः ॥ ३७ ॥ अदृश्यं समरे चक्रुः सायकौघैः समन्ततः । सम्वृते नरसिंहैस्तु कुरूणामृषभेऽर्जुने । महानासीत्समुद्भूतस्तस्य सैन्यस्य निस्वनः ॥ ३८ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि ध्वजवर्णने
पञ्चाधिकशतोऽध्यायः ॥ १०५ ॥

---

धृतराष्ट्र उवाच । अर्जुने सैन्धवं प्राप्ते भारद्वाजे च सम्वृते । पाञ्चालाः कुरुभिः सार्द्धं किमकुर्वत सञ्जय ॥ १ ॥

सञ्जय उवाच । अपराह्णे महाराज सङ्ग्रामे लोमहर्षणे । पाञ्चालानां कुरूणाञ्च द्रोणे द्यूतमवर्त्तत ॥ २ ॥ पाञ्चाला हि जिघांसन्तो द्रोणं संहृष्टचेतसः । अभ्यमुञ्चन्त गर्ज्जन्तः शरवर्षाणि मारिष ॥ ३ ॥ ततस्तु तुमुलस्तेषां सङ्ग्रामोऽवर्त्ततादभुतः । पाञ्चालानां कुरूणाञ्च घोरो देवासुरोपमः ॥ ४ ॥ सर्वे द्रोणरथं प्राप्य पाञ्चालाः पाण्डवैः सह । तदनीकं विभित्सन्तो महास्त्राणि व्यदर्शयन् ॥ ५ ॥ द्रोणस्य रथपर्य्यन्तं रथिनो रथमास्थिताः ।

कम्पयन्तोऽभ्यवर्षन्त वेगमास्थाय मध्यमम् ॥ ६ ॥ तमभ्ययाद्बृहत्-
क्षत्रः कैकयानां महारथः। प्रवपन्निशितान् बाणान्महेन्द्राशनि-
सन्निभान् ॥ ७ ॥ तन्तु प्रत्युद्ययौ शीघ्रं क्षेमधूर्त्तिर्महायशाः।
विमुञ्चन्निशितान् बाणान् शतशोऽथ सहस्रशः ॥ ८ ॥ धृष्टकेतुश्च
चेदीनामृषभोऽतिबलोदितः। त्वरितोऽभ्यद्रवत्तूर्णं महेन्द्र इव
शम्बरम् ॥ ९ ॥ तमापतन्तं सहसा व्यादितास्यमिवान्तकम्।
वीरधन्वा महेष्वासस्त्वरमाणः समभ्ययात् ॥ १० ॥ युधिष्ठिरं
महाराजं जिगीषुं समवस्थितम्। सहानीकं ततो द्रोणो न्यवा-
रयत वीर्य्यवान् ॥ ११ ॥ नकुलं कुशलं युद्धे पराक्रान्तं परा-
क्रमी। अभ्यगच्छत् समायान्तं विकर्णस्ते सुतः प्रभो ॥ १२ ॥
सहदेवं तथायान्तं दुर्मुखः शत्रुकर्षणः। शरैरनेकसाहस्रैः सम-
वाकिरदाशुगैः ॥ १३ ॥ सात्यकिन्तु नरव्याघ्रं व्याघ्रदत्तस्त्ववा-
रयत्। शरैः सुनिशितैस्तीक्ष्णैः कम्पयन् वै मुहुर्मुहुः ॥ १४ ॥
द्रौपदेयान्नरव्याघ्रान्मुञ्चतः सायकोत्तमान्। संरब्धान्रथिनः
श्रेष्ठान् सोमदत्तिरवारयत् ॥ १५ ॥ भीमसेनं तदा क्रुद्धं भीम-
रूपो भयानकः। प्रत्यवारयदायान्तमार्ष्यशृङ्गिर्महारथः ॥ १६ ॥
तयोः समभवद्युद्धं नरराक्षसयोर्मृधे। यादृगेव पुरा वृत्तं राम-
रावणयोर्नृप ॥ १७ ॥ ततो युधिष्ठिरो द्रोणं नवत्या नतपर्व-
णाम्। आजघ्ने भरतश्रेष्ठः सर्वमर्मसु भारत ॥ १८ ॥ तं द्रोणः
पञ्चविंशत्या निजघान स्तनान्तरे। रोषितो भरतश्रेष्ठ कौन्तेयेन
यशस्विना ॥ १९ ॥ भूय एव तु विंशत्या सायकानां समाचिनोत्।
साश्वसूतध्वजं द्रोणः पश्यतां सर्वधन्विनाम् ॥ २० ॥ तान् शरान्
द्रोणमुक्तांस्तु शरवर्षेण पाण्डवः। अवारयत धर्म्मात्मा दर्शयन्
पाणिलाघवम् ॥ २१ ॥ ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य
संयुगे। चिच्छेद समरे धन्वी धनुस्तस्य महात्मनः ॥ २२ ॥
अथैनं छिन्नधन्वानं त्वरमाणो महारथः। शरैरनेकसाहस्रैः

पूरयामास सर्वतः॥ २३॥ अदृश्यं वीक्ष्य राजानं भारद्वाजस्य सायकैः। सर्वभूतान्यमन्यन्त हतमेव युधिष्ठिरम्॥ २४॥ केचिच्चैनममन्यन्त तथैव विमुखीकृतम्। ततो राजेति राजेन्द्र ब्राह्मणेन महात्मना॥ २५॥ स कृच्छ्रं परमं प्राप्तो धर्मराजो युधिष्ठिरः। त्यक्त्वा तत् कार्मुकं छिन्नं भारद्वाजेन संयुगे॥ २६॥ आददेऽन्यद्धनुर्दिव्यं भास्वरं वेगवत्तरम्। ततस्तान् सायकांस्तत्र द्रोणनुन्नान् सहस्रशः॥ २७॥ चिच्छेद समरे वीरस्तदद्भुतमिवाभवत्। छित्त्वा तु ताञ्छरान्राजन् क्रोधसंरक्तलोचनः॥२८॥ शक्तिं जग्राह समरे गिरीणामपि दारुणीम्। स्वर्णदण्डां महाघोरामष्टघण्टां भयावहाम्॥ २९॥ समुत्क्षिप्य च तां हृष्टो ननाद बलवद्बली। नादेन सर्वभूतानि त्रासयन्निव भारत॥३०॥ शक्तिं समुद्यतां दृष्ट्वा धर्मराजेन संयुगे। स्वस्ति द्रोणाय सहसा सर्वभूतान्यथाब्रुवन्॥ ३१॥ सा राजभुजनिर्मुक्ता निर्मुक्तोरगसन्निभा। प्रज्वालयन्ती गगनं दिशः सप्रदिशस्तथा॥ ३२॥ द्रोणान्तिकमनुप्राप्ता दीप्तास्या पन्नगी यथा। तामापतन्तीं सहसा दृष्ट्वा द्रोणो विशाम्पते॥ ३३॥ प्रादुश्चक्रे ततो ब्राह्ममस्त्रमस्त्रविदाम्वरः। तदस्त्रं भस्मसात् कृत्वा तां शक्तिं घोरदर्शनाम्॥ जगाम स्यन्दनं तूर्णं पाण्डवस्य यशस्विनः। ततो युधिष्ठिरो राजा द्रोणास्त्रं तत् समुद्यतम्॥ ३५॥ अशीशमयत् महाप्राज्ञो ब्रह्मास्त्रेणैव मारिष। विद्ध्वा तच्च रणे द्रोणं पञ्चभिर्नतपर्वभिः॥ ३६॥ क्षुरप्रेण सुतीक्ष्णेन चिच्छेदास्य महद्धनुः। तदपास्य धनुश्छिन्नं द्रोणः क्षत्रियमर्द्दनः॥ ३७॥ गदाञ्चिक्षेप सहसा धर्मपुत्राय मारिष। तामापतन्तीं सहसा गदां दृष्ट्वा युधिष्ठिरः॥ ३८॥ गदामेवाग्रहीत् क्रुद्धश्चिक्षेप च परन्तप। ते गदे सहसा मुक्ते समासाद्य परस्परम्॥ ३९॥ सङ्घर्षात् पावकं मुक्त्वा समेयातां महीतले। ततो द्रोणो भृशं

क्रुद्धो धर्मराजस्य मारिष ॥ ४० ॥ चतुर्भिर्निशितैस्तीक्ष्णैर्हयान् जघ्ने शरोत्तमैः । चिच्छेदैकेन भल्लेन धनुश्चेन्द्रध्वजोपमम् ॥४१॥ केतुमेकेन चिच्छेद पाण्डवस्यार्द्दयत्त्रिभिः । हताश्वात्तु रथात्तूर्ण-मवप्लुत्य युधिष्ठिरः ॥ ४२ ॥ तस्थावूर्द्ध्वभुजो राजा व्यायुधो भरतर्षभ । विरथं तं समालोक्य व्यायुधञ्च विशेषतः ॥ ४३ ॥ द्रोणो व्यमोहयच्छत्रून् सर्व्वसैन्यानि वा विभो । सुञ्चंश्चेषुगणा-स्तीक्ष्णान् लघुहस्तो दृढव्रतः ॥ ४४ ॥ अभिदुद्राव राजानं सिंहो मृगमिवोल्बणः । तमभिद्रुतमालोक्य द्रोणेनामित्रघातिना ॥ ४५ ॥ हाहेति सहसा शब्दः पाण्डूनां समजायत । हतो राजा हतो राजा भारद्वाजेन मारिष ॥ ४६ ॥ इत्यासीत् सुमहान् शब्दः पाण्डुसैन्यस्य भारत । ततस्त्वरितमारुह्य सहदेवरथं नृपः । अपायाज्जवनैरश्वैः कुन्तीपुत्रो युधिष्ठिरः ॥ ४७ ॥

इतिद्रोणपर्व्वणि जयद्रथवधपर्व्वणि युधिष्ठिरापयाने षड़धिकशततोऽध्यायः ॥ १०६ ॥

---

सञ्जय उवाच । वृहत्क्षत्रमथायान्तं कैकयं दृढ़विक्रमम् । क्षेमधूर्त्तिर्महाराज विव्याधोरसि मार्गणैः ॥ १ ॥ वृहत्क्षत्रस्तु तं राजा नवत्या नतपर्व्वणाम् । आजघ्ने त्वरितो राजन् द्रोणा-नीकं विभित्सया ॥ २ ॥ क्षेमधूर्त्तिस्तु संक्रुद्धः कैकयस्य महात्मनः । धनुश्चिच्छेद भल्लेन पीतेन निशितेन ह ॥ ३ ॥ अथैनं छिन्नधन्वानं शरेणानतपर्व्वणा । विव्याध समरे तूर्णं प्रवरं सर्व्वधन्विनाम् ॥ ४ ॥ अथान्यद्धनुरादाय वृहत्क्षत्रो हसन्निव । व्यश्वसूतरथञ्चक्रे क्षेम-धूर्त्तिं महारथम् ॥ ५ ॥ ततोऽपरेण भल्लेन पीतेन निशितेन च । जहार नृपतेः कायात् शिरो ज्वलितकुण्डलम् ॥ ६ । तच्छिन्नं सहसा तस्य शिरः कुञ्चितमूर्द्धजम् । सकिरीटं महीं प्राप्य बभौ

ज्योतिरिवाम्बरात् ॥ ७ ॥ तं निहत्य रणे हृष्टो बृहत्क्षत्रो महारथः । सहसाभ्यपतत्सैन्यं तावकं पार्थकारणात् ॥ ८ ॥ धृष्टकेतुं तथायान्तं द्रोणहेतोः पराक्रमी । वीरधन्वा महेष्वासो वारयामास भारत ॥ ९ ॥ तौ परस्परमासाद्य शरदंष्ट्रौ तरस्विनौ । शरैरनेकसाहस्रैरन्योऽन्यमभिजघ्नतुः ॥ १० ॥ तावुभौ नरशार्दूलौ युयुधाते परस्परम् । महावने तीव्रमदौ वारणाविव यूथपौ ॥ ११ ॥ गिरिगह्वरमासाद्य शार्दूलाविव रोषितौ । युयुधाते महावीर्य्यौ परस्परजिघांसया ॥ १२ ॥ तद्युद्धमासीत्तुमुलं प्रेक्षणीयं विशाम्पते । सिंहचारणसङ्घानां विस्मयाद्भुतदर्शनम् ॥ १३ ॥ वीरधन्वा ततः क्रुद्धो धृष्टकेतोः शरासनम् । द्विधा चिच्छेद भल्लेन प्रहसन्निव भारत ॥ १४ ॥ तदुत्सृज्य धनुश्छिन्नं चेदिराजो महारथः । शक्तिं जग्राह विपुलां हेमदण्डामयस्मयीम् ॥ १५ ॥ तान्तु शक्तिं महावीर्य्यां दोर्भ्यामायम्य भारत । चिक्षेप सहसा यत्तो वीरधन्वरथम्प्रति ॥ १६ ॥ तया तु वीरघातिन्या शक्त्या त्वभिहतो भृशम् । निर्भिन्नहृदयस्तूर्णं निपपात रथान्महीम् ॥ १७ ॥ तस्मिन् विनिहते वीरे त्रैगर्त्तानां महारथे । वलन्तेऽभज्यत विभो पाण्डवेयैः समन्ततः ॥ १८ ॥ सहदेवे ततः षष्टिं सायकान् दुर्मुखोऽक्षिपत् । ननाद च महानादं तर्ज्जयन् पाण्डवं रणे ॥ १९ ॥ माद्रेयस्तु ततः क्रुद्धो दुर्मुखञ्च शितैः शरैः । भ्राता भ्रातरमायान्तं विव्याध प्रहसन्निव ॥ २० ॥ तं रणे रभसं दृष्ट्वा सहदेवो महाबलम् । दुर्मुखं नवभिर्वाणैस्ताड़यामास भारत ॥ २१ ॥ दुर्मुखस्य तु भल्लेन छित्त्वा केतुं महाबलः । जघान चतुरो वाहांश्चतुर्भिर्निशितैः शरैः ॥ २२ ॥ अथापरेण भल्लेन पीतेन निशितेन ह । चिच्छेद सारथेः कायाच्छिरो ज्वलितकुण्डलम् ॥ २३ ॥ क्षुरप्रेण च तीक्ष्णेन कौरवस्य महद्धनुः । सहदेवो रणे छित्त्वा तञ्च विव्याध पञ्चभिः ॥२४॥

हताश्वन्तु रथं त्यक्ता दुर्मुखो विमनास्तदा। आरुरोह रथं राजन्निरमित्रस्य भारत ॥ २५ ॥ सहदेवस्ततः क्रुद्धो निरमित्रं महाहवे। जघान पृतनामध्ये भल्लेन परवीरहा ॥ २६ ॥ स पपात रथोपस्थान्निरमित्रो जनेश्वरः। त्रिगर्त्तराजस्य सुतो व्यथयंस्तव वाहिनीम् ॥ २७ ॥ तन्तु हत्वा महाबाहुः सहदेवो व्यरोचत। यथा दाशरथीरामः खरं हत्वा महाबलम् ॥ २८ ॥ हाहाकारो महानासीत् त्रिगर्त्तानां जनेश्वर। राजपुत्रं हतं दृष्ट्वा निरमित्रं महारथम् ॥ २९ ॥ नकुलस्ते सुतं राजन् विकर्णं पृथुलोचनम्। मुहूर्त्ताज्जितवान् लोके तदद्भुतमिवाभवत् ॥ ३० ॥ सात्यकिं व्याघ्रदत्तस्तु शरैः सन्नतपर्व्वभिः। चक्रेऽदृश्यं साश्वसूतं सध्वजं पृतनान्तरे ॥ ३१ ॥ तान्निवार्य्य शरान् शूरः शैनेयः कृतहस्तवत्। साश्वसूतध्वजं वाणैर्व्याघ्रदत्तमपातयत् ॥ ३२ ॥ कुमारे निहते तस्मिन् मागधस्य सुते प्रभो। मागधाः सर्वतो यत्ता युयुधानमुपाद्रवन् ॥ ३३ ॥ विसृजन्तः शरांश्चैव तोमरांश्च सहस्रशः। भिन्दिपालांस्तथा प्रासान् मुद्गरान् मुसलानपि ॥ ३४ ॥ अयोधयन्रणे शूराः सात्वतं युद्धदुर्मदम्। तांस्तु सर्वान् स बलवान् सात्यकिर्युद्धदुर्मदः ॥ ३५ ॥ नातिकृच्छ्राद्धसन्नेव विजिग्ये पुरुषर्षभः। मागधान् त्वरितो दृष्ट्वा हतशेषान् समन्ततः ॥ ३६ ॥ बलन्तेऽभज्यत विभो युयुधानशरार्द्दितम्। नाशयित्वा रणे सैन्य त्वदीयं माधवोत्तमः ॥ ३७ ॥ विधुन्वानो धनुःश्रेष्ठं व्यभ्राजत महायशाः। भज्यमानं बलं राजन् सात्वतेन महात्मना ॥ ३८ ॥ नाभ्यवर्त्तत युद्धाय त्रासितं दीर्घवाहुना। ततो द्रोणो भृशं क्रुद्धः सहसोद्वृत्य चक्षुषी। सात्यकिं सत्यकर्म्माणं स्वयमेवाभिदुद्रुवे ॥ ३९ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि सात्यकियुद्धे सप्ताधिकशततोऽध्यायः ॥ १०७ ॥

सञ्जय उवाच। द्रौपदेयान्महेष्वासान् सौमदत्तिर्महायशाः। एकैकं पञ्चभिर्विद्‌ध्वा पुनर्विव्याध सप्तभिः॥ १॥ ते पीड़िता भृशं तेन रौद्रेण सहसा विभो। प्रमूढ़ा नैव विविदुर्मृधे कृत्यं स्म किञ्चन॥ २॥ नाकुलिश्च शतानीकः सौमदत्तिं नरर्षभम्। द्वाभ्यां विद्ध्वानदद्धृष्टः शराभ्यां शत्रुकर्षणः॥ ३॥ तथेतरे रणे यत्तास्त्रिभिस्त्रिभिरजिह्मगैः। विव्यधुः समरे तूर्णं सौमदत्तिममर्षणम्॥ ४॥ स तान् प्रति महाराज चिक्षेप पञ्च सायकान्। एकैकं हृदि चाजघ्ने एकैकेन महायशाः॥ ५॥ ततस्ते भ्रातरः पञ्च शरैर्विद्ध्वा महात्मना। परिवार्य्य रणे वीरं विव्यधुः सायकैर्भृशम्॥ ६॥ आर्ज्जुनिस्तु हयांस्तस्य चतुर्भिर्निशितैः शरैः। प्रेषयामास संक्रुद्ध यमस्य सदनं प्रति॥ ७॥ भैमसेनिर्धनुश्छित्त्वा सौमदत्तेर्महात्मन। ननाद बलवन्नादं विव्याध च शितैः शरैः॥ ८॥ यौधिष्ठिरिर्ध्वजं तस्य छित्त्वा भूमावपातयत्। नाकुलिश्चाथ यन्तारं रथनीड़ादपाहरत्॥ ९॥ साहदेविस्तु तं ज्ञात्वा भ्रातृभिर्विमुखीकृतम्। क्षुरप्रेण शिरोराजन्निचकर्त्त महात्मनः॥ १०॥ तच्छिरोन्यपतद्भूमौ तपनीयविभूषितम्। भ्राजयन्तं रणोद्देशं बालसूर्य्यसमप्रभम्॥ ११॥ सौमदत्तेः शिरो दृष्ट्वा निहतं तन्महात्मनः। वित्रस्तास्तावका राजन् प्रदुद्रुवुरनेकधा॥ १२॥ अलम्बुषस्तु समरे भीमसेनं महाबलम्। योधयामास संक्रुद्धो लक्ष्मणं रावणिर्यथा॥ १३॥ संप्रयुद्धौ रणे दृष्ट्वा तावुभौ नरराक्षसौ। विस्मयः सर्वभूतानां प्रहर्षं समजायत॥ १४॥ आर्ष्यशृङ्गिं ततो भीमो नवभिर्निशितैः शरैः। विव्याध प्रहसन् राजन् राक्षसेन्द्रममर्षणम्॥ १५॥ तद्रक्षः समरे विद्धं कृत्वा नादं भयावहम्। अभ्यद्रवत्ततो भीमं ये च तस्य पदानुगाः॥ १६॥ स भीमं पञ्चभिर्विद्ध्वा शरैः सन्नतपर्वभिः। भैमान् परिजघानाशु रथांस्त्रिंशतमाहवे॥ १७॥

पुनश्चतुःशतान् हत्वा भीमं विव्याध पत्रिणा। सोऽतिविद्धस्तथा भीमो राक्षसेन महाबलः॥ १८॥ निषसाद रथोपस्थे मूर्च्छयाभिपरिप्लुतः। प्रतिलभ्य ततः संज्ञां मारुतिः क्रोधमूर्च्छितः॥ १९॥ विकृष्य कार्मुकं घोरं भारसाधनमुत्तमम्। अलम्बुषं शरैस्तीक्ष्णैरर्दयामास सर्वतः॥ २०॥ स विद्धो बहुभिर्बाणैर्नीलाञ्जनचयोपमः। शुशुभे सर्वतो राजन् प्रफुल्ल इव किंशुकः॥ २१॥ स वध्यमानः समरे भीमचापच्युतैः शरैः। स्मरन् भ्रातृवधञ्चैव पाण्डवेन महात्मना॥ २२॥ घोरं रूपमथो कृत्वा भीमसेनमभाषत। तिष्ठेदानीं रणे पार्थ पश्य मेऽद्य पराक्रमम्॥ २३॥ वको नाम सुदुर्बुद्धे राक्षसप्रवरो बली। परोक्षं मम तद्वृत्तं यद्भ्राता मे हतस्त्वया॥ २४॥ एवमुक्त्वा ततो भीममन्तर्द्धानं गतस्तदा। महता शरवर्षेण भृशं तं समवाकिरत्॥ २५॥ भीमस्तु समरे राजन्नदृश्ये राक्षसे तदा। आकाशं पूरयामास शरैः सन्नतपर्वभिः॥ २६॥ स वध्यमानो भीमेन निमेषाद्रथमास्थितः। जगाम धरणीञ्चैव क्षुद्रः खं सहसागमत्॥ २७॥ उच्चावचानि रूपाणि चकार सुबहूनि च। अनुर्वहत् पुनः स्थूलो नादं मुञ्चन्निवाम्बुदः॥ २८॥ उच्चावचास्तथा वाचो व्याजहार समन्ततः। निपेतुर्गगनाच्चैव शरधाराः सहस्रशः॥ २९॥ शक्तयः कुणपाः प्रासाः शूलपट्टिशतोमराः। शतघ्न्यः परिघाश्चैव भिन्दिपालाः परश्वधाः॥ ३०॥ शिलाः खड्गागुड़ाश्चैव ऋष्टिर्वज्राणि चैव ह। सा राक्षसविसृष्टा तु शस्त्रवृष्टिः सुदारुणा॥ ३१॥ जघान पाण्डुपुत्रस्य सैनिकान् रणमूर्द्धनि। तेन पाण्डवसैन्यानां सूदिता युधि वारणाः॥ ३२॥ हयाश्च बहवो राजन् पत्तयश्च तथा पुनः। रथेभ्यो रथिनः पेतुस्तस्य नुन्नाः स्म सायकैः॥ ३३॥ शोणितोदां रथावर्त्तां हस्तिग्राहसमाकुलाम्। छत्रहंसां कर्द्दमिनीं बाहुपन्नगसङ्कुलाम्॥ ३४॥ नदीं प्रावर्त्तयामास

रचोगणसमाकुलाम्। वहन्तीं बहुधा राजंश्चेदिपाञ्चालसृञ्जयान्॥ ३५॥ तं तथा समरे राजन् विचरन्तमभीतवत्। पाण्डवा भृशसंविग्नाः प्रापश्यंस्तस्य विक्रमम्॥ ३६॥ तावकानान्तु सैन्यानां प्रहर्षः समजायत। वादित्रनिनदश्चोग्रः सुमहान्रोमहर्षणः॥३७॥ तं श्रुत्वा निनदं घोरं तव सैन्यस्य पाण्डवः। नामृष्यत यथा नागस्तलशब्दं समीरितम्॥ ३८॥ ततः क्रोधाभिताम्राचो निर्द्दहन्निव पावकः। सन्दधे त्वाष्ट्रमस्त्रं स स्वयं त्वष्टेव मारुतिः॥ ३९॥ ततः शरसहस्राणि प्रादुरासन् समन्ततः। तैः शरैस्तव सैन्यस्य विद्रवः सुमहानभूत्॥ ४०॥ तदस्त्रं प्रेरितं तेन भीमसेनेन संयुगे। राचसस्य महामायां हत्वा राचसमार्द्दयत्॥ ४१॥ स वध्यमानो बहुधा भीमसेनेन राचसः। सन्त्यज्य समरे भीमं द्रोणानीकमुपाद्रवत्॥ ४२॥ तस्मिंस्तु निर्जिते राजन्राचसेन्द्रे महात्मना। अनादयन् सिंहनादैः पाण्डवाः सर्वतो दिशम्॥ ४३॥ अपूजयन्मारुतिञ्च संहृष्टास्ते महाबलम्। प्रह्लादं समरे जित्वा यथा शक्रं मरुद्गणाः॥ ४४॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि अलम्बुषपराजये अष्टाधिकशतोऽध्यायः॥ १०८॥

---

सञ्जय उवाच। अलम्बुषं तथा युद्धे विचरन्तमभीतवत्। हैड़िम्बः प्रययौ तूर्णं विव्याध निशितैः शरैः॥ १॥ तयोः प्रतिभयं युद्धमासीद्राचससिंहयोः। कुर्वतोर्विविधा मायाः शक्रशम्बरयोरिव॥ २॥ अलम्बुषो भृशं क्रुद्धो घटोत्कचमताड़यत्। तयोर्युद्धं समभवद्रचोग्रामणिमुख्ययोः॥ ३॥ यादृगेव पुरा वृत्तं रामरावणयोः प्रभो। घटोत्कचस्तु विंशत्या नाराचानां स्तनान्तरे॥ ४॥ अलम्बुषमथो विद्ध्वा सिंहवद्व्यनदन्मुहुः। तथै-

बालम्बुषो राजन् हैड़िम्बं युद्धदुर्मदम् ॥ ५ ॥ विद्धा विद्धानदद्भृष्टः पूरयन् खं समन्ततः । तदा तौ भृशसंक्रुद्धौ राक्षसेन्द्रौ महाबलौ ॥ ६ ॥ निर्व्विशेषमयुध्येतां मायाभिरितरेतरम् । मायाशतसृजौ नित्यं मोहयन्तौ परस्परम् ॥ ७ ॥ मायायुद्धेषु कुशलौ मायायुद्धमयुद्ध्यताम् । यां यां घटोत्कचो युद्धे मायां दर्शयते नृप ॥ ८ ॥ तां तामलम्बुषो राजन् माययैव निजघ्निवान् । तं तथा युद्ध्यमानन्तु मायायुद्धविशारदम् ॥ ९ ॥ अलम्बुषं राक्षसेन्द्रं दृष्ट्वाक्रुद्ध्यन्त पाण्डवाः । त एनं भृशसम्विग्नाः सर्व्वतः प्रवरा रथैः ॥ १० ॥ अभ्यद्रवन्त संक्रुद्धा भीमसेनादयो नृप । त एनं कोष्ठकीकृत्य रथवंशेन मारिष ॥ ११ ॥ सर्व्वतो व्यकिरन् वाणैरुल्काभिरिव कुञ्जरम् । स तेषामस्त्रवेगं तं प्रतिहन्यास्त्रमायया ॥ १२ ॥ तस्माद्रथव्रजान्मुक्तो वनदाहादिव द्विपः । स विस्फार्य्य धनुर्घोरमिन्द्राशनिसमस्वनम् ॥ १३ ॥ मारुतिं पञ्चविंशत्या भैमसेनिञ्च पञ्चभिः । युधिष्ठिरं त्रिभिर्व्विद्ध्वा सहदेवञ्च सप्तभिः ॥१४॥ नकुलञ्च त्रिसप्तत्या द्रौपदेयांश्च मारिष । पञ्चभिः पञ्चभिर्व्विद्ध्वा घोरं नादं ननाद ह ॥ १५ ॥ तं भीमसेनो नवभिः सहदेवस्तु पञ्चभिः । युधिष्ठिरः शतेनैव राक्षसं प्रत्यविध्यत ॥ १६ ॥ नकुलस्तु चतुःषष्ट्या द्रौपदेयास्त्रिभिस्त्रिभिः । हैड़िम्बो राक्षसं विद्ध्वा युद्धे पञ्चशता शरैः ॥ १७ ॥ पुनर्व्विव्याध सप्तत्या ननाद च महाबलः । तस्य नादेन महता कम्पितेयं वसुन्धरा ॥ १८ ॥ सपर्व्वतवना राजन् सपादपजलाशया । सोऽतिविद्धो महेष्वासैः सर्व्वतस्तैर्म्महारथैः ॥ १९ ॥ प्रतिविव्याध तान् सर्व्वान् पञ्चभिः पञ्चभिः शरैः । तं क्रुद्धं राक्षसं युद्धे प्रतिक्रुद्धस्तु राक्षसः ॥२०॥ हैड़िम्बो भरतश्रेष्ठ शरैर्व्विव्याध सप्तभिः । सोऽतिविद्धो बलवता राक्षसेन्द्रो महाबलः ॥ २१ ॥ व्यसृजत् सायकांस्तूर्णं रुक्मपुङ्खान् शिलाशितान् । ते शरा नतपर्व्वाणो विविशूराक्षसं तदा ॥ २२ ॥

हृषिताः पन्नगा यद्वद्गिरिशृङ्गं महाबला। ततस्ते पाण्डवा राजन् समन्तान्निशिताङ्कुरान् ॥ २३ ॥ प्रेषयामासुरुद्विग्ना हैडिम्बश्च घटोत्कचः। स बध्यमानः समरे पाण्डवैर्जितकाशिभिः ॥ २४ ॥ मर्त्यधर्ममनुप्राप्तः कर्त्तव्यं नान्वपद्यत। ततः समरशौण्डो वै भैमसेनिर्महाबलः ॥ २५ ॥ समीक्ष्य तदवस्थं तं वधायास्य मनो दधे। वेगञ्चक्रे महान्तञ्च राक्षसेन्द्ररथम्प्रति ॥ २६ ॥ दग्धाद्रिकूटशृङ्गाभं भिन्नाञ्जनचयोपमम्। रथाद्रथमभिद्रुत्य क्रुद्धो हैड़म्बिराक्षिपत् ॥ २७ ॥ उद्ववर्ह रथाच्चापि पन्नगं गरुड़ो यथा समुत्क्षिप्य च बाहुभ्यामाविध्य च पुनः पुनः ॥ २८ ॥ निष्पिपेष क्षितौ क्षिप्रं पूर्णं कुम्भमिवाश्मनि। बललाघवसम्पन्नः सम्पन्नो विक्रमेण च ॥ २९ ॥ भैमसेनीरणे क्रुद्धः सर्वसैन्यान्यभीषयत्। सविस्फुटितसर्वाङ्गश्चूर्णितास्थिर्विभीषणः ॥३०॥ घटोत्कचेन वीरेण हतः शालकटङ्कटः। ततः सुमनसः पार्था हते तस्मिन्निशाचरे ॥ ३१ ॥ चुक्रुशुः सिंहनादांश्च वासांस्यादुधुवुश्च ह। तावकाश्च हतं दृष्ट्वा राक्षसेन्द्रं महाबलम् ॥ ३२ ॥ अलम्वुषं तथा शूरा विशीर्णमिव पर्वतम्। हाहाकारमकार्षुश्च सैन्यानि भरतर्षभ ॥ ३३ ॥ जनाश्च तद्ददृशिरे रक्षः कौतूहलान्विताः। यदृच्छया निपतितं भूमावङ्गारकं यथा ॥ ३४ ॥ घटोत्कचस्तु तद्धत्वा रक्षोवलवताम्वरः। मुमोच वलवन्नादं बलं हत्वेव वासवः ॥ ३५ ॥ स पूज्यमानः पितृभिः सवान्धवैर्घटोत्कचः कर्मणि दुष्करे कृते। रिपुं निहत्याभिननन्द वै तदा ह्यलम्वुषं पक्कमलम्वुषं यथा ॥ ३६ ॥ ततो निनादः सुमहान् समुत्थितः सशङ्खनानाविधवाणघोषवान्। निशम्य तं प्रत्यनदंस्तु कौरवास्ततोध्वनिर्भुवनमथास्पृशद्भृशम् ॥ ३७ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि अलम्वुषवधे
नवाधिकशततोऽध्यायः ॥ १०९ ॥

धृतराष्ट्र उवाच । भारद्वाजं कथं युद्धे युयुधानो न्यवारयत् सञ्जयाचक्ष्व तत्त्वेन परं कौतूहलं हि मे ॥ १ ॥

सञ्जय उवाच । शृणु राजन् महाप्राज्ञ सङ्ग्रामं लोमहर्षणम् । द्रोणस्य पाण्डवैः सार्द्धं युयुधानपुरोगमैः ॥ २ ॥ वध्यमानं बलं दृष्ट्वा युयुधानेन मारिष । अभ्यद्रवत् स्वयं द्रोणः सात्यकिं सत्यविक्रमम् ॥ ३ ॥ तमापतन्तं सहसा भारद्वाजं महारथम् । सात्यकिः पञ्चविंशत्या क्षुद्रकाणां समार्पयत् ॥ ४ ॥ द्रोणोऽपि युधि विक्रान्तो युयुधानं समाहितः । अविध्यत् पञ्चभिस्तूर्णं हेमपुङ्खैः शरैः शितैः ॥ ५ ॥ ते वर्म्म भित्त्वा सुदृढं द्विषत्पिशितभोजनाः । अभ्ययुर्धरणीं राजन् श्वसन्त इव पन्नगाः ॥ ६ ॥ दीर्घबाहुरभिक्रुद्धस्तोत्त्रार्द्दित इव द्विपः । द्रोणं पञ्चाशताविध्यन्नाराचैरग्निसन्निभैः ॥ ७ ॥ भारद्वाजो रणे विद्धो युयुधानेन सत्वरम् । सात्यकिं बहुभिर्बाणैर्यतमानमविध्यत ॥८॥ ततः क्रुद्धो महेष्वासो भूय एव महाबलः । सात्वतं पीड़यामास शरेणानतपर्व्वणा ॥ ९ ॥ स बध्यमानः समरे भारद्वाजेन सात्यकिः । नान्वपद्यत कर्त्तव्यं किञ्चिदेव विशाम्पते ॥ १० ॥ विषण्णवदनश्चापि युयुधानोऽभवन्नृप । भारद्वाजं रणे दृष्ट्वा विसृजन्तं शितान् शरान् ॥ ११ ॥ तन्तु सम्प्रेक्ष्य ते पुत्राः सैनिकाश्च विशाम्पते । प्रहृष्टमनसो भूत्वा सिंहवद्व्यनदन्मुहुः ॥ १२ ॥ तं श्रुत्वा निनदं घोरं पीड्यमानञ्च माधवम् । युधिष्ठिरोऽब्रवीद्राजा सर्व्वसैन्यानि भारत ॥ १३ ॥ एष वृष्णिवरो वीरः सात्यकिः सत्यविक्रमः । ग्रस्यते युधि वीरेण भानुमानिव राहुणा ॥ १४ ॥ अभिद्रवत गच्छध्वं सात्यकिर्यत्र युध्यते । धृष्टद्युम्नञ्च पाञ्चाल्यमिदमाह जनाधिपः ॥ १५ ॥ अभिद्रवद्रुतं द्रोणं किन्नु तिष्ठसि पार्षत । न पश्यसि भयं द्रोणाद्घोरं नः समुपस्थितम् ॥ १६ ॥ असौ द्रोणो महेष्वासो युयुधानेन संयुगे । क्रीड़ते सूत्रबद्धेन

पक्षिणा बालको यथा॥ १७॥ तत्रैव सर्वे गच्छन्तु भीमसेन-
पुरोगमाः। त्वयैव सहिताः सर्वे युयुधानरथं प्रति॥ १८॥
पृष्ठतोऽनुगमिष्यामि त्वामहं सहसैनिकः। सात्यकिं मोचयस्वाद्य
यमदंष्ट्रान्तरं गतम्॥ १९॥ एवमुक्त्वा ततो राजा सर्वसैन्येन
भारत। अभ्यद्रवद्रणे द्रोणं युयुधानस्य कारणात्॥ २०॥
तत्रारावो महानासीत् द्रोणमेकं युयुत्सताम्। पाण्डवानाञ्च
भद्रन्ते सृञ्जयानाञ्च सर्वशः॥ २१॥ ते समेत्य नरव्याघ्र भार-
द्वाजं महारथम्। अभ्यवर्षञ्छरैस्तीक्ष्णैः कङ्कवर्हिणवाजितैः॥२२॥
स्मयन्नेव तु तान् वीरान् द्रोणः प्रत्यग्रहीत् स्वयम्। अतिथी-
नागतान् यद्वत् सलिलेनासनेन च॥ २३॥ तर्पितास्ते शरैस्तस्य
भारद्वाजस्य धन्विनः। आतिथेयं गृहं प्राप्य नृपतेऽतिथयो यथा
॥ २४॥ भारद्वाजञ्च ते सर्वे न शेकुः पतिवीक्षितुम्। मध्यन्दिन-
मनुप्राप्तं सहस्रांशुमिव प्रभो॥ २५॥ तांस्तु सर्वान् महेष्वासान्
द्रोणः शस्त्रभृतांवरः। अतापयच्छरव्रातैर्गभस्तिभिरिवांशुमान्
॥ २६॥ वध्यमाना महाराज पाण्डवाः सृञ्जयास्तथा। त्रातारं
नाध्यगच्छन्त पङ्कमग्ना इव द्विपाः॥ २७॥ द्रोणस्य च व्यदृश्यन्त
विसर्पन्तो महाशराः। गभस्तय इवार्कस्य प्रतपन्तः समन्ततः
॥ २८॥ तस्मिन् द्रोणेन निहताः पाञ्चालाः पञ्चविंशतिः। महा-
रथाः समाख्याता धृष्टद्युम्नस्य सम्मताः॥ २९॥ पाण्डूनां सर्व-
सैन्येषु पाञ्चालानां तथैव च। द्रोणं स्म ददृशुः शूरं विनिघ्नन्तं
वरान् वरान्॥ ३०॥ कैकेयानां शतं हत्वा विद्राव्य च सम-
न्ततः। द्रोणस्तस्थौ महाराज व्यादितास्य इवान्तकः॥ ३१॥
पाञ्चालान् सृञ्जयान्मत्स्यान् कैकयांश्च नराधिप। द्रोणोऽजय-
न्महाबाहुः शतशोऽथ सहस्रशः॥ ३२॥ तेषां समभवच्छब्दो
विद्धानां द्रोणसायकैः। वनौकसामिवारण्ये व्याप्तानां धूमकेतुना
॥ ३३॥ तत्र देवाः सगन्धर्वाः पितरश्चाब्रुवन्नृप। एते द्रवन्ति

पाञ्चालाः पाण्डवाश्च ससैनिकाः ॥ ३४ ॥ तं तथा समरे द्रोणं निघ्नन्तं सोमकान् रणे। न चाप्यभिययुः केचिदपरे नैव विव्यधुः ॥ ३५ ॥ वर्त्तमाने तथा रौद्रे तस्मिन् वीरवरक्षये। अशृणोत् सहसा पार्थः पाञ्चजन्यस्य निस्वनम् ॥ ३६ ॥ पूरितो वासुदेवेन शङ्खराट् स्वनते भृशम्। युद्ध्यमानेषु वीरेषु सैन्धवस्याभिरक्षिषु ॥ ३७ ॥ नदत्सु धार्त्तराष्ट्रेषु विजयस्य रथम्प्रति। गाण्डीवस्य च निर्घोषे विप्रनष्टे समन्ततः ॥ ३८ ॥ कश्मलाभिहतो राजा चिन्तयामास पाण्डवः। न नूनं स्वस्ति पार्थाय यथा नदति शङ्खराट् ॥ ३९ ॥ कौरवाश्च यथा हृष्टा विनदन्ति मुहुर्मुहुः। एवं सञ्चिन्तयित्वा तु व्याकुलेनान्तरात्मना ॥ ४० ॥ अजातशत्रुः कौन्तेयः सात्वतं प्रत्यभाषत। वाष्पगद्गदया वाचा मुह्यमानो मुहुर्मुहुः। कृत्यस्यानन्तरापेक्षी शैनेयं शिनिपुङ्गवम् ॥ ४१ ॥

युधिष्ठिर उवाच। यः स धर्मः पुरा दृष्टः सद्भिः शैनेय शाश्वतः। साम्पराये सुहृत् कृत्ये तस्य कालोऽयमागतः ॥४२॥ सर्व्वेष्वपि च योधेषु चिन्तयन् शिनिपुङ्गव। त्वत्तः सुहृत्तमं कञ्चिन्नाभिजानामि सात्यके ॥ ४३ ॥ यो हि प्रीतमना नित्यं यश्च नित्यमनुव्रतः। स कार्य्यः साम्पराये तु नियोज्य इति मे मतिः ॥ ४४ ॥ यथा च केशवो नित्यं पाण्डवानां परायणम्। तथा त्वमपि वार्ष्णेय कृष्णातुल्यपराक्रमः ॥ ४५ ॥ सोऽहं भारं समाधास्ये त्वयि तं वोढुमर्हसि। अभिप्रायञ्च मे नित्यं न वृथा कर्त्तुमर्हसि ॥ ४६ ॥ स त्वं भ्रातुर्वयस्यस्य गुरोरपि च संयुगे। कुरु कृच्छ्रे सहायार्थमर्ज्जुनस्य नरर्षभ ॥ ४७ ॥ त्वं हि सत्यव्रतः शूरो मित्राणामभयङ्करः। लोके विख्यायसे वीर कर्म्मभिः सत्यवागिति ॥ ४८ ॥ यो हि शैनेय मित्रार्थे युध्यमानस्त्यजेत्तनुम्। पृथिवीञ्च द्विजातिभ्यो यो दद्यात् स समो भवेत् ॥ ४९ ॥ श्रुताश्च बहवोऽस्माभी राजानो ये दिवं गताः। दत्त्वेमां पृथिवीं कृत्स्नां ब्राह्म-

शेभ्यो यथाविधि ॥ ५० ॥ एवं त्वामपि धर्मात्मन् प्रयाचेऽहं कृताञ्जलिः । पृथिवीदानतुल्यं स्यादधिकम्वा फलं विभो ॥ ५१ ॥ एक एव सदा कृष्णो मित्राणामभयङ्करः । रणे सन्त्यजति प्राणान् द्वितीयस्त्वञ्च सात्यके ॥ ५२ ॥ विक्रान्तस्य च वीरस्य युद्धे प्रार्थयतो यशः । शूर एव सहायः स्यान्नेतरः प्राकृतो जनः ॥ ५३ ॥ ईदृशे तु परामर्शे वर्त्तमानस्य माधव । त्वदन्यो हि रणे गोप्ता विजयस्य न विद्यते ॥ ५४ ॥ श्लाघन्नेव हि कर्माणि शतशस्तव पाण्डवः । मम सञ्जनयन् हर्षं पुनः पुनरकीर्त्तयत् ॥ ५५ ॥ लघुहस्तश्चित्रयोधी तथा लघुपराक्रमः । प्राज्ञः सर्वास्त्रविच्छूरो मुह्यते न च संयुगे ॥ ५६ ॥ महास्कन्धो महोरस्को महाबाहुर्महाहनुः । महाबलो महावीर्य्यः स महात्मा महारथः ॥५७॥ शिष्यो मम सखा चैव प्रियोऽस्याहं प्रियश्च मे । युयुधानः सहायो मे प्रमथिष्यति कौरवान् ॥ ५८ ॥ अस्मदर्थञ्च राजेन्द्र सन्नह्येद्यदि केशवः । रामो वाप्यनिरुद्धो वा प्रद्युम्नो वा महारथः ॥ ५९ ॥ गदो वा सारणो वापि साम्बो वा सहवृष्णिभिः । सहायार्थं महाराज सङ्ग्रामोत्तममूर्द्धनि ॥ ६० ॥ तथाप्यहं नरव्याघ्रं शैनेयं सत्यविक्रमम् । साहाय्ये विनियोक्ष्यामि नास्ति योऽन्यो हि तत्समः ॥ ६१ ॥ इति द्वैतवने तात मामुवाच धनञ्जयः । परोक्षे त्वद्गुणांस्तथ्यान् कथयन्नार्य्यसंसदि ॥ ६२ ॥ तस्य त्वमेवं सङ्कल्पं न वृथा कर्त्तुमर्हसि । धनञ्जयस्य वार्ष्णेय मम भीमस्य चोभयोः ॥ ६३ ॥ यच्चापि तीर्थानि चरन्नगच्छं द्वारकां प्रति । तत्राहमपि ते भक्तिमर्ज्जुनं प्रति दृष्टवान् ॥ ६४ ॥ न तत् सौहृदमन्येषु मया शैनेय लक्षितम् । यथा त्वमस्मान् भजसे वर्त्तमानानुपप्लवे ॥ ६५ ॥ सोऽभिजात्या च भक्त्या च सख्यस्याचार्य्यकस्य च । सौहृदस्य च वीर्य्यस्य कुलीनत्वस्य माधव ॥ ६६ ॥ सत्यस्य च महाबाहो अनुकम्पार्थमेव च अनुरूपं

महेष्वास कर्म त्वं कर्त्तुमर्हसि ॥ ६७ ॥ सुयोधनो हि सहसा गतो द्रोणेन दंशितः। पूर्वमेवानुयातास्ते कौरवाणां महारथाः ॥ ६८ ॥ सुमहान्निनदश्चैव श्रूयते विजयं प्रति। स शैनेय जवेनाशु गन्तुमर्हसि मानद ॥ ६९ ॥ भीमसेनो वयञ्चैव सम्पन्नाः सहसैनिकाः। द्रोणमावारयिष्यामो यदि त्वां प्रति यास्यति ॥ ७० ॥ पश्य शैनेय सैन्यानि द्रवमाणानि संयुगे। महांस्तश्च रणे शब्दं दीर्य्यमाणाञ्च भारतीम् ॥ ७१ ॥ महामारुतवेगेन समुद्रमिव पर्वसु। धार्त्तराष्ट्रबलं तात विक्षिप्तं सव्यसाचिना ॥ ७२ रथैर्विपरिधावद्भिर्मनुष्यैश्च हयैश्च ह। सैन्यं रजः समुद्भूतमेतत् सम्परिवर्त्तते ॥ ७३ ॥ सम्बृतः सिन्धुसौवीरैर्नखरप्रासयोधिभिः। अत्यन्तोपचितैः शूरैः फाल्गुनः परवीरहा ॥ ७४ ॥ नैतद्बलमसम्वार्य्य शक्यो जेतुं जयद्रथः। एते हि सैन्धवस्यार्थे सर्वे सन्त्यक्तजीविताः ॥ ७५ ॥ शरशक्तिध्वजवरं हयनागसमाकुलम्। पश्यैतद्धार्त्तराष्ट्राणामनीकं सुदुरासदम् ॥ ७६ ॥ शृणु दुन्दुभिःनिर्घोषं शङ्खशब्दांश्च पुष्कलान्। सिंहनादरवांश्चैव रथनेमिस्वनांस्तथा ॥ ७७ ॥ नागानां शृणु शब्दञ्च पत्तीनाञ्च सहस्रशः। सादिनां द्रवताञ्चैव शृणु कम्पयतां महीम् ॥ ७८ ॥ पुरस्तात् सैन्धवानीकं द्रोणानीकञ्च पृष्ठतः। बहुत्वाद्धि नरव्याघ्र देवेन्द्रमपि पीड़येत् ॥ ७९ ॥ अपर्य्यन्ते बले मग्नो जह्यादपि च जीवितम्। तस्मिंश्च निहते युद्धे कथं जीवेत मादृशः ॥ ८० ॥ सर्वथाहमनुप्राप्तः सुकृच्छ्रं त्वयि जीवति। श्यामो युवा गुड़ाकेशो दर्शनीयश्च पाण्डवः ॥ ८१ ॥ लघ्वस्त्रश्चित्रयोधी च प्रविष्टस्तात भारतीम्। सूर्य्योदये महाबाहुर्दिवसश्चातिवर्त्तते ॥ ८२ ॥ तन्न जानामि वार्ष्णेय यदि जीवति वा नवा। कुरूणाञ्चापि तत्सैन्यं सागरप्रतिमं महत् ॥ ८३ ॥ एक एव च वीभत्सुः प्रविष्टस्तात भारतीम्। अविषह्यां महाबाहुः सुरैरपि महाहवे ॥ ८४ ॥

न हि मे वर्त्तते बुद्धिरद्य युद्धे कथञ्चन। द्रोणोऽपि रमसो युद्धे मम पीड़यते वलम्॥ ८५॥ प्रत्यक्षन्ते महाबाहो यथासौ चरति द्विजः। युगपच्च समेतानां कार्य्याणां त्वं विचक्षणः॥ ८६॥ महार्थं लघुसंयुक्तं कर्त्तुमर्हसि मानद। तस्य मे सर्वकार्य्येषु कार्य्यमेतन्मतं महत्॥ ८७॥ अर्ज्जुनस्य परित्राणं कर्त्तव्यमिति संयुगे। नाहं शोचामि दाशार्हं गोप्तारं जगतः पतिम्॥ ८८॥ स हि शक्तो रणे तात त्रीन् लोकानपि सङ्गतान्। विजेतुं पुरुषव्याघ्रः सत्यमेतद्ब्रवीमि ते॥ ८९॥ किं पुनर्धार्त्तराष्ट्रस्य बलमेतत् सुदुर्बलम्। अर्जुनस्त्वेष वार्ष्णेय पीड़ितो बहुभिर्युधि॥ ९०॥ प्रजह्यात् समरे प्राणान् तस्माद्विन्दामि कश्मलम्। तस्य त्वं पदवीं गच्छ गच्छेयुस्त्वादृशा यथा॥ ९१॥ तादृशस्येदृशे काले मादृशेनाभिनोदितः। रणे वृष्णिप्रवीराणां द्वावेवातिरथौ स्मृतौ॥ ९२॥ प्रद्युम्नश्च महाबाहुस्त्वञ्च सात्वत विश्रुतः। अस्त्रे नारायणसमः सङ्कर्षणसमो वले॥ ९३॥ वीरतायां नरव्याघ्र धनञ्जयसमो ह्यसि। भीष्मद्रोणावतिक्रम्य सर्वयुद्धविशारदम्॥ ९४॥ त्वामेव पुरुषव्याघ्रं लोके सन्तः प्रचक्षते। नाशक्यं विद्यते लोके सात्यकेरिति माधव॥ ९५॥ तत्त्वां यदभिवक्ष्यामि तत् कुरुष्व महाबल। सम्भावनां हि लोकस्य मम पार्थस्य चोभयोः॥ ९६॥ नान्यथा त्वं महाबाहो सम्प्रकर्त्तुमिहार्हसि। परित्यज्य प्रियान् प्राणान्रणे विचर वीरवत्॥ ९७॥ न हि शैनेय दाशार्हो रणे रक्षति जीवितम्। अयुद्धमनवस्थानं सङ्ग्रामे च पलायनम्॥ ९८॥ भीरूणामसतां मार्गो नैष दाशार्हसेवितः। तवार्जुनो गुरुस्तात धर्मात्मा शिनिपुङ्गव॥ ९९॥ वासुदेवो गुरुश्चापि तव पार्थस्य धीमतः। कारणद्वयमेतद्धि जानंस्त्वामहमब्रुवम्॥ १००॥ मावमंस्था वचो मह्यं गुरुस्तव गुरोर्ह्यहम्। वासुदेवमतञ्चैव मम चैवार्जुनस्य च॥ १०१॥

सत्यमेतन्मयोक्तन्ते याहि यत्र धनञ्जयः। एतद्वचनमाज्ञाय मम सत्यपराक्रम ॥ १०२ ॥ प्रविश्यैतद्बलं तात धार्त्तराष्ट्रस्य दुर्मतेः। प्रविश्य च यथान्यायं सङ्गम्य च महारथैः। यथार्हमात्मनः कर्म रणे सात्वत दर्शय ॥ १०३ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि युधिष्ठिरवाक्ये दशाधिकशततोऽध्यायः ॥ ११० ॥

---

सञ्जय उवाच। प्रीतियुक्तञ्च हृद्यञ्च मधुराक्षरमेव च। कालयुक्तञ्च चित्रञ्च न्याय्यं यच्चापि भाषितम् ॥ १ ॥ धर्म्मराजस्य तद्वाक्यं निशम्य शिनिपुङ्गवः। सात्यकिर्भरतश्रेष्ठ प्रत्युवाच युधिष्ठिरम् ॥ २ ॥ श्रुतं ते गदतो वाक्यं सर्व्वमेतन्मयाच्युत। न्याययुक्तञ्च चित्रञ्च फाल्गुनार्थे यशस्करम् ॥ ३ ॥ एवंविधे तथा काले मादृशं प्रेक्ष्य सम्मतम्। वक्तुमर्हसि राजेन्द्र यथा पार्थं तथैव माम् ॥ ४ ॥ न मे धनञ्जयस्यार्थे प्राणा रक्ष्याः कथञ्चन। त्वत्प्रयुक्तः पुनरहं किन्न कुर्य्यां महाहवे ॥ ५ ॥ लोकत्रयं योधयेयं सदेवासुरमानुषम्। त्वत्प्रयुक्तो नरेन्द्रेह किमुतैतत् सुदुर्ब्बलम् ॥ ६ ॥ सुयोधनबलन्त्वद्य योधयिष्ये समन्ततः। विजेष्ये च रणे राजन् सत्यमेतद्ब्रवीमि ते ॥ ७ ॥ कुशल्यहं कुशलिनं समासाद्य धनञ्जयम्। हते जयद्रथे राजन् पुनरेष्यामि तेऽन्तिकम् ॥ ८॥ अवश्यन्तु मया सर्व्वं विज्ञाप्यस्त्वं नराधिप। वासुदेवस्य यद्वाक्यं फाल्गुनस्य च धीमतः ॥ ९ ॥ दृढ़न्त्वभिपरीतोऽहमर्ज्जुनेन पुनः पुनः। मध्ये सर्व्वस्य सैन्यस्य वासुदेवस्य शृण्वतः ॥ १० ॥ अद्य माधव राजानमप्रमत्तोऽनुपालय। आर्य्यां युद्धे मतिं कृत्वायावद्धन्मि जयद्रथम् ॥ ११ ॥ त्वयि चाहं महाबाहो प्रद्युम्ने वा महारथे। नृपं निक्षिप्य गच्छेयं निरपेक्षो जय-

द्रथम्॥ १२॥ जानीषि हि रणे द्रोणं कुरुषु श्रेष्ठसम्मतम्। प्रतिज्ञातं हि तेनेदं पश्यमानेन वै प्रभो॥ १३॥ ग्रहणे धर्मराजस्य भारद्वाजोऽपि गृध्यति। शक्तश्चापि रणे द्रोणो निग्रहीतुं युधिष्ठिरम्॥ १४॥ एवं त्वयि समाधाय धर्मराजं नरोत्तमम्। अहमद्य गमिष्यामि सैन्धवस्य वधाय हि॥ १५॥ जयद्रथञ्च हत्वाहं द्रुतमेष्यामि माधव। धर्मराजं न चेत् द्रोणो निगृह्णीयाद्रणे बलात्॥ १६॥ निगृहीते नरश्रेष्ठे भारद्वाजेन माधव। सैन्धवस्य बधो न स्यान्ममाप्रीतिस्तथा भवेत्॥ १७॥ एवं गते नरश्रेष्ठे पाण्डवे सत्यवादिनि। अस्माकं गमनं व्यक्तं वनं प्रति भवेत् पुनः॥ १८॥ सोऽयं मम जेया व्यक्तं व्यर्थ एव भविष्यति। यदि द्रोणो रणे क्रुद्धो निगृह्णीयाद्युधिष्ठिरम्॥१९॥ त्वमद्य महाबाहो प्रियार्थं मम माधव। जयार्थञ्च यशोऽर्थञ्च रक्ष राजानमाहवे॥ २०॥ स भवान्मयि निक्षेपो निक्षिप्तः सव्यसाचिना। भारद्वाजाद्भयं नित्यं मन्यमानेन वै प्रभो॥ २१॥ तस्यापि च महाबाहो नित्यं पश्यामि संयुगे। नान्यं हि प्रतियोद्धारं रौक्मिणेयादृते प्रभो॥ २२॥ माञ्चापि मन्यते युद्धे भारद्वाजस्य धीमतः। सोऽहं सम्भावनाञ्चैतामाचार्य्यबचनन्तु तत्॥ २३॥ पृष्ठतो नोत्सहे कर्त्तुं त्वां वा त्यक्तुं महीपते। आचार्य्यो लघुहस्तत्वादभेद्यकवचावृतः॥ २४॥ उपलभ्य रणे क्रीड़ेद्यथा शकुनिना शिशुः। यदि कार्ष्णिर्धनुष्पाणिरिह स्यान्मकरध्वजः॥ २५॥ तस्मै त्वां विसृजेयं वै स त्वां रक्षेद्यथार्जुनः। कुरु त्वमात्मनो गुप्तिं कस्ते गोप्ता गते मयि॥ २६॥ यः प्रतीयाद्रणे द्रोणं यावद्गच्छामि पाण्डवम्। मा च ते भयमद्यास्तु राजन्नर्जुनभश्चत्रम्॥ २७॥ न स जातु महाबाहुर्भारमुद्यम्य सीदति। ये च सौवीरका योधास्तथा सैन्धवपौरवाः॥ २८॥ उदिच्या दाक्षिणात्याश्च ये चान्येऽपि महारथाः। ये च कर्णमुखा राजन्

रथोदाराः प्रकीर्त्तिताः ॥ २९ ॥ एतेऽर्ज्जुनस्य क्रुद्धस्य कलां नार्हन्ति षोड़शीम्। उद्युक्ता पृथिवीं सर्वा ससुरासुरमानुषा ॥ ३० ॥ सराक्षसगणा राजन् सकिन्नरमहोरगा। जङ्गमाः स्थावराः सर्वे नालं पार्थस्य संयुगे ॥ ३१ ॥ एवं ज्ञात्वा महाराज व्येतु ते भीर्धनञ्जये। यत्र वीरौ महेष्वासौ कृष्णौ सत्यपराक्रमौ ॥ ३२ ॥ न तत्र कर्मणो व्यापत् कथञ्चिदपि विद्यते। दैवं कृतास्त्रतां योगममर्षमपि चाहवे ॥ ३३ ॥ कृतघ्नतां दयाञ्चैव भ्रातुस्त्वमनुचिन्तय। मयि च व्यपयाते वै गच्छमानेऽर्जुनं प्रति ॥ ३४ ॥ द्रोणे चित्रास्त्रतां सङ्ख्ये राजंस्त्वमनुचिन्तय। आचार्य्यो हि भृशं राजन्निग्रहे तव गृध्यति ॥ ३५ ॥ प्रतिज्ञामात्मनो रक्षन् सत्यां कर्त्तुञ्च भारत। कुरुष्वाद्यात्मनो गुप्तिं कस्ते गोप्ता गते मयि ॥ ३६ ॥ यस्याहं प्रत्ययात् पार्थ गच्छेयं फाल्गुनं प्रति। न ह्यहं त्वां महाराज अनिक्षिप्य महाहवे ॥ ३७ ॥ क्वचिद्यास्यामि कौरव्य सत्यमेतद्ब्रवीमि ते। एतद्विचार्य्य बहुधा बुद्ध्या बुद्धिमतां वर। दृष्ट्वा श्रेयः परं बुद्ध्या ततो राजन् प्रशाधि माम् ॥३८॥

युधिष्ठिर उवाच। एवमेतन्महाबाहो यथा वदसि माधव। न तु मे शुध्यते भावः श्वेताश्वं प्रतिमारिष ॥ ३९ ॥ करिष्ये परमं यत्नमात्मनो रक्षणे ह्यहम्। गच्छ त्वं समनुज्ञातो यत्र यातो धनञ्जयः ॥ ४० ॥ आत्मसंरक्षणं सङ्ख्ये गमनञ्चार्जुनस्य ति। विचार्य्यैतत् स्वयं बुद्ध्या गमनं तत्र रोचये ॥ ४१ ॥ स त्वमातिष्ठ यानाय यत्र यातो धनञ्जयः। ममापि रक्षणं भीमः करिष्यति महाबलः ॥ ४२ ॥ पार्षतश्च ससोदर्य्यः पार्थिवाश्च महाबलाः। द्रौपदेयाश्च मां तात रक्षिष्यन्ति न संशयः ॥ ४३ ॥ कैकया भ्रातरः पञ्च राक्षसश्च घटोत्कचः। विराटो द्रुपदश्चैव शिखण्डी च महारथः ॥ ४४ ॥ धृष्टकेतुश्च बलवान् कुन्तिभोजश्च मारिष। नकुलः सहदेवश्च पाञ्चालाः सृञ्जयास्तथा ॥ ४५ ॥

एते समाहितास्तात रक्षिष्यन्ति न संशयः। न द्रोणः सह सैन्येन कृतवर्मा च संयुगे ॥ ४६ ॥ समासादयितुं शक्तो न च मां धर्षयिष्यति। धृष्टद्युम्नश्च समरे द्रोणं क्रुद्धं परन्तपः ॥ ४७ ॥ वारयिष्यति विक्रम्य वेलेव मकरालयम्। यत्र स्थास्यति सङ्ग्रामे पार्षतः परवीरहा ॥ ४८ ॥ द्रोणो न सैन्यं बलवत् क्रामेत्तत्र कथञ्चन। एष द्रोणविनाशाय समुत्पन्नो हुताशनात् ॥ ४९ ॥ कवची शरी खड्गी धन्वी च वरभूषणः। विश्रब्धो गच्छ शैनेय माकार्षीर्मयि सम्भ्रमम्। धृष्टद्युम्नो रणे क्रुद्धं द्रोणमावारयिष्यति ॥ ५० ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरवाक्ये एकादशाधिकशततोऽध्यायः ॥ १११ ॥

---

सञ्जय उवाच। धर्मराजस्य तद्वाक्यं निशम्य शिनिपुङ्गवः। स पार्थाद्भयमाशंसन् परित्यागान्महीपतेः ॥ १ ॥ अपवादं ह्यात्मनश्च लोकात् पश्यन् विशेषतः। ते मां भीतमिति ब्रूयुरायान्तं फाल्गुनम्प्रति ॥ २ ॥ निश्चित्य बहुधैवं स सात्यकियुद्धदुर्मदः। धर्मराजमिदं वाक्यमब्रवीत् पुरुषर्षभः ॥ ३ ॥ कृताञ्चेतन्मन्यसे रक्षां स्वस्ति तेऽस्तु विशाम्पते। अनुयास्यामि बीभत्सुं करिष्ये वचनं तव ॥ ४ ॥ न हि मे पाण्डवात् कश्चित् त्रिषु लोकेषु विद्यते। यो मे प्रियतरो राजन् सत्यमेतद्ब्रवीमि ते ॥ ५ ॥ तस्याहं पदवीं यास्ये सन्देशात्तव मानद। त्वत्कृते न च मे किञ्चिदकर्त्तव्यं कथञ्चन ॥ ६ ॥ यथा हि मे गुरोर्वाक्यं विशिष्टं द्विपदाम्वर। तथा तवापि वचनं विशिष्टतरमेव मे ॥ ७ ॥ प्रिये हि तव वर्त्तेते भ्रातरौ कृष्णपाण्डवौ। तयोः प्रिये स्थितञ्चैव विद्धि मां राजपुङ्गव ॥ ८ ॥ तवाज्ञां शिरसा गृह्य पाण्डवार्थमहं

प्रभो। भित्त्वेदं दुर्भिदं सैन्यं प्रयास्ये नरपुङ्गव ॥ ९ ॥ द्रोणा-
नीकं विशाम्येष क्रुद्धो झष इवार्णवम्। तत्र यास्यामि यत्रासौ
राजन् राजा जयद्रथः ॥ १० ॥ यत्र सेनां समाश्रित्य भात-
स्तिष्ठति पाण्डवात्। गुप्तो रथवरश्रेष्ठैर्द्रौणिकर्णकृपादिभि ॥११॥
इतस्त्रियोजनं मन्ये तमध्वानं विशाम्पते। यत्र तिष्ठति पार्थोऽसौ
जयद्रथवधोद्यतः ॥ १२ ॥ त्रियोजनगतस्यापि तस्य यास्याम्यहं
पदम्। आसैन्धववधाद्राजन् सुदृढ़ेनान्तरात्मना ॥ १३ ॥ अना-
दिष्टस्तु गुरुणा को न युद्ध्येत मानवः। आदिष्टस्तु यथा राजन्
को न युध्येत मादृशः ॥ १४ ॥ अभिजानामि तं देशं यत्र यास्या-
म्यहं प्रभो। हलशक्तिगदाप्रासचर्मखड्गर्ष्टितोमरम् ॥ १५ ॥
इष्वस्त्रवरसम्बाधं क्षोभयिष्ये बलार्णवम्। यदेतत् कुञ्जरानीकं
सहस्रमनुपश्यसि ॥ १६ ॥ कुलमञ्जनकं नाम यत्रैते वीर्य्य-
शालिनः। आस्थिता बहुभिर्म्लेच्छैर्युद्धशौण्डैः प्रहारिभिः ॥१७॥
नागा मेघनिभा राजन् क्षरन्त इव तोयदाः। नैते जातु निवर्त्त-
रन् प्रेषिता हस्तिसादिभिः ॥ १८ ॥ अन्यत्र हि वधादेषां नास्ति
राजन् पराजयः। अथ यान्रथिनो राजन् सहस्रमनुपश्यसि ॥१९॥
एते रुक्मरथा नाम राजपुत्रा महारथाः। रथेष्वस्त्रेषु निपुणा
नागेषु च विशाम्पते ॥ २० ॥ धनुर्वेदे गताः पारं मुष्टियुद्धे च
कोविदाः। गदायुद्धविशेषज्ञा नियुद्धकुशलास्तथा ॥ २१ ॥ खड्ग-
प्रहरणे युक्ताः सम्पाते चासिचर्मणोः। शूराश्च कृतविद्याश्च
स्पर्द्धन्ते च परस्परम् ॥ २२ ॥ नित्यं हि समरे राजन् विजिगी-
षन्ति मानवान्। कर्णेन विहिता राजन् दुःशासनमनुब्रताः
॥ २३ ॥ एतांस्तु वासुदेवोऽपि रथोदारान् प्रशंसति। सततं
प्रियकामाश्च कर्णस्यैते वशे स्थिता ॥ २४ ॥ तस्यैव वचनाद्राजन्
निवृत्ताः श्वेतवाहनात्। तेन क्लान्ता न च श्रान्ता दृढ़ावरण-
कार्मुकाः ॥ २५ ॥ मदर्थे धिष्ठिता नूनं धार्त्तराष्ट्रस्य शासनात्।

एतान् प्रमथ्य सङ्ग्रामे प्रियार्थं तव कौरव ॥ २६ ॥ प्रयास्यामि ततः पश्चात् पदवीं सव्यसाचिनः । यांस्त्वेतानपरान्राजन् नागान् सम्प्रयतानिमान् ॥ ३७ ॥ प्रेक्षसे वर्मसंच्छन्नान् किरातैः समधिष्ठितान् । किरातराजो यान् प्रादात् द्विरदान् सव्यसाचिनः ॥ २८ ॥ स्वलङ्कृतांस्तथा प्रेष्यान् इच्छन् जीवितमात्मनः । आसन्नेते पुरा राजंस्तव कर्मकराद्दृढम् ॥ २९ ॥ त्वामेवाद्य युयुत्सन्ते पश्य कालस्य पर्य्ययम् । एषामेते महामात्राः किराता युद्धदुर्मदाः ॥ ३० ॥ हस्तिशिक्षाविदश्चैव सर्वे चैवाग्नियोनयः । एते विनिर्जिताः सङ्ख्ये सङ्ग्रामे सव्यसाचिना ॥ ३१ ॥ मदर्थमद्य संयत्ता दुर्य्योधनवशानुगाः । एतान् हत्वा शरैराजन् किरातान् युद्धदुर्मदान् ॥ ३२ ॥ सैन्धवस्य वधे यत्तमनुयास्यामि पाण्डवम् । ये त्वेते सुमहानागा अञ्जनस्य कुलोद्भवाः ॥ ३३ ॥ कर्कशाश्च विनीताश्च प्रभिन्नकरटामुखाः । जाम्बूनदमयैः सर्वैर्वर्मभिः सुविभूषिताः ॥ ३४ ॥ लब्धलक्षा रणे राजन् ऐरावतसमा युधि । उत्तरात् पर्वतादेते तीक्ष्णैर्दस्युभिराश्रिताः ॥ ३५ ॥ कर्कशैः प्रवरैर्योधैः कार्ष्णायसतनुच्छदैः । सन्ति गोयोनयश्चात्र सन्ति वानरयोनयः ॥ ३६ ॥ अनेकयोनयश्चान्ये तथा मानुषयोनयः । अनीकं समवेतानां धूमवर्णमुदीर्य्यते ॥ ३७ ॥ म्लेच्छानां पापकर्तॄणां हिमदुर्गनिवासिनाम् । एतद्दुर्य्योधनो लब्ध्वा समग्रं राजमण्डलम् ॥ ३८ ॥ कृपञ्च सौमदत्तिञ्च द्रोणञ्च रथिनाम्वरम् । सिन्धुराजं तथा कर्णमवमन्यत पाण्डवान् ॥ ३९ ॥ कृतार्थमथ चात्मानं मन्यते कालचोदितः । ते तु सर्वेऽद्य सम्प्राप्ता मम नाराचगोचरम् ॥ ४० ॥ न विमोक्ष्यन्ति कौन्तेय यद्यपि स्युर्मनोजवाः । तेन सम्भाविता नित्यं परवीर्य्योपजीविना ॥ ४१ ॥ विनाशमुपयास्यन्ति मच्छरौघप्रपीड़िताः । ये त्वेते रथिनो राजन् दृश्यन्ते काञ्चनध्वजाः ॥ ४२ ॥ एते दुर्वारयो नाम काम्बोजा यदि

ते श्रुताः । शूराश्च कृतविद्याश्च धनुर्वेदे च निष्ठिताः ॥ ४३ ॥
संहताश्च भृशं ह्येते अन्योऽन्यस्य हितैषिणः । अक्षौहिण्यश्च
संख्या धार्त्तराष्ट्रस्य भारत ॥ ४४ ॥ यत्ता मदर्थे तिष्ठन्ति कुरु-
वीराभिरक्षिताः । अप्रमत्ता महाराज मामेव प्रत्युपस्थिताः ॥४५॥
तानहं प्रमथिष्यामि तृणानीव हुताशनः । तस्मात् सर्वानुपासङ्गान्
सर्वोपकरणानि च ॥ ४६ ॥ रथे कुर्वन्तु मे राजन् यथावद्ब्रह्म-
कल्पकाः । अस्मिंस्तु किल सम्मर्द्दे ग्राह्यं विविधमायुधम् ॥ ४७ ॥
यथोपदिष्टमाचार्य्यैः कार्य्यः पञ्चगुणो रथः । काम्बोजैर्हि समे-
ष्यामि तीक्ष्णैराशीविषोपमैः ॥ ४८ ॥ नानाशस्त्रसमावापैर्विविधा-
युधयोधिभिः । किरातैश्च समेष्यामि विषकल्पैः प्रहारिभिः ॥४९॥
लालितैः सततं राज्ञा दुर्य्योधनहितैषिभिः । शकैश्चापि समे-
ष्यामि शक्रतुल्यपराक्रमैः ॥ ५० ॥ अग्निकल्पैर्दुराधर्षैः प्रदीप्तैरिव
पावकैः । तथान्यैर्विविधैर्योधैः कालकल्पैर्दुरासदैः ॥ ५१ ॥
समेष्यामि रणे राजन् बहुभिर्युद्धदुर्मदैः । तस्माद्वै वाजिनो मुख्या
विश्रुताः शुभलक्षणाः । उपावृत्ताश्च पीताश्च पुनर्युज्यन्तु मे
रथे ॥ ५२ ॥

सञ्जय उवाच । तस्य सर्वानुपासङ्गान् सर्वोपकरणानि च ।
रथे चास्थापयद्राजा शस्त्राणि विविधानि च ॥ ५३ ॥ ततस्तान्
सर्वतो युक्तान् सदश्वांश्चतुरो जनाः । रसवत् पाययामासुः पानं
मदसमीरणम् ॥ ५४ ॥ पीतोपवृत्तान् स्नातांश्च जग्धाग्नान् सम-
लङ्कृतान् । विनीतशल्यांस्तुरगांश्चतुरो हेममालिनः ॥ ५५ ॥
तान्युक्तान्रुक्मवर्णाभान् विनीतान् शीघ्रगामिनः । संहृष्टमनो-
ऽव्यग्रान् विधिवत् कल्पितान्रथे ॥ ५६ ॥ महाध्वजेन सिंहेन हेम-
केशरमालिना । वृतेन कौतुकैर्हैमैर्मणिविद्रुमचित्रितैः ॥ ५७ ॥
पाण्डुराभ्रप्रकाशाभिः पताकाभिरलङ्कृते । हेमदण्डोच्छ्रितच्छत्रे
बहुशस्त्रपरिच्छदे ॥ ५८ ॥ योजयामास विधिवद्धेमाण्डविभू-

पितान्। दारुकस्यानुजो भ्राता सूतस्तस्य प्रियः सखा ॥ ५९ ॥ न्यवेदयद्रथं युक्तं वासवस्येव मातलिः। ततः स्नातः शुचिर्भूत्वा कृतकौतुकमङ्गलः॥ ६० ॥ स्नातकानां सहस्रस्य स्वर्णनिष्कानदापयत्। आशीर्वादैः परिष्वक्तः सात्यकिः श्रीमतां वरः॥ ६१ ॥ ततः समधुपर्कार्हः पीत्वा कैलातकं मधु। लोहिताक्षो बभौ तत्र मदविह्वललोचनः॥ ६२ ॥ आलभ्य वीरकांस्यञ्च हर्षेण महतान्वितः। द्विगुणीकृततेजा हि प्रज्वलन्निव पावकः॥ ६३ ॥ उत्सङ्गे धनुरादाय सशरं रथिनाम्वरः। कृतस्वस्त्ययनो विप्रैः कवची समलङ्कृतः॥ ६४ ॥ लाजैर्गन्धैस्तथा माल्यैः कन्याभिश्चाभिनन्दितः। युधिष्ठिरस्य चरणावभिवाद्य कृताञ्जलिः॥ ६५ ॥ तेन मूर्द्धन्युपाघ्रात आरुरोह महारथम्। ततस्ते वाजिनो हृष्टाः सुपुष्टा वातरंहसः॥ ६६ ॥ अजय्या जैत्रमूहुस्तं विकुर्वाणाः स्म सैन्धवाः। तथैव भीमसेनोऽपि धर्मराजेन पूजितः॥ ६७ ॥ प्रायात् सात्यकिना सार्द्धमभिवाद्य युधिष्ठिरम्। तौ दृष्ट्वा प्रविविक्षन्तौ तव सेनामरिन्दमौ॥ ६८ ॥ सपन्नास्तावकाः सर्वे तस्थुर्द्रोणपुरोगमाः। सन्नद्धमनुगच्छन्तं दृष्ट्वा भीमं ससात्यकिम्॥ ६९॥ अभिनन्द्याब्रवीद्वीरस्तदा हर्षकरं वचः। अथ हर्षपरीताङ्गः सात्यकिर्भीममब्रवीत्॥ ७० ॥ त्वं भीम रक्ष राजानमेतत्कार्य्यमतं हि ते। अहं भित्त्वा प्रवेक्ष्यामि कालपक्वमिदं बलम्॥ ७१ ॥ आयत्याञ्च तदात्वे च श्रेयो राज्ञोऽभिरक्षणम्। जानीषे मम वीर्य्यं त्वं तव चाहमरिन्दम॥ ७२ ॥ तस्माद्भीम निवर्त्तस्व मम चेदिच्छसि प्रियम्। तथोक्तः सात्यकिं प्राह व्रज त्वं कार्य्यसिद्धये ॥ ७३ ॥ अहं राज्ञः करिष्यामि रक्षां पुरुषसत्तम। एवमुक्तः प्रत्युवाच भीमसेनं स माधवः॥ ७४ ॥ गच्छ गच्छ द्रुतं पार्थ ध्रुवो हि विजयो मम। यन्मे गुणानुरक्तश्च त्वमद्य वशमास्थितः ॥ ७५ ॥ निमित्तानि च धन्यानि यथा भीम वदन्ति माम्।

निहते सैन्धवे पापे पाण्डवेन महात्मना ॥ ७६ ॥ परिष्वजिष्ये राजानं धर्मात्मानं युधिष्ठिरम्। एतावदुक्त्वा भीमन्तु विसृज्य च महायशाः ॥ ७७ ॥ सम्प्रेक्ष्य तावकं सैन्यं व्याघ्रो मृगगणानिव। तं दृष्ट्वा प्रतिवीचन्तं सैन्यं तव जनाधिप ॥ ७८ ॥ भूय एवाभवन्मूढ़ं सुभृशं चाप्यकम्पत। ततः प्रयातः सहसा तव सैन्यं स सात्यकिः। दिदृक्षुरर्जुनं राजन् धर्मराजस्य शासनात् ॥ ७९ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे द्वादशाधिकशतोऽध्यायः ॥ ११२ ॥

---

सञ्जय उवाच। प्रयाते तत्र सैन्यन्तु युयुधाने युयुत्सया। धर्मराजो महाराज सेनानीकेन सम्वृतः ॥ १ ॥ प्रायाद्द्रोणरथं प्रेप्सुर्युयुधानस्य पृष्ठत। ततः पाञ्चालराजस्य पुत्रः समरदुर्मदः ॥ २ ॥ प्राक्रोशत् पाण्डवानीके वसुदानश्च पार्थिवः। आगच्छत प्रहरत द्रुतं विपरिधावत ॥ ३ ॥ यथा सुखेन गच्छेत सात्यकिर्युद्धदुर्मदः। महारथा हि बहवो यतिष्यन्त्यस्य निर्ज्जये ॥ ४ ॥ इति ब्रुवन्तो वेगेन निपेतुस्ते महारथाः। वयम्प्रतिजिगीषन्तस्तत्र तान् समभिद्रुताः ॥ ५ ॥ ततः शब्दो महानासीत् युयुधानरथम्प्रति। आकीर्य्यमाणा धावन्तो तव पुत्रस्य वाहिनी ॥ ६ ॥ सात्वतेन महाराज शतधाभिव्यशीर्य्यत। तस्या विदीर्य्यमाणायां शिनेः पुत्रो महारथः ॥ ७ ॥ सप्तवीरान् महेष्वासान् अग्रानीकेष्वपोथयत्। अथान्यानपि राजेन्द्र नानाजनपदेश्वरान् ॥ ८ ॥ शरैरनलसङ्काशैर्निन्ये वीरान् यमक्षयम्। शतमेकेन विव्याध शतेनैकञ्च पत्रिणाम् ॥ ९ ॥ द्विपारोहान् द्विपांश्चैव हयारोहान् हयांस्तथा। रथिनः साश्वसूतांश्च जघानेशः पशूनिव ॥ १० ॥ तं तथा द्रुतकर्माणं शरसम्पातवर्षिणम्। न केचनाभ्य-

धावन् वै सात्यकिं तव सैनिकाः ॥ ११ ॥ ते भीता मृद्यमानाश्च प्रमृष्टा दीर्घबाहुना । आयोधनं जहुर्वीरा दृष्ट्वा तमतिमानिनम् ॥ १२ ॥ तमेकं बहुधा पश्यन्मोहितास्तस्य तेजसा । रथैर्विमथितैश्चैव भग्ननीड़ैश्च मारिष ॥ १३ ॥ चक्रैर्विमथितैश्छत्रैर्ध्वजैश्च विनिपातितैः । अनुकर्षैः पताकाभिः शिरस्त्राणैः सकाञ्चनैः ॥१४॥ बाहुभिश्चन्दनादिग्धैः साङ्गदैश्च विशाम्पते । हस्तिहस्तोपमैश्चापि भुजङ्गाभोगसन्निभैः ॥ १५ ॥ ऊरुभिः पृथिवी छन्ना मनुजानां नराधिप । शशाङ्कसन्निभैश्चैव वदनैश्चारुकुण्डलैः ॥ १६ ॥ पतितै-र्ऋषभाक्षाणां सा बभावतिमेदिनी । गजैश्च बहुधाच्छिन्नैः शयानैः पर्वतोपमैः ॥ १७ ॥ रराजातिभृशं भूमिर्विकीर्णैरिव पर्वतैः । तपनीयमयैर्योक्त्रैर्मुक्ताजालविभूषितैः ॥ १८ ॥ उरश्छदैर्विचित्रैश्च व्यशोभन्त तुरङ्गमाः । गतसत्त्वा महीम्प्राप्य प्रमृष्टा दीर्घबाहुना ॥ १९ ॥ नानाविधानि सैन्यानि तव हत्वा तु सात्वतः । प्रविष्ट-स्तावकं सैन्यं द्रावयित्वा चमूं भृशम ॥ २० ॥ ततस्तेनैव मार्गेण येन यातो धनञ्जयः । इयेष सात्यकिर्गन्तुं ततो द्रोणेन वारितः ॥ २१ ॥ भारद्वाजं समासाद्य युयुधानश्च सात्यकिः । न न्यव-र्त्तत संक्रुद्धो वेलामिव जलाशयः ॥ २२ ॥ निवार्य्य तु रणे द्रोणो युयुधानं महारथम् । विव्याध निशितैर्बाणैः पञ्चभिर्मर्म-भेदिभिः ॥ २३ ॥ सात्यकिस्तु रणे द्रोणं राजन् विव्याध सप्तभिः । हेमपुङ्खैः शिलाधौतैः कङ्कबर्हिणवाजितैः ॥ २४ ॥ तं षड्भिः सायकैर्द्रोणः साश्वयन्तारमार्द्दयत् । सतन्न ममर्षे द्रोणं युयुधानो महारथः ॥ २५ ॥ सिंहनादं ततः कृत्वा द्रोणं विव्याध सात्यकिः । दशभिः सायकैश्चान्यैः षड्भिरष्टाभिरेव च ॥ २६ ॥ युयुधान पुनर्द्रोणं विव्याध दशभिः शरैः । एकेन सारथिञ्चास्य चतुर्भिश्चतुरो हयान् ॥ २७ ॥ ध्वजमेकेन बाणेन विव्याध युधि मारिष । तं द्रोणः साश्वयन्तारं सरथध्वज-

माशुगैः ॥ २८ ॥ त्वरन् प्राच्छादयद्बाणैः शलभानामिव व्रजैः । तथैव युयुधानोऽपि द्रोणं बहुभिराशुगैः ॥ २९ ॥ आच्छादयत सम्भ्रान्तस्ततो द्रोण उवाच ह । तवाचार्य्यो रणं हित्वा गतः कापुरुषो यथा ॥ ३० ॥ युध्यमानञ्च मां हित्वा प्रदक्षिणमवर्त्तत । त्वं हि मे युध्यतो नाद्य जीवन् यास्यसि माधव । यदि मां त्वं रणे हित्वा न यास्याचार्य्यवद्द्रुतम् ॥ ३१ ॥

सात्यकिरुवाच । धनञ्जयस्य पदवीं धर्मराजस्य शासनात् । गच्छामि स्वस्ति ते ब्रह्मन्न मे कालात्ययो भवेत् ॥ ३२ ॥ आचार्य्यानुगतो मार्गः शिष्यैरन्वास्यते सदा । तस्मादेव व्रजाम्याशु यथा मे स गुरुर्गतः ॥ ३३ ॥

सञ्जय उवाच । एतावदुक्त्वा शैनेय आचार्य्यं परिवर्ज्जयन् । प्रयातः सहसा राजन् सारथिञ्चेदमब्रवीत् ॥ ३४ ॥ द्रोणः करिष्यते यत्नं सर्व्वथा मम वारणे । यत्तो याहि रणे सूत शृणु चेदं वचः परम् ॥ ३५ ॥ एतदालोक्यते सैन्यमावन्त्यानां महाप्रभम् । अस्यानन्तरतस्त्वेतत् दाक्षिणात्यं महद्बलम् ॥ ३६ ॥ तदनन्तरमेतच्च वाह्लिकानां महद्बलम् । वाह्लिकाभ्याशतोयुक्तं कर्णस्य च महद्बलम् ॥ ३७ ॥ अन्योऽन्येन हि सैन्यानि भिन्नान्येतानि सारथे । अन्योऽन्यं समुपाश्रित्य विरहन्ति रणाजिरे ॥ ३८ ॥ एतदन्तरमासाद्य चोदयाश्वान् प्रहृष्टवत् । मध्यमं जवमास्थाय वह मामत्र सारथे ॥ ३९ ॥ वाह्लिका यत्र दृश्यन्ते नानाप्रहरणोद्यताः । दाक्षिणात्याश्च बहवः सूतपुत्रपुरोगमाः ॥ ४० ॥ हस्त्यश्वरथसम्बाधं यच्चानीकं विलोक्यते । नानादेशसमुत्थैश्च पदातिभिरधिष्ठितम् ॥४१॥ एतावदुक्त्वा यन्तारं ब्राह्मणं परिवर्ज्जयन् । मध्यतो याहि यच्चोग्रं कर्णस्य च महद्बलम् ॥४२॥ तं द्रोणोऽनुययौ क्रुद्धो विकिरन् विशिखान् बहून् । युयुधानं महाभागं गच्छन्तमनिवर्त्तिनम् ॥ ४३ ॥ कर्णस्य सैन्यं सुमह-

दभिहत्य शितैः शरैः। प्राविशद्भारतीं सेनामपर्य्यन्तां स सात्यकिः ॥ ४४ ॥ प्रविष्टे युयुधाने तु सैनिकेषु द्रुतेषु च। अमर्षी कृतवर्मा तु सात्यकिं पर्य्यवारयत् ॥ ४५ ॥ तमापतन्तं विशिखैः षड्भिराहत्य सात्यकिः। चतुर्भिश्चतुरोऽस्याश्वानाजघानाशु वीर्य्यवान् ॥ ४६ ॥ ततः पुनः षोड़शभिर्नतपर्वभिराशुगैः। सात्यकिः कृतवर्माणं प्रत्यविध्यत् स्तनान्तरे ॥ ४७ ॥ सताड्यमानो विशिखैर्बहुभिस्तिग्मतेजनैः। सात्वतेन महाराज कृतवर्मा न चक्षमे ॥४८॥ स वत्सदन्तं सन्धाय जिह्मगानिलसन्निभम्। आकृष्य राजन्नाकर्णाद्विव्याधोरसि सात्यकिम् ॥ ४९ ॥ स तस्य देहावरणं भित्त्वा देहञ्च सायकैः। अपुङ्खपत्रः पृथिवीं विवेश रुधिरोक्षितः ॥५०॥ अथास्य बहुभिर्बाणैरच्छिनत् परमास्त्रवित्। स मार्गणगणं राजन् कृतवर्मा शरासनम् ॥ ५१ ॥ विव्याध च रणे राजन् सात्यकिं सत्यविक्रमम्। दशभिर्विशिखैस्तीक्ष्णैरभिक्रुद्धः स्तनान्तरे ॥ ५२ ॥ ततः प्रशीर्णे धनुषि शक्त्या शक्तिमतां वरः। जघान दक्षिणं बाहुं सात्यकिः कृतवर्मणः ॥ ५३ ॥ ततोऽन्यत् सुदृढ़ञ्चापं पूर्णमायम्य सात्यकिः। व्यसृजद्विशिखांस्तूर्णं शतशोऽथ सहस्रशः ॥ ५४ ॥ सरथं कृतवर्माणं समन्तात् पर्य्यवारयत्। छादयित्वा रणे राजन् हार्द्दिक्यं स तु सात्यकिः ॥ ५५ ॥ अथास्य भल्लेन शिरः सारथेः समकृन्तत। स पपात हतः सूतो हार्द्दिक्यस्य महारथात् ॥ ५६ ॥ ततस्ते यन्तृरहिता प्राद्रवंस्तुरगा भृशम्। अथ भोजस्तु सम्भ्रान्तो निगृह्य तुरगान् स्वयम् ॥ ५७ ॥ तस्थौ वीरो धनुष्पाणिस्तत्सैन्यान्यभ्यपूजयन्। समुहूर्त्तमिवाश्वस्य सदश्वान् समचोदयत् ॥ ५८ ॥ व्यपेतभीरमित्राणामावहत् सुमहद्भयम्। सात्यकिश्चाभ्यगात्तस्मात् स तु भीममुपाद्रवत् ॥ ५९ ॥ युयुधानोऽपि राजेन्द्र भोजानीकाद्विनिःसृतः। प्रययौ त्वरितस्तूर्णं काम्बोजानां महाचमूम् ॥ ६० ॥ स तत्र बहुभिः शूरैः सन्निरुद्धो

महारथैः। न चचाल तदा राजन् सात्यकिः सत्यविक्रमः॥ ६१॥ सन्धाय च चमूं द्रोणो भोजे भारं निवेश्य च। अभ्यधावद्रणे यत्तो युयुधानं युयुत्सया॥ ६२॥ तथा तमनुधावन्तं युयुधानस्य पृष्ठतः। न्यवारयन्त संहृष्टाः पाण्डुसैन्ये बृहत्तमाः॥ ६३॥ समासाद्य च हार्द्दिक्यं रथानां प्रवरं रथम्। पाञ्चाला विगतोत्साहा भीमसेनपुरोगमाः॥ ६४॥ विक्रम्य वारिता राजन् वीरेण कृतवर्म्मणा। यतमानांश्च तान् सर्व्वानीषद्विगतचेतसः॥६५॥ अभितस्तान् शरौघेन क्लान्तवाहानकारयत्। निगृहीतास्तु भोजेन भोजानीकेप्सवो रणे। अतिष्ठन्नार्य्यवद्वीराः प्रार्थयन्तो महद्यशः॥ ६६॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि सात्यकिप्रवेशे त्रयोदशाधिकशततोऽध्यायः॥ ११३॥

---

धृतराष्ट्र उवाच। एवं बहुविधं सैन्यं एवं प्रविचितं वरम्। व्यूढ़मेवं यथान्यायं एवं बहु च सञ्जय॥ १॥ नित्यं पूजितमस्माभिरभिकामञ्च नः सदा। प्रौढ़मत्यद्भुताकारं पुरस्ताद्दृढ़विक्रमम्॥ २॥ नातिवृद्धमबालञ्च नाकृशं नापि पीवरम्। लघुवृत्तायतप्रायं सारगात्रमनामयम्॥ ३॥ आत्तसन्नाहसंछन्नं बहुशस्त्रपरिच्छदम्। शस्त्रग्रहणविद्यासु बह्वीषु परिनिष्ठितम्॥ ४॥ आरोहे पर्य्यवस्कन्धे सरणे सान्तरप्लुते। सम्यक्प्रहरणे याने व्यपयाने च कोविदम्॥ ५॥ नागेष्वश्वेषु बहुशो रथेषु च परीक्षितम्। परीक्ष्य च यथान्यायं वेतनेनोपपादितम्॥ ६॥ न गोष्ठ्या नोपचारेण न सम्बन्धनिमित्ततः। नानाहूतं नाप्यभृतं मम सैन्यं बभूव ह॥ ७॥ कुलीनार्य्यजनोपेतं तुष्टपुष्टमनुद्धतम्। कृतमानोपचारञ्च यशस्वि च मनस्वि च॥ ८॥ सचिवैश्चापरै-

मुख्यैर्बहुभिः पुण्यकर्मभिः। लोकपालोपमैस्तात पालितं नर-
सत्तमैः ॥ ९ ॥ बहुभिः पार्थिवैर्गुप्तमस्मत्प्रियचिकीर्षुभिः। अस्मा-
नभिसृतैः कामात् सबलैः सपदानुगैः ॥ १० ॥ पयोदधिमिवा-
पूर्णमापगाभिः समन्ततः। अपक्षैः पक्षिसङ्काशै रथैरश्वैश्च संवृतम्
॥ ११ ॥ प्रभिन्नकरटैश्चैव द्विरदैरावृतं महत्। यदहन्यत मे
सैन्यं किमन्यद्भागधेयतः॥ १२ ॥ योधाक्षय्यजलं भीमं वाह-
नोर्मितरङ्गिणम्। क्षेपण्यसिगदाशक्तिशरप्रासझषाकुलम् ॥ १३ ॥
ध्वजभूषणसम्बाधं रत्नोत्पलसुसञ्चितम्। वाहनैरभिधावद्भिर्वायु-
वेगविकम्पितम् ॥ १४ ॥ द्रोणगम्भीरपातालं कृतवर्ममहाह्रदम्।
जलसन्धमहाग्राहं कर्णचन्द्रोदयोद्धतम् ॥ १५ ॥ गते सैन्यार्णवं
भित्त्वा तरसा पाण्डवर्षभे। सञ्जयैकरथेनैव युयुधाने च मामकम्
॥ १६ ॥ तत्र शेषं न पश्यामि प्रविष्टे सव्यसाचिनि। सात्वते च
रथोदारे मम सैन्यस्य सञ्जय ॥ १७ ॥ तौ तत्र समतिक्रान्तौ
दृष्ट्वातीव तरस्विनौ। सिन्धुराजन्तु संप्रेक्ष्य गाण्डीवस्येषुगोचरे
॥ १८ ॥ किन्नु वा कुरवः कृत्यं विदधुः कालचोदिताः। दारु-
णैकायने काले कथं वा प्रतिपेदिरे ॥ १९ ॥ ग्रस्तान् हि
कौरवान्मन्ये मृत्युना तात सङ्गतान्। विक्रमोऽपि रणे तेषां न
तथा दृश्यते हि वै ॥ २० ॥ अक्षतौ संयुगे तत्र प्रविष्टौ कृष्ण-
पाण्डवौ। न च वारयिता कश्चित्तयोरस्तीह सञ्जय ॥ २१ ॥
भृताश्च बहवो योधाः परीक्ष्यैव महारथाः। वेतनेन यथायोगं
प्रियवादेन चापरे ॥ २२ ॥ असत्कारभृतस्तात मम सैन्ये न
विद्यते। कर्मणा ह्यनुरूपेण लभ्यते भक्तवेतनम् ॥ २३ ॥ न
चायोधोऽभवत् कश्चिन्मम सैन्ये तु सञ्जय। अल्पदानभृतस्तात
तथा चाभृतको नरः ॥ २४ ॥ पूजितो हि यथाशक्त्या दान-
मानासनैर्मया। तथा पुत्रैश्च मे तात ज्ञातिभिश्च सबान्धवैः ॥ २५ ॥
ते च प्राप्यैव सङ्ग्रामे निर्जिताः सव्यसाचिना। शैनेयेन परामृष्टाः

किमन्यद्भागधेयतः ॥ २६ ॥ रक्ष्यते यस्य सङ्ग्रामे ये च सञ्जय रक्षिणः। एकः साधारणः पन्था रक्ष्यस्य सह रक्षिभिः ॥ २७ ॥ अर्जुनं समरे दृष्ट्वा सैन्धवस्याग्रतः स्थितम्। पुत्रो मम भृशं मूढ़ः किं कार्य्यं प्रत्यपद्यत ॥ २८ ॥ सात्यकिञ्च रणे दृष्ट्वा प्रविशन्तमभीतवत्। किन्नु दुर्य्योधनः कृत्यं प्राप्तकालममन्यत ॥ २९ ॥ सर्वशस्त्रातिगौ सेनां प्रविष्टौ रथसत्तमौ। दृष्ट्वा कां वै मतिं युद्धे प्रत्यपद्यन्त मामकाः ॥ ३० ॥ दृष्ट्वा कृष्णन्तु दाशार्हमर्जुनार्थे व्यवस्थितम्। शिनीनामृषभञ्चैव मन्ये शोचन्ति पुत्रकाः ॥ ३१ ॥ दृष्ट्वा सेनां व्यतिक्रान्तां सात्वतेनार्ज्जुनेन च। पलायमानांश्च कुरून् मन्ये शोचन्ति पुत्रकाः ॥ ३२ ॥ विद्रुतान् रथिनो दृष्ट्वा निरुत्साहान् द्विषज्जये। पलायनकृतोत्साहान् मन्ये शोचन्ति पुत्रकाः ॥ ३३ ॥ शून्यान् कृतान्रथोपस्थान् सात्वतेनार्ज्जुनेन च। हतांश्च योधान् संदृश्य मन्ये शोचन्ति पुत्रकाः ॥ ३४ ॥ अश्वनागरथान् दृष्ट्वा तत्र वीरान् सहस्रशः। धावमानान्रणे व्यग्रान्मन्ये शोचन्ति पुत्रकाः ॥ ३५ ॥ महानागान् विद्रवतो दृष्ट्वार्ज्जुनशराहतान्। पतितान् पश्यतश्चान्यान्मन्ये शोचन्ति पुत्रकाः ॥३६॥ विहीनांश्च कृतानश्वान् विरथांश्च कृतान्नरान्। तत्र सात्यकिपार्थाभ्यां मन्ये शोचन्ति पुत्रकाः ॥ ३७ ॥ हयौघान्निहतान् दृष्ट्वा द्रवमाणांस्ततस्ततः। रणे माधवपार्थाभ्यां मन्ये शोचन्ति पुत्रकाः ॥ ३८ ॥ पत्तिसङ्घान्रणे दृष्ट्वा धावमानांश्च सर्वशः। निराशा विजये सर्वे मन्ये शोचन्ति पुत्रकाः ॥ ३९ ॥ द्रोणस्य समतिक्रान्तावनीकमपराजितौ। क्षणेन दृष्ट्वा तौ वीरौ मन्ये शोचन्ति पुत्रकाः ॥ ४० ॥ संमूढ़ोऽस्मि भृशं तात श्रुत्वा कृष्णधनञ्जयौ। प्रविष्टौ मामकं सैन्यं सात्वतेन सहाच्युतौ ॥ ४१ ॥ तस्मिन् प्रविष्टे पृतनां शिनीनां प्रवरे रथे। भोजानीकं व्यतिक्रान्ते किमकुर्वत कौरवाः ॥ ४२ ॥ तथा द्रोणेन समरे निगृहीतेषु पाण्डुषु।

कथं युद्धमभूत्तत्र तन्ममाचक्ष्व सञ्जय॥ ४३॥ द्रोणो हि बलवान् श्रेष्ठः कृतास्त्रो युद्धदुर्मदः। पाञ्चालास्तं महेष्वासं प्रत्यविध्यत् कथं रणे॥ ४४॥ बद्धवैरास्ततो द्रोणे धनञ्जयजयैषिणः। भारद्वाजसुतस्तेषु दृढ़वैरो महारथः॥ ४५॥ अर्जुनश्चापि यच्चक्रे सिन्धुराजवधं प्रति। तन्मे सर्वं समाचक्ष्व कुशलो ह्यसि सञ्जय॥ ४६॥

सञ्जय उवाच। आत्मापराधात् सम्भूतं व्यसनं भरतर्षभ। प्राप्य प्राकृतवत् वीर मा त्वं शोचितुमर्हसि॥ ४७॥ पुरा यदुच्यसे प्राज्ञैः सुहृद्भिर्विदुरादिभिः। माहार्षीः पाण्डवान्राजन्निति तन्न त्वया श्रुतम्॥ ४८॥ सुहृदां हितकामानां वाक्यं यो न शृणोति ह। समहद्व्यसनम्प्राप्य शोचते वै यथा भवान्॥ ४९॥ याचितोऽसि पुरा राजन् दाशार्हेण शमम्प्रति। न च तं लब्धवान् कामं त्वत्तः कृष्णो महायशाः॥ ५०॥ तव निर्गुणतां ज्ञात्वा पक्षपातं सुतेषु च। द्वैधीभावं तथा धर्मे पाण्डवेषु च मत्सरम्॥ ५१॥ तव जिह्ममभिप्रायं विदित्वा पाण्डवान् प्रति। आर्त्तप्रलापांश्च बहून् मनुजाधिपसत्तम॥ ५२॥ सर्वलोकस्य तत्त्वज्ञः सर्वलोकेश्वरः प्रभुः। वासुदेवस्ततो युद्धं कुरूणामकरोन्महत्॥ ५३॥ आत्मापराधात् सुमहान् प्राप्तस्ते विपुलः क्षयः। नैनं दुर्य्योधने दोषं कर्त्तुमर्हसि मानद॥ ५४॥ न हि ते सुकृतं किञ्चिदादौ मध्ये च भारत। दृश्यते पृष्ठतश्चैव त्वन्मूलो हि पराजयः॥५५॥ तस्मादवस्थितो भूत्वा ज्ञात्वा लोकस्य निर्णयम्। शृणु युद्धं यथावृत्तं घोरं देवासुरोपमम्॥ ५६॥ प्रविष्टे तव सैन्यन्तु शैनेये सत्यविक्रमे। भीमसेनमुखाः पार्थाः प्रतीयुर्वाहिनीन्तव॥ ५७॥ आगच्छतस्तान् सहसा क्रुद्धरूपान् सहानुगान्। दशार्हको रणे पाण्डून् कृतवर्मा महारथः॥ ५८॥ यथोद्वृत्तं वारयते वेला वै सलिलार्णवम्। पाण्डुसैन्यं तथा सङ्ख्ये

हार्द्दिक्यः समवारयत्॥ ५९॥ तत्राद्भुतमपश्याम हार्द्दिक्यस्य पराक्रमम्। यदेनं सहिताः पार्था नातिचक्रमुराहवे॥ ६०॥ ततो भीमस्त्रिभिर्विद्ध्वा कृतवर्म्माणमाशुगैः। शङ्खं दध्मौ महाबाहुर्हर्षयन् सर्व्वपाण्डवान्॥ ६१॥ सहदेवस्तु विंशत्या धर्म्मराजश्च पञ्चभिः। शतेन नकुलश्चापि हार्द्दिक्यं समविध्यत॥ ६२॥ द्रौपदेयास्त्रिसप्तत्या सप्तभिश्च घटोत्कचः। धृष्टद्युम्नस्त्रिभिश्चापि कृतवर्म्माणमार्द्दयत्॥ ६३॥ विराटो द्रुपदश्चैव याज्ञसेनिश्च पञ्चभिः। शिखण्डी चैव हार्द्दिक्यं विद्ध्वा पञ्चभिराशुगैः॥ ६४॥ पुनर्विव्याध विंशत्या सायकानां हसन्निव। कृतवर्म्मा ततो राजन् सर्व्वतस्तान् महारथान्॥ ६५॥ एकैकं पञ्चभिर्विद्ध्वा भीमं विव्याध सप्तभिः। धनुर्ध्वजञ्चास्य तदा रथाद्भूमावपातयत्॥ ६६॥ अथैनं छिन्नधन्वानं त्वरमाणो महारथः। आजघानोरसि क्रुद्धः सप्तत्या निशितैः शरैः॥ ६७॥ स गाढ़विद्धो बलवान् हार्द्दिक्यस्य शरोत्तमैः। चचाल रथमध्यस्थः क्षितिकम्पे यथाचलः॥ ६८॥ भीमसेनं तथा दृष्ट्वा धर्म्मराजपुरोगमाः। विसृजन्तः शरान्राजन् कृतवर्म्माणमार्द्दयन्॥ ६९॥ तं तथा कोष्ठकीकृत्य रथवंशेन मारिष। विव्यधुः सायकैर्हृष्टा रक्षार्थं मारुतेर्मृधे॥ ७०॥ प्रतिलभ्य ततः संज्ञां भीमसेनो महाबलः। शक्तिं जग्राह समरे हेमदण्डामयस्मयीम्॥ ७१॥ चिक्षेप च रथात्तूर्णं कृतवर्म्मरथं प्रति। सा भीमभुजनिर्मुक्ता निर्मुक्तोरगसन्निभा॥ ७२॥ कृतवर्म्माणमभितः प्रजज्वाल सुदारुणा। तामापतन्तीं सहसा युगान्ताग्निसमप्रभाम्॥ ७३॥ द्वाभ्यां शराभ्यां हार्द्दिक्यो निजघान द्विधा तदा। सा छिन्ना पतिता भूमौ शक्तिः कनकभूषणा॥ ७४॥ द्योतयन्ती दिशो राजन् महोल्केव नभश्च्युता शक्तिं विनिहतां दृष्ट्वा भीमश्चुक्रोध वै भृशम्॥ ७५॥ ततोऽन्यद्धनुरादाय वेगवत् सुमहास्वनम्। भीमसेनो रणे क्रुद्धो हार्द्दिक्यं सम-

वारयत् ॥ ७६ ॥ अथैनं पञ्चभिर्बाणैराजघान स्तनान्तरे । भीमो भीमबलो राजंस्तव दुर्मन्त्रितेन च ॥ ७७ ॥ भोजस्तु क्षतसर्वाङ्गो भीमसेनेन मारिष । रक्ताशोक इवोत्फुल्लो व्यभ्राजत रणाजिरे ॥ ७८ ॥ ततः क्रुद्धस्त्रिभिर्बाणै र्भीमसेनं हसन्निव । अभिहत्य दृढ़ं युद्धे तान् सर्वान् प्रत्यविध्यत ॥ ७९ ॥ त्रिभिस्त्रिभिर्महेष्वासो यतमानान्महारथान् । तेऽपि तं प्रत्यविध्यन्त सप्तभिः सप्तभिः शरैः ॥ ८० ॥ शिखण्डिनस्ततः क्रुद्धः क्षुरप्रेण महारथः । धनुश्चिच्छेद समरे प्रहसन्निव सात्त्वतः ॥ ८१ ॥ शिखण्डी च ततः क्रुद्धश्छिन्ने धनुषि सत्वरः । असिं जग्राह समरे शतचन्द्रञ्च भास्वरम् ॥ ८२ ॥ भ्रामयित्वा महच्चर्म्म चामीकरविभूषितम् । तमसिं प्रेषयामास कृतवर्मरथं प्रति ॥ ८३ ॥ स तस्य सशरञ्चापं छित्त्वा राजन् महानसिः । अभ्यगाद्धरणीं राजन् च्युतं ज्योतिरिवाम्बरात् ॥ ८४ ॥ एतस्मिन्नेव काले च त्वरमाणं महारथाः । विव्यधुः सायकैर्गाढ़ं कृतवर्म्माणमाहवे ॥ ८५ ॥ अथान्यद्धनुरादाय त्यक्त्वा तच्च महद्धनुः । विशीर्णं भरतश्रेष्ठ हार्द्दिक्यः परवीरहा ॥ ८६ ॥ विव्याध पाण्डवान् युद्धे त्रिभिस्त्रिभिरजिह्मगैः । शिखण्डिनञ्च विव्याध त्रिभिः पञ्चभिरेव च ॥ ८७ ॥ धनुरन्यत् समादाय शिखण्डी तु महायशाः । अवारयत् कूर्मनखैराशुगैर्हृदिकात्मजम् ॥ ८८ ॥ ततः क्रुद्धो रणे राजन् हृदिकस्यात्मसम्भवः । अभिदुद्राव वेगेन याज्ञसेनिं महारथम् ॥ ८९ ॥ भीष्मस्य समरे राजन् मृत्योर्हेतुं महात्मनः । विदर्शयन् बलं शूरः शार्दूल इव कुञ्जरम् ॥ ९० ॥ तौ दिशां गजसङ्काशौ ज्वलिताविव पावकौ । समापेततुरन्योऽन्यं शरसङ्घैररिन्दमौ ॥ ९१ ॥ विधुन्वानौ धनुःश्रेष्ठे सन्दधानौ च सायकान् । विसृजन्तौ च शतशो गभस्तीमिव भास्करौ ॥ ९२ ॥ तापयन्तौ शरैस्तीक्ष्णैरन्योऽन्यं तौ महारथौ । युगान्तिमत

वीरौ रेजतुर्भास्कराविव ॥ ९३ ॥ कृतवर्मा च समरे याज्ञसेनिं महारथम् । विद्ध्वेषुभिस्त्रिसप्तत्या पुनर्विव्याध सप्तभिः ॥ ९४ ॥ स गाढ़विद्धो व्यथितो रथोपस्थे उपाविशत् । विसृज्य सशरञ्चापं मूर्च्छयाभिपरिप्लुतः ॥ ९५ ॥ तं विषण्णं रणे दृष्ट्वा तावकाः पुरुषर्षभ । हार्द्दिक्यं पूजयामासुर्वासांस्याद्धुवुश्च ह ॥ ९६ ॥ शिखण्डिनं तथा ज्ञात्वा हार्द्दिक्यशरपीड़ितम् । अपोवाह रणाद्यन्ता त्वरमाणो महारथम् ॥ ९७ ॥ सादितन्तु रथोपस्थे दृष्ट्वा पार्थाः शिखण्डिनम् । परिवव्रू रथैस्तूर्णं कृतवर्म्माणमाहवे ॥ ९८ ॥ तत्राद्भुतं परञ्चक्रे कृतवर्मा महारथः । यदेकः समरे पार्थान् वारयामास सानुगान् ॥ ९९ ॥ पार्थान् जित्वाजयच्चेदीन् पाञ्चालान् सृञ्जयानपि । कैकयांश्च महावीर्य्यान् कृतवर्मा महारथः ॥ १०० ॥ ते बध्यमानाः समरे हार्द्दिक्येन स्म पाण्डवा । इतश्चेतश्च धावन्तो नैव चक्रुर्धृतिं रणे ॥ १०१ ॥ जित्वा पाण्डुसुतान् युद्धे भीमसेनपुरोगमान् । हार्द्दिक्यः समरेऽतिष्ठद्विधूम इव पावकः ॥ १०२ ॥ ते द्राव्यमाणाः समरे हार्द्दिक्येन महारथाः । विमुखाः समपद्यन्त शरवृष्टिभिरर्द्दिताः ॥ १०३ ॥

इतिद्रोणपर्व्वणि जयद्रथवधपर्व्वणि कृतवर्म्मपराक्रमे चतुर्द्दशाधिकशततोऽध्यायः ॥ ११४ ॥

---

सञ्जय उवाच । शृण्वेकमना राजन् यन्मां त्वं परिपृच्छसि । द्राव्यमाणे बले तस्मिन् हार्द्दिक्येन महात्मना ॥ १ ॥ लज्जयावनते चापि प्रहृष्टैश्चापि तावकैः । द्वीपो य आसीत् पाण्डूनामगाधे गाधमिच्छताम् ॥ २ ॥ श्रुत्वा स निनदं भीमं तावकानां महाहवे । शैनेयस्त्वरितो राजन् कृतवर्म्माणमभ्ययात् ॥ ३ ॥ कृतवर्मा तु हार्द्दिक्यः शैनेयं निशितैः शरैः । अवाकिरत् सुसं-

क्रुद्धस्ततोऽक्रुध्यत् स सात्यकिः॥ ४॥ अथाशु निशितं भल्लं शैनेयः कृतवर्मणः। प्रेषयामास समरे शरांश्च चतुरोऽपरान्॥ ५॥ ते तस्य जघ्निरे वाहान् भल्लेनास्याच्छिनद्धनुः। पृष्ठरक्षन्तथासूतमविध्यन्निशितैः शरैः॥ ६॥ ततस्तं विरथं कृत्वा सात्यकिः सत्यविक्रमः। सेनामस्यार्द्दयामास शरैः सन्नतपर्वभिः॥ ७॥ अभज्यतास्य पृतना शैनेयशरपीड़िता। ततः प्रायात् स त्वरितः सात्यकिः सत्यविक्रमः॥ ८॥ शृणु राजन् यदकरोत् तव सैन्येषु वीर्य्यवान्। अतीत्य स महाराज द्रोणानीकमहार्णवम्॥ ९॥ पराजित्य तु संहृष्टः कृतवर्माणमाहवे। यन्तारमब्रवीत् शूरः शनैर्य्याहीत्यसम्भ्रमम्॥ १०॥ दृष्ट्वा तु तव तत्सैन्यं रथाश्वद्विपसङ्कुलम्। पदातिजनसम्पूर्णमब्रवीत् सारथिं पुनः॥ ११॥ यदेतन्मेघसङ्काशं द्रोणानीकस्य सव्यतः। सुमहत् कुञ्जरानीकं यस्य रुक्मरथो मुखम्॥ १२॥ एते हि बहवः सूत दुर्निवाराश्च संयुगे। दुर्य्योधनसमादिष्टा मदर्थे त्यक्तजीविताः॥ १३॥ राजपुत्रा महेष्वासाः सर्व्वे विक्रान्तयोधिनः। त्रिगर्त्तानां रथोदाराः सुवर्णविकृतध्वजाः॥ १४॥ मामेवाभिमुखा वीरा योत्स्यमाना व्यवस्थिताः। अत्र मां प्रापय क्षिप्रमश्वांश्चोदय सारथे॥ १५॥ त्रिगर्त्तैः सह योत्स्यामि भारद्वाजस्य पश्यतः। ततः प्रायाच्छनैः सूतः सात्वतस्य मते स्थितः॥ १६॥ रथेनादित्यवर्णेन भास्वरेण पताकिना। तमूहुः सारथेर्वश्या वल्गमाना हयोत्तमाः॥ १७॥ वायुवेगसमाः सङ्ख्ये कुन्देन्दुरजतप्रभाः। आपतन्तं रणे तन्तु शङ्खवर्णैर्हयोत्तमैः॥ १८॥ परिवव्रुस्ततः शूरा गजानीकेन सर्व्वतः। किरन्तो विविधांस्तीक्ष्णान् सायकान् लघुवेधिनः॥ १९॥ सात्वतोऽपि शितैर्वाणैर्गजानीकमयोधयत्। पर्व्वतानिव वर्षेण तपान्ते जलदो महान्॥ २०॥ वज्राशनिसमस्पर्शैर्वध्यमानाः शरैर्गजाः। प्राद्रवन्रणमुत्सृज्य शिनिवीरसमीरितैः॥ २१॥

शीर्षं दन्ता विरुधिरा भिन्नमस्तकपिण्डिकाः। विशीर्णकक्षास्य
करा विनियन्तृपताकिनः ॥ २२ ॥ सञ्छिन्नचर्मवरूथाश्च विनिकृत्त-
महाध्वजाः। हतारोहा दिशो राजन् भेजिरे भ्रष्टकम्वलाः
॥ २३ ॥ रुवन्तो विविधान्नादान् जलदोपमनिस्वनाः। नाराचै-
र्वत्सदन्तैश्च भल्लैरञ्जलिकैस्तथा ॥ २४ ॥ क्षुरप्रैरर्द्धचन्द्रैश्च सात्त्व-
तेन विदारिताः। क्षरन्तोऽसृक् तथा मूत्रं पुरीषञ्च प्रदुद्रुवुः
॥ २५ ॥ बभ्रमुश्चस्खलुश्चान्ये पेतुर्म्लुस्तथापरे। एवं तत्कुञ्जरा-
नीकं युयुधानेन पीड़ितम् ॥ २६ ॥ शरैरग्न्यर्कसङ्काशैः प्रदुद्राव
समन्ततः। तस्मिन् हते गजानीके जलसन्धो महाबलः ॥ २७ ॥
यत्तः सम्प्रापयन्नागं रजताश्वरथं प्रति। रुक्मवर्मधरः शूर-
स्तपनीयाङ्गदः शुचिः ॥ २८ ॥ कुण्डली मुकुटी खड्गी रक्त-
चन्दनरूषितः। शिरसा धारयन् दीप्तां तपनीयमयीं स्रजम्
॥ २९ ॥ उरसा धारयन्निष्कं कण्ठसूत्रञ्च भास्वरम्। चापञ्च
रुक्मविकृतं विधुन्वन् गजमूर्द्धनि ॥ ३० ॥ अशोभत महाराज
सविद्युदिव तोयदः। तमापतन्तं सहसा मागधस्य गजोत्तमम्
॥ ३१ ॥ सात्यकिर्वारयामास वेलेव मकरालयम्। नागं निवा-
रितं दृष्ट्वा शैनेयस्य शरोत्तमैः ॥ ३२ ॥ अक्रुध्यत रणे राजन्
जलसन्धो महाबलः। ततः क्रुद्धो महाराज मार्गणैर्भारसाधनैः
॥ ३३ ॥ अविध्यत शिनेः पौत्रं जलसन्धो महोरसि। ततोऽपरेण
भल्लेन पीतेन निशितेन च ॥ ३४ ॥ अस्यतो वृष्णिवीरस्य निचकर्त्त
शरासनम्। सात्यकिं छिन्नधन्वानं प्रहसन्निव भारत ॥ ३५ ॥
अविध्यन्मागधो वीरः पञ्चभिर्निशितैः शरैः। स विद्धो बहुभि-
र्बाणैर्जलसन्धेन वीर्य्यवान् ॥ ३६ ॥ नाकम्पत महाबाहुस्तद-
द्भुतमिवाभवत्। अचिन्तयन् वै स शरान् नात्यर्थं सम्भ्रमाद्बली
॥ ३७ ॥ धनुरन्यत् समादाय तिष्ठ तिष्ठेत्युवाच ह। एतावदुक्त्वा
शैनेयो जलसन्धं महोरसि ॥ ३८ ॥ विव्याध षष्ट्या सुभृशं

शराणां प्रहसन्निव। क्षुरप्रेण सुतीक्ष्णेन मुष्टिदेशे महद्धनुः॥३९॥
जलसन्धस्य चिच्छेद विव्याध च त्रिभिः शरैः। जलसन्धस्तु
तत्त्यक्त्वा सशरं वै शरासनम्॥ ४०॥ तोमरं व्यसृजत्तूर्णं
सात्यकिं प्रति मारिष। स निर्भिद्य भुजं सव्यं माधवस्य महा-
रणे॥ ४१॥ अभ्यगाद्धरणीं घोरः श्वसन्निव महोरगः। निर्भिन्ने
तु भुजे सव्ये सात्यकिः सत्यविक्रमः॥ ४२॥ त्रिंशद्भिर्विशिखै-
स्तीक्ष्णैर्जलसन्धमताड़यत्। प्रगृह्य तु ततः खड्गं जलसन्धो
महाबलः॥ ४३॥ आर्षभञ्चर्म च महत् शतचन्द्रकसङ्कुलम्।
आविध्य च ततः खड्गं सात्वतायोत्ससर्ज्ज ह॥ ४४॥ शैनेयस्य
धनुश्छित्वा सखड्गो न्यपतन्महीम्। अलातचक्रवच्चैव व्यरोचत
महीं गतः॥ ४५॥ अथान्यद्धनुरादाय सर्वकायावदारणम्।
शालस्कन्धप्रतीकाशमिन्द्राशनिसमस्वनम्॥ ४६॥ विस्फार्य्य विव्यधे
क्रुद्धो जलसन्धं शरेण ह। ततः साभरणौ बाहू क्षुराभ्यां
माधवोत्तमः॥ ४७॥ सात्यकिर्ज्जलसन्धस्य चिच्छेद प्रहसन्निव।
तौ बाहू परिघप्रख्यौ पेततुर्गजसत्तमात्॥ ४८॥ वसुन्धराधरा-
द्भ्रष्टौ पञ्चशीर्षाविवोरगौ। ततः सुदंष्ट्रं सुमहत् चारुकुण्डल-
मण्डितम्॥ ४९॥ क्षुरेणास्य तृतीयेन शिरश्चिच्छेद सात्यकिः।
तत् पातितशिरोबाहुं कबन्धं भीमदर्शनम्॥ ५०॥ द्विरदं जल-
सन्धस्य रुधिरेणाभ्यषिञ्चत। जलसन्धं निहत्याजौ त्वरमानस्तु
सात्वतः॥ ५१॥ विमानं पातयामास गजस्कन्धाद्विशाम्पते।
रुधिरेणावसिक्ताङ्गो जलसन्धस्य कुञ्जरः॥ ५२॥ विलम्बमान-
मवहत् संश्लिष्टं परमासनम्। शरार्द्दितः सात्वतेन मर्द्दमानः
स्ववाहिनीम्॥ ५२॥ घोरमार्त्तस्वरं कृत्वा विदुद्राव महागजः।
हाहाकारो महानासीत्तव सैन्यस्य मारिष॥ ५३॥ जलसन्धं
हतं दृष्ट्वा वृष्णीनामृषभेण तु। विमुखाश्चाभ्यधावन्त तव योधाः
समन्ततः॥ ५४॥ पलायनकृतोत्साहा निरुत्साहा द्विषज्जये।

एतस्मिन्नन्तरे राजन् द्रोणः शस्त्रभृताम्बरः ॥ ५५ ॥ अभ्यया-
च्छवनैरश्वैर्युयुधानं महारथम्। तमुद्दीप्तं तथा दृष्ट्वा शैनेयं
कुरुपुङ्गवाः ॥ ५६ ॥ द्रोणेनैव सह क्रुद्धाः सात्यकिं समुपाद्रवन्।
ततः प्रववृते युद्धं कुरूणां सात्वतस्य च। द्रोणस्य च रणे
राजन् घोरं देवासुरोपमम् ॥ ५७ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि जलसन्धवधे
पञ्चदशाधिकशतोऽध्यायः ॥ ११५ ॥

---

सञ्जय उवाच। ते किरन्तः शरव्रातान् सर्व्वे यत्ताः प्रहा-
रिणः त्वरमाणा महाराज युयुधानमयोधयन् ॥ १ ॥ तं द्रोणः
सप्तसप्तत्या जघान निशितैः शरैः। दुर्म्मर्षणो द्वादशभिर्दुःसहो
दशभिः शरैः ॥ २ ॥ विकर्णश्चापि निशितैस्त्रिंशद्भिः कङ्कपत्रिभिः।
विव्याध सव्ये पार्श्वे तु स्तनाभ्यामन्तरे तथा ॥ ३ ॥ दुर्म्मुखो
दशभिर्व्वाणैस्तथा दुःशासनोऽष्टभिः। चित्रसेनश्च शैनेयं द्वाभ्यां
विव्याध मारिष ॥ ४ ॥ दुर्य्योधनश्च महता शरवर्षेण माधवम्।
अपीड़यद्रणे राजन् शूराश्चान्ये महारथम् ॥ ५ ॥ सर्व्वतः प्रति-
षिद्धस्तु तव पुत्रैर्म्महारथैः। तान् प्रत्यविध्यद्वार्ष्णेयः पृथक् पृथ-
गजिह्मगैः ॥ ६ ॥ भारद्वाजं त्रिभिर्व्वाणैर्दुःसहं नवभिः शरैः।
विकर्णं पञ्चविंशत्या चित्रसेनञ्च सप्तभिः ॥ ७ ॥ दुर्म्मर्षणं द्वादश-
भिरष्टाभिश्च विविंशतिम्। सत्यव्रतञ्च नवभिर्व्विजयं दशभिः शरैः
॥ ८ ॥ ततो रुक्माङ्गदञ्चापि विधुन्वानो महारथः। अभ्ययात्
सात्यकिस्तूर्णं पुत्रं तव महारथम् ॥ ९ ॥ राजानं सर्व्वलोकस्य
सर्व्वलोकमहारथम्। शरैरभ्याहनद्गाढ़ं ततो युद्धमभूत्तयोः ॥ १० ॥
विमुञ्चन्तौ शरांस्तीक्ष्णान् सन्दधानौ च सायकान्। अदृश्यं

समरेऽन्योन्यं चक्रतुस्तौ महारथौ ॥ ११ ॥ सात्यकिः कुरुराजेन निर्विद्धो बह्वशोभत। अस्रवद्रुधिरं भूरि स्वरसं चन्दनो यथा ॥ १२ ॥ सात्वतेन च बाणौघैर्निर्विद्धस्तनयस्तव। शातकुम्भमयापीड़ो बभौ यूप इवोच्छ्रितः ॥ १३ ॥ माधवस्तु रणे राजन् कुरुराजस्य धन्विनः। धनुश्चिच्छेद समरे क्षुरप्रेण हसन्निव ॥ १४ ॥ अथैनं छिन्नधन्वानं शरैर्बहुभिराचिनोत्। निर्भिन्नश्च शरैस्तेन द्विषता क्षिप्रकारिणा ॥ १५ ॥ नामृष्यत रणे राजा शत्रोर्विजयलक्षणम्। अथान्यद्धनुरादाय हेमपृष्ठं दुरासदम् ॥१६॥ विव्याध सात्यकिं तूर्णं सायकानां शतेन ह। सोऽतिविद्धो बलवता तव पुत्रेण धन्विना ॥ १७ ॥ अमर्षवशमापन्नस्तव पुत्रमपीड़यत्। पीड़ितं नृपतिं दृष्ट्वा तव पुत्रा महारथाः ॥ १८ ॥ सात्यकिं शरवर्षेण छादयामासुरोजसा। स छाद्यमानो बहुभिस्तव पुत्रैर्महारथैः ॥ १९ ॥ एकैकं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः। दुर्य्योधनञ्च त्वरितो विव्याधाष्टभिराशुगैः ॥ २० ॥ प्रहसंश्चास्य चिच्छेद कार्मुकं रिपुभीषणम्। नागं मणिमयञ्चैव शरैर्ध्वजमपातयत् ॥ २१ ॥ हत्वा तु चतुरो वाहान् चतुर्भिर्निशितैः शरैः। सारथिं पातयामास क्षुरप्रेण महायशाः ॥ २२ ॥ एतस्मिन्नन्तरे चैव कुरुराजं महारथम्। अवाकिरत् शरैर्हृष्टो बहुभिर्मर्मभेदिभिः ॥ २३ ॥ स बध्यमानः समरे शैनेयस्य शरोत्तमैः। प्राद्रवत् सहसा राजन् पुत्रो दुर्य्योधनस्तव ॥ २४ ॥ आप्लुतश्च ततो यानं चित्रसेनस्य धन्विनः। हाहाभूतं जगच्चासीत् दृष्ट्वा राजानमाहवे ॥ २५ ॥ ग्रस्यमानं सात्यकिना खे सोममिव राहुणा। तन्तु शब्दमथ श्रुत्वा कृतवर्मा महारथः ॥ २६ ॥ अभ्ययात् सहसा तत्र यत्रास्ते माधवः प्रभुः। विधुन्वानो धनुःश्रेष्ठञ्चोदयंश्चैव वाजिनः ॥ २७ ॥ भर्त्सयन् सारथिञ्चाग्रे याहि याहीति सत्वरम्। तमापतन्तं सम्प्रेक्ष्य व्यादितास्यमिवान्तकम्

॥ २८ ॥ युयुधानो महाराज यन्तारमिदमब्रवीत् । कृतवर्मा रथेनैष द्रुतमापतते शरो ॥ २९ ॥ प्रत्युद्याहि रथेनैनं प्रवरं सर्वधन्विनाम् । ततः प्रजविताश्वेन विधिवत् कल्पितेन च ॥३०॥ आससाद रणे भोजं प्रतिमानं धनुष्मताम् । ततः परमसंक्रुद्धौ ज्वलिताविव पावकौ ॥ ३१ ॥ समेयातां नरव्याघ्रौ व्याघ्राविव तरस्विनौ । कृतवर्मा तु शैनेयं षड्विंशत्या समार्पयत् ॥ ३२ ॥ निशितैः सायकैस्तीक्ष्णैर्यन्तारञ्चास्य पञ्चभिः । चतुरश्चतुरो वाहां-श्चतुर्भिः परमेषुभिः ॥ ३३ ॥ अविध्यत् साधुदान्तान् वै सैन्धवान् सात्त्वतस्य हि । रुक्मध्वजो रुक्मपृष्ठं महद्विस्फार्य्य कार्मुकम् ॥३४॥ रुक्माङ्गदो रुक्मवर्मा रुक्मपुङ्खैरवारयत् । ततोऽशीतिं शिनेः पौत्रः सायकान् कृतवर्मणे ॥ ३५ ॥ प्राहिणोत्त्वरया युक्तो द्रष्टु-कामो धनञ्जयम् । सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः ॥ ३६ ॥ समकम्पत दुर्द्धर्षः क्षितिकम्पे यथाचलः । त्रिषष्ट्या चतुरोऽस्याश्वान् सप्तभिः सारथिं तथा ॥ ३७ ॥ विव्याध निशि-तैस्तूर्णं सात्यकिः सत्यविक्रमः । सुवर्णपुङ्खं विशिखं समाधाय च सात्यकिः ॥ ३८ ॥ विसृजन्तं महाज्वालं संक्रुद्धमिव पन्नगम् । सोऽविध्यत् कृतवर्माणं यमदण्डोपमः शरः ॥ ३९ ॥ जाम्बूनद-विचित्रञ्च वर्म निर्भिद्य भानुमत् । अभ्यगाद्धरणीमुग्रो रुधिरेण समुक्षितः ॥ ४० ॥ सञ्जातरुधिरश्चाजौ सात्त्वतेषुभिरर्द्दितः । सशरं धनुरुत्सृज्य न्यपतत् स्यन्दनोत्तमात् ॥ ४१ ॥ स सिंहदंष्ट्रो जानुभ्यां पतितोऽमितविक्रमः । शरार्द्दितः सात्यकिना रथोपस्थे नरर्षभः ॥ ४२ ॥ सहस्रबाहुसदृशमक्षोभ्यमिव सागरम् । निवार्य्य कृतवर्माणं सात्यकिः प्रययौ ततः ॥ ४३ ॥ खड्ग-शक्तिधनुःकीर्णां गजाश्वरथसङ्कुलाम् । प्रवर्त्तितोग्ररुधिरां शतशः क्षत्रियर्षभैः ॥ ४४ ॥ प्रेक्षतां सर्वसैन्यानां मध्येन शिनिपुङ्गवः । अभ्यगाद्दारिणीं हित्वा वृत्रहेवासुरीञ्चमूम् ॥ ४५ ॥ समाश्वस्य

च हार्द्दिक्यो गच्छ चान्यमहद्धनुः । तस्थौ स तत्र बलवान् वारयन् युधि पाण्डवान् ॥ ४६ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि कृतवर्मपराजये षोड़शाधिकशततोऽध्यायः ॥ ११६ ॥

---

सञ्जय उवाच। कम्पमानेषु सैन्येषु शैनेयेन ततस्ततः। भारद्वाजः शरव्रातैर्महद्भिः समवाकिरत् ॥ १ ॥ स सम्प्रहारस्तुमुलो द्रोणसात्वतयोरभूत्। पश्यतां सर्वसैन्यानां बलिवासवयोरिव ॥ २ ॥ ततो द्रोणः शिनेः पौत्रं चित्रैः सर्वायसैः शरैः। त्रिभिराशीविषाकारैर्ललाटे समविध्यत ॥ ३ ॥ तैर्ललाटार्पितैर्वाणैर्युयुधानस्त्वजिह्मगैः। व्यरोचत महाराज त्रिशृङ्ग इव पर्वतः ॥ ४ ॥ ततोऽस्य वाणानपरानिन्द्राशनिसमस्वनान्। भारद्वाजोऽन्तरप्रेक्षी प्रेषयामास संयुगे ॥ ५ ॥ तान् द्रोणचापनिर्मुक्तान् दाशार्हः पततः शरान्। द्वाभ्यां द्वाभ्यां सुपुङ्खाभ्यां चिच्छेद परमास्त्रवित् ॥ ६ ॥ तामस्य लघुतां द्रोणः समवेक्ष्य विशाम्पते। प्रहस्य सहसाविध्यत् त्रिंशता शिनिपुङ्गवम् ॥ ७ ॥ पुनः पञ्चाशतेषूणां शतेन च समार्पयत्। लघुतां युयुधानस्य लाघवेन विशेषयन् ॥ ८ ॥ समुत्पतन्ति वल्मीकात् यथा क्रुद्धा महोरगाः। तथा द्रोणरथाद्राजन् आपतन्ति तनुच्छिदः ॥ ९ ॥ तथैव युयुधानेन सृष्टाः शतसहस्रशः। अवाकिरन् द्रोणरथं शरा रुधिरभोजनाः ॥ १० ॥ लाघवात् द्विजमुख्यस्य सात्वतस्य च मारिष। विशेषं नाध्यगच्छाम समावास्तां नरर्षभौ ॥ ११ ॥ सात्यकिस्तु ततो द्रोणं नवभिर्नतपर्वभिः। आजघान भृशं क्रुद्धो ध्वजञ्च निशितैः शरैः ॥ १२ ॥ सारथिञ्च शतेनैव भारद्वाजस्य पश्यतः। लाघवं युयुधानस्य दृष्ट्वा द्रोणो महारथः ॥ १३ ॥

शक्त्या सारथिं विद्वा तुरगांश्च त्रिभिस्त्रिभिः। ध्वजमेकेन चिच्छेद माधवस्य रथे स्थितम् ॥ १४ ॥ अथापरेण भल्लेन हेमपुङ्खेन पत्रिणा। धनुश्चिच्छेद समरे माधवस्य महात्मनः ॥ १५ ॥ सात्यकिस्तु ततः क्रुद्धो धनुस्त्यक्त्वा महारथः। गदां जग्राह महतीं भारद्वाजाय चाक्षिपत् ॥ १६ ॥ तामापतन्तीं सहसा पट्टबद्धामयस्मयीम्। न्यवारयच्छरैर्द्रोणो बहुभिर्बहुरूपिभिः ॥ १७ ॥ अथान्यद्धनुरादाय सात्यकिः सत्यविक्रमः। विव्याध बहुभिर्वीरं भारद्वाजं शिलाशितैः ॥ १८ ॥ स विद्वा समरे द्रोणं सिंहनादममुञ्चत। तं वै न ममृषे द्रोणः सर्व्वशस्त्रभृतांवरः ॥ १९ ॥ ततः शक्तिं गृहीत्वा तु रुक्मदण्डामयस्मयीम्। तरसा प्रेषयामास माधवस्य रथं प्रति ॥ २० ॥ अनासाद्य तु शैनेयं सा शक्तिः कालसन्निभा। भित्त्वा रथं जगामोग्रा धरणीं दारुणस्वना ॥ २१ ॥ ततो द्रोणं शिनेः पौत्रो राजन् विव्याध पत्रिणा। दक्षिणं भुजमासाद्य पीड़यन् भरतर्षभ ॥ २२ ॥ द्रोणोऽपि समरे राजन्माधवस्य महद्धनुः। अर्द्धचन्द्रेण चिच्छेद रथशक्त्या च सारथिम् ॥ २३ ॥ मुमोह सारथिस्तस्य रथशक्त्या समाहतः। स रथोपस्थमासाद्य मुहूर्त्तं सन्निषीदत ॥ २४ ॥ चकार सात्यकी राजन् सूतकर्मातिमानुषम्। अयोधयच्च यद्द्रोणं रश्मीन् जग्राह च स्वयम् ॥ २५ ॥ ततः शरशतेनैव युयुधानो महारथ। अविध्यद्ब्राह्मणं सङ्ख्ये हृष्टरूपो विशाम्पते ॥ २६ ॥ तस्य द्रोणः शरान् पञ्च प्रेषयामास भारत। ते घोराः कवचं भित्त्वा पपुः शोणितमाहवे ॥ २७ ॥ निर्व्विद्धस्तु शरैर्घोरैरक्रुध्यत् सात्यकिर्भृशम्। सायकान् व्यसृजच्चापि वीरो रुक्मरथं प्रति ॥ २८ ॥ ततो द्रोणस्य यन्तारं निपात्यैकेषुणा भुवि। अश्वान् व्यद्रावयद्बाणैर्हतसूतांस्ततस्ततः ॥ २९ ॥ स रथः प्रद्रुतः सङ्ख्ये मण्डलानि सहस्रशः। चकार राजतो राजन् भ्राजमान इवांशुमान्

॥ ३० ॥ अभिद्रवत गृह्णीत हयान् द्रोणस्य धावत। इति स्म चुक्रुशुः सर्वे राजपुत्राः सराजकाः ॥ ३१ ॥ ते सात्यकिमपास्याशु राजन् युधि महारथाः। यतो द्रोणस्ततः सर्वे सहसा समुपाद्रवन् ॥ ३२ ॥ तान् दृष्ट्वा प्रद्रुतान् सङ्ख्ये सात्त्वतेन शरार्दितान्। प्रभग्नं पुनरेवासीत्तव सैन्यं समाकुलम् ॥ ३३ ॥ व्यूहस्यैव पुनर्द्वारं गत्वा द्रोणो व्यवस्थितः। वातायमानैस्तैरश्वैर्नीतो वृष्णिशरार्दितैः ॥ ३४ ॥ पाण्डुपाञ्चालसम्भिन्नं व्यूहमालोक्य वीर्य्यवान्। शैनेये नाकरोद्यत्नं व्यूहमेवाभ्यरक्षत ॥ ३५ ॥ निवार्य्य पाण्डुपाञ्चालान् द्रोणाग्निः प्रदहन्निव। तस्थौ क्रोधाग्निसन्दीप्तः कालसूर्य्य इवोदितः ॥ ३६ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिपराक्रमे सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

---

सञ्जय उवाच। द्रोणं स जित्वा पुरुषप्रवीरस्तथैव हार्द्दिक्यमुखांस्त्वदीयान्। प्रहस्य सूतं वचनं बभाषे शिनिप्रवीरः कुरुपुङ्गवाग्र्य ॥ १ ॥ निमित्तमात्रं वयमद्य सूत दग्धारयः केशवफाल्गुनाभ्याम्। हतान्निहन्मेह नरर्षभेण वयं सुरेशात्मसमुद्भवेन ॥ २ ॥ तमेवमुक्त्वा शिनिपुङ्गवस्तदा महामृधे सोऽग्र्यधनुर्द्धरोऽरिहा। किरन् समन्तात् सहसा शरान् बली समापतत् श्येन इवामिषं यथा ॥ ३ ॥ तं यान्तमश्वैः शशिशङ्खवर्णैर्विगाह्य सैन्यं पुरुषप्रवीरम्। नाशक्नुवन् वारयितुं समन्तादादित्यरश्मिप्रतिमं रथाग्र्यम् ॥ ४ ॥ असह्यविक्रान्तमदीनसत्त्वं सर्वे गणा भारत ये त्वदीयाः। सहस्रनेत्रप्रतिमप्रभावं दिवीव सूर्य्यं जलदव्यपाये ॥ ५ ॥ अमर्षपूर्णस्त्वतिचित्रयोधी शरासनी काञ्चनवर्मधारी। सुदर्शनः सात्यकिमापतन्तं न्यवारयद्राजवरः प्रसह्य ॥६॥

तयोरभूत् भारत सम्प्रहारः सुदारुणस्तं समतिप्रशंसन् । योधा-
स्त्वदीयाश्च हि सोमकाश्च वृत्रेन्द्रयोर्युद्धमिवामरौघाः ॥ ७ ॥ शरैः
सुतीक्ष्णैः शतशोऽभ्यविध्यत् सुदर्शनः सात्वतमुख्यमाजौ । अना-
गतानेव तु तान् पृषत्कान् चिच्छेद राजन् शिनिपुङ्गवोऽपि ॥ ८ ॥
तथैव शक्रप्रतिमोऽपि सात्यकिः सुदर्शने यान् क्षिपति स्म साय-
कान् । द्विधा त्रिधा तानकरोत् सुदर्शनः शरोत्तमैः स्यन्दनवर्य्य-
मास्थितः ॥ ९ ॥ तान् वीक्ष्य वाणान् निहतांस्तदानीं सुदर्शनः
सात्यकिवाणवेगैः । क्रोधाद्दिधक्षन्निव तिग्मतेजाः शरानमुञ्च-
त्तपनीयचित्रान् ॥ १० ॥ पुनः स वाणैस्त्रिभिरग्निकल्पैराकर्ण-
पूर्णैर्निशितैः सुपुङ्खैः । विव्याध देहावरणं विभिद्य ते सात्यके-
राविविशुः शरीरम् ॥ ११ ॥ तथैव तस्यावनिपालपुत्रः सन्धाय
वाणैरपरैर्ज्वलद्भिः । आजघ्निवांस्तान्रजतप्रकाशान् चतुर्भिरश्वां-
श्चतुरः प्रसह्य ॥ १२ ॥ तथा तु तेनाभिहतस्तरस्वी नप्ता शिने-
रिन्द्रसमानवीर्य्यः । सुदर्शनस्येषुगणैः सुतीक्ष्णैर्हयान्निहत्याशु
ननाद नादम् ॥ १३ ॥ अथास्य सूतस्य शिरो निकृत्य भल्लेन
शक्राशनिसन्निभेन । सुदर्शनस्यापि शिनिप्रवीरः क्षुरेण काला-
निलसन्निभेन ॥ १४ ॥ सकुण्डलं पूर्णशशिप्रकाशं भ्राजिष्णुवक्त्रं
विचकर्त्त देहात् । यथा पुरा वज्रधरः प्रसह्य बलस्य सङ्ख्येऽति-
बलस्य राजन् ॥ १५ ॥ निहत्य तं पार्थिवपुत्रपौत्रं रणे यदूना-
मृषभस्तरस्वी । मुदा समेतः परया महात्मा रराज राजन् सुर-
राजकल्पः ॥ १६ ॥ ततो ययावर्ज्जुन एव येन निवार्य्य सैन्यं तव
मार्गणौघैः । सदश्वयुक्तेन रथेन राजन् लोकं विसिस्मापयिषुर्नृवीरः
॥ १७ ॥ तत्तस्य विस्मापयनीयमग्र्यमपूजयन् योधवराः समेताः ।
प्रवर्त्तमानानिषुगोचरेऽरीन् ददाह वाणैर्हुतभुग्यथैव ॥ १८ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि सुदर्शनबधे
अष्टादशाधिकशततोऽध्यायः ॥ ११८ ॥

सञ्जय उवाच। ततः स सात्यकिर्धीमान् महात्मा वृष्णि-
पुङ्गवः। सुदर्शनं निहत्याजौ यन्तारं पुनरब्रवीत् ॥ १ ॥ रथाश्व-
नागकलिलं शरशक्त्यूर्मिमालिनम्। खड्गमत्स्यं गदाग्राहं
शूरायुधमहास्वनम् ॥ २ ॥ प्राणापहारिणं रौद्रं वादित्रोत्क्रुष्ट-
नादितम्। योधानामसुखस्पर्शं दुर्द्धर्षञ्च जयैषिणाम् ॥ ३ ॥
तीर्णाः सुदुस्तरं तात द्रोणानीकमहार्णवम्। जलसन्धबलेनाजौ
पुरुषादैरिवावृतम् ॥ ४ ॥ अतोऽन्यत् पृतनाशेषं मन्ये कुनदिका-
मिव। तर्त्तव्यामल्पसलिलां चोदयाश्वानसम्भ्रमम् ॥ ५ ॥ हस्त-
प्राप्तमहं मन्ये साम्प्रतं सव्यसाचिनम्। निर्ज्जित्य दुर्द्धरं द्रोणं
सपदानुगमाहवे ॥ ६ ॥ हार्द्दिक्यं योधवर्य्यञ्च मन्ये प्राप्तं धन-
ञ्जयम्। न हि मे जायते त्रासो दृष्ट्वा सैन्यान्यनेकशः ॥ ७ ॥
वह्नेरिव प्रदीप्तस्य वने शुष्कतृणोलपे। पश्य पाण्डवमुख्येन
याता भूमिं किरीटिना ॥ ८ ॥ पत्त्यश्वरथनागौघैः पतितैर्विषमी-
कृताम्। द्रवते तद्यथा सैन्यं तेन भग्नं महात्मना ॥ ९ ॥ रथै-
र्विपरिधावद्भिर्गजैरश्वैश्च सारथे। कौशेयारुणसङ्काशमेतदुद्धूयते
रजः ॥ १० ॥ अभ्यासस्थमहं मन्ये श्वेताश्वं कृष्णसारथिम्।
स एष श्रूयते शब्दो गाण्डीवस्यामितौजसः ॥ ११ ॥ यादृशानि
निमित्तानि मम प्रादुर्भवन्ति वै। अनस्तं गत आदित्ये हन्ता
सैन्धवमर्ज्जुनः ॥ १२ ॥ शनैर्विश्रम्भयन्नश्वान् याहि यत्तारि-
वाहिनी। यत्रैते सतलत्राणाः सुयोधनपुरोगमाः ॥ १३ ॥
दंशिताः क्रूरकर्माणः काम्बोजा युद्धदुर्म्मदाः। शरबाणासनधरा
यवनाश्च प्रहारिणः ॥ १४ ॥ शकाः किराता दरदा बर्व्वरास्ताम्र-
लिप्तकाः। अन्ये च बहवो म्लेच्छा विविधायुधपाणयः ॥ १५ ॥
यत्रैते सतलत्राणाः सुयोधनपुरोगमाः। मामेवाभिमुखाः सर्व्वे
तिष्ठन्ति समरार्थिनः ॥ १६ ॥ एतान् सरथनागाश्वान् निहत्याजौ
सपत्तिनः। इदं दुर्गं महाघोरं तीर्णमेवोपधारय ॥ १७ ॥

सूत उवाच। न सम्भ्रमो मे वार्ष्णेय विद्यते सत्यविक्रम। यद्यपि स्यात्तव क्रुद्धो जामदग्न्योऽग्रतः स्थितः ॥ १८ ॥ द्रोणो वा रथिनां श्रेष्ठः कृपो मद्रेश्वरोऽपि वा। तथापि सम्भ्रमो न स्यात् त्वामाश्रित्य महाभुज ॥ १९ ॥ त्वया सुबहवो युद्धे निर्जिताः शत्रुसूदन। दंशिताः क्रूरकर्माणः काम्बोजा युद्धदुर्मदाः ॥ २० ॥ शरवाणासनधरा यवनाश्च प्रहारिणः। शकाः किराता दरदा वर्वरास्ताम्रलिप्तकाः ॥ २१ ॥ अन्ये च बहवो म्लेच्छा विविधायुधपाणयः। न च मे सम्भ्रमः कश्चिद्भूतपूर्वः कदाचन ॥ २२ ॥ किमुतैतत् समासाद्य धीर संयुगगोष्पदम। आयुष्मन् कतरेण त्वां प्रापयामि धनञ्जयम् ॥ २३ ॥ केषां क्रुद्धोऽसि वार्ष्णेय केषां मृत्युरुपस्थितः। केषां संयमनीमद्य गन्तुमुत्सहते मनः ॥ २४ ॥ के त्वां युधि पराक्रान्तं कालान्तकयमोपमम्। दृष्ट्वा विक्रमसंयुक्तं विद्रविष्यन्ति संयुगे। केषां वैवस्वतो राजा स्मरतेऽद्य महाभुज॥२५

सात्यकिरुवाच। मुण्डानेतान् हनिष्यामि दानवानिव वासवः। प्रतिज्ञां पालयिष्यामि काम्बोजानेव मां वह ॥ २६ ॥ अद्यैषां कदनं कृत्वा प्रियं यास्यामि पाण्डवम्। अद्य द्रक्ष्यन्ति मे वीर्य्यं कौरवाः ससुयोधनाः ॥ २७ ॥ मुण्डानीके हते सूत सर्वसैन्येषु चासकृत्। अद्य कौरवसैन्यस्य दीर्य्यमाणस्य संयुगे ॥ २८ ॥ श्रुत्वा विरावं बहुधा सन्तप्स्यति सुयोधनः। अद्य पाण्डवमुख्यस्य श्वेताश्वस्य महात्मनः ॥२९॥ आचार्य्यस्य कृतं मार्गं दर्शयिष्यामि संयुगे। अद्य महाणनिहतान् योधमुख्यान् सहस्रशः ॥ ३० ॥ दृष्ट्वा दुर्य्योधनो राजा पश्चात्तापं गमिष्यति। अद्य मे क्षिप्रहस्तस्य क्षिपतः सायकोत्तमान् ॥ ३१ ॥ अलातचक्रप्रतिमं धनुर्द्रक्ष्यन्ति कौरवाः। मत्सायकचिताङ्गानां रुधिरं स्रवतां मुहुः ॥ ३२ ॥ सैनिकानां वधं दृष्ट्वा सन्तप्स्यति सुयोधनः। अद्य मे क्रुद्धरूपस्य निघ्नतश्च वरान् वरान् ॥ ३३ ॥ द्विरर्ज्जुनमिमं लोकं मंस्यतेऽद्य

सुयोधनः। अद्य राजसहस्राणि निहतानि मया रणे ॥ ३४ ॥ दृष्ट्वा दुर्य्योधनो राजा सन्तप्स्यति महामृधे। अद्य स्नेहञ्च भक्तिञ्च पाण्डवेषु महात्मसु ॥ ३५ ॥ हत्वा राजसहस्राणि दर्शयिष्यामि राजसु। बलं वीर्य्यं कृतज्ञत्वं मम ज्ञास्यन्ति कौरवाः ॥ ३६ ॥

सञ्जय उवाच। एवमुक्तस्तदा सूतः शिक्षितान् साधुवाहिनः। शशाङ्कसन्निकाशान् वै वाजिनो व्यनुदत् भृशम् ॥ ३७ ॥ ते पिबन्त इवाकाशं युयुधानं हयोत्तमाः। प्रापयन् यवनान् शीघ्रं मनः पवनरंहसः ॥ ३८ ॥ सात्यकिं ते समासाद्य पृतनास्वनिवर्त्तिनम्। बहवो लघुहस्ताश्च शरवर्षैरवाकिरन् ॥ ३९ ॥ तेषामिषूनथास्त्राणि वेगवान्नतपर्वभिः। अच्छिनत् सात्यकीराजन् नैनं ते प्राप्नुवन् शराः ॥ ४० ॥ रुक्मपुङ्खैः सुनिशितैर्गार्द्धपत्रैरजिह्मगैः। उच्चकर्त्त शिरांस्युग्रो यवनानां भुजानपि ॥ ४१ ॥ शैक्यायसानि वर्माणि कांस्यानि च समन्ततः। भित्त्वा देहांस्तथा तेषां शरा जग्मुर्महीतलम् ॥ ४२ ॥ ते हन्यमाना वीरेण म्लेच्छाः सात्यकिना रणे। शतशोऽभ्यपतंस्तत्र व्यसवो वसुधातले ॥ ४३ ॥ सुपूर्णायतमुक्तैस्तानव्यवच्छिन्नपिण्डितैः। पञ्च षट् सप्त चाष्टौ च विभेद यवनाञ्छरैः ॥ ४४ ॥ काम्बोजानां सहस्रैस्तु शकानाञ्च विशाम्पते। शवराणां किरातानां वर्वराणां तथैव च ॥ ४५ ॥ अगम्यरूपां पृथिवीं मांसशोणितकर्द्दमाम्। कृतवांस्तत्र शैनेयः क्षपयंस्तावकं बलम् ॥ ४६ ॥ दस्यूनां सशिरस्त्राणैः शिरोभिर्लूनमूर्द्धजैः। दीर्घकूर्च्चैर्मही कीर्णा विवर्हैरण्डजैरिव ॥ ४७ ॥ रुधिरोक्षितसर्वाङ्गैस्तैस्तदायोधनं बभौ। कबन्धैः संवृतं सर्वं ताम्राभैः खमिवावृतम् ॥ ४८ ॥ वज्राशनिसमस्पर्शैः सुपर्वभिरजिह्मगैः। ते सात्वतेन निहताः समावव्रुर्वसुन्धराम् ॥ ४९ ॥ अल्पावशिष्टाः सम्भग्नाः कृच्छ्रप्राणा विचेतसः। जिताः सङ्ख्ये

महाराज युयुधानेन दंशिताः ॥ ५० ॥ पार्ष्णिभिश्च कशाभिश्च ताड़यन्तस्तुरङ्गमान् । जवमुत्तममास्थाय सर्व्वतः प्राद्रवन् भयात् ॥ ५१ ॥ काम्बोजसैन्यं विद्राव्य दुर्ज्जयं युधि भारत । यवनानाञ्च तत्सैन्यं शकानाञ्च महद्बलम् ॥ ५२ ॥ ततः स पुरुषव्याघ्रः सात्यकिः सत्यविक्रमः । प्रविष्टस्तावकान् जित्वा सूतं याहीत्यचोदयत् ॥ ५३ ॥ तत्तस्य समरे कर्म्म दृष्ट्वान्यैरकृतं पुरा । चारणाः सहगन्धर्व्वाः पूजयाञ्चक्रिरे भृशम् ॥ ५४ ॥ तं यान्तं पृष्ठगोप्तारमर्ज्जुनस्य विशाम्पते । चारणाः प्रेक्ष्य संहृष्टास्त्वदीयाश्चाभ्यपूजयन् ॥ ५५ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि यवनपराजये
एकोनविंशत्यधिकशततोऽध्यायः ॥ ११९ ॥

---

सञ्जय उवाच । जित्वा यवनकाम्बोजान् युयुधानस्ततोऽर्ज्जुनम् । जगाम तव सैन्यस्य मध्येन रथिनाम्वरः ॥ १ ॥ चारुदंष्ट्रो नरव्याघ्रो विचित्रकवचध्वजः । मृगं व्याध इवाजिघ्नन् तव सैन्यमभीषयत् ॥ २ ॥ स रथेन चरन्मार्गं धनुरभ्रामयद्भृशम् । रुक्मपृष्ठं महावेगं रुक्मचन्द्रकसङ्कुलम् ॥ ३ ॥ रुक्माङ्गदशिरस्त्राणो रुक्मवर्म्मसमावृतः । रुक्मध्वजधनुः शूरो मेरुशृङ्गमिवाबभौ ॥ ४ ॥ स धनुर्म्मण्डलं सङ्ख्ये तेजोभास्कररश्मिवान् । शरदीवोदितः सूर्य्यो द्विसूर्य्यो विरराज ह ॥ ५ ॥ वृषभस्कन्धविक्रान्तो वृषभाक्षो नरर्षभः । तावकानां बभौ मध्ये गवां मध्ये यथा वृषः ॥६॥ मत्तद्विरदसङ्काशं मत्तद्विरदगामिनम् । प्रभिन्नमिव मातङ्गं यूथमध्ये व्यवस्थितम् ॥ ७ ॥ व्याघ्रा इव जिघांसन्तस्त्वदीयाः समुपाद्रवन् । द्रोणानीकमतिक्रान्तं भोजानीकञ्च दुस्तरम् ॥ ८ ॥ जलसन्धार्णवं तीर्त्वा काम्बोजानाञ्च वाहिनीम् । हार्द्दिक्यमकरा-

न्मुक्तं तीर्णं वै सैन्यसागरम् ॥ ९ ॥ परिवव्रुः सुसंक्रुद्धास्त्वदीयाः सात्यकिं रथाः । दुर्य्योधनश्चित्रसेनो दुःशासनविविंशती ॥ १० ॥ शकुनिर्दुःसहश्चैव युवा दुर्धर्षणः क्रथः । अन्ये च बहवः शूराः शस्त्रवन्तो दुरासदाः ॥ ११ ॥ पृष्ठतः सात्यकिं यान्तं अन्वधावन्नमर्षिणः । अथ शब्दो महानासीत्तव सैन्यस्य मारिष ॥ १२ ॥ मारुतोद्धूतवेगस्य सागरस्येव पर्वणि । तानभिद्रवतः सर्वान् समीक्ष्य शिनिपुङ्गवः ॥ १३ ॥ शनैर्याहीति यन्तारमब्रवीत् प्रहसन्निव । इदमेतत् समुद्धुतं धार्त्तराष्ट्रस्य यद्बलम् ॥ १४ ॥ मामेवाभिमुखं तूर्णं गजाश्वरथपत्तिमत् । नादयद्वै दिशः सर्वा रथघोषेण सारथे ॥ १५ ॥ पृथिवीञ्चान्तरीक्षञ्च कम्पयत् सागरानपि । एतद्बलार्णवं सूत वारयिष्ये महारणे ॥ १६ ॥ पौर्णमास्यामिवोद्धूतं वेलेव मकरालयम् । पश्य मे सूत विक्रान्तमन्द्रस्येव महामृधे ॥ १७ ॥ एष सैन्यानि शत्रूणां विधमामि शितैः शरैः । निहतानाहवे पश्य पदात्यश्वरथद्विपान् ॥ १८ ॥ मच्छरैरग्निसङ्काशैर्विद्धदेहान् सहस्रशः । इत्येवं ब्रुवतस्तस्य सात्यकेरमितौजसः ॥ १९ ॥ समीपे सैनिकास्ते तु शीघ्रमीयुर्युयुत्सवः । जह्याद्रवस्व तिष्ठेति पश्य पश्येति वादिनः ॥ २० ॥ तानेवं ब्रुवतो वीरान् सात्यकिर्निशितैः शरैः । जघान त्रिशतानश्वान् कुञ्जरांश्च चतुःशतान् ॥ २१ ॥ ससम्प्रहारस्तुमुलस्तस्य तेषाञ्च धन्विनाम् । देवासुररणप्रख्यः प्रावर्त्तत जनक्षयः ॥ २२ ॥ मेघजालनिभं सैन्यं तव पुत्रस्य मारिष । प्रत्यगृह्णाच्छिनेपौत्रः शरैराशीविषोपमैः ॥ २३ ॥ प्रच्छाद्यमानः समरे शरजालैः स वीर्य्यवान् । असम्भ्रमन्महाराज तावकानवधीद्बहून् ॥ २४ ॥ आश्चर्य्यं तत्र राजेन्द्र सुमहद्दृष्टवाहनम् । न मोघः सायकः कश्चित् सात्यकेरभवत् प्रभो ॥ २५ ॥ रथनागाश्वकलिलः पदात्यर्मिसमाकुलः । शैनेयवेलामासाद्य स्थितः सैन्यमहार्णवः ॥२६॥

सम्भ्रान्तनरनागाश्वमावर्त्तितमुहुर्म्मुहुः । तत्सैन्यमिषुभिस्तेन बध्य-
मानं समन्ततः ॥ २७ ॥ बभ्राम तत्र तत्रैव गावः शीतार्द्दिता
इव । पदातिनं रथं नागं सादिनं तुरगन्तथा ॥ २८ ॥ अविद्धं
तत्र नाद्राक्षं युयुधानस्य सायकैः । न तादृक् कदनं राजन् कृतवां-
स्तत्र फाल्गुनः ॥ २९ ॥ यादृक् क्षयमनीकानामकरोत् सात्यकि-
र्नृप । अत्यर्जुनं शिनेः पौत्रो युध्यते पुरुषर्षभ ॥ ३० ॥ वीतभी-
र्लाघवोपेतः कृतित्वं सम्प्रदर्शयन् । ततो दुर्य्योधनो राजा सात्व-
तस्य त्रिभिः शरैः ॥ ३१ ॥ विव्याध सूतं निशितैश्चतुर्भिश्चतुरो
हयान् । सात्यकिञ्च त्रिभिर्विद्ध्वा पुनरष्टाभिरेव च ॥ ३२ ॥ दुःशा-
सनः षोड़शभिर्विव्याध शिनिपुङ्गवम् । शकुनिः पञ्चविंशत्या
चित्रसेनश्च पञ्चभिः ॥ ३३ ॥ दुःसहः पञ्चदशभिर्विव्याधोरसि सात्य-
किम् । उत्स्मयन् वृष्णिशार्दूलस्तथा बाणैः समाहतः ॥ ३४ ॥
तानविध्यन्महाराज सर्व्वानेव त्रिभिस्त्रिभिः । गाढ़विद्धानरीन् कृत्वा
मार्गणैः सोऽतितेजनैः ॥ ३५ ॥ शैनेयः श्येनवत् सङ्ख्ये व्यचरल्लघु-
विक्रमः । सौबलस्य धनुश्छित्त्वा हस्तावापं निकृत्य च ॥ ३६ ॥
दुर्य्योधनं त्रिभिर्बाणैरभ्यविध्यत् स्तनान्तरे । चित्रसेनं शतेनैव
दशभिर्दुःसहं तथा ॥ ३७ ॥ दुःशासनन्तु विंशत्या विव्याध शिनि-
पुङ्गवः । अथान्यद्धनुरादाय श्यालस्तव विशाम्पते ॥ ३८ ॥ अष्टाभिः
सात्यकिं विद्ध्वा पुनर्विव्याध पञ्चभिः । दुःशासनश्च दशभिर्दुःसहश्च
त्रिभिः शरैः ॥ ३९ ॥ दुर्म्मुखश्च द्वादशभीराजन् विव्याध सात्य-
किम् । दुर्य्योधनस्त्रिसप्तत्या विद्ध्वा भारत माधवम् ॥ ४० ॥
ततोऽस्य निशितैर्बाणैस्त्रिभिर्विव्याध सारथिम् । तान् सर्व्वान्
सहितान् शूरान् यतमानान्महारथान् ॥ ४१ ॥ पञ्चभिः पञ्चभि-
र्बाणैः पुनर्विव्याध सात्यकिः । ततः स रथिनां श्रेष्ठस्तव पुत्रस्य
सारथिम् ॥ ४२ ॥ आजघानाशु भल्लेन स हतो न्यपतद्भुवि ।
पतिते सारथौ तस्मिन् तव पुत्ररथः प्रभो ॥ ४३ ॥ वातायमानै-

स्तैयश्चैरपनीयत सङ्गरात्। ततस्तव सुतो राजन् सैनिकाश्च विशाम्पते ॥ ४४ ॥ राज्ञो रथमभिप्रेच्य विद्रुताः शतशोऽभवन्। विद्रुतं तत्र तत्सैन्यं दृष्ट्वा भारत सात्यकिः ॥ ४५ ॥ अवाकिरच्छरैस्तीच्णैरुक्मपुङ्खैः शिलाशितैः। विद्राव्य सर्वसैन्यानि तावकानि सहस्रशः ॥ ४६ ॥ प्रययौ सात्यकीराजन् श्वेताश्वस्य रथं प्रति। तं शस्त्रानाददानञ्च रक्षमाणञ्च सारथिम्। आत्मानं पालयानञ्च तावकाः समपूजयन् ॥ ४७ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे विंशत्यधिकशततोऽध्यायः ॥ १२० ॥

---

धृतराष्ट्र उवाच। सम्प्रमृद्य महत्सैन्यं यान्तं शैनेयमर्जुनम्। निर्ह्रीका मम ते पुत्राः किमकुर्वत सञ्जय ॥ १ ॥ कथं तेषां तदा युद्धे धृतिरासीन्मुमूर्षताम्। शैनेये समनुप्राप्ते सदृशे सव्यसाचिना ॥ २ ॥ विदधे किन्नु तत्चत्रं ते च युद्धपराजिताः। कथञ्च सात्यकिर्युद्धे व्यतिक्रान्तो महायशाः ॥ ३ ॥ कथञ्च मम पुत्राणां जीवतां तत्र सञ्जय। शैनेयोऽभिययौ युद्धे तन्ममाचक्ष्व सञ्जय ॥ ४ ॥ अत्यद्भुतमिदं तात त्वत्सकाशात् श्रुतं मया। एकस्य बहुभिर्युद्धं शत्रुभिस्तैर्महारथैः ॥ ५ ॥ विपरीतमहं दैवं मन्ये सूत सुतान् प्रति। यत्रावधन्त समरे सात्वतेन महारथाः ॥६॥ एकस्य हि न पर्य्याप्तं मत्सैन्यं तस्य सञ्जय। क्रुद्धस्य युयुधानस्य सर्वे तिष्ठन्तु पाण्डवाः ॥ ७ ॥ निर्जित्य समरे द्रोणं कृतिनञ्चित्रयोधिनम्। यथा पशुगणान् सिंहस्तद्धन्ता सुतान्मम ॥ ८ ॥ कृतवर्मादिभिः शूरैर्यत्तैर्बहुभिराहवे। युयुधानो न शकितो हन्तुं जेष्यति मे सुतान् ॥ ९ ॥ नैतदीदृशकं युद्धं कृतवांस्तत्र फाल्गुनः। यादृशं कृतवान् युद्धं शिनेर्नप्ता महायशाः ॥ १० ॥

सञ्जय उवाच। तव दुर्मन्त्रिते राजन् दुर्य्योधनकृतेन च। शृणुष्वावहितो भूत्वा यत्ते वक्ष्यामि भारत॥ ११॥ ते पुनः संन्यवर्त्तन्त कृत्वा संशप्तका मिथः। परां युद्धे मतिं क्रूरां तव पुत्रस्य शासनात्॥ १२॥ त्रीणि सादिसहस्राणि दुर्य्योधनपुरोगमाः। शककाम्बोजवाह्लिका यवनाः पारदास्तथा॥ १३॥ कुलिङ्गास्तङ्गणाम्बष्ठाः पैशाचाश्च सबर्व्वराः। पार्व्वतीयाश्च राजेन्द्र क्रुद्धाः पाषाणपाणयः॥ १४॥ अभ्यद्रवंस्ते शैनेयं शलभाः पावकं यथा। युक्ताः पञ्चशता राजन् शैनेयं समुपाद्रवन्॥ १५॥ ततो रथसहस्रेण महारथशतेन च। द्विरदानां सहस्रेण द्विसाहस्रैश्च वाजिभिः॥ १६॥ शरवर्षाणि मुञ्चन्तो विविधानि महारथाः। अभ्यद्रवंस्ते शैनेयमसङ्ख्येयाः परन्तप॥ १७॥ तांश्च सञ्चोदयन् सर्व्वान् घ्नतैनमिति भारत। दुःशासनो महाराज सात्यकिं पर्य्यवारयत॥ १८॥ तत्राद्भुतमपश्याम शैनेयचरितं महत्। यदेको बहुभिः सार्द्धमसम्भ्रान्तमयुध्यत॥ १९॥ अवधीच्च रथानीकं द्विरदानाञ्च तद्बलम्। सादिनश्चैव तान् सर्व्वान् दस्यूनपि च सर्व्वशः॥ २०॥ तत्र चक्रैर्विमथितैर्भग्नैश्च परमायुधैः। अक्षैश्च बहुधा भग्नैरीषादण्डकबन्धुरैः॥ २१॥ कुञ्जरैर्मथितैश्चापि ध्वजैश्च विनिपातितैः। वर्म्मभिश्चर्म्मभिश्चैव विकीर्णैश्च समन्ततः॥ २२॥ स्रग्भिराभरणैर्वस्त्रैरनुकर्षैश्च मारिष। संछन्ना वसुधा तत्र शरदि द्यौर्ग्रहैरिव॥ २३॥ गिरिरूपधराश्चापि पतिताः कुञ्जरोत्तमाः। अञ्जनस्य कुले जाता वामनस्य च भारत॥ २४॥ सुप्रतीककुले जाता महापद्मकुले तथा। ऐरावतकुले चैव तथान्येषु कुलेषु च॥ २५॥ जाता दन्तिवरा राजन् शेरते बहवो हताः। वानायुजान् पार्व्वतीयान् काम्बोजानथ वाह्लिकान्॥ २६॥ तथा हयवरान्राजन् निजघ्ने तत्र सात्यकिः। नानादेशोद्भवान् पत्तीन्नानाजातींश्च सर्व्वशः॥ २७॥ निजघ्ने

तत्र शैनेयः शतशोऽथ सहस्रशः। तेषु प्रकाल्यमानेषु दस्यून् दुःशासनोऽब्रवीत्॥ २८॥ निवर्त्तध्वमधर्मज्ञा युध्यध्वं किं सृतेन वः। तांश्चातिभग्नान् सम्प्रेक्ष्य पुत्रो दुःशासनस्तव॥ २९॥ पाषाणयोधिनः शूरान् पार्वतीयानचोदयत्। अश्मयुद्धेषु कुशलो नैतज्जानाति सात्यकिः॥ ३०॥ अश्मयुद्धमजानन्तं हतैनं युद्धकार्मुकम्। तथैव कुरवः सर्वे नाश्मयुद्धविशारदाः॥ ३१॥ अभिद्रवत माभैष्ट न वः प्राप्स्यति सात्यकिः। ते पार्वतीया राजानः सर्वे पाषाणयोधिनः॥ ३२॥ अभ्यद्रवन्त शैनेयं राजानमिव मन्त्रिणः। ततो गजशिरःप्रख्यैरुपलैः शैलवासिनः॥ ३३॥ उद्यतैर्युयुधानस्य पुरतस्तस्थुराहवे। क्षेपणीयैस्तथाप्यन्ये सात्वतस्य वधैषिणः॥ ३४॥ चोदितास्तव पुत्रेण सर्वतो रुरुधुर्दिशः। तेषामापततामेव शिलायुद्धं चिकीर्षताम्॥ ३५॥ सात्यकिः प्रतिसन्धाय निशितान् प्राहिणोच्छरान्। तामश्मवृष्टिं तुमुलां पार्वतीयैः समीरिताम्॥ ३६॥ चिच्छेदोरगसङ्काशैर्नाराचैः शिनिपुङ्गवः। तैरश्मचूर्णैर्दीप्यद्भिः खद्योतानामिव व्रजैः॥ ३७॥ प्रायः सैन्यान्यहन्यन्त हाहाभूतानि मारिष। ततः पञ्चशताः शूराः समुद्यतमहाशिलाः॥ ३८॥ निकृत्तबाहवो राजन् निपेतुर्धरणीतले। पुनर्दशशताश्चान्ये शतसाहस्रिणस्तथा॥ ३९॥ सोपलैर्बाहुभिश्छिन्नैः पेतुरप्राप्य सात्यकिम्। पाषाणयोधिनः शूरान् यतमानानवस्थितान्॥ ४०॥ न्यवधीद्बहुसाहस्रांस्तदद्भुतमिवाभवत्। ततः पुनस्तु सम्भूय तेऽश्मवृष्टिं समन्ततः॥ ४१॥ अयोहस्ताः शूलहस्ता दरदास्तङ्गणाः खशाः। लम्पाकाश्च पुलिन्दाश्च चिक्षिपुस्तांश्च सात्यकिः॥ ४२॥ नाराचैः प्रतिचिच्छेद प्रतिपत्तिविशारदः। अद्रीणां भिद्यमानानामन्तरीक्षे शितैः शरैः॥ ४३॥ शब्देन प्राद्रवन् सङ्ख्ये रथाश्वगजपत्तयः। अश्मचूर्णैरवाकीर्णा मनुष्या गजवाजिनः॥ ४४॥ नाशक्नुवन्नवस्थातुं

भ्रमरैरिव दंशिताः। हतशिष्टाः सरुधिरा भिन्नमस्तकपिण्डिकाः ॥ ४५ ॥ कुञ्जरा वर्ज्जयामासुर्युयुधानरथं तदा। ततः शब्दः समभवत् तव सैन्यस्य मारिष ॥ ४६ ॥ माधवेनार्द्यमानस्य सागरस्येव पर्वणि। तं शब्दं तुमुलं श्रुत्वा द्रोणो यन्तारमब्रवीत् ॥४७॥ एष सूत रणे क्रुद्धः सात्त्वतानां महारथः। दारयन् बहुधा सैन्यं रणे चरति कालवत् ॥ ४८ ॥ यत्रैष शब्दस्तुमुलस्तत्र सूत रथं नय। पाषाणयोधिभिर्न्नूनं युयुधानः समागतः ॥ ४९ ॥ तथाहि रथिनः सर्वे ह्रियन्ते विद्रुतैर्हयैः। विशस्त्रकवचा रुग्णास्तत्र तत्र पतन्ति च ॥ ५० ॥ न शक्नुवन्ति यन्तारः संयन्तुं तुमुले हयान्। इत्येतद्वचनं श्रुत्वा भारद्वाजस्य सारथिः ॥ ५१ ॥ प्रत्युवाच ततो द्रोणं सर्वशस्त्रभृताम्वरम्। सैन्यं द्रवति चायुष्मन् कौरवेयं समन्ततः ॥ ५२ ॥ पश्य योधान्रणे भग्नान् धावतो वै समन्ततः। इमे च संहता शूरा पाञ्चालाः पाण्डवैः सह ॥ ५३ ॥ त्वामेव हि जिघांसन्त आद्रवन्ति समन्ततः। अत्र कार्य्यं समाधत्स्व प्राप्तकालमरिन्दम ॥ ५४ ॥ स्थाने वा गमने वापि दूरं यातश्च सात्यकिः। तथैवं वदतस्तस्य भारद्वाजस्य मारिष ॥ ५५ ॥ प्रत्यदृश्यत शैनेयो निघ्नन् बहुविधान्रथान्। ते वध्यमानाः समरे युयुधानेन तावकाः ॥ ५६ ॥ युयुधानरथं त्यक्त्वा द्रोणानीकाय दुद्रुवुः। यैस्तु दुःशासनः सार्द्धं रथैः पूर्वं न्यवर्त्तत। ते भीतास्त्वभ्यधावन्त सर्वे द्रोणरथं प्रति ॥ ५७॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे एकविंशत्यधिकशतोऽध्यायः ॥ १२१ ॥

---

सञ्जय उवाच। दुःशासनरथं दृष्ट्वा समीपे पर्य्यवस्थितम्। भारद्वाजस्ततो वाक्यं दुःशासनमथाब्रवीत् ॥ १ ॥ दुःशासन रथाः

सर्व्वे कस्माच्चैते प्रविद्रुताः। कच्चित् क्षेमन्तु नृपतेः कच्चिज्जीवति सैन्धवः॥ २॥ राजपुत्रो भवानत्र राजभ्राता महारथः। किमर्थं द्रवते युद्धे यौवराज्यमवाप्नुहि॥ ३॥ दासी जितासि द्यूते त्वं यथाकामचरो भव। वाससां वाहिका राज्ञो भ्रातुर्ज्येष्ठस्य मे भव॥ ४॥ न सन्ति पतयः सर्व्वे तेऽद्य षण्डतिलैः समाः। दुःशासनैवं कस्मात्त्वं पूर्व्वमुक्त्वा पलायसे॥ ५॥ स्वयं वैरं महत् कृत्वा पाञ्चालैः पाण्डवैः सह। एकं सात्यकिमासाद्य कथं भीतोऽसि संयुगे॥ ६॥ न जानीषि पुरा त्वन्तु गृह्णन्नक्षान् दुरोदरे। शरा ह्येते भविष्यन्ति दारुणाशीविषोपमाः॥ ७॥ अप्रियाणां हि वचसां पाण्डवेषु विशेषतः। द्रौपद्याश्च परिक्लेशस्त्वन्मूलो ह्यभवत् पुरा॥ ८॥ क्व ते मानश्च दर्पश्च क्व ते वीर्य्यं क्व दर्पितम्। आशीविषसमान् पार्थान् कोपयित्वा क्व यास्यसि॥ ९॥ शोच्येयं भारती सेना राजा चैवं सुयोधनः। यस्य त्वं कर्कशो भ्राता पलायनपरायणः॥ १०॥ ननु नाम त्वया वीर दीर्य्यमाणा भयार्द्दिता। स्वबाहुबलमास्थाय रक्षितव्या ह्यनीकिनी॥ ११॥ स त्वमद्य रणं हित्वा भीतो हर्षयसे परान्। विद्रुते त्वयि सैन्यस्य नायके शत्रुसूदन॥ १२॥ कोऽन्यः स्थास्यति सङ्ग्रामे भीतो भीतव्यपाश्रयः। एकेन सात्वतेनाद्य युध्यमानस्य तेन वै॥ १३॥ पलायने तव मतिः सङ्ग्रामाद्धि प्रवर्त्तते। यदा गाण्डीवधन्वानं भीमसेनञ्च कौरव॥ १४ यमौ वा युधि द्रष्टासि तदा त्वं किं करिष्यसि। युधि फाल्गुनवाणानां सूर्य्याग्निसमवर्चसाम्॥ १५॥ न तुल्याः सात्यकिशराः येन भीतः पलायसे। यदि तावत् कृता बुद्धिः पलायनपरायणा॥ १६॥ पृथिवी धर्मराजाय शमेनैव प्रदीयताम्। यावत् फाल्गुननाराचा निर्मुक्तोरगसन्निभाः॥ १७॥ नाविशन्ति शरीरन्ते तावत् संशाम्य पाण्डवैः। यावत्ते पृथिवीं पार्था हत्वा भ्रातृशतं रणे॥ १८॥

नाक्षिपन्ति महात्मानस्तावत् संग्राम्य पाण्डवैः। यावत् क्रुध्यति नो राजा धर्मपुत्रो युधिष्ठिरः ॥ १९ ॥ कृष्णश्च समरश्लाघी तावत् संग्राम्य पाण्डवैः। यावद्भीमो महाबाहुर्विगाह्य महतीञ्चमून् ॥ २० ॥ सोदरांस्ते न गृह्णाति तावत् संग्राम्य पाण्डवैः। पूर्व्वमुक्तश्च ते भ्राता भीष्मेणासौ सुयोधनः ॥ २१ ॥ अजेयाः पाण्डवाः सङ्ख्ये सौम्य संग्राम्य तैः सह। न च तत् कृतवान् मन्दस्तव भ्राता सुयोधनः ॥ २२ ॥ स युद्धे धृतिमास्थाय यत्तो युध्यस्व पाण्डवैः। गच्छ तूर्णं रथेनैव यत्र तिष्ठति सात्यकिः ॥ २३ ॥ त्वया हीनं बलं ह्येतद्विद्रविष्यति भारत। आत्मार्थं योधय रणे सात्यकिं सत्यविक्रमम् ॥ २४ ॥ एवमुक्तस्तव सुतो नाब्रवीत् किञ्चिदप्यसौ। श्रुतञ्चाश्रुतवत् कृत्वा प्रायाद्येन स सात्यकिः ॥ २५ ॥ सैन्येन महता युक्तो म्लेच्छानामनिवर्त्तिनाम्। आसाद्य च रणे यत्तो युयुधानमयोधयत् ॥ २६ ॥ द्रोणोऽपि रथिनां श्रेष्ठः पाञ्चालान् पाण्डवांस्तथा। अभ्यद्रवत संक्रुद्धो जवमास्थाय मध्यमम् ॥ २७ ॥ प्रविश्य च रणे द्रोणः पाण्डवानां वरूथिनीम्। द्रावयामास योधान् वै शतशोऽथ सहस्रशः ॥२८॥ ततो द्रोणो महाराज नाम विश्राव्य संयुगे। पाण्डुपाञ्चालमत्स्यानां प्रचक्रे कदनं महत् ॥ २९ ॥ तं जयन्तमनीकानि भारद्वाजं ततस्ततः। पाञ्चालपुत्रो द्युतिमान् वीरकेतुः समभ्ययात् ॥ ३० ॥ स द्रोणं पञ्चभिर्विद्ध्वा शरैः सन्नतपर्व्वभिः। ध्वजमेकेन विव्याध सारथिञ्चास्य सप्तभिः ॥ ३१ ॥ तत्राद्भुतं महाराज दृष्टवानस्मि संयुगे। यद्द्रोणो रभसो युद्धे पाञ्चाल्यं नाभ्यवर्त्तत ॥ ३२ ॥ सन्निरुद्धं रणे द्रोणं पाञ्चाला वीक्ष्य मारिष। आवव्रुः सर्व्वतो राजन् धर्मपुत्रजयैषिणः ॥ ३३ ॥ तैः शरैरग्निसङ्काशैस्तोमरैश्च महाधनैः। शस्त्रैश्च विविधैराजन् द्रोणमेवसमाकिरन् ॥ ३४ ॥ निहत्य तान् बाणगणैर्द्रोणो राजन् सम-

न्ततः। महाजलधरान् व्योम्नि मातरिश्वा इवावभौ ॥ ३५ ॥
ततः शरं महाघोरं सूर्य्यपावकसन्निभम्। सन्दधे परवीरघ्नो
वीरकेतोरथं प्रति ॥ ३६ ॥ स भित्त्वा तु शरो राजन् पाञ्चाल-
कुलनन्दन। अभ्यगाद्धरणीं तूर्णं लोहितार्द्रो ज्वलन्निव ॥ ३७ ॥
ततोऽपतद्रथात्तूर्णं पाञ्चालाकुलनन्दनः। पर्वताग्रादिव महां-
श्चम्पे वायुपीड़ितः ॥ ३८ ॥ तस्मिन् हते महेष्वासे राजपुत्रे
महाबले। पाञ्चालास्त्वरिता द्रोणं समन्तात् पर्य्यवारयन् ॥३९॥
चित्रकेतुः सुधन्वा च चित्रवर्मा च भारत। तथा चित्ररथश्चैव
भ्रातृव्यसनकर्षिताः ॥ ४० ॥ अभ्यद्रवन्त सहिता भारद्वाजं
युयुत्सवः। मुञ्चन्तः शरवर्षाणि तपान्ते जलदा इव ॥ ४१ ॥
स बध्यमानो बहुधा राजपुत्रैर्महारथैः। क्रोधमाहारयत्तेषा-
मभावाय द्विजर्षभः ॥ ४२ ॥ ततः शरमयं जालं द्रोणस्तेषा-
मवासृजत्। ते हन्यमाना द्रोणस्य शरैराकर्णचोदितैः ॥ ४३ ॥
कर्त्तव्यं नाभ्यजानन् वै कुमारा राजसत्तम। तान् विमूढान् रणे
द्रोणः प्रहसन्निव भारत ॥ ४४ ॥ व्यश्वसूतरथांश्चक्रे कुमारान्
कुपितो रणे। तथा शरैः सुनिशितैर्भल्लैस्तेषां महायशाः ॥ ४५ ॥
पुष्पाणीव विचिन्वान् उत्तमाङ्गान्यपातयत्। ते रथेभ्यो हताः
पेतुः क्षितौ राजन् सुवर्चसः ॥ ४६ ॥ देवासुरे पुरा युद्धे यथा
दैतेयदानवाः। तान्निहत्य रणे राजन् भारद्वाजः प्रतापवान्
॥ ४७ ॥ कार्मुकं भ्रामयामास हेमपृष्ठं दुरासदम्। पाञ्चाला-
न्निहतान् दृष्ट्वा देवकल्पान्महारथान् ॥ ४८ ॥ धृष्टद्युम्नो रणे
क्रुद्धो नेत्राभ्यां पातयञ्जलम्। अभ्यवर्त्तत सङ्ग्रामे क्रुद्धो द्रोण-
रथं प्रति ॥ ४९ ॥ ततो हाहेति सहसा नादः समभवन्नृप।
पाञ्चाल्येन रणे दृष्ट्वा द्रोणमावारितं शरैः ॥ ५० ॥ स छाद्य-
मानो बहुधा पार्षतेन महात्मना। न विव्यथे ततो द्रोणः स्मय-
न्नेवान्वयुध्यत ॥ ५१ ॥ ततो द्रोणं महाराज पाञ्चाल्यः क्रोध-

मूर्च्छितः। आजघानोरसि क्रुद्धो नवत्या नतपर्व्वणाम् ॥ ५२ ॥
स गाढ़विद्धो बलिना भारद्वाजो महायशाः। निषसाद रथो-
पस्थे कश्मलञ्च जगाम ह ॥ ५३ ॥ तं वै तथागतं दृष्ट्वा धृष्टद्युम्नः
पराक्रमी। चापमुत्सृज्य शीघ्रन्तु असिं जग्राह वीर्य्यवान् ॥५४॥
अवप्लुत्य रथाच्चापि त्वरितः स महारथः। आरुरोह रथं तूर्णं
भारद्वाजस्य मारिष ॥ ५५ ॥ हर्त्तुमिच्छन् शिरः कायात् क्रोध-
संरक्तलोचनः। प्रत्याश्वस्तस्ततो द्रोणो धनुरादाय वीर्य्यवान्
॥ ५६ ॥ आसन्नमागतं दृष्ट्वा धृष्टद्युम्नं जिघांसया। शरैर्वैत-
स्तिकैराजन् विव्याधासन्नयोधिभिः ॥ ५७ ॥ योधयामास समरे
धृष्टद्युम्नं महारथम्। ते हि वैतस्तिका नाम शरा आसन्न
योधिनः ॥ ५८ ॥ द्रोणस्य विदिता राजन् यैर्धृष्टद्युम्नमक्षिणोत्।
स बध्यमानो बहुभिः सायकैस्तैर्महाबलः ॥ ५९ ॥ अवप्लुत्य रथा-
त्तूर्णं भग्नवेगः पराक्रमी। आरुह्य स्वरथं वीरः प्रगृह्य च मह-
द्धनुः ॥ ६० ॥ विव्याध समरे द्रोणं धृष्टद्युम्नो महारथः। द्रोण-
श्चापि महाराज शरैर्विव्याध पार्षतम् ॥ ६१ ॥ तदद्भुतमभूद्युद्धं
द्रोणपाञ्चालयोस्तदा। त्रैलोक्यकाङ्क्षिणोरासीच्छक्रप्रह्लादयोरिव
॥ ६२ ॥ मण्डलानि विचित्राणि यमकानीतराणि च। चरन्तौ
युद्धमार्गज्ञौ ततक्षतुरथेषुभिः ॥ ६३ ॥ मोहयन्तौ मनांस्याजौ
योधानां द्रोणपार्षतौ। सृजन्तौ शरवर्षाणि वर्षास्विव बलाहकौ
॥ ६४ ॥ छादयन्तौ महात्मानौ शरैर्व्योम दिशो महीम्। तद-
द्भुतं तयोर्युद्धं भूतसङ्घा ह्यपूजयन् ॥ ६५ ॥ क्षत्रियाश्च महाराज
ये चान्ये तव सैनिकाः। अवश्यं समरे द्रोणो धृष्टद्युम्नेन सङ्गयः
॥ ६६ ॥ वशमेष्यति नो राजन् पाञ्चाला इति चुक्रुशुः। द्रोणस्तु
त्वरितो युद्धे धृष्टद्युम्नस्य सारथेः ॥ ६७ ॥ शिरः प्रच्यावयामास
फलं पक्वं तरोरिव। ततस्तु प्रद्रुता वाहा राजंस्तस्य महात्मनः
॥ ६८ ॥ तेषु प्रद्रवमाणेषु पाञ्चालान् सृञ्जयांस्तथा। व्यद्रावय-

रणे द्रोणस्तत्र तत्र पराक्रमी ॥ ६९ ॥ विजित्य पाण्डुपाञ्चालान् भारद्वाजः प्रतापवान्। स्वं व्यूहं पुनरास्थाय प्रत्यतिष्ठदरिन्दमः। न चैनं पाण्डवा युद्धे जेतुमुत्सेहिरे प्रभो ॥ ७० ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि द्रोणपराक्रमे
द्वाविंशत्यधिकशततोऽध्यायः ॥ १२२ ॥

---

सञ्जय उवाच। ततो दुःशासनो राजन् शैनेयं समुपाद्रवत्। किरन् शरसहस्राणि पर्जन्य इव वृष्टिमान् ॥ १ ॥ स विद्धा सात्यकिं षष्ट्या तथा षोड़शभिः शरैः। नाकम्पयत् स्थितं युद्धे मैनाकमिव पर्वतम् ॥ २ ॥ रथव्रातेन महता नानादेशोद्भवेन च। सर्वतो भरतश्रेष्ठो विसृजन् सायकान् बहून् ॥ ३ ॥ पर्जन्य इव घोषेण नादयन् वै दिशो दश। तमापतन्तमालोक्य सात्यकिः कौरवं रणे ॥ ४ ॥ अभिद्रुत्य महाबाहुश्छादयामास सायकैः। ते छाद्यमाना बाणौघैर्दुःशासनपुरोगमाः ॥ ५ ॥ प्राद्रवन् समरे भीतास्तव पुत्रस्य पश्यतः। तेषु द्रवत्सु राजेन्द्र पुत्रो दुःशासनस्तव ॥ ६ ॥ तस्थौ व्यपेतभीरराजन् सात्यकिञ्चार्द्दयच्छरैः। चतुर्भिर्वाजिनस्तस्य सारथिञ्च त्रिभिः शरैः ॥ ७ ॥ सात्यकिञ्च शतेनाजौ विद्धा नादं मुमोच ह। ततः क्रुद्धो महाराज माधवस्तस्य संयुगे ॥ ८ ॥ रथं सूतं ध्वजं तञ्च चक्रेऽदृश्यमजिह्मगैः। स तु दुःशासनं शूरं सायकैरावृणोद्भृशम् ॥ ९ ॥ मशकं समनुप्राप्तमूर्णनाभिरिवोर्णया। त्वरन् समावृणोद्बाणैर्दुःशासनममित्रजित् ॥ १० ॥ दृष्ट्वा दुःशासनं राजा तथा शरशताचितम्। त्रिगर्त्तांश्चोदयामास युयुधानरथं प्रति ॥ ११ ॥ तेऽगच्छन् युयुधानस्य समीपं क्रूरकर्मणः। त्रिगर्त्तानां त्रिसाहस्रा रथा युद्धविशारदाः ॥ १२ ॥ ते तु तं रथवंशेन महता पर्य्यवारयन्। स्थिरां कृत्वा मतिं युद्धे

भूत्वा संशप्तका मिथः ॥ १३ ॥ तेषां प्रपततां युद्धे शरवर्षाणि मुञ्चताम् । योधान् पञ्चशतान् मुख्यान् अग्रानीके व्यपोथयत् ॥ १४ ॥ ते पतन्ति हतास्तूर्णं शिनिप्रवरसायकैः । महामारुतवेगेन भग्ना इव नगाद्द्रुमाः ॥ १५ ॥ नागैश्च बहुधाच्छिन्नैर्ध्वजैश्चैव विशाम्पते । हयैश्च कनकापीड़ैः पतितैस्तत्र मेदिनी ॥ १६ ॥ शैनेयशरसङ्कृत्तैः शोणितौघपरिप्लुतैः । अशोभत महाराज किंशुकैरिव पुष्पितैः ॥ १७ ॥ ते वध्यमानाः समरे युयुधानेन तावकाः । त्रातारं नाध्यगच्छन्त पङ्कमग्ना इव द्विपाः ॥ १८ ॥ ततस्ते पर्य्यवर्त्तन्त सर्व्वे द्रोणरथं प्रति । भयात् पतगराजस्य गर्त्तानीव महोरगाः ॥ १९ ॥ हत्वा पञ्चशतान् योधान् शरैराशीविषोपमैः । प्रायात् स शनकैर्व्वीरो धनञ्जयरथं प्रति ॥ २० ॥ तं प्रयान्तं नरश्रेष्ठं पुत्रो दुःशासनस्तव । विव्याध नवभिस्तूर्णं शरैः सन्नतपर्व्वभिः ॥ २१ ॥ स तु तं प्रतिविव्याध पञ्चभिर्निशितैः शरैः । रुक्मपुङ्खैर्महेष्वासो गार्द्धपत्रैरजिह्मगैः ॥ २२ ॥ सात्यकिं तं महाराज प्रहसन्निव भारत । दुःशासनस्त्रिभिर्विद्ध्वा पुनर्व्विव्याध पञ्चभिः ॥ २३ ॥ शैनेयस्तव पुत्रन्तु हत्वा पञ्चभिराशुगैः । धनुश्चास्य रणे छित्वा प्रस्मयन्नर्ज्जुनं ययौ ॥२४॥ ततो दुःशासनः क्रुद्धो वृष्णिवीराय गच्छते । सर्व्वपारशवीं शक्तिं विससर्ज्ज जिघांसया ॥ २५ ॥ तान्तु शक्तिं तदा घोरां तव पुत्रस्य सात्यकिः । चिच्छेद स तदा राजन् निशितैः कङ्कपत्रिभिः ॥२६॥ अथान्यद्धनुरादाय पुत्रस्तव जनेश्वर । सात्यकिञ्च शरैर्व्विद्ध्वा सिंहनादं ननर्द्द ह ॥ २७ ॥ सात्यकिस्तु रणे क्रुद्धो मोहयित्वा सुतं तव । शरैरग्निशिखाकारैराजघान स्तनान्तरे ॥ २८ ॥ सर्व्वायसैस्तीक्ष्णवक्त्रैरष्टाभिर्विव्यधे पुनः । दुःशासनस्तु विंशत्या सात्यकिं प्रत्यविध्यत ॥ २९ ॥ सात्वतोऽपि महाराज तं विव्याध स्तनान्तरे । त्रिभिरेव महाभागः शरैः सन्नतपर्व्वभिः ॥ ३० ॥

ततोऽस्य वाहान्निशितैः शरैर्जघ्ने महारथः। सारथिञ्च सुसंक्रुद्धः शरैः सन्नतपर्वभिः॥ ३१॥ धनुरेकेन भल्लेन हस्तावापञ्च पञ्चभिः। ध्वजञ्च रथशक्तिञ्च भल्लाभ्यां परमास्त्रवित्॥ ३२॥ चिच्छेद विशिखैस्तीक्ष्णैस्तथोभौ पार्ष्णिसारथी। स छिन्नधन्वा विरथो हताश्वो हतसारथिः॥ ३३॥ त्रिगर्त्तसेनापतिना स्वरथेनापवाहितः। तमभिद्रुत्य शैनेयो मुहूर्त्तमिव भारत॥ ३४॥ न जघान महाबाहुर्भीमसेनवचः स्मरन्। भीमसेनेन तु वधः सुतानां तव भारत॥ ३५॥ प्रतिज्ञातः सभामध्ये सर्वेषामेव संयुगे। ततो दुःशासनं जित्वा सात्यकिः संयुगे प्रभो। जगाम त्वरितो राजन् येन यातो धनञ्जयः॥ ३६॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे दुःशासनपराजये त्रयोविंशत्यधिकशतोऽध्यायः॥ १२३॥

---

धृतराष्ट्र उवाच। किं तस्यां मम सेनायां नासन् केचिन्महारथाः। ये तथा सात्यकिं यान्तं नैवाघ्नन्नाप्यवारयन्॥ १॥ एको हि समरे कर्म कृतवान् सत्यविक्रमः। शक्रतुल्यबलो युद्धे महेन्द्रो दानवेष्विव॥ २॥ अथ वा शून्यमासीत्तत् येन यातः स सात्यकिः। एको वै बहुलाः सेनाः प्रमृद्नन् सत्यविक्रमः॥ ३॥ कथञ्च युध्यमानानामपक्रान्तो महात्मनाम्। एको बहूनां शैनेयस्तन्ममाचक्ष्व सञ्जय॥ ४॥

सञ्जय उवाच। राजन् सेनासमुद्योगो रथनागाश्वपत्तिनाम्। तुमुलस्तव सैन्यानां युगान्तसदृशोऽभवत्॥ ५॥ आह्निकेषु समूहेषु तव सैन्यस्य मानद। नाभूल्लोके समः कश्चित् समूह इति मे मतिः॥ ६॥ तत्र देवास्त्वभाषन्त चारणाश्च समागताः। एतदन्ताः समूहा वै भविष्यन्ति महीतले॥ ७॥ न च एतादृशो

व्यूह आसीत् कश्चिद्विशाम्पते। यावज्जयद्रथवधे द्रोणेन विहितो-ऽभवत् ॥ ८ ॥ चण्डवातविभिन्नानां समुद्राणामिव स्वनः। रणो-ऽभवद्बलौघानामन्योऽन्यमभिधावताम् ॥ ९ ॥ पार्थिवानां समे-तानां बहून्यासन् नरोत्तम। स्वबले पाण्डवानाञ्च सहस्राणि शतानि च ॥ १० ॥ संरब्धानां प्रवीराणां समरे दृढ़कर्मणाम्। तत्रासीत् सुमहान् शब्दस्तुमुलो लोमहर्षणः ॥ ११ ॥ अथा-क्रन्दद्भीमसेनो धृष्टद्युम्नश्च मारिष। नकुलः सहदेवश्च धर्मराजश्च पाण्डवः ॥ १२ ॥ आगच्छत प्रहरत द्रुतं विपरिधावत। प्रविष्टा-वरिसेनां हि वीरौ माधवपाण्डवौ ॥ १३ ॥ यथासुखेन गच्छेतां जयद्रथरथं प्रति। तथा प्रकुरुत क्षिप्रं इति सैन्यान्यचोदयत् ॥ १४ ॥ तयोरभावे कुरवः कृतार्थाः स्युर्वयं जिताः। ते यूयं सहिता भूत्वा तूर्णमेव बलार्णवम् ॥ १५ ॥ क्षोभयध्वं महावेगाः पवनः सागरं यथा। भीमसेनेम ते राजन् पाञ्चाल्येन च चोदिताः ॥ १६ ॥ आजघ्नुः कौरवान् सङ्ख्ये त्यक्तासूतात्मनः प्रियान्। इच्छन्तो निधनं युद्धे शस्त्रैरुत्तमतेजसः ॥ १७ ॥ स्वर्गप्सवो मित्र कार्य्ये नाभ्यनन्दत जीवितम्। तथैव तावका राजन् प्रार्थयन्तो महद्यशः ॥ १८ ॥ आर्य्यां युद्धे मतिं कृत्वा युद्धायैवावतस्थिरे। तस्मिंस्तु तुमुले युद्धे वर्त्तमाने भयावहे ॥ १९ ॥ जित्वा सर्वाणि सैन्यानि प्रायात् सात्यकिरर्ज्जुनम्। कवचानाम्प्रभास्तत्र सूर्य्य-रश्मिविराजिताः ॥ २० ॥ दृष्टीः सङ्ख्ये सैनिकानां प्रतिजग्मुः समन्ततः। तथा प्रयतमानानां पाण्डवानां महात्मनाम् ॥ २१ ॥ दुर्य्योधनो महाराज व्यगाहत महद्बलम्। स सन्निपातस्तुमुलस्तेषां तस्य च भारत। अभवत् सर्वभूतानामभावकरणो महान् ॥२२॥

धृतराष्ट्र उवाच। तथा यातेषु सैन्येषु तथा कृच्छ्रगतः स्वयम्। कच्चिद्दुर्य्योधनः सूत नाकार्षीत् पृष्ठतो रणम् ॥ २३ ॥ एकस्य च बहूनाञ्च सन्निपातो महाहवे। विशेषतो नरपतेर्विषमः

प्रतिभाति मे ॥ २४ ॥ सोऽत्यन्तसुखसंवृद्धो लक्ष्म्या लोकस्य चेश्वरः । एको बहून् समासाद्य कश्चिन्नासीत् पराङ्मुखः ॥ २५ ॥

सञ्जय उवाच । राजन् सङ्ग्राममाश्चर्य्यं तव पुत्त्रस्य भारत । एकस्य बहुभिः सार्द्धं शृणुष्व गदतो मम ॥ २६ ॥ दुर्य्योधनेन समरे पृतना पाण्डवी रणे । नलिनी द्विरदेनेव समन्तात् प्रतिलोड़िता ॥ २७ ॥ ततस्तां प्रहतां सेनां दृष्ट्वा पुत्त्रेन ते नृप । भीमसेनपुरोगास्ते पाञ्चालाः समुपाद्रवन् ॥ २८ ॥ स भीमसेनं दशभिः शरैर्विव्याध पाण्डवम् । त्रिभिस्त्रिभिर्यमौ वीरौ धर्मराजञ्च सप्तभिः ॥ २९ ॥ विराटद्रुपदौ षड्‌भिः शतेन च शिखण्डिनम् । धृष्टद्युम्नञ्च विंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः ॥ ३० ॥ शतशश्चापरान् योधान् सद्विपांश्च रथान्रणे । शरैरवचकर्त्तोग्रैः क्रुद्धोऽन्तक इव प्रजाः ॥ ३१ ॥ न सन्दधन् विमुञ्चन् वा मण्डलीकृतकार्मुकः । अदृश्यत रिपून्निघ्नञ्छिक्षयास्त्रवलेन च ॥ ३२ ॥ तस्य तान् निघ्नतः शत्रून् हेमपृष्ठं महद्धनुः । अजस्रं मण्डलीभूतं ददृशुः समरे जनाः ॥ ३३ ॥ ततो युधिष्ठिरो राजा भल्लाभ्यामच्छिनद्धनुः । तव पुत्त्रस्य कौरव्य यतमानस्य संयुगे ॥ ३४ ॥ विव्याध चैनं दशभिः सम्यगस्तैः शरोत्तमैः । वर्म चाशु समासाद्य ते भग्नाः क्षितिमाविशन् ॥ ३५ ॥ ततः प्रमुदिताः पार्थाः परिवब्रुर्युधिष्ठिरम् । यथा वृत्रवधे देवाः पुरा शक्रं महर्षयः ॥ ३६ ॥ ततोऽन्यद्धनुरादाय तव पुत्त्रः प्रतापवान् । तिष्ठतिष्ठेति राजानं ब्रुवन् पाण्डवमभ्ययात् ॥ ३७ ॥ तमायान्तमभिप्रेक्ष्य तव पुत्त्रं महामृधे । प्रत्युद्ययुः प्रमुदिताः पाञ्चाला जयगृद्धिनः ॥ ३८ ॥ तान् द्रोणः प्रतिजग्राह परीप्सन् युधि पार्थिवम् । चण्डवातोद्धूतान् मेघान् गिरिरम्बुमुचो यथा ॥ ३९ ॥ तत्र राजन्महानासीत् सङ्ग्रामो लोमहर्षणः । पाण्डवानां महाबाहो तावकानाञ्च संयुगे ॥ ४० ॥ रुद्रस्याक्रीड़सदृशः संहारः सर्वदेहिनाम् । ततः

शब्दो महानासीत् पुनर्येन धनञ्जयः ॥ ४१ ॥ अतीव सर्वशब्देभ्यो लोमहर्षकरः प्रभो । अर्जुनस्य महाबाहो तावकानाञ्च धन्विनाम् ॥ ४२ ॥ मध्ये भारतसैन्यस्य माधवस्य महारणे । द्रोणस्यापि परैः सार्द्धं व्यूहद्वारे महारणे ॥ ४३ ॥ एवमेव चयो वृत्तः पृथिव्यां पृथिवीपते । क्रुद्धेऽर्जुने तथा द्रोणे सात्वते च महारथे ॥ ४४ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सङ्कुलयुद्धे
चतुर्विंशत्यधिकशततोऽध्यायः ॥ १२४ ॥

---

सञ्जय उवाच । अपराह्ले महाराज सङ्ग्रामः सुमहानभूत् । पर्ज्जन्यसमनिर्घोषः पुनर्द्रोणस्य सोमकैः ॥ १ ॥ शोणाश्वं रथमास्थाय नरवीरः समाहितः । समरेऽभ्यद्रवत् पाण्डून् जवमास्थाय मध्यमम् ॥ २ ॥ तव प्रियहिते युक्तो महेष्वासो महाबलः । चित्रपुङ्खैः शितैर्वाणैः कलसोत्तमसम्भवः ॥ ३ ॥ वरान् वरान् हि योधानां विचिन्वन्निव भारत । आक्रीड़त रणे राजन् भारद्वाजः प्रतापवान् ॥ ४ ॥ तामभ्ययात् वृहत्चवः कैकयानां महारथः । भ्रातॄणां नृप पञ्चानां श्रेष्ठः समरकर्कशः ॥ ५ ॥ विमुञ्चन् विशिखांस्तीक्ष्णानाचार्य्यं भृशमर्द्दयत् । महामेघो यथा वर्षं विमुञ्चन् गन्धमादने ॥ ६ ॥ तस्य द्रोणो महाराज स्वर्णपुङ्खाञ्छिलाशितान् । प्रेषयामास संक्रुद्धः सायकान् दश पञ्च च ॥ ७ ॥ तांस्तु द्रोणविनिर्मुक्तान् क्रुद्धाशीविषसन्निभान् । एकैकं पञ्चभिर्वाणैर्युधि चिच्छेद हृष्टवत् ॥ ८ ॥ तदस्य लाघवं दृष्ट्वा प्रहस्य द्विजपुङ्गवः । प्रेषयामास विशिखानष्टौ सन्नतपर्वणः ॥ ९ ॥ तान् दृष्ट्वा पततस्तूर्णं द्रोणचापच्युताञ्छरान् । अवारयच्छरै-

रेव तावद्भिर्निशितैर्मृधे ॥ १० ॥ ततोऽभवन्महाराज तव सैन्यस्य विस्मयः। बृहत्क्षत्रेण तत् कर्म कृतं दृष्ट्वा सुदुष्करम् ॥ ११ ॥ ततो द्रोणो महाराज बृहत्क्षत्रं विशेषयन्। प्रादुश्चक्रे रणे दिव्यं ब्राह्ममस्त्रं सुदुर्जयम् ॥ १२ ॥ कैकेयोऽस्त्रं समालोक्य मुक्तं द्रोणेन संयुगे। ब्रह्मास्त्रेणैव राजेन्द्र ब्राह्ममस्त्रमशातयत् ॥ १३ ॥ ततोऽस्त्रे निहते ब्राह्मे बृहत्क्षत्रस्तु भारत। बिव्याध ब्राह्मणं षष्ट्या स्वर्णपुङ्खैः शिलाशितैः ॥ १४ ॥ तं द्रोणो द्विपदां श्रेष्ठो नाराचेन समार्पयत्। स तस्य कवचं भित्त्वा प्राविशद्धरणीतलम् ॥ १५ ॥ कृष्णसर्पो यथा मुक्तो वल्मीकं नृपसत्तम। तथाभ्यगान्महीं वाणो भित्त्वा कैकेयमाहवे ॥ १६ ॥ सोऽतिविद्धो महाराज कैकेयो द्रोणसायकैः। क्रोधेन महताविष्टो व्यावृत्य नयने शुभे ॥ १७ ॥ द्रोणं विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः। सारथिञ्चास्य वाणेन भृशं मर्मस्वताडयत् ॥ १८ ॥ द्रोणस्तु बहुभिर्विद्धो बृहत्क्षत्रेण मारिष। असृजद्विशिखांस्तीक्ष्णान् कैकेयस्य रथं प्रति ॥ १९ ॥ व्याकुलीकृत्य तं द्रोणो बृहत्क्षत्रं महारथम्। अश्वांश्चतुर्भिर्न्यवधीच्चतुरोऽस्य पतत्रिभिः ॥ २० ॥ सूतञ्चैकेन वाणेन रथनीडादपाहरत्। द्वाभ्यां ध्वजञ्च छत्रञ्च छित्त्वा भूमावपातयत् ॥ २१ ॥ ततः साधुविसृष्टेन नाराचेन द्विजर्षभः। हृद्यविध्यत् बृहत्क्षत्रं स छिन्नहृदयोऽपतत् ॥ २२ ॥ बृहत्क्षत्रे हते राजन् कैकयान् महारथे। शैशुपालिरभिक्रुद्धो यन्तारमिदमब्रवीत् ॥ २३ ॥ सारथे याहि यत्रैष द्रोणस्तिष्ठति दंशितः। विनिघ्नन् कैकयानां सर्वान् पाञ्चालानाञ्च वाहिनीम् ॥ २४ ॥ तस्य तद्वचनं श्रुत्वा सारथीरथिनां वरः। द्रोणाय प्रापयामास काम्बोजैर्जवनैर्हयैः ॥ २५ ॥ धृष्टकेतुश्च चेदीनामृषभोऽतिबलोदितः। वधायाभ्यद्रवत् द्रोणं पतङ्ग इव पावकम् ॥ २६ ॥ सोऽविध्यत् तदा

द्रोणं षष्ट्या साश्वरथध्वजम् । पुनश्चान्यैः शरैस्तीक्ष्णैः सुप्तं व्याघ्रं तुदन्निव ॥ २७ ॥ तस्य द्रोणो धनुर्मध्ये क्षुरप्रेण शितेन च । चकर्त्त गार्द्धपत्रेण पतमानस्य शुष्मिणः ॥ २८ ॥ अथान्यद्धनुरादाय शैशुपालिर्महारथः । विव्याध सायकैर्द्रोणं कङ्कबर्हिणवाजितैः ॥ २९ ॥ तस्य द्रोणो हयान् हत्वा चतुर्भिश्चतुरः शरैः । सारथेश्च शिरः कायाच्चकर्त्त प्रहसन्निव ॥ ३० ॥ अथैनं पञ्चविंशत्या सायकानां समार्पयत् । अवप्लुत्य रथाच्चैद्यो गदामादाय सत्वरः ॥३१॥ भारद्वाजाय चिक्षेप रुषितामिव पन्नगीम् । तामापतन्तीमालोक्य कालरात्रिमिवोद्यताम् ॥ ३२ ॥ अश्मसारमयीं गुर्वीं तपनीयविभूषिताम् । शरैरनेकसाहस्रैर्भारद्वाजोऽच्छिनच्छितैः ॥ ३३ ॥ सा छिन्ना बहुभिर्बाणैर्भारद्वाजेन मारिष । गदा पपात कौरव्य नादयन्ती धरातलम् ॥ ३४ ॥ गदां विनिहतां दृष्ट्वा धृष्टकेतुरमर्षणः । तोमरं व्यसृजद्वीरः शक्तिञ्च कनकोज्ज्वलाम् ॥ ३५ ॥ तोमरं पञ्चभिर्भित्त्वा शक्तिञ्चिच्छेद पञ्चभिः । तौ जग्मतुर्महीं छिन्नौ सर्पाविव गरुत्मता ॥ ३६ ॥ ततोऽस्य विशिखं तीक्ष्णं बधाय बधकाङ्क्षिणः । प्रेषयामास समरे भारद्वाजः प्रतापवान् ॥ ३७ ॥ स तस्य कवचं भित्त्वा हृदयञ्चामितौजसः । अभ्यगाद्धरणीं बाणो हंसः पद्मवनं यथा ॥ ३८ ॥ पतङ्गं हि ग्रसेच्चाषो यथा क्षुद्रं बुभुक्षितः । तथा द्रोणोऽग्रसच्छूरो धृष्टकेतुं महाहवे ॥ ३९ ॥ निहते चेदिराजे तु तत्खण्डं पित्रमाविशत् । अमर्षवशमापन्नः पुत्रोऽस्य परमास्त्रवित् ॥ ४० ॥ तमपि प्रहसन् द्रोणः शरैर्निन्ये यमक्षयम् । महाव्याघ्रो महारण्ये मृगशावं यथा बली ॥ ४१ ॥ तेषु प्रक्षीयमाणेषु पाण्डवेयेषु भारत । जरासन्धोसुतो वीरः स्वयं द्रोणमुपाद्रवत् ॥ ४२ ॥ स तु द्रोणं महाबाहुं शरधाराभिराहवे । अदृश्यमकरोत्तूर्णं जलदो भास्करं यथा ॥ ४३ ॥ तस्य तल्लाघवं दृष्ट्वा द्रोणः क्षत्रियमर्द्दनः । व्यसृ-

जत् सायकांस्तूर्ण शतशोऽथ सहस्रशः ॥ ४४ ॥ छादयित्वा रणे द्रोणो रथस्थं रथिनाम्वरम्। जारासन्धिं जघानाशु मिषतां सर्वधन्विनाम् ॥ ४५ ॥ यो यः स्म नीयते तत्र तं द्रोणो ह्यन्तकोपमः। अदत्तः सर्वभूतानि प्राप्तकाले यथान्तकः ॥ ४६ ॥ ततो द्रोणो महाराज नाम विश्राव्य संयुगे। शरैरनेकसाहस्रैः पाण्डवेयान् समावृणोत् ॥ ४७ ॥ ते तु नामाङ्किता वाणा द्रोणेनास्ताः शिलाशिताः। नरान्नागान् हयांश्चैव निजघ्नुः शतशो मृधे ॥४८॥ ते वध्यमाना द्रोणेन शक्रेणेव महासुराः। समकम्पन्त पाञ्चाला गावः शीतार्द्दिता इव ॥ ४९ ॥ ततो निष्टानको घोरः पाण्डवानामजायत। द्रोणेन वध्यमानेषु सैन्येषु भरतर्षभ ॥ ५० ॥ प्रताप्यमानाः सूर्य्येण हन्यमानाश्च सायकैः। अन्वपद्यन्त पाञ्चालास्तदा संत्रस्तचेतसः ॥ ५१ ॥ मोहिता वाणजालेन-भारद्वाजेन संयुगे। उरुग्राहगृहीतानां पाञ्चालानां महारथाः ॥ ५२ ॥ चेदयश्च महाराज सृञ्जयाः काशिकोशलाः। अभ्यद्रवन्त संहृष्टा भारद्वाजं युयुत्सया ॥ ५३ ॥ ब्रुवन्तश्च रणे द्रोणं चेदिपाञ्चालसृञ्जयाः। हत द्रोणं हत द्रोणमिति ते द्रोणमभ्ययुः ॥ ५४ ॥ ते यतन्तो नरव्याघ्राः सर्वे शक्त्या महाद्युतिम्। निनीषवो युधि द्रोणं यमस्य सदनं प्रति ॥ ५५ ॥ यतमानांश्च ताञ्छूरान् भारद्वाजः शिलीमुखैः। यमाय प्रेषयामास चेदिमुख्यान् विशेषतः ॥ ५६ ॥ तेषु प्रक्षीयमाणेषु चेदिमुख्येषु सर्वशः। पाञ्चालाः समकम्पन्त द्रोणसायकपीड़िताः ॥ ५७ ॥ प्राक्रोशन् भीमसेनन्ते धृष्टद्युम्नञ्च भारत। दृष्ट्वा द्रोणस्य कर्माणि तथा रूपाणि मारिष ॥ ५८ ॥ ब्राह्मणेन तपो नूनं चरितं दुश्चरं महत्। तथा हि युधि संक्रुद्धो दहति क्षत्रियर्षभान् ॥ ५९ ॥ धर्मो युद्धं क्षत्रियस्य ब्राह्मणस्य परन्तपः। तपस्वी कृतविद्यश्च प्रेक्षितेनापि निर्द्दहेत् ॥ ६० ॥ द्रोणास्त्रमग्निं सम्पन्नं प्रविष्टाः क्षत्रियर्षभाः। बहवो

दुस्तरं घोरं यत्नाद्रक्षन्त भारत॥ ६१॥ यथा बलं यथोत्साहं यथासत्त्वं महाद्युतिः। मोहयन् सर्व्वभूतानि द्रोणो हन्ति बलानि नः॥ ६२॥ तेषां तद्वचनं श्रुत्वा क्षत्रधर्म्मा व्यवस्थितः। अर्द्धचन्द्रेण चिच्छेद क्षत्रधर्म्मा महाबलः॥ ६३॥ क्रोधसम्विग्नमनसो द्रोणस्य सशरं धनुः। सुसंरब्धतरो भूत्वा द्रोणः क्षत्रियमर्द्दनः॥ ६४॥ अन्यत् कार्म्मुकमादाय भास्वरं वेगवत्तरम्। तत्राधाय शरं तीक्ष्णं परानीकविघातनम्॥ ६५॥ आकर्णपूर्णमाचार्य्यो बलवानभ्यवासृजत्। स हत्वा क्षत्रधर्म्माणं जगाम धरणीतलम्॥ ६६॥ स भिन्नहृदयो वाहान्न्यपतन्मेदिनीतले। ततः सैन्यान्यकम्पन्त धृष्टद्युम्नसुते हते॥ ६७॥ अथ द्रोणं समारोहच्चेकितानो महाबलः। स द्रोणं दशभिर्विद्ध्वा प्रत्यविध्यत् स्तनान्तरे॥ ६८॥ चतुर्भिः सारथिञ्चास्य चतुर्भिश्चतुरो हयान्। तस्याचार्य्यः षोड़शभिरविध्यद्दक्षिणं भुजम्॥ ६९॥ ध्वजं षोड़शभिर्वाणैर्यन्तारञ्चास्य सप्तभिः। तस्य सूते हते तेऽश्वा रथमादाय विद्रुताः॥ ७०॥ समरे शरसम्वीता भारद्वाजेन मारिष। चेकितानरथं दृष्ट्वा हताश्वं हतसारथिम्॥ ७१॥ पाञ्चालान् पाण्डवांश्चैव महद्भयमथाविशत्। तान् समेतान्रणे शूरान् चेदिपाञ्चालसृञ्जयान्॥ ७२॥ समन्तात् द्रावयन् द्रोणो बह्वशोभत मारिष। आकर्णपलितः श्यामो वयसाशीतिपञ्चकः॥ ७३॥ रणे पर्य्यचरद्द्रोणो वृद्धः षोड़शवर्षवत्। अथ द्रोणं महाराज विचरन्तमभीतवत्॥ ७४॥ वज्रहस्तममन्यन्त शत्रवः शत्रुसूदनम्। ततोऽब्रवीन्महाबाहुर्द्रुपदो बुद्धिमान्नृप॥ ७५॥ लुब्धोऽयं क्षत्रियान् हन्ति व्याघ्रः क्षुद्रमृगानिव। कृच्छ्रान् दुर्य्योधनो लोकान् पापः प्राप्स्यति दुर्म्मतिः॥ ७६॥ यस्य लोभाद्विनिहताः समरे क्षत्रियर्षभाः। शतशः शेरते भूमौ निकृत्ता गोवृषा इव॥ ७७॥ रुधिरेण परीताङ्गाः श्वशृगालादनीकृताः। एवमुक्त्वा महाराज

द्रुपदोऽक्षौहिणीपतिः। पुरस्कृत्य रणे पार्थान् द्रोणमभ्यद्रवद्-
द्रुतम् ॥ ७८ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि द्रोणपराक्रमे
पञ्चविंशत्यधिकशततोऽध्यायः ॥ १२५ ॥

---

सञ्जय उवाच। व्यूहेष्वालोड्यमानेषु पाण्डवानां ततस्ततः।
सुदूरमन्वयुः पार्थाः पाञ्चाला सह सोमकैः ॥ १ ॥ वर्त्तमाने
तथा रौद्रे सङ्ग्रामे लोमहर्षणे। सङ्क्षये जगतस्तीव्रे युगान्त इव
भारत ॥ २ ॥ द्रौणे युधि पराक्रान्ते नर्द्दमाने मुहुर्मुहुः। पाञ्चा-
लेषु च क्षीणेषु वध्यमानेषु पाण्डुषु ॥ ३ ॥ नापश्यच्छरणं किञ्चि-
द्धर्मराजो युधिष्ठिरः। चिन्तयामास राजेन्द्र कथमेतद्भविष्यति
॥ ४ ॥ ततो वीक्ष्य दिशः सर्वाः सव्यसाचिदिदृक्षया। युधिष्ठिरो
ददर्शाथ नैव पार्थं न माधवम् ॥ ५ ॥ सोऽपश्यन्नरशार्दूलं वानर-
र्षभलक्षणम्। गाण्डीवस्य च निर्घोषमशृण्वन् व्यथितेन्द्रियः ॥६॥
अपश्यन् सात्यकिञ्चापि वृष्णीनां प्रवरं रथम। चिन्तयाभिपरी-
ताङ्गो धर्मराजो युधिष्ठिरः ॥ ७ ॥ नाध्यगच्छत्तदा शान्तिं ताव-
पश्यन्नरोत्तमौ। लोकोपक्रोशभीरुत्वात् धर्मराजो महामनाः ॥८॥
अचिन्तयन्महाबाहुः शैनेयस्य रथं प्रति। पदवीं प्रेषितश्चैव
फाल्गुनस्य मया रणे ॥ ९ ॥ शैनेयः सात्यकिः सत्योमित्राणा-
मभयङ्करः। तदिदं ह्येकमेवासीत् द्विधा जातं ममाद्य वै ॥ १० ॥
सात्यकिश्च हि मे ज्ञेयः पाण्डवश्च धनञ्जयः। सात्यकिं प्रेषयित्वा
तु पाण्डवस्य पदानुगम् ॥ ११ ॥ सात्वतस्यापि कं युद्धे प्रेषयिष्ये
पदानुगम्। करिष्यामि प्रयत्नेन भ्रातुरन्वेषणं यदि ॥ १२ ॥
युयुधानमनन्विष्य लोको मां गर्हयिष्यति। भ्रातुरन्वेषणं कृत्वा

धर्म्मपुत्रो युधिष्ठिरः ॥ १३ ॥ परित्यजति वार्ष्णेयं सात्यकिं सत्य-
विक्रमम्। लोकापवादभीरुत्वात् सोऽहं पार्थं वृकोदरम् ॥ १४ ॥
पदवीं प्रेषयिष्यामि माधवस्य महात्मनः। यथैव च मम प्रीति-
रर्जुने मधुसूदने ॥ १५ ॥ तथैव वृष्णिवीरेऽपि सात्वते युद्ध-
दुर्म्मदे। अतिभारे नियुक्तश्च मया शैनेयनन्दनः ॥ १६ ॥ स तु
मित्रोपरोधेन गौरवान्नु महाबलः। प्रविष्टो भारतीं सेनां मकरः
सागरं यथा ॥ १७ ॥ असौ हि श्रूयते शब्दः शूराणामनिवर्त्ति-
नाम्। मिथः संयुध्यमानानां वृष्णिवीरेण धीमता ॥ १८ ॥ प्राप्त-
कालं सुबलवत् निश्चितं बहुधा हि ते। तत्रैव पाण्डवेयस्य भीम-
सेनस्य धन्विनः ॥ १९ ॥ गमनं रोचते मह्यं यत्र यातौ महा-
रथौ। न चाप्यसह्यं भीमस्य विद्यते भुवि किञ्चन ॥ २० ॥ शक्तो
ह्येष रणे यत्तः पृथिव्यां सर्व्वधन्विनाम्। स्ववाहुबलमास्थाय
प्रतिव्यूहितमञ्जसा ॥ २१ ॥ यस्य बाहुबलं सर्व्वे समाश्रित्य महा-
त्मनः। वनवासान्निवृत्ताः स्म न च युद्धेषु निर्ज्जिताः ॥ २२ ॥
इतो गते भीमसेने सात्वतं प्रति पाण्डवे। सनाथौ भवितारौ
हि युधि सात्वतफाल्गुनौ ॥ २३ ॥ कामन्त्वशोचनीयौ तौ रणे
सात्वतफाल्गुनौ। रक्षितौ वासुदेवेन स्वयञ्चास्त्रविशारदौ ॥२४॥
अवश्यन्तु मया कार्य्यमात्मनः शोकनाशनम्। तस्माद्भीमं नियो-
क्ष्यामि सात्वतस्य पदानुगम् ॥ २५ ॥ ततः प्रतिकृतं मन्ये विधानं
सात्यकिं प्रति। एवं निश्चित्य मनसा धर्म्मपुत्रो युधिष्ठिरः ॥ २६ ॥
यन्तारमब्रवीद्राजा भीमं प्रति नयस्व माम्। धर्म्मराजवचः श्रुत्वा
सारथिर्हयकोविदः ॥ २७ ॥ रथं हेमपरिष्कारं भीमान्तिक-
मुपानयत्। भीमसेनमनुप्राप्य प्राप्तकालमनुस्मरन् ॥ २८ ॥ कश्मलं
प्राविशद्राजा बहु तत्र समादिशत्। स कश्मलसमाविष्टो भीम-
माहूय पार्थिवः ॥ २९ ॥ अब्रवीद्वचनं राजन् कुन्तीपुत्रो युधि-
ष्ठिरः। यः स देवान् सगन्धर्व्वान् दैत्यांश्चैकरथोऽजयत् ॥ ३० ॥

तस्य लक्ष्म न पश्यामि भीमसेनानुजस्य ते। ततोऽब्रवीद्धर्मराजं
भीमसेनस्तथागतम् ॥ ३१ ॥ नैवाद्राक्षं न चाश्रौषं तव कश्मल-
मीदृशम्। पुरातिदुःखदीर्णानां भवान् गतिरभूद्धि नः ॥ ३२ ॥
उत्तिष्ठोत्तिष्ठ राजेन्द्र शाधि किं करवाणि ते। न तु कार्य्य-
मसाध्यं वा विद्यते मम मानद ॥ ३३ ॥ आज्ञापय कुरुश्रेष्ठ मा
च शोके मनः कृथाः। तमब्रवीदश्रुपूर्णः कृष्णसर्प इव श्वसन् ॥३४॥
भीमसेनमिदं वाक्यं प्रम्लानवदनो नृपः। यथा शङ्खस्य निर्घोषः
पाञ्चजन्यस्य श्रूयते ॥ ३५ ॥ पूरितो वासुदेवेन संरब्धेन यश-
स्विना। नूनमद्य हतः शेते तव भ्राता धनञ्जयः ॥ ३६ ॥
तस्मिन् विनिहते नूनं युध्यतेऽसौ जनार्द्दनः। यस्य सत्त्ववतो वीर्य्य
मुपजीवन्ति पाण्डवाः ॥ ३७ ॥ यं भयेष्वभिगच्छन्ति सहस्राक्ष-
मिवामराः। स शूरः सैन्धवप्रेप्सुरन्वयाद्भारतीञ्चमूम् ॥ ३८ ॥
तस्य वै गमनं विद्मो भीम नावर्त्तनं पुनः। श्यामो युवा गुडा-
केशो दर्शनीयो महारथः ॥ ३९ ॥ व्यूढोरस्को महाबाहुर्मत्त-
द्विरदविक्रमः। चकोरनेत्रस्ताम्राक्षो द्विषतां भयवर्द्धनः ॥ ४० ॥
तदिदं मम भद्रन्ते शोकस्थानमरिन्दम। अर्ज्जुनार्थं महाबाहो
सात्वतस्य च कारणात् ॥ ४१ ॥ वर्द्धते हविषेवाग्निरिध्यमानः
पुनः पुनः। तस्य लक्ष्म न पश्यामि तेन विन्दामि कश्मलम् ॥ ४२ ॥
तस्मिन् कृष्णो हते नूनं युध्यते युद्धकोविदः। तं विद्धि पुरुष-
व्याघ्र सात्वतञ्च महारथम् ॥ ४३ ॥ स तं महारथं पश्चादनु-
यातस्तवानुजम्। तमपश्यन्महाबाहुमहं विन्दामि कश्मलम्
॥ ४४ ॥ स तत्र गच्छ कौन्तेय यत्र यातो धनञ्जयः। सात्य-
किश्च महावीर्य्यः कर्त्तव्यं यदि मन्यसे ॥ ४५ ॥ वचनं मम धर्मज्ञ
भ्राता ज्येष्ठो भवामि ते। न तेऽर्ज्जुनस्तथा ज्ञेयो ज्ञातव्यः
सात्यकिर्यथा ॥ ४६ ॥ चिकीर्षुर्मत्प्रियं पार्थ स यातः सव्य-
साचिनः। पदवीं दुर्गमां घोरामगम्यामकृतात्मभिः ॥ ४७ ॥

दृष्ट्वा कुशलिनौ कृष्णौ सात्त्वतञ्चैव सात्यकिम् । सम्विदञ्चैव कुर्य्यास्त्वं सिंहनादेन पाण्डव ॥ ४८ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि युधिष्ठिरचिन्तायां षड्विंशत्यधिकशततोऽध्यायः ॥ १२६ ॥

---

भीम उवाच । ब्रह्मेशानेन्द्रवरुणानवहद्यः पुरा रथः । तमास्थाय गतौ कृष्णौ न तयोर्विद्यते भयम् ॥ १ ॥ आज्ञान्तु शिरसा विभ्रन्नेष गच्छामि मा शुचः । समेत्य तान्नरव्याघ्रान् तव दास्यामि सम्विदम् ॥ २ ॥

सञ्जय उवाच । एतावदुक्त्वा प्रययौ परिदाय युधिष्ठिरम् । धृष्टद्युम्नाय बलवान् सुहृद्भ्यश्च पुनः पुनः ॥ ३ ॥ धृष्टद्युम्नञ्चेद-माह भीमसेनो महाबलः । विदितन्ते महाबाहो यथा द्रोणो महारथः ॥ ४ ॥ ग्रहणे धर्म्मराजस्य सर्व्वोपायेन वर्त्तते । न च मे गमने कृत्यं तादृक् पार्षत विद्यते ॥ ५ ॥ यादृशं रक्षणे राज्ञः कार्य्यमात्ययिकं हि नः । एवमुक्तोऽस्मि पार्थेन प्रतिवक्तुञ्च नोत्-सहे ॥ ६ ॥ प्रयास्ये तत्र यत्रासौ मुमूर्षुः सैन्धवः स्थितः । धर्म्मराजस्य वचने स्थातव्यमविशङ्कया ॥ ७ ॥ यास्यामि पदवीं भ्रातुः सात्त्वतस्य च धीमतः । सोऽद्य यत्तो रणे पार्थं परिरक्ष युधिष्ठिरम् ॥ ८ ॥ एतद्धि सर्व्वकार्य्याणां परमं कृत्यमाहवे । तम-ब्रवीन्महाराज धृष्टद्युम्नो वृकोदरम् ॥ ९ ॥ ईप्सितं ते करि-ष्यामि गच्छ पार्थाविचारयन् । नाहत्वा समरे द्रोणो धृष्टद्युम्नं कथञ्चन ॥ १० ॥ निग्रहं धर्म्मराजस्य प्रकरिष्यति संयुगे । ततो निक्षिप्य राजानं धृष्टद्युम्ने च पाण्डवम् ॥ ११ ॥ अभिवाद्य गुरुं ज्येष्ठं प्रययौ येन फाल्गुनः । परिष्वक्तश्च कौन्तेयो धर्म्मराजेन भारत ॥ १२ ॥ आघ्रातश्च तथा मूर्द्ध्नि श्रावितश्चाशिषः शुभाः ।

कृत्वा प्रदक्षिणं विप्रानर्चितांस्तुष्टमानसान् ॥ १३ ॥ आलभ्य मङ्गलान्यष्टौ पीत्वा कैलातकं मधु। द्विगुणद्रविणो वीरो मद-रक्तान्तलोचनः ॥ १४ ॥ विप्रैः कृतस्वस्त्ययनो विजयोत्पाद-सूचितः। पश्यन्नेवात्मनो बुद्धिं विजयानन्दकारिणीम् ॥ १५ ॥ अनुलोमानिलैश्चाशु प्रदर्शितजयोऽजयः। भीमसेनो महाबाहुः कवची शुभकुण्डली ॥ १६ ॥ साङ्गदः सतलत्राणः सुरथो रथिनाम्वरः। तस्य कार्ष्णायसं वर्म हेमचित्रं महर्द्धिमत् ॥ १७ ॥ विबभौ सर्वतः श्लिष्टं सविद्युत्तोयदोपमम्। पीतरक्तासितसितै-र्वासोभिश्च सुवेष्टितः ॥ १८ ॥ कण्ठत्राणेन च बभौ सेन्द्रायुध इवाम्बुदः। प्रयाते भीमसेने तु तव सैन्यं युयुत्सया ॥ १९ ॥ पाञ्चजन्यरवो घोर पुनरासीद्विशाम्पते। तं श्रुत्वा निनदं घोरं त्रैलोक्यत्रासनं महत् ॥ २० ॥ पुनर्भीमं महाबाहुं धर्मपुत्रो-ऽभ्यभाषत। एष वृष्णिप्रवीरेण ध्मातः सलिलजो भृशम् ॥ २१ ॥ पृथिवीञ्चान्तरीक्षञ्च विनादयति शङ्खराट्। नूनं व्यसनमापन्ने सुमहत् सव्यसाचिनि ॥ २९ ॥ कुरुभिर्युध्यते सार्द्धं सर्वैश्चक्रगदा-धरः। नूनमार्य्या महत् कुन्ती पापमद्य निदर्शनम् ॥ २३ ॥ द्रौपदी च सुभद्रा च पश्यन्ति सह बन्धुभिः। स भीम त्वरया युक्तो याहि यत्र धनञ्जयः ॥ २४ ॥ मुह्यन्तीव हि मे सर्वा धनञ्जयदिदृक्षया। दिशश्च प्रदिशः पार्थ सात्त्वतस्य च कारणात् ॥ २५ ॥ गच्छगच्छेति गुरुणा सोऽनुज्ञातो वृकोदरः। ततः पाण्डुसुतो राजन् भीमसेनः प्रतापवान् ॥ २६ ॥ बद्धगोधाङ्गुलि-त्राणः प्रगृहीतशरासनः। ज्येष्ठेन प्रहितो भ्रात्रा भ्राता भ्रातुः प्रियङ्करः ॥ २७ ॥ आहत्य दुन्दुभीन् भीमः शङ्खं प्रध्माप्य चास-कृत्। विनद्य सिंहनादञ्च कृत्वा ज्याशब्दमेव च ॥ २८ ॥ तेन-शब्देन वीराणां पातयित्वा मनांस्युत। दर्शयन् घोरमात्मान-ममित्रान् सहसाभ्ययात् ॥ २९ ॥ तमूहुर्जवना दान्ता विकुर्वन्तो

हयोत्तमाः। विशोकेनाभिसंयत्ता मनोमारुतरंहसः ॥ ३० ॥
आरुजन् विरुजन् पार्थो ज्यां विकर्षंश्च पाणिना। सोऽपकर्षन्
विकर्षंश्च सेनाग्रं समलोड़यत् ॥ ३१ ॥ तं प्रयान्तं महावाहुं
पाञ्चालाः सहसोमकाः। पृष्ठतोऽनुययुः शूरा मघवन्तमिवामराः
॥ ३२ ॥ तं समेत्य महाराज सोदर्य्याः पर्य्यवारयन्। दुःशल-
श्चित्रसेनश्च कुण्डभेदी विविंशतिः॥ ३३ ॥ दुर्मुखो दुःसहश्चैव
विकर्णश्च शलस्तथा। विन्दानुविन्दौ सुमुखो दीर्घवाहुः सुदर्शनः
॥ ३४ ॥ वृन्दारकः सुहस्तश्च सुषेणो दीर्घलोचनः। अभयो-
रौद्रकर्मा च सुवर्मा दुर्व्विमोचनः ॥ ३५ ॥ शोभन्ते रथिनां श्रेष्ठाः
सहसैन्यपदानुगाः। संयत्ताः समरे वीरा भीमसेनमुपाद्रवन्
॥ ३६ ॥ तैः समन्तादृतः शूरः समरेषु महारथः। तान् समीक्ष्य
तु कौन्तेयो भीमसेनः पराक्रमी ॥ ३७ ॥ अभ्यवर्त्तत वेगेन सिंहः
क्षुद्रमृगानिव। ते महास्त्राणि दिव्यानि तत्र वीरा अदर्शयन्
॥ ३८ ॥ छादयन्तः शरैर्भीमं मेघाः सूर्य्यमिवोदितम्। स तान-
तीत्य वेगेन द्रोणानीकमुपाद्रवत् ॥ ३९ ॥ अग्रतश्च गजानीकं
शरवर्षैरवाकिरत्। सोऽचिरेणैव कालेन तद्गजानीकमाशुगैः ॥४०॥
दिशः सर्व्वाः समभ्यस्य व्यधमत् पवनात्मजः। त्रासिताः शरभस्येव
गर्ज्जितेन वने मृगाः ॥ ४१ ॥ प्राद्रवन् द्विरदाः सर्व्वे नदन्तो
भैरवान् रवान्। पुनश्चातीत्य वेगेन द्रोणानीकमुपाद्रवत् ॥ ४२ ॥
तमवारयदाचार्य्यो वेलोद्वृत्तमिवार्णवम्। ललाटे ताड़यच्चैनं
नाराचेन स्मयन्निव ॥ ४३ ॥ ऊर्द्धरश्मिरिवादित्यो विबभौ तत्र
पाण्डवः। स मन्यमानस्त्वाचार्य्यो ममायं फाल्गुनो यथा ॥ ४४ ॥
भीमः करिष्यते पूजामित्युवाच वृकोदरम्। भीमसेन न ते शक्यं
प्रवेष्टुमरिवाहिनीम् ॥ ४५ ॥ मामनिर्ज्जित्य समरे शत्रुमद्य महा-
बल। यदि ते सानुजः कृष्णः प्रविष्टोऽनुमते मम ॥ ४६ ॥
अनीकं न तु शक्यं मे प्रवेष्टुमिह वै त्वया। अथ भीमस्तु तच्छ्रुत्वा

गुरोर्वाक्यमपेतभीः ॥ ४७ ॥ क्रुद्धः प्रोवाच वै द्रोणं रक्तताम्रेक्षणस्त्वरन्। तवार्जुनो नानुमते ब्रह्मबन्धो रणाजिरम् ॥ ४८ ॥ प्रविष्टः स हि दुर्द्धर्षः शक्रस्यापि विमर्द्दनम्। तेन वै परमां पूजां कुर्वता मानितो ह्यसि ॥ ४९ ॥ नार्जुनोऽहं घृणी द्रोण भीमसेनोऽस्मि ते रिपुः। पिता नस्त्वं गुरुर्बन्धुस्तथा पुत्त्रा हि ते वयम् ॥ ५० ॥ इति मन्यामहे सर्व्वे भवन्तं प्रणताः स्थिताः। अद्य तद्विपरीतं ते वदतोऽस्मासु दृश्यते ॥ ५१ ॥ यदि त्वं शत्रुमात्मानं मन्यसे तत्तथास्त्विह। एष ते सदृशं शत्रोः कर्म भीमः करोम्यहम् ॥ ५२ ॥ अथोद्भ्राम्य गदां भीमः कालदण्डमिवान्तकः। द्रोणाय व्यसृजद्राजन् स रथादवपुप्लुवे ॥ ५३ ॥ साश्वसूतध्वजं यानं द्रोणस्यापोथयत्तदा। प्रामृद्नाच्च बहून् योधान् वायुर्वृक्षानिवौजसा ॥ ५४ ॥ तं पुनः परिवव्रुस्ते तव पुत्त्रा रथोत्तमम्। अन्यन्तु रथमास्थाय द्रोणः प्रहरतां वरः ॥ ५५ ॥ व्यूहद्वारं समासाद्य युद्धाय समवस्थितः। ततः क्रुद्धो महाराज भीमसेनः पराक्रमी ॥ ५६ ॥ अग्रतः स्यन्दनानीकं शरवर्षैरवाकिरत्। ते वध्यमानाः समरे तव पुत्त्रा महारथाः ॥ ५७ ॥ भीमं भीमबला युद्धे योधयन्ति जयैषिणः। ततो दुःशासनः क्रुद्धो रथशक्तिं समाक्षिपत् ॥ ५८ ॥ सर्व्वपारशवीं तीक्ष्णां जिघांसुः पाण्डुनन्दनम्। आपतन्तीं महाशक्तिं तव पुत्त्रप्रचोदिताम् ॥ ५९ ॥ द्विधा चिच्छेद तां भीमस्तदद्भुतमिवाभवत्। अथान्यैर्विशिखैर्बाणैः पाण्डवः कुण्डभेदिनम् ॥ ६० ॥ सुषेणं दीर्घनेत्रञ्च त्रिभिस्त्रीनवधीद्बली। ततो वृन्दारकं वीरं कुरूणां कीर्त्तिवर्द्धनम् ॥ ६१ ॥ पुत्त्राणां तव वीराणां युध्यतामवधीत् पुनः। अभयं रौद्रकर्म्माणं दुर्विमोचनमेव च ॥ ६२ ॥ त्रिभिस्त्रीनवधीद्भीमः पुनरेव सुतांस्तव। वध्यमाना महाराज पुत्त्रास्तव बलीयसा ॥ ६३ ॥ भीमं प्रहरतां श्रेष्ठं समन्तात् पर्य्यवारयन्। ते शरैर्भीमकर्म्माणं तवर्षुः

पाण्डवं युधि ॥ ६४ ॥ मेघा इव तपापाये धाराभिर्धरणीधरम्।
स तद्बाणमयं वर्षमश्मवर्षमिवाचलः ॥ ६५ ॥ प्रतीच्छन् पाण्डु-
दायादो न प्राव्यथत शत्रुहा। विन्दानुविन्दौ सहितौ सुवर्माणञ्च
ते सुतम् ॥ ६६ ॥ प्रहसन्नेव कौन्तेयः शरैर्निन्ये यमक्षयम्। ततः
सुदर्शनं वीरं पुत्रन्ते भरतर्षभ ॥ ६७ ॥ विव्याध समरे तूर्णं स
पपात ममार च। सोऽचिरेणैव कालेन तद्रथानीकमाशुगैः ॥६८॥
दिशः सर्वाः समालोक्य व्यधमत् पाण्डुनन्दनः। ततो वै रथ-
घोषेण गर्ज्जितेन मृगा इव ॥ ६९ ॥ भज्यमानाश्च समरे तव
पुत्रा विशाम्पते। प्राद्रवन् सहसा सर्वे भीमसेनभयार्द्दिताः ॥७०॥
अनुयायाच्च कौन्तेयः पुत्राणां ते महद्बलम्। विव्याध समरे
राजन् कौरवेयान् समन्ततः ॥ ७१ ॥ वध्यमाना महाराज भीम-
सेनेन तावकाः। त्यक्त्वा भीमं रणाज्जग्मुश्चोदयन्तो हयोत्तमान्
॥ ७२ ॥ तांस्तु निर्ज्जित्य समरे भीमसेनो महाबलः। सिंह-
नादरवं चक्रे बाहुशब्दञ्च पाण्डवः ॥ ७३ ॥ तलशब्दञ्च सुमहत्
कृत्वा भीमो महाबलः। भीषयित्वा रथानीकं हत्वा योधान्
वरान् वरान्। व्यतीत्य रथिनश्चापि द्रोणानीकमुपाद्रवत् ॥ ७४ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि भीमप्रवेशे भीमपराक्रमे
सप्तविंशत्यधिकशततोऽध्यायः ॥ १२७ ॥

---

सञ्जय उवाच। समुत्तीर्णं रथानीकं पाण्डवं विहसन् रणे
विवारयिषुराचार्य्यः शरवर्षैरवाकिरत् ॥ १ ॥ पिवन्निव शरौघां-
स्तान् द्रोणचापपरिच्युतान्। सोऽभ्यद्रवत सोदर्य्यान् मायया
मोहयन् बलम् ॥ २ ॥ तं मृधे वेगमास्थाय नृपाः परमधन्विनः।
चोदितास्तव पुत्रैश्च सर्वतः पर्य्यवारयन् ॥ ३ ॥ स तैस्तु संवृतो
भीमः प्रहसन्निव भारत। उदयच्छद्गदां तेभ्यः सुघोरां

सिंहवन्नदन् ॥ ४ ॥ अवासृजच्च वेगेन शत्रुपक्षविनाशिनीम् । इन्द्राशनिरिवेन्द्रेण प्रविद्धा संहतात्मना ॥ ५ ॥ प्रामथ्नात् सा महाराज सैनिकांस्तव संयुगे । घोषेण महता राजन् पूरयन्तीव मेदिनीम् ॥ ६ ॥ ज्वलन्ती तेजसा भीमा त्रासयामास ते सुतान् । तां पतन्तीं महावेगां दृष्ट्वा तेजोऽभिसंवृताम् ॥७॥ प्राद्रवंस्तावकाः सर्वे नदन्तो भैरवान् रवान् । तञ्च शब्दमसह्यं वै तस्याः संलक्ष्य मारिष ॥ ८ ॥ प्रापतन्मनुजास्तत्र रथेभ्यो रथिनस्तदा । ते हन्यमाना भीमेन गदाहस्तेन तावकाः ॥ ९ ॥ प्राद्रवन्त रणे भीता व्याघ्रघ्राता मृगा इव । स तान् विद्राव्य कौन्तेयः सङ्ख्ये-ऽमित्रान् दुरासदान् ॥ १० ॥ सुपर्ण इव वेगेन पक्षिराड़त्यगा-च्चमूम् । तथा तु विप्रकुर्वाणं रथयूथपयूथपम् ॥ ११ ॥ भार-द्वाजो महाराज भीमसेनं समभ्ययात् । भीमन्तु समरे द्रोणो वारयित्वा शरोर्मिभिः ॥ १२ ॥ अकरोत् सहसा नादं पाण्डूनां भयमादधत् । तद्युद्धमासीत् सुमहद्घोरं देवासुरोपमम् ॥ १३ ॥ द्रोणस्य च महाराज भीमस्य च महात्मनः । यदा तु विशिखै-स्तीक्ष्णैर्द्रोणचापविनिःसृतैः । वध्यन्ते समरे वीराः शत-शोऽथ सहस्रशः । ततो रथादवप्लुत्य वेगमास्थाय पाण्डवः ॥१५॥ निमील्य नयने राजन् पदातिर्द्रोणमभ्ययात् । यथा हि गोवृषो वर्षं प्रति गृह्णाति लीलया ॥ १६ ॥ तथा भीमो नरव्याघ्रः शर-वर्षं समग्रहीत् । स वध्यमानः समरे रथं द्रोणस्य मारिष ॥१७॥ ईषायां पाणिना गृह्य प्रचिक्षेप महाबलः । द्रोणस्तु सत्वरो राजन् क्षिप्तो भीमेन संयुगे ॥ १८ ॥ रथमन्यं समारुह्य व्यूह-द्वारमथाययौ । तस्मिन् क्षणे तस्य यन्ता तूर्णमश्वानचोदयत् ॥ १९ ॥ भीमसेनस्य कौरव्य तदद्भुतमिवाभवत् । ततः स्वरथ-मास्थाय भीमसेनो महाबलः ॥ २० ॥ अभ्यवर्त्तत वेगेन तव पुत्रस्य वाहिनीम् । स मृद्नन् क्षत्रियानाजौ वातो वृक्षानिवोद्धतः ॥२१॥

अगच्छद्दारयन् सेनां सिन्धुवेगो नगानिव। भोजानीकं समासाद्य हार्द्दिक्येनाभिरक्षितम्॥ २२॥ प्रमथ्य बहुधा राजन् भीमसेनः समभ्ययात्। सन्त्रासयन्ननीकानि तलशब्देन मारिष॥ २३॥ अजयत् सर्वसैन्यानि शार्दूल इव गोवृषान्। भोजानीकमतिक्रम्य काम्बोजानाञ्च वाहिनीम्॥ २४॥ तथा म्लेच्छगणांश्चान्यान् बहून् युद्धविशारदान्। सात्यकिञ्चापि सम्प्रेक्ष्य युध्यमानं नरर्षभ॥ २५॥ रथेन यत्तः कौन्तेयो वेगेन प्रययौ तदा। भीमसेनो महाराज द्रष्टुकामो धनञ्जयम्॥ २६॥ अतीत्य समरे योधांस्तावकान् पाण्डुनन्दनः। सोपश्यदर्ज्जुनं तत्र युध्यमानं महारथम्॥ २७॥ सैन्धवस्य वधार्थं हि पराक्रान्तं पराक्रमी। तं दृष्ट्वा पुरुषव्याघ्रश्चुक्रोश महतो रवान्॥ २८॥ प्रावृट्काले महाराज नदन्निव बलाहकः। तं तस्य निनदं घोरं पार्थः शुश्राव नर्द्दतः॥ २९॥ वासुदेवश्च कौरव्य भीमसेनस्य संयुगे। तौ श्रुत्वा युगपद्वीरौ निनदं तस्य शुष्मिणः॥ ३०॥ पुनः पुनः प्रणदतां दिदृक्षन्तौ वृकोदरम्। ततः पार्थो महानादं मुञ्चन् वै माधवश्च ह॥ ३१॥ अभ्ययातां महाराज नदन्तौ गोवृषाविव। भीमसेनरवं श्रुत्वा फाल्गुनस्य च धन्विनः॥ ३२॥ अप्रीयत महाराज धर्म्मपुत्रो युधिष्ठिरः। विशोकश्चाभवद्राजा श्रुत्वा तं निनदं तयोः॥ ३३॥ धनञ्जयस्य च रणे जयमाशास्तवान् विभुः। तथा तु नर्द्दमाने वै भीमसेने मदोत्कटे॥ ३४॥ स्मितं कृत्वा महाबाहुर्धर्म्मपुत्रो युधिष्ठिरः। हृद्गतं मनसा प्राह ध्यात्वा धर्म्मभृतां वरः॥ ३५॥ दत्ता भीम त्वया सम्वित् कृतं गुरुवचस्तथा। न हि तेषां जयो युद्धे येषां द्वेष्टासि पाण्डव॥ ३६॥ दिष्ट्या जीवति सङ्ग्रामे सव्यसाची धनञ्जयः। दिष्ट्या च कुशली वीरः सात्यकिः सत्यविक्रमः॥ ३७॥ दिष्ट्या शृणोमि गर्ज्जन्तौ वासुदेवधनञ्जयौ। येन शक्रं रणे जित्वा तर्पितो हव्यवाहनः॥३८॥

स हन्ता द्विषतां सङ्ख्ये दिष्ट्या जीवति फाल्गुनः। यस्य बाहुबलं सर्वे वयमाश्रित्य जीविताः॥ ३९॥ स हन्ता रिपुसैन्यानां दिष्ट्या जीवति फाल्गुनः। निवातकवचा येन देवैरपि सुदुर्जयाः॥ ४०॥ निर्जिता धनुषैकेन दिष्ट्या पार्थः स जीवति। कौरवान् सहितान् सर्वान् गोग्रहार्थे समागतान्॥ ४१॥ योऽजयन् मत्स्यनगरे दिष्ट्या पार्थः स जीवति। कालकेयसहस्राणि चतुर्द्दश महारणे॥ ४२॥ योऽबधीद्भुजवीर्य्येण दिष्ट्या पार्थः स जीवति। गन्धर्वराजं बलिनं दुर्य्योधनकृतेन वै॥ ४३॥ जितवान् योऽस्त्रवीर्य्येण दिष्ट्या पार्थः स जीवति। किरीटमाली बलवान् श्वेताश्वः कृष्णसारथिः॥ ४४॥ मम प्रियश्च सततं दिष्ट्या जीवति फाल्गुनः। पुत्रशोकाभिसन्तप्तश्चिकीर्षन् कर्म दुष्करम्॥ ४५॥ जयद्रथवधान्वेषी प्रतिज्ञां कृतवान् हि यः। कच्चित् स सैन्धवं सङ्ख्ये हनिष्यति धनञ्जयः॥ ४६॥ कच्चित्तीर्णप्रतिज्ञं हि वासुदेवेन रक्षितम्। अनस्तमित आदित्ये समेष्याम्यहमर्ज्जुनम्॥ ४७॥ कच्चित् सैन्धवको राजा दुर्य्योधनहिते रतः। नन्दयिष्यत्यमित्राणि फाल्गुनेन निपातितः॥ ४८॥ कच्चित् दुर्य्योधनो राजा फाल्गुनेन निपातितम्। दृष्ट्वा सैन्धवकं सङ्ख्ये शममस्मासु धास्यति॥ ४९॥ दृष्ट्वा विनिहतान् भ्रातॄन् भीमसेनेन संयुगे। कच्चित् दुर्य्योधनो मन्दः शममस्मासु धास्यति॥ ५०॥ दृष्ट्वा चान्यान्महायोधान् पतितान् धरणीतले। कच्चित् दुर्य्योधनो मन्दः पश्चात्तापं करिष्यति॥ ५१॥ कच्चिद्भीष्मेण नो वैरं शममेकेन यास्यति। शेषस्य रक्षणार्थञ्च सन्धास्यति सुयोधनः॥५२॥ एवं बहुविधं तस्य राज्ञश्चिन्तयतस्तदा। कृपयाभिपरीतस्य घोरं युद्धमवर्त्तत॥ ५३॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरहर्षे अष्टाविंशत्यधिकशततोऽध्यायः॥ १२८॥

धृतराष्ट्र उवाच। तथा तु नर्दमानं तं भीमसेनं महाबलम्। मेघस्तनितनिर्घोषं के वीराः पर्य्यवारयन्॥ १॥ न हि पश्यास्यहं तं वै त्रिषु लोकेषु सञ्जय। क्रुद्धस्य भीमसेनस्य यस्तिष्ठेदग्रतो रणे॥ २॥ गदामुद्यच्छतस्तस्य कालस्येव महामृधे। न हि पश्याम्यहं तात यस्तिष्ठेत रणाजिरे॥ ३॥ रथं रथेन यो हन्यात् कुञ्जरं कुञ्जरेण च। कस्तस्य पुरतः स्थाता साक्षादपि शतक्रतुः॥ ४॥ रणे क्रुद्धस्य भीमस्य मम पुत्रान् जिघांसतः। दुर्य्योधनहिते युक्ताः समतिष्ठन्त केऽग्रतः॥ ५॥ भीमसेनदवाग्नेस्तु मम पुत्रांस्तृणोपमान्। प्रधक्षतो रणमुखे केऽतिष्ठन्नग्रतो नराः॥ ६॥ काल्यमानान् हि मे पुत्रान् भीमेनावेक्ष्य संयुगे। कालेनेव प्रजाः सर्वाः के भीमं पर्य्यवारयन्॥ ७॥ न मेऽर्ज्जुनाद्भयं तादृक् कृष्णान्नापि च सात्वतात्। हुतभुग्जन्मनो नैव यादृग्भीमाद्भयं मम॥ ८॥ भीमवह्नेः प्रदीप्तस्य मम पुत्रान् दिधक्षतः। के शूराः पर्य्यवर्त्तन्त तन्ममाचक्ष्व सञ्जय॥ ९॥

सञ्जय उवाच। तथा तु नर्दमानं तं भीमसेनं महारथम्। तुमुलेनैव शब्देन कर्णोऽप्यभ्यपतद्बली॥ १०॥ व्याक्षिपन् बलवच्चापमतिमात्रममर्षणः। कर्णस्तु युद्धमाकाङ्क्षन् दर्शयिष्यन् बलं बली॥ ११॥ रुरोध मार्गं भीमस्य वातस्येव महीरुहः। भीमोऽपि दृष्ट्वा सावेशं पुरो वैकर्त्तनं स्थितम्॥ १२॥ चुकोप बलवद्वीरश्चिक्षेपास्य शिलाशितान्। तान् प्रत्यगृह्णात् कर्णोऽपि प्रतीपं प्रेषयच्छरान्॥ १३॥ ततस्तु सर्वयोधानां यततां प्रेक्षतां तदा। प्रावेपन्निव गात्राणि कर्णभीमसमागमे॥ १४॥ रथिनां सादिनाञ्चैव तयोः श्रुत्वा तलस्वनम्। भीमसेनस्य निनदं घोरं श्रुत्वा रणाजिरे॥ १५॥ खञ्च भूमिञ्च संरुद्धां मेनिरे क्षत्रियर्षभाः। पुनर्घोरेण नादेन पाण्डवस्य महात्मनः॥ १६॥ समरे सर्वयोधानां धनूंष्यभ्यपतन् क्षितौ। वित्रस्तानि च सर्वाणि

सृक्कमूत्रं प्रसुस्रुवुः ॥ १७ ॥ वाहनानि महाराज बभूवुर्विमनांसि च। प्रादुरासन्निमित्तानि घोराणि च बहूनि च ॥ १८ ॥ गृध्रकङ्कबलैश्चासीदन्तरीक्षं समावृतम्। तस्मिंस्तु तुमुले राजन् भीमकर्णसमागमे ॥ १९ ॥ ततः कर्णस्तु विंशत्या शराणां भीममार्द्दयत्। विव्याध चास्य त्वरितः सूतं पञ्चभिराशुगैः ॥ २० ॥ प्रहस्य भीमसेनश्च कर्णं प्रत्याद्रवद्रणे। सायकानां चतुःषष्ट्या क्षिप्रकारी महाबलः ॥ २१ ॥ तस्य कर्णो महाराज सायकांश्चतुरोऽक्षिपत्। असंप्राप्तांस्तु तान् भीम सायकैर्नतपर्वभिः ॥२२॥ चिच्छेद बहुधा राजन् दर्शयन् पाणिलाघवम्। तं कर्णश्छादयामास शरव्रातैरनेकशः ॥ २३ ॥ सञ्छाद्यमानः कर्णेन बहुधा पाण्डुनन्दनः। चिच्छेद चापं कर्णस्य मुष्टिदेशे महारथः ॥ २४ ॥ विव्याध चैनं दशभिः सायकैर्नतपर्वभिः। अथान्यद्धनुरादाय सज्यं कृत्वा च सूतजः ॥ २५ ॥ विव्याध समरे भीमं भीमकर्मा महारथः। तस्य भीमो भृशं क्रुद्धस्त्रीन् शरान्नतपर्वणः ॥ २६ ॥ निचखानोरसि क्रुद्धः सूतपुत्रस्य वेगतः। तैः कर्णोऽराजत शरैस्तरोमध्यगतैस्तदा ॥ २७ ॥ महीधर इवोदग्रस्त्रिशृङ्गो भरतर्षभ। सुस्राव चास्य रुधिरं विद्धस्य परमेषुभिः ॥ २८ ॥ धातुप्रस्यन्दिनः शैलाद्यथा गैरिकधातवः। किञ्चिद्विचलितः कर्णः सुप्रहाराभिपीडितः ॥ २९ ॥ ससायकं धनुः कृत्वा भीमं विव्याध मारिष। चिक्षेप च पुनर्बाणान् शतशोऽथ सहस्रशः ॥ ३० ॥ स छाद्यमानः सहसा कर्णेन दृढधन्विना। धनुर्ज्यामच्छिनत्तूर्णमुत्स्मयन् पाण्डुनन्दनः ॥ ३१ ॥ सारथिञ्चास्य भल्लेन प्राहिणोद्यमसादनम्। वाहांश्च चतुरः सङ्ख्ये व्यसूंश्चक्रे महारथः ॥३२॥ हताश्वात्तु रथात्तूर्णमवप्लुत्य विशाम्पते। स्यन्दनं वृषसेनस्य समारोहन्महारथः ॥ ३३ ॥ निर्ज्जित्य तु रणे कर्णं भीमसेनः प्रतापवान्। ननाद च महानादं पर्ज्जन्यनिनदोपमम् ॥ ३४ ॥

तस्य तन्निनदं श्रुत्वा प्रहृष्टोऽभूद्युधिष्ठिरः । कर्णन्तु निर्जितं मत्वा भीमसेनेन भारत ॥ ३५ ॥ समन्ताच्छङ्खनिनदं पाण्डुसेनाकरोत्तदा । शत्रुसेनाध्वनिं श्रुत्वा तावका ह्यनदन् भृशम् ॥ ३६ ॥ गाण्डीवं पाक्षिपत् पार्थः कृष्णोऽप्यब्जमवादयत् । तमन्तर्द्धाय निनदं ध्वनिर्भीमस्य नर्द्दतः ॥ ३७ ॥ अश्रूयत महाराज सर्वसैन्येषु मारिष । ततो व्यायच्छतामस्त्रैः पृथक् पृथगजिह्मगैः । मृदुपूर्वञ्च राधेयो दृढ़पूर्वञ्च पाण्डवः ॥ ३८ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि कर्णपराजये
एकोनत्रिंशदधिकशतोऽध्यायः ॥ १२९ ॥

---

सञ्जय उवाच । तस्मिन् विलुलिते सैन्ये सैन्धवायार्जुने गते । सात्वते भीमसेने च पुत्रस्ते द्रोणमभ्ययात् ॥ १ ॥ त्वरन्नेकरथेनैव बहुकृत्यं विचिन्तयन् । स रथस्तव पुत्रस्य त्वरया परया युतः ॥ २ ॥ तूर्णमभ्यद्रवत् द्रोणं मनोमारुतवेगवान् । उवाच चैनं पुत्रस्ते संरम्भाद्रक्तलोचनः ॥ ३ ॥ अर्जुनो भीमसेनश्च सात्यकिश्चापराजितः । विजित्य सर्वसैन्यानि सुमहान्ति महारथाः ॥४॥ सम्प्राप्ताः सिन्धुराजस्य समीपमरिकर्षण । व्यायच्छन्ति च तत्रापि सर्व एवापराजिताः ॥५॥ विजित्य सर्वसैन्यानि सुमहान्ति महारथाः । कथं सात्यकिभीमाभ्यां व्यतिक्रान्तोऽसि मानद ॥६॥ आश्चर्यभूतं लोकेऽस्मिन् समुद्रस्येव शोषणम् । निर्ज्जयस्तव विप्राग्र्य सात्वतेनार्जुनेन च ॥ ७ ॥ तथैव भीमसेनेन लोकः संवदते भृशम् । कथं द्रोणो जितः सङ्ख्ये धनुर्वेदस्य पारगः ॥ ८ ॥ इत्येवं ब्रुवते योधा अश्रद्धेयमिदं तव । नाश एव तु मे नूनं मन्दभाग्यस्य संयुगे ॥ ९ ॥ यत्र त्वां पुरुषव्याघ्र व्यतिक्रान्तास्त्रयो

रथाः। एवं गते तु कृत्येऽस्मिन् ब्रूहि यत्ते विवक्षितम्॥ १०॥
यद्गतं गतमेवेह शेषं चिन्तय मानद। यत् कृत्यं सिन्धुराजस्य
प्राप्तकालमनन्तरम्। तद्भवीतु भवान् क्षिप्रं साधु तत् सम्विधी-
यताम्॥ ११॥

द्रोण उवाच। चिन्त्यं बहु महाराज यत्कृत्यं तच्च मे शृणु।
त्रयो हि समतिक्रान्ताः पाण्डवानां महारथाः॥ १२॥ याव-
त्तेषां भयं पश्चात्तावदेषां पुरःसरम्। तद्गरीयस्तरं मन्ये यत्र
कृष्णधनञ्जयौ॥ १३॥ सा पुरस्ताच्च पश्चाच्च गृहीता भारती
चमू। तत्र कृत्यमहं मन्ये सैन्धवस्याभिरक्षणम्॥ १४॥ स नो
रक्ष्यतमस्तात क्रुद्धाद्भीतो धनञ्जयात्। गतौ हि सैन्धवं वीरौ
युयुधानवृकोदरौ॥ १५॥ सम्प्राप्तं तदिदं द्यूतं यत्तच्छकुनि-
बुद्धिजम्। न सभायां जयो वृत्तो नापि तत्र पराजयः॥ १६॥
इह नो ग्लहमानानामद्य तावज्जयाजयौ। यान् स्म तान् ग्लहते
घोरान् शकुनिः कुरुसंसदि॥ १७॥ अक्षान् स मन्यमानः प्राक्-
शरास्ते हि दुरासदाः। न तेऽक्षा निशिता घोराः शरा युस्म-
च्चतुश्छिदः॥ १८॥ यत्र ते बहवस्तात कुरवः पर्य्यवस्थिताः।
सेनां दुरोदरं विद्धि शरानक्षान् विशाम्पते॥ १९॥ ग्लहञ्च
सैन्धवं राजन्नत्र द्यूतस्य निश्चयः। सैन्धवे हि महद्द्यूतं समा-
सक्तं परैः सह॥ २०॥ अत्र सर्व्वे महाराज त्यक्त्वा जीवित-
मात्मनः। सैन्धवस्य रणे रक्षां विधिवत् कर्त्तुमर्हथ॥ २१॥
तत्र नो ग्लहमानानां ध्रुवौ तात जयाजयौ। यत्र ते परमेष्वासा
यत्ता रक्षन्ति सैन्धवम्॥ २२॥ तत्र याहि ध्रुवं शीघ्रं तांश्च
रक्षस्व रक्षिणः। इहैव त्वहमाशिष्ये प्रेषयिष्यामि चापरान्॥२३॥
निरोत्स्यामि च पाञ्चालान् सहितान् पाण्डुसृञ्जयैः। ततो
दुर्य्योधनः प्रायात्तूर्णमाचार्य्यशासनात्॥ २४॥ उद्यमात्मान-
मुग्राय कर्मणे सपदानुगः। चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यु-

त्तमौजसौ ॥ २५ ॥ बाह्येन सेनामभ्येत्य जग्मतुः सव्यसाचिनम्।
यौ हि पूर्वं महाराज वारितौ कृतवर्मणा ॥ २६ ॥ प्रविष्टेऽर्जुने
राजंस्तव सैन्यं युयुत्सया। पार्श्वेन सेनामायान्तौ कुरुराजो
ददर्श ह ॥ २७ ॥ ताभ्यां दुर्य्योधनः सार्द्धं समाच्छेद्युद्धमुत्तमम्।
त्वरितस्त्वरमानाभ्यां भ्रातृभ्यां भारतो बली ॥ २८ ॥ तावभि-
द्रवतामेवमुभावुद्यतकार्मुकौ। महारथसमाख्यातौ क्षत्रियप्रवरौ
युधि ॥ २९ ॥ तमविध्यद्युधामन्युस्त्रिंशता कङ्कपत्रिभिः। विंशत्या
सारथिञ्चापि चतुर्भिश्चतुरो हयान् ॥ ३० ॥ दुर्य्योधनो युधा-
मन्योर्ध्वजमेकेषुणाच्छिनत्। इषुणा कार्मुकञ्चास्य सञ्चकर्त्त सुत-
स्तव ॥ ३१ ॥ सारथिञ्चास्य भल्लेन रथनीड़ादपाहरत्। ततो
विध्यच्छरैस्तीक्ष्णैश्चतुर्भिश्चतुरो हयान् ॥ ३२ ॥ युधामन्युश्च संक्रुद्धः
शरांस्त्रिंशतमाहवे। व्यसृजत्तव पुत्रस्य त्वरमाणः स्तनान्तरे
॥ ३३ ॥ तथोत्तमौजाः संक्रुद्धः शरैर्हेमविभूषितैः। अविध्यत्
सारथिञ्चास्य प्राहिणोद्यमसादनम् ॥ ३४ ॥ दुर्य्योधनोऽपि राजेन्द्र
पाञ्चाल्यस्योत्तमौजसः। जघानचतुरोऽस्याश्वान् उभौ च पार्ष्णि-
सारथी ॥ ३५ ॥ उत्तमौजा हताश्वस्तु हतसूतस्तु संयुगे।
आरुरोह रथं भ्रातुर्युधामन्योरभित्वरन् ॥ ३६ ॥ स रथं प्राप्य
तं भ्रातुर्दुर्य्योधनहयान् शरैः। बहुभिस्ताड़यामास ते हताः
प्रापतन् भुवि ॥ ३७ ॥ हयेषु पतितेष्वस्य चिच्छेद परमेषुणा।
युधामन्युर्धनुः शीघ्रं शरावापञ्च वीर्य्यवान् ॥ ३८ ॥ हताश्व-
सूतात् स रथादवप्लुत्य नरर्षभः। गदामादाय ते पुत्रः
पाञ्चाल्यावभ्यधावत ॥ ३९ ॥ तमापतन्तं सम्प्रेक्ष्य क्रुद्धं पर-
पुरञ्जयम्। अवप्लुतौ रथोपस्थात् युधामन्यूत्तमौजसौ ॥ ४० ॥
ततः स हेमचित्रं तं स्यन्दनप्रवरं गदी। गदया पोथयामास
साश्वसूतध्वजं रणे ॥ ४१ ॥ हत्वा चैवं स पुत्रस्ते हताश्वो
हतसारथिः। मद्रराजरथं तूर्णमारुरोह परन्तपः ॥ ४२ ॥

पाञ्चालानान्तु मुख्यौ तौ राजपुत्रौ महारथौ। रथावन्यौ समारुह्य बीभत्सुमभिजग्मतुः ॥ ४३ ॥

इतिद्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनयुद्धे त्रिंशदधिकशततोऽध्यायः ॥ १३० ॥

---

सञ्जय उवाच। वर्त्तमाने महाराज सङ्ग्रामे लोमहर्षणे। व्याकुलेषु च सर्वेषु पीड्यमानेषु सर्वशः ॥ १ ॥ राधेयो भीममानर्च्छद्युद्धाय भरतर्षभ। यथा नागो वने नागं मत्तो मत्तमभिद्रवन् ॥ २ ॥

धृतराष्ट्र उवाच। यौ तौ कर्णश्च भीमश्च सम्प्रयुद्धौ महाबलौ। अर्जुनस्य रथोपान्ते कीदृशः सोऽभवद्रणः ॥ ३ ॥ पूर्वं हि निर्जितः कर्णो भीमसेनेन संयुगे। कथम्भूयस्तु राधेयो भीममागान्महारथ ॥ ४ ॥ भीमो वा सूततनयं प्रत्युद्यातः कथं रणे। महारथं समाख्यातं पृथिव्यां प्रवरं रथम् ॥ ५ ॥ भीष्मद्रोणावतिक्रम्य धर्मपुत्रो युधिष्ठिरः। नान्यतो भयमादत्त विना कर्णं धनुर्द्धरम् ॥ ६ ॥ भयान्न शेते सततं चिन्तयन् वै महारथम्। तं कथं सूतपुत्रं हि भीमोऽयुध्यत संयुगे ॥ ७ ॥ ब्राह्मण्यं वीर्य्यसम्पन्नं समरेष्वनिवर्त्तिनम्। कथं कर्णं युधां श्रेष्ठं भीमोऽयुध्यत सञ्जय ॥ ८ ॥ यौ तौ समीयतुर्वीरावर्जुनस्य रथं प्रति। कथन्तु तावयुध्येतां सूतपुत्रवृकोदरौ ॥ ९ ॥ भ्रातृत्वं दर्शितं पूर्वं घृणी चापि स सूतजः। कथं भीमेन युयुधे कुन्त्या वाक्यमनुस्मरन् ॥ १० ॥ भीमो वा सूतपुत्रेण स्मरन् वैरं पुराकृतम्। सोऽयुध्यत कथं वीरः कर्णेन सह संयुगे ॥ ११ ॥ आशास्ते च सदा सूत पुत्रो दुर्योधनो मम। कर्णो जेष्यति सङ्ग्रामे सहितान् पाण्डवानिति ॥ १२ ॥ जयाशा यत्र मन्दस्य

पुत्रस्य मम संयुगे। स कथं भीमकर्म्माणं भीमसेनमयुध्यत ॥१३॥
यं समाश्रित्य पुत्रैर्मे कृतं वैरं महारथैः। तं सूततनयं तात
कथं भीमो ह्ययोधयत् ॥ १४ ॥ अनेकान् विप्रकारांश्च सूतपुत्र-
समुद्भवान्। स्मरमाणः कथं भीमो युयुधे सूतसूनुना ॥ १५ ॥
योऽजयत् पृथिवीं सर्व्वां रथेनैकेन वीर्य्यवान्। तं सूततनयं युद्धे
कथं भीमोऽह्ययोधयत् ॥ १६ ॥ यो जातः कुण्डलाभ्याञ्च कवचेन
सहैव च। तं सूतपुत्रं समरे भीमः कथमयोधयत् ॥ १७ ॥ यथा
तयोर्युद्धमभूत् यश्चासीद्विजयस्तयोः। तन्ममाचक्ष्व तत्त्वेन कुशलो
ह्यसि सञ्जय ॥ १८ ॥

सञ्जय उवाच। भीमसेनस्तु राधेयमुत्सृज्य रथिनां वरम्।
इयेष गन्तुं यत्रास्तां वीरौ कृष्णधनञ्जयौ ॥ १९ ॥ तं प्रयान्त-
मभिद्रुत्य राधेयः कङ्कपत्रिभिः। अभ्यवर्षन्महाराज मेघो वृष्ट्येव
पर्व्वतम् ॥ २० ॥ फुल्लता पङ्कजेनेव वक्त्रेणाभ्युत्स्मयन् बली।
आजुहाव रणे यान्तं भीममाधिरथिस्तदा ॥ २१ ॥

कर्ण उवाच। भीमाहितैस्तव रणः स्वप्नेऽपि न विभा-
वितः। तद्दर्शयसि कस्मान्मे पृष्ठं पार्थदिदृक्षया ॥ २२ ॥ कुन्त्याः
पुत्रस्य सदृशं नेदं पाण्डवनन्दन। तेन मामभितः स्थित्वा शर-
वर्षैरवाकिर ॥ २३ ॥ भीमसेनस्तदाह्वानं कर्णेनामर्षयद्युधि।
अर्द्धमण्डलमावृत्य सूतपुत्रमयोधयत् ॥ २४ ॥ अवक्रगामिभिर्वाणै-
रभ्यवर्षन्महायशाः। दैरथे दंशितं यान्तं सर्व्वशस्त्रविशारदम् ॥२५॥
विधित्सन् कलहस्यान्तं जिघांसुः कर्णमाच्छिणोत्। तांस्तु हत्वे-
तरान् सर्व्वान् भीमसेनो महाबल ॥ ॥ २६ ॥ तस्मै प्रासृजदुग्राणि
विविधानि परन्तपः। अमर्षी पाण्डवः क्रुद्धः शरवर्षाणि मारिष
॥ २७ ॥ तस्य तानीषुवर्षाणि मत्तद्विरदगामिनः। सूतपुत्रो-
ऽस्त्रमायाभिरग्रसत् स महाबलः ॥ २८ ॥ स यथावन्महाराज
विद्यया वै सुपूजित। आचार्य्यवन्महेष्वासः कर्णपर्य्यचरद्रणे ॥२९॥

संरम्भेण तु युध्यन्तं भीमसेनं स्मयन्निव। अवामन्यत राधेय-
स्तममर्षी वृकोदरम् ॥ ३० ॥ तन्नामृष्यत कौन्तेयः कर्णस्य स्मित-
माहवे। युध्यमानेषु वीरेषु पश्यत्सु च समन्ततः ॥ ३१ ॥ तं
भीमसेनः सम्प्राप्तं वत्सदन्तैः स्तनान्तरे। बिव्याध बलवान्
क्रुद्धस्तोत्त्रैरिव महाद्विपम् ॥ ३२ ॥ पुनस्तु सूतपुत्रन्तु सपुङ्खै-
र्निशितैः शरैः। सुमुक्तैश्चित्रवर्माणं निर्बिभेद त्रिसप्तभिः ॥ ३३ ॥
कर्णो जाम्बूनदैर्जालैः सञ्छन्नान् वातरंहसः। विव्याध तुरगान्
वीरः पञ्चभिः पञ्चभिः शरैः ॥ ३४ ॥ ततो बाणमयं जालं भीम-
सेनरथं प्रति। कर्णेन विहितं राजन् निमेषार्द्धाददृश्यत ॥ ३५ ॥
सरथः सध्वजस्तत्र ससूतः पाण्डवस्तदा। प्राच्छाद्यत महा-
राज कर्णचापच्युतैः शरैः ॥ ३६ ॥ तस्य कर्णश्चतुःषष्ट्या व्यधमत्
कवचं दृढ़म्। क्रुद्धश्चाप्यहनत् पार्थं नाराचैर्मर्मभेदिभिः ॥ ३७ ॥
ततोऽचिन्त्य महाबाहुः कर्णकार्मुकनिःसृतान्। समाश्लिष्यदस-
म्भ्रान्तः सूतपुत्रं वृकोदरः ॥ ३८ ॥ स कर्णचापप्रभवानिषूनाशी-
विषोपमान्। बिभ्रद्भीमो महाराज न जगाम व्यथां रणे ॥ ३९ ॥
ततो द्वात्रिंशता भल्लैर्निशितैस्तिग्मतेजनैः। विव्याध समरे कर्णं
भीमसेन प्रतापवान् ॥ ४० ॥ अयत्नेनैव तं कर्णः शरैर्भृशमवा-
किरत्। भीमसेनं महावाहुं सैन्धवस्य वधैषिणम् ॥ ४१ ॥
मृदुपूर्वं हि राधेयो भीममाजावयोधयत्। क्रोधपूर्वं तथा भीमः
पूर्ववैरमनुस्मरन् ॥ ४२ ॥ तं भीमसेनो नामृष्यदवमानममर्षणः।
स तस्मै व्यसृजत्तूर्णं शरवर्षममित्रहा ॥ ४३ ॥ ते शराः प्रेषिता-
स्तेन भीमसेनेन संयुगे। निपेतुः सर्वतो वीरे कूजन्त इव पक्षिणः
॥ ४४ ॥ हेमपुङ्खाः प्रसन्नाग्रा भीमसेनधनुश्च्युताः। प्राच्छादयंस्ते
राधेयं शलभा इव पावकम् ॥ ४५ ॥ कर्णस्तु रथिनां श्रेष्ठ-
श्छाद्यमानः समन्ततः। राजन् व्यसृजदुग्राणि शरवर्षाणि भारत
॥ ४६ ॥ तस्य तानशनिप्रख्यानिषून् समरशोभिनः। चिच्छेद

बहुभिर्भल्लैरसंप्राप्तान् वृकोदरः ॥ ४७ ॥ पुनश्च शरवर्षेण छादयामास भारत । कर्णो वैकर्त्तनो युद्धे भीमसेनमरिन्दमः ॥ ४८ ॥ तत्र भारत भीमन्तु दृष्टवन्तः स्म सायकैः । समाचिततनुं सङ्ख्ये श्वाविधं शललैरिव ॥ ४९ ॥ हेमपुङ्खाञ्छिलाधौतान् कर्णचापच्युताञ्छरान् । दधार समरे वीरः स्वरश्मीनिव रश्मिवान् ॥ ५० ॥ रुधिरोच्चितसर्वाङ्गो भीमसेनो व्यराजत । समृद्धकुसुमापीड़ो वसन्तेऽशोकवृक्षवत् ॥ ५१ ॥ तत्तु भीमो महाबाहोः कर्णस्य चरितं रणे । नामृष्यत महाबाहुः क्रोधादुद्वृत्तलोचनः ॥ ५२ ॥ स कर्णं पञ्चविंशत्या नाराचानां समार्पयत् । महीधरमिव श्वेतं गूढ़पादैर्विषोल्बणैः ॥ ५३ ॥ पुनरेव च विव्याध षड़्भिरष्टाभिरेव च । मर्म्मस्वमरविक्रान्तः सूतपुत्रं तनुत्यजम् ॥ ५४ ॥ पुनरन्येन वाणेन भीमसेनः प्रतापवान् । चिच्छेद कार्म्मुकं तूर्णं कर्णस्य प्रहसन्निव ॥ ५५ ॥ जघान चतुरश्चाश्वान् सूतञ्च त्वरितः शरैः । नाराचैरर्करश्म्याभैः कर्णं विव्याध चोरसि ॥ ५६ ॥ ते जग्मुर्धरणीमाशु कर्णं निर्भिद्य पत्रिणः । यथा जलधरं भित्त्वा दिवाकरमरीचयः ॥ ५७ ॥ स वैकल्यं महत् प्राप्य छिन्नधन्वा शराहतः । तथा पुरुषमानी स प्रत्यपायाद्रथान्तरम् ॥ ५८ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि कर्णपराजये एकत्रिंशदधिकशततोऽध्यायः ॥ १३१ ॥

---

धृतराष्ट्र उवाच । यस्मिन् जयाशा महती पुत्राणां मम सञ्जय । तं भीमाद्विमुखं दृष्ट्वा किन्नु दुर्य्योधनोऽब्रवीत् ॥ १ ॥ कथञ्च युयुधे भीमो वीर्य्यश्लाघी महाबलः । कर्णो वा समरे

तात किमकार्षीदतः परम्। भीमसेनं रणे दृष्ट्वा ज्वलन्तमिव पावकम्॥ २॥

सञ्जय उवाच। रथमन्यं समास्थाय विधिवत् कल्पितं पुनः। अभ्ययात् पाण्डवं कर्णो वातोद्धूत इवार्णवः॥ ३॥ क्रुद्धमाधिरथं दृष्ट्वा पुत्रास्तव विशाम्पते। भीमसेनममन्यन्त वैश्वानरमुखे हुतम्॥ ४॥ शरशब्दं ततः कृत्वा तलशब्दञ्च भैरवम्। अभ्यवर्षत राधेयो भीमसेनरथं प्रति॥ ५॥ पुनरेव तयो राजन् घोर आसीत् समागमः। वैकर्त्तनस्य शूरस्य भीमस्य च महात्मनः॥ ६॥ संरब्धौ हि महाबाहू परस्परवधैषिणौ। अन्योऽन्यमीक्षाञ्चक्राते दहन्ताविव लोचनैः॥ ७॥ क्रोधरक्तेक्षणौ तीव्रौ निश्वसन्ताविवोरगौ। शूरावन्योऽन्यमासाद्य ततक्षतुररिन्दमौ॥ ८॥ व्याघ्राविव सुसंरब्धौ श्येनाविव च शीघ्रगौ। शरभाविव संक्रुद्धौ युयुधाते परस्परम्॥ ९॥ ततो भीमः स्मरन् क्लेशानक्षद्यूते वनेऽपि च। विराटनगरे चैव दुःखं प्राप्तमरिन्दमः॥ १०॥ राष्ट्राणां स्फीतरत्नानां हरणञ्च तवात्मजैः। सततञ्च परिक्लेशान् सपुत्रेण त्वया कृतान्॥ ११॥ दग्धुमैच्छश्च यत् कुन्तीं सपुत्रां त्वमनागसम्। कृष्णायाश्च परिक्लेशं सभामध्ये दुरात्मभिः॥ १२॥ केशपक्षग्रहञ्चैव दुःशासनकृतं तथा। परुषाणि च वाक्यानि कर्णेनोक्तानि भारत॥ १३॥ पतिमन्यं परीप्सस्व त्वं न सन्ति पतयस्तव। पतिता नरके पार्थाः सर्वे षण्डतिलोपमाः॥ १४॥ समक्षं तव कौरव्य यदूचुः कुरवस्तदा। दासभावेन कृष्णाञ्च भोक्तुकामाः सुतास्तव॥ १५॥ यच्चापि तान् प्रव्रजतः कृष्णाजिननिवासिनः। परुषाण्युक्तवान् कर्णः सभायां सन्निधौ तव॥ १६॥ तृणीकृत्य यथा पार्थांस्तव पुत्रो ववल्ग ह। विषमस्थान् समस्थो हि संरब्धो गतचेतसः॥ १७॥ बाल्यात् प्रभृति चारिघ्नः स्वानि दुःखानि चिन्तयन्। निरभिद्यत

धर्मात्मा जीवितेन वृकोदरः ॥ १८ ॥ ततो विस्फार्य्य सुमहद्धेम-पृष्ठं दुरासदम । चापं भरतशार्दूल त्यक्तात्मा कर्णमभ्ययात् ॥ १९ ॥ स सायकमयैर्जालैर्भीमः कर्णरथं प्रति । भानुमद्भिः शिलाधौतैर्भानोः प्राच्छादयत् प्रभाम् ॥ २० ॥ ततः प्रहस्याधि-रथिस्तूर्णमस्य शिलाशितैः । व्यधमद्भीमसेनस्य शरजालानि पत्रिभिः ॥ २१ ॥ महारथो महाबाहुर्महाबाणैर्महाबलः । विव्याधाधि-रथिर्भीमं नवभिर्निशितैस्तदा ॥ २२ ॥ स तोत्रैरिव मातङ्गो वार्य्यमाणः पतत्रिभिः । अभ्यधावत सम्भ्रान्तः सूतपुत्रं वृकोदरः ॥ २३ ॥ तमापतन्तं वेगेन रभसं पाण्डवर्षभम् । कर्णः प्रत्यु-द्ययौ क्रुद्धो मत्तो मत्तमिव द्विपम् ॥ २४ ॥ ततः प्रध्माप्य जलजं भेरीशतसमस्वनम् । अक्षुभ्यत बलं हर्षादुद्धूत इव सागरः ॥२५॥ तदुद्धूतं बलं दृष्ट्वा नागाश्वरथपत्तिमत् । भीमः कर्णं समासाद्य छादयामास सायकैः ॥ २६ ॥ अश्वानृक्षसवर्णांश्च हंसवर्णैर्हयो-त्तमैः । व्यामिश्रयद्रणे कर्णः पाण्डवं छादयन् शरैः ॥ २७ ॥ ऋक्षवर्णान् हयान् हंसैर्मिश्रान् मारुतरंहसः । निरीक्ष्य तव पुत्राणां हाहाकृतमभूद्बलम् ॥ २८ ॥ ते हया बह्वशोभन्त मिश्रिता वातरंहसः । सितासिता महाराज यथा व्योम्नि बलाहकाः ॥ २९ ॥ संरब्धौ क्रोधताम्राक्षौ प्रेक्ष्य कर्णवृकोदरौ । सन्त्रस्ताः समकम्पन्त त्वदीया वै महारथाः ॥ ३० ॥ यमराष्ट्रोपमं घोर-मासीदायोधनं तयोः । दुर्द्दर्शं भरतश्रेष्ठ प्रेतराजपुरं यथा ॥३१॥ समाजमिव तच्चित्रं प्रेक्षमाणा महारथाः । नालक्षयन् जयं व्यक्तमेकस्यैव महारणे ॥ ३२ ॥ तयोः प्रैक्षन्त संमर्द्दं सन्निकृष्टं महास्त्रयोः । तव दुर्मन्त्रिते राजन् सपुत्रस्य विशाम्पते ॥ ३३ ॥ छादयन्तौ हि शत्रुघ्नावन्योऽन्यं सायकैः शितैः । शरजालावृतं व्योम चक्रातेऽद्भुतविक्रमौ ॥ ३४ ॥ तावन्योऽन्यं जिघांसन्तौ शरैस्तीक्ष्णैर्महारथौ । प्रेक्षणीयतरावास्तां वृष्टिमन्ताविवाम्बुदौ

॥ ३५ ॥ सुवर्णविकृतान् वाणान् प्रमुञ्चन्तावरिन्दमौ। भास्वरं व्योम चक्राते महोल्काभिरिव प्रभो॥ ३६ ॥ ताभ्यां मुक्ताः शरा राजन् गार्द्धपत्राश्चकाशिरे। श्रेण्यः शरदि मत्तानां सारसानामिवाम्वरे॥ ३७॥ संसक्तं सूतपुत्रेण दृष्ट्वा भीममरिन्दमम्। अतिभारममन्येतां भीमे कृष्णधनञ्जयौ॥ ३८॥ ततोऽधिरथिभीमाभ्यां शरैर्मुक्तैर्दृढं हताः। इषुपातमतिक्रम्य पेतुरश्वनरद्विपाः॥ ३९॥ पतद्भिः पतितैश्चान्यैर्गतासुभिरनेकशः। कृतो राजन्महाराज पुत्राणां ते जनक्षयः॥ ४०॥ मनुष्याश्वगजानाञ्च शरीरैर्गतजीवितैः। क्षणेन भूमिः सञ्जज्ञे संवृता भरतर्षभ॥४१॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि भीमकर्णयुद्धे
द्वात्रिंशदधिकशततोऽध्यायः॥ १३२॥

---

धृतराष्ट्र उवाच। अत्यद्भुतमहं मन्ये भीमसेनस्य विक्रमम्। यत् कर्णं योधयामास समरे लघुविक्रमम्॥ १॥ त्रिदशानपि चोद्युक्तान् सर्वशस्त्रधरान् युधि। वारयेद्यो रणे कर्णः सयक्षासुरमानवान्॥ २॥ स कथं पाण्डवं युद्धे भ्राजमानमिव श्रिया। नातरत् संयुगे पार्थं तन्ममाचक्ष्व सञ्जय॥ ३॥ कथञ्च युद्धं सम्भूतं तयोः प्राणदुरोदरे। अत्र मन्ये समायत्तौ जयो वाजय एव च॥ ४॥ कर्णं प्राप्य रणे सूत मम पुत्रः सुयोधनः। जेतुमुत्सहते पार्थान् सगोविन्दान् ससात्त्वतान्॥ ५॥ श्रुत्वा तु निर्ज्जितं कर्णमसकृद्भीमकर्मणा। भीमसेनेन समरे मोहश्चाविशतीव माम्॥ ६॥ विनष्टान् कौरवान्मन्ये मम पुत्रस्य दुर्नयैः। न हि कर्णो महेष्वासान् पार्थान् जेष्यति सञ्जय॥ ७॥ कृतवान् यानि युद्धानि कर्णः पाण्डुसुतैः सह। सर्वत्र पाण्डवाः कर्णमजयन्त रणाजिरे॥ ८॥ अजेयाः पाण्डवास्तात देवैरपि

सवाशवैः। न च तद्बुध्यते मन्दः पुत्रो दुर्य्योधनो मम ॥ ९ ॥ धनं धनेश्वरस्येव हृत्वा पार्थस्य मे सुतः। मधुप्रेप्सुरिवाबुद्धिः प्रपातं नावबुध्यते ॥ १० ॥ निकृत्या निकृतिप्रज्ञो राज्यं हृत्वा महात्मनाम्। जितमित्येव मन्वानः पाण्डवानवमन्यते ॥ ११ ॥ पुत्रस्नेहाभिभूतेन मया चाप्यकृतात्मना। धर्मे स्थिता महात्मानो निकृताः पाण्डुनन्दनाः ॥ १२ ॥ शमकामः सदा पार्थो दीर्घप्रेची युधिष्ठिरः। अशक्त इति मन्वानैः पुत्रैर्मम निराकृतः ॥ १३ ॥ तानि दुःखान्यनेकानि विप्रकारांश्च सर्वशः। हृदि कृत्वा महाबाहुर्भीमोऽयुध्यत सूतजम् ॥ १४ ॥ तस्मान्मे सञ्जय ब्रूहि कर्णभीमौ यथा रणे। अयुध्येतां युधि श्रेष्ठौ परस्परवधैषिणौ ॥१५॥

सञ्जय उवाच। शृणु राजन् यथावृत्तं सङ्ग्रामं कर्णभीमयोः। परस्परं बधप्रेप्सोर्वने कुञ्जरयोरिव ॥ १६ ॥ राजन् वैकर्त्तनो भीमं क्रुद्धः क्रुद्धमरिन्दमम्। पराक्रान्तं परिक्रम्य विव्याध त्रिंशता शरैः ॥ १७ ॥ महावेगैः प्रसन्नाग्रैः शातकुम्भपरिष्कृतैः। अहनद्भरतश्रेष्ठ भीमं वैकर्त्तनः शरैः ॥ १८ ॥ तस्यास्यतो धनुर्भीमश्चकर्त्त निशितैस्त्रिभिः। रथनीड़ाच्च यन्तारं भल्लेनापातयत् क्षितौ ॥ १९ ॥ स काङ्क्षन् भीमसेनस्य बधं वैकर्त्तनो भृशम्। शक्तिं कनकवैदूर्य्यचित्रदण्डां परामृशत् ॥ २० ॥ प्रगृह्य च महाशक्तिं कालशक्तिमिवापराम्। समुत्क्षिप्य च राधेयः सन्धाय च महाबलः ॥ २१ ॥ चिक्षेप भीमसेनाय जीवितान्तकरीमिव। शक्तिं विसृज्य राधेयः पुरन्दर इवाशनिम् ॥ २२ ॥ ननाद सुमहानादं बलवान् सूतनन्दनः। तञ्च नादं ततः श्रुत्वा पुत्रास्ते हर्षिताभवन् ॥ २३ ॥ तां कर्णभुजनिर्मुक्तामर्कवैश्वानरप्रभाम्। शक्तिं वियति चिच्छेद भीमः सप्तभिराशुगैः ॥ २४ ॥ छित्त्वा शक्तिं ततो भीमो निर्मुक्तोरगसन्निभाम्। मार्गमाण इव प्राणान् सूतपुत्रस्य मारिष ॥ २५ ॥ प्राहिणोत् क्रुद्धसंरब्धः शरान्

वर्हिणवाससः। स्वर्णपुङ्खान् शिलाधौतान् यमदण्डोपमान्मृधे
॥ २६ ॥ कर्णोऽप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरासदम्। विकृष्य च
महातेजा व्यसृजत् सायकांस्तदा ॥ २७ ॥ तान् पाण्डुपुत्रश्चिच्छेद
नवभिर्नतपर्वभिः। वसुषेणेन निर्मुक्तान्नरराज महाशरान् ॥२८॥
छित्त्वा भीमो महाराज नादं सिंह इवानदत्। तौ वृषाविव
नर्द्दन्तौ वलिनौ वासितान्तरे ॥ २९ ॥ शार्दूलाविव चान्योऽन्य-
मामिषार्थेऽभ्यगर्ज्जताम्। अन्योऽन्यं प्रजिहीर्षन्तावन्योऽन्यस्या-
न्तरैषिणौ ॥ ३० ॥ अन्योऽन्यमभिवीक्षन्तौ गोष्ठेष्विव महर्षभौ।
महागजाविवासाद्य विषाणाग्रैः परस्परम् ॥ ३१ ॥ शरैः पूर्णा-
यतोत्सृष्टैरन्योऽन्यमभिजघ्नतुः। निर्द्दहन्तौ महाराज शरवृष्ट्या
परस्परम्। अन्योऽन्यमभिविक्रुतौ कोपाद्विवृतलोचनौ ॥ ३२ ॥
प्रहसन्तौ तथान्योऽन्यं भर्त्सयन्तौ मुहुर्मुहुः शङ्खशब्दञ्च कुर्वाणौ
युयुधाते परस्परम् ॥ ३३ ॥ तस्य भीमः पुनश्चापं मुष्टौ चिच्छेद
मारिष। शङ्खवर्णांश्च तानश्वान् वाणैर्निन्ये यमक्षयम् ॥ ३४ ॥
सारथिञ्च तथाप्यस्य रथनीड़ादपातयत्। ततो वैकर्त्तनः कर्ण-
श्चिन्तां प्राप दुरत्ययाम् ॥ ३५ ॥ संछाद्यमानः समरे हताश्वो
हतसारथिः। मोहितः शरजालेन कर्त्तव्यं नाभ्यपद्यत ॥ ३६ ॥
तथा कृच्छ्रगतं दृष्ट्वा कर्णं दुर्य्योधनो नृपः। वेपमान इव क्रोधा-
द्व्यादिदेशाथ दुर्ज्जयम् ॥ ३७ ॥ गच्छ दुर्ज्जय राधेयं पुरो ग्रसति
पाण्डवः। जहि तूवरकं क्षिप्रं कर्णस्य बलमादधत् ॥ ३८ ॥
एवमुक्तस्तथेत्युक्त्वा तव पुत्रस्तवात्मजम्। अभ्यद्रवद्भीमसेनं व्यासक्तं
विकिरञ्छरैः ॥ ३९ ॥ स भीमं नवभिर्वाणैरश्वानष्टभिरार्द्दयत्।
षड्भिः सूतं त्रिभिः केतुं पुनस्तञ्चापि सप्तभिः ॥ ४० ॥ भीम-
सेनोऽपि संक्रुद्धः साश्वयन्तारमाशुगैः। दुर्ज्जयं भिन्नमर्माण-
मनयद्यमसादनम् ॥ ४१ ॥ स्वलङ्कृतं क्षितौ क्षिप्तं चेष्टमानं यथो-
रगम्। रुदन्नार्त्तस्तव सुतं कर्णश्चक्रे प्रदक्षिणम् ॥ ४२ ॥ स

तु तं विरथं कृत्वा स्मयन्नत्यन्तवैरिणम् । समाचिनोद्बाणगणैः शतघ्नीमिव शङ्कुभिः ॥ ४३ ॥ तथाप्यतिरथः कर्णो भिद्यमानः स सायकैः । न जहौ समरे भीमं क्रुद्धरूपं परन्तपः ॥ ४४ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि कर्णभीमयुद्धे त्रयस्त्रिंशदधिकशततोऽध्यायः ॥ १३३ ॥

---

सञ्जय उवाच । सर्व्वथा विरथः कर्णः पुनर्भीमेन निर्ज्जितः । रथमन्यं समास्थाय सद्यो विव्याध पाण्डवम् ॥ १ ॥ महागजाविवासाद्य विषाणाग्रैः परस्परम् । शरैः पूर्णायतोत्सृष्टैरन्योऽन्यमभिजघ्नतुः ॥ २ ॥ अथ कर्णः शरव्रातैर्भीमसेनं समार्पयत् । ननाद बलवन्नादं पुनर्व्विव्याध चोरसि ॥ ३ ॥ तं भीमो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः । पुनर्व्विव्याध विंशत्या शराणां नतपर्व्वणाम् ॥ ४ ॥ कर्णस्तु नवभिर्भीमं विद्ध्वा राजन् स्तनान्तरे । ध्वजमेकेन विव्याध सायकेन शितेन ह ॥ ५ ॥ सायकानां ततः पार्थः त्रिषष्ट्या प्रत्यविध्यत । तोत्त्रैरिव महानागं कशाभिरिव वाजिनन् ॥ ६ ॥ सोऽतिविद्धो महाराज पाण्डवेन यशस्विना । सृक्कणी लेलिहन् वीरः क्रोधसंरक्तलोचनः ॥ ७ ॥ ततः शरं महाराज सर्व्वकायावदारणम । प्राहिणोद्भीमसेनाय वधायेन्द्र इवाशनिम् ॥ ८ ॥ स निर्भिद्य रणे पार्थं सूतपुत्रधनुश्च्युतः । अगच्छद्दारयन् भूमिं चित्रपुङ्खः शिलीमुखः ॥ ९ ॥ ततो भीमो महाबाहुः क्रोधसंरक्तलोचनः । वज्रकल्पां चतुष्किष्कुं गुर्व्वीं रुक्माङ्गदीं गदाम् ॥ १० ॥ प्राहिणोत् सूतपुत्राय षड़स्रिमविचारयन् । तया जघानाधिरथेः सदश्वान् साधुवाहिनः ॥ ११ ॥ गदया भारतः क्रुद्धो वज्रेणेन्द्र इवासुरान् । ततो भीमो महाबाहुः क्षुराभ्यां भरतर्षभ ॥ १२ ॥ ध्वजमाधिरथेश्छित्त्वा सूत-

मभ्यहनच्छरैः । हताश्वसूतमुत्सृज्य स रथं पतितध्वजम् ॥१३॥ विस्फारयन् धनुः कर्णस्तस्थौ भारत दुर्मनाः । तत्राद्भुतमपश्याम राधेयस्य पराक्रमम् ॥ १४ ॥ विरथो रथिनां श्रेष्ठो वारयामास यद्रिपुम् । विरथं तं नरश्रेष्ठं दृष्ट्वाधिरथिमाहवे ॥ १५ ॥ दुर्य्योधनस्ततो राजन्नभ्यभाषत दुर्मुखम् । एष दुर्मुख राधेयो भीमेन विरथीकृतः ॥ १६ ॥ तं रथेन नरश्रेष्ठं सम्पादय महारथम् । दुर्य्योधनवचः श्रुत्वा ततो भारत दुर्मुखः ॥ १७ ॥ त्वरमाणोऽभ्ययात् कर्णं भीमञ्चावारयच्छरैः । दुर्मुखं प्रेक्ष्य सङ्ग्रामे सूतपुत्रपदानुगम् ॥ १८ ॥ वायुपुत्रः प्रहृष्टोऽभूत् सृक्कणी परिलेलिहन् । ततः कर्णं महाराज वारयित्वा शिलीमुखैः ॥ १९ ॥ दुर्मुखाय रथं शीघ्रं प्रेषयामास पाण्डवः । तस्मिन् क्षणे महाराज नवभिर्नतपर्वभिः ॥ २० ॥ सुमुखैर्दुर्मुखं भीमः शरैर्निन्ये यमक्षयम् । ततस्तमेवाधिरथिः स्यन्दनं दुर्मुखे हते ॥ २१ ॥ आस्थितः प्रबभौ राजन् दीप्यमान इवांशुमान् । शयानं भिन्नमर्माणं दुर्मुखं शोणितोक्षितम् ॥ २२ ॥ दृष्ट्वा कर्णोऽश्रुपूर्णाक्षो मुहूर्त्तं नाभ्यवर्त्तत । तं गतासुमतिक्रम्य कृत्वा कर्णः प्रदक्षिणम् ॥ २३ ॥ दीर्घमुष्णं श्वसन् वीरो न किञ्चित् प्रत्यपद्यत । तस्मिंस्तु विवरे राजन्नाराचान् गार्द्धवाससः ॥ २४ ॥ प्राहिणोत् सूतपुत्राय भीमसेनश्चतुर्द्दश । ते तस्य कवचं भित्त्वा स्वर्णपुङ्खा महौजसः ॥२५॥ हेमचित्रा महाराज द्योतयन्तो दिशो दश । अपिबन् सूतपुत्रस्य शोणितं रक्तभोजनाः ॥ २६ ॥ क्रुद्धा इव मनुष्येन्द्र भुजङ्गाः कालचोदिताः । प्रसर्पमाणा मेदिन्यां ते व्यरोचन्त मार्गणाः ॥ २७॥ अर्द्धप्रविष्टाः संरब्धा बिलानीव महोरगाः । तं प्रत्यविध्यद्राधेयो जाम्बूनदविभूषितैः ॥ २८॥ चतुर्द्दशभिरत्युग्रैर्नाराचैरविचारयन् । ते भीमसेनस्य भुजं सव्यं निर्भिद्य पत्रिणः ॥ २९ ॥ प्राविशन्मेदिनीं भीमाः क्रौञ्चपत्ररथा इव । ते व्यरोचन्त नाराचाः

प्रविशन्तो वसुन्धराम् ॥ ३० ॥ गच्छत्यस्तं दिनकरे दीप्यमाना इवांशवः। स निर्भिन्नो रणे भीमो नाराचैर्मर्मभेदिभिः ॥ ३१ ॥ सुस्राव रुधिरं भूरि पर्वतः सलिलं यथा। स भीमस्त्रिभिरायस्तः सूतपुत्रं पतत्रिभिः ॥ ३२ ॥ सुपर्णवेगैर्विव्याध सारथिञ्चास्य सप्तभिः। स विह्वलो महाराज कर्णो भीमबलार्द्दितः ॥ ३३ ॥ प्राद्रवज्जवनैरश्वैरणं त्यक्त्वा महायशाः। भीमसेनस्तु विस्फार्य्य चापं हेमपरिष्कृतम्। आहवेऽतिरथोऽतिष्ठज्ज्वलन्निव हुताशनः ॥३४॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि कर्णापयाने
चतुस्त्रिंशदधिकशतोऽध्यायः ॥ १३४ ॥

---

धृतराष्ट्र उवाच। दैवमेव परं मन्ये धिक् पौरुषमनर्थकम्। यत्राधिरथिरायत्तो नातरत् पाण्डवं रणे ॥ १ ॥ कर्णः पार्थान् सगोविन्दान् जेतुमुत्सहते रणे। न च कर्णसमं योधं लोके पश्यामि कञ्चन ॥ २ ॥ इति दुर्य्योधनस्याहमश्रौषं जल्पतो मुहुः। कर्णो हि बलवान् शूरो दृढधन्वा जितक्लमः ॥ ३ ॥ इति मामब्रवीत् सूत मन्दो दुर्य्योधनः पुरा। वसुषेणसहायं मां नालं देवापि संयुगे ॥ ४ ॥ किमु पाण्डुसुता राजन् गतसत्त्वा विचेतसः। तत्र तं निर्ज्जितं दृष्ट्वा भुजङ्गमिव निर्विषम् ॥ ५ ॥ युद्धात् कर्णमपक्रान्तं किं स्वित् दुर्य्योधनोऽब्रवीत्। अहो दुर्मुखमेवैकं युद्धानामविशारदम् ॥ ६ ॥ प्रावेशयद्धुतवहं पतङ्गमिव मोहितः। अश्वत्थामा मद्रराजः कृपः कर्णश्च सङ्गताः ॥ ७ ॥ न शक्ताः प्रमुखे स्थातुं नूनं भीमस्य सञ्जय। तेऽपि चास्य महाघोरं बलं नागायुतोपमम् ॥ ८ ॥ जानन्तो व्यवसायञ्च क्रूरं मारुततेजसः। किमर्थं क्रूरकर्म्माणं यमकालान्तकोपमम् ॥९॥ बलसंरम्भवीर्य्यज्ञाः कोपयिष्यन्ति संयुगे। कर्णस्त्वेको महाबाहुः स्वबाहुबलमाश्रितः

॥ १० ॥ भीमसेनमनादृत्य रणेऽयुध्यत सूतजः। योऽजयत् समरे कर्णं पुरन्दर इवासुरम् ॥ ११ ॥ न स पाण्डुसुतो जेतुं शक्यः केनचिदाहवे। द्रोणं यः सम्प्रमथ्यैकः प्रविष्टो मम वाहिनीम् ॥ १२ ॥ भीमो धनञ्जयान्वेषी कस्तमर्च्छेज्जिजीविषुः। को हि सञ्जय भीमस्य स्थातुमुत्सहतेऽग्रतः ॥ १३ ॥ उद्यताशनिवक्तस्य महेन्द्रस्येव दानवः। प्रेतराजपुरम्प्राप्य निवर्त्ततापि मानवः ॥ १४ ॥ न भीमसेनं सम्प्राप्य निवर्त्तेत कदाचन। पतङ्गा इव वह्निन्ते प्राविशन्नल्पतेजसः ॥ १५ ॥ ये भीमसेनं संक्रुद्धमन्वधावन् विमोहिताः। यत्तत् सभायां भीमेन मम पुत्रवधाश्रयम् ॥ १६ ॥ उक्तं संरम्भिणोग्रेण कुरूणां शृण्वतां तदा। तन्नूनमभिसञ्चिन्त्य दृष्ट्वा कर्णं विनिर्जितम् ॥ १७ ॥ दुःशासनः सह भ्रात्रा भयाद्भीमादुपारमत्। यश्च सञ्जय दुर्बुद्धिरब्रवीत् समितौ मुहुः ॥ १८ ॥ कर्णो दुःशासनोऽहञ्च जेष्यामो युधि पाण्डवान्। स नूनं विरथं दृष्ट्वा कर्णं भीमेन निर्जितम् ॥ १९ ॥ प्रत्याख्यानाच्च कृष्णस्य भृशं तप्यति सञ्जय। दृष्ट्वा भ्रातॄन् हतान् सङ्ख्ये भीमसेनेन दंशितान् ॥ २० ॥ आत्मापराधे सुमहन्नूनं तप्यति पुत्रकः। को हि जीवितमन्विच्छन् प्रतीपं पाण्डवं व्रजेत् ॥ २१ ॥ भीमं भीमायुधं क्रुद्धं साक्षात् कालमिव स्थितम्। वड़वामुखमध्यस्थो मुच्येतापि हि मानवः ॥ २२ ॥ न भीममुखसम्प्राप्तो मुच्येदिति मतिर्मम। न पार्थो न च पाञ्चाला न च केशवसात्यकी ॥ २३ ॥ जानन्ति युधि संरब्धा जीवितं परिरक्षितुम्। अहो मम सुतानां हि विपन्नं सूत जीवितम् ॥ २४ ॥

सञ्जय उवाच। यस्त्वं शोचसि कौरव्य वर्त्तमाने जनक्षये। त्वमस्य जगतो मूलं विनाशस्य न संशयः ॥ २५ ॥ स्वयं वैरं महत् कृत्वा पुत्राणां वचने स्थितः। उच्यमानो न गृह्णीषे मर्त्यः पथ्यमिवौषधम् ॥ २६ ॥ स्वयं पीत्वा महाराज कालकूटं

सुदुर्म्मरम् । तस्येदानीं फलं कृतस्त्वमवाप्नुहि नरोत्तम ॥ २७ ॥
यत्तु कुत्सयसे योधान् युध्यमानान् यथाबलम् । तत्र ते वर्णयि-
ष्यामि यथा युद्धमवर्त्तत ॥ १८ ॥ दृष्ट्वा कर्णन्तु पुत्रास्ते भीमसेन-
पराजितम् । नामृष्यन्त महेष्वासाः सोदर्य्याः पञ्च मारिष ॥२९॥
दुर्मर्षणो दुःसहश्च दुर्मदो दुर्धरो जयः । पाण्डवं चित्रसन्नाहा-
स्तम्प्रतीपमुपाद्रवन् ॥ ३० ॥ ते समन्तान्महाबाहुं परिवार्य्य
वृकोदरम् । दिशः शरैः समावृण्वञ्छलभानामिव व्रजैः ॥ ३१ ॥
आगच्छतस्तान् सहसा कुमारान् देवरूपिणः । प्रतिजग्राह
समरे भीमसेनो हसन्निव ॥ ३२ ॥ तव दृष्ट्वा तु तनयान् भीम-
सेनपुरोगमान् । अभ्यवर्त्तत राधेयो भीमसेनं महाबलम् ॥ ३३ ॥
विसृजन् विशिखांस्तीक्ष्णान् स्वर्णपुङ्खाञ्छिलाशितान् । तन्तु
भीमोऽभ्ययात्तूर्णं वार्य्यमाणः सुतैस्तव ॥ ३४ ॥ कुरवस्तु ततः
कर्णं परिवार्य्य समन्ततः । अवाकिरन् भीमसेनं शरैः सन्नत-
पर्वभिः ॥ ३५ ॥ तान् बाणैः पञ्चविंशत्या साश्वान्राजन्नरर्षभान् ।
ससूतान् भीमधनुषो भीमो निन्ये यमक्षयम् ॥ ३६ ॥ प्रापतन्
स्यन्दनेभ्यस्ते सार्द्धं सूतैर्गतासवः । चित्रपुष्पधरा भग्ना वातेनेव
महाद्रुमाः ॥ ३७ ॥ तदद्भुतमपश्याम भीमसेनस्य विक्रमम् ।
संवार्य्याधिरथिं बाणैर्यज्जघान तवात्मजान् ॥ ३८ ॥ स वार्य्य-
माणो भीमेन शितैर्बाणैः समन्ततः । सूतपुत्रो महाराज भीम-
सेनमवैक्षत ॥ ३९ ॥ तं भीमसेनः संरम्भात् क्रोधसंरक्तलोचनः ।
विस्फार्य्य तु महच्चापं मुहुः कर्णमवैक्षत ॥ ४० ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि भीमपराक्रमे
पञ्चत्रिंशदधिकशततोऽध्यायः ॥ १३५ ॥

---

सञ्जय उवाच। तवात्मजांस्तु पतितान् दृष्ट्वा कर्णः प्रताप-
वान्। क्रोधेन महताविष्टो निर्विण्णोऽभूत् स जीवितात् ॥ १ ॥
आगस्कृतमिवात्मानं मेने चाधिरथिस्तदा। यत् प्रत्यक्षं तव सुता
भीमेन निहता रणे ॥ २ ॥ भीमसेनस्ततः क्रुद्धः कर्णस्य निशि-
तान् शरान्। विचखान स सम्भ्रान्तः पूर्ववैरमनुस्मरन् ॥ ३ ॥ स
भीमं पञ्चभिर्विद्ध्वा राधेयः प्रहसन्निव। पुनर्विव्याध सप्तत्या स्वर्ण-
पुङ्खैः शिलाशितैः ॥ ४ ॥ अविचिन्त्याथ तान् वाणान् कर्णेना-
स्तान् वृकोदरः। रणे विव्याध राधेयं शतेनानतपर्व्वणाम् ॥ ५ ॥
पुनश्च विशिखैस्तीक्ष्णैर्विद्ध्वा मर्मसु पञ्चभिः। धनुश्चिच्छेद भल्लेन
सूतपुत्रस्य मारिष ॥ ६ ॥ अथान्यद्धनुरादाय कर्णो भारत
दुर्मनाः। इषुभिश्छादयामास भीमसेनं समन्ततः ॥ ७ ॥ तस्य
भीमो हयान् हत्वा विनिहत्य च सारथिम्। प्रजहास महाहासं
कृते प्रतिकृते पुनः ॥ ८ ॥ इषुभिः कार्मुकञ्चास्य चकर्त्त पुरुषर्षभः।
तत् पपात महाराज स्वर्णपृष्ठं महास्वनम् ॥ ९ ॥ अवारोह-
द्रथात्तस्मादथ कर्णो महारथः। गदां गृहीत्वा समरे भीमाय
प्राहिणोद्रुषा ॥ १० ॥ तामापतन्तीं सहसा गदां दृष्ट्वा वृको-
दरः। शरैरवारयद्राजन् सर्व्वसैन्यस्य पश्यतः ॥ ११ ॥ ततो
वाणसहस्राणि प्रेषयामास पाण्डवः। सूतपुत्रवधाकाङ्क्षी त्वर-
माणः पराक्रमी ॥ १२ ॥ तानिषूनिषुभिः कर्णो वारयित्वा महा-
मृधे। कवचं भीमसेनस्य पातयामास सायकैः ॥ १३ ॥ अथैनं
पञ्चविंशत्या क्षुद्रकाणां समार्पयत्। पश्यतां सर्व्वसैन्यानां तद-
द्भुतमिवाभवत् ॥ १४ ॥ ततो भीमो महाराज नवभिर्नतपर्व्वभिः।
प्रेषयामास संक्रुद्धः सूतपुत्रस्य मारिष ॥ १५ ॥ ते तस्य कवचं
भित्त्वा तथा बाहुञ्च दक्षिणम्। अभ्ययुर्द्धरणीं तीक्ष्णा वल्मीक-
मिव पन्नगाः ॥ १६ ॥ सञ्छाद्यमानो वाणौघैर्भीमसेनधनुश्च्युतैः।
पुनरेवाभवत् कर्णो भीमसेनपराङ्मुखः ॥ १७ ॥ तं पराङ्मुख-

मालोक्य पदातिं सूतनन्दनम्। कौन्तेयशरसञ्छन्नं राजा दुर्य्योधनोऽब्रवीत्॥ १८॥ त्वरध्वं सर्व्वतो यत्ता राधेयस्य रथं प्रति। ततस्तव सुता राजन् श्रुत्वा भ्रातुर्व्वचोऽद्भुतम्॥ १९॥ अभ्ययुः पाण्डवं युद्धे विसृजन्तः शिलीमुखान्। चित्रोपचित्रश्चित्राक्षश्चारुचित्रः शरासनः॥ २०॥ चित्रायुधश्चित्रवर्म्मा समरे चित्रयोधिनः। तानापतत एवाशु भीमसेनो महारथः॥ २१॥ एकैकेन शरेणाजौ पातयामास ते सुतान्। ते हता न्यपतन् भूमौ वातरुग्णा इव द्रुमाः॥ २२॥ दृष्ट्वा विनिहतान् पुत्रांस्तव राजन् महारथान्। अश्रुपूर्णमुखः कर्णः क्षत्तुः सस्मार तद्वचः॥ २३॥ रथमन्यं समास्थाय विधिवत् कल्पितं पुनः। अभ्ययात् पाण्डवं युद्धे त्वरमाणः पराक्रमी॥ २४॥ तावन्योऽन्यं शरैर्विद्ध्वा स्वर्णपुङ्खैः शिलाशितैः। व्यभ्राजेतां यथा मेघौ संस्यूतौ सूर्य्यरश्मिभिः॥ २५॥ षट्त्रिंशद्भिस्ततो भल्लैर्न्निशितैस्तिग्मतेजनैः। व्यधमत् कवचं क्रुद्धः सूतपुत्रस्य पाण्डवः॥ २६॥ सूतपुत्रोऽपि कौन्तेयं शरैः सन्नतपर्व्वभिः। पञ्चाशता महाबाहुर्व्विव्याध भरतर्षभ॥२७॥ रक्तचन्दनदिग्धाङ्गौ शरैः कृतमहाव्रणौ। शोणिताक्तौ व्यराजेतां चन्द्रसूर्य्याविवोदितौ॥ २८॥ तौ शोणितोक्षितैर्गात्रैः शरैश्छिन्नतनुच्छदौ। कर्णभीमौ व्यराजेतां निर्म्मुक्ताविव पन्नगौ॥ २९॥ व्याघ्राविव नरव्याघ्रौ दंष्ट्राभिरितरेतरम्। शरधारासृजौ वीरौ मेघाविव ववर्षतुः॥ ३०॥ वारणाविव चान्योऽन्यं विषाणाभ्यामरिन्दमौ। निर्भिन्दन्तौ स्म गात्राणि सायकैश्चारेजतुः॥ ३१॥ नादयन्तौ प्रवर्षन्तौ विक्रीडन्तौ परस्परम्। मण्डलानि विकुर्व्वाणौ रथाभ्यां रथसत्तमौ॥ ३२॥ वृषाविव च नर्द्दन्तौ बलिनौ वाशितान्तरे। सिंहाविव पराक्रान्तौ नरसिंहौ महाबलौ॥ ३३॥ परस्परं वीक्ष्यमाणौ क्रोधसंरक्तलोचनौ। युयुधाते महावीर्य्यौ शक्रवैरोचनौ यथा॥ ३४॥ ततो भीमो

महावाहुर्भुजाभरां व्याक्षिपन् धनुः। व्यरोचत रणे भीमः सविद्युदिव तोयदः ॥ ३५ ॥ स चापघोषस्तनितः शरधाराम्बुदो महान्। भीमसेनो महाराज कर्णपर्वतमावृणोत् ॥ ३६ ॥ ततः शरसहस्रेण धनुर्मुक्तेन भारत। पाण्डवो व्यकिरत् कर्णं भीमो भीमपराक्रमः ॥ ३७ ॥ तत्रापश्यंस्तव सुता भीमसेनस्य विक्रमम्। सुपुङ्खैः कङ्कवासोभिर्यत् कर्णं छादयच्छरैः ॥ ३८ ॥ स नन्दयन् रणे पार्थं केशवञ्च यशस्विनम्। सात्यकिञ्चक्ररक्षौ च भीमः कर्णमयोधयत् ॥ ३९ ॥ विक्रमं भुजयोर्वीर्य्यं धैर्य्यञ्च विदितात्मनः। पुत्रास्तव महाराज दृष्ट्वा विमनसोऽभवन् ॥ ४० ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि भीमयुद्धे
षट्त्रिंशदधिकशततोऽध्यायः ॥ १३६ ॥

---

सञ्जय उवाच। भीमसेनस्य राधेयः श्रुत्वा ज्यातलनिस्वनम्। नामृष्यत यथा मत्तो गजः प्रतिगजस्वनम् ॥ १ ॥ सोऽपक्रम्य मुहूर्त्तन्तु भीमसेनस्य गोचरात्। पुत्रांस्तव ददर्शाथ भीमसेनेन पातितान् ॥ २ ॥ तानवेक्ष्य नरश्रेष्ठ विमना दुःखितस्तदा। निःश्वसन् दीर्घमुष्णञ्च पुनः पाण्डवमभ्ययात् ॥ ३ ॥ स ताम्रनयनः क्रोधात् श्वसन्निव महोरगः। वभौ कर्णः शरानस्यन् रश्मिवानिव भास्करः ॥ ४ ॥ रश्मिजालैरिवार्कस्य विततैर्भरतर्षभ। कर्णचापच्युतैर्वाणैः प्राच्छाद्यत वृकोदरः ॥ ५ ॥ कर्णचापच्युताश्चित्राः शरा वर्हिणवाससः। विविशुः सर्वतः पार्थं वासायैवाण्डजा द्रुमम् ॥ ६ ॥ कर्णचापच्युता वाणाः सम्पतन्तस्ततस्ततः। रुक्मपुङ्खा व्यराजन्त हंसाः श्रेणीकृता इव ॥ ७ ॥ चापध्वजोपस्करेभ्यश्छत्रादीषामुखात् ध्वजात्। प्रभवन्तो व्यदृश्यन्त राजन्नाधिरथेः शराः ॥ ८ ॥ खं पूरयन्महावेगान् खगमान् गृध्र-

वासवः । सुवर्णविकृतांश्चित्रान् मुमोचाधिरथिः शरान् ॥ ९ ॥ तमन्तकमिवायान्तमापतन्तं वृकोदरः । त्यक्त्वा प्राणानतिक्रम्य विव्याध नवभिः शरैः ॥ १० ॥ तस्य वेगमसह्यञ्च दृष्ट्वा कर्णस्य पाण्डवः । महतश्च शरौघांस्तान्नैवाव्यथत वीर्य्यवान् ॥ ११ ॥ ततो विव्याधाधिरथेः शरजालानि पाण्डवः । विव्याध कर्णं विंशत्या पुनरन्यैः शितैः शरैः ॥ १२ ॥ यथैव हि शरैः पार्थः सूतपुत्रेण छादितः । तथैव स रणे कर्णं छादयामास पाण्डवः ॥ १३ ॥ दृष्ट्वा तु भीमसेनस्य विक्रमं युधि भारत । अभ्यनन्दं स्त्वदीयाश्च संप्रहृष्टाश्च चारणाः ॥ १४ ॥ भूरिश्रवाः कृपो द्रौणि-र्मद्रराजो जयद्रथः । उत्तमौजा युधामन्युः सात्यकिः केशवा-र्ज्जुनौ ॥ १५ ॥ कुरुपाण्डवप्रवरा दश राजन्महारथाः । साधु-साध्विति वेगेन सिंहनादमथानदन् ॥ १६ ॥ तस्मिंस्तु तुमुले शब्दे प्रवृत्ते लोमहर्षणे । अभ्यभाषत पुत्रास्ते राजा दुर्य्योधन-स्त्वरन् ॥ १७ ॥ राज्ञः स राजपुत्रांश्च सोदरांश्च विशेषतः । कर्णं गच्छत भद्रं वः परीप्सन्तो वृकोदरात् ॥ १८ ॥ पुरा निघ्नन्ति राधेयं भीमचापच्युताः शराः । ते यतध्वं महेष्वासाः सूतपुत्रस्य रक्षणे ॥ १९ ॥ दुर्य्योधनसमादिष्टाः सोदर्य्याः सप्त-मारिष । भीमसेनमभिद्रुत्य संरब्धाः पर्य्यवारयन् ॥ २० ॥ ते समासाद्य कौन्तेयमावृण्वञ्छरवृष्टिभिः । पर्व्वतं वारिधाराभिः प्रावृषीव बलाहकाः ॥ २१ ॥ तेऽपीड़यन् भीमसेनं क्रुद्धाः सप्त महारथाः । प्रजासंहरणे राजन् सोमं सप्त ग्रहा इव ॥ २२ ॥ ततो वेगेन कौन्तेयः पोड़यित्वा शरासनम् । मुष्टिना पाण्डवो राजन् दृढ़ेन सुपरिष्कृतम् ॥ २३ ॥ मनुष्यसमतां ज्ञात्वा सप्त सन्धाय सायकान् । तेभ्यो व्यसृजदायस्तः सूर्य्यरश्मिनिभान् प्रभुः ॥ २४ ॥ निरस्यन्निव देहेभ्यस्तनयानामसूंस्तव । भीमसेनो महाराज पूर्व्ववैरमनुस्मरन् ॥ २५ ॥ ते क्षिप्ता भीमसेनेन शरा

भारत भारतान्। विदार्य्य खं समुत्पेतुः स्वर्णपुङ्खाः शिलाशिताः ॥ २६ ॥ तेषां विदार्य्य चेतांसि शरा हेमविभूषिताः। व्यराजन्त महाराज सुपर्णा इव खेचराः ॥ २७ ॥ शोणितादिग्धसर्वाङ्गा-स्तप्तहेमपरिष्कृताः। पुत्राणां तव राजेन्द्र पीत्वा शोणितमुद्गताः ॥ २८ ॥ ते शरैर्भिन्नमर्माणो रथेभ्यः प्रापतन् क्षितौ। गिरि-सानुरुहा भग्ना द्विपेनेव महाद्रुमाः ॥ २९ ॥ शत्रुञ्जयः शत्रुसह-श्चित्रश्चित्रायुधो दृढ़ः। चित्रसेनो विकर्णश्च सप्तैते विनिपातिताः ॥ ३० ॥ पुत्राणां तव सर्वेषां निहतानां वृकोदरः। शोचत्यति-भृशं दुःखाद्विकर्णं पाण्डवः प्रियम् ॥ ३१ ॥ प्रतिज्ञेयं मया दत्ता निहन्तव्यास्तु संयुगे। विकर्ण तेनासि हतः प्रतिज्ञा रक्षिता मया ॥ ३२ ॥ त्वमागाः सङ्गरं वीर क्षात्रं धर्ममनुस्मरन्। विशेषतोऽसि नृपतेस्तथास्माकं हिते रतः ॥ ३३ ॥ न्यायतो न्यायतो नैवमेकः शोको महाद्युतिः। तान्निहत्य महाराज राधेयस्यैव पश्यतः ॥ ३४ ॥ सिंहनादरवं घोरमसृजत् पाण्डु-नन्दनः। स रवस्तस्य शूरस्य धर्मराजस्य भारत ॥ ३५ ॥ आच-ख्याविव तद्युद्धे विजयञ्चात्मनो महत्। श्रुत्वा तं सुमहानादं भीमसेनस्य धन्विनः ॥ ३६ ॥ बभूव परमा प्रीतिर्धर्मराजस्य संयुगे। ततो हृष्टो महाराज वादित्राणां महास्वनैः ॥ ३७ ॥ सिंहनादरवं भ्रातुः प्रतिजग्राह पाण्डवः। अभ्ययात् समरे द्रोणं सर्वशस्त्रविदाम्वरः ॥ ३८ ॥ हर्षेण महता युक्तः कृत-संज्ञे वृकोदरे। एकत्रिंशन्महाराज पुत्रांस्तव निपातितान् ॥३९॥ हतान् दुर्य्योधनो दृष्ट्वा क्षत्तुः सस्मार तद्वचः। तदिदं समनुप्राप्तं क्षत्तुर्हितकरं वचः ॥ ४० ॥ इति सञ्चिन्त्य राजासौ नोत्तरं प्रत्यपद्यत। यत् द्यूतकाले दुर्बुद्धिरब्रवीत्तनयस्तव ॥ ४१ ॥ सभा-मानाय्य पाञ्चालीं कर्णेन सहितोऽल्पधीः। यच्च कर्णोऽब्रवीत् कृष्णां सभायां परुषं वचः ॥ ४२ ॥ प्रमुखे पाण्डुपुत्राणां तव

चैव विशाम्पते । शृखतस्तव राजेन्द्र कौरवाणाञ्च सर्वशः ॥४३॥ विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः । पतिमन्यं वृणुष्वेति तस्येदं फलमागतम् ॥ ४४ ॥ यच्च षण्डतिलादीनि परुषाणि तवात्मजैः । श्राविताम्ते महात्मानः पाण्डवाः कोपयिष्णुभिः ॥ ४५ ॥ तं भीमसेनः क्रोधाग्निं त्रयोदशसमाः स्थितम् । विसृजंस्तव पुत्राणामन्तं गच्छति कौरवः ॥ ४६ ॥ विलपंश्च बहु क्षत्ता शमं नालभत त्वयि । सपुत्रो भरतश्रेष्ठ तस्य भुङ्क्ष्व फलोदयम् ॥ ४७ ॥ त्वया वृद्धेन धीरेण कार्य्यतत्त्वार्थदर्शिना । न कृतं सुहृदां वाक्यं दैवमत्र परायणम् ॥ ४८ ॥ तन्माशुचो नरव्याघ्र तवैवापनयो महान् । विनाशहेतुः पुत्राणां भवानेव मतो मम ॥ ४९ ॥ हतो विकर्णो राजेन्द्र चित्रसेनश्च वीर्य्यवान् । प्रवराश्चात्मजानान्ते सुताश्चान्ये महारथाः ॥ ५० ॥ यानन्यान् ददृशे भीमश्चक्षुर्विषयमागतान् । पुत्रांस्तव महाबाहो त्वरया तान् जघान ह ॥ ५१ ॥ त्वत्कृतेऽप्यहमद्राक्षं दह्यमानां वरूथिनीम् । सहस्रशः शरैर्मुक्तैः पाण्डवेन वृषेण च ॥ ५२ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि भीमयुद्धे
सप्तत्रिंशदधिकशततोऽध्यायः ॥ १३७ ॥

---

धृतराष्ट्र उवाच । महानपनयः सूत ममैवात्र विशेषतः । स इदानीमनुप्राप्तो मन्ये सञ्जय शोचतः ॥ १ ॥ यद्गतं तद्गतमिति ममासीन्मनसि स्थितम् । इदानीमत्र किं कार्य्यं प्रकरिष्यामि सञ्जय ॥ २ ॥ यथा ह्येष क्षयो वृत्तो ममापनयसम्भवः । वीराणां तन्ममाचक्ष्व स्थिरीभूतोऽस्मि सञ्जय ॥ ३ ॥

सञ्जय उवाच । कर्णभीमौ महाराज पराक्रान्तौ महाहवे । बाणवर्षाण्यवर्षतां वृष्टिमन्ताविवाम्बुदौ ॥ ४ ॥ भीमसेनाङ्किता

बाणाः स्वर्णपुङ्खाः शिलाशिताः । विविशुः कर्णमासाद्य भिन्दन्त इव जीवितम् ॥ ५ ॥ तथैव कर्णनिर्मुक्तैः सविषैरिव पन्नगैः । आकीर्य्यत रणे भीमः शतशोऽथ सहस्रशः ॥ ६ ॥ तयोः शरैर्महाराज सम्पतद्भिः समन्ततः । बभूव तव सैन्यानां सङ्क्षोभः सागरोपमः ॥ ७ ॥ भीमचापच्युतैर्बाणैस्तव सैन्यमरिन्दम । अवध्यत चमूमध्ये घोरैराशीविषोपमैः ॥ ॥ ८ ॥ वारणैः पतितैराजन् वाजिभिश्च नरैः सह । अदृश्यत मही कीर्णा वातभग्नैरिव द्रुमैः ॥ ९ ॥ ते बध्यमानाः समरे भीमचापच्युतैः शरैः । प्राद्रवंस्तावका योधाः किमेतदिति चाब्रुवन् ॥ १० ॥ ततो व्युदस्तं तव सैन्यं सिन्धुसौवीरकौरवम् । प्रोत्सारितं महावेगैः कर्णपाण्डवयोः शरैः ॥ ११ ॥ ते शूरा हतभूयिष्ठा हताश्वा हतवारणाः । उत्सृज्य भीमं कर्णञ्च व्यद्रवन् सर्वतो दिशः ॥ १२ ॥ नूनं पार्थार्थमेवास्मान्मोहयन्ति दिवौकसः । यत् कर्णभीमप्रभवैर्वध्यते नो बलं शरैः ॥ १३ ॥ एवं ब्रुवाणा योधास्ते तावका भयपीड़िताः ॥ शरपातं समुत्सृज्य स्थिता युद्धदिदृक्षवः ॥ १४ ॥ ततः प्रावर्त्तत नदी घोररूपा रणाजिरे । शूराणां हर्षजननी भीरूणां भयवर्द्धिनी ॥ १५ ॥ वारणाश्वमनुष्याणां रुधिरौघसमुद्भवा । संवृता गतसत्त्वैश्च मनुष्यगजवाजिभिः ॥ १६ ॥ सानुकर्षपताकैश्च द्विपाश्वरथभूषणैः । स्यन्दनैरपविद्धैश्च भग्नचक्राक्षकूवरैः ॥ १७ ॥ जातरूपपरिष्कारैर्धनुर्भिः सुमहास्वनैः । सुवर्णपुङ्खैरिषुभिर्नाराचैश्च सहस्रशः ॥ १८ ॥ कर्णपाण्डवनिर्मुक्तैर्निर्मुक्तैरिव पन्नगैः । प्रासतोमरसङ्घातैः खड्गैश्च सपरश्वधैः ॥ १९ ॥ सुवर्णविकृतैश्चापि गदामुसलपट्टिशैः । वज्रैश्च विविधाकारैः शक्तिभिः परिघैरपि ॥ २० ॥ शतघ्नीभिश्च चित्राभिर्बभौ भारत मेदिनी । कनकाङ्गदहारैश्च कुण्डलैर्मुकुटैस्तथा ॥ २१ ॥ वलयैरपविद्धैश्च तथैवाङ्गुलिवेष्टकैः । चूड़ामणिभि-

रुष्णीषैः स्वर्णभूषैश्च मारिष ॥ २२ ॥ तनुत्रैः सतलत्रैश्च ग्रैवेयैश्चैव भारत । वस्त्रैश्छत्रैश्च विद्धस्तैश्चामरव्यजनैरपि ॥ २३ ॥ गजाश्व-मनुजैर्भिन्नैः शोणिताक्तैश्च पत्रिभिः । तैस्तैश्च विविधैर्भिन्नैस्तत्र तत्र वसुन्धरा ॥ २४ ॥ पतितैरपविद्धैश्च विबभौ द्यौरिव ग्रहैः । अचिन्त्यमद्भुतञ्चैव तयोः कर्मातिमानुषम् ॥ २५ ॥ दृष्ट्वा चारण-सिद्धानां विस्मयः समजायत । अग्नेर्वायुसहायस्य गतिः कच्च इवाहवे ॥ २६ ॥ आसीद्भीमसहायस्य रौद्रमाधिरथेर्गतम् । निपातितध्वजरथं हतवाजिनरद्विपम् ॥ २७ ॥ गजाभ्यां सम्प्र-युक्ताभ्यामासीन्नलवनं यथा । मेघजालनिभं सैन्यमासीत्तव नरा-धिप । विमर्द्दः कर्णभीमाभ्यामासीच्च परमो रणे ॥ २८ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि भीमकर्णयुद्धे
अष्टत्रिंशदधिकशतोऽध्यायः ॥ १३८ ॥

---

सञ्जय उवाच । ततः कर्णो महाराज भीमं विद्ध्वा त्रिभिः शरैः । मुमोच शरवर्षाणि विचित्राणि बहूनि च ॥ १ ॥ बध्य-मानो महाबाहुः सूतपुत्रेण पाण्डवः । न विव्यथे भीमसेनो भिद्यमान इवाचलः ॥ २ ॥ स कर्णं कर्णिना कर्णे पीतेन निशि-तेन च । विव्याध सुभृशं सङ्ख्ये तैलधौतेन मारिष ॥ ३ ॥ स-कुण्डलं महच्चारु कर्णस्यापातयद्भुवि । तापनीयं महाराज दीप्तं ज्योतिरिवाम्बरात् ॥ ४ ॥ अथापरेण भल्लेन सूतपुत्रं स्तनान्तरे । आजघान भृशं क्रुद्धो हसन्निव वृकोदरः ॥ ५ ॥ पुनरस्य त्वरन् भीमो नाराचान्दश भारत । रणे प्रैषीन्महाबाहुर्निर्मुक्ताशी-विषोपमान् ॥ ६ ॥ ते ललाटं विनिर्भिद्य सूतपुत्रस्य मारिष । विविशुश्चोदितास्तेन वल्मीकमिव पन्नगाः ॥ ७ ॥ ललाटस्थैस्ततो बाणैः सूतपुत्रो व्यरोचत । नीलोत्पलमयीं मालां धारयन् वै

यथा पुरा ॥ ८ ॥ सोऽतिविद्धो भृशं कर्णः पाण्डवेन तरस्विना। रथकूवरमालम्ब्य न्यमीलयत लोचने ॥ ९ ॥ स मुहूर्त्तात् पुनः संज्ञां लब्ध्वा कर्णः परन्तपः। रुधिरोक्षितसर्वाङ्गः क्रोधमाहारयत् परम् ॥ १० ॥ ततः क्रुद्धो रणे कर्णः पीड़ितो दृढ़धन्वना। वेगवत्क्षे महावेगो भीमसेनरथं प्रति ॥ ११ ॥ तस्मै कर्णः शतं राजन्निषूणां गार्द्धवाससाम्। अमर्षी बलवान् क्रुद्धः प्रेषयामास भारत ॥ १२ ॥ ततः प्रासृजदुग्राणि शरवर्षाणि पाण्डवः। समरे तमनादृत्य तस्य वीर्य्यमचिन्तयन् ॥ १३ ॥ कर्णस्ततो महाराज पाण्डवं नवभिः शरैः। आजघानोरसि क्रुद्धः क्रुद्धरूपं परन्तप ॥ १४ ॥ तावुभौ नरशार्दूलौ शार्दूलाविव दंष्ट्रिणौ। जीमूताविव चान्योऽन्यं प्रववर्षतुराहवे ॥ १५ ॥ तलशब्दरवैश्चैव त्रासयेतां परस्परम्। शरजालैश्च विविधैस्त्रासयामासतुर्मृधे ॥ १६ ॥ अन्योऽन्यं समरे क्रुद्धौ कृतप्रतिकृतैषिणौ। ततो भीमो महाबाहुः सूतपुत्रस्य भारत ॥ १७ ॥ क्षुरप्रेण धनुश्छित्त्वा ननाद परवीरहा। तदपास्य धनुश्छिन्नं सूतपुत्रो महारथः ॥ १८ ॥ अन्यत् कार्मुकमादत्त भारघ्नं वेगवत्तरम्। दृष्ट्वा सकुरुसौवीरसिन्धुवीरबलक्षयम् ॥ १९ ॥ सवर्मध्वजशस्त्रैश्च पतितैः संवृतां महीम्। अश्वयुक्तरथदेहांश्च गतासून् प्रेक्ष्य सर्वतः ॥ २० ॥ सूतपुत्रस्य संरम्भाद्दीप्तं वपुरजायत। स विस्फार्य्य महच्चापं कार्त्तस्वरविभूषितम् ॥ २१ ॥ भीमं प्रैक्षत राधेयो राजन् घोरेण चक्षुषा। ततः क्रुद्धः शरानस्यन् सूतपुत्रो व्यरोचत ॥ २२ ॥ मध्यन्दिनगतोऽर्च्चिष्मान् शरदीव दिवाकरः। मरीचिविकचस्येव राजन् भानुमतो वपुः ॥ २३ ॥ आसीदाधिरथेर्घोरं वपुः शरशताचितम्। कराभ्यामाददानस्य सन्दधानस्य चाशुगान् ॥ २४ ॥ कर्षतो मुञ्चतो वाणान्नान्तरं ददृशे रणे। अग्निचक्रोपमं घोरं मण्डलीकृतमायुधम् ॥ २५ ॥ कर्णस्यासीन्महीपाल सव्यदक्षिण-

मस्यतः। स्वर्णपुङ्खाः सुनिशिताः कर्णचापच्युताः शराः॥ २६॥
आच्छादयन्महाराज दिशः सूर्य्यस्य च प्रभाः। ततः कनक-
पुङ्खानां शराणां नतपर्व्वणाम्॥ २७॥ धनुश्च्युतानां वियति ददृशे
बहुधा व्रजः। वाणासनादाधिरथेः प्रभवन्ति स्म सायकाः॥२८॥
श्रेणीकृता व्यरोचन्त राजन् क्रौञ्चा इवाम्बरे। गार्द्धपत्राञ्छिला-
धौतान् कार्त्तस्वरविभूषितान्॥ २९॥ महावेगान् प्रदीप्ताग्रान्
मुमोचाधिरथिः शरान्। ते तु चापबलोद्धूताः शातकुम्भविभू-
षिताः॥ ३०॥ अजस्रमपतन् वाणा भीमसेनरथं प्रति। ते
व्योम्नि रुक्मविकृता व्यकाशन्त सहस्रशः॥ ३१॥ शलभानामिव
व्राताः शराः कर्णसमीरिताः। चापादाधिरथेर्व्वाणाः प्रपतन्त-
श्चकाशिरे॥ ३२॥ एको दीर्घ इवात्यर्थमाकाशे संस्थितः शरः।
पर्व्वतं वारिधाराभिश्छादयन्निव तोयदः॥ ३३॥ कर्णः प्राच्छा-
दयत् क्रुद्धो भीमं सायकवृष्टिभिः। तत्र भारत भीमस्य बलं
वीर्य्यं पराक्रमम्॥ ३४॥ व्यवसायञ्च पुत्रास्ते ददृशुः सहसैनिकाः।
तां समुद्रमिवोद्धूतं शरवृष्टिं समुत्थिताम्॥ ३५॥ अचिन्तयित्वा
भीमस्तु क्रुद्धः कर्णमुपाद्रवत्। रुक्मपृष्ठं महच्चापं भीमस्यासी-
द्विशाम्पते॥ ३६॥ आकर्षान्मण्डलीभूतं शक्रचापमिवापरम्।
तस्माच्छराः प्रादुरासन् पूरयन्त इवाम्बरम्॥ ३७॥ सुवर्णपुङ्खै-
र्भीमेन सायकैर्नतपर्व्वभिः। गगने रचिता माला काञ्चनीव
व्यरोचत॥ ३८॥ ततो व्योम्नि विषक्तानि शरजालानि भागशः।
आहतानि व्यशीर्य्यन्त भीमसेनस्य पत्रिभिः॥ ३९॥ कर्णस्य शर-
जालौघैर्भीमसेनस्य चोभयोः। अग्निस्फुलिङ्गसंस्पर्शैरञ्जोगतिभि-
राहवे॥ ४०॥ तैस्तैः कनकपुङ्खानां द्यौरासीत् संवृता व्रजैः।
न स्म सूर्य्यस्तदा भाति न स्म वाति समीरणः॥ ४१॥ शरजाला-
वृते व्योम्नि न चाज्ञायत किञ्चन। स भीमं छादयन् वाणैः
सूतपुत्रः पृथग्विधैः॥ ४२॥ उपारोहदनादृत्य तस्य वीर्य्यं

महात्मनः। तयोर्विसृजतोस्तत्र शरजालानि मारिष॥ ४३ ॥ वायुभूतान्यदृश्यन्त संसक्तानीतरेतरम्। अन्योऽन्यशरसङ्घर्षात्तयोर्मनुजसिंहयोः॥ ४४ ॥ आकाशे भारतश्रेष्ठ पावकः समजायत। तथा कर्णः शितान् वाणान् कर्मारपरिमार्जितान्॥ ४५ ॥ सुवर्णविकृतान् क्रुद्धः प्राहिणोद्वधकाङ्क्षया। तानन्तरीचे विशिखैस्त्रिधैकैकमशातयत्॥ ४६ ॥ विशेषयन् सूतपुत्रं भीमस्तिष्ठेति चाब्रवीत्। पुनश्चासृजदुग्राणि शरवर्षाणि पाण्डवः॥ ४७ ॥ अमर्षी बलवान् क्रुद्धो दिधक्षन्निव पावकः। ततश्चटचटाशब्दो गोधाघातादभूत्तयोः॥ ४८॥ तलशब्दश्च सुमहान् सिंहनादश्च भैरवः। रथनेमिनिनादश्च ज्याशब्दश्चैव दारुणः॥ ४९ ॥ योधा व्युपारमन् युद्धाद्दिदृक्षन्तः पराक्रमम्। कर्णपाण्डवयोराजन् परस्परवधैषिणोः॥ ५० ॥ देवर्षिसिद्धगन्धर्वाः साधुसाध्वित्यपूजयन्। मुमुचुः पुष्पवर्षञ्च विद्याधरगणास्तथा॥ ५१ ॥ ततो भीमो महाबाहुः संरम्भी दृढविक्रमः। अस्त्रैरस्त्राणि संवार्य्य शरैर्विव्याध सूतजम्॥ ५२॥ कर्णोऽपि भीमसेनस्य निवार्य्येषून् महाबल। प्राहिणोन्नव नाराचानाशीविषसमान्रणे॥ ५३ ॥ तावद्भिरथ तान् भीमो व्योम्नि चिच्छेद पत्रिभिः। नाराचान् सूतपुत्रस्य तिष्ठतिष्ठेति चाब्रवीत्॥ ५४॥ ततो भीमो महाबाहुः शरं क्रुद्धोऽन्तकोपमम्। मुमोचाधिरथेर्वीरो यमदण्डमिवापरम्॥ ५५॥ तमापतन्तञ्चिच्छेद राधेयः प्रहसन्निव। त्रिभिः शरैः शरं राजन् पाण्डवस्य प्रतापवान्॥ ५६॥ पुनश्चासृजदुग्राणि शरवर्षाणि पाण्डवः। तस्य तान्याददे कर्णः सर्वाण्यस्त्राण्यभीतवत्॥ ५७॥ युध्यमानस्य भीमस्य सूतपुत्रोऽस्त्रमायया। तस्येषुधी धनुर्ज्याञ्च वाणैः सन्नतपर्वभिः॥ ५८॥ रश्मीन् योक्त्राणि चाश्वानां क्रुद्धः कर्णोऽच्छिनन्मृधे। तस्याश्वांश्च पुनर्हत्वा सूतं विव्याध पञ्चभिः॥ ५९॥ सोऽपसृत्य द्रुतं सूतो युधामन्योरथं

ययौ। विहसन्निव भीमस्य क्रुद्धः कालानलद्युतिः ॥ ६० ॥ ध्वज-
श्चिच्छेद राधेयः पताकाञ्च व्यपातयत्। स विधन्वा महाबाहु-
रथ शक्तिं परामृशत् ॥ ६१ ॥ तामवासृजदाविध्य क्रुद्धः कर्ण-
रथं प्रति। तामाधिरथिरायस्तां शक्तिं कनकभूषणाम् ॥ ६२ ॥
आपतन्तीं महोल्काभां चिच्छेद दशभिः शरैः। सापतद्दशधा
छिन्ना कर्णस्य निशितैः शरैः ॥ ६३ ॥ अस्यतः सूतपुत्रस्य मित्रार्थे
चित्रयोधिनः। स चर्म्मादत्त कौन्तेयो जातरूपपरिष्कृतम् ॥ ६४ ॥
खड्गञ्चानन्तरं प्रेप्सुर्म्मृत्योरग्रे जयस्य वा। तदस्य त्वरसा
कर्णो व्यधमच्चर्म्म सुप्रभम् ॥ ६५ ॥ शरैर्बहुभिरत्युग्रैः प्रहसन्निव
भारत। स विचर्म्मा महाराज विरथः क्रोधमूर्च्छितः ॥ ६६ ॥
असिं प्रासृजदत्युग्रं त्वरन् कर्णरथं प्रति। स धनुः सूतपुत्रस्य
सज्यं छित्त्वा महानसिः ॥ ६७ ॥ पपात भुवि राजेन्द्र क्रुद्धः सर्प
इवाम्बरात्। ततः प्रहस्याधिरथिरन्यदादाय कार्मुकम् ॥ ६८ ॥
शत्रुघ्नं समरे क्रुद्धो दृढज्यं वेगवत्तरम्। व्यायच्छत् स शरान्
कर्णः कुन्तीपुत्रजिघांसया ॥ ६९ ॥ सहस्रशो महाराज रुक्म-
पुङ्खान् सुतेजनान्। स बध्यमानो बलवान् कर्णचापच्युतैः शरैः
॥ ७० ॥ वैहायसम्प्राक्रमद्वै कर्णस्य कथयन्मनः। स तस्य
चरितं दृष्ट्वा सङ्ग्रामे विजयैषिणः ॥ ७१ ॥ बलमास्थाय राधेयो
भीमसेनमवञ्चयत्। तञ्च दृष्ट्वा रथोपस्थे निलीनं व्यथितेन्द्रियम्
॥ ७२ ॥ ध्वजमस्य समारुह्य तस्थौ भीमो महीतले। तदस्य
कुरवः सर्व्वे चारणाश्चाभ्यपूजयन् ॥ ७३ ॥ यदियेष रथात् कर्णं
हर्त्तुं तार्क्ष्य इवोरगम्। सच्छिन्नधन्वा विरथः स्वधर्ममनुपालयन्
॥ ७४ ॥ स्वरथं पृष्ठतः कृत्वा युद्धायैव व्यवस्थितः। तद्विहत्यास्य
राधेयस्तत एनं समभ्ययात् ॥ ७५ ॥ संरम्भात् पाण्डवं सङ्ख्ये
युद्धाय समुपस्थितम्। तौ समेतौ महाराज स्पर्द्धमानौ महा-
बलौ ॥ ७६ ॥ जीमूता इव घर्म्मान्ते गर्ज्जमानौ नरर्षभौ। तयो-

रासीत् सम्प्रहारः क्रुद्धयोर्नरसिंहयोः ॥ ७७ ॥ अमृष्यमाणयोः सङ्ख्ये देवदानवयोरिव। क्षीणशस्त्रस्तु कौन्तेयः कर्णेन समभिद्रुतः ॥ ७८ ॥ दृष्ट्वार्जुनहतान्नागान् पतितान् पर्वतोपमान्। रथमार्गविघातार्थं व्यायुधः प्रविवेश ह ॥ ७९ ॥ हस्तिनां व्रजमासाद्य रथदुर्गं प्रविश्य च। पाण्डवो जीविताकाङ्क्षी राधेयं नाभ्यहारयत् ॥ ८० ॥ व्यवस्थानमथाकाङ्क्षन् धनञ्जयशरैर्हतम्। उद्यम्य कुञ्जरं पार्थस्तस्थौ परपुरञ्जयः ॥ ८१ ॥ महौषधिसमायुक्तं हनूमानिव पर्वतम्। तमस्य विशिखैः कर्णो व्यधमत् कुञ्जरं पुनः ॥ ८२ ॥ हस्त्यङ्गान्यथ कर्णाय प्राहिणोत् पाण्डुनन्दनः। चक्राण्यश्वांस्तथा चान्यद्यद्यत् पश्यति भूतले ॥ ८३ ॥ तत्तदादाय चिक्षेप क्रुद्धः कर्णाय पाण्डवः। तदस्य सर्वं चिच्छेद क्षिप्रं क्षिप्तं शितैः शरैः ॥ ८४ ॥ भीमोऽपि मुष्टिमुद्यम्य वज्रगर्भं सुदारुणम्। हन्तुमिच्छन् सूतपुत्रं संस्मरन्नर्जुनं क्षणात् ॥८५॥ शक्तोऽपि नावधीत कर्णं समर्थः पाण्डुनन्दनः। रक्षमाणः प्रतिज्ञां तां या कृता सव्यसाचिना ॥ ८६ ॥ तमेव व्याकुलं भीमं भूयो भूयः शितैः शरैः। मूर्च्छयाभिपरीताङ्गमकरोत् सूतनन्दनः ॥ ८७ ॥ व्यायुधं नावधीच्चैनं कर्णः कुन्त्या वचः स्मरन्। धनुषोऽग्रेण तं कर्णः स्वभिद्रुत्य परामृषत् ॥ ८८ ॥ धनुषास्पृष्टमात्रेण क्रुद्धः सर्प इव श्वसन्। आच्छिद्य स धनुस्तस्य कर्णं मूर्द्धन्यताड़यत् ॥ ८९ ॥ ताड़ितो भीमसेनेन क्रोधादारक्तलोचनः। विहसन्निव राधेयो वाक्यमेतदुवाच ह ॥ ९० ॥ पुनः पुनस्तूवरक मूढ़ौदरिकेति च। अकृतास्त्रक मायोत्सीर्बाल सङ्ग्रामकातर ॥ ९१ ॥ यत्र भोज्यं बहुविधं भक्ष्यं पेयञ्च पाण्डव। तत्र त्वं दुर्मते योग्यो न युद्धेषु कदाचन ॥ ९२ ॥ मूलपुष्पफलाहारो व्रतेषु नियमेषु च। उचितस्त्वं वने भीम न त्वं युद्धविशारदः ॥ ९३ ॥ क्व युद्धं क्व मुनित्वञ्च वनं गच्छ वृकोदर। न

त्वं युद्धोचितस्तात वनवासरतिर्भवान् ॥ ९४ ॥ सूदान् भृत्यजनान् दासांस्त्वं गृहे त्वरयन् भृशम् । योग्यस्ताड़यितुं क्रोधात् भोजनार्थं वृकोदर ॥ ९५ ॥ मुनिर्भूत्वाथ वा भीम फलान्यादत्स्व दुर्मते । वनाय व्रज कौन्तेय न त्वं युद्धविशारदः ॥ ९६ ॥ फलमूलाशने युक्तस्त्वं तथातिथिपूजने । न त्वां शस्त्रसमुद्योगे योग्यं मन्ये वृकोदर ॥ ९७ ॥ कौमारे यानि वृत्तानि विप्रियाणि विशाम्पते । तानि सर्वाणि चाप्येनं रूक्षाण्यश्रावयद्भृशम् ॥९८॥ अथैनं तत्र संलीनमस्पृशद्धनुषा पुनः । प्रहसंश्च पुनर्वाक्यं भीममाह वृषस्तदा ॥ ९९ ॥ योद्धव्यं मारिषान्यत्र न योद्धव्यन्तु मादृशः । मादृशैर्युध्यमानानामेतच्चान्यच्च विद्यते ॥ १०० ॥ गच्छ वा यत्र तौ कृष्णौ तौ त्वां रक्षिष्यतो रणे । गृहं वा गच्छ कौन्तेय किन्ते युद्धेन बालक ॥ १०१ ॥ कर्णस्य वचनं श्रुत्वा भीमसेनोऽतिदारुणम् । उवाच कर्णं प्रहसन् सर्वेषां शृण्वतां वचः ॥ १०२ ॥ जितस्त्वमसकृद्दुष्ट कत्थसे किं वृथात्मना । जयाजयौ महेन्द्रस्य लोके दृष्टौ पुरातनैः ॥ १०३ ॥ मल्लयुद्धं मया सार्द्धं कुरु दुष्कुलसम्भव । महाबलो महाभोगी कीचको निहतो यथा ॥ १०४ ॥ तथा त्वां घातयिष्यामि पश्यत्सु सर्वराजसु । भीमस्य मतमाज्ञाय कर्णो बुद्धिमताम्वरः ॥ १०५ ॥ विरराम रणात्तस्मात् पश्यतां सर्वधन्विनाम् । एवं तं विरथं कृत्वा कर्णो राजन् व्यकत्थयत् ॥ १०६ ॥ प्रमुखे वृष्णिसिंहस्य पार्थस्य च महात्मनः । ततो राजन् शिलाधौतान् शरान् शाखामृगध्वजः ॥ १०७ ॥ प्राहिणोत् सूतपुत्राय केशवेन प्रचोदितः । ततः पार्थभुजोत्सृष्टाः शराः कनकभूषणाः ॥ १०८ ॥ गाण्डीवप्रभवाः कर्णं हंसाः क्रौञ्चमिवाविशन् । स भुजङ्गैरिवाविष्टैर्गाण्डीवप्रेषितैः शरैः ॥ १९ ॥ भीमसेनादपासेधत् सूतपुत्रं धनञ्जयः । स छिन्नधन्वा भीमेन धनञ्जयशराहतः ॥ ११० ॥

कर्णो भीमादपायासीद्रथेन महता द्रुतम् । भीमोऽपि सात्यके-र्वाहं समारुह्य नरर्षभ ॥ १११ ॥ अन्वयाद्भ्रातरं सङ्ख्ये पाण्डवं सव्यसाचिनम् । ततः कर्णं समुद्दिश्य त्वरमाणो धनञ्जयः ॥ ११२ ॥ नाराचं क्रोधताम्राक्षः प्रैषीन्मृत्युमिवान्तकः । स गरुत्मानिवाकाशे प्रार्थयन् भुजगोत्तमम् ॥ ११३ ॥ नाराचोऽभ्यपतत् कर्णं तूर्णं गाण्डीवचोदितः । तमन्तरीक्षे नाराचं द्रौणिश्चिच्छेद पत्रिणा ॥ ११४ ॥ धनञ्जयभयात् कर्णमुज्जिहीर्षन्महारथः । ततो द्रौणिं चतुःषष्ट्या विव्याध कुपितोऽर्ज्जुनः ॥ ११५ ॥ शिलीमुखैर्महाराज मागास्तिष्ठेति चाब्रवीत् । स तु मत्तगजाकीर्णमनीकं रथसङ्कुलम् ॥ ११६ ॥ तूर्णमभ्याविशत् द्रौणिर्धनञ्जयशरार्द्दितः । ततः सुवर्णपृष्ठानां चापानां कूजतां रणे ॥ ११७ ॥ शब्दं गाण्डीवघोषेण कौन्तेयोऽभ्यभवद्बली । धनञ्जयस्तथायातं पृष्ठतो द्रौणिमभ्ययात् ॥ ११८ ॥ नातिदीर्घमिवाध्वानं शरैः सन्त्रासयन् बली । विदार्य्य देहान्नाराचैर्नरवानरवाजिनाम् ॥ ११९ ॥ कङ्कबर्हिणवासोभिर्बलं व्यधमदर्ज्जुनः । तद्बलं भरतश्रेष्ठ सवाजिद्विपमानवम् । पाकशासनिरायत्तः पार्थः सन्निजघान ह ॥ १२० ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि भीमकर्णयुद्धे
एकोनचत्वारिंशदधिकशततोऽध्यायः ॥ १३९ ॥

---

धृतराष्ट्र उवाच । अहन्यहनि मे दीप्तं यशः पतति सञ्जय । हता मे बहवो योधा मन्ये कालस्य पर्य्ययम् ॥ १ ॥ धनञ्जयः सुसंक्रुद्धः प्रविष्टो मामकं बलम् । रक्षितं द्रौणिकर्णाभ्यामप्रवेश्यं सुरैरपि ॥ २ ॥ ताभ्यामूर्ज्जितवीर्य्याभ्यामाप्यायितपराक्रमः । सहितः कृष्णभीमाभ्यां शिनीनामृषभेण च ॥ ३ ॥ तदा प्रभृति

मां शोको दहत्यग्निरिवाशयम्। शस्तानिव प्रपश्यामि भूमिपालान् ससैन्धवान् ॥ ४ ॥ अप्रियं सुमहत् कृत्वा सिन्धुराजः किरीटिनः। चक्षुर्विषयमापन्नः कथं जीवितमाप्नुयात् ॥ ५ ॥ अनुमानाच्च पश्यामि नास्ति सञ्जय सैन्धवः। युद्धन्तु तद्यथावृत्तं तन्ममाचक्ष्व तत्त्वतः ॥ ६ ॥ यच्च विक्षोभ्य महतीं सेनामालोड्य चासकृत्। एकः प्रविष्टः संक्रुद्धो नलिनीमिव कुञ्जरः ॥ ७ ॥ तस्य मे वृष्णिवीरस्य ब्रूहि युद्धं यथातथम्। धनञ्जयार्थे यत्तस्य कुशलो ह्यसि सञ्जय ॥ ८ ॥

सञ्जय उवाच। तथा तु वैकर्त्तनपीड़ितं तं भीमम्प्रयान्तं पुरुषप्रवीरम्। समीक्ष्य राजन्नरवीरमध्ये शिनिप्रवीरोऽनुययौ रथेन ॥ ९ ॥ नदन् यथा वज्रधरस्तपान्ते ज्वलन् यथा जलदान्ते च सूर्य्यः। निघ्नन्नमित्रान् धनुषा दृढ़ेन सङ्कम्पयंस्तव पुत्रस्य सेनाम् ॥ १० ॥ तं यान्तमश्वैरजतप्रकाशैरायोधने वीरतरं नरन्तम्। नाशक्नुवन् वारयितुं त्वदीयाः सर्व्वे तथा भारत माधवाग्रम् ॥ ११ ॥ अमर्षपूर्णस्त्वनिवृत्तयोधी शरासनी काञ्चनवर्म्मधारी। अलम्वुषः सात्यकिं माधवाग्रमवारयद्राजवरोऽभिपत्य ॥ १२ ॥ तयोरभूद्भारत सम्प्रहारो यथाविधो नैव बभूव कश्चित्। प्रैक्षन्त एवाहवशोभिनौ तौ योधास्त्वदीयाश्च परे च सर्व्वे ॥ १३ ॥ अविध्यदेनं दशभिः पृषत्कैरलम्वुषो राजवरः प्रसह्य। अनागतानेव तु तान् पृषतकांश्चिच्छेद वाणैः शिनिपुङ्गवोऽपि ॥ १४ ॥ पुनः स वाणैस्त्रिभिरग्निकल्पैराकर्णपूर्णैर्न्निशितैः सुपुङ्खैः। विव्याध देहावरणं विदार्य्य ते सात्यकेराविविशुः शरीरम् ॥ १५ ॥ तैः कायमस्याग्न्यनिलप्रभावैर्विदार्य्य वाणैर्न्निशितैर्ज्वलद्भिः। आजघ्निवांस्तान्रजतप्रकाशानश्वांश्चतुर्भिश्चतुरः प्रसह्य ॥ १६ ॥ तथा तु तेनाभिहतस्तरस्वी नप्ता शिनेश्चक्रधरप्रभावः। अलम्वुषस्योत्तमवेगवद्भिरश्वांश्चतुर्भिर्न्निजघान वाणैः ॥ १७ ॥ अथास्य सूतस्य

शिरो निकृत्य भल्लेन कालानलसन्निभेन। सकुण्डलं पूर्णशशि-
प्रकाशं भ्राजिष्णु वक्त्रं विचकर्त्त देहात्॥ १८॥ निहत्य तं
पार्थिवपुत्रपौत्रं सङ्ग्रे यदूनामृषभः प्रमाथी। ततोऽन्वया-
दर्ज्जुनमेव वीरः सैन्यानि राजंस्तव सन्निवार्य्य॥ १९॥ अन्वा-
गतं वृष्णिवीरं समीक्ष्य तथारिमध्ये परिवर्त्तमानम्। घ्नन्तं
कुरूणामिषुभिर्बलानि पुनः पुनर्वायुमिवाभ्रपूगान्॥ २०॥ ततो
ऽवहन् सैन्धवाः साधुदान्ता गोक्षीरकुन्देन्दुहिमप्रकाशाः। सुवर्ण-
जालावतताः सदश्वा यतो यतः कामयते नृसिंहः॥ २१॥
अथात्मजास्ते सहिताभिपेतुरन्ये च योधास्त्वरितास्त्वदीयाः।
कृत्वा मुखं भारत योधमुख्यं दुःशासनं त्वत्सुतमाजमीढ़म्॥ २२॥
ते सर्वतः सम्परिवार्य्य सङ्ग्रे शैनेयमाजघ्नुरनीकसाहाः। स
चापि तान् प्रवरः सात्वतानां न्यवारयद्वाणजालेन वीरः॥ २३॥
निवार्य्य तांस्तूर्णममित्रघाती नप्ता शिनेः पत्रिभिरग्निकल्पैः। दुःशा-
सनस्याभिजघान वाहानुद्यम्य वाणासनमाजमीढ़। ततोऽर्ज्जुनो
हर्षमवाप सङ्ग्रे कृष्णश्च दृष्ट्वा पुरुषप्रवीरम्॥ २४॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि अलम्बुषवधे
चत्वारिंशदधिकशततोऽध्यायः॥ १४०॥

---

सञ्जय उवाच। तमुद्यतं महाबाहुं दुःशासनरथं प्रति।
त्वरितं त्वरणीयेषु धनञ्जयजयैषिणम्॥ १॥ त्रिगर्त्तानां महे-
ष्वासाः सुवर्णविकृतध्वजाः। सेनासमुद्रमाविष्टमनन्तं पर्य्यवार-
यन्॥ २॥ अथैनं रथवंशेन सर्वतः सन्निवार्य्य ते। अवाकिर-
ञ्छरव्रातैः क्रुद्धाः परमधन्विनः॥३॥ अजयद्राजपुत्रांस्तान् भ्राज-
मानान्मचारणे। एकः पञ्चाशतं शत्रून् सात्यकिः सत्यविक्रमः॥४॥
सम्प्राप्य भारतीमध्यं तलघोषसमाकुलम्। असिशक्तिगदापूर्ण-

मप्लवं सलिलं यथा ॥ ५ ॥ तत्राद्भुतमपश्याम शैनेयचरितं रणे ।
प्रतीच्यां दिशि तं दृष्ट्वा प्राच्यां पश्याम लाघवात् ॥ ६ ॥ उदीचीं
दक्षिणां प्राचीं प्रतीचीं विदिशस्तथा । नृत्यन्निवाचरच्छूरो यथा
रथशतं तथा ॥ ७ ॥ तद्दृष्ट्वा चरितं तस्य सिंहविक्रान्तगामिनः ।
त्रिगर्त्ताः सन्न्यवर्त्तन्त सन्तप्ताः स्वजनं प्रति ॥ ८ ॥ तमन्ये शूर-
सेनानां शूराः सङ्ख्ये न्यवारयन् । नियच्छन्तः शरव्रातैर्मत्तं
द्विपमिवाङ्कुशैः ॥ ९ ॥ तैर्व्यवाहरदार्य्यात्मा मुहूर्त्तमिव सात्यकिः ।
ततः कलिङ्गैर्युयुधे सोऽचिन्त्यबलविक्रमः ॥ १० ॥ ताञ्च सेनामति-
क्रम्य कलिङ्गानां दुरत्ययाम् । अथ पार्थं महाबाहुर्धनञ्जयमुपा-
सरत् ॥ ११ ॥ तरन्निव जलेऽश्रान्तो यथा स्थलमुपेयिवान् ।
तं दृष्ट्वा पुरुषव्याघ्रं युयुधानः समाश्वसत् ॥ १२ ॥ तमायान्त-
मभिप्रेक्ष्य केशवः पार्थमब्रवीत् । असावायाति शैनेयस्तव पार्थ
पदानुगः ॥ १३ ॥ एष शिष्यः सखा चैव तव सत्यपराक्रमः ।
सर्वान् योधांस्तृणीकृत्य विजिग्ये पुरुषर्षभः ॥ १४ ॥ एष
कौरवयोधानां कृत्वा घोरमुपद्रवम् । तव प्राणैः प्रियतमः
किरीटिन्नेति सात्यकिः ॥ १५ ॥ एष द्रोणं तथा भोजं कृतवर्माण-
मेव च । कदर्थीकृत्य विशिखैः फाल्गुनाभ्येति सात्यकिः ॥ १६ ॥
धर्मराज प्रियान्वेषी हत्वा योधान् वरान् वरान् । शूरश्चैव
कृतास्त्रश्च फाल्गुनाभ्येति सात्यकिः ॥ १७ ॥ कृत्वा सुदुष्करं कर्म
सैन्यमध्ये महाबलः । तव दर्शनमन्विच्छन् पाण्डवाभ्येति सात्यकिः
॥ १८ ॥ बहूनेकरथेनाजौ योधयित्वा महारथान् । आचार्य्य-
प्रमुखान् पार्थ प्रायात्येष स सात्यकिः ॥ १९ ॥ स्वबाहुबल-
माश्रित्य विदार्य्य च वरूथिनीम् । प्रेषितो धर्मपुत्रेण पार्थैषो-
ऽभ्येति सात्यकिः ॥ २० ॥ यस्य नास्ति समो योधः कौरवेषु
कथञ्चन । सोऽयमायाति कौन्तेय सात्येय सात्यकिर्युद्धदुर्मदः ॥२१॥
कुरुसैन्याद्विमुक्तो वै सिंहो मध्याद्गवामिव । निहत्य बहुलाः

सेनाः पार्थैषोऽभ्येति सात्यकिः ॥ २२ ॥ एष राजसहस्राणां वक्त्रैः पङ्कजसन्निभैः । आस्तीर्य्य वसुधां पार्थ क्षिप्रमायाति सात्यकिः ॥ २३ ॥ एष दुर्य्योधनं जित्वा भ्रातृभिः सहितं रणे । निहत्य जलसन्धञ्च क्षिप्रमायाति सात्यकिः ॥ २४ ॥ रुधिरौघवतीं कृत्वा नदीं शोणितकर्द्दमाम् । तृणवन्न्यस्य कौरव्यानेष ह्यायाति सात्यकिः ॥ २५ ॥ ततोऽप्रहृष्टः कौन्तेयः केशवं वाक्यमब्रवीत् । न मे प्रियं महाबाहो यन्मामभ्येति सात्यकिः ॥ २६ ॥ न हि जानामि वृत्तान्तं धर्मराजस्य केशव । सात्वतेन विहीनः स यदि जीवति वा न वा ॥ २७ ॥ एतेन हि महाबाहो रक्षितव्यः स पार्थिवः । तमेष कथमुत्सृज्य मम कृष्ण पदानुगः ॥ २८ ॥ राजा द्रोणाय चोत्सृष्टः सैन्धवश्चानिपातितः । प्रत्युद्याति च शैनेयमेष भूरिश्रवा रणे ॥ २९ ॥ सोऽयं गुरुतरो भारः सैन्धवार्थे समाहितः । ज्ञातव्यश्च हि मे राजा रक्षितव्यश्च सात्यकिः ॥ ३० ॥ जयद्रथश्च हन्तव्यो लम्बते च दिवाकरः । श्रान्तश्चैव महाबाहुरल्पप्राणश्च साम्प्रतम् ॥ ३१ ॥ परिश्रान्ता हयाश्चास्य हययन्ता च माधव । न च भूरिश्रवाः श्रान्तः ससहायश्च केशव ॥ ३२ ॥ अपीदानीं भवेदस्य क्षेममस्मिन् समागमे । कच्चिन्न सागरं तीर्त्वा सात्यकिः सत्यविक्रमः ॥ ३३ ॥ गोष्पदं प्राप्य सीदेत महौजाः शिनिपुङ्गवः । अपि कौरव्यमुख्येन कृतास्त्रेण महात्मना ॥ ३४ ॥ समेत्य भूरिश्रवसा स्वस्तिमान् सात्यकिर्भवेत् । व्यतिक्रममिमं मन्ये धर्मराजस्य केशव ॥ ३५ ॥ आचार्य्याद्भयमुत्सृज्य यः प्रेषयत सात्यकिम् । ग्रहणं धर्मराजस्य खगः श्येन इवामिषम् । नित्यमाशंसते द्रोणः कच्चित् स्यात् कुशली नृपः ॥ ३६ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि सात्यक्यर्जुनदर्शने
एकचत्वारिंशदधिकशततोऽध्यायः ॥ १४१ ॥

सञ्जय उवाच। तमापतन्तं सम्प्रेच्य सात्वतं युद्धदुर्मदम्। क्रोधाद्भूरिश्रवा राजन् सहसा समुपाद्रवत् ॥ १ ॥ तमब्रवीन्महाराज कौरव्यः शिनिपुङ्गवम्। अद्य प्राप्तोऽसि दिष्ट्या मे चक्षुर्विषयमित्युत ॥ २ ॥ चिराभिलषितं काममहं प्राप्स्यामि संयुगे। न हि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे रणम् ॥ ३ ॥ अद्य त्वां समरे हत्वा नित्यं शूराभिमानिनम्। नन्दयिष्यामि दाशार्ह कुरुराजं सुयोधनम् ॥ ४ ॥ अद्य मद्बाणनिर्द्दग्धं पतितं धरणीतले। द्रक्ष्यतस्त्वां रणे वीरौ सहितौ केशवार्ज्जुनौ ॥ ५ ॥ अद्य धर्मसुतो राजा श्रुत्वा त्वां निहतं मया। सव्रीड़ो भविता सद्यो येनासीह प्रवेशितः ॥ ६ ॥ अद्य मे विक्रमं पार्थो विज्ञास्यति धनञ्जयः। त्वयि भूमौ विनिहते शयाने रुधिरोक्षिते ॥७॥ चिराभिलषितो ह्येष त्वया सह समागमः। पुरा देवासुरे युद्धे शक्रस्य बलिना यथा ॥ ८ ॥ अद्य युद्धं महाघोरं तव दास्यामि सात्वत। ततो ज्ञास्यसि तत्त्वेन मद्वीर्य्यबलपौरुषम् ॥ ९ ॥ अद्य संयमनीं याता मया त्वं निहतो रणे। यथा रामानुजेनाजौ रावणिर्लक्ष्मणेन ह ॥ १० ॥ अद्य कृष्णश्च पार्थश्च धर्मराजश्च माधव। हते त्वयि निरुत्साहा रणं त्यक्ष्यन्त्यसंशयम् ॥ ११ ॥ अद्य तेऽपचितिं कृत्वा शितैर्माधव सायकैः। तत् स्त्रियो नन्दयिष्यामि ये त्वया निहता रणे ॥ १२ ॥ मच्चक्षुर्विषयं प्राप्तो न त्वं माधव मोक्ष्यसे। सिंहस्य विषयं प्राप्तो यथा क्षुद्रमृगस्तथा ॥ १३ ॥ युयुधानस्तु तं राजन् प्रत्युवाच हसन्निव। कौरवेय न सन्त्रासो विद्यते मम संयुगे ॥ १४ ॥ नाहं भीषयितुं शक्यो वाङ्मात्रेण तु केवलम्। स मां निहन्यात् सङ्ग्रामे यो मां कुर्य्यान्निरायुधम् ॥ १५ ॥ समास्तु शाश्वतीर्हन्याद्यो मां हन्याद्धि संयुगे। किं वृथोक्तेन बहुना कर्मणा तत् समाचर ॥ १६ ॥ शारदस्येव मेघस्य गर्ज्जितं निष्फलं हि ते। श्रुत्वैतद्गर्ज्जितं वीर

ह्रास्यं हि मम जायते॥ १७॥ चिरकालेप्सितं लोके युद्ध-
मद्यास्तु कौरव। त्वरते मे मतिस्तात तव युद्धाभिकाङ्क्षिणी
॥ १८॥ नाहत्वाहं निवर्त्तिष्ये त्वामद्य पुरुषाधम। अन्योऽन्यं
तौ तथा वाग्भिस्तक्षन्तौ नरपुङ्गवौ॥ १९॥ जिघांसूपरमक्रुद्धा-
वभिजघ्नतुराहवे। समेतौ तौ महेष्वासौ शुष्मिणौ स्पर्द्धिनौ
रणे॥ २०॥ द्विरदाविव संक्रुद्धौ वाशितार्थे मदोत्कटौ। भूरि-
श्रवाः सात्यकिश्च ववर्षतुररिन्दमौ॥ २१॥ शरवर्षाणि घोराणि
मेघाविव परस्परम्। सौमदत्तिस्तु शैनेयं प्रच्छाद्येषुभिराशुगैः
॥ २२॥ जिघांसुर्भरतश्रेष्ठ विव्याध निशितैः शरैः। दशभिः
सात्यकिं विद्ध्वा सौमदत्तिरथापरान्॥ २३॥ मुमोच निशितान्
वाणान् जिघांसुः शिनिपुङ्गवम्। तानस्य विशिखांस्तीक्ष्णानन्त-
रीक्षे विशाम्पते॥ २४॥ अप्राप्तानस्त्रमायाभिरग्रसत् सात्यकिः
प्रभो। तौ पृथक् शस्त्रवर्षाभ्यामवर्षतां परस्परम्॥ २५॥
उत्तमाभिजनौ वीरौ कुरुवृष्णियशस्करौ। तौ नखैरिव शार्दूलौ
दन्तैरिव महाद्विपौ॥ २६॥ रथशक्तिभिरन्योऽन्यं विशिखैश्चाप्य-
कृन्तताम्। निर्भिन्दन्तौ हि गात्राणि विक्षरन्तौ च शोणितम्
॥ २७॥ व्यष्टम्भयेतामन्योऽन्यं प्राणद्यूताभिदेविनौ। एवमुत्तम-
कर्माणौ कुरुवृष्णियशस्करौ॥ २८॥ परस्परमयुध्येतां वारणा-
विव यूथपौ। तावदीर्घेण कालेन ब्रह्मलोकपुरस्कृतौ॥ २९॥
यियासन्तौ परं स्थानमन्योऽन्यं सञ्जगर्ज्जतुः। सात्यकिः सौम-
दत्तिश्च शरवृष्ट्या परस्परम्॥ ३०॥ हृष्टानां धार्त्तराष्ट्राणां
पश्यतामभ्यवर्षताम्। सम्प्रैक्षन्त जनास्तौ तु युध्यमानौ युधा-
म्पती॥ ३१॥ यूथपौ वाशिताहेतोः प्रयुद्धाविव कुञ्जरौ।
अन्योऽन्यस्य हयान् हत्वा धनुषी विनिकृत्य च॥ ३२॥ विरथा-
वसियुद्धाय समेयातां महारणे। आर्षभे चर्मणी चित्रे प्रगृह्य
विपुले शुभे॥ ३३॥ विकोषौ चाप्यसी कृत्वा समरे तौ विचेरतुः।

चरन्तौ विविधन्मार्गान्मण्डलानि च भागशः ॥ ३४ ॥ मुहूराज-
न्ततुः क्रुद्धावन्योऽन्यमरिमर्द्दनौ । सखड्गौ चित्रवर्म्माणौ स-
निष्काङ्गदभूषणौ ॥ ३५ ॥ भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं
स्रुतम् । सम्पातं समुदीर्णञ्च दर्शयन्तौ यशस्विनौ ॥ ३६ ॥
असिभ्यां सम्प्रजह्राते परस्परमरिन्दमौ । उभौ छिद्रैषिणौ
वीरावुभौ चित्रं ववल्गतुः ॥ ३७ ॥ दर्शयन्तावुभौ शिक्षां लाघवं
सौष्ठवं तथा । रणे रणकृतां श्रेष्ठावन्योऽन्यं पर्य्यकर्षताम् ॥ ३८ ॥
मुहूर्त्तमिव राजेन्द्र समाहत्य परस्परम् । पश्यतां सर्व्वसैन्यानां
वीरावाश्वसतां पुनः ॥ ३९ ॥ असिभ्याञ्चर्म्मणी चित्रे शतचन्द्रे
नराधिप । निकृत्य पुरुषव्याघ्रौ वाहुयुद्धं प्रचक्रतुः ॥ ४० ॥
व्यूढ़ोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ । वाहुभिः समसज्जेता-
मायसैः परिघैरिव ॥ ४१ ॥ तयोराजन् भुजाघातान्निग्रहप्रग्रहा-
स्तथा । शिक्षावलसमुद्भूताः सर्व्वयोधप्रहर्षणाः ॥ ४२ ॥ तयो-
र्नृवरयोराजन् समरे युद्धमानयोः । भीमोऽभवन्महाशब्दो वज्र-
पर्व्वतयोरिव ॥ ४३ ॥ द्विपाविव विषाणाग्रैः शृङ्गैरिव महर्षभौ ।
भुजयोक्त्रावबन्धैश्च शिरोभ्याञ्चावघातनैः ॥ ४४ ॥ पादावकर्ष-
स्यन्दानैस्तोमराङ्कुशपाशनैः । पादोदरविबन्धैश्च भूमावुद्भ्रमणै-
स्तथा ॥ ४५ ॥ गतप्रत्यागताक्षेपैः पातनोत्थानकाप्लुतैः । युयु-
धाते महात्मानौ कुरुसात्वतपुङ्गवौ ॥ ४६ ॥ द्वात्रिंशत्करणानि
स्युर्य्यानि युद्धानि भारत । तान्यदर्शयतां तत्र युध्यमानौ महा-
वलौ ॥ ४७ ॥ क्षीणायुधे सात्वते युध्यमाने ततोऽब्रवीदर्ज्जुनं
वासुदेवः । पश्यस्वैनं विरथं युध्यमानं रणे वरं सर्व्वधनुर्द्धराणाम्
॥ ४८ ॥ प्रविष्टो भारतीं भित्त्वा तव पाण्डव पृष्ठतः । योधितश्च
महावीर्य्यैः सर्व्वैर्भारत भारतैः ॥ ४९ ॥ परिश्रान्तं युधां श्रेष्ठं
सम्प्राप्तो भूरिदक्षिणः । युद्धाकाङ्क्षी समायान्तन्नैतत् समसिवा-
र्ज्जुनः ॥ ५० ॥ ततो भूरिश्रवाः क्रुद्धः सात्यकिं युद्धदुर्म्मदः ।

उद्यम्याभ्यहनद्राजन् मत्तो मत्तमिव द्विपम् ॥ ५१ ॥ रथस्थयो-
र्द्वयोर्युद्धे क्रुद्धयोर्योधमुख्ययोः। केशवार्जुनयोराजन् समरे
प्रेक्षमाणयोः ॥ ५२ ॥ अथ कृष्णो महाबाहुरर्जुनं प्रत्यभाषत।
पश्य वृष्ण्यन्धकव्याघ्रं सौमदत्तिवशं गतम् ॥ ५३ ॥ परिश्रान्तं
गतं भूमौ कृत्वा कर्म सुदुष्करम्। तवान्तेवासिनं शूरं पालया-
र्जुन सात्यकिम् ॥ ५४ ॥ न वशं यज्ञशीलस्य गच्छेदेष वरो-
ऽर्जुन। त्वत्कृते पुरुषव्याघ्र तदाशु क्रियतां विभो ॥ ५५ ॥
अथाब्रवीत् हृष्टमना वासुदेवं धनञ्जयः। पश्य वृष्णिप्रवीरेण
क्रीड़न्तं कुरुपुङ्गवम् ॥ ५६ ॥ महाद्विपेनेव वने मत्तेन हरियूथ-
पम्। इत्येवं भाषमाणे तु पाण्डवे वै धनञ्जये ॥ ५७ ॥ हाहा-
कारो महानासीत् सैन्यानां भरतर्षभ। यदुद्यम्य महाबाहुः
सात्यकिं न्यहनद्भुवि ॥ ५८ ॥ स सिंह इव मातङ्गं विकर्षन्
भूरिदक्षिणः। व्यरोचत कुरुश्रेष्ठः सात्वतप्रवरं युधि ॥ ५९ ॥
अथ कोषाद्विनिष्कृष्य खड्गं भूरिश्रवा रणे। मूर्द्धजेषु निज-
ग्राह पदा चोरस्यताड़यत् ॥ ६० ॥ ततोऽस्य छेत्तुमारब्धः शिरः
कायात् सकुण्डलम्। तावत् क्षणं सात्वतोऽपि शिरः सम्भ्रमयं-
स्त्वरन् ॥ ६१ ॥ यथा रथाङ्गं कौलालो दण्डविद्धन्तु भारतः।
सहैव भूरिश्रवसो बाहुना केशधारिणा ॥ ६२ ॥ तं तथा परि-
कृष्यन्तं दृष्ट्वा सात्वतमाहवे। वासुदेवस्ततो राजन् भूयोऽर्जुन-
मभाषत ॥ ६३ ॥ पश्य वृष्ण्यन्धकव्याघ्रं सौमदत्तिवशं गतम्।
तव शिष्यं महाबाहो धनुष्यनवरं त्वया ॥ ६४ ॥ असत्यो विक्रमः
पार्थ यत्र भूरिश्रवा रणे। विशेषयति वार्ष्णेयं सात्यकिं सत्य-
विक्रमम् ॥ ६५ ॥ एवमुक्तो महाबाहुर्वासुदेवेन पाण्डवः।
मनसा पूजयामास भूरिश्रवसमाहवे ॥ ६६ ॥ विकर्षन् सात्वत-
श्रेष्ठं क्रीड़मान इवाहवे। संहर्षयति मां भूयः कुरूणां कीर्त्ति-
वर्द्धन ॥ ६७ ॥ प्रवरं वृष्णिवीराणां यन्न हन्याद्धि सात्यकिम्।

महाद्विपमिवारण्ये मृगेन्द्र इव कर्षति ॥ ६७ ॥ एवन्तु मनसा
राजन् पार्थः सम्पूज्य कौरवम् । वासुदेवं महावाहुरर्जुनः
प्रत्यभाषत ॥ ६८ ॥ सैन्धवे सक्तदृष्टित्वान्नैनं पश्यामि माधव ।
एष त्वसुकरं कर्म यादवार्थे करोम्यहम् ॥ ६९ ॥ इत्युक्त्वा वचनं
कुर्वन् वासुदेवस्य पाण्डवः । ततः क्षुरप्रं निशितं गाण्डीवे सम-
योजयत् ॥ ७० ॥ पार्थबाहुविसृष्टः स महोल्केव नभश्चुरता ।
सखड्गं यज्ञशीलस्य साङ्गदं बाहुमच्छिनत् ॥ ७१ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि भूरिश्रवोबाहुच्छेदे
द्विचत्वारिंशदधिकशततोऽध्यायः ॥ १४२ ॥

---

सञ्जय उवाच । स बाहुर्न्यपतद्भूमौ सखड्गः सशुभा-
ङ्गदः । आदधज्जीवलोकस्य दुःखमद्भुतमुत्तमम् ॥ १ ॥ प्रह-
रिष्यन् हृतो बाहुरदृश्येन किरीटिना । वेगेन न्यपतद्भूमौ पञ्चास्य
इव पन्नगः ॥ २ ॥ स मोघं कृतमात्मानं दृष्ट्वा पार्थेन कौरवः ।
उत्सृज्य सात्यकिं क्रोधाद्गर्हयामास पाण्डवम् ॥ ३ ॥

भूरिश्रवा उवाच । नृशंसं वत कौन्तेय कर्म्मेदं कृतवानसि ।
अपश्यतोऽविषक्तस्य यन्मे बाहुमचिच्छिदः ॥ ४ ॥ किन्तु वक्ष्यसि
राजानं धर्मपुत्रं युधिष्ठिरम् । किं कुर्व्वाणो मया सङ्ख्ये हतो
भूरिश्रवा रणे ॥ ५ ॥ इदमिन्द्रेण ते साक्षादुपदिष्टं महात्मना ।
अस्त्रं रुद्रेण वा पार्थ द्रोणेनाथ कृपेण वा ॥ ६ ॥ ननु नामास्त्र-
धर्मज्ञस्त्वं लोकेऽभ्यधिकः परैः । सोऽयुध्यमानस्य कथं रणे
प्रहृतवानसि ॥ ७ ॥ न प्रमत्ताय भीताय विरथाय प्रयाचते ।
व्यसने वर्त्तमानाय प्रहरन्ति मनस्विनः ॥ ८ ॥ इदन्तु नीचा-
चरितमसत्पुरुषसेवितम् । कथमाचरितं पार्थ पापकर्म सुदुष्करम्
॥ ९ ॥ आर्य्येण सुकरं ह्याहुरार्य्यकर्म धनञ्जय । अनार्य्यकर्म्म

त्वार्य्येण सुदुष्करतमं भुवि ॥ १० ॥ येषु येषु नरः पार्थ यत्र यत्र च वर्त्तते । आशु तच्छीलतामेति तदिदं त्वयि दृश्यते ॥ ११ ॥ कथं हि राजवंश्यस्त्वं कौरवेयो विशेषतः । क्षत्रधर्मादपक्रान्तः सुवृत्तश्चरितव्रतः ॥ १२ ॥ इदन्तु यदतिक्षुद्रं वार्ष्णेयार्थे कृतं त्वया । वासुदेवमतं नूनं नैतत्त्वय्युपपद्यते ॥ १३ ॥ को हि नाम प्रमत्ताय परेण सह युध्यते । ईदृशं व्यसनं दद्याद्यो न कृष्णसखो भवेत् ॥ १४ ॥ व्रात्याः संश्लिष्टकर्म्माणः प्रकृत्यैव विगर्हिताः । वृष्ण्यन्धकाः कथं पार्थ प्रमाणं भवता कृताः । एवमुक्तो रणे पार्थो भूरिश्रवसमब्रवीत् ॥ १५ ॥

अर्ज्जुन उवाच । व्यक्तं हि जीर्य्यमाणोऽपि बुद्धिं जरयते नरः । अनर्थकमिदं सर्वं यत्त्वया व्याहृतं प्रभो ॥ १६ ॥ जानन्नेव हृषीकेशं गर्हसे माञ्च पाण्डवम् । सङ्ग्रामाणां हि धर्मज्ञः सर्वशास्त्रार्थपारगः ॥ १७ ॥ न चाधर्ममहं कुर्य्यां जानंश्चैव हि मुह्यसे । युध्यन्ति क्षत्रियाः शत्रून् स्वैः स्वैः परिवृता नरैः ॥ १८ ॥ भ्रातृभिः पितृभिः पुत्रैस्तथा सम्बन्धिबान्धवैः । वयस्यैरथ मित्रैश्च ते च बाहुं समाश्रिताः ॥ १९ ॥ स कथं सात्यकिं शिष्यं सुखसम्बन्धिमेव च । अस्मदर्थे च युध्यन्तं त्यक्त्वा प्राणान् सुदुस्त्यजान् ॥ २० ॥ मम बाहुं रणे राजन् दक्षिणं युद्धदुर्मदम् । न चात्मा रक्षितव्यो वै राजन्रणगतेन हि ॥ २१ ॥ यो यस्य युज्यतेऽर्थेषु स वै रक्ष्यो नराधिप । तैरक्ष्यमाणैः स नृपो रक्षितव्यो महामृधे ॥ २२ ॥ यद्यहं सात्यकिं पश्ये वध्यमानं महारणे । ततस्तस्य वियोगेन पापं मेऽनर्थतो भवेत् ॥ २३ ॥ रक्षितश्च मया यस्मात् तस्मात् क्रुध्यसि किं मयि । यच्च मे गर्हसे राजन्नन्येन सह सङ्गतम् ॥ २४ ॥ अहं त्वया विनिकृतस्तत्र मे बुद्धिविभ्रमः । कवचं धुन्वतस्तुभ्यं रथञ्चारोहतः स्वयम् ॥ २५ ॥ धनुर्ज्यां कर्षतश्चैव युध्यतः सह शत्रुभिः । एवं रथगजाकीर्णे हयपत्तिसमाकुले ॥२६॥

सिंहनादोद्धतरवे गम्भीरे सैन्यसागरे। स्वैः परैश्च समेतैश्चः सात्त्व-
तेन च सङ्गमे ॥ २७ ॥ एकस्यैकेन हि कथं सङ्ग्रामः स भविष्यति।
बहुभिः सह सङ्गम्य निर्ज्जित्य च महारथान् ॥२८॥ श्रान्तश्च श्रान्त-
वाहश्च विमनाः शस्त्रपीड़ितः। ईदृशं सात्यकिं सङ्ख्ये निर्ज्जित्य च
महारथम् ॥ २९ ॥ अधिकत्वं विजानीषे स्ववीर्य्यवशमागतम्।
यदिच्छसि शिरश्चास्य असिना हन्तुमाहवे ॥ ३० ॥ तथा कृच्छ्र-
गतञ्चैव सात्यकिं कः क्षमिष्यति। त्वं वै विगर्हयात्मानमात्मानं यो
न रक्षसि। कथं करिष्यसे वीर यो वा त्वां संश्रयेज्जनः ॥ ३१ ॥
सञ्जय उवाच। एवमुक्तो महाबाहुर्यूपकेतुर्महायशाः। युयु-
धानं समुत्सृज्य रणे प्रायमुपाविशत् ॥ ३२ ॥ शरानास्तीर्य्य
सव्येन पाणिना पुण्यलक्षणः। यियासुर्ब्रह्मलोकाय प्राणान्
प्राणेष्वथाजुहोत् ॥ ३३ ॥ सूर्य्ये चक्षुः समाधाय प्रसन्नं सलिले
मनः। ध्यायन्महोपनिषदं योगयुक्तोऽभवन्मुनिः ॥ ३४ ॥ ततः
स सर्व्वसेनायां जनः कृष्णधनञ्जयौ। गर्हयामास तञ्चापि शशंस
पुरुषर्षभम् ॥ ३५ ॥ निन्द्यमानौ तथा कृष्णौ नोचतुः किञ्चिदप्रि-
यम्। तथा प्रशस्यमानश्च नाहृष्यद्यूपकेतनः ॥ ३६ ॥ तांस्तथा-
वादिनो राजन् पुत्रांस्तव धनञ्जयः। अमृष्यमाणो मनसा तेषां
तस्य च भाषितम् ॥ ३७ ॥ असंक्रुद्धमना वाचः स्मारयन्निव
भारत। उवाच पाण्डुतनयः साक्षेपमिव फाल्गुनः ॥ ३८ ॥ मम
सर्व्वेऽपि राजानो जानन्त्येव महाव्रतम्। न शक्यो मामको हन्तुं
यो मे स्याद्बाणगोचरे ॥ ३९ ॥ यूपकेतोः समीक्ष्यैतन्न मामर्हसि
गर्हितुम्। न हि धर्म्ममविज्ञाय युक्तं गर्हयितुं परम् ॥ ४० ॥
आत्तशस्त्रस्य हि रणे वृष्णिवीरं जिघांसतः। यदहंबाहुमच्छेत्तं
स्यन्न स धर्म्मो विगर्हितः ॥ ४१ ॥ न्यस्तशस्त्रस्य बालस्य विरथस्य
विवर्म्मणः। अभिमन्योर्व्वधं तात धार्म्मिकः कोऽनुपूजयेत् ॥ ४२ ॥
एवमुक्तः स पार्थेन शिरसा भूमिमस्पृशत्। पाणिना चैव सव्येन

प्राहिणोदस्य दक्षिणम् ॥ ४३ ॥ एतत् पार्थस्यानुवचस्ततः श्रुत्वा महाद्युतिः । यूपकेतुर्महाराज तूष्णीमासीदवाङ्मुखः ॥ ४४ ॥

अर्जुन उवाच । या प्रीतिर्धर्मराजे मे भीमे च बलिनां वरे । नकुले सहदेवे च सा मे त्वयि शलाग्रज ॥ ४५ ॥ मया त्वं समनुज्ञातः कृष्णेन च महात्मना । गच्छ पुण्यकृताल्लोकान् शिबिरौशीनरो यथा ॥ ४६ ॥

वासुदेव उवाच । ये लोका मम विमलाः सकृद्विभान्ति ब्रह्माद्यैः सुरवृषभैरपीष्यमाणाः । तान् क्षिप्रं व्रज सततग्निहोत्रयाजिन्मत्तुल्यो मम गरुडोत्तमाङ्गयानः ॥ ४७ ॥

सञ्जय उवाच । उत्थितः स तु शैनेयो विमुक्तः सौमदत्तिना । खड्गमादाय चिच्छित्सुः शिरस्तस्य महात्मनः ॥ ४८ ॥ निहतं पाण्डुपुत्रेण प्रमत्तं भूरिदक्षिणम् । इयेष सात्यकिर्हन्तुं शलाग्रजमकल्मषम् ॥ ४९ ॥ निकृत्तभुजमासीनं छिन्नहस्तमिव द्विपम् । क्रोशता सर्वसैन्येन निन्द्यमानः सुदुर्मणाः ॥ ५० ॥ वार्यमाणः स कृष्णेन पार्थेन च महात्मना । भीमेन चक्ररक्षाभ्यामश्वत्थाम्ना कृपेण च ॥ ५१ ॥ कर्णेन वृषसेनेन सैन्धवेन तथैव च । विक्रोशताञ्च सैन्यानामवधीत्तं यतव्रतम् ॥ ५२ ॥ प्रायोपविष्टाय रणे पार्थेन छिन्नबाहवे । सात्यकिः कौरवेयाय खड्गेनापाहरच्छिरः ॥ ५३ ॥ नाभ्यनन्दन्त सैन्यानि सात्यकिन्तेन कर्मणा । अर्जुनेन हतं पूर्वं यज्जघान कुरूद्वहम् ॥ ५४ ॥ सहस्राक्षसमं तत्र सिद्धचारणमानवाः । भूरिश्रवसमालोक्य युद्धे प्रायगतं हतम् ॥ ५५ ॥ अपूजयन्त तं देवा विस्मितास्तस्यकर्मभिः । पक्षवादांश्च सुबहून् प्रावदंस्तव सैनिकाः ॥ ५६ ॥ न वार्ष्णेयस्यापराधो भवितव्यं हि तत्तथा । तस्मान्मन्युर्न वः कार्यः क्रोधो दुःखतरो नृणाम् ॥ ५७ ॥ हन्तव्यश्चैष वीरेण नात्र कार्या विचारणा । विहितो ह्यस्य धात्रैव मृत्युः सात्यकिराहवे ॥ ५८ ॥

सात्यकिरुवाच । न हन्तव्यो न हन्तव्य इति यन्मां प्रभाषत । धर्मवादैरधर्मिष्ठा धर्मकञ्चुकमास्थिताः ॥ ५९ ॥ यदा बालः सुभद्रायाः सुतः शस्त्रविनाकृतः । युष्माभिर्निहतो युद्धे तदा धर्मः क्व वो गतः ॥ ६० ॥ मया त्वेतत् प्रतिज्ञातं क्षेपे कस्मिंश्चिदेव हि । यो मां निष्पिष्य सङ्ग्रामे जीवन् हन्यात् पदा रुषा ॥ ६१ ॥ स मे बध्यो भवेच्छत्रुर्यद्यपि स्यान्मुनिव्रतः । चेष्टमानं प्रतीघाते सभुजं मां सचक्षुषः ॥ ६२ ॥ मन्यध्वं मृतमित्येवमेतद्वो बुद्धिलाघवम् । युक्तो ह्यस्य प्रतीघातः कृतो मे कुरुपुङ्गवाः ॥ ६३ ॥ यत्तु पार्थेन मे स्नेहात् प्रतिज्ञा चाभिरक्षिता । सखड्गोऽस्य हतो बाहुरेतेनैवास्मि वञ्चितः ॥ ६४ ॥ भवितव्यञ्च यद्भावि दैवं चेष्टयतीव च । सोऽयं हतो विमर्द्देऽस्मिन् किमत्राधर्मचेष्टितम् ॥ ६५ ॥ अपिचायं पुरा गीतः श्लोको वाल्मीकिना भुवि । न हन्तव्याः स्त्रिय इति यद्ब्रवीषि प्लवङ्गम ॥ ६६ ॥ सर्वकालं मनुष्येण व्यवसायवता सदा । पीड़ाकरममित्राणां यत स्यात्कर्त्तव्यमेव तत् ॥ ६७ ॥

सञ्जय उवाच । एवमुक्ते महाराज सर्वे पाण्डवकौरवाः । न स्म किञ्चिदभाषन्त मनसा समपूजयन् ॥ ६८ ॥ मन्त्राभिपूतस्य महाध्वरेषु यशस्विनो भूरिसहस्रदस्य । मुनेरिवारण्यगतस्य तस्य न तस्य कश्चिद्वधमभ्यनन्दत् ॥ ६९ ॥ सुनीलकेशं वरदस्य तस्य शूरस्य पारावतलोहिताक्षम् । अश्वस्य मेध्यस्य शिरो निकृत्तं न्यस्तं हविर्द्धानमिवान्तरेण ॥ ७० ॥ स तेजसा शस्त्रहतेन पूतो महाहवे देहवरं विसृज्य । आक्रामदूर्द्ध्वं वरदो वरार्हो व्यावृत्य धर्म्मेण परेण रोदसी ॥ ७१ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि भूरिश्रवोबधे त्रिचत्वारिंशदधिकशततोऽध्यायः ॥ १४३ ॥

---

धृतराष्ट्र उवाच। अजितो द्रोणराधेयविकर्णकृतवर्म्मभिः। तीर्णः सैन्यार्णवं वीरः प्रतिश्रुत्य युधिष्ठिरे॥ १॥ स कथं कौरवेयेण समरेष्वनिवारितः। निगृह्य भूरिश्रवसा बलाद्भुवि निपातितः॥ २॥

सञ्जय उवाच। शृणु राजन्निहोत्पत्तिं शैनेयस्य यथा पुरा। यथा च भूरिश्रवसो यत्र ते संशयो नृप॥ ३॥ अत्रेः पुत्रोऽभवत् सोमः सोमस्य तु बुधः सुतः। बुधस्यासीन्महेन्द्राभः पुत्र आसीत् पुरूरवाः॥ ४॥ पुरूरवस आयुस्तु आयुषो नहुषः सुतः। नहुषस्य ययातिस्तु राजर्षिर्देवसम्मितः॥ ५॥ ययातेर्देवयान्यान्तु यदुर्ज्येष्ठोऽभवत् सुतः। यदोरभूदन्ववाये देवमीढ़ इति श्रुतः॥ ६॥ यादवस्तस्य तु सुतः शूरस्त्रैलोक्यसम्मतः। शूरस्य शौरिर्नृवरो वसुदेवो महायशाः॥ ७॥ धनुष्यनवरः शूरः कार्त्तवीर्य्यसमो युधि। तद्वीर्य्यस्तस्य तत्रैव कुले शिनिरभून्नृप॥ ८॥ एतस्मिन्नेव काले तु देवकस्य महात्मनः। दुहितुः स्वम्वरे राजन् सर्वक्षत्रसमागमे॥ ९॥ तत्र वै देवकीं देवीं वसुदेवार्थमाशु वै। निर्ज्जित्य पार्थिवान् सर्वान्रथमारोपयच्छिनिः॥ १०॥ तां दृष्ट्वा देवकीं शौरेरथस्थां पुरुषर्षभ। नामृष्यत महातेजाः सोमदत्तः शिनेर्नृप॥ ११॥ तयोर्युद्धमभूद्राजन् दिनार्द्धञ्चित्रमद्भुतम्। बाहुयुद्धं सुबलिनोः प्रमत्तं पुरुषर्षभ॥ १२॥ शिनिना सोमदत्तस्तु प्रसह्य भुवि पातितः। असिमुद्यम्य केशेषु प्रगृह्य च पदा हतः॥ १३॥ मध्ये राजसहस्राणां प्रेक्षकाणां समन्ततः। कृपया च पुनस्तेन स जीवेति विसर्ज्जितः॥ १४॥ तदवस्थः कृतस्तेन सोमदत्तोऽथ मारिष। प्रासादयन्महादेवममर्षवशमास्थितः॥१५॥ तस्य तुष्टो महादेवो वरदानां महाप्रभुः। वरेण छन्दयामास स तु वव्रे वरं नृपः॥ १६॥ पुत्रमिच्छामि भगवन् यो हि हन्याच्छिनेः सुतम्। मध्ये राजसहस्राणां पदा हन्याच्च संयुगे॥१७॥

तस्य तद्वचनं श्रुत्वा सोमदत्तस्य पार्थिव। एवमस्त्विति तत्रोक्त्वा
स देवोऽन्तरधीयत ॥ १८ ॥ स तेन वरदानेन लब्धवान् भूरि-
दक्षिणम्। न्यपातयच्च समरे सौमदत्तिः शिनेः सुतम् ॥ १९ ॥
पश्यतां सर्वसैन्यानां पदा चैनमताड़यत्। एतत्ते कथितं राजन्
यन्मां त्वं परिपृच्छसि ॥ २० ॥ न च शक्यो रणे जेतुं सात्वतो
मनुजर्षभैः। लब्धलक्ष्याश्च सङ्ग्रामे बहवश्चित्रयोधिनः ॥ २१ ॥
देवदानवगन्धर्व्वा विजेतारो ह्यविस्मिताः। स्ववीर्य्यविजये युक्ता
नैते परपरिग्रहाः ॥ २२ ॥ न तुल्यं वृष्णिभिरिह दृश्यते किञ्चन
प्रभो। भूतं भव्यं भविष्यच्च बलेन भरतर्षभ ॥ २३ ॥ न ज्ञाति-
मवमन्यन्ते वृद्धानां शासने रताः। न देवासुरगन्धर्व्वा न यक्षो-
रगराक्षसाः ॥ २४ ॥ जेतारो वृष्टिवीराणां किं पुनर्मानुषा
रणे। ब्रह्मद्रव्ये गुरुद्रव्ये ज्ञातिद्रव्येऽप्यहिंसकाः ॥ २५ ॥ एतेषां
रक्षितारश्च ये स्युः कस्याञ्चिदापदि। अर्थवन्तो न चोत्सिक्ता
ब्रह्मण्याः सत्यवादिनः ॥ २६ ॥ समर्थानपि मन्यन्ते दीनानभ्युद्ध-
रन्ति च। नित्यं देवपरा दान्ता दातारश्चाविकत्थनाः ॥ २७ ॥
तेन वृष्टिप्रवीराणां चक्रं न प्रतिहन्यते। अपि मेरुं वहेत्कश्चित्
तरेद्वा मकरालयम् ॥ २८ ॥ न तु वृष्णिप्रवीराणां समेत्यान्तं
व्रजेन्नृपः। एतत्ते सर्वमाख्यातं यत्र तो संशयो विभो। कुरु-
राज नरश्रेष्ठ तव ह्यपनयो महान् ॥ २९ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि सात्यकिप्रशंसायां
चतुश्चत्वारिंशदधिकशततोऽध्यायः ॥ १४४ ॥

---

धृतराष्ट्र उवाच। तदवस्थे हते तस्मिन् भूरिश्रवसि कौरवे।
यथा भूयोऽभवद्युद्धं तन्ममाचक्ष्व सञ्जय ॥ १ ॥

सञ्जय उवाच। भूरिश्रवसि संक्रान्ते परलोकाय भारत।

वासुदेवं महाबाहुरर्जुनः समचूचुदत् ॥ २ ॥ चोदयाश्वान् भृशं कृष्ण यतो राजा जयद्रथः । प्रतिज्ञां सफलाञ्चापि कर्त्तुमर्हसि मेऽनघ ॥ ३ ॥ अस्तमेति महाबाहो त्वरमाणो दिवाकरः । एतद्धि पुरुषव्याघ्र महदभ्युदितं मया ॥ ४ ॥ कार्य्यं संरक्ष्यते चैष कुरुसेनामहारथैः । नास्तमेति यथा सूर्य्यो यथा सत्यं भवेद्वचः ॥ ५ ॥ चोदयाश्वांस्तथा कृष्ण यथा हन्यां जयद्रथम् । ततः कृष्णो महाबाहुरजतप्रतिमान् हयान् ॥ ६ ॥ हयज्ञस्चोदयामास जयद्रथरथं प्रति । तं प्रयान्तममोघेषुमुत्पतद्भिरिवाशुगैः ॥ ७ ॥ त्वरमाणो महाराज सेनामुख्याः समाव्रजन् । दुर्य्योधनश्च कर्णश्च वृषसेनोऽथ मद्रराट् ॥ ८ ॥ अश्वत्थामा कृपश्चैव स्वयमेव च सैन्धवः । समासाद्य तु बीभत्सुः सैन्धवं प्रमुखे स्थितम् ॥ ९ ॥ नेत्राभ्यां क्रोधदीप्ताभ्यां संप्रैक्षन्निर्द्दहन्निव । ततो दुर्य्योधनो राजा राधेयं त्वरितोऽब्रवीत् ॥ १० ॥ अर्जुनं वीक्ष्य संयातं जयद्रथवधं प्रति । उवाच राजन् पुत्रस्ते कर्णं राजा सुयोधनः ॥ ११ ॥ अयं स वैकर्त्तन युद्धकालो प्रदर्शय स्वात्मबल महात्मन् । यथा न वध्येत रणेऽर्जुनेन जयद्रथः कर्ण तथा कुरुष्व ॥ १२ ॥ अल्पावशिष्टं दिवसं नृवीर विघातयस्वाद्य रिपुं शरौघैः । दिनक्षयम्प्राप्य नरप्रवीर ध्रुवं हि नः कर्ण जयो भविष्यति ॥ १३ ॥ सैन्धवे रक्ष्यमाणे तु सूर्य्यस्यास्तमनं प्रति । मिथ्याप्रतिज्ञः कौन्तेयः प्रवेक्ष्यति हुताशनम् ॥ १४ ॥ अनर्ज्जुनायाञ्च भुवि मुहूर्त्तमपि मानद । जीवितुं नोत्सहेरन् वै भ्रातरोऽस्य सहानुगाः ॥ १५ ॥ विनष्टैः पाण्डवेयैश्च सशैलवनकाननम् । वसुन्धरामिमां कर्ण भोक्ष्यामो हतकण्टकाम् ॥ १६ ॥ दैवेनोपहतः पार्थो विपरीतश्च मानद । कार्य्याकार्य्यमजानन् यः प्रतिज्ञां कृतवान्रणे ॥ १७ ॥ नूनमात्मविनाशाय पाण्डवेन किरीटिना । प्रतिज्ञेयं कृता कर्ण जयद्रथवधं प्रति ॥ १८ ॥ कथं जीवति

दुर्द्धर्षं त्वयि राधेय फाल्गुनः। अनस्तं गत आदित्ये हन्यात् सैन्धवकं नृपम् ॥ १९ ॥ रक्षितं मद्रराजेन कृपेण च महात्मना। जयद्रथं रणमुखे कथं हन्याद्धनञ्जयः ॥ २० ॥ द्रौणिना रक्ष्यमाणञ्च मया दुःशासनेन च। कथं प्राप्स्यति वीभत्सुः सैन्धवं कालचोदितः ॥ २१ ॥ युध्यन्ते बहवः शूरा लम्बते च दिवाकरः। शङ्के जयद्रथं पार्थो नैव प्राप्स्यति मानद ॥ २२ ॥ स त्वं कर्ण मया सार्द्धं शूरैश्चान्यैर्महारथैः। द्रौणिना त्वं हि सहितो मद्रेशेन कृपेण च ॥ २३ ॥ युध्यस्व यत्नमास्थाय परं पार्थेन संयुगे। एवमुक्तस्तु राधेयस्तव पुत्रेण मारिष ॥ २४ ॥ दुर्य्योधनमिदं वाक्यं प्रत्युवाच कुरूत्तमम्। दृढ़लक्षेण शूरेण भीमसेनेन धन्विना ॥ २५ ॥ भृशं भिन्नतनुः सङ्ख्ये शरजालैरनेकशः। स्थातव्यमिति तिष्ठामि रणे सम्प्रति मानद ॥ २६ ॥ नाङ्गमिङ्गति किञ्चिन्मे सन्तप्तस्य महेषुभिः। योत्स्यामि तु यथाशक्त्या त्वदर्थं जीवितं मम ॥ २७ ॥ यथा पाण्डवमुख्योऽसौ न हनिष्यति सैन्धवम्। न हि मे युध्यमानस्य सायकानस्यतः शितान् ॥ २८ ॥ सैन्धवं प्राप्स्यते वीरः सव्यसाची धनञ्जयः। यत्तु भक्तिमता कार्य्यं सततं हितकाङ्क्षिणा ॥ २९ ॥ तत् करिष्याम्यद्य कौरव्य जयो दैवे प्रतिष्ठितः। सैन्धवार्थे परं यत्नं करिष्याम्यद्य संयुगे ॥ ३० ॥ त्वत्प्रियार्थं महाराज जयो दैवे प्रतिष्ठितः। अद्य योत्स्येऽर्जुनमहं पौरुषं स्वमुपाश्रितः ॥ ३१ ॥ त्वदर्थं पुरुषव्याघ्र जयो दैवे प्रतिष्ठितः। अद्य युद्धं कुरुश्रेष्ठ मम पार्थस्य चोभयोः ॥ ३२ ॥ पश्यन्तु सर्वसैन्यानि दारुणं लोमहर्षणम्। कर्णकौरवयोरेवं रणे सम्भाषमाणयोः ॥ ३३ ॥ अर्जुनो निशितैर्बाणैर्जघान तव वाहिनीम्। चिच्छेद निशितैर्भल्लैः शूराणामनिवर्त्तिनाम् ॥ ३४ ॥ भुजान् परिघसङ्काशान् हस्तिहस्तोपमान् रणे। शिरांसि च महाबाहुश्चिच्छेद निशितैः शरैः ॥३५॥

हस्तिहस्तान् हयग्रीवान् रथाङ्गांश्च समन्ततः। शोणिताक्तान् हयारोहान् गृहीतप्रासतोमरान् ॥ ३६ ॥ क्षुरैश्चिच्छेद बीभत्सुर्द्विधैकैकं त्रिधैव च। हया वारणमुख्याश्च प्रापतन्त समन्ततः ॥ ३७ ॥ ध्वजांश्छत्राणि चापानि चामराणि शिरांसि च। कक्षमग्निरिवोद्भूतः प्रदहंस्तव वाहिनीम् ॥ ३८ ॥ अचिरेण महीं पार्थश्चकार रुधिरोत्तराम्। हतभूयिष्ठयोधन्तत् कृत्वा तत्र बलं बली ॥ ३९ ॥ आससाद दुराधर्षः सैन्धवं सत्यविक्रमः। बीभत्सुर्भीमसेनेन सात्वतेन च रक्षितः ॥ ४० ॥ प्रबभौ भरतश्रेष्ठ ज्वलन्निव हुताशनः। तं तथावस्थितं दृष्ट्वा त्वदीया वीर्य्यसम्पदा ॥ ४१ ॥ नामृष्यन्त महेष्वासाः फाल्गुनं पुरुषर्षभाः। दुर्य्योधनश्च कर्णश्च वृषसेनोऽथ मद्रराट् ॥ ४२ ॥ अश्वत्थामा कृपश्चैव स्वयमेव च सैन्धवः। संरब्धाः सैन्धवस्यार्थे समावृण्वन् किरीटिनम् ॥ ४३ ॥ नृत्यन्तं रथमार्गेषु धनुर्ज्यातलनिस्वनैः। सङ्ग्रामकोविदं पार्थं सर्वे युद्धविशारदाः ॥ ४४ ॥ अभीताः पर्य्यवर्त्तन्त व्यादितास्यमिवान्तकम्। सैन्धवं पृष्ठतः कृत्वा जिघांसन्तोऽर्जुनाच्युतौ ॥ ४५ ॥ सूर्य्यास्तमनमिच्छन्तो लोहितायति भास्करे। ते भुजैर्भोगिभोगाभैर्धनूंष्यानम्य सायकान् ॥ ४६ ॥ मुमुचुः सूर्य्यरश्मिग्रामाञ्छतशः फाल्गुनं प्रति। तानस्तानस्यमानांश्च किरीटी युद्धदुर्मदः ॥ ४७ ॥ द्विधा त्रिधाष्टधैकैकं छित्त्वा विव्याध तान्रणे। सिंहलाङ्गूलकेतुस्तु दर्शयञ्छक्तिमात्मनः ॥ ४८ ॥ शारद्वतीसुतो राजन्नर्जुनं प्रत्यवारयत्। स विद्धा दशभिः पार्थं वासुदेवञ्च सप्तभिः ॥ ४९ ॥ अतिष्ठद्रथमार्गेषु सैन्धवं परिपालयन्। अथैनं कौरवश्रेष्ठाः सर्वे एव महारथाः ॥ ५० ॥ महता रथसङ्घेन सर्वतः पर्य्यवारयन्। विस्फारयन्तश्चापानि विसृजन्तश्च सायकान् ॥ ५१ ॥ सैन्धवं पर्य्यरक्षन्त शासनात्तनयस्य ते। तत्र पार्थस्य शूरस्य बाह्वोर्बलमदृश्यत ॥ ५२ ॥ दृषूणामक्षयत्वञ्च धनुषो

गाण्डीवस्य च। अस्त्रैरस्त्राणि संवार्य्य द्रौणेः शारद्वतस्य च
॥ ५३ ॥ एकैकं नवभिर्बाणैः सर्व्वानेव समार्पयत्। तं द्रौणिः
पञ्चविंशत्या वृषसेनश्च सप्तभिः ॥ ५४ ॥ दुर्य्योधनस्तु विंशत्या
कर्णशल्यौ त्रिभिस्त्रिभिः। त एनमभिगर्ज्जन्तो विध्यन्तश्च पुनः पुनः
॥ ५५ ॥ विधुन्वन्तश्च चापानि सर्व्वतः पर्य्यवारयन्। श्लिष्टञ्च
सर्व्वतश्चक्रू रथमण्डलमाशु ते ॥ ५६ ॥ सूर्य्यास्तमनमिच्छन्तस्त्वर-
माणा महारथाः। त एतमभिनर्द्दन्तो विधुन्वाना धनूंषि च ॥५७॥
सिषिचुर्म्मार्गणैस्तीक्ष्णैर्गिरिं मेघा इवाम्बुभिः। ते महास्त्राणि
दिव्यानि तत्र राजन् व्यदर्शयन् ॥ ५८ ॥ धनञ्जयस्य गात्रे तु
शूराः परिघबाहवः। हतभूयिष्ठयोधं तत्कृत्वा तव बलं बली
॥ ५९ ॥ आससाद सुदुर्द्धर्षः सैन्धवं सत्यविक्रमः। तं कर्णः
संयुगे राजन् प्रत्यवारयदाशुगैः ॥ ६० ॥ मिषतो भीमसेनस्य
सात्वतस्य च भारत। तं पार्थो दशभिर्बाणैः प्रत्यविध्यद्रणाजिरे
॥ ६१ ॥ सूतपुत्रं महाबाहुः सर्व्वसैन्यस्य पश्यतः। सात्वतस्तु
त्रिभिर्बाणैः कर्णं विव्याध मारिष ॥ ६२ ॥ भीमसेनस्त्रिभिश्चैव
पुनः पार्थश्च सप्तभिः। तान् कर्णः प्रतिविव्याध षष्ट्या षष्ट्या
महारथः ॥ ६३ ॥ तद्युद्धमभवद्राजन् कर्णस्य बहुभिः सह।
तत्राद्भुतमपश्याम सूतपुत्रस्य मारिष ॥ ६४ ॥ यदेकः समरे
क्रुद्धस्त्रीन्रथान् पर्य्यवारयत्। फाल्गुनस्तु महाबाहुः कर्णं वैक-
र्त्तनं मृधे ॥ ६५ ॥ सायकानां शतेनैव सर्व्वमर्म्मस्वताड़यत्।
रुधिरोक्षितसर्व्वाङ्गः सूतपुत्रः प्रतापवान् ॥ ६६ ॥ शरैः पञ्चाशता
वीरः फाल्गुनं प्रत्यविध्यत। तस्य तल्लाघवं दृष्ट्वा नामृष्यत रणे-
ऽर्ज्जुनः ॥ ६७ ॥ तस्य पार्थो धनुश्छित्त्वा विव्याधैनं स्तनान्तरे।
सायकैर्नवभिर्वीरस्त्वरमाणो धनञ्जयः ॥ ६८ ॥ वधार्थं तस्य
समरे सायकं सूर्य्यवर्च्चसम्। चिक्षेप त्वरया युक्तस्त्वराकाले
धनञ्जयः ॥ ६९ ॥ तमापतन्तं वेगेन द्रौणिश्चिच्छेद सायकम्।

अर्द्धचन्द्रेण तीक्ष्णेन स छिन्नः प्रापतद्भुवि ॥ ७० ॥ अथान्यद्धनुरादाय सूतपुत्रः प्रतापवान् । सायकैर्बहुसाहस्रैश्छादयामास पाण्डवम् ॥ ७१ ॥ तां शस्त्रवृष्टिमतुलां कर्णचापसमुत्थिताम् । व्यधमत् सायकैः पार्थः शलभानिव मारुतः ॥ ७२ ॥ छादयामास च तदा सायकैरर्जुनो रणे । पश्यतां सर्वयोधानां दर्शयन् पाणिलाघवम् ॥ ७३ ॥ कर्णोऽपि द्विषतां हन्ता छादयामास फाल्गुनम् । सायकैर्बहुसाहस्रैः कृतप्रतिकृतेप्सया ॥ ७४ ॥ तौ वृषाविव नर्द्दन्तौ नरसिंहौ महारथौ । सायकैश्च प्रतिच्छन्नं चक्रतुः खमजिह्मगैः ॥ ७५ ॥ अदृश्यौ च शरौघैस्तौ निघ्नतामितरेतरम् । पार्थोऽहमस्मि तिष्ठेह कर्णोऽहं तिष्ठ फाल्गुन ॥ ७६ ॥ इत्येवं तर्ज्जमानौ तु वाक्शल्यैस्तुदतां तदा । युध्येतां समरे वीरौ चित्रं लघु च सुष्ठु च ॥ ७७ ॥ प्रेक्षणीयावभवतां सर्वयोधसमागमे । प्रशस्यमानौ समरे सिद्धचारणवातिकैः ॥ ७८ ॥ अयुध्येतां महाराज परस्परवधैषिणौ । ततो दुर्य्योधनो राजंस्तावकानभ्यभाषत ॥ ७९ ॥ यत्नाद्रक्षत राधेयं नाहत्वा समरेऽर्जुनम् । निवर्त्तिष्यति राधेय इति मामुक्तवान् वृषः ॥ ८० ॥ एतस्मिन्नन्तरे राजन् दृष्ट्वा कर्णस्य विक्रमम् । आकर्णमुक्तैरिषुभिः कर्णस्य चतुरोहयान् ॥ ८१ ॥ अनयन्मृत्युलोकाय चतुर्भिः श्वेतवाहनः । सारथिञ्चास्य भल्लेन रथनीडादपाहरत् ॥ ८२ ॥ छादयामास च शरैस्तव पुत्रस्य पश्यतः । स छाद्यमानः समरे हताश्वो हतसारथिः ॥ ८३ ॥ मोहितः शरजालेन कर्त्तव्यं नाभ्यपद्यत । तं तथा विरथं दृष्ट्वा रथमारोप्य तं तदा ॥ ८४ ॥ अश्वत्थामा महाराज भूयोऽर्जुनमयोधयत् । मद्रराजस्तु कौन्तेयमविध्यत्त्रिंशता शरैः ॥ ८५ ॥ शारद्वतस्तु विंशत्या वासुदेवं समार्पयत् । धनञ्जयं द्वादशभिराजघान शिलीमुखैः ॥ ८६ ॥ चतुर्भिः सिन्धुराजश्च वृषसेनश्च सप्तभिः । पृथक् पृथक् महाराज कृष्ण-

पार्थाववविध्यताम् ॥ ८७ ॥ तथैव तान् प्रत्यविध्यत् कुन्तीपुत्रो धनञ्जयः। द्रोणपुत्रं चतुःषष्ट्या मद्रराजं शतेन च ॥ ८८ ॥ सैन्धवं दशभिर्भल्लैर्वृषसेनं त्रिभिः शरैः। शारद्वतञ्च विंशत्या विद्धा पार्थः समुन्नदन् ॥ ८९ ॥ ते प्रतिज्ञाप्रतीघातमिच्छन्तः सव्यसाचिनः। रोषितास्तावकास्तूर्णमभिपेतुर्धनञ्जयम् ॥ ९० ॥ अथार्जुनः सर्वतो वारुणास्त्रं प्रादुश्चक्रे त्रासयन् धार्त्तराष्ट्रान्। तं प्रत्यदीयुः कुरवः पाण्डुसूनुं रथैर्महार्हैः शरवर्षाण्यवर्षन् ॥ ९१ ॥ ततस्तु तस्मिंस्तुमुले समुत्थिते सुदारुणे भारत मोहनीये। नामुह्यत प्राप्य स राजपुत्रं किरीटमाली विसृजन् पृषत्कान् ॥ ९२ ॥ राज्यप्रेप्सुः सव्यसाची कुरूणां स्मरन् क्लेशान् द्वादशवर्षवृत्तान्। गाण्डीवमुक्तैरिषुभिर्महात्मा सर्वा दिशो व्यावृणोदप्रमेयः ॥ ९३ ॥ प्रदीप्तोल्कमभवच्चान्तरीक्षं देहेषु भूरीण्यपतन् वयांसि। यत् पिङ्गलज्येन किरीटमाली क्रुद्धो रिपूनाजगवेन हन्ति ॥ ९४ ॥ ततः किरीटी महता महायशाः शरासनेनास्य शराननीकजित्। हयप्रवेकोत्तमनागधूर्गतान् कुरुप्रवीरानिषुभिर्व्यपातयत् ॥ ९५ ॥ गदाश्च गुर्वीः परिघानयस्मयानसींश्च शक्तीश्च रणे नराधिपाः। महान्ति शस्त्राणि च भीमदर्शनाः प्रगृह्य पार्थं सहसाभिदुद्रुवुः ॥ ९६ ॥ ततो युगान्ताभ्रसमस्वनं महत् महेन्द्रचापप्रतिमं स गाण्डिवम्। चकर्ष दोर्भ्यां विहसन् भृशं ययौ दहंस्त्वदीयान् यमराष्ट्रवर्द्धनः ॥ ९७ ॥ स तानुदीर्णान् सरथान् सनागान् पदातिसङ्घांश्च धनुर्द्धरांश्च। विपन्नसर्वायुधजीवितान्रणे चकार वीरो यमराष्ट्रवर्द्धनान् ॥ ९८ ॥

इतिद्रोणपर्वणि जयद्रथवधपर्वणि सङ्कुलयुद्धे
पञ्चचत्वारिंशदधिकशतोऽध्यायः ॥ १४५ ॥

---

सञ्जय उवाच। श्रुत्वा निनादं धनुषश्च तस्य विसृष्टमुत्-क्रुष्टमिवान्तकस्य। शक्राशनिस्फोटसमं सुघोरं विकृष्यमाणस्य धनञ्जयेन॥ १॥ त्रासोद्विग्नं तदोद्भ्रान्तं त्वदीयं तद्बलं नृप। युगान्तवातसङ्क्षुब्धं चलद्वीचितरङ्गिणम्॥ २॥ प्रलीनमीनमकरं सागराम्भ इवाभवत्। स रणे व्यचरत् पार्थः प्रेक्षणीयो धन-ञ्जयः॥ ३॥ युगपद्दिक्षु सर्वासु चित्राण्यस्त्राणि दर्शयन्। आददानं महाराज सन्दधानञ्च पाण्डवम्॥ ४॥ उत्कर्षन्तं सृजन्तञ्च न स्म पश्याम लाघवात्। ततः क्रुद्धो महाबाहुरैन्द्रमस्त्रं दुरासदम्॥ ५॥ प्रादुश्चक्रे महाराज त्रासयन् सर्वभारतान्। ततः शराः प्रादुरासन् दिव्यास्त्रप्रतिमन्त्रिताः॥ ६॥ प्रदीप्ताश्च शिखिमुखाः शतशोऽथ सहस्रशः। आकर्णपूर्णनिर्मुक्तैरग्न्यर्कांशु-निभैः शरैः॥ ७॥ नाभोऽभवत् सुदुष्प्रेक्ष्यमुल्काभिरिव संवृतम्। ततः शरान्धकारं तत् कौरवैः समुदीरितम्॥ ८॥ अशक्यं मनसाप्यन्यैः पाण्डवः सम्भ्रमन्निव। नाशयामास विक्रम्य शरै-र्दिव्यास्त्रमन्त्रितैः॥ ९॥ नैशन्तमोंऽशुभिः क्षिप्रं दिनादाविव भास्करः। ततस्तु तावकं सैन्यं दीप्तैः शरगभस्तिभिः॥ १०॥ आक्षिपत् पल्वलाम्बूनि निदाघार्क इव प्रभुः। ततो दिव्यास्त्र-विदुषा प्रहिताः सायकांशवः॥ ११॥ समाप्लुवन् द्विषत्सैन्यं लोकं भानोरिवांशवः। तथा परे समुत्सृष्टा विशिखास्तिग्मतेजसः॥ १२॥ हृदयान्याशु वीराणां विविशुः प्रियबन्धुवत्। य एनमीयुः समरे त्वद्योधाः शूरमानिनः॥ १३॥ शलभा इव ते दीप्तमग्निं प्राप्य ययुः क्षयम्। एवं सम्मृद्नन् शत्रूणां जीवितानि यशांसि च॥ १४॥ पार्थश्चचार सङ्ग्रामे मृत्युर्विग्रहवानिव। सकिरीटानि वक्त्राणि साङ्गदान् विपुलान् भुजान्॥ १५॥ स कुण्डलयुगान् कर्णान् द्विषां निरहरच्छरैः। सतोमरान् गज-स्थानां सप्रासान् हयसादिनाम्॥ १६॥ सचर्मणः पदातीनां

रथिनाञ्च सधन्वनः। सप्रतोदान्नियन्तॄणां वाहूंश्चिच्छेद पाण्डवः ॥ १७ ॥ स दीप्ताग्रशरार्च्चिष्मान् बभौ तत्र धनञ्जयः। सविस्फुलिङ्गाग्रशिखो ज्वलन्निव हुताशनः ॥ १८ ॥ तं देवराजप्रतिमं सर्व्वशस्त्रभृतां वरम्। युगपर्द्दिक्षु सर्व्वासु रथस्थं पुरुषर्षभम् ॥ १९ ॥ निक्षिपन्तं महास्त्राणि प्रेक्षणीयं धनञ्जयम्। नृत्यन्तं रथमार्गेषु धनुर्ज्यातलनादितम् ॥ २० ॥ निरीक्षितुं न शेकुस्ते यत्नवन्तोऽपि पार्थिवाः। मध्यन्दिनगतं सूर्य्यं प्रतपन्तमिवाम्बरे ॥ २१ ॥ दीप्तोग्रसंभृतशरः किरीटी विरराज ह। वर्षास्विवोदीर्णजलः सेन्द्रधन्वाम्बुदो महान् ॥ २२ ॥ महास्त्रसंप्लवे तस्मिन् जिष्णुना सम्प्रवर्त्तिते। सुदुस्तरे महाघोरे ममज्जुर्योधपुङ्गवाः ॥ २३ ॥ उत्कृत्तवदनैर्द्देहैः शरीरैः क्षतवाहुभिः। भुजैश्च पाणिनिर्मुक्तैः पाणिभिर्व्यङ्गुलीकृतैः ॥ २४ ॥ कृत्ताग्रहस्तैः करिभिः कृत्तदन्तैर्मदोत्कटैः। हयैश्च विखुरग्रीवैरथैश्च शकलीकृतैः ॥ २५ ॥ निकृत्तान्त्रैः कृत्तपादैस्तथान्यैः कृत्तसन्धिभिः। निश्चेष्टैर्विस्फुरद्भिश्च शतशोऽथ सहस्रशः ॥ २६ ॥ मृत्योराघातललितं तत् पार्थायोधनं महत्। अपश्याम महीपाल भीरूणां भयवर्द्धनम् ॥ २७ ॥ आक्रीड़मिव रुद्रस्य पुराभ्यर्द्दयतः पशून्। गजानां क्षुरनिर्मुक्तैः करैः सभुजगेव भूः ॥ २८ ॥ क्वचिद्बभौ स्रग्विणीव वक्त्रपद्मैः समाचिता। विचित्रोष्णीषमुकुटैः केयूराङ्गदकुण्डलैः ॥ २९ ॥ स्वर्णचित्रतनुत्रैश्च भाण्डैश्च गजवाजिनाम्। किरीटशतसङ्कीर्णा तत्र तत्र समाचिता ॥ ३० ॥ विरराज भृशं चित्रा मही नववधूरिव। मज्जामेदःकर्द्दमिनीं शोणितौघतरङ्गिणीम् ॥ ३१ ॥ मर्मास्थिभिरगाधाञ्च केशशैवलशाद्वलाम्। शिरोवाहूपलतटां रुग्णक्रोड़ास्थिसङ्कटाम् ॥ ३२ ॥ चित्रध्वजपताकाढ्यां छत्रचापोर्म्मिमालिनीम्। विगतासुमहाकायां गजदेहाभिसङ्कुलाम् ॥ ३३ ॥ रथोड़ुपशताकीर्णां हयसङ्घातरोधसम्।

रथचक्रयुगीषाक्षकूबरैरतिदुर्गमाम् ॥ ३४ ॥ प्रासासिशक्तिपरशु-
विशिखाहिदुरासदाम् । बलकङ्कमहानक्रां गोमायुमकरोत्-
कटाम् ॥ ३५ ॥ गृध्रोदग्रमहाग्राहां शिवाभिरुतभैरवाम् । नृत्यत्
प्रेतपिशाचाद्यैर्भूताकीर्णां सहस्रशः ॥ ३६ ॥ गतासुयोधनिश्चेष्ट-
शरीरशतवाहिनीम् । महाप्रतिभयां रौद्रां घोरां वैतरणीमिव
॥ ३७ ॥ नदीं प्रवर्त्तयामास भीरूणां भयवर्द्धिनीम् । तं दृष्ट्वा
तस्य विक्रान्तमन्तकस्येव रूपिणः ॥ ३८ ॥ अभूतपूर्वं कुरुषु
भयमागाद्रणाजिरे । तत आदाय वीराणामस्त्रैरस्त्राणि पाण्डवः
॥ ३९ ॥ आत्मानं रौद्रमाचष्ट रौद्रकर्मणि धिष्ठितः । ततो
रथवरान्राजन्नत्यक्रामदर्जुनः ॥ ४० ॥ मध्यन्दिनगतं सूर्य्यं
प्रतपन्तमिवाम्बरे । न शेकुः सर्वभूतानि पाण्डवं प्रतिवीक्षितुम्
॥ ४१ ॥ प्रसृतान् तस्य गाण्डीवाच्छरव्रातान्महात्मनः । संग्रामे
सम्प्रपश्यामो हंसपङ्क्तीरिवाम्बरे ॥ ४२ ॥ विनिवार्य्य स
वीराणामस्त्रैरस्त्राणि सर्वशः । दर्शयन् रौद्रमात्मानमुग्रेकर्मणि
धिष्ठितः ॥ ४३ ॥ स तान् रथवरान् राजन्नत्यक्रामत्तदार्जुनः ।
मोहयन्निव नाराचैर्जयद्रथवधेप्सया ॥ ४४ ॥ विसृजन् दिक्षु
सर्वासु शरानसितसारथिः । स रणे व्यचरत्तूर्णं प्रेक्षणीयो
धनञ्जयः ॥ ४५ ॥ भ्रमन्त इव शूरस्य शरव्राता महात्मनः ।
अदृश्यन्तान्तरीक्षस्थाः शतशोऽथ सहस्रशः ॥ ४६ ॥ आददानं
महेष्वासं सन्दधानञ्च पाण्डवम् । विसृजन्तन्तु कौन्तेयं नानु-
पश्यामहे तदा ॥ ४७ ॥ तथा सर्वा दिशो राजन् सर्वांश्च रथिनो
रणे । आकुलीकृत्य कौन्तेयो जयद्रथमुपाद्रवत् ॥ ४८ ॥ विव्याध
च चतुःषष्ट्या शराणां नतपर्वणाम् । सैन्धवाभिमुखं यान्तं योधाः
समीक्ष्य पाण्डवम् ॥ ४९ ॥ न्यवर्त्तन्त रणाद्वीरा निराशास्तस्य
जीविते । यो योऽभ्यधावदाक्रन्दे तावकः पाण्डवं रणे ॥ ५० ॥
तस्य तस्यान्तगो बाणः शरीरे न्यपतत् प्रभो । कबन्धसङ्कुलञ्चक्रे

तव सैन्यं महारथः ॥ ५१ ॥ अर्ज्जुनो जयतां श्रेष्ठः शरैरग्नंशुसन्निभैः। एवं तत्तव राजेन्द्र चतुरङ्गबलं तदा ॥ ५२ ॥ आकुलीकृत्य कौन्तेयो जयद्रथमुपाद्रवत्। द्रौणिं पञ्चाशताविध्यद्वृषसेनं त्रिभिः शरैः ॥ ५३ ॥ कृपायमाणः कौन्तेयः कृपन्नवभिरार्द्दयत्। शल्यं षोड़शभिर्व्वाणैः कर्णं द्वाविंशता शरैः ॥ ५४ ॥ सैन्धवञ्च चतुःषष्ट्या विद्धा सिंह इवानदत्। सैन्धवस्तु तदा विद्धः शरैर्गाण्डीवधन्वना ॥ ५५ ॥ न चक्षमे सुसंक्रुद्धस्तोत्रार्द्दित इव द्विपः। स वराहध्वजस्तूर्णं गार्द्धपत्रानजिह्मगान् ॥ ५६ ॥ क्रुद्धाशीविषसङ्काशान् कर्म्मारपरिमार्ज्जितान्। आकर्णपूर्णांश्चिक्षेप फाल्गुनस्य रथं प्रति ॥ ५७ ॥ त्रिभिस्तु विद्धा गोविन्दं नाराचैः षड्भिरर्ज्जुनम्। अष्टाभिर्व्वाजिनोऽविध्यद्ध्वजञ्चैकेन पत्रिणा ॥ ५८ ॥ स विक्षिप्यार्ज्जुनस्तीक्ष्णान् सैन्धवप्रहिताञ्छरान्। युगपत्तस्य चिच्छेद शराभ्यां सैन्धवस्य च ॥ ५९ ॥ सारथेश्च शिरः कायात् ध्वजञ्च समलङ्कृतम्। स छिन्नयष्टिः सुमहान्शीर्य्यमाणः शराहतः ॥ ६० ॥ वराहः सिन्धुराजस्य पपाताग्निशिखोपमः। एतस्मिन्नेव काले तु द्रुतं गच्छति भास्करे ॥ ६१ ॥ अब्रवीत् पाण्डवं तत्र त्वरमाणो जनार्द्दनः। एष मध्ये कृतः षड्भिः पार्थ वीरैर्महारथैः ॥ ६२ ॥ जीवितेप्सुर्महाबाहो भीतस्तिष्ठति सैन्धवः। एताननिर्ज्जित्य रणे षड्रथान् पुरुषर्षभ ॥ ६३ ॥ न शक्यः सैन्धवो हन्तुं यत्तो निर्व्याजमर्ज्जुन। योगमत्र विधास्यामि सूर्य्यस्यावरणं प्रति ॥ ६४ ॥ अस्तं गत इति व्यक्तं द्रक्ष्यत्येकः स सिन्धुराट्। हर्षेण जीविताकाङ्क्षी विनाशार्थं तव प्रभो ॥ ६५ ॥ न गोप्स्यति दुराचारः स आत्मानं कथञ्चन। तत्र छिद्रे प्रहर्त्तव्यं त्वयास्य कुरुसत्तम ॥ ६६ ॥ व्यपेक्षा नैव कर्त्तव्या गतोऽस्तमिति भास्करः। एवमस्त्विति वीभत्सुः केशवं प्रत्यभाषत ॥ ६७ ॥ ततोऽसृजत्तमः कृष्णः सूर्य्यस्यावरणं प्रति। योगी योगेन संयुक्तो योगिनामीश्वरो हरिः ॥ ६८ ॥

सृष्टे तमसि कृष्णेन गतोऽस्तमिति भास्करः। त्वदीया जहृषु-र्योधाः पार्थनाशान्नराधिप ॥ ६९ ॥ ते प्रहृष्टा रणे राजन्नाप-श्यन् सैनिका रविम्। उन्नाम्य वक्त्राणि तदा स च राजा जय-द्रथः ॥ ७० ॥ वीक्षमाणे ततस्तस्मिन् सिन्धुराजे दिवाकरम्। पुनरेवाब्रवीत् कृष्णो धनञ्जयमिदं वचः ॥ ७१ ॥ पश्य सिन्धुपतिं वीरं प्रेक्षमाणं दिवाकरम्। भयं हि विप्रमुच्यैतत्त्वत्तो भरत-सत्तम ॥ ७२ ॥ अयं कालो महाबाहो वधायास्य दुरात्मनः। छिन्धि मूर्द्धानमस्याशु कुरु साफल्यमात्मनः। ७३ ॥ इत्येवं केशवे-नोक्तः पाण्डुपुत्रः प्रतापवान्। न्यवधीत्तावकं सैन्यं शरैरर्काग्नि-सन्निभैः ॥ ७४ ॥ कृपं विव्याध विंशत्या कर्णं पञ्चाशता शरैः। शल्यं दुर्य्योधनञ्चैव षड्भिः षड्भिरताड़यत् ॥ ७५ ॥ वृषसेनं तथाष्टाभिः षष्ट्या सैन्धवमेव च। तथैव च महाबाहुस्त्वदीयान् पाण्डुनन्दनः ॥ ७६ ॥ गाढं विद्धा शरैराजन् जयद्रथमुपाद्रवत्। तं समीपस्थितं दृष्ट्वा लेलिहानमिवानलम् ॥ ७७ ॥ जयद्रथस्य गोप्तारः संशयं परमं गताः। ततः सर्व्वे महाराज तव योधा जयैषिणः ॥ ७८ ॥ सिषिचुः शरधाराभिः पाकशासनिमाहवे। सञ्छाद्यमानः कुरुनन्दनः। ततः शरमयं जालं तुमुलं पाक-शासनिः ॥ ८० ॥ व्यसृजत् पुरुषव्याघ्रस्तव सैन्यजिघांसया। ते हन्यमाना वीरेण योधा राजन्रणे तव ॥ ८१ ॥ प्रजह्रुः सैन्धवं भीता द्वौ समं नाप्यधावताम्। तत्राद्भुतमपश्याम कुन्तीपुत्रस्य विक्रमम् ॥ ८२ ॥ तादृग्नभावी भूतो वा यच्चकार महायशाः। द्विपान् द्विपगतांश्चैव हयान् हयगतानपि ॥ ८३ ॥ तथा सार-थिनश्चैव न्यहन् रुद्रः पशूनिव। न तत्र समरे कश्चिन्मया दृष्टो नराधिप ॥ ८४ ॥ गजो वाजी नरो वापि यो न पार्थशराहतः। रजसा तमसा चैव योधाः सञ्छन्नचक्षुषः ॥ ८५ ॥ कश्मलं

प्राविशन् घोरं नान्वजानन् परस्परम्। ते शरैर्भिन्नमर्माणः सैनिकाः कालचोदिताः॥ ८६॥ बभ्रमुश्चस्खलुः पेतुः सेदुर्मम्लुश्च भारत। तस्मिन् महाभीषणके प्रजानामिव सङ्क्षये॥ ८७॥ रणे महति दुष्पारे वर्त्तमाने सुदारुणे। शोणितस्य प्रसेकेन शीघ्रत्वादनिलस्य च॥ ८८॥ अशाम्यत्तद्रजो भौममसृक्‌सिक्ते धरातले। आनाभि निरमज्जंश्च रथचक्राणि शोणितैः॥ ८९॥ मग्ना वेगवतो राजंस्तावकानां रणाङ्गणे। हस्तिनश्च हतारोहा दारिताङ्गाः सहस्रशः॥ ९०॥ स्वान्यनीकानि मृद्नन्त आर्त्तनादाः प्रदुद्रुवुः। हयाश्च पतितारोहाः पत्तयश्च नराधिप॥ ९१॥ प्रदुद्रुवुर्भयाद्राजन् धनञ्जयशराहताः। मुक्तकेशा विकवचाः क्षरन्तः क्षतजं क्षतैः॥ ९२॥ प्रपलायन्त सन्त्रस्तास्त्यक्त्वा रणशिरो जनाः। ऊरुग्राहगृहीताश्च केचित्तत्राभवन् भुवि॥ ९३॥ हतानाञ्चापरे मध्ये द्विरदानां निलिल्यिरे। एवं तव बलं राजन् द्रावयित्वा धनञ्जयः॥ ९४॥ न्यवधीत् सायकैर्घोरैः सिन्धुराजस्य रक्षिणः। कर्णं द्रौणिं कृपं शल्यं वृषसेनं सुयोधनम् ॥ ९५॥ छादयामास तीव्रेण शरजालेन पाण्डवः। न गृह्णन्नक्षिपन्राजन्न मुञ्चन्नापि सन्दधन्॥ ९६॥ अदृश्यतार्ज्जुनः सङ्ख्ये शीघ्रास्त्रत्वात् कथञ्चन। धनुर्मण्डलमेवास्य दृश्यतेऽस्यास्यतः सदा॥ ९७॥ सायकाश्च व्यदृश्यन्त निश्चरन्तः समन्ततः। कर्णस्य तु धनुश्छित्वा वृषसेनस्य चैव ह॥ ९८॥ शल्यस्य सूतं भल्लेन रथनीड़ादपातयत्। गाढ़विद्धावुभौ कृत्वा शरैः स्वस्रीयमातुलौ॥ ९९॥ अर्ज्जुनो जयतां श्रेष्ठो द्रौणिशारद्वतौ रणे। एवं तान् व्याकुलीकृत्य त्वदीयानां महारथान्॥ १००॥ जग्राह शरं घोरं पाण्डवोऽनलसन्निभम्। इन्द्राशनिसमप्रख्यं दिव्यमन्त्राभिमन्त्रितम्॥ १०१॥ सर्वभारसहं शश्वत् गन्धमाल्यार्च्चितं महत्। वज्रेणास्त्रेण संयोज्य विधिवत् कुरुनन्दनः॥ १०२॥ समा-

दधन्महावाहुर्गाण्डीवे क्षिप्रमर्जुनः। तस्मिन् सन्धीयमाने तु शरे ज्वलनतेजसि ॥ १०३ ॥ अन्तरीक्षे महानादो भूतानामभवन्नृप। अब्रवीच्च पुनस्तत्र त्वरमाणो जनार्द्दनः ॥ १०४ ॥ धनञ्जय शिरश्छिन्धि सैन्धवस्य दुरात्मनः। अस्तं महीधरं श्रेष्टं यियासति दिवाकरः ॥ १०५ ॥ शृणुष्वैव च मे वाक्यं जयद्रथवधं प्रति। वृद्धक्षत्रः सैन्धवस्य पिता जगति विश्रुतः ॥ १०६ ॥ स कालेनेह महता सैन्धवं प्राप्तवान् सुतम्। जयद्रथममित्रघ्नं वागुवाचाशरीरिणी ॥ १०७ ॥ नृपमन्तर्हिता वाणी मेघदुन्दुभिनिस्वना। तवात्मजोऽयं मर्त्येषु कुलशीलदमादिभिः ॥ १०८ ॥ गुणैर्भविष्यति विभो सदृशो वंशयोर्द्वयोः क्षत्रियप्रवरो लोके नित्यं शूराभिसत्कृतः ॥ १०९ ॥ किन्त्वस्य युद्धमानस्य सङ्ग्रामे क्षत्रियर्षभः। शिरश्छेत्स्यति संक्रुद्धः शत्रुरालक्षितो भुवि ॥ ११० ॥ एतच्छ्रुत्वा सिन्धुराजो ध्यात्वा चिरमरिन्दमः। ज्ञातीन् सर्वानुवाचेदं पुत्रस्नेहाभिपीड़ितः ॥ १११ ॥ सङ्ग्रामे युध्यमानस्य वहतो महतीं धुरम्। धरण्यां मम पुत्रस्य पातयिष्यति यः शिरः ॥ ११२ ॥ तस्यापि शतधा मूर्द्धा फलिष्यति न संशयः। एवमुक्त्वा ततो राज्ये स्थापयित्वा जयद्रथम् ॥ ११३ ॥ वृद्धक्षत्रो वनं यातस्तपश्चेष्टं समास्थितः। सोऽयं तप्यति तेजस्वी तपो घोरं दुरासदम् ॥ ११४ ॥ समन्तपञ्चकादस्माद्बहिर्वानरकेतन। तस्माज्जयद्रथस्य त्वं शिरश्छित्वा महामृधे ॥ ११५ ॥ दिव्येनास्त्रेण रिपुहन् घोरेणाद्भुतकर्मणा। सकुण्डलं सिन्धुपतेः प्रभञ्जनसुतानुज ॥ ११६ ॥ उत्सङ्गे पातयाशु वृद्धक्षत्रस्य भारत। अथ त्वमस्य मूर्द्धानं पातयिष्यसि भूतले ॥ ११७ ॥ तवापि शतधा मूर्द्धा फलिष्यति न संशयः। यथा चैतन्नजानीयात् स राजा पृथिवीपतिः ॥ ११८ ॥ तथा कुरु कुरुश्रेष्ठ दिव्यमस्त्रमुपाश्रितः। न ह्यसाध्यमकार्य्यं वा विद्यते तव किञ्चन ॥ ११९ ॥ समस्तेष्वपि लोकेषु त्रिषु वासव-

नन्दन। एतच्छ्रुत्वा तु वचनं सृक्किणी परिसंलिहन् ॥ १२० ॥ इन्द्राशनिसमस्पर्शं दिव्यं मन्त्राभिमन्त्रितम्। सर्वभारसहं शश्वद्गन्धमाल्यार्च्चितं शरम् ॥ १२१ ॥ विससर्ज्जार्जुनस्तूर्णं सैन्धवस्य वधे धृतम्। स तु गाण्डीवनिर्मुक्तः शरः श्येन इवाशुगः ॥ १२२ ॥ शकुन्तमिव वृक्षाग्रात सैन्धवस्य शिरोऽहरत्। अहरत्तत् पुनश्चैव शरैरूर्द्धं धनञ्जयः ॥ १२३ ॥ दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च। शरैः कदम्बकीकृत्य काले तस्मिंश्च पाण्डवः ॥ १२४ ॥ समन्तपञ्चकाद्बाह्यं शिरस्तदहरमत्ततः। एतस्मिन्नेव काले तु वृद्धक्षत्रो महीपतिः ॥ १२५ ॥ सन्ध्यामुपास्ते तेजस्वी सम्बन्धी तव मारिष। उपासीनस्य तस्याथ कृष्णकेशं सकुण्डलम् ॥ १२६ ॥ सिन्धुराजस्य मूर्द्धानमुत्सङ्गे तमपातयत्। तस्योत्सङ्गे निपतितं शिरस्तच्चारुकुण्डलम् ॥ १२७ ॥ वृद्धक्षत्रस्य नृपतेरलक्षितमरिन्दम। कृतजप्यस्य तस्याथ वृद्धक्षत्रस्य धीमतः ॥ १२८ ॥ उत्तिष्ठतस्तत् सहसा शिरोऽगच्छद्धरातलम्। ततस्तस्य नरेन्द्रस्य पुत्रमूर्द्धनि भूतलम् ॥ १२९ ॥ गते तस्यापि शतधा मूर्द्धागच्छदरिन्दम। ततः सर्वाणि भूतानि विस्मयं जग्मुरुत्तमम् ॥ १३० ॥ वासुदेवश्च बीभत्सुं प्रशशंसुर्महाबलम्। ततो विनिहते राजन् सिन्धुराजे किरीटिना ॥ १३१ ॥ तमस्तद्वासुदेवेन संहृतं भरतर्षभ। पश्चाज्ज्ञातं महीपाल तव पुत्रैः सहानुगैः ॥ १३२ ॥ वासुदेवप्रयुक्तेयं मायेति नृपसत्तम। एवं स निहतो राजन् पार्थेनामिततेजसा ॥ १३३ ॥ अक्षौहिणीरष्ट हत्वा जामाता तव सैन्धवः। ततो दृष्ट्वा विनिहतं सिन्धुराजं जयद्रथम् ॥ १३४ ॥ पुत्राणां तव नेत्रेभ्यो दुःखादश्रुपतज्जलम्। ततो जयद्रथे राजन् हते पार्थेन केशवः ॥ १३५ ॥ दध्मौ शङ्खं महाबाहुरर्जुनश्च परन्तपः। भीमसेनोऽपि संग्रामे बोधयन्निव पाण्डवम् ॥ १३६ ॥ सिंहनादेन महता पूरयामास रोदसी। तं श्रुत्वा तु महानादं धर्मपुत्रो

युधिष्ठिरः ॥ १३७ ॥ सैन्धवं निहतं मेने फाल्गुनेन महात्मना। ततो वादित्रघोषेण स्वयोधानभ्यहर्षयत् ॥ १३८ ॥ अभ्यवर्त्तत संग्रामे भारद्वाजं युयुत्सया। ततः प्रववृते राजन्नस्तं गच्छति भास्करे ॥ १३९ ॥ द्रोणस्य सोमकैः सार्द्धं संग्रामो लोमहर्षणः। ते तु सर्वप्रयत्नेन भारद्वाजं जिघांसवः ॥ १४० ॥ सैन्धवे निहते राजन्नयुध्यन्त महारथाः। पाण्डवास्तु जयं लब्धा सैन्धवं विनिहत्य च ॥ १४१ ॥ अयोधयंस्ततो द्रोणं जयोन्मत्तास्ततस्ततः। अर्जुनोऽपि रणे योधांस्तावकान् रथसत्तमान्। अयोधयन्महाराज तं हत्वा सैन्धवं नृपन् ॥ १४२ ॥ स देवशत्रूनिव देवराजः किरीटमाली व्यधमत् समन्तात्। यथा तमांस्यभ्युदितस्तमोघ्नः पूर्वां प्रतिज्ञां समवाप्य वीरः ॥ १४२ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि जयद्रथवधे षट्चत्वारिंशदधिकशतोऽध्यायः ॥ १४६ ॥

---

धृतराष्ट्र उवाच। तस्मिन् विनिहते वीरे सैन्धवे सव्यसाचिना। मामका यदकुर्वन्त तन्ममाचक्ष्व सञ्जय ॥ १ ॥

सञ्जय उवाच। सैन्धवं निहतं दृष्ट्वा रणे पार्थेन मारिष। अमर्षवशमापन्नः कृपः शारद्वतस्तथा ॥ २ ॥ महता शरवर्षेण पाण्डवं समवाकिरत्। द्रौणिश्चाभ्यद्रवत् पार्थं रथमास्थाय फाल्गुनम् ॥ ३ ॥ तावेतौ रथिनां श्रेष्ठौ रथाभ्यां रथसत्तमौ। उभावुभयतस्तीक्ष्णैर्विशिखैरभ्यवर्षताम् ॥ ४ ॥ स तया शरवर्षाभ्यां सुमहद्भ्यां महाभुजः। पीड्यमानः परामार्त्तिमगमद्रथिनाम्वरः ॥ ५ ॥ सोऽजिघांसुर्गुरुं सङ्ख्ये गुरोस्तनयमेव च। चकाराचार्य्यकं तत्र कुन्तीपुत्रो धनञ्जयः ॥ ६ ॥ अस्त्रैरस्त्राणि संवार्य्य द्रौणेः शारद्वतस्य च। मन्दवेगानिषूंस्ताभ्यामजिघांसुरवासृजत् ॥ ७ ॥

ते चापि भृशमभ्यघ्नन् विशिखा जयचोदिताः। बहुलात्तु परा-
मार्त्तिं शराणान्तावगच्छताम् ॥ ८ ॥ अथ शारद्वतो राजन्
कौन्तेयशरपीड़ितः। अवासीद्रथोपस्थे मूर्च्छामभिजगाम ह
॥ ९ ॥ विह्वलन्तमभिज्ञाय भर्त्तारं शरपीड़ितम्। हतोऽयमिति
च ज्ञात्वा सारथिस्तमपाहरत् ॥ १० ॥ तस्मिन् भग्ने महाराज
कृपे शारद्वते युधि। अश्वत्थामाप्यपायासीत् पाण्डवेयाद्रथान्तरम्
॥ ११ ॥ दृष्ट्वा शारद्वतं पार्थो मूर्च्छितं शरपीड़ितम्। रथ एव
महेष्वासः कृपणं पर्य्यदेवयत् ॥ १२ ॥ अश्रुपूर्णमुखो दीनो वचन-
ञ्चेदमब्रवीत्। पश्यन्निदं महाप्राज्ञः क्षत्ता राजानमुक्तवान् ॥ १३ ॥
कुलान्तकरणे पापे जातमात्रे सुयोधने। नीयतां परलोकाय
साध्वयं कुलपांसनः ॥ १४ ॥ अस्माद्धि कुरुमुख्यानां महदुत्-
पत्स्यते भयम्। तदिदं समनुप्राप्तं वचनं सत्यवादिनः ॥ १५ ॥
तत्कृत ह्यद्य पश्यामि शरतल्पगतं गुरुम्। धिगस्तु क्षात्रमाचारं
धिगस्तु बलपौरुषम् ॥ १६ ॥ को हि ब्राह्मणमाचार्य्यमभिद्रुह्येत
मादृशः। ऋषिपुत्रो ममाचार्य्यो द्रोणस्य दयितः सखा ॥ १७ ॥
एष शेते रथोपस्थे मद्बाणैरभिपीड़ितः। अकामयानेन मया
विशिखैरर्द्दितो भृशम् ॥ १८ ॥ अवसीदन्रथोपस्थे प्राणान् पीड़्-
यतीव मे। शरार्द्दितेन हि मया प्रेक्षणीयो महाद्युतिः ॥ १९ ॥
अभ्यस्तो बहुभिर्बाणैर्द्दशधर्म्मगतेन वै। शोचयत्येष नियतं भूयः
पुत्रवधाद्धि माम् ॥ २० ॥ कृपणं स्वरथे सन्नं पश्य कृष्ण यथा-
गतम्। उपाकृत्य तु वै विद्यामाचार्य्येभ्यो नरर्षभाः ॥ २१ ॥
प्रयच्छन्तीह ये कामान् देवत्वमुपयान्ति ते। ये तु विद्यामुपादाय
गुरुभ्यः पुरुषाधमाः ॥ २२ ॥ घ्नन्ति तानेव दुर्वृत्तास्ते वै निरय-
गामिनः। तदिदं नरकायाद्य कृतं कर्म्म मया ध्रुवम् ॥ २३ ॥
आचार्य्यं शरवर्षेण रथे सादयता भृशम्। यत्तत् पूर्व्वमुपाकुर्व-
न्नस्त्रं मामब्रवीत् कृपः ॥ २४ ॥ न कथञ्चन कौरव्य प्रहर्त्तव्यं

गुराविति। तदिदं वचनं साधोराचार्य्यस्य महात्मनः ॥ २५ ॥ नानुष्ठितं ममैवाजौ विशिखैरभिवर्षता। तमस्तस्मै सुपूज्याय गौतमायापलायिने ॥ २६ ॥ धिगस्तु मम वार्ष्णेय यो ह्यस्मै प्रहराम्यहम्। तथा विलपमाने तु सव्यसाचिनि तं प्रति ॥ २७ ॥ सैन्धवं निहतं दृष्ट्वा राधेयः समुपाद्रवत्। तमापतन्तं राधेयमर्ज्जुनस्य रथं प्रति ॥ २८ ॥ पाञ्चाल्यौ सात्यकिश्चैव सहसा समुपाद्रवन्। उपायान्तस्तु राधेयं दृष्ट्वा पार्थो महारथः ॥ २९ ॥ प्रहसन्देवकीपुत्रमिदं वचनमब्रवीत्। एष प्रयात्याधिरथिः सात्यकेः स्यन्दनं प्रति ॥ ३० ॥ न मृष्यति हतं नूनं भूरिश्रवसमाहवे। यत्र यात्येष तत्र त्वं चोदयाश्वान् जनार्द्दन ॥ ३१ ॥ मा सौमदत्तेः पदवीं गमयेत् सात्वतं वृषः। एवमुक्तो महाबाहुः केशवः सव्यसाचिना ॥ ३२ ॥ प्रत्युवाच महातेजाः कालयुक्तमिदं वचः। अलमेष महाबाहुः कर्णायैको हि पाण्डव ॥ ३३ ॥ किम्पुनर्द्रौपदेयाभ्यां सहितः सात्वतर्षभः। न च तावत् क्षमः पार्थ कर्णेन तव सङ्गरः ॥ ३४ ॥ प्रज्वलन्ती महोल्केव तिष्ठत्यस्य हि वासवी। त्वदर्थं पूज्यमाना वै रक्ष्यते परवीरहन् ॥ ३५ ॥ अतः कर्णः प्रयात्वत्र सात्वतस्य यथातथा। अहं ज्ञास्यामि कौन्तेय कालमस्य दुरात्मनः। यत्रैनं विशिखैस्तीक्ष्णैः पातयिष्यसि भूतले ॥३६॥

धृतराष्ट्र उवाच। योऽसौ कर्णेन वीरेण वार्ष्णेयस्य समागमः। हते च भूरिश्रवसि सैन्धवे च निपातिते ॥ ३७ ॥ सात्यकिश्चापि विरथः कं समारूढवान्रथम्। चक्ररक्षौ तु पाञ्चाल्यौ तन्ममाचक्ष्व सञ्जय ॥ ३८ ॥

सञ्जय उवाच। हन्त ते वर्त्तयिष्यामि यथावृत्तं महारणे। शुश्रूषस्व स्थिरो भूत्वा दुराचरितमात्मनः ॥ ३९ ॥ पूर्व्वमेव हि कृष्णस्य मनोगतमिदं प्रभो। विजेतव्यो यथा वीरः सात्यकिर्यूपकेतुना ॥ ४० ॥ अतीतानागते राजन् स हि वेत्ति जनार्द्दनः।

तत्र सूतं समानीय दारुकं सन्दिदेश ह ॥ ४१ ॥ रथो मे युज्यतां कल्यमिति राजन्महाबलः । न हि देवा न गन्धर्व्वा न यक्षोरगराक्षसाः ॥ ४२ ॥ मानवाश्च विजेतारः कृष्णयोः सन्ति केचन । पितामहपुरोगाश्च देवाः सिद्धाश्च तं विदुः ॥ ४३ ॥ तयोः प्रभावमतुलं शृणु युद्धन्तु तत्तथा । सात्यकिं विरथं दृष्ट्वा कर्णञ्चाभ्युद्यतं युधि ॥ ४४ ॥ दध्मौ शङ्खं महानादमार्षभेणाथ माधवः । दारुको वेत्ति सन्देशं श्रुत्वा शङ्खस्य च स्वनम् ॥ ४५ ॥ रथमन्वानयत्तस्मै सुवर्णोच्छ्रितकेतनम् । स केशवस्यानुमते रथं दारुकसंयुतम् ॥४६॥ आरुरोह शिनेः पौत्रो ज्वलनादित्यसन्निभम् । कामगैः शैव्यसुग्रीवमेघपुष्पबलाहकैः ॥ ४७ ॥ हयोदग्रैर्महावेगैर्हेमभाण्डविभूषितैः । युक्तं समारुह्य च तं विमानप्रतिमं रथम् ॥ ४८ ॥ अभ्यद्रवत राधेयं प्रवपन् सायकान् बहून् । चक्ररक्षावपि तदा युधामन्यूत्तमौजसौ ॥ ४९ ॥ धनञ्जयरथं हित्वा राधेयं प्रत्युदीयतुः । राधेयोऽपि महाराज शरवर्षं समुत्सृजन् ॥ ५० ॥ अभ्यद्रवत् सुसंक्रुद्धो रणे शैनेयमच्युत । नैव दैवं न गान्धर्वं नासुरोरगराक्षसम् ॥ ५१ ॥ तादृशं भुवि नो युद्धं दिवि वा श्रुतमित्युत । उपारमत तत्सैन्यं सरथाश्वनरद्विपम् ॥ ५२ ॥ तयोर्दृष्ट्वा महाराज कर्म सम्मूढ़चेतनम् । सर्व्वं च समपश्यन्त तद्युद्धमतिमानुषम् ॥ ५३ ॥ तयोर्नृवरयोराजन् सारथ्यं दारुकस्य च । गतप्रत्यागतावृत्तैर्मण्डलैः सन्निवर्त्तनैः ॥ ५४ ॥ सारथेस्तु रथस्थस्य काश्यपेयस्य विस्मिताः । नभस्तलगताश्चैव देवगन्धर्व्वदानवाः ॥ ५५ ॥ अतीवावहिता द्रष्टुं कर्णशैनेययोरणम् । मित्रार्थे तौ पराक्रान्तौ स्पर्द्धिनौ शुष्मिणौ रणे ॥ ५६ ॥ कर्णश्चामरसङ्काशो युयुधानश्च सात्यकिः । अन्योऽन्यं तौ महाराज शरवर्षैरवर्षताम् ॥ ५७ ॥ प्रममाथ शिनेः पौत्रं कर्णः सायकवृष्टिभिः । अमृष्यमाणो निधनं कौरव्यजलसन्धयोः ॥ ५८ ॥ कर्णः शोकसमाविष्टो महोरग इव

श्वसन्। स शैनेयं रणे क्रुद्धः प्रदहन्निव चक्षुषा ॥ ५९ ॥ अभ्य-द्रवत वेगेन पुनः पुनररिन्दम। तन्तु सम्प्रेक्ष्य संक्रुद्धं सात्यकिः प्रत्यविध्यत ॥ ६० ॥ महता शरवर्षेण गजः प्रतिगजं यथा। तौ समेत्य नरव्याघ्रौ व्याघ्राविव तरस्विनौ ॥ ६१ ॥ अन्योऽन्यं सन्ततक्षाते रणेऽनुपमविक्रमौ। ततः कर्णं शिनेः पौत्रः सर्व-पारशवैः शरैः ॥ ६२ ॥ बिभेद सर्वगात्रेषु पुनः पुनररिन्दमम्। सारथिञ्चास्य भल्लेन रथनीड़ादपाहरत् ॥ ६३ ॥ अश्वांश्च चतुरः श्वेतान् निजघ्ने निशितैः शरैः। छित्त्वा ध्वजं शतेनैव शतधा पुरुषर्षभः ॥ ६४ ॥ चकार विरथं कर्णं तव पुत्रस्य पश्यतः। ततो विमनसो राजंस्तावका भरतर्षभ ॥ ६५ ॥ वृषसेनः कर्ण-सुतः शल्यो मद्राधिपस्तथा। द्रोणपुत्रश्च शैनेयं सर्वतः पर्य्य-वारयन् ॥ ६६ ॥ ततः पर्य्याकुलं सर्वं न प्राज्ञायत किञ्चन। तथा सात्यकिना वीरे विरथे सूतजे कृते ॥ ६७ ॥ हाहाकार-स्ततो राजन् सर्वसैन्येषु चाभवत्। कर्णोऽपि विह्वलो राजन् सात्वतेनार्दितः शरैः ॥ ६८ ॥ दुर्य्योधनरथं राजन्नारुरोह विनिः-श्वसन्। मानयंस्तव पुत्रस्य बाल्यात्प्रभृति सौहृदम् ॥ ६९ ॥ कृतां राज्यप्रदानेन प्रतिज्ञां परिपालयन्। तथा तु विरथं कर्णं पुत्रान् वै तव पार्थिव ॥ ७० ॥ दुःशासनमुखान् शूरान्नावधीत् सात्यकिर्वशी। रक्षन् प्रतिज्ञां भीमेन पार्थेन च कृतां पुरा ॥ ७१ ॥ विरथान् विह्वलांश्चक्रे न तु प्राणैर्व्ययोजयत्। भीमसेनेन तु वधः पुत्राणान्ते प्रतिश्रुतः ॥ ७२ ॥ पुनर्द्यूते पार्थेन च वधः कर्णस्य संश्रुतः। वधे त्वकुर्वन् यत्नं ते तस्य कर्णमुखा रथाः ॥ ७३ ॥ नाशक्नुवंश्च तं हन्तुं सात्यकिं प्रवरा रथाः। द्रौणिश्च कृतवर्मा च तथैवान्ये महारथाः ॥ ७४ ॥ निर्ज्जिता धनुषैकेन शतशः क्षत्रियर्षभाः। काङ्क्षता परलोकञ्च धर्मराजस्य च प्रियम् ॥ ७५ ॥ कृष्णयोः सदृशो वीर्य्ये सात्यकिः शत्रुकर्षणः। जित-

वान् सर्वसैन्यानि तावकानि ह्यसन्निव ॥ ७६ ॥ कृष्णो वापि भवेल्लोके पार्थोवापि धनुर्द्धरः। शैनेयो वा नरश्रेष्ठ चतुर्थो नोपलभ्यते ॥ ७७ ॥

धृतराष्ट्र उवाच। अजय्यं रथमास्थाय वासुदेवस्य सात्यकिः। विरथं कृतवान् कर्णं वासुदेवसमो युधि ॥ ७८ ॥ दारुकेण समायुक्तः स्वबाहुबलदर्पितः। कच्चिदन्यं समारुढः स रथं सात्यकिः पुनः ॥ ७९ ॥ एतदिच्छाम्यहं श्रोतुं कुशलो ह्यसि भाषितुम्। असह्यं तमहं मन्ये तन्ममाचक्ष्व सञ्जय ॥ ८० ॥

सञ्जय उवाच। शृणु राजन् यथा तस्य रथमन्यं महामतिः। दारुकस्यानुजस्तूर्णं कल्पनाविधिकल्पितम् ॥ ८१ ॥ आयसैः काञ्चनैश्चापि पट्टैः सन्नद्धकूवरम्। तारासहस्रखचितं सिंहध्वजपताकिनम् ॥ ८२ ॥ अश्वैर्वातजवैर्युक्तं हेमभाण्डपरिच्छदैः। रथं सम्पादयामास मेघगम्भीरनिस्वनम् ॥ ८३ ॥ तं समारुह्य शैनेयस्तव सैन्यमुपाद्रवत्। दारुकोऽपि यथाकामं प्रययौ केशवान्तिकम् ॥ ८४ ॥ कर्णस्यापि महाराज शङ्खगोक्षीरपाण्डुरैः। चित्रकाञ्चनसन्नाहैः सदश्वैर्वेगवत्तरैः ॥ ८५ ॥ हेमकक्षाध्वजोपेतं क्लृप्तयन्त्रपताकिनम्। अग्र्यं रथं सुयन्तारं बहुशस्त्रपरिच्छदम् ॥ ८६ ॥ उपाजह्रुस्तमास्थाय कर्णोऽप्यभ्यद्रवद्रिपुन्। एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ ८७ ॥ भूयश्चापि निबोध त्वं तवापनयजं क्षयम्। एकत्रिंशत्तव सुता भीमसेनेन पातिताः ॥ ८८ ॥ दुर्मुखं प्रमुखे कृत्वा सततं चित्रयोधिना। शतशो निहताः शूराः सात्वतेनार्जुनेन च ॥ ८९ ॥ भीष्मं प्रमुखतः कृत्वा भगदत्तञ्च मारिष। एवमेष क्षयो वृत्तो राजन् दुर्मन्त्रिते तव ॥ ९० ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि कर्णसात्यकियुद्धे सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

धृतराष्ट्र उवाच। तथा गतेषु शूरेषु तेषां मम च संयुगे। किं वै भीमस्तदाकार्षीत्तन्ममाचक्ष्व सञ्जय ॥ १ ॥

सञ्जय उवाच। विरथो भीमसेनो वै कर्णवाक्शल्यपीड़ितः। अमर्षवशमापन्नः फाल्गुनं वाक्यमब्रवीत् ॥ २ ॥ पुनः पुनस्तूवरक मूढ़ औदरीकेति च। अकृतास्त्रक माधीत्सीर्बाल संग्रामकातर ॥ ३ ॥ इति मामब्रवीत् कर्णः पश्यतस्ते धनञ्जय। एवं वक्ता च मे वध्यस्तेन चोक्तोऽस्मि भारत ॥ ४ ॥ एतद्व्रतं महाबाहो त्वया सह कृतं मया। यथैतन्मम कौन्तेय तथा तव न संशयः ॥ ५ ॥ तत् पालय नरश्रेष्ठ स्मरैतद्वचनं मम। यथा भवति तत् सत्यं तथा कुरु धनञ्जय ॥ ६ ॥ तच्छ्रुत्वा वचनं तस्य भीमस्यामितविक्रमः। ततोऽर्जुनोऽब्रवीत् कर्णं किञ्चिदभ्येत्य संयुगे ॥ ७ ॥ कर्ण कर्ण वृथादृष्टे सूतपुत्रात्मसंस्तुत। अधर्मबुद्धे शृणु मे यत्त्वां वक्ष्यामि साम्प्रतम् ॥ ८ ॥ द्विविधं कर्म शूराणां युद्धे जयपराजयौ। तौ चाप्यनित्यौ राधेय वासवस्यापि युध्यतः ॥ ९ ॥ मुमूर्षुर्युयुधानेन विरथो विकलेन्द्रियः। मद्वध्यस्त्वमिति ज्ञात्वा जित्वा जीवन् विसर्ज्जितः ॥ १० ॥ यदृच्छया भीमसेनं विरथं कृतवानसि। अधर्मस्त्वेष राधेय यत्त्वं भीममवोचथाः ॥ ११ ॥ नारिं जित्वा विकत्थन्ते न च जल्पन्ति दुर्वचः। न च किञ्चन निन्दन्ति सन्तः शूरा नरर्षभाः ॥ १२ ॥ त्वन्तु प्राकृतविज्ञानस्तत्तद्वदसि सूतज। युध्यमानं पराक्रान्तं शूरमार्य्यव्रते रतम् ॥ १३ ॥ यदवोचोऽप्रियं भीमं नैतत् सत्यं वचस्तव। पश्यतां सर्वसैन्यानां केशवस्य ममैव च ॥ १४ ॥ विरथो भीमसेनेन कृतोऽसि बहुशो रणे। न च त्वां परुषं किञ्चिदुक्तवान् पाण्डुनन्दनः ॥ १५ ॥ यस्माद्बहु च रूक्षञ्च श्रावितस्ते वृकोदरः। परोक्षं यच्च सौभद्रो युष्माभिर्निहतो मम ॥ १६ ॥ तस्मादस्यावलेपस्य सद्यः फलमवाप्नुहि। त्वया तस्य धनुश्छिन्न-

मात्मनाशाय दुर्मते ॥ १७ ॥ तस्मादद्योऽसि मे मूढ़ सभृत्यबल-
वाहनः। कुरु त्वं सर्व्वकृत्यानि महत्ते भयमागतम् ॥ १८ ॥
हन्तास्मि वृषसेनं ते प्रेक्षमाणस्य संयुगे। ये चान्ये तूपयास्यन्ति
बुद्धिमोहेन मां नृपाः ॥ १९ ॥ तांश्च सर्व्वान् हनिष्यामि सत्ये-
नायुधमालभे। त्वाञ्च मूढ़ाकृतप्रज्ञमतिमानिनमाहवे ॥ २० ॥
दृष्ट्वा दुर्य्योधनो मन्दो भृशं तप्स्यति पातितम्। अर्जुनेन प्रति-
ज्ञाते वधे कर्णसुतस्य तु ॥ २१ ॥ महान् सुतुमुलः शब्दो बभूव
रथिनां तदा। तस्मिन्नाकुलसंग्रामे वर्त्तमाने भयावहे ॥ २२ ॥
मन्दरश्मिः सहस्रांशुरस्तं गिरिमुपागमत्। ततो राजन् हृषी-
केशः संग्रामशिरसि स्थितम् ॥ २३ ॥ तीर्णप्रतिज्ञं बीभत्सुं
परिष्वज्येदमब्रवीत्। दिष्ट्या सम्पादिता जिष्णो प्रतिज्ञा महती
त्वया ॥ २४ ॥ दिष्ट्या च निहतः पापो वृद्धक्षत्रः सहात्मजः।
धार्त्तराष्ट्रबलं प्राप्य देवसेनोऽपि भारत ॥ २५ ॥ सीदेत समरे
जिष्णो नात्र कार्य्या विचारणा। न तं पश्यामि लोकेषु चिन्तयन्
पुरुषं क्वचित् ॥ २६ ॥ त्वदृते पुरुषव्याघ्र य एतद्योधयेद्बलम्।
महाप्रभावा बहवस्त्वया तुल्याधिकापि वा ॥ २७ ॥ समेताः पृथिवी-
पाला धार्त्तराष्ट्रस्य शासनात्। ते त्वां प्राप्य रणे क्रुद्धं नाभ्यवर्त्तन्त
दंशिताः ॥ २८ ॥ तव वीर्य्यं बलञ्चैव रुद्रशक्रान्तकोपमम्।
नेदृशं शक्नुयात् कश्चिद्रणे कर्त्तुं पराक्रमम् ॥ २९ ॥ यादृशं
कृतवानद्य त्वमेकः शत्रुतापन। एवमेव हते कर्णे सानुबन्धे
दुरात्मनि ॥ ३० ॥ वर्द्धयिष्यामि भूयस्त्वां विजितारिं हत-
द्विषम्। तमर्जुनः प्रत्युवाच प्रसादात्तव माधव ॥ ३१ ॥ प्रतिज्ञेयं
मया तीर्णा विबुधैरपि दुस्तरा। अनाश्चर्य्यो जयस्तेषां येषां
नाथोऽसि केशव ॥ ३२ ॥ त्वत्प्रसादान्महीं कृत्स्नां सम्प्राप्स्यति
युधिष्ठिरः। तव प्रभावो वार्ष्णेय तवैव विजयः प्रभो ॥ ३३ ॥
वर्द्धनीयास्तव वयं प्रेष्याश्च मधुसूदन। एवमुक्तः स्मयन् कृष्णः

शनकैर्वाजयन् हयान्। दर्शयामास पार्थाय क्रूरमायोधनं महत्॥ ३४॥

कृष्ण उवाच। प्रार्थयन्तो जयं युद्धे प्रथितश्च महद्यशः। पृथिव्यां शेरते शूराः पार्थिवास्त्वच्छरैर्हताः॥ ३५॥ विकीर्णशस्त्राभरणा विपन्नाश्वरथद्विपा। संच्छिन्नभिन्नवर्माणो वैक्लव्यं परमं गताः॥ ३६॥ ससत्त्वा गतसत्त्वाश्च प्रभया परया युताः। सजीवा इव लक्ष्यन्ते गतसत्त्वा नराधिपाः॥ ३७॥ तेषां शरैः स्वर्णपुङ्खैः शस्त्रैश्च विविधैस्तथा। वाहनैरायुधैश्चैव सम्पूर्णां पश्य मेदिनीम्॥ ३८॥ वर्मभिर्मणिहारैश्च शिरोभिश्च सकुण्डलैः। उष्णीषमुकुटैः स्रग्भिश्चूड़ामणिभिरेव च॥ ३९॥ कण्ठसूत्रैरङ्गदैश्च निष्कैरपि च सुप्रभैः। अन्यैश्चाभरणैश्चित्रैर्भाति भारत मेदिनी॥ ४०॥ अनुकर्षैरुपासङ्गैः पताकाभिर्ध्वजैस्तथा। उपस्करैरधिष्ठानैरीषादण्डकबन्धुरैः॥ ४१॥ चक्रैः प्रमथितैश्चित्रैरक्षैश्च बहुधा रणे। युगैर्योक्त्रैः कलापैश्च धनुर्भिः सायकैस्तथा॥ ४२॥ परिस्तोमैः कुथाभिश्च परिघैरङ्कुशैस्तथा। शक्तिभिर्भिन्दिपालैश्च तूणैः शूलैः परश्वधैः॥ ४२॥ प्रासैश्च तोमरैश्चैव कुन्तैर्यष्टिभिरेव च। शतघ्नीभिर्भुशुण्डीभिः खड्गैः परशुभिस्तथा॥ ४४॥ मुषलैर्मुद्गरैश्चैव गदाभिः कुणपैस्तथा। सुवर्णविकृताभिश्च कषाभिर्भरतर्षभ॥ ४५॥ घण्टाभिश्च गजेन्द्राणां भाण्डैश्च विविधैरपि। स्रग्भिश्च नानाभरणैर्वस्त्रैश्चैव महाधनैः॥ ४६॥ अपविद्धैर्बभौ भूमिर्ग्रहैर्द्यौरिव शारदी। पृथिव्यां पृथिवीहेतोः पृथिवीपतयो हताः॥ ४७॥ पृथिवीमुपगुह्याङ्गैः सुप्ताः कान्तामिव प्रियाम्। इमांश्च गिरिकूटाभान्नागानैरावतोपमान्॥ ४८॥ क्षरतः शोणितं भूरि शस्त्रच्छेददरीमुखैः। दरीमुखैरिव गिरीन् गैरिकाम्बुपरिस्रवान्॥ ४९॥ तांश्च बाणाहतान् वीर पश्य निष्टनतः क्षितौ। हयांश्च पतितान् पश्य स्वर्ण-

भाण्डविभूषितान् ॥ ५० ॥ गन्धर्वनगराकारान्रथांश्च निहते-
श्वरान्। छिन्नध्वजपताकाग्रान् विचक्रान् हतसारथीन् ॥ ५१ ॥
निकृत्तकूबरयुगान् भग्नेषावन्धुरान् प्रभो। पश्य पार्थ हतान्
भूमौ विमानोपमदर्शनान् ॥ ५२ ॥ पत्तींश्च निहतान् वीर शत-
शोऽथ सहस्रशः। धनुर्भृतश्चर्मभृत शयानान् रुधिरोचितान्
॥ ५३ ॥ महीमालिङ्ग्य सर्वाङ्गैः पांशुध्वस्तशिरोरुहान्। पश्य
योधान्महावाहो त्वच्छरैर्भिन्नविग्रहान् ॥ ५४ ॥ चामरव्यजनैश्छत्रै-
र्ध्वजैश्चाश्वरथद्विपैः। विविधैश्च परिस्तोमैरश्वानाञ्च प्रकर्षणैः ॥ ५५ ॥
कुथाभिश्च विचित्राभिर्वरूथैश्च महाधनैः। संस्तीर्णां वसुधां पश्य
चित्रपट्टैरिवाचिताम् ॥ ५६ ॥ नागेभ्यः पतितानन्यान् कल्पितेभ्यो
द्विपैः सह। सिंहान् वज्रप्रणुन्नेभ्यो गिरिभ्य्रेभ्य इव च्युतान् ॥ ५७ ॥
संस्यूतान् वाजिभिः सार्द्धं धनुर्भिश्च तथापरान्। पदातीन्
सादिसङ्घांश्च हतजीवपरिच्युतान् ॥ ५८ ॥ निपातितर्द्विपरथवाजि-
संकुलमसृग्वसापिशितसमृद्धकर्द्दमम्। निशाचरश्ववृकपिशाचमोदनं
महीतलं नरवर पश्य दुर्द्दृशम् ॥ ५९ ॥ इदं महत्त्वय्युपपद्यते प्रभो
रणाजिरे कर्मयशोऽभिवर्द्धनम्। शतक्रतौ चापि च देवसत्तमे
महाहवे जघ्नुषि दैत्यदानवान् ॥ ६० ॥

सञ्जय उवाच। एवं सन्दर्शयन् कृष्णो रणभूमिं किरीटिने।
स्वैः समेतः समुदितैः पाञ्चजन्यं व्यनादयत् ॥ ६१ ॥ सन्दर्शयन्नेव
किरीटिनेऽरिहा जनार्द्दनस्तामरिभूमिमञ्जसा। अजातशत्रुं समु-
पेत्य पाण्डवं निवेदयामास हतं जयद्रथम् ॥ ६२ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि युद्धभूमिदर्शने
अष्टचत्वारिंशदधिकशतोऽध्यायः ॥ १४८ ॥

सञ्जय उवाच। ततो राजानमभ्येत्य धर्मपुत्रं युधिष्ठिरम्।
ववन्दे संप्रहृष्टात्मा हते पार्थेन सैन्धवे ॥ १ ॥ दिष्ट्या वर्द्धसि
राजेन्द्र हतशत्रुर्नरोत्तम। दिष्ट्या निस्तीर्णवांश्चैव प्रतिज्ञामनुज-
स्तव ॥ २ ॥ स त्वेवमुक्तः कृष्णेन हृष्टः परपुरञ्जयः। ततो
युधिष्ठिरो राजा रथादाप्लुत्य भारत ॥ ३ ॥ पर्य्यष्वजत्तदा
कृष्णावानन्दाश्रुपरिप्लुतः। प्रमृज्य वदनं शुभ्रं पुण्डरीकसमप्रभम्
॥ ४ ॥ अब्रवीद्वासुदेवञ्च पाण्डवञ्च धनञ्जयम्। दिष्ट्या पश्यामि
संग्रामे तीर्णभारौ महारथौ ॥ ५ ॥ दिष्ट्या च निहतः पापः
सैन्धवः पुरुषाधमः। कृष्णौ दिष्ट्या मम प्रीतिर्महती प्रतिपादिता
॥ ६ ॥ दिष्ट्या शत्रुगणाश्चैव निमग्नाः शोकसागरे। न तेषां
दुष्कृतं किञ्चित्त्रिषु लोकेषु विद्यते ॥ ७ ॥ सर्वलोकगुरुर्येषां
त्वन्नाथो मधुसूदन। त्वत्प्रसादाद्धि गोविन्द वयं जेष्यामहे
रिपून् ॥ ८ ॥ यथा पूर्वं प्रसादात्ते दानवान् पाकशासनः।
पृथिव्या विजयो वापि त्रैलोक्यविजयोऽपि च ॥ ९ ॥ ध्रुवो हि
तेषां वार्ष्णेय येषां तुष्टोऽसि मानद। न तेषां विद्यते पापं
संग्रामे वा पराजयः ॥ १० ॥ त्रिदशेश्वरनाथस्त्वं येषां तुष्टोऽसि
मानद। त्वत्प्रसादात् हृषीकेश शक्रः सुरगणेश्वरः ॥ ११ ॥
त्रैलोक्यविजयं श्रीमान् प्राप्तवान्रणमूर्द्धनि। तव चैव प्रसादेन
त्रिदशास्त्रिदशेश्वर ॥ १२ ॥ अमरत्वं गताः कृष्ण लोकांश्चाश्नु-
वतेऽच्युत। त्वत्प्रसादसमुत्थेन विक्रमेणारिसूदन ॥ १३ ॥
सुरेशत्वं गतः शक्रो हत्वा दैत्यान् सहस्रशः। त्वत्प्रसादात्
हृषीकेश जगत् स्थावरजङ्गमम् ॥ १४ ॥ स्ववर्त्मनि स्थितं वीर
जपहोमेषु वर्त्तते। एकार्णवमिदं पूर्वं सर्वमासीत्तमोमयम् ॥ १५ ॥
त्वत्प्रसादान्महाबाहो जगत् प्राप्तं नरोत्तम। स्रष्टारं सर्वलोकानां
परमात्मानमव्ययम् ॥ १६ ॥ ये पश्यन्ति हृषीकेशं न ते मुह्यन्ति
कर्हिचित्। पुराणं परमं देवं देवदेवं सनातनम् ॥ १७ ॥ ये

प्रपन्नाः सुरगुरुं न ते मुह्यन्ति कर्हिचित्। अनादिनिधनं देवं लोककर्त्तारमव्ययम् ॥ २८ ॥ ये भक्तास्त्वां हृषीकेश दुर्गाण्यति तरन्ति ते। परं पुराणं पुरुषं पराणां परमञ्च यत् ॥ १९ ॥ प्रपद्यतस्तत् परमं परा भूतिर्विधीयते। यं गान्ति चतुरो वेदा यश्च वेदेषु गीयते ॥ २० ॥ तं प्रपद्ये महात्मानं भूतिमस्म्याम्यनुत्तमाम्। परमेश परेशेश तिर्य्यगीश नरेश्वर ॥ २१ ॥ सर्व्वेश्वरेश्वरेशेश नमस्ते पुरुषोत्तम। त्वमीश ईश्वरेशान प्रभो वर्द्धस्व माधव ॥ २२ ॥ प्रभवाप्यय सर्व्वस्य सर्व्वात्मन् पृथुलोचन। धनञ्जयसखा यश्च धनञ्जयहितश्च यः ॥ २३ ॥ धनञ्जयस्य गोप्तारं प्रपद्य सुखमेधते। एवमुक्तौ महात्मानौ तदा केशवपाण्डवौ ॥ २४ ॥ तावब्रूतां तदा हृष्टौ राजानं पृथिवीपतिम्। तव कोपाग्निना दग्धः पापो राजा जयद्रथः ॥ २५ ॥ उदीर्णञ्चापि सुमहद्धार्त्तराष्ट्रबलं प्रभो। हन्यन्ते निहताश्चैव विनङ्क्ष्यन्ति च भारत ॥ २६ ॥ तव क्रोधोहता ह्येते कौरवाः शत्रुसूदनः। त्वां हि चक्षुर्हणं वीर कोपयित्वा सुयोधनः ॥ २७ ॥ समित्रबन्धुः समरे प्राणांस्त्यक्ष्यति दुर्म्मतिः। तव क्रोधहतः पूर्व्वं देवैरपि दुरासदः ॥ २८ ॥ शरतल्पगतः शेते भीष्मः कुरुपितामहः। दुर्ल्लभो हि जयस्तेषां संग्रामे रिपुसूदन ॥ २९ ॥ याता मृत्युवशं ते च येषां द्वेष्टा च पाण्डवः। राज्यं प्राणाः प्रियाः पुत्राः सौख्यानि विविधानि च ॥ ३० ॥ अचिरात्तस्य नश्यन्ति यस्य क्रुद्धः परन्तप। विनष्टान् कौरवान् मन्ये सपुत्रपशुबान्धवान् ॥ ३१ ॥ राजधर्म्मपरे नित्यं त्वयि क्रुद्धे परन्तप। ततो भीमो महाराज सात्यकिश्च महारथः ॥ ३२ ॥ अभिवाद्य गुरुं श्रेष्ठं मार्गणैः क्षतविक्षतौ। स्थितावास्तां महेष्वासौ पाञ्चाल्यैः परिवारितौ ॥ ३३ ॥ तौ दृष्ट्वा मुदितौ वीरौ प्राञ्जली समुपस्थितौ। अभ्यनन्दत कौन्तेयस्तावुभौ भीमसात्यकी ॥ ३४ ॥ दिष्ट्या पश्यामि वां शूरौ विमुक्तौ सैन्य-

सागरात्। द्रोणग्राहदुराधर्षात् हार्दिक्यमकरालयात्। दिष्ट्या मे निर्ज्जिताः सर्वे पृथिव्यां सर्वपार्थिवाः ॥ ३५ ॥ युवां विजयिनौ चापि दिष्ट्या पश्यामि संयुगे। दिष्ट्या द्रोणो जितः संख्ये हार्दिक्यश्च महारथः ॥ ३६ ॥ दिष्ट्या विकर्णिभिः कर्णो रणे नीतः पराजयम्। विमुखश्च कृतः शल्यो युवाभ्यां पुरुषर्षभौ ॥ ३७ ॥ दिष्ट्या युवां कुशलिनौ संग्रामात् पुनरागतौ। पश्यामि रथिनां श्रेष्ठावुभौ युद्धविशारदौ ॥ ३८ ॥ मम वाक्यकरौ वीरौ मम गौरवयन्त्रितौ। सैन्यार्णवं समुत्तीर्णौ दिष्ट्या पश्यामि वामहम् ॥ ३९ ॥ समरश्लाघिनौ वीरौ संग्रामेष्वपलायिनौ। मम प्राणसमौ चैव दिष्ट्या पश्यामि वामहम् ॥ ४० ॥ इत्युक्त्वा पाण्डवो राजन् युयुधानवृकोदरौ। सस्वजे पुरुषव्याघ्रौ हर्षाद्बाष्पं मुमोच ह ॥ ४१ ॥ ततः प्रमुदितं सर्वं बलमासीद्विशाम्पते। पाण्डवानां रणे हृष्टं युद्धाय च मनो दधे ॥ ४२ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरहर्षे
एकोनपञ्चाशदधिकशततोऽध्यायः ॥ १४९ ॥

---

सञ्जय उवाच। सैन्धवे निहते राजन् पुत्रस्तव सुयोधनः। अश्रुक्लिन्नमुखो दीनो निरुत्साहो द्विषज्जये ॥ १ ॥ दुर्मना निःश्वसन्नुष्णं भग्नदंष्ट्र इवोरगः। आगस्कृत् सर्वलोकस्य पुत्रस्तेऽर्त्तिं परामगात् ॥ २ ॥ दृष्ट्वा तत् कदनं घोरं स्वबलस्य कृतं महत्। जिष्णुना भीमसेनेन सात्वतेन च संयुगे ॥ ३ ॥ स विवर्णः कृशो दीनो बाष्पविप्लुतलोचनः। अमन्यतार्ज्जुनसमो न योद्धा भुवि विद्यते ॥ ४ ॥ न द्रोणो न च राधेयो नाश्वत्थामा कृपो न च। क्रुद्धस्य प्रमुखे स्थातुं पर्य्याप्ता इति मारिष ॥ ५ ॥ निर्ज्जित्य हि रणे पार्थः सर्वान्मम महारथान्। अवधीत्सैन्धवं संख्ये नैनं

कश्चिदवारयत् ॥ ६ ॥ सर्व्वथा हतमेवेदं पाण्डवैर्म्मे महद्बलम् । न ह्यस्य विद्यते त्राता साक्षादपि पुरन्दरः ॥ ७ ॥ यमुपाश्रित्य संग्रामे कृतः शस्त्रसमुद्यमः । स कर्णो निर्ज्जितः संख्ये हतश्चैव जयद्रथः ॥ ८ ॥ यस्य वीर्य्यं समाश्रित्य शमं याचन्तमच्युतम् । तृणवत्तमहं मन्ये स कर्णो निर्ज्जितो युधि ॥ ९ ॥ एवं क्लान्तमना राजन्नुपायात् द्रोणमीक्षितुम् । आगस्कृत् सर्व्वलोकस्य पुत्रस्ते भरतर्षभ ॥ १० ॥ ततस्तत् सर्व्वमाचख्यौ कुरूणां वैशसं महत् । परान् विजयतश्चापि धार्त्तराष्ट्रान्निमज्जतः ॥ ११ ॥

दुर्य्योधन उवाच । पश्य मूर्द्धाभिषिक्तानामाचार्य्य कदनं महत् । कृत्वा प्रमुखतो भीष्मं शूरं मम पितामहम् ॥ १२ ॥ तं निहत्य प्रलुब्धोऽयं शिखण्डी पूर्णमानसः । पाञ्चालैः सहितः सर्व्वैः सेनाग्रमभिवर्त्तते ॥ १३ ॥ अपरश्चापि दुर्द्धर्षः शिष्यस्ते सव्यसाचिना । अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः ॥ १४ ॥ अस्माद्विजयकामानां सुहृदामुपकारिणाम् । गन्तास्मि कथमानृण्यं गतानां यमसादनम् ॥ १५ ॥ ये मदर्थं परीप्सन्ते वसुधां वसुधाधिपाः । ते हित्वा वसुधैश्वर्य्यं वसुधामधिशेरते ॥ १६ ॥ सोऽहं कापुरुषः कृत्वा मित्राणां क्षयमीदृशम । नाश्वमेधसहस्रेण पातुमात्मानमुत्सहे ॥ १७ ॥ मम लुब्धस्य पापस्य तथा धर्म्मापचायिनः । व्यायामेन जिगीषन्तः प्राप्ता वैवस्वतक्षयम् ॥ १८ ॥ कथं पतितवृत्तस्य पृथिवीसुहृदां द्रुहः । विवरं नाप्रदद्यात् पृथिवी मम दुर्मतेः ॥ १९ ॥ योऽयं रुधिररक्ताक्षो राज्ञां मध्ये पितामहः । किम्प्रवक्ष्यति दुर्द्धर्षं समेत्य परलोकजित् ॥ २० ॥ जलसन्धं महेष्वासं पश्य सात्यकिना हतम् । मदर्थमुद्यतं शूरं प्राणांस्त्यक्त्वा महारथ ॥ २१ ॥ काम्बोजं निहतं दृष्ट्वा तथालम्बुषमेव च । अन्यान् बहूंश्च सुहृदो जीवितार्थोऽद्य को मम ॥ २२ ॥ व्यायच्छन्तो हताः शूरा मदर्थे येऽपराङ्मुखाः । यतमाना परं

शक्त्या विजेतुमर्हितान्मम ॥ २३ ॥ तेषां गत्वाहमानृण्यमद्य शक्त्या परन्तप। तर्पयिष्यामि तानेव जलेन यमुनामनु ॥ २४ ॥ सत्यन्ते प्रतिजानामि सर्वशस्त्रभृताम्वर। इष्टापूर्त्तेन च शपे वीर्य्येण च सुतैरपि ॥ २५ ॥ निहत्य तान्रणे सर्वान् पाञ्चालान् पाण्डुभिः सह। शान्तिं गन्तास्मि तेषां वा रणे गन्ता सलोकताम् ॥ २६ ॥ सोऽहं तत्र गमिष्यामि यत्र ते पुरुषर्षभाः। हता मदर्थं संग्रामे युध्यमानाः किरीटिना ॥ २७ ॥ न हीदानीं सहाया मे परीप्सन्त्यनुपस्कृताः। श्रेयो हि पाण्डून्मन्यन्ते न तथास्मान्महाभुज ॥ २८ ॥ स्वयं हि मृत्युर्विहितः सत्यसन्धेन संयुगे। भवानुपेक्षां कुरुते शिष्यत्वादर्जुनस्य तु ॥ २९ ॥ अतो हि निहताः सर्वे येऽस्मञ्जयचिकीर्षवः। कर्णमेव तु पश्यामि सम्प्रत्यस्मज्जयैषिणम् ॥ ३० ॥ यो हि मित्रमविज्ञाय याथातथ्येन मन्दधीः। मित्रार्थे योजयत्येनं तस्यार्थो ऽवसीदति ॥ ३१ ॥ तादृग्रूपं कृतमिदं मम कार्य्यं सुहृत्तमैः। मोहाल्लुब्धस्य पापस्य जिह्मस्य धनमीहतः ॥ ३२ ॥ हतो जयद्रथो राजा सौमदत्तिश्च वीर्य्यवान्। अभीषाहाः शूरसेनाः शिवयोऽथ वशातयः ॥ ३३ ॥ सोऽहमद्य गमिष्यामि यत्र ते पुरुषर्षभाः। हता मदर्थं संग्रामे युध्यमानाः किरीटिना ॥ ३४ ॥ न हि मे जीवितेनार्थस्तानृते पुरुषर्षभान्। आचार्य्यः पाण्डुपुत्राणामनुजानातु नो भवान् ॥ ३५ ॥

इति द्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनानुतापे पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

---

धृतराष्ट्र उवाच। सिन्धुराजे हते तात समरे सव्यसाचिना। तथैव भूरिश्रवसि किमासीद्वो मनस्तदा ॥ १ ॥ दुर्योधनेन च

द्रोणस्तथोक्तः कुरुसंसदि। किमुक्तवान् परं तस्मै तन्ममाचक्ष्व सञ्जय॥ २॥

सञ्जय उवाच। निष्टानको महानासीत् सैन्यानां तव भारत। सैन्धवं निहतं दृष्ट्वा भूरिश्रवसमेव च॥ ३॥ अवामन्यन्त ते सर्व्वे तव पुत्रस्य मन्त्रितम्। येन मन्त्रेण निहताः शतशः पुरुषर्षभाः॥ ४॥ द्रोणस्तु तद्वचः श्रुत्वा तव पुत्रस्य दुर्म्मनाः। ध्यात्वा मुहूर्त्तं राजेन्द्र भृशमार्त्तोऽभ्यभाषत॥ ५॥

द्रोण उवाच। दुर्य्योधन किमेवं मां वाक्शरैरुपविध्यसि। अजय्यं हि तदा संख्ये ब्रुवाणं सव्यसाचिनम्॥ ६॥ एतेनैवार्ज्जुनं ज्ञातुमलं कौरव संयुगे। यच्छिखण्ड्यवधीद्भीष्मं पाल्यमानः किरीटिना॥ ७॥ अवध्यं निहतं दृष्ट्वा संयुगे देवदानवैः। तदैवाज्ञासिषमहं नेयमस्तीति भारती॥ ८॥ यः पुंसां त्रिषु लोकेषु सर्व्वशूरममंस्महि। तस्मिन्निपतिते शूरे किं शेषं पर्य्युपास्महे॥ ९॥ यान् स्म तान् ग्लहते तात शकुनिः कुरुसंसदि। अक्षान्न तेऽक्षा निशिता वाणास्ते शत्रुतापनाः॥ १०॥ तत्र ते घ्नन्ति नस्तात विशिखा जयनोदिताः। यांस्तदाख्यायमानस्त्वं विदुरेण न बुध्यसे॥ ११॥ यास्ता विलपतश्चापि विदुरस्य महात्मनः। धीरस्य वाचो नाश्रौषीः क्षेमाय वदतः शुभाः॥ १२॥ तदिदं वर्त्तते घोरमागतं वैशसं महत्। तस्यावमानाद्वाक्यस्य दुर्य्योधन कृते तव॥ १३॥ योऽवमन्य वचः पथ्यं सुहृदामाप्तकारिणाम्। स्वमतं कुरुते मूढः स शोच्यो न चिरादिव॥ १४॥ यच्च नः पश्यमानानां कृष्णामानाय्य यत् सभाम्। अनर्हतीं कुले जातां सर्व्वधर्म्मानुचारिणीम्॥ १५॥ तस्याधर्म्मस्य गान्धारे फलं प्राप्तमिदं महत्। नो चेत् पापं परे लोके त्वमर्च्छेथास्ततोऽधिकम्॥ १६॥ यच्च त्वं पाण्डवान् द्यूते विषमेण विजित्य च। प्राव्राजयस्तदारण्ये रौरवाजिनवाससः॥ १७॥ पुत्राणामिव

तेषां वै धर्ममाचरतां सदा। द्रुह्येत् को नु नरो लोके मद्‌न्यो ब्राह्मणब्रुवः॥ १८॥ पाण्डवानामयं कोपस्त्वया शकुनिना सह। आहृतो धृतराष्ट्रस्य सम्मते कुरुसंसदि॥ १९॥ दुःशासनेन संयुक्तः कर्णेन परिवर्द्धितः। क्षत्तुर्वाक्यमनादृत्य त्वयाभ्यस्तः पुनः पुनः ॥ २०॥ यत्ताः सर्वे पराभूताः पश्यैवारयतार्जुनम्। सिन्धु-राजमपाश्रित्य स वो मध्ये कथं हतः॥ २१॥ कथञ्च त्वयि कर्णे च कृपे शल्ये च जीवति। अश्वत्थाम्नि च कौरव्य निधनं सैन्धवो गतः॥ २२॥ युध्यतः सर्वराजानस्तेजस्तिग्ममुपासते। सिन्धु-राजं परित्रातुं स वो मध्ये कथं हतः॥ २३॥ मय्येव हि विशे-षेण तथा दुर्य्योधन त्वयि। आशंसत परित्राणमर्जुनात् स महीपतिः॥ २४॥ ततस्तस्मिन् परित्राणमलब्धवति फाल्गुनात्। न किञ्चिदपि पश्यामि जीवितस्थानमात्मनः॥ २५॥ मज्जन्तमिव चात्मानं धृष्टद्युम्नस्य किल्विषे। पश्याम्यहत्वा पाञ्चालान् सह तेन शिखण्डिना॥ २६॥ तस्मात् किमभितप्यन्तं वाक्शरैरुप-कृन्तसि। अशक्तः सिन्धुराजस्य भूत्वा त्राणाय भारत॥ २७॥ सौवर्णं सत्यसन्धस्य ध्वजमक्लिष्टकारिणः। अपश्यन् युधि भीष्मस्य कथमाशंससे जयम्॥ २८॥ मध्ये महारथानाञ्च यत्राहन्यत सैन्धवः। हतो भूरिश्रवाश्चैव किं शेषं तत्र मन्यसे॥ २९॥ कृप एव च दुर्द्धर्षो यदि जीवति पार्थिव। यो नागात् सिन्धुराजस्य वर्त्म तं पूजयाम्यहम्॥ ३०॥ यत्रापश्यं हतं भीष्मं पश्यतस्ते-ऽनुजस्य वै। दुःशासनस्य कौरव्य कुर्वाणं कर्म दुष्करम्॥ ३१॥ अवध्यकल्पं संग्रामे देवैरपि सवासवैः। न ते वसुन्धरास्तीति तदाहं चिन्तये नृप॥ ३२॥ इमानि पाण्डवानाञ्च सृञ्जयानाञ्च भारत। अनीकान्याद्रवन्ते मां सहितान्यद्य मारिष॥ ३३॥ नाहत्वा सर्वपाञ्चालान् कवचस्य विमोचनम्। कर्त्तास्मि समरे कर्म धार्त्तराष्ट्र हितं तव॥ ३४॥ राजन् ब्रूयाः सुतं मे त्वमश्व-

त्यामानमाहवे । न सोमकाः प्रमोक्तव्या जीवितं परिरक्षता ॥३५॥
यच्च पित्रानुशिष्टोऽसि तद्वचः परिपालय । आनृशंस्ये दमे सत्ये
आर्ज्जवे च स्थिरो भव ॥ ३६ ॥ धर्म्मार्थकामकुशलो धर्म्मार्थावप्य-
पीड़यन् । धर्म्मप्रधानकार्य्याणि कुर्य्याश्चेति पुनः पुनः ॥ ३७ ॥
दक्षिणाभिश्च सन्तर्प्या विप्राः पूज्याश्च सर्व्वशः । न चैषां विप्रियं
कार्य्यं ते हि वह्निशिखोपमाः ॥ ३८ ॥ एष त्वहमनीकानि प्रवि-
शाम्यरिसूदन । रणाय महते युक्तस्त्वया वाक्शल्यपीड़ितः
॥ ३९ ॥ त्वञ्च दुर्य्योधन बलं यदि शक्तोऽसि धारय । रात्रा-
वपि हि योत्स्यन्ति संरब्धाः कुरुसृञ्जयाः ॥ ४० ॥ एवमुक्त्वा
ततः प्रायात् द्रोणः पाण्डवसृञ्जयान् । मुष्णन् क्षत्रियतेजांसि
नक्षत्राणामिवांशुमान् ॥ ४१ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि द्रोणवाक्ये
एकपञ्चाशदधिकशततोऽध्यायः ॥ १५१ ॥

---

सञ्जय उवाच । ततो दुर्य्योधनो राजा द्रोणेनैव प्रचोदितः ।
अमर्षवशमापन्नो युद्धायैव मनो दधे ॥ १ ॥ अब्रवीच्च तदा कर्णं
पुत्रो दुर्य्योधनस्तव । पश्य कृष्णसहायेन पाण्डवेन किरीटिना
॥ २ ॥ आचार्य्यविहितं व्यूहं भित्त्वा देवैः सुदुर्भिदम् । तत्र
व्यायच्छमानस्य द्रोणस्य च महात्मनः ॥ ३ ॥ मिषतां योध-
मुख्यानां सैन्धवो विनिपातितः । पश्य राधेय राजानः पृथिव्यां
प्रवरा युधि ॥ ४ ॥ पार्थेनैकेन निहताः सिंहेनेवेतरे मृगाः ।
मम व्यायच्छमानस्य द्रोणस्य च महात्मनः ॥ ५ ॥ अल्पावशेषं
सैन्यं मे कृतं शक्रात्मजेन हि । कथं नियच्छमानस्य द्रोणस्य युधि
फाल्गुनः ॥ ६ ॥ प्रतिज्ञायां गतः पारं हत्वा सैन्धवमर्जुनः ।
अनिच्छतः कथं वीर द्रोणस्य युधि पाण्डवः ॥ ७ ॥ भिन्द्यात्

सुदुर्भिदं व्यूहं यतमानस्य संयुगे। प्रियो हि फाल्गुनोऽत्यर्थमाचा-
र्य्यस्य महात्मनः॥ ८॥ ततोऽस्य दत्तवान् द्वारमयुद्धेनैव संयुगे।
अभयं सैन्धवस्यादौ दत्त्वा द्रोणः परन्तपः॥ ९॥ प्रादात् किरीटिने
द्वारं पश्य निर्गुणतां मम। यद्यदास्यदनुज्ञां वै पूर्वमेव गृहान्
प्रति॥ १०॥ सिन्धुराजस्य समरे नाभविष्यज्जनक्षयः। जयद्रथो
जीवितार्थी गच्छमानो गृहान् प्रति॥ ११॥ मयानार्य्येण संरुद्धो
द्रोणात् प्राप्याभयं रणे। अद्य मे भ्रातरः क्षीणाश्चित्रसेनादयो
युधि। भीमसेनं समासाद्य पश्यतां नो दुरात्मनाम्॥ १२॥

कर्ण उवाच। आचार्य्यं मा विगर्हस्व शक्त्या युध्यत्यसौ द्विजः।
यथाबलं यथोत्साहं त्यक्त्वा जीवितमात्मनः॥ १३॥ यद्येनं
समतिक्रम्य प्रविष्टः श्वेतवाहनः। नात्र सूक्ष्मोऽपि दोषः स्या-
दाचार्य्यस्य कथञ्चन॥ १४॥ कृती दक्षो युवा शूरः कृतास्त्रो
लघुविक्रमः। दिव्यास्त्रयुक्तमास्थाय रथं वानरलक्षणम्॥ १५॥
कृष्णेन च गृहीताश्वमभेद्यकवचावृतः। गाण्डीवमजरं दिव्यं
धनुरादाय वीर्य्यवान्॥ १६॥ प्रवर्षन्निशितान् बाणान् बाहु-
द्रविणदर्पितः। यदर्जुनोऽभ्ययाद्द्रोणमुपपन्नं हि तत्र तत्॥ १७॥
आचार्य्यः स्थविरो राजन् शीघ्रयाने तथाक्षमः। बाहुव्यायाम-
चेष्टायामशक्तस्तु नराधिप॥ १८॥ तेनैनमभ्यतिक्रान्तः श्वेताश्वः
कृष्णसारथिः। तस्माद्दोषं न पश्यामि द्रोणस्यानेन हेतुना॥ १९॥
अजेयान् पाण्डवान्मन्ये द्रोणेनास्त्रविदा मृधे। तथा ह्येनमति-
क्रम्य प्रविष्टः श्वेतवाहनः॥ २०॥ दैवादिष्टोऽन्यथाभावो न
मन्ये विद्यते क्वचित्। यतो नो युध्यमानानां परं शक्त्या सुयो-
धन॥ २१॥ सैन्धवो निहतो युद्धे दैवमात्रं परं स्मृतम्। परं
यत्नं कुर्वतांश्च त्वया सार्द्धं रणाजिरे॥ २२॥ हत्वास्माकं
पौरुषञ्च दैवं पश्चात् करोति नः। सततं चेष्टमानानां निकृत्या
विक्रमेण च॥ २३॥ दैवोपसृष्टः पुरुषो यत् कर्म कुरुते नृप॥

कृतं कृतं हि तत्तस्य दैवेन विनिपात्यते ॥ २४ ॥ यत् कर्त्तव्यं मनुष्येण व्यवसायवता सदा। तत् कार्य्यमविशङ्केन सिद्धिर्दैवे-प्रतिष्ठिता ॥ २५ ॥ निकृत्या वञ्चिताः पार्था विषयोगैश्च भारत। दग्धा जतुगृहे चैव द्यूतेन च पराजिताः ॥ २६ ॥ राजनीतिं समाश्रित्य प्रहिताश्चैव काननम्। यत्नेन च कृतं तत्तद्दैवेन विनिपातितम् ॥ २७ ॥ युध्यस्व यत्नमास्थाय दैवं कृत्वा निरर्थकम्। यततस्तव तेषाञ्च दैवं मार्गेण पश्यति ॥ २८ ॥ न तेषां मतिपूर्वं हि सुकृतं विद्यते क्वचित्। दुष्कृतं तव वा वीर बुद्ध्या हीनं कुरूद्वह ॥ २९ ॥ दैवं प्रमाणं सर्व्वत्र सुकृतस्येतरस्य वा। अनन्य कर्म्म दैवं हि जागर्त्ति स्वपतामपि ॥ ३० ॥ बहूनि तव सैन्यानि योधाश्च बहवस्तव। न तथा पाण्डुपुत्राणामेवं युद्धमवर्त्तत ॥ ३१ ॥ तैरल्पैर्बहवो यूयं क्षयं नीताः प्रहारिणः। शङ्के दैवस्य तत् कर्म्म पौरुषं येन नाशितम् ॥ ३२ ॥

सञ्जय उवाच। एवं सम्भाषमाणानां बहु तत्तज्जनाधिप। पाण्डवानामनीकानि समदृश्यन्त संयुगे ॥ ३२ ॥ ततः प्रववृते युद्धं व्यतिषक्तरथद्विपम्। तावकानां परैः सार्द्धं राजन् दुर्मन्त्रिते तव ॥ ३४ ॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि पुनर्युद्धारम्भे द्विपञ्चाशदधिकशततोऽध्यायः समाप्तञ्च जयद्रथवधपर्व्व ॥ १५२ ॥

---

## अथ घटोत्कचवधपर्व्व।

सञ्जय उवाच। तद्द्रोणं गजानीकं बलं तव जनाधिप। पाण्डुसेनामतिक्रम्य योधयामास सर्व्वतः ॥ १ ॥ पाञ्चालाः कौरवाश्चैव योधयन्तः परस्परम्। यमराष्ट्राय महते परलोकाय दीक्षिताः ॥ २ ॥ शूराः शूरैः समागम्य शरतोमरशक्तिभिः। विव्यधुः

समरे तूर्णं निन्युश्चैव यमक्षयम् ॥ ३ ॥ रथिनां रथिभिः सार्द्धं रुधिरस्रावदारुणम्। प्रावर्त्तत महद्युद्धं निघ्नतामितरेतरम् ॥ ४॥ वारणाश्च महाराज समासाद्य परस्परम्। विषाणैर्र्हयामासुः सुसंक्रुद्धमदोत्कटाः ॥ ५ ॥ हयारोहान् हयारोहाः प्रासशक्ति-परश्वधैः। बिभिदुस्तुमुले युद्धे प्रार्थयन्तो महद्यशः ॥ ६ ॥ पत्तयश्च महाबाहो शतशः शस्त्रपाणयः। अन्योऽन्यमभ्यधावन्त नित्यं यत्ताः परन्तप ॥ ७ ॥ गोत्राणां नामधेयानां कुलानाञ्चैव मारिष। श्रवणाद्धि विजानीमः पाञ्चालान् कुरुभिः सह ॥ ८ ॥ अन्योऽन्यं समरे योधाः शरशक्तिपरश्वधैः। प्रैषयन् परलोकाय विचरन्तो ह्यभीतवत् ॥ ९ ॥ शरैर्दशदिशो राजंस्तेषां मुक्तैः सहस्रशः। न भ्राजन्ते यथातत्त्वं भास्करेऽस्तं गतेऽपि च ॥ १० ॥ तथा प्रयुध्यमानेषु पाण्डवेयेषु भारत। दुर्य्योधनो महाराज व्यवगाहत तद्बलम् ॥ ११ ॥ सैन्धवस्य वधेनैव भृशदुःखसमन्वितः। मर्त्तव्यमिति सञ्चिन्त्य प्राविशत्तद्द्विषां बलम् ॥ १२ ॥ नादयन्रथ-घोषेण कम्पयन्निव मेदिनीम्। अभ्यवर्त्तत पुत्रस्ते पाण्डवाना-मनीकिनीम् ॥ १३ ॥ स सन्निपातस्तुमुलस्तस्य तेषाञ्च भारत। अभवत् सर्वसैन्यानामभावकरणो महान् ॥ १४ ॥ यथा मध्य-न्दिने सूर्य्यं प्रतपन्तमिवांशुभिः। तथा तव सुतं मन्ये प्रतपन्तं शरार्च्चिभिः ॥ १५ ॥ न शेकुर्भ्रातरं युद्धे पाण्डवाः प्रतिवीक्षितुम्। पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ॥ १६ ॥ पर्य्यधावन्त पाञ्चाला वध्यमाना महात्मना। रुक्मपुङ्खैः प्रसन्नाग्रैस्तव पुत्रेण धन्विना ॥ १७ ॥ अर्द्यमानाः शरैस्तीक्ष्णैर्न्यपतन् पाण्डुसैनिकाः। न तादृशं रणे कर्म कृतवन्तः स्म पाण्डवाः ॥ १८ ॥ यादृशं कृत-वान् राजा पुत्रस्तव विशाम्पते। पुत्रेण तव सा सेना पाण्डवी मथिता रणे ॥ १९ ॥ नलिनी द्विरदेनेव समन्ताद्विप्रलोडिता। क्षीणतोयानिलार्काभ्यां हतत्विड़िव पद्मिनी ॥ २० ॥ बभूव पाण्डवी

सेना तव पुत्रस्य तेजसा। पाण्डुसेनां हतां दृष्ट्वा तव पुत्रेण भारत ॥ २१ ॥ भीमसेनपुरोगास्तु पाञ्चालाः समुपाद्रवन्। स भीमसेनं दशभिर्माद्रीपुत्रौ त्रिभिस्त्रिभिः ॥ २२ ॥ विराटद्रुपदौ षड्भिः शतेन च शिखण्डिनम्। धृष्टद्युम्नञ्च सप्तत्या धर्मपुत्रञ्च सप्तभिः ॥ २३ ॥ कैकेयांश्चैव चेदींश्च बहुभिर्निशितैः शरैः। सात्वतं पञ्चभिर्विद्ध्वा द्रौपदेयांस्त्रिभिस्त्रिभिः ॥ २४ ॥ घटोत्कचञ्च समरे विद्ध्वा सिंह इवानदत्। शतशश्चापरान् योधान् द्विपाश्वनां महारणे ॥ २५ ॥ शरीराणि चकर्त्तोग्रैः क्रुद्धोऽन्तक इव प्रजाः। तस्य तान्निघ्नतः शत्रून् रुक्मपृष्ठं महद्धनुः ॥ २६ ॥ भल्लाभ्यां पाण्डवो ज्येष्ठस्त्रिधा चिच्छेद मारिष। विव्याध चैनं दशभिः सम्यगस्तैः शितैः शरैः ॥ २७ ॥ मर्म भित्त्वा तु ते सर्वे संलग्नाः क्षितिमाविशन्। ततः परिवृता योधाः परिवव्रुर्युधिष्ठिरम् ॥२८॥ वृत्रहत्ये यथा देवा परिवव्रुः पुरन्दरम। ततो युधिष्ठिरो राजा तव पुत्रस्य मारिष ॥ २९ ॥ शरं परमदुर्द्धर्षं प्रेषयामास संयुगे। स तेन भृशसंविद्धो निषसाद रथोत्तमे ॥ ३० ॥ ततः पाञ्चाल-सैन्यानां भृशमासीद्रवो महान्। हतो राजेति राजेन्द्र तव शब्दोऽभवन्महान् ॥ ३१ ॥ बाणशब्दरवश्चोग्रः शुश्रुवे तत्र भारत। अथ द्रोणो द्रुतं तत्र प्रत्यदृश्यत संयुगे ॥ ३२ ॥ हृष्टो दुर्य्योधन-श्चापि दृढ़मादाय कार्मुकम्। तिष्ठतिष्ठेति राजानं ब्रुवन् पाण्डव-मभ्ययात् ॥ ३३ ॥ प्रत्युद्ययुश्च त्वरिताः पाञ्चाला राजगृद्धिनः। तान् द्रोणः प्रतिजग्राह परीप्सन् कुरुसत्तमम् ॥ ३४ ॥ चण्डवाताहता-न्मेघान् निघ्नन्रश्मिमुचो यथा। ततो राजन्महानासीत् संग्रामो भूमिवर्द्धनः। तावकानां परेषाञ्च समेतानां युयुत्सया ॥ ३५ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्वणि दुर्य्योधनपराभवे त्रयःपञ्चाशदधिकशततोऽध्यायः ॥ १५३॥

धृतराष्ट्र उवाच । यत्तदा प्राविशत् पाण्डूनाचार्य्यः कुपितो बली । उक्त्वा दुर्य्योधनं सम्यक् मम शास्त्रातिगं सुतम् ॥ १ ॥ प्रविश्य विचरन्तञ्च रथे शूरमवस्थितम् । कथं द्रोणं महेष्वासं पाण्डवाः समवारयन् ॥ २ ॥ केऽरक्षन् दक्षिणञ्चक्रमाचार्य्यस्य महाहवे । के च वाममरक्षन्त निघ्नतः शात्रवान् दृढ़म् ॥ ३ ॥ के वास्य पृष्ठतो ह्यला वीरा वीरस्य योधिनः । के पुरस्तादवर्त्तन्त रथिनस्तस्य शत्रवः ॥ ४ ॥ मन्ये तानस्पृशच्छीतमतिवेलमनार्त्तवम् । मन्ये ते समवेपन्त गावो वै शिशिरे यथा ॥ ५ ॥ यत् प्राविशन्महेष्वासः पाञ्चालानपराजितः । नृत्यन् स रथमार्गेषु सर्वशस्त्रभृताम्वरः ॥ ६ ॥ निर्द्दहन् सर्वसैन्यानि पाञ्चालानां रथर्षभः । धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान् ॥ ७ ॥

सञ्जय उवाच । सायाह्ने सैन्धवं हत्वा राज्ञा पार्थः समेत्य च । सात्यकिश्च महेष्वासो द्रोणमेवाभ्यधावताम् ॥ ८ ॥ तथो युधिष्ठिरस्तूर्णं भीमसेनश्च पाण्डवः । पृथक्चमूभ्यां संसक्तौ द्रोण मेवाभ्यधावताम् ॥ ९ ॥ तथैव नकुलो धीमान् सहदेवश्च दुर्जयः । धृष्टद्युम्नः शतानीको विराटश्च सकैकयः ॥ १० ॥ मत्स्याः शाल्वाः ससेनाश्च द्रोणमेव ययुर्युधि । द्रुपदश्च तथा राजा पाञ्चालैरभिरक्षितः ॥ ११ ॥ धृष्टद्युम्नपिता राजन् द्रोणमेवाभ्यवर्त्तत । द्रौपदेया महेष्वासा राक्षसश्च घटोत्कचः ॥ १२ ॥ ससेनास्तेऽभ्यवर्त्तन्त द्रोणमेव महाद्युतिम् । प्रभद्रकाश्च पाञ्चालाः षट्सहस्राः प्रहारिणः ॥ १३ ॥ द्रोणमेवाभ्यवर्त्तन्त पुरस्कृत्य शिखण्डिनम् । तथेतरे नरव्याघ्राः पाण्डवानां महारथाः ॥ १४ ॥ सहिताः सन्न्यवर्त्तन्त द्रोणमेव नरर्षभ । तेषु शूरेषु युद्धाय गतेषु भरतर्षभ ॥ १५ ॥ बभूव रजनी घोरा भीरूणां भयवर्द्धिनी । योधानामपि सा घोरा राजन्नन्तकगामिनी ॥ १६ ॥ कुञ्जराश्च मनुष्याणां प्राणान्तकरणी तदा । तस्यां रजन्यां घोरायां नदन्त्यः

सर्व्वत शिवाः ॥ १७ ॥ न्यवेदय भयं घोरं सज्वालकवलैर्मुखैः ।
उलूकाश्चाप्यराशन्त शंसन्तो विपुलं भयम् ॥ १८ ॥ विशेषतः
कौरवाणां ध्वजिन्यामतिदारुणाः । ततः सैन्येषु राजेन्द्र शब्द-
समभवन्महान् ॥ १९ ॥ भेरीशब्देन महता मृदङ्गानां स्वनेन च ।
गजानां गर्ज्जितैश्चापि तुरङ्गाणाञ्च ह्रेषितैः ॥ २० ॥ खुरशब्द-
निनादैश्च तुमुलं सर्व्वतोऽभवत् । ततः समभवद्युद्धं सन्ध्यायामति-
दारुणम् ॥ २१ ॥ द्रोणस्य च महाराज सृञ्जयानाञ्च सर्व्वशः ।
तमसा चावृते लोके न प्राज्ञायत किञ्चन ॥ २२ ॥ सैन्येन रजसा
चैव समन्तादुच्छ्रितेन च । नरस्याश्वस्य नागस्य समसज्जत
शोणितम् ॥ २३ ॥ न पश्याम रजो भौमं कश्मलेनाभिसंवृताः ।
रात्रौ वंशवनस्येव दह्यमानस्य पर्व्वते ॥ २४ ॥ घोरश्चटचटाशब्दः
शस्त्राणां पततामभूत् । मृदङ्गानकनिह्रादैर्झल्लकीपटहैस्तथा ॥ २५॥
चीत्कारैर्हेषिताकारैः सर्व्वमेवाकुलं विभो । नैव स्वेन परे राजन्
प्राज्ञायन्त तमोवृते ॥ २६ ॥ उन्मत्तमिव तत्सर्व्वम्बभूव रजनीमुखे ।
भौमं रजोऽथ राजेन्द्र शोणितेन समुच्छ्रितम् ॥ २७ ॥ शातकौ-
म्भैश्च कवचैर्भूषणैश्च तमोऽभ्यगात् । ततः सा भारती सेना मणि-
हेमविभूषिता ॥ २८ ॥ द्यौरिवासीत् सनक्षत्रा रजन्यां भरत-
र्षभ । गोमायुबलसंघुष्टा शक्तिध्वजसमाकुला ॥ २९ ॥ दार-
णाभिरुता घोरा क्ष्वेड़ितोत्क्रुष्टनादिता । ततोऽभवन्महाञ्छब्द-
स्तुमुलो लोमहर्षणः ॥ ३० ॥ समावृण्वन्दिशः सर्व्वा महेन्द्राशनि
निस्वनः । सा निशीथे महाराज सेनादृश्यत भारती ॥ ३१ ॥
अङ्गदैः कुण्डलैर्निष्कैः शस्त्रैश्चैवावभासिता । तत्र नागा रथाश्चैव
जाम्बूनदविभूषिताः ॥ ३२ ॥ निशायां प्रत्यदृश्यन्त मेघा इव
सविद्युतः । ऋष्टिशक्तिगदाखड्गमुषलप्रासपट्टिशाः ॥ ३३ ॥
सम्पतन्तः स्म दृश्यन्ते भ्राजमाना इवाग्नयः । दुर्य्योधनपुरोवातां
रथगुल्मबलाहकाम् ॥ ३४ ॥ वादित्रघोषस्तनितां चापविद्युद्ध्वजै-

वृताम्। द्रोणपाण्डवपर्जन्यां खड्गशक्तिगदाशनीम् ॥ ३५ ॥ शरधारास्त्रपवनां भृशं शीतोष्णसंकुलाम्। घोरां विस्मापनीमुग्रां जीवितच्छेदविप्लुताम् ॥ ३६ ॥ तां प्राविशन्नतिभयां सेनां युद्धचिकीर्षव। तस्मिन्नात्रिमुखे घोरे महाशब्दनिनादिते ॥ ३७ ॥ भीरूणां त्रासजनने शूराणां हर्षवर्द्धने। रात्रियुद्धे महाघोरे वर्त्तमाने सुदारुणे ॥ ३८ ॥ द्रोणमभ्यद्रवन् क्रुद्धाः सहिताः पाण्डुसृञ्जयाः। ये ये प्रमुखतो राजन्नावर्त्तन्त महात्मनः ॥ ३९ ॥ तान् सर्वान् विमुखांश्चक्रे कांश्चिन्निन्ये यमक्षयम्। तानि नागसहस्राणि रथानामयुतानि च ॥ ४० ॥ पदातिहयसङ्घानां प्रयुतान्यर्बुदानि च। द्रोणेनैकेन नाराचैर्निर्भिन्नानि निशामुखे ॥ ४१ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि द्रोणयुद्धे
चतुःपञ्चाशदधिकशततोऽध्यायः ॥ १५४ ॥

---

धृतराष्ट्र उवाच। तस्मिन् प्रविष्टे दुर्द्धर्षे सृञ्जयानामितौजसि। अमृष्यमाणे संरब्धे का वोऽभूद्वै मतिस्तदा ॥ १ ॥ दुर्य्योधनं तथा पुत्रमुक्त्वा शास्त्रातिगं मम। यत् प्राविशदमेयात्मा किं पार्थः प्रत्यपद्यत ॥ २ ॥ निहते सैन्धवे वीरे भूरिश्रवसि चैव हि। यदभ्यगान्महातेजाः पाञ्चालानपराजितः ॥ ३ ॥ किममन्यत दुर्द्धर्षे प्रविष्टे शत्रुतापने। दुर्य्योधनस्तु किं कृत्यं प्राप्तकालममन्यत ॥ ४ ॥ के च तं वरदं वीरमन्वयुर्द्विजसत्तमम्। के चास्य पृष्ठतः सूत वीराः शूरस्य युध्यतः ॥ ५ ॥ के पुरस्तादयुध्यन्त निघ्नतः शात्रवान्रणे। मन्येऽहं पाण्डवान् सर्वान् भारद्वाजशरार्द्दितान् ॥ ६ ॥ शिशिरे कम्पमाना वै कृशा गाव इव प्रभो। प्रविश्य स महेष्वासः पाञ्चालानरिमर्द्दनः। कथं नु पुरुषव्याघ्रः पञ्चत्वमुपजग्मिवान् ॥ ७ ॥ सर्वेषु सैन्येषु च संहितेषु रात्रौ समेतेषु महारथेषु। संलोडय-

मानेषु पृथग्विधेषु के वस्तदानीं मतिमन्त आसन् ॥ ८॥ हतांश्चैव विषक्तांश्च पराभूतांश्च शंससि। रथिनो विरथांश्चैव कृतान् युद्धेषु मामकान् ॥ ९ ॥ तेषां सलोड्यमानानां पाण्डवैर्हतचेतसाम्। अन्धे तमसि मग्नानामभवत् का मतिस्तदा ॥ १०० ॥ प्रहृष्टांश्चाप्युदग्रांश्च पाण्डवेयान् ब्रवीषि मे। अप्रहृष्टान् विमनसो वित्रस्तांश्चैव मामकान् ॥ ११ ॥ कथमेषां ततः सूत पार्थानामपलायिनाम्। प्रकाशमभवद्रात्रौ कथं कुरुषु सञ्जय ॥ १२ ॥

सञ्जय उवाच। रात्रियुद्धे तदा राजन् वर्त्तमाने सुदारुणे। द्रोणमभ्यद्रवन् सर्वे पाण्डवाः सह सोमकैः ॥ १३ ॥ ततो द्रोणः कैकयांश्च धृष्टद्युम्नस्य चात्मजान्। सम्प्रैषयत् प्रेतलोकं सर्वानिषुभिराशुगैः ॥ १४ ॥ ये ये प्रमुखतो राजन्नवर्त्तन्त महारथाः। तान् सर्वान् प्रेषयामास पितृलोकाय पार्थिवान् ॥ १५ ॥ प्रमथ्नन्तं तदा वीरं भारद्वाजं महारथम्। अभ्यवर्त्तत संक्रुद्धः शिबी राजा प्रतापवान् ॥ १६ ॥ तमापतन्तं सम्प्रेक्ष्य पाण्डवानां महारथम् । विव्याध दशभिर्द्रोणः सर्वपारशवैः शरैः ॥ १७ ॥ तं शिबिः प्रतिविव्याध त्रिंशद्भिः कङ्कपत्रकैः। सारथिञ्चास्य भल्लेन स्मयमानो न्यपातयत् ॥ १८ ॥ तस्य द्रोणो हयान् हत्वा सारथिञ्च महात्मनः। अथास्य सशिरस्त्राणं शिरः कायादपाहरत् ॥ १९ ॥ ततोऽस्य सारथिं क्षिप्रमन्यं दुर्य्योधनोऽादिशत्। स तेन संगृहीताश्वः पुनरभ्यद्रवद्रिपून् ॥ २० ॥ कलिङ्गानाञ्च सैन्येन कलिङ्गस्य सुतो रणे। पूर्वं पितृवधात् क्रुद्धो भीमसेनमुपाद्रवत् ॥ २१ ॥ स भीमं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः। विशोकं त्रिभिराजघ्ने ध्वजमेकेन पत्रिणा ॥ २२ ॥ कलिङ्गानान्तु तं शूरं क्रुद्धं क्रुद्धो वृकोदरः। रथाद्रथमभिद्रुत्य मुष्टिना निजघान ह ॥ २३ ॥ तस्य मुष्टिहतस्याजौ पाण्डवेन बलीयसा। सर्वाण्यस्थीनि सहसा प्रापतन् वै पृथक् पृथक् ॥ २४ ॥ तं कर्णो

भ्रातरश्चास्य नामृष्यन्त परन्तप। ते भीमसेनं नाराचैर्जघ्नुराशी-
विषोपमैः ॥ २५ ॥ ततः शत्रुरथं त्यक्त्वा भीमो ध्रुवरथं गतः।
ध्रुवञ्चास्यन्तमनिशं मुष्टिना समपोथयत् ॥ २६ ॥ स तथा पाण्डु-
पुत्रेण बलिनाभिहतोऽपतत्। तं निहत्य महाराज भीमसेनो
महाबलः ॥ २७ ॥ जयरातरथं प्राप्य मुहुः सिंह इवानदत्।
जयरातमथाक्षिप्य नदन् सव्येन पाणिना ॥ २८ ॥ तलेन नाश-
यामास कर्णस्यैवाग्रतः स्थितः। कर्णस्तु पाण्डवे शक्तिं काञ्चनीं
समवासृजत् ॥ २९ ॥ ततस्तामवजग्राह प्रहसन् पाण्डुनन्दनः।
कर्णायैव च दुर्द्धर्षश्चिक्षेपाजौ वृकोदरः ॥ ३० ॥ तामापतन्तीं-
श्चिच्छेद शकुनिस्तैलपायिना। एतत् कृत्वा महत् कर्म रणे-
ऽद्भुतपराक्रमः ॥ ३१ ॥ पुनः स्वरथमास्थाय दुद्राव तव वाहि-
नीम्। तमायान्तं जिघांसन्तं भीमं क्रुद्धमिवान्तकम् ॥ ३२ ॥
न्यवारयन्महाबाहुस्तव पुत्रो विशाम्पते। महता शरवर्षेण छाद-
यन्तो महारथाः ॥ ३३ ॥ दुर्मदस्य ततो भीमः प्रहसन्निव
संयुगे। सारथिञ्च हयांश्चैव शरैर्निन्ये यमक्षयम् ॥ ३४ ॥
दुर्मदस्तु ततो यानं दुष्कर्णस्यावचक्रमे। तावेकरथमारूढौ
भ्रातरौ परतापनौ ॥ ३५ ॥ संग्रामशिरसो मध्ये भीमं द्वाव-
भ्यधावताम्। तथाम्बुपतिमित्रौ हि तारकं दैत्यसत्तमम् ॥ ३६ ॥
ततस्तु दुर्मदश्चैव दुष्कर्णश्च तवात्मजौ। रथमेकं समारुह्य भीमं
बाणैरविध्यताम् ॥ ३७ ॥ ततः कर्णस्य मिषतो द्रौणेर्दुर्य्योधनस्य
च। कृपस्य सोमदत्तस्य बाह्लीकस्य च पाण्डवः ॥ ३८ ॥ दुर्मदस्य
च वीरस्य दुष्कर्णस्य च तं रथम्। पादप्रहारेण धरां प्रावेशय-
दरिन्दमः ॥ ३९ ॥ ततः सुतौ तौ बलिनौ शूरौ दुष्कर्णदुर्मदौ।
मुष्टिनाहत्य संक्रुद्धो ममर्द्द च ननर्द्द च ॥ ४० ॥ ततो हाहाकृते
सैन्ये दृष्ट्वा भीमं नृपाब्रुवन्। रुद्रोऽयं भीमरूपेण धार्त्तराष्ट्रेषु
युध्यति ॥ ४१ ॥ एवमुक्त्वा पलायन्ते सर्व्वे भारत पार्थिवाः

विसंज्ञा वाहयन् वाहान्न च द्वौ सह धावतः ॥ ४२ ॥ ततो वस्ते भृशललिते निशामुखे सुपूजितो नृपवृषभैर्वृकोदरः। महाबलः कमलविबुद्धलोचनो युधिष्ठिरं नृपतिमपूजयद्बली ॥ ४३ ॥ ततो यमौ द्रुपदविराटकैकया युधिष्ठिरश्चापि परां मुदं ययुः। वृकोदरं सुभृशमपूजयंश्च ते यथान्धके प्रतिनिहते हरं सुराः॥ ४४ ॥ ततः सुतास्ते वरुणात्मजोपमा रुषान्विताः सहगुरुणा महात्मना। वृकोदरं सरथपदातिकुञ्जरा युयुत्सवो भृशमभिपर्य्यवारयन् ॥ ४५ ॥ ततोऽभवत्तिमिरघनैरिवावृते महाभये भयदमतीव दारुणम्। निशामुखे वृकबलगृध्रमोदनं महात्मनां नृपवर युद्धमुत्तमम् ॥ ४६ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि भीमपराक्रमे पञ्चपञ्चाशदधिकशतोऽध्यायः ॥ १५५ ॥

---

सञ्जय उवाच। प्रायोपविष्टे तु हते पुत्रे सात्यकिना ततः। सोमदत्तो भृशं क्रुद्धः सात्यकिं वाक्यमब्रवीत् ॥ १ ॥ क्षत्रधर्मः पुरा दृष्टो यस्तु देवैर्महात्मभिः। तत्त्वं सात्वत सन्त्यज्य दस्युधर्मे रतः कथम् ॥ २ ॥ पराङ्मुखाय दीनाय न्यस्तशस्त्राय याचते। क्षत्रधर्मरतः प्राज्ञः कथं नु प्रहरेद्रणे ॥ ३ ॥ द्वावेव किल वृष्णीनां तत्र मुख्यौ महारथौ। प्रद्युम्नश्च महातेजास्त्वञ्चैव युधि सात्वत ॥ ४ ॥ कथं प्रायोपविष्टाय पार्थेन छिन्नबाहवे। नृशंसम्पतनीयञ्च तादृशं कृतवानसि ॥ ५ ॥ कर्मणस्तस्य दुर्वृत्त फलं प्राप्नुहि संयुगे। अद्य छेत्स्यामि ते मूढ़ शिरो विक्रम्य पत्रिणा ॥ ६ ॥ शपे सात्वतपुत्राभ्यामिष्टेन सुकृतेन च। अनतीतामिमां रात्रिं यदि त्वां वीरमानिनम् ॥ ७ ॥ अरक्ष्यमाणं पार्थेन जिष्णुना ससुतानुजम्। न हन्यां नरके घोरे पतेयं वृष्णि-

षांसन॥ ८॥ एवमुक्त्वा तु संक्रुद्धः सोमदत्तो महाबलः। दध्मौ शङ्खञ्च तारेण सिंहनादं ननाद च ॥ ९॥ ततः कमलपत्राक्षः सिंहदंष्ट्रो महाबलः। सात्यकिर्भृशसंक्रुद्धः सोमदत्तमथाब्रवीत् ॥ १०॥ कौरवेय नमे त्रासः कथञ्चिदपि विद्यते। त्वया सार्द्ध-मथान्यैश्च युध्यतो हृदि कश्चन॥ ११॥ यदि सर्वेण सैन्येन गुप्तो मां योधयिष्यसि। तथापि न व्यथा काचित्त्वयि स्यान्मम कौरव ॥ १२॥ युद्धसारेण वाक्येन सतामबमतेन च। नाहं भीष-यितुं शक्यः क्षत्रवृत्ते स्थितस्त्वया ॥ १२॥ यदि तेऽस्ति युयुत्-साद्य मया सह नराधिप। निर्द्दयो निशितैर्वाणैः प्रहर प्रहरामि ते॥ १३॥ हतो भूरिश्रवा राजंस्तव पुत्रो महारथः। शलश्चैव तदा वीर वृषसेनश्च कर्षितः॥ १४॥ त्वाञ्चाप्यद्य वधिष्यामि सपुत्रं सहवान्धवम्। तिष्ठेदानीं रणे यत्तः कौरवोऽसि महा-वलः॥ १५॥ यस्मिन् दानं दमः शौचमहिंसा ह्रीर्धृतिः क्षमा। अनपायानि सर्वाणि नित्यं राज्ञि युधिष्ठिरे॥ १६॥ मृदङ्ग-केतोस्तस्य त्वं तेजसा निहतः पुरा। सकर्णसौवलः सङ्ख्ये विनाशमुपयास्यसि॥ १७॥ शपेऽहं कृष्णचरणैरिष्टापूर्त्तेन चैव हि। यदि त्वां ससुतं वाणैर्नहन्यां युधि रोषितः॥ १८॥ अप-यास्यसि चेत्त्यक्त्वा ततो मुक्तो भविष्यसि। एवमाभाष्य चान्योऽन्यं क्रोधसंरक्तलोचनौ ॥ १९॥ प्रवृत्तौ शरसम्पातं कर्त्तुं पुरुष-सत्तमौ। ततो रथसहस्रेण हयानामयुतेन च ॥ २०॥ दुर्य्यो-धनः सोमदत्तं परिवार्य्य व्यवस्थितः। शकुनिश्च सुसंक्रुद्धः सर्व-शस्त्रपरिग्रहः॥ २१॥ पुत्रपौत्रैः परिवृतो भ्रातृभिश्चेन्द्रविक्रमैः। श्यालस्तव महाराज वज्रसंहननो युवा ॥ २२॥ साग्रं शतसह-स्रन्तु हयानां तस्य धीमतः। सोमदत्तं महेष्वासं समन्तात् पर्य्यवारयत् ॥ २३॥ रक्ष्यमाणश्च वलिभिश्छादयामास सात्य-किम्। तं छाद्यमानं विशिखैर्दृष्ट्वा सन्नतपर्वभिः ॥ २४॥ धृष्ट-

द्युम्नोऽभ्ययात् क्रुद्धः प्रगृह्य महतीञ्चमूम्। चण्डवाताभिसृष्टाना-मुदधीनामिव स्वनः॥ २५॥ आसीद्राजन् वलौघानामन्योऽन्य-मभिनिघ्नताम्। विव्याध सोमदत्तस्य सात्वतं नवभिः शरैः॥ २६॥ सात्यकिर्नवभिश्चैनमवधीत् कुरुपुङ्गवम्। सोऽतिविद्धो बलवता समरे दृढ़धन्विना॥२७॥ रथोपस्थं समासाद्य मुमोह गत-चेतनः। तं विमूढ़ं समालक्ष्य सारथिस्त्वरयान्वितः॥ २८॥ अपोवाह रणाद्वीरं सोमदत्तं महारथम्। तं विसञ्ज्ञं समालक्ष्य युयुधानशरार्द्दितम्॥ २९॥ अभ्यधावत्ततो द्रोणो यदुवीरजिघां-सया। तमायान्तमभिप्रेक्ष्य युधिष्ठिरपुरोगमाः॥ ३०॥ परि-वव्रुर्महात्मानं परीप्सन्तो यदूद्वहम्। ततः प्रववृते युद्धं द्रोणस्य सह पाण्डवैः॥ ३१॥ वलेरिव सुरैः पूर्वं त्रैलोक्यजयकाङ्क्षया। ततः सायकजालेन पाण्डवानीकमावृणोत्॥ ३२॥ भारद्वाजो महातेजा विव्याध च युधिष्ठिरम्। सात्यकिं दशभिर्वाणैर्विंशत्या पार्षतं शरैः॥ ३३॥ भीमसेनञ्च नवभिर्नकुलं पञ्चभिस्तथा। सहदेवं तथाष्टाभिः शतेन च शिखण्डिनम्॥ ३४॥ द्रौपदेया-न्महावाहुः पञ्चभिः पञ्चभिः शरैः। विराटं मत्स्यमष्टाभिर्द्रुपदं दशभिः शरैः॥ ३५॥ युधामन्युं त्रिभिः षड्भिरुत्तमौजस-माहवे। अन्यांश्च सैनिकान् विद्ध्वा युधिष्ठिरमुपाद्रवत्॥ ३६॥ ते वध्यमाना द्रोणेन पाण्डुपुत्रस्य सैनिकाः। प्राद्रवन् वै भया-द्राजन् सार्त्तनादा दिशो दश॥ ३७॥ काल्यमानन्तु तत्सैन्यं दृष्ट्वा द्रोणेन फाल्गुनः। किञ्चिदागतसंरम्भो गुरुं पार्थोऽभ्य-यात् द्रुतम्॥ ३८॥ दृष्ट्वा द्रोणस्तु वीभत्सुमभिधावन्तमाहवे। सन्न्यवर्त्तत तत्सैन्यं पुनर्यौधिष्ठिरं नृप॥ ३९॥ ततो युद्धमभू-द्भूयो भारद्वाजस्य पाण्डवैः। द्रोणस्तव सुतै राजन् सर्वतः परि-वारितः॥ ४०॥ व्यधमत् पाण्डुसैन्यानि तूलराशिमिवानलः। तं ज्वलन्तमिवादित्यं दीप्तानलसमद्युतिम्॥ ४१॥ राजन्ननिश-

मत्यन्तं दृष्ट्वा द्रोणशरार्चिषम्। मण्डलीकृतधन्वानं तपन्तमिव भास्करम् ॥ ४२ ॥ दहन्तमहितान् सैन्ये नैनं कश्चिदवारयत्। यो यो हि प्रमुखे तस्य तस्थौ द्रोणस्य पूरुषः ॥ ४३ ॥ तस्य तस्य शिरश्छित्त्वा ययौ द्रोणशरः क्षितिम्। एवं सा पाण्डवी सेना बध्यमाना महात्मना ॥ ४४ ॥ प्रदुद्राव पुनर्भीता पश्यतः सव्यसाचिनः। सम्प्रभग्नं बलं दृष्ट्वा द्रोणेन निशि भारत ॥ ४५ ॥ गोविन्दमब्रवीज्जिष्णुर्गच्छ द्रोणरथं प्रति। ततो रजतगोक्षीरकुन्देन्दुसदृशप्रभान् ॥ ४६ ॥ चोदयामास दाशार्हो हयान् द्रोणरथं प्रति। भीमसेनोऽपि तं दृष्ट्वा यान्तं द्रोणाय फाल्गुनम् ॥ ४७ ॥ स्वसारथिमुवाचेदं द्रोणानीकाय मां वह। सोऽपि तस्य वचः श्रुत्वा विशोकोऽवाहयद्धयान् ॥ ४८ ॥ पृष्ठतः सत्यसन्धस्य जिष्णोर्भरतसत्तम। तौ दृष्ट्वा भ्रातरौ यत्तौ द्रोणानीकमभिद्रुतौ ॥ ४९ ॥ पाञ्चालाः सृञ्जया मत्स्याश्चेदिकारूषकोशलाः। अन्वगच्छन्महाराज कैकयाश्च महारथाः ॥ ५० ॥ ततो राजन्नभूद्घोरः संग्रामो लोमहर्षणः। बीभत्सुर्दक्षिणं पार्श्वमुत्तरञ्च वृकोदरः ॥ ५१ ॥ महद्भ्यां रथवृन्दाभ्यां बलं जगृहतुस्तव। तौ दृष्ट्वा पुरुषव्याघ्रौ भीमसेनधनञ्जयौ ॥ ५२ ॥ धृष्टद्युम्नोऽभ्ययाद्राजन् सात्यकिश्च महाबलः। चण्डवाताभिपन्नानामुदधीनामिव स्वनः ॥ ५३ ॥ आसीद्राजन् बलौघानां तदान्योऽन्यमभिघ्नताम्। सौमदत्तिवधात् क्रुद्धो दृष्ट्वा सात्यकिमाहवे ॥ ५३ ॥ द्रौणिरभ्यद्रवत् क्रुद्धः शाश्वतं रणमूर्द्धनि। तमापतन्तं समरे शैनेयस्य रथं प्रति ॥ ५५ ॥ प्रत्युद्ययौ महद्रुद्धो भैमसेनिर्महाबलः। कार्ष्णायसं महाघोरमृक्षचर्मावृतं महत् ॥ ५६ ॥ महान्तं रथमास्थाय विंशन्नल्वान्तरान्तरम्। विक्षिप्तयन्त्रसन्नाहं महामेघौघनिस्वनम् ॥ ५७ ॥ युक्तं गजनिभैर्वाहैर्न हयैर्नापि वारणैः। विक्षिप्तपक्षचरणविवृताक्षेण कूजता ॥ ५८ ॥ ध्वजेनोच्छ्रितदण्डेन गृध्रराजेन

राजता । लोहिताद्रि पताकञ्च अन्त्रमालाविभूषितम् ॥ ५९ ॥
अष्टचक्रसमायुक्तमास्थाय विपुलं रथम् । शूलमुद्गरधारिण्या शैल-
पादपहस्तया ॥ ६० ॥ रक्षसां घोररूपाणामक्षौहिण्या समा-
वृतः । तमुद्यतमहाचापं निशम्य व्यथिता नृपाः ॥ ६१ ॥ युगान्त-
कालसमये दण्डहस्तमिवान्तकम् । ततस्तं गिरिशृङ्गाभं भीम-
रूपं भयावहम् ॥ ६२ ॥ दंष्ट्राकरालोग्रमुखं शङ्कुकर्णं महाहनुम् ।
ऊर्द्ध्वकेशं विरूपाक्षं दीप्तास्यं निम्नतोदरम् ॥ ६३ ॥ महाश्व-
भ्रगलद्वारं किरीटच्छन्नमुर्द्धजम् । त्रासनं सर्व्वभूतानां व्यात्तानन-
मिवान्तकम् ॥ ६४ ॥ वीक्ष्य दीप्तमिवायान्तं रिपुविक्षोभकारकम् ।
तमुद्यतमहाचापं राक्षसेन्द्रं घटोत्कचम् ॥ ६५ ॥ भयार्द्दिता प्रचु-
क्षोभ तव पुत्रस्य वाहिनी । वायुना क्षोभितावर्त्ता गङ्गेवोर्द्ध्व-
तरङ्गिणी ॥ ६६ ॥ घटोत्कचप्रमुक्तेन सिंहनादेन भीषिताः ।
प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नृपा भृशम् ॥ ६७ ॥ ततोऽश्मवृष्टि-
रत्यन्तमासीत्तत्र समन्ततः । सन्ध्याकालाधिकबलैर्विमुक्ताः राक्षसैः
क्षितौ ॥ ६८ ॥ आयसानि च चक्राणि भुशुण्ड्यः शक्तितोमराः ।
पतन्त्यविरताः शूलाः शतघ्न्यः पट्टिशास्तथा ॥ ६९ ॥ तदुग्रमति-
रौद्रञ्च दृष्ट्वा युद्धं नराधिपाः । तनयास्तव कर्णश्च व्यथिताः
सम्प्रदुद्रुवुः ॥ ७० ॥ तत्रैकोऽस्त्रबलश्लाघी द्रौणिर्मानी न विव्यथे ।
व्यहनच्च तदा मायां घटोत्कचविनिर्म्मिताम् ॥ ७१ ॥ विहतायान्तु
मायायाममर्षी स घटोत्कचः । विससर्ज्ज शरान् घोरांस्तेऽश्व-
त्थामानमाविशन् ॥ ७२ ॥ भुजगा इव वेगेन वल्मीकं क्रोध-
मूर्च्छिताः । ते शरा रुधिराक्ताङ्गा भित्त्वा शारद्वतीसुतम् ॥ ७३ ॥
विविशुर्धरणीं शीघ्रं वल्मीकमिव पन्नगाः । अश्वत्थामा तु
संक्रुद्धो लघुहस्तः प्रतापवान् ॥ ७४ ॥ घटोत्कचमतिक्रुद्धो विभेद
दशभिः शरैः । घटोत्कचोऽतिविद्धस्तु द्रोणपुत्रेण मर्म्मसु ॥ ७५ ॥
चक्रं शतसहस्रारमगृह्णाद्व्यथितो भृशम् । क्षुरान्तं बालसूर्य्याभं

मणिवज्रविभूषितम् ॥ ७६ ॥ अश्वत्थाम्नि स चिक्षेप भैमसेनि-
र्जिघांसया। वेगेन महता गच्छद्दिक्षिप्तं द्रौणिना शरैः ॥ ७७ ॥
अभाग्यस्येव सङ्कल्पस्तन्मोघमपतद्भुवि । घटोत्कचस्ततस्तूर्णं दृष्ट्वा
चक्रं निपातितम् ॥ ७८ ॥ द्रौणिं प्राच्छादयद्बाणैः स्वर्भानुरिव
भास्करम्। घटोत्कचसुतः श्रीमान् भिन्नाञ्जनचयोपमः ॥ ७९ ॥
रुरोध द्रौणिमायान्तं प्रभञ्जनमिवाद्रिराट्। पौत्रेण भीमसेनस्य
शूरेणाञ्जनपर्वणा ॥ ८० ॥ वभौ मेघेन धाराभिर्गिरिर्मेरुरिवा-
र्दितः। अश्वत्थामा तु संक्रुद्धो रुद्रोपेन्द्रेन्द्रविक्रमः ॥ ८१ ॥
ध्वजमेकेन वाणेन चिच्छेदाञ्जनपर्वणः। द्वाभ्यान्तु रथयन्तारौ
त्रिभिश्चास्य त्रिवेणुकम् ॥ ८२ ॥ धनुरेकेन चिच्छेद चतुर्भिश्चतुरो
हयान् । विरथस्योद्यतं हस्ताद्धेमविन्दुभिराचितम् ॥ ८३ ॥
विशिखेन सुतीक्ष्णेन खड्गमस्य द्विधाकरोत्। गदा हेमाङ्गदा
राजंस्तूर्णं हैडम्वसूनुना ॥ ८४ ॥ भ्राम्योत्क्षिप्ता शरैश्चापि
द्रौणिनाहत्य पातिता। ततोऽन्तरीक्षमुत्पत्य कालमेघ इवोन्नदन्
॥ ८५ ॥ ववर्षाञ्जनपर्वा स द्रुमवर्षं नभस्तलात्। ततो माया-
धरं द्रौणिर्घटोत्कचसुतं दिवि ॥ ८६ ॥ मार्गणैरभिविव्याध घनं
सूर्य्य इवांशुभिः। सोऽतिवीर्य्य पुनस्तस्थौ रथे हेमविभूषिते
॥ ८७ ॥ महीगत इवात्युच्चः श्रीमानञ्जनपर्वतः। तमयस्मय-
वर्माणं द्रौणिर्भीमात्मजात्मजम् ॥ ८८ ॥ जघानाञ्जनपर्वाणं
महेश्वर इवान्धकम्। अथ दृष्ट्वा हतं पुत्रमश्वत्थाम्ना महावलम्
॥ ८९ ॥ द्रोणेः सकाशमभ्येत्य रोषात् प्रज्वलिताङ्गदः। प्राह
वाक्यमसंभ्रान्तो वीरं शारद्वतीसुतम्। दहन्तं पाण्डवानीकं वन-
मग्निमिवोत्थितम् ॥ ९० ॥

घटोत्कच उवाच। तिष्ठ तिष्ठ न मे जीवन् द्रोणपुत्र गमि-
ष्यसि। त्वामद्य निहनिष्यामि क्रौञ्चमग्निसुतो यथा ॥ ९१ ॥

अश्वत्थामोवाच। गच्छ वत्स सहान्यैस्त्वं युध्यस्वामरविक्रम।

न तु पुत्रेण हैडिम्बे पिता न्याय्यः प्रबाधितुम् ॥ ९२ ॥ कामं खलु नमे रोषो हैडिम्बे विद्यते त्वयि । किन्तु रोषान्वितो जन्तुर्हन्यादात्मानमप्युत ॥ ९३ ॥

सञ्जय उवाच । श्रुत्वैवं क्रोधताम्राक्षः पुत्रशोकसमन्वितः । अश्वत्थामानमायस्तो भैमसेनिरभाषत ॥ ९४ ॥ किमहं कातरो द्रोणे पृथग्जन इवाहवे । यन्मां भीषयसे वाग्भिरसदेतद्वचस्तव ॥ ९५ ॥ भीमात् खल्वहमुत्पन्नः कुरूणां विपुले कुले । पाण्डवानामहं पुत्रः समरेष्वनिवर्त्तिनाम् ॥ ९६ ॥ राक्षसामधिराजोऽहं दशग्रीवसमो बले । तिष्ठ तिष्ठ न मे जीवन् द्रोणपुत्र गमिष्यसि ॥ ९७ ॥ युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे । इत्युक्त्वा रोषताम्राक्षो राक्षसः सुमहाबलः ॥ ९८ ॥ द्रौणिमभ्यद्रवत् क्रुद्धो गजेन्द्रमिव केशरी । रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः ॥ ९९ ॥ रथिनामृषभं द्रौणिं धाराभिरिव तोयदः । शरवृष्टिं शरैर्द्रौणिरप्राप्तान्तां व्यशातयत् ॥ १०० ॥ ततोऽन्तरीक्षे बाणानां संग्रामोऽन्य इवाभवत् । अथास्त्रसङ्घातकृतैर्विस्फुलिङ्गैस्तदा बभौ ॥ १०१ ॥ विभावरीमुखे व्योम खद्योतैरिव चित्रितम् । निशम्य निहतां मायां द्रौणिना रणमानिना ॥ १०२ ॥ घटोत्कचस्तदा मायां ससर्ज्जान्तर्हितः पुनः । सोऽभवद्गिरिरत्युच्चः शिखरैस्तरुसङ्कटैः ॥ १०३ ॥ शूलप्रासासिमुषलजलप्रस्रवणो महान् । तमञ्जनचयप्रख्यं द्रौणिर्दृष्ट्वा महीधरम् ॥ १०४ ॥ प्रपतद्भिश्च बहुभिः शस्त्रसङ्घैर्न चुक्षुभे । ततः स्मयन्निव द्रौणिर्वज्रमस्त्रमुदैरयत् ॥ १०५ ॥ स तेनास्त्रेण शैलेन्द्रः क्षिप्रः क्षिप्रं व्यनश्यत । ततः स तोयदो भूत्वा नीलः सेन्द्रायुधो दिवि ॥१०६॥ अश्मवृष्टिभिरत्युग्रो द्रौणिं प्राच्छादयद्रणे । अथ सन्धाय वायव्यमस्त्रमस्त्रविदाम्वर ॥ १०७ ॥ व्यधमत् द्रोणतनयो नीलमेघं समुत्थितम् । स मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वशः ॥ १०८ ॥

शतं रथसहस्राणां जघान द्विपदाम्बरः। स दृष्ट्वा पुनरायान्तं रथेनायतकार्मुकम् ॥ १०९ ॥ घटोत्कचमसम्भ्रान्तं राक्षसैर्बहुभिर्वृतम्। सिंहशार्दूलसदृशैर्मत्तद्विरदविक्रमैः ॥ ११० ॥ गजस्थैश्च रथस्थैश्च वाजिपृष्ठगतैरपि। विकृतास्यशिरोग्रीवैर्हैडिम्बोऽनुचरैः सह ॥ १११ ॥ पौलस्त्यैर्यातुधानैश्च तामसैश्चेन्द्रविक्रमैः। नानाशस्त्रधरैर्वीरैर्नानाकवचभूषितैः ॥ ११२ ॥ महाभयङ्करैः क्रुद्धैः संरम्भाद्वृत्तलोचनैः। उपस्थितैस्ततो युद्धे राक्षसैर्युद्धदुर्मदैः ॥ ११३ ॥ विषस्रमभिसंप्रेक्ष्य पुत्रं ते द्रौणिरब्रवीत्। तिष्ठ दुर्य्योधनाद्य त्वं न कार्य्यः सम्भ्रमस्त्वया ॥ ११४ ॥ सहैभिर्भ्रातृभिर्वीरैः पार्थिवैश्चेन्द्रविक्रमैः। निहनिष्याम्यमित्रांस्ते तव नास्ति पराजयः। सत्यं ते प्रतिजानामि पर्य्याश्वासय वाहिनीम् ॥ ११५ ॥

दुर्य्योधन उवाच। न त्वेतदद्भुतं मन्ये यत्ते महदिदं मनः। अस्मासु च परा भक्तिस्त्वयि गौतमिनन्दन ॥ ११६ ॥

सञ्जय उवाच। अश्वत्थामानमुक्त्वैवं ततः सौवलमब्रवीत्। वृतं शतसहस्रेण रथानां रणशोभिनाम् ॥ ११७ ॥ षष्ट्या रथसहस्रैश्च प्रयाहि त्वं धनञ्जयम्। कर्णश्च वृषसेनश्च कृपो नीलस्तथैव च ॥ ११८ ॥ उदीच्याः कृतवर्मा च पुरुमित्रसुताः पुनः। दुःशासनो निकुम्भश्च कुण्डभेदी पुरुक्रमः ॥ ११९ ॥ पुरञ्जयो दृढ़रथः पताकी हेमपुञ्जकः। शल्योऽरुणीन्द्रसेनाश्च सञ्जयो विजयो जयः ॥ १२० ॥ कमलाक्षः परक्राथी जयधर्मा सुदर्शनः। एते त्वामनुयास्यन्ति पत्तीनामयुतानि षट् ॥ १२१ ॥ जहि भीमं यमौ चैव धर्मराजञ्च मातुल। असुरानिव देवेन्द्रो जयाशा त्वयि मे स्थिता ॥ १२२ ॥ दारितान् द्रौणिना वाणैर्भृशं विक्षतविग्रहान्। जहि मातुल कौन्तेयान् असुरानिव पावकिः ॥ १२३॥ एवमुक्तो ययौ शीघ्रं पुत्रेण तव सौवलः। पिप्रीषुस्ते सुतान्राजन् दिधक्षुश्चैव पाण्डवान् ॥ १२४ ॥ अथ प्रववृते युद्धं द्रौणिराक्षसयो-

मृधे। विभावय्यां सुतुमुलं शक्रप्रह्लादयोरिव॥१२५॥ ततो घटोत्कचो वाणैर्द्दशभिर्गौतमीसुतम्। जघानोरसि संक्रुद्धो विषाग्निप्रतिमैर्दृढ़ैः॥१२६॥ स तैरभ्याहतो गाढं शरैर्भीमसुतेरितैः। प्रचचाल रथोपस्थे वातोद्धूत इव द्रुमः॥१२७॥ भूयश्चाञ्जलिकेनास्य मार्गणेन महाप्रभम्। द्रौणिहस्तस्थितञ्चापं चिच्छेदाशु घटोत्कचः॥१२८॥ ततोऽन्यद्द्रौणिरादाय धनुर्भारसहं दृढ़म्। ववर्ष विशिखांस्तीक्ष्णान् वारिधारा इवाम्बुदः॥१२९॥ ततः शारद्वतीपुत्रः प्रेषयामास भारत। सुवर्णपुङ्खाञ्छत्रुघ्नान् खचरान् खचरं प्रति॥१३०॥ तद्वाणैरर्द्दितं यूथं रक्षसां पीनवक्षसाम्। सिंहैरिव बभौ मत्तं गजानां चकुलं कुलम्॥१३१॥ विधम्य राक्षसान् वाणैः साश्वसूतरथद्विपान्। ददाह भगवान् वह्निर्भूतानीव युगक्षये॥१३२॥ स दग्ध्वाक्षौहिणीं वाणैर्नैर्ऋतीं रुरुचे भृशम्। पुरेव त्रिपुरं दग्ध्वा दिवि देवो महेश्वरः॥१३३॥ युगान्ते सर्वभूतानि दग्ध्वेव वसुरुल्बणः। रराज जयतां श्रेष्ठो द्रोणपुत्रस्तवाहितान्॥१३४॥ ततो घटोत्कचः क्रुद्धो रक्षसां भीमकर्म्मणाम्। द्रौणिं हतेति महतीं चोदयामास ताञ्चमूम्॥१३५॥ घटोत्कचस्य तामाज्ञां प्रतिगृह्याथ राक्षसाः। दंष्ट्रोज्ज्वला महावक्त्रा घोररूपा भयावहाः॥१३६॥ व्यात्ताननादीर्घजिह्वा क्रोधदीप्तेक्षणा भृशम्। सिंहनादेन महता नादयन्तो वसुन्धराम्॥१३७॥ हन्तुमभ्यद्रवन् द्रौणिं नानाप्रहरणायुधाः। शक्तीः शतघ्नीः परिघानशनीः शूलपट्टिशान्॥१३८॥ खड्गान् गदा भिन्दिपालान् मुषलानि परश्वधान्। प्रासानसींस्तोमरांश्च कुणपान् कम्पनाञ्छितान्॥१३९॥ शूलान् भुशुण्ड्यश्मगुड़ाः स्थूणाः कार्ष्णायसीस्तथा। मुद्गरांश्च महाघोरान् समरे शत्रुदारकान्॥१४०॥ द्रौणिमूर्द्धन्यमज्जन्त राक्षसा भीमविक्रमाः। चिक्षिपुः क्रोधताम्राक्षाः शतशोऽथ सहस्रशः॥१४१॥ तच्छस्त्रं

वर्षं सुमहद्द्रोणपुत्रस्य मूर्द्धनि। पतमानं समीक्ष्याथ योधास्ते
व्यथिताभवन्॥ १४२॥ द्रोणपुत्रस्त्वसम्भ्रान्तस्तद्वर्षं घोरमुच्छ्रि-
तम्। शरैर्विध्वंसयामास वज्रकल्पैः शिलाशितैः॥ १४३॥ ततो-
ऽन्यैर्विशिखैस्तूर्णं स्वर्णपुङ्खैर्महामनाः। निजघ्ने राक्षसान् द्रौणि-
र्दिव्यास्त्रप्रतिमन्त्रितैः॥ १४४॥ तद्बाणैरर्द्दितं यूथं रक्षसां पीन-
वक्षसाम्। सिंहैरिव बभौ मत्तं गजानामाकुलं कुलम्॥ १४५॥
ते राक्षसाः सुसंक्रुद्धा द्रोणपुत्रेण ताड़िताः। क्रुद्धाः सम्प्राद्रवन्
द्रौणिं जिघांसन्तो महाबलाः॥ १४६॥ तत्राद्भुतमिमं द्रौणि-
र्दर्शयामास विक्रमम्। अशक्यं कर्त्तुमन्येन सर्वभूतेषु भारत
॥ १४७॥ यदेको राक्षसीं सेनां क्षणाद्द्रौणिर्महास्त्रवित्।
ददाह ज्वलितैर्बाणैराक्षसेन्द्रस्य पश्यतः॥ १४८॥ स दहन्राक्ष-
सानीकं रराज द्रौणिराहवे। युगान्ते सर्वभूतानि सम्वर्त्तक
इवानलः॥ १४९॥ तं दहन्तमनीकानि शरैराशीविषोपमैः।
तेषु राजसहस्रेषु पाण्डवेयेषु भारत॥ १५०॥ नैनं निरीक्षितुं
कश्चित् शक्नोति द्रौणिमाहवे। ऋते घटोत्कचाद्वीराद्राक्षसेन्द्रा-
न्महाबलात्॥ १५१॥ स पुनर्भरतश्रेष्ठ क्रोधादुद्भ्रान्तलोचनः।
तलं तलेन संहत्य सन्दश्य दशनच्छदम्॥ १५२॥ स्वं सूतमब्रवीत्
क्रुद्धो द्रोणपुत्राय मां वह। स ययौ घोररूपेण तेन जैत्रपता-
किना॥ १५३॥ द्वैरथं द्रोणपुत्रेण पुनरप्यरिसूदनः। स विनद्य
महानादं सिंहवद्भीमविक्रमः॥ १५४॥ चिक्षेपाविध्य संग्रामे
द्रोणपुत्राय राक्षसः। अष्टघण्टां महाघोरामशनीं देवनिर्मिताम्
॥ १५५॥ तामवप्लुत्य जग्राह द्रौणिर्न्यस्य रथे धनुः। चिक्षेप
चैनां तस्यैव स्यन्दनात् सोऽवपुप्लुवे॥ १५६॥ साश्वसूतं ध्वजं
वाहं भस्म कृत्वा महाप्रभा। विवेश वसुधां भित्त्वा साशनिर्भृश-
दारुणा॥ १५७॥ द्रौणेस्तत् कर्म दृष्ट्वा तु सर्वभूतान्यपूजयन्।
यदवप्लुत्य जग्राह घोरां शङ्करनिर्मिताम्॥ १५८॥ धृष्टद्युम्नरथं

गत्वा भैमसेनिस्ततो नृप। धनुर्घोरं समादाय महदिन्द्रायुधोपमम् ॥ १५९ ॥ मुमोच निशितान् बाणान् पुनर्द्रौणेर्महात्मनः। धृष्टद्युम्नोऽप्यसम्भ्रान्तो मुमोचाशीविषोपमान् ॥ १६० ॥ सुवर्णपुङ्खान् प्रवरान् द्रोणपुत्रस्य वक्षसि। ततो मुमोच नाराचान् द्रौणिस्तांश्च सहस्रशः ॥ १६१ ॥ तावप्यग्निसमस्पर्शैर्जघ्नतुस्तस्य मार्गणान्। अतिवीव्रमभूद्युद्धं तयोः पुरुषसिंहयोः ॥ १६२ ॥ योधानां प्रीतिजननं द्रौणेश्च भरतर्षभ। ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः ॥ १६३ ॥ षड्भिर्वाजिसहस्रैश्च भीमस्तं देशमाव्रजत्। ततो भीमात्मजं वीरं धृष्टद्युम्नञ्च सानुजम् ॥१६४॥ अयोधयत धर्म्मात्मा द्रौणिरुत्कृष्टविक्रमः। तत्राद्भुततमं द्रौणिर्दर्शयामास विक्रमम् ॥ १६५ ॥ अशक्यं कर्त्तुमन्येन सर्व्वभूतेषु भारत। निमेषान्तरमात्रेण साश्वसूतरथद्विपान् ॥ १६६ ॥ अक्षौहिणीं राक्षसानां शितैर्बाणैरशातयत्। मिषतो भीमसेनस्य हैड़िम्बेः पार्षतस्य च ॥ १६७ ॥ यमयोर्धर्मपुत्रस्य विजयस्याच्युतस्य च। प्रगाढ़मञ्जोगतिभिर्नाराचैरथ ताड़िताः ॥१६८॥ निपेतुर्द्विरदा भूमौ विशृङ्गा इव पर्व्वताः। निकृत्तैर्हस्तिहस्तैश्च विचरद्भिरितस्ततः ॥ १६९ ॥ रराज वसुधा कीर्णा विसर्पद्भिरिवोरगैः। छिन्नैः काञ्चनदण्डैश्च नृपच्छत्रैः क्षितिर्बभौ ॥ १७० ॥ द्यौरिवोदितचन्द्रार्का ग्रहाकीर्णा युगक्षये। प्रवृद्धध्वजमण्डूकां भेरीविस्तीर्णकच्छपाम् ॥ १७१ ॥ छत्रहंसावलीजुष्टां फेणचामरमालिनीम्। कङ्कगृध्रमहाग्राहां नैकायुधझषाकुलाम् ॥ १७२ ॥ विस्तीर्णगजपाषाणां हस्त्यश्वमकराकुलाम्। रथक्षिप्तमहावप्रां पताकारुचिरद्रुमाम् ॥ १७३ ॥ शरमीनां महारौद्रां प्रासशक्त्यृष्टिडुण्डुभाम्। मज्जामांसमहापङ्कां कबन्धावर्ज्जितोडुपाम् ॥ १७४ ॥ केशशैवलकल्माषां भीरूणां कश्मलावहाम्। नागेन्द्रहययोधानां शरीरव्ययसम्भवाम् ॥ १७५ ॥ शोणितौघमहावेगां द्रौणिः प्राव-

र्त्तयन्नदीम्। योधार्त्तरवनिर्घोषां क्षतजोर्म्मिसमाकुलाम् ॥१७६॥ पदातिभिर्महाघोरां यमक्षयमहोदधिम्। निपात्य राक्षसान् बाणैर्द्रौणिर्हैड़िम्बिमार्द्दयत् ॥ १७७ ॥ पुनरप्यतिसंक्रुद्धः सवृकोदरपार्षतान्। स नाराचगणैः पार्थान् द्रौणिर्विद्ध्वा महारथान् ॥ १७८ ॥ जघान सुरथं नाम द्रुपदस्य सुतं विभुः। पुनः शत्रुञ्जयं नाम सुरथस्यानुजं रणे १७९ ॥ बलानीकं जयानीकं जयञ्चात्र निजघ्निवान्। पुनः शरेण तीक्ष्णेन द्रौणिः सिंह इवोन्नदन् ॥ १८० ॥ जघान स पृषध्रञ्च चन्द्रसेनञ्च मानिनम्। कुन्तीभोजसुतांश्चासौ दशभिर्द्दश जघ्निवान् ॥ १८१ ॥ श्रुतायुषञ्च राजेन्द्र द्रौनिर्निन्ये यमक्षयम्। त्रिभिश्चान्यैः शरैस्तीक्ष्णैः सुपुङ्खैरक्तलोचनैः ॥ १८२ ॥ शत्रुञ्जयञ्च वलिनं शक्रलोकं निनाय ह। अश्वत्थामा सुसंक्रुद्धः सन्धायोग्रमजिह्मगम् ॥ १८३ ॥ मुमोचाकर्णपूर्णेन धनुषा शरमुत्तमम्। यमदण्डोपमं घोरमुद्दिश्याशु घटोत्कचम् ॥ १८४ ॥ स भित्त्वा हृदयं तस्य राक्षसस्य महाशरः। विवेश वसुधां भित्त्वा सपुङ्खः पृथिवीपते ॥ १८५ ॥ तं हतं पतितं ज्ञात्वा धृष्टद्युम्नो महारथः। द्रौणेः सकाशाद्राजेन्द्र अपनिन्ये रथान्तरम् ॥ १८६ ॥ तथा पराङ्मुखरथं सैन्यं यौधिष्ठिरं नृप। पराजित्य रिपून् वीरो द्रोणपुत्रो ननाद ह। पूजितः सर्वलोकैश्च तव पुत्रैश्च मारिष ॥ १८७ ॥ अथ शरशतभिन्नकृत्तदेहैर्हतपतितैः क्षणदाचरैः समन्तात्। निधनमुपगतैर्बभूव भूमिर्गिरिशिखरैरिव दुर्गमातिरौद्रा ॥ १८८ ॥ तं सिद्धगन्धर्वपिशाचसङ्घा नागाः सुपर्णाः पितरो वयांसि। रक्षोगणा भूतगणाश्च द्रौणिमपूजयन्नप्सरसः सुराश्च ॥ १८९ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि अश्वत्थामायुद्धे षट्पञ्चाशदधिकशतोऽध्यायः ॥ १५६ ॥

---

सञ्जय उवाच। द्रुपदस्यात्मजान् दृष्ट्वा कुन्तिभोजसुतांस्तथा। द्रोणपुत्रेण निहतान्राक्षसांश्च सहस्रशः ॥ १ ॥ युधिष्ठिरो भीमसेनो धृष्टद्युम्नश्च पार्षतः। युयुधानश्च संरब्धा युद्धायैव मनो दधुः ॥ २ ॥ सोमदत्तः पुनः क्रुद्धो दृष्ट्वा सात्यकिमाहवे। महता शरवर्षेण छादयामास भारत ॥ ३ ॥ ततः समभवद्युद्धमतीवाद्भुतदर्शनम्। त्वदीयानां परेषाञ्च घोरं विजयकाङ्क्षिणाम् ॥ ४ ॥ दशभिः सात्वतस्यार्थे भीमो विव्याध कौरवम्। सोमदत्तोऽपि तं वीरं शतेन प्रत्यविध्यत ॥ ५ ॥ सात्वतस्त्वभिसंक्रुद्धः पुत्राधिभिरभिप्लुतम्। वृद्धं वृद्धगुणैर्युक्तं ययातिमिव नाहुषम् ॥ ६ ॥ विव्याध दशभिस्तीक्ष्णैः शरैर्वज्रनिपातिभिः। शक्त्या चैनं विनिर्भिद्य पुनर्विव्याध सप्तभिः ॥ ७ ॥ ततस्तु सात्यकेरर्थे भीमसेनो नवं दृढ़म्। मुमोच परिघं घोरं सोमदत्तस्य मूर्द्धनि ॥ ८ ॥ सात्वतोऽप्यग्निसङ्काशं मुमोच शरमुत्तमम्। सोमदत्तोरसि क्रुद्धः सुपत्रं निशितं युधि ॥ ९ ॥ युगपत् पेततुर्वीरे घोरौ परिघमार्गणौ। शरीरे सोमदत्तस्य स पपात महारथः ॥ १० ॥ विमोहिते तु तनये वाह्लीकस्तमुपाद्रवत्। विसृजञ्छरवर्षाणि कालवर्षीव तोयदः ॥ ११ ॥ भीमोऽथ सात्वतस्यार्थे वाह्लीकं नवभिः शरैः। प्रपीड़यन्महात्मानं विव्याध रणमूर्द्धनि ॥ १२ ॥ प्रातिपीयस्तु संक्रुद्धः शक्तिं भीमस्य वक्षसि। निचखान महाबाहुः पुरन्दर इवाशनिम् ॥ १३ ॥ स तया निहतो भीमश्चचाल च मुमोह च। प्राप्य चेतश्च बलवान् गदामस्मै ससर्ज ह ॥ १३ ॥ सा पाण्डवेन प्रहिता वाह्लीकस्य शिरोऽहरत्। स पपात हतः पृथ्व्यां वज्राहत इव द्रुमः ॥ १५ ॥ तस्मिन् विनिहते वीरे वाह्लीके पुरुषर्षभे। पुत्रास्तेऽभ्यर्द्दयन् भीमं दश दाशरथेः समाः ॥ १६ ॥ नागदत्तो दृढ़रथो वीरबाहुरयोभुजः। दृढ़ः सुहस्तो विरजाः प्रमाथश्चोग्रयाश्यपि ॥ १७ ॥ तान् दृष्ट्वा चुक्रुधे भीमो जगृहे

भारसाधनान्। एकमेकं समुद्दिश्य पातयामास मर्मसु ॥ १८ ॥
ते विद्धा व्यसवः पेतुः स्यन्दनेभ्यो हतौजसः। चण्डवातप्रभग्नास्तु
पर्वताग्रान्महीरुहाः ॥ १९ ॥ नाराचैर्दशभिर्भीमस्तान्निहत्य
तवात्मजान्। कर्णस्य दयितं पुत्रं वृषसेनमवाकिरत् ॥ २० ॥
ततो वृकरथो नाम भ्राता कर्णस्य विश्रुतः। विव्याध भीमं
नाराचैस्तं समभ्यवधीद्बली ॥ २१ ॥ ततः सप्तरथान् वीरः
श्यालानां तव भारत। निहत्य भीमो नाराचैः शतचन्द्रमपोथयत्
॥ २२ ॥ अमर्षयन्तो निहतं शतचन्द्रं महारथम्। शकुनेर्भ्रातरो
वीर गवाक्षः शरभो विभुः ॥ २३ ॥ अभिद्रुत्य शरैस्तीक्ष्णैर्भीमसेन-
मताड़यत्। स ताड्यमानो नाराचैर्वृष्टिवेगैरिवाचलः ॥ २४ ॥
जघान पञ्चभिर्बाणैः पञ्च चातिबलान्नृपान्। तान् दृष्ट्वा निह-
तान् वीरान् विचेलुर्नृपसत्तमाः ॥ २५ ॥ ततो युधिष्ठिरः क्रुद्ध-
स्तवानीकमघातयत्। मिषतः कुम्भयोनेश्च पुत्राणां तव चानघ
॥ २६ ॥ अम्बष्ठान्मालवान् शूरांस्त्रिगर्त्तान् सशिबीनपि। प्राहि-
णोन्मृत्युलोकाय गणान् युद्धे युधिष्ठिरः ॥ २७ ॥ अभीषाहान्
शूरसेनान् वाह्लीकांश्च वशातिकान्। निकृत्य पृथिवीञ्चक्रे मांस-
शोणितकर्द्दमाम् ॥२८॥ यौधेयान् मालवान्राजन् मद्रकांश्च गणान्
युधि प्राहिणोद्यमलोकाय शूरान् बाणगणैः क्षणात् ॥ २९ ॥
हता हरत गृह्णीत विध्यत व्यवकृन्तत। अभवत्तुमुलः शब्दो
युधिष्ठिररथं प्रति ॥ ३० ॥ सैन्यानि द्रावयन्तन्तं द्रोणो दृष्ट्वा
युधिष्ठिरम्। चोदितस्तव पुत्रेण सायकैरभ्यवाकिरत् ॥ ३१ ॥
द्रोणस्तु परमः क्रुद्धो वायव्यास्त्रेण पाण्डवम्। विव्याध सोऽपि
तद्दिव्यमस्त्रमस्त्रेन जघ्निवान् ॥ ३२ ॥ तस्मिन्नस्त्रे विनिहते भार-
द्वाजो युधिष्ठिरे। वारुणं याम्यमाग्नेयं त्वाष्ट्रं सावित्रमेव च
॥ ३३ ॥ चिक्षेप परमक्रुद्धो जिघांसुः पाण्डुनन्दनम्। क्षिप्तानि
क्षिप्यमानानि तानि चास्त्राणि धर्मजित् ॥ ३४ ॥ जघानास्त्रैर्महा-

बाह्नः कुम्भयोनेरवित्रसन् । सत्यां चिकीर्षमानस्तु प्रतिज्ञां कुम्भसम्भवः ॥ ३५ ॥ प्रादुश्चक्रेऽस्त्रमैन्द्रं वै प्राजापत्यञ्च भारत । जिघांसुर्धर्मतनयं तव पुत्रहिते रतः ॥ ३६ ॥ पतिः कुरूणां गजसिंहगामी विशालवक्षाः पृथुलोहिताक्षः । प्रादुश्चकारास्त्रमहीनतेजा माहेन्द्रमन्यत् स जघान चास्त्रम् ॥ ३७ ॥ निहन्यमानेष्वस्त्रेषु द्रोणः क्रोधसमन्वितः । युधिष्ठिरवधं प्रेप्सुर्ब्राह्ममस्त्रमुदैरयत् ॥ ३८ ॥ नाज्ञासिस्म ततः किञ्चिद्घोरेण तमसा वृते । सर्वभूतानि च त्रासं परं जग्मुर्विशाम्पते ॥ ३९ ॥ ब्रह्मास्त्रमुद्यतं दृष्ट्वा कुन्तीपुत्रो युधिष्ठिरः । ब्रह्मास्त्रेणैव राजेन्द्र तदस्त्रं पर्य्यवारयत् ॥ ४० ॥ ततः सैनिकमुख्यास्ते प्रशशंसुर्नरर्षभौ । द्रोणपार्थौ महेष्वासौ सर्वयुद्धविशारदौ ॥ ४१ ॥ ततः प्रमुच्य कौन्तेयं द्रोणो द्रुपदवाहिनीम् । व्यधमत् सोऽस्त्रमस्त्रेण क्रोधपर्य्याकुलेक्षणः ॥ ४२ ॥ ते हन्यमाना द्रोणेन पाञ्चालाः प्राद्रवन् भयात् । पश्यतो भीमसेनस्य पार्थस्य च महात्मनः ॥ ४३ ॥ ततः किरीटी भीमश्च सहसा संन्यवर्त्तताम् । महद्भ्यां रथवंशाभ्यां प्रतिगृह्य बलं तदा ॥ ४४ ॥ बीभत्सुर्दक्षिणं पार्श्वमुत्तरञ्च वृकोदरः । भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षताम् ॥ ४५ ॥ कैकयाः सृञ्जयाश्चैव पाञ्चालाश्च महौजसः । अन्वगच्छन्महाराज मत्स्याश्च सह सात्वतैः ॥ ४६ ॥ ततः सा भारती सेना वध्यमाना किरीटिना । तमसा निद्रया चैव पुनरेव व्यदीर्य्यत ॥ ४७ ॥ द्रोणेन वार्य्यमाणास्ते स्वयं तव सुतेन च । नाशक्यन्त महाराज योधा वारयितुं तदा ॥ ४८ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि द्रोणयुधिष्ठिरयुद्धे सप्तपञ्चाशदधिकशतोऽध्यायः ॥ १५७ ॥

---

सञ्जय उवाच। उदीर्य्यमाणं तं दृष्ट्वा पाण्डवानां महद्बलम्। अविसह्यञ्च मन्वानः कर्णं दुर्य्योधनोऽब्रवीत् ॥ १ ॥ अयं स कालः सम्प्राप्तो मित्राणां मित्रवत्सल। त्रायस्व समरे कर्ण सर्वान् योधान्महारथान् ॥ २ ॥ पाञ्चालैः कैकयैर्मत्स्यैः पाण्डवैश्च महारथैः। वृतान् समन्तात् संक्रुद्धैर्निश्वसद्भिरिवोरगैः ॥ ३ ॥ एते नदन्ति संहृष्टाः पाण्डवा जितकाशिनः। शक्रोपमाश्च बहवः पाञ्चालानां रथव्रजाः ॥ ४ ॥

कर्ण उवाच। परित्रातुमिह प्राप्तो यदि पार्थं पुरन्दरः। तमप्याशु पराजित्य ततो हन्तास्मि पाण्डवम् ॥ ५ ॥ सत्यं ते प्रतिजानामि समाश्वसिहि भारत। हन्तास्मि पाण्डुतनयान् पाञ्चालांश्च समागतान् ॥ ६ ॥ जयन्ते प्रतिदास्यामि वासवस्येव पावकिः। प्रियं तव मया कार्य्यमस्मिन्रणसमागमे ॥ ७ ॥ सर्वेषामेव पार्थानां फाल्गुनो बलवत्तरः। तस्यामोघां विमोक्ष्यामि शक्तिं शक्रविनिर्मिताम् ॥ ८ ॥ तस्मिन् हते महेष्वासे भ्रातरस्तस्य मानद। तव वश्या भविष्यन्ति वनं यास्यन्ति वा पुनः ॥९॥ मयि जीवति कौरव्य विषादं मा कृथाः क्वचित्। अहं जेष्यामि समरे सहितान् सर्वपाण्डवान् ॥ १० ॥ पाञ्चालान् कैकयांश्चैव वृष्णींश्चापि समागतान्। वाणौघैः शकलीकृत्य तव दास्यामि मेदिनीम् ॥ ११ ॥

सञ्जय उवाच। एवं ब्रुवाणं कर्णन्तु कृपः शारद्वतोऽब्रवीत्। स्मयन्निव महाबाहुः सूतपुत्रमिदं वचः ॥ १२ ॥ शोभनं शोभनं कर्ण सनाथः कुरुपुङ्गवः। त्वया नाथेन राधेय वचसा यदि सिध्यति ॥ १३ ॥ बहुशः कत्थसे कर्ण कौरवस्य समीपतः। न तु ते विक्रमः कश्चिद्दृश्यते फलमेव वा ॥ १४ ॥ समागमः पाण्डुसुतैर्दृष्टस्ते बहुशो युधि। सर्वत्र निर्ज्जितश्चासि पाण्डवैः सूतनन्दन ॥ १५ ॥ ह्रियमाणे तदा कर्ण गन्धर्वैर्धृतराष्ट्रजे। तदा-

युध्यन्त सैन्यानि त्वमेकोऽग्रे पलायिथाः ॥ १६ ॥ विराटनगरे चापि समेताः सर्वकौरवाः । पार्थेन निर्जिता युद्धे त्वञ्च कर्ण सहानुजः ॥ १७ ॥ एकस्याप्यसमर्थस्त्वं फाल्गुनस्य रणाजिरे । कथमुत्सहसे जेतुं सकृष्णान् सर्वपाण्डवान् ॥ १८ ॥ अब्रुवन् कर्ण युध्यस्व कत्थसे बहु सूतज । अनुक्त्वा विक्रमेद्यस्तु तद्वै सत्पुरुषव्रतम् ॥ १९ ॥ गर्ज्जित्वा सूतपुत्र त्वं शारदाभ्रमिवाजलम् । निष्फलो दृश्यसे कर्ण तच्च राजा न बुध्यते ॥ २० ॥ तावद्गर्ज्जसि राधेय यावत् पार्थं न पश्यसि । आरात् पार्थं हि ते दृष्ट्वा दुर्लभं गर्ज्जितं पुनः ॥ २१ ॥ त्वमनासाद्य तान् वाणान् फाल्गुनस्य विगर्ज्जसि । पार्थसायकविद्धस्य दुर्लभं गर्ज्जितं तव ॥ २२ ॥ बाहुभिः क्षत्रियाः शूरा वाग्भिः शूरा द्विजातयः । धनुषा फाल्गुनः शूरः कर्ण शूरो मनोरथैः ॥ २३ ॥ तोषितो येन रुद्रोऽपि कः पार्थं प्रतिघातयेत् । एवं स रुषितस्तेन तदा शारद्वतेन ह ॥ २४ ॥ कर्णः प्रहरतां श्रेष्ठः कृपं वाक्यमथाब्रवीत् । शूरा गर्ज्जन्ति सततं प्रावृषीव बलाहकाः ॥ २५ ॥ फलञ्चाशु प्रयच्छन्ति वीजमुप्तं क्षिताविव । दोषमत्र न पश्यामि शूराणां रणमूर्द्धनि ॥ २६ ॥ तत्तद्विकत्थमानानां भारञ्चोद्वहतां युधि । यं भारं पुरुषो वोढुं मनसा हि व्यवस्यति ॥२७॥ दैवमस्य ध्रुवं तत्र साहाय्यायोपपद्यते । व्यवसायद्वितीयोऽहं मनसा भारमुद्वहन् ॥ २८ ॥ हत्वा पाण्डुसुतानाजौ सकृष्णान् सहसात्वतान् । गर्ज्जामि यद्यहं विप्र तव किन्तत्र नश्यति ॥ २९ ॥ वृथा शूरा न गर्जन्ति शारदा इव तोयदाः । सामर्थ्यमात्मनो ज्ञात्वा ततो गर्जन्ति पण्डिताः ॥ ३० ॥ सोऽहमद्य रणे यत्तौ सहितौ कृष्णपाण्डवौ । उत्सहे मनसा जेतुं ततो गर्ज्जामि गौतम ॥ ३१ ॥ पश्य त्वं गर्जितस्यास्य फलं मे विप्र सानुगान् । हत्वा पाण्डुसुतानाजौ सहकृष्णान् ससात्वतान् । दुर्य्योधनाय दास्यामि पृथिवीं हतकण्टकाम् ॥३२॥

कृप उवाच । मनोरथप्रलापो मे न ग्राह्यस्तव सूतज । यदा-क्षिपसि वै कृष्णौ धर्मराजञ्च पाण्डवम् ॥ ३३ ॥ ध्रुवस्तस्य जयः कर्ण यत्र युद्धविशारदौ । देवगन्धर्वयक्षाणां मनुष्योरगपक्षिणाम् ॥ ३४ ॥ दर्पितानामपि रणेष्वजेयौ कृष्णपाण्डवौ । ब्रह्मण्यः सत्यवाग्दान्तः पितृदैवतपूजकः ॥ ३५ ॥ सत्यधर्मरतश्चैव कृता-स्त्रश्च विशेषतः । धृतिमांश्च कृतज्ञश्च धर्मपुत्रो युधिष्ठिरः ॥ ३६ ॥ भ्रातरश्चास्य बलिनः सर्वास्त्रेषु कृतश्रमाः । गुरुवृत्तिरताः प्राज्ञा धर्मनित्या यशस्विनः ॥ ३७ ॥ सम्बन्धिनश्चेन्द्रवीर्याः स्वनुरक्ताः प्रहारिणः । धृष्टद्युम्नः शिखण्डी च दौर्मुखिर्जनमेजयः ॥ ३८ ॥ चन्द्रसेनो भद्रसेनः कीर्त्तिवर्मा ध्रुवो धरः । वसुचन्द्रो दामचन्द्रः सिंहचन्द्रः सुतेजनः ॥ ३९ ॥ द्रुपदस्य तथा पुत्रा द्रुपदश्च महास्त्र-वित् । येषामर्थाय संयत्तो मत्स्यराजः सहानुजः ॥ ४० ॥ गजा-नीकः श्रुतानीको वीरभद्रः सुदर्शनः । श्रुतध्वजो बलानीको जयानीको जयप्रियः ॥ ४१ ॥ विजयो लब्धलक्षश्च जयाश्वो रथ-वाहनः । चन्द्रोदयः कामरथो विराटभ्रातरः शुभाः ॥ ४२ ॥ यमौ च द्रौपदेयाश्च राक्षसश्च घटोत्कचः ॥ येषामर्थाय युध्यन्ते न तेषां विद्यते क्षयः ॥ ४३ ॥ एते चान्ये च बहवो गणाः पाण्डु-सुतस्य वै । कामं खलु जगत् सर्वं सदेवासुरमानुषम् ॥ ४४ ॥ सयक्षराक्षसगणं सभूतभुजगद्विपम् । निःशेषमस्त्रवीर्य्येण कुर्य्यातां भीमफाल्गुनौ ॥ ४५ ॥ युधिष्ठिरश्च पृथिवीं निर्द्दहेद्घोरचक्षुषा । अप्रमेयबलः शौरिर्येषामर्थे च दंशितः ॥ ४६ ॥ कथं तान् संयुगे कर्ण जेतुमुत्सहसे परान् । महानपनयस्त्वेष तव नित्यं हि सूतज । यस्त्वमुत्सहसे योद्धुं समरे शौरिणा सह ॥ ४७ ॥

सञ्जय उवाच । एवमुक्तस्तु राधेयः प्रहसन् भरतर्षभ । अब्रवीच्च तदा कर्णो गुरुं शारद्वतं कृपम् ॥ ४८ ॥ सत्यमुक्तं त्वया ब्रह्मन् पाण्डवान् प्रति यद्वचः । एते चान्ये च बहवो गुणाः

पाण्डुसुतेषु वै ॥ ४९ ॥ अजेयाश्च रणे पार्था देवैरपि सवासवैः । सदैत्ययक्षगन्धर्वैः पिशाचोरगराक्षसैः ॥ ५० ॥ तथापि पार्थान् जेष्यामि शक्त्या वासवदत्तया । ममाप्यमोघा दत्तेयं शक्तिः शक्रेण वै द्विज ॥ ५१ ॥ एतया निहनिष्यामि सव्यसाचिनमाहवे । हते तु पाण्डवे कृष्णो भ्रातरश्चास्य सोदराः ॥ ५२ ॥ अनर्जुना न शक्ष्यन्ति महीं भोक्तुं कथञ्चन । तेषु सर्व्वेषु नष्टेषु पृथिवीयं ससागरा ॥ ५३ ॥ अयत्नात् कौरवेन्द्रस्य वशे स्थास्यति गौतम । सुनीतैरिह सर्व्वाणि सिध्यन्ते नात्र संशयः ॥ ५४ ॥ एतमर्थमहं ज्ञात्वा ततो गर्ज्जामि गौतम । त्वन्तु वृद्धश्च विप्रश्च अकृतप्रज्ञश्च संयुगे ॥ ५५ ॥ कृतस्नेहश्च पार्थेषु ततो मामवमन्यसे । यद्येवं वक्ष्यसे भूयो ममाप्रियमिह द्विज ॥ ५६ ॥ ततस्ते खड्गमुत्कृष्य जिह्वां छेत्स्यामि दुर्मते । यच्चापि पाण्डवान् विप्र स्तोतुमिच्छसि संयुगे ॥ ५७ ॥ भीषयन् सर्व्वसैन्यानि कौरवेयाणि दुर्मते । अत्रापि ब्रुवतो वाक्यं यथावच्छृणु गौतम ॥ ५८ ॥ दुर्य्योधनश्च द्रोणश्च शकुनिर्दुर्मुखो जयः । दुःशासनो वृषसेनो मद्रराजस्त्वमेव च ॥ ५९ ॥ सोमदत्तश्च भूरिश्च तथा द्रौणिर्विविंशतिः । तिष्ठन्ति दंशिता यत्र सर्व्वे युद्धविशारदाः ॥ ६० ॥ जयेदेतान्रणे को हि शक्रतुल्यबलोऽप्यरिः । शूराश्च हि कृतास्त्राश्च बलिनः स्वर्गलिप्सवः ॥ ६१ ॥ धर्म्मज्ञा युद्धकुशला हन्युर्युद्धे सुरानपि । एते स्थास्यन्ति सङ्ग्रामे पाण्डवानां बधार्थिनः ॥ ६२ ॥ जयमाकाङ्क्षमाणस्य कौरवेयस्य दंशिताः । दैवायत्तमहं मन्ये जयं सुबलिनामपि ॥ ६३ ॥ यत्र भीष्मो महाबाहुः शेते शरशताचितः । विकर्णश्चित्रसेनश्च वाह्लीकश्च जयद्रथः ॥ ६४ ॥ भूरिश्रवा जयश्चैव जलसन्ध सुदक्षिणः । शलश्च रथिनां श्रेष्ठो भगदत्तश्च वीर्य्यवान् ॥ ६५ ॥ एते चान्ये च बहवो देवैरपि च दुर्ज्जयाः । निहताः समरे शूरा पाण्डवैर्बलवत्तराः ॥ ६६ ॥ किमन्यद्दैवसंयोगान्मन्यसे पुरुषा-

धम। यश्चैतान् स्तौषि सततं दुर्य्योधमरिपून् द्विज ॥ ६७॥ तेषामपि हताः शूरा शतशोऽथ सहस्रशः। क्षीयन्ते सर्व्वसैन्यानि कुरूणां पाण्डवैः सह ॥ ६८॥ प्रभावं नात्र पश्यामि पाण्डवानां कथञ्चन। यस्तान् बलवतो नित्यं मन्यसे हि नराधम ॥ ६९॥ यतिष्येऽहं परं शक्त्या योद्धुं तैः सह संयुगे। दुर्य्योधन हितार्थाय जयो दैवे प्रतिष्ठितः ॥ ७०॥

इति द्रोणपर्व्वणि जयद्रथवधपर्व्वणि कृपकर्णवाक्ये अष्टपञ्चाशदधिकशतोऽध्यायः ॥ १५८॥

---

सञ्जय उवाच। तथा परुषितं दृष्ट्वा सूतपुत्रेण मातुलम्। खड्गमुद्यम्य वेगेन द्रौणिरभ्यपतद्द्रुतम् ॥ १॥ ततः परम-संक्रुद्धः सिंहो मत्तमिव द्विपम्। प्रेक्षतः कुरुराजस्य द्रौणिः कर्णं समभ्ययात् ॥ २॥

अश्वत्थामोवाच। यदर्जुनगुणांस्तथ्यान् कीर्त्तयानं नराधम। शूरं द्वेषात् सुदुर्बुद्धे त्वं भर्त्सयसि मातुलम् ॥ ३॥ विकत्थमानः शौर्य्येण सर्व्वलोकधनुर्द्धरम्। दर्पोद्धृतगृहीतोऽद्य न किञ्चिद्गण-यन्मृधे ॥ ४॥ क्व ते वीर्य्यं क्व चास्त्राणि यस्त्वां निर्ज्जित्य संयुगे। गाण्डीवधन्वा हतवान् प्रेक्षतस्ते जयद्रथम् ॥ ५॥ येन साक्षान्महादेवः समरे योधितः पुरा। तमिच्छसि वृथा जेतुं सूताधम मनोरथैः ॥ ६॥ यं हि कृष्णेन सहितं सर्व्वशस्त्र-भृताम्वरम्। जेतुं न शक्ताः सहिताः सेन्द्रा अपि सुरासुराः ॥७॥ लोकैकवीरमजितमर्जुनं सूत संयुगे। किम्पुनस्त्वमलं जेतुं सहैभिर्व्वसुधाधिपैः ॥ ८॥ कर्णाद्य पश्य दुर्बुद्धे तिष्ठेदानीं नरा-धम। एष तेऽद्य शिरः कायादुद्धरामि सुदुर्मते ॥ ९॥

सञ्जय उवाच। तमुद्यतन्तु वेगेन राजा दुर्य्योधनः स्वयम्। न्यवारयन्महातेजाः कृपञ्च द्विपदां वरम् ॥ १० ॥

कर्ण उवाच। शूरोऽयं समरश्लाघी दुर्मतिश्च द्विजाधमः। आसादयतु मद्वीर्य्यं मुञ्चेनं द्विजसत्तमम् ॥ ११ ॥

अश्वत्थामोवाच। तवैतत् क्षम्यतेऽस्माभिः सूतात्मज सुदुर्मते। दर्पमुत्थितमेतत्ते फाल्गुनो नाशयिष्यति ॥ १२ ॥

दुर्य्योधन उवाच। अश्वत्थामन् प्रसीदस्व क्षन्तुमर्हसि मानद। कोपः खलु न कर्त्तव्यः सूतपुत्रे त्वयानघ ॥ १३ ॥ त्वयि कर्णे कृपे द्रोणे मद्रराजे च सौबले। महत् कार्य्यं समायातं प्रसीद द्विजसत्तम ॥ १४ ॥ एते ह्यभिमुखाः सर्वे राधेयेन युयुत्सवः। आयान्ति पाण्डवाः व्रह्मन्नाह्वयन्तः समन्ततः ॥ १५ ॥

सञ्जय उवाच। प्रसाद्यमानस्तु ततो राज्ञा द्रौणिर्महामनाः। प्रससाद महाराज क्रोधवेगसमन्वितः ॥ १६ ॥ ततः कृप उवाचेदमाचार्य्यः सुमहामनाः। सौम्यस्वभावाद्राजेन्द्र क्षिप्रमागतमार्द्दवः ॥ १७ ॥

कृप उवाच। तवैतत् क्षम्यतेऽस्माभिः सूतात्मज सुदुर्मते। दर्पमुत्सिक्तमेतत्ते फाल्गुनो नाशयिष्यति ॥ १८ ॥

सञ्जय उवाच। ततस्ते पाण्डवा राजन् पाञ्चालाश्च यशस्विनः। आजग्मुः सहितास्तत्र तर्ज्जयन्तः सहस्रशः ॥ १९ ॥ कर्णोऽपि रथिनां श्रेष्ठश्चापमुद्यम्य वीर्य्यवान्। कौरवाग्र्यैः परिवृतः शक्रो देवगणैरिव ॥ २० ॥ पर्य्यतिष्ठत तेजस्वी स्वबाहुबलमाश्रितः। ततः प्रववृते युद्धं कर्णस्य सह पाण्डवैः ॥ २१ ॥ भीषणं सुमहाराज सिंहनादविराजितम्। ततस्ते पाण्डवा राजन् पाञ्चालाश्च यशस्विनः ॥ २२ ॥ दृष्ट्वा कर्णं महाबाहुमुच्चैः शब्दमथानदन्। अयं कर्णः कुतः कर्णस्तिष्ठ कर्ण महारणे ॥ २३ ॥ युध्यस्व सहितोऽस्माभिर्दुरात्मन् पुरुषाधम। अन्ये तु

दृष्ट्वा राधेयं क्रोधदीप्तेचणाब्रुवन् ॥ २४ ॥ बध्यतामयमुत्सिक्तः सूतपुत्रोऽल्पचेतनः। सर्वैः पार्थिवशार्दूलैर्नानेनार्थोऽस्ति जीवता ॥ २५ ॥ अत्यन्तवैरी पार्थानां सततं पापपूरुषः। एष मूलं ह्यनर्थानां दुर्य्योधनमते स्थितः ॥ २६ ॥ हतैनमिति जल्पन्तः क्षत्रियाः समुपाद्रवन्। महता शरवर्षेण छादयन्तो महारथाः ॥ २७ ॥ वधार्थं सूतपुत्रस्य पाण्डवेयेन नोदिताः। तांस्तु सर्वांस्तथा दृष्ट्वा पाण्डुपुत्रान्महाबलान् ॥ २८ ॥ न विव्यथे सूतपुत्रो न च त्रासमगच्छत। दृष्ट्वा संहारकल्पं तदद्भुतं सैन्यसागरम् ॥ २९ ॥ प्रियकृत्तव पुत्राणां संग्रामेष्वपराजितः। सायकौघेन बलवान् क्षिप्रकारी महाबलः ॥ ३० ॥ वारयामास तत् सैन्यं समन्ताद्भरतर्षभ। ततस्तु शरवर्षेण पाण्डवाः समवारयन् ॥ ३१ ॥ धनूंषि ते विधुन्वानाः शतशोऽथ सहस्रशः। अयोधयन्त राधेयं शक्रं दैत्या यथा पुरा ॥ ३२ ॥ शरवर्षन्तु तत् कर्णः पार्थिवैः समुदीरितम्। शरवर्षेण महता समन्ताद्व्यधमद्बली ॥ ३३ ॥ तद्युद्धमभवत्तेषां कृतप्रतिकृतैषिणाम्। यथा देवासुरे युद्धे शक्रस्य सह दानवैः ॥ ३४ ॥ तत्राद्भुतमपश्याम सूतपुत्रस्य लाघवम्। यदेनं समरे यत्ता नाप्नुवन्त्यपरे युधि ॥ ३५ ॥ निवार्य्य च शरौघांस्तान् पार्थिवानां महारथः। युगेष्वीषासु छत्रेषु रथेषु च हयेषु च ॥ ३६ ॥ आत्मनामाङ्कितान् घोरान् राधेयः प्राहिणोच्छरान्। ततस्ते व्याकुलीभूता राजानः कर्णपीड़िताः ॥३७॥ बभ्रमुस्तत्र तत्रैव गावः शीतार्द्दिता इव। हयानां बध्यमानानां गजानां रथिनां तदा ॥ ३८ ॥ तत्र तत्र स्म दृश्यन्ते सङ्घाः कर्णेन पीड़िताः। शरोभिः पतितै राजन् बाहुभिश्च समन्ततः ॥ ४० ॥ प्रकीर्णा वसुधा सर्वा शूराणामनिवर्त्तिनाम्। हतैश्च हन्यमानैश्च निष्टनद्भिश्च सर्वशः ॥ ४१ ॥ बभूवायोधनं राजन् वैवस्वतपुरं यथा। दुर्य्योधनस्ततो राजन् दृष्ट्वा कर्णस्य विक्रमम् ॥ ४२ ॥

अश्वत्थामानमासाद्य ततो वाक्यमुवाच ह । असौ हि दृश्यते कर्णो दंशितः सर्व्वपार्थिवैः ॥ ४३ ॥ पश्येमां द्रवतीं सेनां कर्ण-सायकपीड़िताम् । कार्त्तिकेयसमुद्भूतामासुरीमिव तां चमूम् ॥४४ दृष्ट्वेमां निर्ज्जितां सेनां रणे कर्णेन धीमता । अभियात्येष बीभत्सुः सूतपुत्रजिघांसया ॥ ४५ ॥ तद्यथा पश्यमानानां सूत-पुत्रं महारथम् । न हन्यात् पाण्डवः सङ्ख्ये तथा नीतिर्विधी-यताम् ॥ ४६ ॥ ततो द्रौणिः कृपः शल्यो हार्द्दिक्यश्च महारथः । प्रत्युद्ययुस्तदा पार्थं सूतपुत्रस्य रक्षिणः ॥ ४७ ॥ आयान्तं वीक्ष्य कौन्तेयं शक्रं दैत्यचमूमिव । बीभत्सुरपि राजेन्द्र पाञ्चालैरभि-संवृतः । प्रत्युद्ययौ तदा कर्णं यथा वृत्रं पुरन्दरम् ॥ ४८ ॥

धृतराष्ट्र उवाच । संरब्धं फाल्गुनं दृष्ट्वा कालान्तकयमो-पमम् । कर्णो वैकर्त्तनः सूत प्रत्यपद्यत् किमुत्तरम् ॥ ४९ ॥ यो-ऽस्पर्द्धत च पार्थेन नित्यमेव महारथः । आशंसते च बीभत्सुमव-जेतुं सुदक्षिणः ॥ ५० ॥ स तु तं सहसा प्राप्तं नित्यमत्यन्त-वैरिणम् । कर्णो वैकर्त्तनः सूत किमन्यत् प्रत्यपद्यत ॥ ५१ ॥

सञ्जय उवाच । आयान्तं पाण्डवं दृष्ट्वा गजः प्रतिगजं यथा । असम्भ्रान्तस्ततः कर्णः प्रत्युदीयात् धनञ्जयम् ॥ ५२ ॥ तमापतन्तं वेगेन स्वर्णपुङ्खैरजिह्मगैः । छादयामास पार्थोऽथ कर्णन्तु विजयं शरैः ॥ ५३ ॥ तं कर्णं शरजालेन छादयामास पाण्डवः । ततः कर्णः सुसंरब्धः शरैस्त्रिभिरविध्यत ॥ ५४ ॥ तस्य तल्लाघवं दृष्ट्वा नामृष्यत महारथः । तस्मै बाणाञ्छिलाधौतान् प्रदीप्ताग्रा-नजिह्मगान् ॥ ५५ ॥ प्राहिणोत् सूतपुत्राय त्रिंशतं शत्रुतापनः । विव्याध चैनं संरम्भात् बाणेनैकेन वीर्य्यवान् ॥ ५६ ॥ सव्ये भुजाग्रे बलवान्नाराचेन हसन्निव । तस्य विद्धस्य वेगेन कराच्चापं पपात ह ॥ ५७ ॥ पुनरादाय तच्चापं निमेषार्द्धान्महाबलः । छादयामास बाणौघैः फाल्गुनं कृतहस्तवत् ॥ ५८ ॥ शरवृष्टिन्तु

तां मुक्तां सूतपुत्रेण भारत। व्यधमच्छरवर्षेण स्मयन्निव धनञ्जयः॥ ५९॥ तौ परस्परमासाद्य छादयेतां समन्ततः। शरजालैर्महेष्वासैः कृतप्रतिकृतैषिणौ ॥ ६० ॥ तदद्भुतमभूद्युद्धं कर्णपाण्डवयोर्मृधे। उभयोर्वाशिताहेतोर्वन्ययोर्गजयोरिव॥६१॥ ततः पार्थो महेष्वासो दृष्ट्वा कर्णस्य विक्रमम्। मुष्टिदेशे धनुस्तस्य चिच्छेद त्वरयान्वितः॥ ६२॥ अश्वांश्च चतुरो भल्लैरनयद्यमसादनम्। सारथेश्च शिरः कायादहरच्छत्रुतापनः॥ ६३ ॥ अथैनं छिन्नधन्वानं हताश्वं हतसारथिम्। विव्याध सायकैः पार्थश्चतुर्भिः पाण्डुनन्दनः॥ ६४॥ हताश्वात्तु रथात्तूर्णं अपद्रुत्य नरर्षभः आरुरोह रथं तूर्णं कृपस्य शरपीड़ितः॥ ६५॥ राधेयं निर्जितं दृष्ट्वा तावका भरतर्षभ। धनञ्जयशरैर्नुन्नाः प्राद्रवन्त दिशो दश॥ ६६ ॥ द्रवतस्तान् समालोक्य राजा दुर्य्योधनः स्वयम्। निवर्त्तयामास तदा वाक्यञ्चेदमुवाच ह॥ ६७॥ अलं द्रुतेन वः शूरास्तिष्ठध्वं क्षत्रियर्षभाः। एष पार्थवधायाहं स्वयं गच्छामि संयुगे॥ ६८॥ अहं पार्थं हनिष्यामि सपाञ्चालं समागतम्। अद्य मे युध्यमानस्य सह गाण्डीवधन्वना॥ ६९॥ द्रक्ष्यन्ति विक्रमं पार्थाः कालस्येव युगक्षये। अद्य मद्बाणजालानि विमुक्तानि सहस्रशः॥ ७०॥ द्रक्ष्यन्ति समरे पार्थाः शलभानिवायतीः। अद्य बाणमयं वर्षं सृजतो मम धन्विनः॥ ७१॥ जीमूतस्येव घर्मान्ते द्रक्ष्यन्ति मम सैनिकाः। जेष्याम्यद्य रणे पार्थं सायकैर्नतपर्वभिः॥ ७२॥ तिष्ठध्वं समरे वीरा भयं त्यजत फाल्गुनात्। न हि मद्वीर्य्यमासाद्य फाल्गुनः प्रसहिष्यति॥७३॥ यथा वेला समासाद्य सागरो मकरालयः। इत्युक्त्वा प्रययौ राजा सैन्येन महता वृतः॥ ७४॥ फाल्गुनं प्रति संरब्धः क्रोधसंरक्तलोचनः। तम्प्रयान्तं महाबाहुं दृष्ट्वा शारद्वतस्तदा॥७५॥ अश्वत्थामानमासाद्य वाक्यञ्चेदमुवाच ह। एष राजा महाबाहु-

रमर्षी क्रोधमूर्च्छितः ॥ ७६ ॥ पतङ्गवृत्तिमास्थाय फाल्गुनं योद्धुमिच्छति । यावन्नः पश्यमानानां प्राणान् पार्थेन संयुगे ॥७७॥ न जह्यात् पार्थिवश्रेष्ठस्तावत् वारय कौरवम । यावत् फाल्गुनवाणानां गोचरं नाधिगच्छति ॥ ७८ ॥ कौरव्यः पार्थिवो वीरस्तावत्तिष्ठति संयुगे । यावत् पार्थशरैर्घोरैर्निर्मुक्तोरगसन्निभैः ॥ ७९ ॥ न भस्मीक्रियते राजा तावद्युद्धान्निवर्त्यताम् । अयुक्तमिव पश्यामस्तिष्ठत्स्वस्मासु मानद ॥ ८० ॥ स्वयं युद्धाय यद्राजा रणं यात्यसहायवान् । दुर्लभं जीवितं मन्ये कौरवस्य किरीटिना ॥ ८१ ॥ युध्यमानस्य समरे शार्दूलेनेव हस्तिनः । मातुलेनैवमुक्तस्तु द्रौणिः शस्त्रभृताम्वरः ॥ ८२ ॥ दुर्य्योधनमिदं वाक्यं त्वरितः समभाषत । मयि जीवति गान्धारे न युद्धं कर्त्तुमर्हसि ॥ ८३ ॥ मामनादृत्य कौरव्य तव नित्यं हितैषिणम् । न हि ते सम्भ्रमः कार्य्यः पार्थस्य विजयं प्रति । अहमावारयिष्यामि पार्थं तिष्ठ सुयोधन ॥ ८४ ॥

दुर्य्योधन उवाच । आचार्य्यः पाण्डुपुत्रान् वै पुत्रवत् परिरक्षति । त्वमप्युपेक्षां कुरुषे तेषु नित्यं ममारिषु ॥ ८५ ॥ मम वा मन्दभाग्यत्वान्मन्दस्ते विक्रमो युधि । धर्म्मराजप्रियार्थंस्वा द्रौपद्या वा न विद्म तत् ॥ ८६ ॥ धिगस्तु मम लुब्धस्य यत् कृते सर्व्वबान्धवाः । सुखकामाः परं दुःखं प्राप्नुवन्ति पराजिताः ॥८७॥ को हि शस्त्रभृतां श्रेष्ठो महेश्वरसमो युधि । शत्रुं न क्षपयेच्छक्तो यो न स्याद्गौतमीसुतः ॥ ८८ ॥ अश्वत्थामन् प्रसीदस्व नाशयैतान्ममाहितान् । तवास्त्रगोचरे शक्ताः स्थातुं देवा न दानवाः ॥ ८९ ॥ पञ्चालान् सोमकांश्चैव जहि द्रौणे सहानुगान् । वयं शेषान् हनिष्यामस्त्वयैव परिरक्षिताः ॥ ९० ॥ एते हि सोमका विप्र पाञ्चालाश्च यशस्विनः । मम सैन्येषु संक्रुद्धा विचरन्ति दवाग्निवत् ॥ ९१ ॥ तान् वारय महावाहो कैकयांश्च नरोत्तम ।

पुरा कुर्वन्ति निःशेषं रक्ष्यमाणाः किरीटिना ॥ ९२ ॥ अश्वत्थामंस्त्वरायुक्तो याहि शीघ्रमरिन्दम । आदौ वा यदि वा पश्चात्तवेदं कर्म ब्राह्मण ॥ ९३ ॥ त्वमुत्पन्नो महाबाहो पाञ्चालानां वधाय वै । करिष्यसि जगत् कृत्स्नमपाञ्चालं किलोद्यतः ॥ ९४ ॥ एवं सिद्धाब्रुवन्नार्य्या भविष्यति च तत्तथा । तस्मात्त्वं पुरुषव्याघ्र पाञ्चालान् जहि सानुगान् ॥ ९५ ॥ न तेऽस्त्रगोचरे शक्ताः स्थातुं देवाः सवान्धवाः । किमु पार्थाः सपाञ्चालाः सत्यमेतद्वचो मम ॥ ९६ ॥ न त्वां समर्थाः संग्रामे पाण्डवाः सह सोमकैः । बला-द्योधयितुं वीर सत्यमेतद्ब्रवीमि ते ॥ ९७ ॥ गच्छ गच्छ महाबाहो न नः कालात्ययो भवेत् । इयं हि द्रवते सेना पार्थ-सायकपीड़िता ॥ ९८ ॥ शक्तो ह्यसि महाबाहो दिव्येन स्वेन तेजसा । निग्रहे पाण्डुपुत्राणां पाञ्चालानाञ्च मानद ॥ ९९ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि दुर्य्योधनवाक्ये एकोनषष्ट्यधिकशततोऽध्यायः ॥ १५९ ॥

---

सञ्जय उवाच । दुर्य्योधनेनैवमुक्तो द्रौणिराहवदुर्मदः । चकारारिवधे यत्नमिन्द्रो दैत्यवधे यथा ॥ १ ॥ प्रत्युवाच महा-बाहुस्तव पुत्रमिदं वचः । सत्यमेतन्महाबाहो यथा वदसि कौरव ॥ २ ॥ प्रिया हि पाण्डवा नित्यं मम चापि पितुश्च मे । तथै-वावां प्रियौ तेषां न युद्धे तु कथञ्चन ॥ ३ ॥ शक्तितस्तात युध्या-वस्त्यक्त्वा प्राणानभीतवत् । अहं कर्णश्च शल्यश्च कृपो हार्दिक्य एव च ॥ ४ ॥ निमेषात् पाण्डवीं सेनां क्षपयेयुर्नृपोत्तम । ते चापि कौरवीं सेनां निमेषात् कुरुसत्तम ॥ ५ ॥ क्षपयेयुर्महाबाहो यदि न स्याम संयुगे । युध्यतः पाण्डवान् शक्त्या तेऽपि चास्मान् युयुत्सवः ॥ ६ ॥ तेजस्तु तेज आसाद्य प्रशमं याति भारत ।

अशक्या तरसा जेतुं पाण्डवानामनीकिनी ॥ ७ ॥ जीवत्सु पाण्डुपुत्रेषु तद्धि सत्यं ब्रवीमि ते। आत्मार्थं युध्यमानास्ते समर्थाः पाण्डुनन्दनाः ॥ ८ ॥ किमर्थं तव सैन्यानि न हनिष्यन्ति भारत। त्वन्तु लुब्धतमो राजन्निकृतिज्ञश्च कौरव ॥ ९ ॥ सर्व्वाभिशङ्की मानी च ततोऽस्मानभिशङ्कसे। मन्ये त्वं कुत्सितो राजन् पापात्मा पापपूरुषः ॥ १० ॥ अन्यानपि स नः क्षुद्र शङ्कसे पापभावितः। अहन्तु यत्नमास्थाय त्वदर्थे त्यक्तजीवितः ॥ ११ ॥ एष गच्छामि सङ्ग्रामं त्वत्कृते कुरुसत्तम। योत्स्यामि शत्रुभिः सार्द्धं हनिष्यामि परान् बहून् ॥ १२ ॥ पाञ्चालैः सह योत्स्यामि सोमकैः केकयैस्तथा। पाण्डवेयैश्च संग्रामे त्वत्प्रियार्थमरिन्दम ॥ १३ ॥ अद्य मद्बाणनिर्द्दग्धाश्चेदिपाञ्चालसोमकाः। सिंहेनेवार्द्दिता गावो विद्रविष्यन्ति सर्व्वतः ॥ १४ ॥ अद्य धर्म्मसुतो राजा दृष्ट्वा मम पराक्रमम्। अश्वत्थाममयं लोकं मंस्यते सह सोमकैः ॥ १५ ॥ आगमिष्यति निर्व्वेदं धर्म्मपुत्रो युधिष्ठिरः। दृष्ट्वा विनिहतान् सङ्ख्ये पाञ्चालान् सह सोमकैः ॥ १६ ॥ ये मां युद्धे प्रयास्यन्ति तान् हनिष्यामि भारत। न हि ते वीर मोक्ष्यन्ते मद्बाहुबलपीड़िताः एवमुक्त्वा महाबाहुः पुत्रं दुर्य्योधनं तव। अभ्यवर्त्तत युद्धाय द्रावयन् सर्व्वधन्विनः ॥ १७ ॥ चिकीर्षुस्तव पुत्राणां प्रियं प्राणभृतांवरः। ततोऽब्रवीत् सकैकेयान् पाञ्चालान् गौतमीसुतः ॥ १८ ॥ प्रहरध्वमितः सर्व्वे मम गात्रे महारथाः। स्थिरीभूताश्च युध्यध्वं दर्शयन्तोऽस्त्रलाघवम् ॥ १९ ॥ एवमुक्तास्तु ते सर्व्वे शस्त्रवृष्टिमपातयन्। द्रौणिं प्रति महाराज जलं जलधरा इव ॥ २० ॥ तान्निहत्य रणे द्रौणिर्द्दशवीरानपोथयत्। प्रमुखे पाण्डुपुत्राणां धृष्टद्युम्नस्य वा विभो ॥ २१ ॥ निहन्यमानाः समरे पाञ्चालाः सोमकास्तथा। परित्यज्य रणे द्रौणिं व्यद्रवन्त दिशो दश ॥ २२ ॥ तान् दृष्ट्वा द्रवतः शूरान् पाञ्चालान् सह सोमकैः।

धृष्टद्युम्नो महाराज द्रौणिमभ्यद्रवद्युधि ॥ २३ ॥ ततः काञ्चनचित्राणां सजलाम्बुदनादिनाम्। वृतः शतेन शूराणां रथानामनिवर्त्तिनाम् ॥ २४ ॥ पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महारथः। द्रौणिमित्यब्रवीद्वाक्यं दृष्ट्वा योधान्निपातितान् ॥ २५ ॥ आचार्य्यपुत्र दुर्बुद्धे किमन्यैर्निहतैस्तव। प्रयुध्यस्व मया सार्द्धं यदि शूरोऽसि संयुगे ॥ २६ ॥ अहं त्वां निहनिष्यामि तिष्ठेदानीं स्थिरो भव। ततस्तमाचार्य्यसुतं धृष्टद्युम्नः प्रतापवान् ॥ २७ ॥ मर्म्मभिद्भिः शरैस्तीक्ष्णैर्जघान भृशदारुणैः। ते तु पङ्क्तीकृता द्रौणिं शरा विविशुराशुगाः ॥ २८ ॥ रुक्मपुङ्खाः प्रसन्नाग्राः सर्व्वकायावदारणाः। मध्वर्थिन इवोद्दामा भ्रमराः पुष्पितं द्रुमम् ॥ २९ ॥ सोऽतिविद्धो भृशं क्रुद्धः पादाक्रान्त इवोरगः। मानी द्रौणिरसम्भ्रान्तः शरपाणिरभाषत ॥ ३० ॥ धृष्टद्युम्न स्थिरो भूत्वा मुहूर्त्तं प्रतिपालय। यावत्त्वां निशितैर्भल्लैः प्रेषयामि यमक्षयम् ॥ ३१ ॥ द्रौणिरेवमथाभाष्य पार्षतं परवीरहा। छादयामास बाणौघैः समन्ताल्लघुहस्तवत् ॥ ३२ ॥ सच्छाद्यमानः समरे द्रौणिना युद्धदुर्म्मदः। द्रौणिं पाञ्चालतनयो वाग्भिरातर्ज्जयत्तदा ॥ ३३ ॥ न जानीषे प्रतिज्ञां मे विप्रोत्पत्तिं तथैव च। द्रोणं हत्वा किल मया हन्तव्यस्त्वं सुदुर्म्मते ॥ ३४ ॥ ततस्त्वाहं न हन्म्यद्य द्रोणे जीवति संयुगे। इमान्तु रजनीं प्राप्तां सुप्रभातां सुदुर्म्मते ॥ ३५ ॥ निहत्य पितरं तेऽद्य ततस्त्वामपि संयुगे। नेष्यामि प्रेतलोकाय एतन्मे मनसि स्थितम् ॥ ३६ ॥ यस्ते पार्थेषु विद्वेषो या भक्तिः कौरवेषु च। तां दर्शय स्थिरो भूत्वा न मे जीवन् गमिष्यसि ॥ ३७ ॥ यो हि ब्राह्मणमुत्सृज्य क्षत्रधर्म्मरतो द्विजः। स बध्यः क्षत्रलोकस्य यथा त्वं पुरुषाधम ॥ ३८ ॥ इत्युक्तः परुषं वाक्यं पार्षतेन द्विजोत्तमः। क्रोधमाहारयत्तीव्रं तिष्ठतिष्ठेति चाब्रवीत् ॥ ३९ ॥ निर्द्दहन्निव चक्षुर्भ्यां पार्षतं

शोऽभ्यवैद्यत। छादयामास समरे निघ्नसन्नुरगो यथा॥ ४०॥
स ताड्यमानः समरे द्रौणिना पार्षतः शरैः। सर्वपाञ्चालसेनाभिः
संवृतो रथसत्तमः॥ ४१॥ नाकम्पत महाबाहुः स्ववीर्य्यं समु-
पाश्रितः। सायकांश्चैव विविधानश्वत्थाम्नि मुमोच ह॥ ४२॥
तौ पुनः संन्यवर्त्तेतां प्राणद्यूताभिदेविनौ। निवारयन्तौ वाणौ-
घान् परस्परममर्षणौ॥ ४३॥ उत्सृजन्तौ महेष्वासौ शरवृष्टीः
समन्ततः। द्रौणिपार्षतयोर्युद्धं घोररूपं भयावहम्॥ ४४॥
दृष्ट्वा सम्पूजयामासुः सिद्धचारणवातिकाः। शरौघैः पूरयन्तौ
तावाकाशं प्रदिशस्तथा॥ ४५॥ अलक्ष्यौ समयुध्येतां महत् कृत्वा
शरैस्तमः। नृत्यमानाविव रणे मण्डलीकृतकार्मुकौ॥ ४६॥
परस्परवधे युक्तौ सर्वभूतभयङ्करौ। अयुध्येतां महाबाहू चित्रं
लघु च सुष्टु च॥ ४७॥ सम्पूज्यमानौ समरे योधमुख्यैः सह-
स्रशः। तौ प्रयुक्तौ रणे दृष्ट्वा वने वन्यौ गजाविव॥ ४८॥
उभयोः सेनयोर्हर्षस्तुमुलः समपद्यत। सिंहनादरवाश्चासन् दध्मुः
शङ्खांश्च सैनिकाः॥ ४९॥ वादित्राण्यभ्यवादन्त शतशोऽथ सह-
स्रशः। तस्मिंस्तु तुमुले युद्धे भीरूणां भयवर्द्धने॥ ५०॥ मुहूर्त्त-
मिव तद्युद्धं समरूपमिवाभवत्। ततो द्रौणिर्महाराज पार्षतस्य
महात्मनः॥ ५१॥ धनुर्ध्वजं तथा छत्रं तथोभौ पार्ष्णिसारथी।
सूतमश्वांश्च चतुरो निहत्याभ्यद्रवद्रणे॥ ५२॥ पाञ्चालांश्चैव
तान् सर्वान् शरैः सन्नतपर्वभिः। व्यद्रावयदमेयात्मा शतशोऽथ
सहस्रशः॥ ५३॥ ततः प्रविव्यथे सेना पाण्डवी भरतर्षभ।
दृष्ट्वा द्रौणेर्महत् कर्म वासवस्येव संयुगे॥ ५४॥ शतेन च शतं
हत्वा पाञ्चालानां महारथः। त्रिभिश्च निशितैर्वाणैर्हत्वा त्रीन् वै
नरर्षभान्॥ ५५॥ द्रौणिर्द्रुपदपुत्रस्य फाल्गुनस्य च पश्यतः।
नाशयामास पाञ्चालान् भूयिष्ठं ये व्यवस्थिताः॥ ५६॥ ते वध्य-
मानाः पाञ्चालाः समरे सह सृञ्जयैः। अगच्छन् द्रौणिमुत्सृज्य

विप्रकीर्णैरथध्वजाः॥ ५७॥ स जित्वा समरे शत्रून् द्रोणपुत्रो महारथः। ननाद सुमहानादं तपान्ते जलदो यथा॥ ५८॥ स निहत्य बहून् शूरानश्वत्थामा व्यरोचत। युगान्ते सर्वभूतानि प्रदहन्निव पावकः॥ ५९॥ सम्पूज्यमानो युधि कौरवेयैर्निर्जित्य सङ्ख्येऽरिगणान् सहस्रशः। व्यरोचत द्रोणसुतः प्रतापवान् यथा सुरेन्द्रोऽरिगणान्निपात्य वै॥ ६०॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि अश्वत्थामापराक्रमे षष्ट्यधिकशततोऽध्यायः॥ १६०॥

---

सञ्जय उवाच। ततो युधिष्ठिरो राजा भीमसेनश्च पाण्डवः। द्रोणपुत्रं महाराज समन्तात् पर्य्यवारयन्॥ १॥ ततो दुर्य्योधनो राजा भारद्वाजेन संवृतः। अभ्ययात् पाण्डवान् सङ्ख्ये ततो युद्धमवर्त्तत॥ २॥ घोररूपं महाभीमं भीरूणां भयवर्द्धनम्। अम्बष्ठान्मालवान् वङ्गांञ्छीवींस्त्रैगर्त्तकानपि॥ ३॥ प्राहिणोन्मृत्युलोकाय गणान् क्रुद्धो युधिष्ठिरः। अभीषाहान् शूरसेनान् क्षत्रियान् युद्धदुर्मदान्॥ ४॥ निकृत्य पृथिवीञ्चक्रे भीम शोणितकर्द्दमाम्। यौधेयानद्रिजान्राजन् मद्रकान्मालवानपि॥ ५॥ प्राहिणोन्मृत्युलोकाय किरीटी श्वेतवाहनः। प्रगाढ़मञ्जोगतिभिर्नाराचैरभिताड़िताः॥ ६॥ निपेतुर्द्विरदा भूमौ द्विशृङ्गा इव पर्वताः। निकृत्तैर्हस्तिहस्तैश्च चेष्टमानैस्ततस्ततः॥ ७॥ रराज वसुधा कीर्णा विसर्पिभिरिवोरगैः। क्षिप्तैः कनकचित्रैश्च नृपछत्रैश्च भूर्बभौ॥ ८॥ द्यौरिवादित्यचन्द्राद्यैर्ग्रहैः कीर्णा युगक्षये। हत प्रहरताभीता विध्यत व्यवकृन्तत॥ ९॥ इत्यासीत्तुमुलः शब्दः स शोणाश्वरथं प्रति। द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण संयुगे॥ १०॥ व्यधमत्तान्महावायुर्मेघानिव दुरत्ययः।

ते हन्यमाना द्रोणेन पाञ्चालाः प्राद्रवन् भयात् ॥ ११ ॥ पश्यतो भीमसेनस्य पार्थस्य च महात्मनः । किरीटी भीमसेनश्च सहसा सन्न्यवर्त्तताम् ॥ १२ ॥ महता रथवंशेन परिगृह्य बलं महत् । बीभत्सुर्द्दक्षिणं पार्श्वमुत्तरञ्च वृकोदरः ॥ १३ ॥ भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षताम् । तौ तथा सृञ्जयाश्चैव पाञ्चालाश्च महारथाः ॥ १४ ॥ अन्वगच्छन्महाराज मत्स्याश्च सह सोमकैः । तथैव तव पुत्रस्य रथोदाराः प्रहारिणः ॥ १५ ॥ महत्या सेनया राजन् जग्मुर्द्रोणरथं प्रति । ततः सा भारती सेना बध्यमाना किरीटिना ॥ १६ ॥ तमसा निद्रया चैव पुनरेव व्यदीर्य्यत । द्रोणेन वार्य्यमाणास्ते स्वयं तत्र सुतेन च ॥ १७ ॥ नाशक्यन्त महाराज योधा वारयितुं तदा । सा पाण्डुपुत्रस्य शरैर्बध्यमाना महाचमूः ॥ १८ ॥ तमसा संवृते लोके व्यद्रवत् सर्वतोमुखी । उत्सृज्य शतशो वाहांस्तत्र केचिन्नराधिपाः । व्यद्रवन्त महाराज भयाविष्टाः समन्ततः ॥ १९ ॥

इति द्रोणपर्व्वणि घटोत्कचबधपर्व्वणि सङ्कुलयुद्धे
एकषष्ट्यधिकशतोऽध्यायः ॥ १६१ ॥

---

सञ्जय उवाच । सोमदत्तन्तु संक्रुद्धो विधुन्वानं महद्धनुः । सात्यकिः प्राह यन्तारं सोमदत्ताय मां वह ॥ १ ॥ न ह्यहत्वा रणे शत्रुं वाह्लीकं कौरवाधमम् । निवर्त्तिष्ये रणे सूत सत्यमेतद्वचो मम ॥ २ ॥ ततः सम्प्रैषयद्यन्ता सैन्धवांस्तान्महाजवान् । तुरङ्गमाञ्छङ्खवर्णान् सर्वशस्त्रातिगान्रणे ॥ ३ ॥ तेऽवहन् युयुधानन्तु मनोमारुतरंहसः । यथेन्द्रं हरयो राजन् पुरा दैत्यवधोद्यतम् ॥ ४ ॥ तमापतन्तं सम्प्रेक्ष्य सात्वतं रभसं रणे । सोमदत्तो महाराज ह्यसम्भ्रान्तो न्यवर्त्तत ॥ ५ ॥ विसृजञ्छर-

वर्षाणि पर्जन्य इव वृष्टिमान् । छादयामास शैनेयं भास्करं जलदो यथा ॥ ६ ॥ असम्भ्रान्तश्च समरे सात्यकिः कुरुपुङ्गवम् । छादयामास बाणौघैः समन्ताद्भरतर्षभ ॥ ७ ॥ सोमदत्तस्तु तं षष्ट्या विव्याधोरसि माधवम् । सात्यकिश्चापि तं राजन् अविध्यत् सायकैः शितैः ॥ ८ ॥ तावन्योन्यं शरैः कृत्तौ व्यरोचेतां परस्परम् । सुपुष्पौ पुष्पसमये पुष्पिताविव किंशुकौ ॥ ९ ॥ रुधिरोक्षितसर्वाङ्गौ कुरुवृष्णियशस्करौ । परस्परमवेक्षेतां दहन्ताविव लोचनैः ॥ १० ॥ रथमण्डलमार्गेषु चरन्तावरिमर्द्दनौ । घोररूपौ हि तावास्तां वृष्टिमन्ताविवाम्बुदौ ॥ ११ ॥ शरसम्भिन्नगात्रौ तौ सर्वतः सकलीकृतौ । श्वाविधाविव राजेन्द्र दृश्येतां शरविक्षतौ ॥ १२ ॥ सुवर्णपुङ्खैरिषुभिराचितौ तौ व्यरोचताम् । खद्योतैरावृतौ राजन् प्रावृषीव वनस्पती ॥ १३ ॥ सम्प्रदीपितसर्वाङ्गौ सायकैस्तौ महारथौ । अदृश्येतां रणे क्रुद्धावुल्काभिरिव कुञ्जरौ ॥ १४ ॥ ततो युधि महाराज सोमदत्तो महारथः । अर्द्धचन्द्रेण चिच्छेद माधवस्य महद्धनुः ॥१५॥ अथैनं पञ्चविंशत्या सायकानां समार्पयत् । त्वरमाणस्त्वराकाले पुनश्च दशभिः शरैः ॥ १६ ॥ अथान्यद्धनुरादाय सात्यकिर्वेगवत्तरम् । पञ्चभिः सायकैस्तूर्णं सोमदत्तमविध्यत ॥ १७ ॥ ततोऽपरेण भल्लेन ध्वजञ्चिच्छेद काञ्चनम् । वाह्लीकस्य रणे राजन् सात्यकिः प्रहसन्निव ॥ १८ ॥ सोमदत्तस्त्वसम्भ्रान्तो दृष्ट्वा केतुं निपातितम् । शैनेयं पञ्चविंशत्या सायकानां समाचिनोत् ॥१९ ॥ सात्वतोऽपि रणे क्रुद्धः सोमदत्तस्य धन्विनः । धनुश्चिच्छेद समरे क्षुरप्रेण शितेन च ॥ २० ॥ अथैनं रुक्मपुङ्खानां शतेन नतपर्वणाम् । आचिनोत्तं महाराज भग्नदंष्ट्रमिवोरगम् ॥ २१ ॥ अथान्यद्धनुरादाय सोमदत्तो महारथः । सात्यकिं छादयामास शरवृष्ट्या महाबलः ॥ २२ ॥ सोमदत्तञ्च संक्रुद्धो रणे विव्याध

सात्यकिः। सात्यकिश्चेषुजालेन सोमदत्तोऽभ्यपीड़यत् ॥ २३ ॥ दशभिः सात्त्वतस्यार्थे भीमोऽहन् वाह्लिकात्मजम्। सोमदत्तोप्यसम्भ्रान्तो भीममार्च्छच्छितैः शरैः॥ २४ ॥ ततस्तु सात्त्वतः क्रुद्धो हेमदण्डं नवं दृढ़म्। मुमोच परिघं घोरं सोमदत्तस्य वक्षसि॥ २५॥ तमापतन्तं वेगेन परिघं घोरदर्शनम्। द्विधा चिच्छेद समरे प्रहसन्निव कौरवः॥ २६ ॥ स पपात द्विधा छिन्न आयसः परिघो महान्। महीधरस्येव महच्छिखरं वज्रताड़ितम्॥ २७॥ ततस्तु सात्यकी राजन् सोमदत्तस्य संयुगे। धनुश्चिच्छेद भल्लेन हस्तावापञ्च पञ्चभिः॥ २८॥ ततश्चतुर्भिश्च शरैस्तूर्णं तान् तुरगोत्तमान्। समीपं प्रेषयामास प्रेतराजस्य भारत॥ २९ ॥ सारथेश्च शिरः कायात् भल्लेनानतपर्व्वणा। जहार रथशार्दूलः प्रहसन्निव भारत॥ ३०॥ ततः शरं महाघोरं ज्वलन्तमिव पावकम्। मुमोच स्वर्णपुङ्खं तं तैलधौतं शिलाशितम्॥ ३१॥ स विमुक्तो बलवता शैनेयेन शरोत्तमः। घोरस्तस्योरसि विभो निपपाताशु श्येनवत्॥ ३२॥ सोऽतिविद्धो बलवता सात्त्वतेन महारथः। सोमदत्तो महाराज पपात च ममार च॥ ३३॥ तं दृष्ट्वा निहतं तत्र सोमदत्तं महारथम्। तावका रथवंशेन युयुधानमुपाद्रवन्॥ ३४॥ पाण्डवाश्च महाराज सह सर्व्वैः प्रभद्रकैः। महत्या सेनया सार्द्धं द्रोणानीकमुपाद्रवन्॥ ३५॥ ततो युधिष्ठिरः क्रुद्धो भारद्वाजस्य सैनिकान्। शरैर्विद्रावयामास भारद्वाजस्य पश्यतः॥ ३६॥ सैन्यानि द्रावयन्तञ्च द्रोणो दृष्ट्वा युधिष्ठिरम्। अभिदुद्राव वेगेन क्रोधसंरक्तलोचनः॥ ३७॥ ततः सुनिशितैर्वाणैः पार्थं विव्याध सप्तभिः। युधिष्ठिरोऽपि संक्रुद्धः प्रतिविव्याध पञ्चभिः॥ ३८॥ सोऽतिविद्धो महेष्वासः सृक्कणी विलिहन्मुहुः। युधिष्ठिरस्य चिच्छेद ध्वजं कार्म्मुकमेव च॥ ३९॥ ततो विधन्वा त्वरितस्त्वराकाले नृपो-

त्तमः। अन्यदादत्त वेगेन कार्मुकं समरे दृढ़म् ॥ ४० ॥ ततः शरसहस्रेण द्रोणं विव्याध पाण्डवः। साश्वसूतध्वजरथं तदद्भुतमिवाभवत् ॥ ४१ ॥ ततो मुहूर्त्तं व्यथितः शरघातप्रपीड़ितः। निषसाद रथोपस्थे द्रोणो ब्राह्मणपुङ्गवः ॥ ४२ ॥ प्रतिलभ्य ततः संज्ञां निश्वसन्नुरगो यथा। क्रोधेन महताविष्टो वायव्यास्त्रमथासृजत् ॥ ४३ ॥ असम्भ्रान्तस्ततः पार्थो धनुरादाय वीर्य्यवान्। तदस्त्रमस्त्रेण रणे स्तम्भयामास तस्य तु ॥ ४४ ॥ चिच्छेद च धनुर्दीर्घं ब्राह्मणस्य च पाण्डवः। अथान्यद्धनुरादाय द्रोणः क्षत्रियमर्द्दनः ॥ ४५ ॥ तदप्यस्य शितैर्भल्लैश्चिच्छेद कुरुपुङ्गवः। ततोऽब्रवीद्वासुदेवः कुन्तीपुत्रं युधिष्ठिरम् ॥ ४६ ॥ युधिष्ठिर महाबाहो यत्त्वां वक्ष्यामि तच्छृणु। उपारमस्व युद्धात्त्वं द्रोणाद्भारतसत्तम ॥ ४७ ॥ यतते हि सदा द्रोणो ग्रहणे तव संयुगे। नानुरूपमहं मन्ये युद्धमस्य त्वया सह ॥ ४८ ॥ योऽस्य सृष्टो विनाशाय स एवैनं हनिष्यति। परिवर्ज्य गुरुं याहि यत्र राजा सुयोधनः ॥ ४९ ॥ राज्ञा राजा हि योद्धव्यो नाराज्ञा युद्धमिष्यते। तत्र त्वं व्रज कौन्तेय हस्त्यश्वरथसंवृतः ॥ ५० ॥ यावन्मात्रेण च मया सहायेन धनञ्जयः। भीमश्च नरशार्दूलो युध्यते कौरवैः सह ॥ ५१ ॥ वासुदेववचः श्रुत्वा धर्मराजो युधिष्ठिरः। मुहूर्त्तं चिन्तयित्वा तु ततो दारुणमाहवम् ॥ ५२ ॥ प्रायाद्द्रुतममित्रघ्नो यत्र भीमो व्यवस्थितः। विनिघ्नंस्तावकान् योधान् व्यादितास्य इवान्तकः ॥ ५३ ॥ रथघोषेण महता नादयन् वसुधातलम्। स मेघ इव घर्मान्ते राजराजो युधिष्ठिरः ॥५४॥ भीमस्य निघ्नतः शत्रून् पार्ष्णिं जग्राह पाण्डवः। द्रोणोऽपि शत्रून् पाञ्चालान् व्यधमद्रजनीमुखे ॥ ५५ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्वणि रात्रियुद्धे सोमदत्तवधे द्विषष्ट्यधिकशततोऽध्यायः ॥ १६२ ॥

सञ्जय उवाच। वर्त्तमाने तथा युद्धे घोररूपे भयानके। तमसा संवृते लोके रजसा च महीपते ॥ १ ॥ नापश्यन्त रणे योधाः परस्परमवस्थिताः। अनुमानेन संज्ञाभिर्युध्यन्ते क्षत्रियर्षभाः ॥ २ ॥ नरनागाश्वपत्तीनां महारौद्रक्षये विभो। द्रोणकर्णकृपा वीरा भीमपार्षतसात्वताः ॥ ३ ॥ अन्योऽन्यं क्षोभयामासुः सैन्यानि भरतर्षभ। वध्यमानानि सैन्यानि समन्तात्तैर्महारथैः ॥ ४ ॥ तमसा संवृते चैव समन्ताद्विप्रदुद्रुवुः। ते सर्वतो विद्रवन्तो योधा विस्रस्तचेतसः ॥ ५ ॥ अहन्यन्त महाराज धावमानाश्च सर्वतः। महारथसहस्राणि जघ्नरन्योऽन्यमाहवे ॥ ६ ॥ अन्धेतमसि मूढ़ानि पुत्रस्य तव मन्त्रितैः। ततः सर्वाणि भूतानि सेनामुख्याश्च भारत। व्यमुह्यन्त रणे तत्रास्तमसा संवृते सति ॥ ७

धृतराष्ट्र उवाच। अथ संलोड्यमानानां पाण्डवैर्निहतौजसाम्। अन्धे तमसि मग्नानामासीत् किं वो मनस्तदा ॥ ८ ॥ कथं प्रकाशस्तेषां वा मम सैन्यस्य वा पुनः। बभूव लोके तमसा तथा सञ्जय संवृते ॥ ९ ॥

सञ्जय उवाच। ततः सर्वाणि सैन्यानि हतशिष्टानि यानि वै। सेनागोप्तॄनथादिश्य पुनर्व्यूहमकल्पयन् ॥ १० ॥ द्रोणः पुरस्ताज्जघने तु शल्यस्तथा द्रौणिः पार्श्वतः सौबलश्च। स्वयञ्च सर्वाणि बलानि राजन् राजाभ्ययाद्गोपयन् वै निशायाम् ॥ ११ ॥ उवाच सर्वांश्च पदातिसङ्घान् दुर्य्योधनः पार्थिवान् सान्त्वपूर्वम्। उत्सृज्य सर्वे परमायुधानि गृह्णीत हस्तैर्ज्वलितान् प्रदीपान् ॥ १२ ॥ ते चोदिताः पार्थिवसत्तमेन ततः प्रहृष्टा जगृहुः प्रदीपान्। देवर्षिगन्धर्वसुरर्षिसङ्घा विद्याधराश्चाप्सरसां गणाश्च ॥ १३ ॥ नागाः सयक्षोरगकिन्नराश्च हृष्टा दिविस्था जगृहुः प्रदीपान्। दिग्दैवतेभ्यश्च समापतन्तोऽदृश्यन्त दीपाः ससुगन्धितैलाः ॥ १४ ॥ विशेषतो नारदपर्वताभ्यां सम्बोध्यमानाः कुरु-

पुङ्गवार्थम्। सा चैव भूयो ध्वजिनी विषत्ता व्यरोचताग्निप्रभया निशायाम्॥ १५॥ महाधनैराभरणैश्च दीप्तैः शस्त्रैश्च दिव्यैरभिसम्पतद्भिः। रथे रथे पञ्च विदीपिकास्तु प्रदीपिका मत्तगजे त्रयश्च॥ १६॥ प्रत्यश्वमेकश्च महाप्रदीपः कृतास्तु ताः पाण्डवकौरवेयैः। क्षणेन सर्वे विहिताः प्रदीपा व्यादीपयन्तो ध्वजिनीं तवाशु॥ १७॥ सर्वान्तु सेनां परिशोभमानाः पदातिभिः पावकतैलहस्तैः। प्रकाश्यमाना ददृशुर्निशायां यथान्तरीक्षे जलदास्तडिद्भिः॥ १८॥ प्रकाशितायान्तु ततो ध्वजिन्यां द्रोणोऽग्निकल्पः प्रपतन् समन्तात्। रराज राजेन्द्र सुवर्णवर्मा मध्यङ्गतः सूर्य्य इवांशुमाली॥ १९॥ जाम्बूनदेष्वाभरणेषु चैव निष्केषु शुद्धेषु शरासनेषु। पीतेषु शस्त्रेषु च पावकस्य प्रतिप्रभास्तत्र तदा बभूवुः॥ २०॥ गदाश्च शैक्याः परिघाश्च शुभ्रा रथेषु शक्त्यश्च विवर्त्तमानाः। प्रतिप्रभा रश्मिभिराजमीढ़ पुनः पुनः सञ्जनयन्ति दीपान्॥ २१॥ छत्राणि वालव्यजनानि खड्गा दीप्ता महोल्काश्च तथैव राजन्। व्याघूर्णमानाश्च सुवर्णमाला व्यायच्छतां तत्र तदा विरेजुः॥ २२॥ अस्त्रप्रभाभिश्च विराजमानं दीपप्रभाभिश्च तदा बलन्तत्। प्रकाशितञ्चाभरणप्रभाभिर्भृशं प्रकाशं नृपते बभूव॥ २३॥ पीतानि शस्त्राण्यसृगुक्षितानि वीरावधूतानि सुशोभनानि। दीप्तां प्रभां प्राजनयन्त तत्र तपात्यये विद्युदिवान्तरीक्षे॥ २४॥ प्रकम्पितानामभिघातवेगैरभिघ्नताञ्चापततां जवेन। वक्त्राण्यशोभन्त तदा नराणां वायूरितानीव महाम्बुजानि॥ २५॥ महावने दारुमये प्रदीप्ते यथा प्रभा भास्करस्याधिका स्यात्। तथा तदासीत् ध्वजिनी प्रदीप्तां महाभये तत्र तु भीमरूपा॥ २६॥ तत् सम्प्रदीप्तं बलमस्मदीयं निशम्य पार्थास्त्वरितास्तथैव। सर्वेषु सैन्येषु पदातिसङ्घानचोदयंस्तेऽपि च चक्रुरेवम्॥ २७॥ गजे गजे सप्त कृताः प्रदीपा रथे रथे चैव

श्च प्रदीपाः । द्वावश्वपृष्ठे परिपार्श्वतोऽन्ये ध्वजेषु चान्ये जघनेषु चान्ये ॥ २८ ॥ सेनासु सर्व्वासु च पार्श्वतोऽन्ये पश्चात् पुरस्ताच्च समन्ततश्च । मध्ये तथान्ये ज्वलितप्रदीपाः सेनाद्वयेऽपि स्म तदा बभूवुः ॥ २९ ॥ सर्व्वेषु सैन्येषु पदातिसङ्घाः सम्मिश्रिता हस्तिरथाश्ववृन्दैः । मध्ये तथान्ये ज्वलिताग्निहस्ता व्यदीपयन् पाण्डुसुतस्य सेनाम् ॥ ३० ॥ तैस्तु प्रदीपैस्तु तथा प्रदीप्तं बलं यथासीद्बलवद्बलेन । भाः कुर्व्वता भानुमता ग्रहेण दिवाकरेणाग्निरिवाभितप्तः ॥ ३१ ॥ तयोः प्रभा पृथिवीमन्तरीक्षं सर्व्वं व्यतिक्रम्य दिशश्च विद्धाः । तेन प्रकाशेन भृशं प्रकाशं तथा च तेषां तव चैव सैन्ये ॥ ३२ ॥ तेन प्रकाशेन दिवं गतेन सम्बोधिता देवगणाः समस्ताः । गन्धर्व्वयक्षाः सुरसिद्धसङ्घाः समागमन्नप्सरसश्च सर्व्वाः ॥ ३३ ॥ तद्देवगन्धर्व्वसमाकुलञ्च यक्षैश्च सिद्धाप्सरसांगणैश्च । हतैश्च योधैर्दिवमाविशद्भिरायोधनं दिव्यकल्पं बभूव ॥ ३४ ॥ रथाश्वनागाकुलदीपदीप्तं संरब्धयोधं हतविद्रुताश्वम् । महद्बलं व्यूढनराश्वनागं सुरासुरव्यूहसमं बभूव ॥ ३५ ॥ तच्छक्तिसम्पर्कसुचण्डवातं महारथाभ्रं नरवाजिनागम । शरौघवर्षं रुधिराम्बुधारं निशि प्रवृत्तं नरदेवयुद्धम् ॥ ३६ ॥ तस्मिन्महाग्निप्रतिमो महात्मा सन्तापयन् पाण्डवान् विप्रमुख्यः । गभस्तिभिर्मध्यगतो यथार्क्को वर्षात्यये तद्वदभून्नरेन्द्रः ॥ ३७ ॥

इतिद्रोणपर्व्वणि घटोत्कचवधपर्व्वणि दीपोद्योतने त्रिषष्ट्यधिकशततोऽध्यायः ॥ १६३ ॥

---

सञ्जय उवाच । प्रकाशिते तथा लोके रजसा च समावृते । समागमन्रथोवीराः परस्परवधैषिणः ॥ १ ॥ ते समेत्य रणे राजन् शस्त्रप्रासासिधारिणः । परस्परमुदैक्षन्त परस्परकृता-

गमः ॥ २ ॥ प्रदीपानां सहस्रैश्च दीप्यमानैः समन्ततः । रत्नाचितैः स्वर्णदण्डैर्गन्धतैलावसिञ्चितैः ॥ ३ ॥ देवगन्धर्वदीपाद्यैः प्रभाभिरधिकोज्ज्वलैः । विरराज तदा भूमिर्ग्रहैर्द्यौरिव भारत ॥ ४ ॥ उल्काशतैः प्रज्वलितैरणभूमिर्व्यराजत । दह्यमानेव लोकानामभावे च वसुन्धरा ॥ ५ ॥ व्यदीपन्त दिशः सर्वाः प्रदीपैस्तैः समन्ततः । वर्षाप्रदोषे खद्योतैर्वृता वृक्षा इवाबभुः ॥ ६ ॥ असज्जन्त तदा वीरा राजन् वीरैः पृथक् पृथक् । नागा नागैः समाजग्मुस्तुरगा हयसादिभिः ॥ ७ ॥ रथा रथिवरैरेव समाजग्मुर्मुदा युताः । तस्मिन्रात्रिमुखे घोरे पुत्रस्य तव शासनात् ॥८॥ चतुरङ्गस्य सैन्यस्य सम्पातश्च महानभूत् । ततोऽर्जुनो महाराज कौरवाणामनीकिनीम् । व्यधमत्त्वरया युक्तः क्षपयन् सर्वपार्थिवान् ॥ ९ ॥

धृतराष्ट्र उवाच । तस्मिन् प्रविष्टे संरब्धे मम पुत्रस्य वाहिनीम् । अमृष्यमाणे दुर्द्धर्षे किं व आसीन्मनस्तदा ॥ १० ॥ किममन्यन्त सैन्यानि प्रविष्टे परतापने । दुर्य्योधनश्च किं कृत्यं प्राप्तकालममन्यत ॥ ११ ॥ के चैनं समरे वीरं प्रत्युद्ययुररिन्दमाः । द्रोणञ्च के व्यरक्षन्त प्रविष्टे श्वेतवाहने ॥ १२ ॥ केऽरक्षन् दक्षिणञ्चक्रं के च द्रोणस्य सव्यतः । के पृष्ठतोऽन्वरक्षन्त वीरा वीरस्य युध्यतः ॥ १३ ॥ केपुरस्तादगच्छन्त निघ्नतः शात्रवान्रणे । यत् प्राविशन्महेष्वासः पाञ्चालानपराजितः ॥ १४ ॥ नृत्यन्निव नरव्याघ्रो रथमार्गेषु वीर्य्यवान् । यो ददाह शरैर्द्रोणः पाञ्चालानां रथव्रजान् ॥ २५ ॥ धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान् । अव्यग्रानेव हि परान् कथमस्यपराजितान् ॥ १६ ॥ हृष्टानुदीर्णान् सङ्ग्रामे न तु सञ्जय मामकान् । हतांश्चैव विवर्णांश्च विप्रकीर्णांश्च शंससि । रथिनो विरथांश्चैव कृतान् युद्धेषु मामकान् ॥ १७ ॥

सञ्जय उवाच। द्रोणस्य मतमाज्ञाय योद्धुकामस्य तां निशाम्। दुर्य्योधनो महाराज वश्यान् भ्रातॄनभाषत ॥ १८ ॥ विकर्णञ्चित्रसेनञ्च सुपार्श्वन्तु तथैव च। दुर्द्धर्षं दीर्घबाहुञ्च ये च तेषां पदानुगाः ॥ १९ ॥ द्रोणं यत्ताः पराक्रान्ताः सर्वे रक्षन्तु पृष्ठतः। हार्द्दिक्यो दक्षिणञ्चक्रं शल्यश्चैवोत्तरं तदा ॥ २० ॥ त्रिगर्त्तानाञ्च ये शूरा हतशेषा महारथाः। तांश्चैव पुरतः सर्वान् पुत्रस्ते समचोदयत् ॥ २१ ॥ आचार्य्यो हि समायुक्तो भृशं यत्ताश्च पाण्डवाः। तं रक्षध्वं सुसंयुक्ता निघ्नन्तं शात्रवान्रणे ॥२२॥ द्रोणोऽपि बलवान् युद्धे क्षिप्रहस्तः पराक्रमी। निर्ज्जयेत्त्रिदशान् युद्धे किमु पार्थान् ससोमकान् ॥ २३ ॥ ते यूयं सहिताः सर्वे भृशं यत्ता महारणे। द्रोणं रक्षत दुर्द्धर्षं धृष्टद्युम्नान्महारथात् ॥ २४ ॥ पाण्डवेयेषु योधेषु योधं पश्याम्यहं न तम्। यो जयेत रणे द्रोणं धृष्टद्युम्नादृते पुमान् ॥ २५ ॥ तत्र सर्वात्मना मन्ये भारद्वाजस्य रक्षणम्। स गुप्तः सोमकान् हन्यात् सृञ्जयांश्च क्रमागतान् ॥ २६ ॥ सृञ्जयेषु च सर्वेषु निहतेषु चमूमुखे। धृष्टद्युम्नं रणे द्रौणिर्घातयिष्यत्यसंशयम् ॥ २७ ॥ तथार्ज्जुनं रणे कर्णो विजेष्यति महारथः। भीमसेनमुखांश्चाहं युद्धे जेष्यामि दंशितान् ॥ २८ ॥ शेषांश्च पाण्डवान् योधाः प्रसभं हीनतेजसः। सोऽयं मम जयो व्यक्तो दीर्घकालं भविष्यति ॥ २९ ॥ तस्माद्रक्षथ सङ्ग्रामे द्रोणमेव महारथम्। इत्युक्त्वा भरतश्रेष्ठ पुत्रो दुर्य्योधनस्तव ॥ ३० ॥ व्यादिदेश तदा सैन्यं तस्मिंस्तमसि दारुणे। ततः प्रववृते युद्धं रात्रौ भरतसत्तम ॥ ३१ ॥ उभयोः सैन्ययोराजन् विजयं प्रतिकाङ्क्षिणोः। अर्ज्जुनः कौरवं सैन्यमर्ज्जुनञ्चापि कौरवाः ॥ ३२ ॥ नानाशस्त्रसमावापैरन्योऽन्यं पर्य्यपीड़यन्। द्रौणिः पाञ्चालराजानं भारद्वाजश्च सृञ्जयान् ॥३४॥ छादयाञ्चक्रिरे सङ्ख्ये शरैः सन्नतपर्वभिः। पाण्डुपाञ्चालसैन्यानां

कौरवाणाञ्च भारत ॥ ३५ ॥ आसीन्निष्टानको घोरो निघ्नता-मितरेतरम् । नैवास्माभिर्न पूर्वैश्च दृष्टपूर्वन्तथाविधम् । यादृशं युद्धमेवासीद्रात्रौ घत्रभयानकम् ॥ ३६ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि सङ्कुलयुद्धे
चतुःषष्ट्यधिकशततोऽध्यायः ॥ १६४ ॥

---

सञ्जय उवाच । वर्त्तमाने तथा रौद्रे रात्रियुद्धे विशाम्पते । सर्वभूतक्षयकरे धर्मपुत्रो युधिष्ठिरः ॥ १ ॥ अब्रवीत् पाण्डवांश्चैव पाञ्चालांश्च ससोमकान् । मनुष्यरथनागानामभावाय नराधिप ॥ २ ॥ युधिष्ठिरोऽब्रवीद्राजा स्वान् योधान्मनुजाधिपः । अभ्या-गच्छत गच्छध्वं द्रोणमेव जिघांसया ॥ ३ ॥ राज्ञस्ते वचना-द्राजन् पाञ्चालाः सोमकास्तथा । द्रोणमेवाभ्यधावन्त नदन्तो भैरवान्रवान् ॥ ४ ॥ तान् वयं प्रतिगर्ज्जन्तः प्रत्युद्याताश्चमर्षिताः । यथाशक्ति यथोत्साहं यथासत्त्वञ्च संयुगे ॥ ५ ॥ कृतवर्मा तु हार्द्दिक्यो युधिष्ठिरमुपाद्रवत् । द्रोणं प्रति समायान्तं मत्तो मत्तमिव द्विपम् ॥ ६ ॥ शैनेयं शरवर्षाणि विसृजन्तं समन्ततः । अभ्ययात् कौरवो राजन् भूरिः संग्राममर्द्दनः ॥ ७ ॥ सहदेव-मथायान्तं द्रोणलिप्सुं महारथम् । कर्णो वैकर्त्तनो राजन् वारयामास पाण्डवम् ॥ ८ ॥ भीमसेनं तथायान्तं रथेन रथिनां वरम् । स्वयं दुर्य्योधनो युद्धे प्रतीपं मृत्युमाव्रजत् ॥ ९ ॥ नकुलञ्च युधां श्रेष्ठं सर्वयुद्धविशारदम् । शकुनिः सौवलो राजन् वारया-मास सत्वरः ॥ १० ॥ शिखण्डिनमथायान्तं रथेन रथिनां वरः । कृपः शारद्वतो राजन् वारयामास संयुगे ॥ ११ ॥ प्रतिविन्ध्य-मथायान्तं मयूरसदृशैर्हयैः । दुःशासनो महाराज यत्तो यत्त-मवारयत् ॥ १२ ॥ भैमसेनिमथायान्तं मायाशतविशारदम् ।

अश्वत्थामा महाराज राचसं संन्यवारयत् ॥ १३ ॥ द्रुपदं वृष-सेनस्तु ससैन्यं सपदानुगम् । वारयामास समरे द्रोणप्रेप्सुं महावलम् ॥ १४ ॥ विराटं द्रुतमायान्तं द्रोणस्य निधनं प्रति । मद्रराज सुसंक्रुद्धो वारयामास भारत ॥ १५ ॥ शतानीकमथा-यान्तं नाकुलिं रभसं रणे । चित्रसेनो रुरोधैनं शरैर्द्रोणवधेप्-सया ॥ १६ ॥ अर्जुनन्तु युधां श्रेष्ठं प्राद्रवन्तं महारथम् । अल-म्बुषो महाराज राचसेन्द्रो न्यवारयत् ॥ १७ ॥ ततो द्रोणं महेष्वासं निघ्नन्तं शत्रवान्रणे । धृष्टद्युम्नोऽथ पाञ्चाल्यो हृष्ट-रूपमवारयत् ॥ १८ ॥ तथान्यान् पाण्डुपुत्राणां समायातन्महा-रथान् । तावका रथिनो राजन् वारयामासुरोजसा ॥ १९ ॥ गजारोहा गजैस्तूर्णं सन्निपत्य महामृधे । योधयन्तश्च मृद्नन्तः शतशोऽथ सहस्रशः ॥ २० ॥ निशीथे तुरगा राजन् द्रवन्तश्च परस्परम् । प्रत्यदृश्यन्त वेगेन पचवन्तो यथाद्रयः ॥ २१ ॥ सादिनः सादिभिः सार्द्धं पाशशक्त्यृष्टिपाणयः । समागच्छन्महा-राज विनदन्तः परस्परम् ॥ २२ ॥ नरास्तु वहवस्तत्र न्यहन्यन्त परस्परम् । गदाभिर्मुषलैश्चैव नानाशस्त्रैश्च सङ्घशः ॥ २३ ॥ कृत-वर्म्मा तु हार्द्दिक्यो धर्म्मपुत्रं युधिष्ठिरम् । वारयामास संक्रुद्धो वेलेवोद्धतमर्णवम् ॥ २४ ॥ युधिष्ठिरस्तु हार्द्दिक्यं विद्धा पञ्चभि-राशुगैः । पुनर्विव्याध विंशत्या तिष्ठ तिष्ठेति चाब्रवीत् ॥ २५ ॥ कृतवर्म्मा तु संक्रुद्धो धर्म्मराजस्य मारिष । धनुश्चिच्छेद भल्लेन तञ्च विव्याध सप्तभिः ॥ २६ ॥ अथान्यद्धनुरादाय धर्म्मपुत्रो महा-रथः । हार्द्दिक्यं दशभिर्वाणैर्बाह्वोरुरसि चार्पयत् ॥ २७ ॥ माधवस्तु रणे विद्धो धर्म्मपुत्रेण मारिष । प्राकम्पत च रोषेण सप्तभिश्चार्द्दयच्छरैः ॥ २८ ॥ तस्य पार्थो धनुश्छित्त्वा हस्तावापं निकृत्य तु । प्राहिणोन्निशितान् भल्लान् पञ्च राजञ्छिलाशितान् ॥ २९ ॥ तस्य तत् कवचं भित्त्वा हेमचित्रं महाधनम् । प्राविशन्

धरणीमुग्रां वल्मीकमिव पन्नगाः ॥ ३० ॥ अह्णोर्निमेषमात्रेण सोऽन्यदादाय कार्मुकम्। विव्याध पाण्डवं षष्ट्या पुनश्च दशभिः शरैः ॥ ३१ ॥ तस्य शक्तिममेयात्मा चिक्षेप भुजगोपमाम्। पाण्डवेन तदा क्षिप्ता रथे न्यस्य महद्धनुः ॥ ३२ ॥ सा हेमचित्रा महती पाण्डवेनानुप्रेषिता। निर्भिद्य दक्षिणं बाहुं प्राविशद्धरणीतलम् ॥ ३३ ॥ एतस्मिन्नेव काले तु गृह्य पार्थौ महद्धनुः। हार्दिक्यं छादयामास शरैः सन्नतपर्वभिः ॥ ३४ ॥ ततस्तु तत्र वै शूरो वृष्णीनां प्रवरो रथी। व्यश्वसूतरथञ्चक्रे निमेषार्द्धाद्युधिष्ठिरम् ॥ ३५ ॥ ततस्तु पाण्डवो ज्येष्ठः खड्गचर्म समाददे। तदप्यस्य शितैर्भल्लैर्व्यधमन्माधवो रणे ॥ ३६ ॥ तोमरन्तु ततो गृह्य स्वर्णदण्डं दुरासदम्। अप्रैषीत् समरे तूर्णं हार्दिक्यस्य महात्मनः ॥ ३७ ॥ तमापतन्तं सहसा युधिष्ठिरभुजच्युतम्। द्विधा चिच्छेद हार्दिक्यः कृतहस्तः स्मयन्निव ॥ ३८ ॥ ततः शरशतेनाजौ धर्मपुत्रमवाकिरत्। कवचञ्च रणे क्रुद्धो बाणजालैरवाकिरत् ॥ ३९ ॥ हार्दिक्यशरसञ्छन्नं जाम्बूनदविभूषितम्। व्यशीर्य्यत रणे राजंस्ताराजालमिवाम्बरात् ॥ ४० ॥ स छिन्नवर्मा विरथः कृतवर्मशरार्दितः। अपयातो रणात्तूर्णं धर्मपुत्रो युधिष्ठिरः ॥ ४१ ॥ कृतवर्मा तु निर्जित्य धर्मपुत्रं युधिष्ठिरम्। पुनर्द्रोणस्य जुगुपे चक्रमेव महारथः ॥ ४२ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि युधिष्ठिरापयाने पञ्चषष्ट्यधिकशततोऽध्यायः ॥ १६५ ॥

---

सञ्जय उवाच। भूरिस्तु समरे राजन् शैनेयं रथिनाम्वरम्। आपतन्तमवारयत् प्रवणादिव कुञ्जरम् ॥ १ ॥ अथैनं सात्यकिः क्रुद्धः पञ्चभिर्निशितैः शरैः। विव्याध हृदये तस्य प्रास्रवत्तस्य

शोणितम् ॥ २ ॥ तथैव कौरवो युद्धे शैनेयं युद्धदुर्मदम्। दशभि-
र्विशिखैस्तूर्णमविध्यत भुजान्तरे ॥ ३ ॥ तावन्योऽन्यं महाराज
ततक्षाते परस्परम्। क्रोधसंरक्तनयनौ दृढ़े विस्फार्य्य कार्मुके
॥ ४ ॥ तयोरासीन्महाराज शरवृष्टिः सुदारुणा। क्रुद्धयोः
सायकमुचोर्य्यमान्तकनिकाशयोः ॥ ५ ॥ तावन्योऽन्यं महाराज
प्रच्छाद्य समरे स्थितौ। मुहूर्त्तञ्चैव तद्युद्धं समरूपमिवाभवत्
॥ ६ ॥ ततः क्रुद्धो महाराज शैनेयः प्रहसन्निव। धनुश्चिच्छेद
समरे कौरवस्य महात्मनः ॥ ७ ॥ अथैनं छिन्नधन्वानं नवभि-
र्न्निशितैः शरैः। विव्याध हृदये तूर्णं तिष्ठ तिष्ठेति चाब्रवीत्
॥ ८ ॥ सोऽतिविद्धो बलवता शत्रुणां शत्रुतापनः। धनुरन्यत्
समादाय सात्वतं प्रत्यविध्यत ॥ ९ ॥ स बिद्धा सात्वतं वाणै-
स्त्रिभिरेव विशाम्पते। धनुश्चिच्छेद भल्लेन सुतीक्ष्णेन हसन्निव
॥ १० ॥ छिन्नधन्वा महाराज सात्यकिः क्रोधमूर्च्छितः। चिक्षेप
सुमहावेगां शक्तिं तस्य महोरसि ॥ ११ ॥ स तु शक्त्या विभि-
न्नाङ्गो निपपात रथोत्तमात्। लोहिताङ्ग इवाकाशाद्दीप्तरश्मि-
र्यदृच्छया ॥ १२ ॥ तन्तु दृष्ट्वा हतं शूरमश्वत्थामा महारथः।
अभ्यधावत वेगेन शैनेयं प्रति भारत ॥ १३ ॥ तिष्ठ तिष्ठेति
चाभाष्य सात्यकिं स नराधिप। अभ्यवर्षच्छरौघेन मेरुं वृष्टग्र
यथाम्बुदः ॥ १४ ॥ तमापतन्तं वेगेन शैनेयस्य रथं प्रति।
घटोत्कचोऽब्रवीद्राजन्नादं मुक्त्वा महारथः ॥ १५ ॥ तिष्ठ तिष्ठ न
मे जीवन् द्रोणपुत्र गमिष्यसि। एष त्वां निहनिष्यामि महिषं
षण्मुखो यथा ॥ १६ ॥ युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणा-
जिरे। इत्युक्त्वा रोषताम्राक्षो राक्षसः परवीरहा ॥ १७ ॥
द्रौणिमभ्यद्रवत् क्रुद्धो गजेन्द्रमिव केशरी। रथाक्षमात्रैरिषुभि
रभ्यवर्षद्घटोत्कचः ॥ १८ ॥ रथिनामृषभं द्रौणिं धाराभिरिव
तोयदः। तां वाणवृष्टिमप्राप्तां शरैराशीविषोपमैः ॥ १९ ॥

घातयामास समरे तरसा द्रौणिराहवे। ततः शरशतैस्तीक्ष्णै-
र्मर्मभेदिभिराशुगैः ॥ २० ॥ समाचिनोद्राक्षसेन्द्रं घटोत्कचमरि-
न्दमम्। स शरैराचितस्तेन राक्षसो रणमूर्द्धनि ॥ २१ ॥ व्यका-
शत महाराज श्वाविच्छललितो यथा। ततः क्रोधसमाविष्टो
भैमसेनिः प्रतापवान् ॥ २२ ॥ शरैरवचकर्त्तोग्रैर्द्रौणिं वज्राशनि-
स्वनैः। क्षुरप्रैरर्द्धचन्द्रैश्च नाराचैः सशिलीमुखैः ॥ २३ ॥ वराह-
कर्णैर्नालीकैर्विकर्णैश्चाप्यवीवृषत्। तां शस्त्रवृष्टिमतुलां वज्राशनि-
समस्वनाम् ॥ २४ ॥ पतन्तीमुपरि क्रूरां द्रौणिरव्यथितेन्द्रियः।
सुदुःसहां शरैर्घोरैर्द्दिव्यास्त्रपरिमन्त्रितैः ॥ २५ ॥ व्यधमत् स
महाराज महाभ्राणीव मारुतः। ततोऽन्तरीक्षे बाणानां संग्रा-
मोऽन्य इवाभवत् ॥ २६ ॥ घोररूपो महाराज योधानां हर्ष-
वर्द्धनः। तयोस्तु सङ्घर्षकृतैर्विस्फुलिङ्गैरितस्ततः ॥ २७ ॥ बभौ
निशामुखे व्योम खद्योतैरिव चित्रितम्। स मार्गणगणैर्द्रौणि-
र्द्दिशः प्रच्छाद्य सर्वशः ॥ २८ ॥ प्रियार्थं तव पुत्राणां राक्षसं
समवाकिरत्। ततः प्रववृते युद्धं द्रौणिराक्षसयोः पुनः ॥ २९ ॥
विगाढ़े रजनीमध्ये शक्रप्रह्लादयोरिव। ततो घटोत्कचो बाणै-
र्द्दशभिर्द्रौणिमाहवे ॥ ३० ॥ जघानोरसि संक्रुद्धः कालज्वलन-
सन्निभैः। स गाढ़विद्धो व्यथितो राक्षसेन महाबलः ॥ ३१ ॥
चचाल समरे द्रौणिर्वातनुन्न इव द्रुमः। स मोहमनुसंप्राप्तो
ध्वजयष्टिं समाश्रितः ॥ ३२ ॥ ततो हाहाकृतं सैन्यं तव सर्वं
जनाधिप। हतं स्म मेनिरे सर्वे तावकास्तं विशाम्पते ॥ ३३ ॥
तन्तु दृष्ट्वा तथावस्थमश्वत्थामानमाहवे। पाञ्चालाः सृञ्जयाश्चैव
सिंहनादं प्रचक्रिरे ॥ ३४ ॥ प्रतिलभ्य ततः संज्ञामश्वत्थामा महा-
रथः। धनुः प्रपीड्य वामेन करेणामित्रकर्षणः ॥ ३५ ॥ मुमो-
चाकर्णपूर्णेन धनुषा शरमुत्तमम्। यमदण्डोपमं घोरमुद्दिश्याशु
घटोत्कचम् ॥ ३६ ॥ स भित्त्वा हृदयं तस्य राक्षसस्य शरोत्तमः।

विवेश वसुधामुग्रः सुपुङ्खः पृथिवीपते ॥ ३७ ॥ सोऽतिविद्धो महाराज रथोपस्थ उपाविशत् । राक्षसेन्द्रः स बलवान् द्रौणिना रणमानिना ॥ ३८ ॥ दृष्ट्वा विमूढं हैडिम्बं सारथिस्तं रणाजिरात् । द्रौणेः सकाशात् सम्भ्रान्तस्त्वपनिन्ये त्वरान्वितः ॥३९॥ तथा तु समरे विद्ध्वा राक्षसेन्द्रं घटोत्कचम् । ननाद सुमहानादं द्रोणपुत्रो महारथः ॥ ४० ॥ पूजितस्तव पुत्रैश्च सर्व्वयोधैश्च भारत। वपुषा प्रतिजज्वाल मध्याह्ने भास्करो यथा ॥ ४१ ॥ भीमसेनन्तु युध्यन्तं भारद्वाजरथं प्रति। स्वयं दुर्य्योधनो राजा प्रत्यविध्यच्छितैः शरैः ॥ ४२ ॥ तं भीमसेनो नवभिः शरैर्विव्याध भारत। दुर्य्योधनोऽपि विंशत्या शराणां प्रत्यविध्यत ॥ ४३ ॥ तौ सायकैः प्रतिच्छन्नावदृश्येतां रणाजिरे। मेघजालप्रतिच्छन्नौ नभसीवेन्दुभास्करौ ॥ ४४ ॥ ततो दुर्य्योधनो राजा भीमं विव्याध पत्रिभिः। पञ्चभिर्भरतश्रेष्ठ तिष्ठ तिष्ठेति चाब्रवीत् ॥ ४५ ॥ तस्य भीमो धनुश्छित्वा ध्वजञ्च निशितैः शरैः। विव्याध कौरवश्रेष्ठं नवत्या नतपर्व्वणाम् ॥ ४६ ॥ ततो दुर्य्योधनः क्रुद्धो धनुरन्यन्महत्तरम्। गृहीत्वा भरतश्रेष्ठो भीमसेनं शितैः शरैः ॥ ४७ ॥ अपीड़यद्रणमुखे पश्यतां सर्व्वधन्विनाम्। निहत्य तान् शरान् भीमो दुर्य्योधनधनुश्च्युतान् ॥ ४८ ॥ कौरवं पञ्चविंशत्या क्षुद्रकाणां समार्पयत्। दुर्य्योधनस्तु संक्रुद्धो भीमसेनस्य मारिष ॥ ४९ ॥ क्षुरप्रेण धनुश्छित्वा दशभिः प्रत्यविध्यत। अथान्यद्धनुरादाय भीमसेनो महाबलः ॥ ५० ॥ विव्याध नृपतिं तूर्णं सप्तभिर्न्निशितैः शरैः। तदप्यस्य धनुः क्षिप्रं चिच्छेद लघुहस्तवत् ॥ ५१ ॥ द्वितीयञ्च तृतीयञ्च चतुर्थं पञ्चमन्तथा। आत्तमात्तं महाराज भीमस्य धनुराच्छिनत् ॥ ५२ ॥ तव पुत्रो महाराज जितकाशी मदोत्कटः। स तदा छिद्यमानेषु कार्म्मुकेषु पुनः पुनः ॥ ५३ ॥ शक्तिञ्चिक्षेप समरे सर्व्वपारशवीं दृढ़ाम्। मृत्योरिव स्वसारं हि

दीप्तां केतुशिखामिव ॥ ५४ ॥ सीमन्तमिव कुर्वन्तीं नभसोऽग्निसमप्रभाम्। अप्राप्तमेव तां शक्तिं त्रिधा चिच्छेद कौरवः ॥५५॥ पश्यतः सर्वलोकस्य भीमसेनस्य चाग्रतः। ततो भीमो महाराज गदां गुर्वीं महाप्रभाम् ॥ ५६ ॥ चिक्षेपाविध्य वेगेन दुर्य्योधनरथं प्रति। ततः सा सहसा वाहांस्तव पुत्रस्य संयुगे ॥ ५७ ॥ सारथिञ्च गदा गुर्वी ममर्द्दास्य रथं पुनः। पुत्रस्तु तव राजेन्द्र भीमाद्भीतः प्रणश्य च ॥ ५८ ॥ आरुरोह रथञ्चान्यं नन्दकस्य महात्मनः। ततो भीमो हतं मत्वा निशामध्ये सुयोधनम् ॥५९॥ सिंहनादं महच्चक्रे तर्ज्जयन्निव कौरवान्। तावकाः सैनिकाश्चापि मेनिरे निहतं नृपम् ॥ ६० ॥ ततो विचुक्रुशुः सर्व्वे हाहेति च समन्ततः। तेषाञ्च निनदं श्रुत्वा त्रस्तानां सर्व्वयोधिनाम् ॥ ६१ ॥ भीमसेनस्य नादञ्च श्रुत्वा राजन्महात्मनः। ततो युधिष्ठिरो राजा हतं मत्वा सुयोधनम् ॥ ६२ ॥ अभ्यवर्त्तत वेगेन यत्र पार्थो वृकोदरः। पाञ्चालाः सृञ्जया मत्स्याः कैकेयाश्चेदयस्तथा ॥६३॥ सर्व्वोद्योगेनाभिजग्मुर्द्रोणमाशु जिघांसया। तत्रापि सुमहद्युद्धं द्रोणस्यासीत् परैः सह। घोरे तमसि मग्नानां निघ्नतामितरेतरम् ॥ ६४ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि दुर्य्योधनापयाने
षट्षष्ट्यधिकशततोऽध्यायः ॥ १६६ ॥

---

सञ्जय उवाच। सहदेवमथायान्तं द्रोणप्रेप्सुं महारथम्। कर्णो वैकर्त्तनो राजन् वारयामास संयुगे ॥ १ ॥ सहदेवस्तु राधेयं विद्ध्वा नवभिराशुगैः। पुनर्व्विव्याध समरे नवभिर्नतपर्व्वभिः ॥ २ ॥ तं कर्णः प्रतिविव्याध शतेन नतपर्व्वणाम्। सज्यञ्चास्य धनुः शीघ्रं चिच्छेद लघुहस्तवत् ॥ ३ ॥ ततोऽन्यद्धनुरादाय

माद्रीपुत्रः प्रतापवान् । कर्णं विव्याध विंशत्या तदद्भुतमिवाभवत्
॥ ४ ॥ तस्य कर्णो हयान् हत्वा शरैः सन्नतपर्वभिः । सारथि-
ञ्चास्य भल्लेन द्रुतं निन्ये यमक्षयम् ॥ ५ ॥ विरथः सहदेवस्तु
खड्‌गचर्म समाददे । तदप्यस्य शितैर्बाणैर्व्यधमत् प्रहसन्निव
॥ ६ ॥ ततो गुर्वीं गदां घोरां हेमचित्रां महाबलः । प्रेषया-
मास समरे वैकर्त्तनरथं प्रति ॥ ७ ॥ तामापतन्तीं सहसा सह-
देवेन प्रेषिताम् । व्यष्टम्भयच्छरैः कर्णो भूमावेवाप्यपातयत् ॥ ८ ॥
गदां विनिहतां दृष्ट्वा सहदेवस्त्वरान्वितः । शक्तिञ्चिक्षेप कर्णाय
तामप्यस्याच्छिनच्छरैः ॥ ९ ॥ माद्रीसुतस्ततस्तूर्णमवप्लुत्य रथो-
त्तमात् । प्रज्वलन्निव रोषेण दृष्ट्वा कर्णं व्यवस्थितम् ॥ १० ॥
रथचक्रं ततो गृह्य मुमोचाधिरथिं प्रति । तदापतद्वै सहसा
कालचक्रमिवोद्यतम् ॥ ११ ॥ शरैरनेकसाहस्रैरच्छिनत् सूत-
नन्दनः । तस्मिंश्छिन्ने रथाङ्गे तु सहदेवस्तु मारिष ॥ १२ ॥
ईषादण्डकयोक्त्राणि युगानि विविधानि च । हस्त्यङ्गानि तथा-
श्वांश्च मृतांश्च पुरुषान् बहून् ॥ १३ ॥ चिक्षेप कर्णमुद्दिश्य कर्ण-
स्तान् व्यधमच्छरैः । स निरायुधमात्मानं ज्ञात्वा माद्रवतीसुतः
॥ १४ ॥ वार्य्यमाणस्तु विशिखैः सहदेवो रणं जहौ । तमभि-
द्रुत्य राधेयो मुहूर्त्तं भरतर्षभ ॥ १५ ॥ अब्रवीत् प्रहसन् वाक्यं
सहदेवं सुनिष्ठुरम् । मा युध्यस्व रणे वीर विशिष्टैरथिभिः सह
॥ १६ ॥ सदृशैर्युधत्र माद्रेय वचो मे नाभिशङ्कियाः । अथैनं
धनुषोऽग्रेण तुदन् भूयोऽब्रवीदिदम् ॥ १७ ॥ एषोऽर्जुनो रणे
यत्तो युध्यते कुरुभिः सह । तत्र वा गच्छ माद्रेय गृहं वा यदि
मन्यसे ॥ १८ ॥ एवमुक्त्वा तु तं कर्णो रथेन रथिनाम्वरः ।
प्रायात् पाञ्चालराजस्य सैन्यानि प्रहसन्निव ॥ १९ ॥ वधप्राप्तन्तु
माद्रेयं नावधीत् समरेऽरिहा । कुन्त्याः स्मृत्वा वचो राजन् सत्य-
सन्धो महारथः ॥ २० ॥ सहदेवस्ततस्त्रस्तो विमनाः शर-

पीड़ितः। कर्णवाक्‌शल्यविद्धश्च जीविताम्निरविद्यत॥ २१॥
आरुरोह रथं तूर्णं पाञ्चाल्यस्य महात्मनः। जनमेजयस्य समरे
त्वरायुक्तो महारथः॥ २२॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि सहदेवापयाने
सप्तषष्ट्यधिकशततोऽध्यायः॥ १६७॥

---

सञ्जय उवाच। विराटं सहसेनन्तु द्रोणार्थे द्रुतमागतम्।
मद्रराजः शरौघेण छादयामास सर्वतः॥ १॥ तयोः समभव-
द्युद्धं समरे दृढ़धन्विनोः। यादृशो ह्यभवद्राजन् बलिवासवयोः
पुरा॥ २॥ मद्रराजो महाराज विराटं वाहिनीपतिम्।
आजघ्ने त्वरितस्तीक्ष्णः शतेन नतपर्वणाम्॥ ३॥ प्रतिविव्याध
तं राजा नवभिर्निशितैः शरैः। पुनश्चैनं त्रिसप्तत्या भूयश्चैव शतेन
तु॥ ४॥ तस्य मद्राधिपो हत्वा चतुरो रथवाजिनः। छत्रं
ध्वजञ्च समरे शराभ्यां सन्न्यपातयत्॥ ५॥ हताश्वात्तु रथा-
त्तूर्णमवप्लुत्य महीपतिः। तस्थौ विस्फारयंश्चापं विमुञ्चन्निशिता-
ञ्छरान्॥ ६॥ शतानीकस्तु तं दृष्ट्वा भ्रातरं हतवाहनम्।
रथेनाभ्यपतत्तूर्णं सर्वलोकस्य पश्यतः॥ ७॥ शतानीकमथायान्तं
मद्रराजो महीपतिः। विशिखैर्बहुभिर्विद्ध्वा ततो निन्ये यमक्षयम्
॥ ८॥ तस्मिंस्तु निहते वीरे विराटो वाहिनीपतिः। हता-
रोहाद्रथात्तूर्णं तमेवारुरुहे तदा॥ ९॥ ततो विस्फार्य्य नयने
क्रोधाद्द्विगुणविक्रमः। मद्रराजरथं तूर्णं छादयामास पत्रिभिः
॥ १०॥ ततो मद्राधिपः क्रुद्धः शतेन नतपर्वणाम्। आज-
घानोरसि भृशं विराटं वाहिनीपतिम्॥ ११॥ सोऽतिविद्धो
बलवता रथोपस्थ उपाविशत्। कश्मलं चाविशत्तूर्णं स विराटो
महारथः॥ १२॥ सारथिस्तमपोवाह समरे शरविक्षतम्। ततः

सा महती सेना प्राद्रवन्निशि भारत ॥ १३ ॥ बध्यमानाः शर-
शतैः शल्येनाचवशीभिना । तां दृष्ट्वा द्रवतीं सेनां वासुदेवधन-
ञ्जयौ ॥ १४ ॥ आयातौ तत्र राजेन्द्र यत्र शल्यो व्यवस्थितः ।
तौ तु प्रत्युद्ययौ राजन् राक्षसेन्द्रो ह्यलम्बुषः ॥ १५ ॥ अष्टचक्र-
समायुक्तमास्थाय प्रवरं रथम् । तुरङ्गवदनैर्युक्तं पिशाचैर्घोर-
दर्शनैः ॥ १६ ॥ लोहितार्द्रपताकं तं रथं माल्यविभूषितम् ।
कार्ष्णायसमयं घोरमृक्षचर्मसमावृतम् ॥ १७ ॥ रौद्रेण चित्रपक्षेण
विवृताक्षेणकूजता । ध्वजेनोच्छ्रितदण्डेन गृध्ररूपेण पत्रिणा ॥१८॥
स बभौ राक्षसो राजन् भिन्नाञ्जनचयोपमः । रुरोधार्ज्जुन-
मायान्तं प्रभञ्जनमिवाद्रिराट् ॥ १९ ॥ किरन्निषुगणान्राजन्
प्रायशोऽर्ज्जुनमूर्द्धनि । अतितीव्रमभवद्युद्धं नरराक्षसयोर्मृधे ॥२०॥
द्रष्टॄणां प्रीतिजननं सर्व्वेषां तत्र भारत । गृध्रकाकबलोलूककङ्क-
गोमायुहर्षणम् ॥ २१ ॥ तमर्ज्जुनः शरैः षड्भिरलम्बुषमता-
ड़यत् । दशभिश्च शितैर्वाणैर्ध्वजञ्चिच्छेद तस्य तु ॥ २२ ॥ सार-
थिञ्च त्रिभिर्वाणैस्त्रिभिरेव त्रिवेणुकम् । धनुरेकेन चिच्छेद चतुर्भि-
श्चतुरो हयान् ॥ २३ ॥ पुनः सज्जं कृतञ्चापं तदप्यस्य द्विधा-
च्छिनत् । अथैनं निशितैर्वाणैश्चतुर्भिर्भरतर्षभ ॥ २४ ॥ पार्थो-
ऽविध्यद्राक्षसेन्द्रं स विद्धः प्राद्रवद्भयात् । तं विजित्यार्जुनस्तूर्णं
द्रोणान्तिकमुपाद्रवत् ॥ २५ ॥ किरञ्छरगणान्राजन् नरवारण-
वाजिषु । युध्यमाना महाराज पाण्डवेन यशस्विना ॥२५॥ सैनिका
न्यपतन्नुर्व्यां वातनुन्ना इव द्रुमाः । तेषु तूत्साद्यमानेषु पाण्डवेन
यशस्विना । सम्प्राद्रवन् भृशं सर्व्वे मृगा इव भयार्द्दिताः ॥ २७ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि अलम्बुषपराभवे
अष्टषष्ट्यधिकशतोऽध्यायः ॥ १६८ ॥

---

सञ्जय उवाच। शतानीकं शरैस्तीक्ष्णैर्निर्दहन्तञ्चमूंस्तव।
चित्रसेनस्तव सुतो वारयामास भारत॥ १॥ नाकुलिश्चित्रसेनन्तु
विद्धा पञ्चभिराशुगैः। स च तं प्रतिविव्याध दशभिर्निशितैः शरैः
॥ २॥ चित्रसेनो महाराज शतानीकं पुनर्युधि। नवभिर्निशितै-
राजंश्छरैर्विव्याध वक्षसि॥ ३॥ नाकुलिस्तस्य विशिखैर्वर्म सन्नत-
पर्वभिः। गात्रात् सञ्च्यावयामास तदद्भुतमिवाभवत्॥ ४॥
सोऽपेतवर्मा पुत्रस्ते विरराज भृशं नृप। उत्सृज्य काले राजेन्द्र
निर्मोकमिव पन्नगः॥ ५॥ ततोऽस्य निशितैर्बाणैर्ध्वजञ्चिच्छेद
नाकुलिः। धनुश्चैव महाराज यतमानस्य संयुगे॥ ६॥ स
छिन्नधन्वा विरथो विवर्मा च महारथः। अथान्यद्धनुरादाय
सुदृढं वेगवत्तरम्॥ ७॥ ततस्तूर्णं चित्रसेनो नाकुलिं नतपर्वभिः।
शरैर्विव्याध समरे भारतानां महारथः॥ ८॥ शतानीकोऽथ
संक्रुद्धश्चित्रसेनस्य भारत। जघान चतुरो वाहान् सारथिञ्च
महाबलः॥ ९॥ आप्लुत्य स रथात्तस्माच्चित्रसेनो महायशाः।
नाकुलिं पञ्चविंशत्या शराणामार्दयद्बली॥ १०॥ तस्य तत्कुर्वतः
कर्म नकुलस्य सुतो रणे। अर्द्धचन्द्रेण चिच्छेद चापं हेमपरि-
ष्कृतम्॥ ११॥ स छिन्नधन्वा विरथो हताश्वो हतसारथिः।
आरुरोह रथं शीघ्रं हार्दिक्यस्य महात्मनः॥ १२॥ द्रुपदन्तु
सहानीकं द्रोणप्रेप्सुं महारथम्। वृषसेनो महाराज किर-
ञ्छरशतैस्तदा॥ १३॥ यज्ञसेनस्तु समरे कर्णपुत्रं महारथम्।
षष्ट्या शराणां विव्याध बाह्वोरुरसि वा विभो॥ १४॥ वृष-
सेनस्तु संक्रुद्धो यज्ञसेनं रथे स्थितम्। बहुभिः सायकैस्तूर्ण-
माजघान स्तनान्तरे॥ १५॥ तावुभौ शरनुन्नाङ्गौ शरकण्टकिनौ
रणे। व्यराजेतां महाराज श्वाविधौ शललैरिव॥ १६॥ रुक्म-
पुङ्खैरजिह्माग्रैः शरैः सन्नतपर्वभिः। रुधिरौघपरिक्लिन्नौ व्यरा-
जेतां महामृधे॥१७॥ तपनीयनिभौ चित्रौ कल्पवृक्षाविवाद्भुतौ।

किंशुकाविव पुष्पाढ्यौ प्रकाशेतां रणाजिरे ॥ १८ ॥ वृषसेनस्ततो राजन् द्रुपदं नवभिः शरैः । विद्ध्वा विव्याध सप्तत्या पुनश्चान्यै-स्त्रिभिः शरैः ॥ १९ ॥ ततः शरसहस्राणि विमुञ्चन विबभौ रणे । कर्णपुत्रो महाराज वर्षमाण इवाम्बुदः ॥ २० ॥ द्रुपदस्तु ततः क्रुद्धो वृषसेनस्य कार्मुकम् । द्विधा चिच्छेद भल्लेन पीतेन निशि-तेन च ॥ २१ ॥ सोऽन्यत् कार्मुकमादाय रुक्मबद्धं नवं दृढ़म् । तूणादाकृष्य विमलं भल्लं पीतं शीतं दृढ़म् ॥ २२ ॥ कार्मुके योज-यित्वा तं द्रुपदं सन्निरीक्ष्य च । आकर्णपूर्णं मुमुचे त्रासयन् सर्व-सोमकान् ॥ २३ ॥ हृदयं तस्य भित्त्वा च जगाम वसुधातलम् । कश्मलं प्राविशद्राजा वृषसेनशराहतः ॥ २४ ॥ सारथिस्तमपो-वाह स्मरन् सारथिचेष्टितम । तस्मिन् प्रभग्ने राजेन्द्र पाञ्चालानां महारथे ॥ २५ ॥ ततस्तु द्रुपदानीकं शरैश्छिन्नतनुच्छदम् । सम्प्राद्रवच्चमूः सर्वा निशिथे भैरवे सति ॥ २६ ॥ प्रदीपैर्हि परित्यक्तैः प्रज्वलद्भिः समन्ततः । व्यराजत मही राजन् वीताभ्रा द्यौरिव ग्रहैः ॥ २७ ॥ तथाङ्गदैर्निपतितैर्व्यराजत वसुन्धरा । प्रावृट्काले महाराज विद्युद्भिरिव तोयदः ॥ २८ ॥ ततः कर्ण-सूतत्रस्ताः समन्ताद्विप्रदुद्रुवुः । यथेन्द्रभयवित्रस्ता दानवास्तारका-मये ॥ २९ ॥ तेनार्द्यमानाः सङ्ग्रामे पाञ्चालाः सोमकैः सह । व्यराजन्त महाराज प्रदीपैरिव भासिताः ॥ ३० ॥ तांस्तु निर्ज्जित्य समरे कर्णपुत्रो व्यराजत । मध्यन्दिनमनुप्राप्तो घर्मांशुरिव भारत ॥ ३१ ॥ तेषु राजसहस्रेषु तावकेषु परेषु च । एक एव ज्वलं-स्तस्थौ वृषसेनः प्रतापवान् ॥ ३२ ॥ स निर्भिद्य रणे शूरान् सोमकांश्च महारथान् । जगाम त्वरितो राजन् यत्र राजा युधिष्ठिरः ॥ ३३ ॥ प्रतिविन्ध्यं समायान्तं प्रदहन्तं रणे रिपून् । दुःशासनस्तव सुतः प्रत्यगच्छन्महारथम् ॥ ३४ ॥ तयोः समागमो राजंश्चित्ररूपो बभूव ह । व्यपेतजलदे व्योम्नि बुधभार्गवयो-

रिव॥ ३५ ॥ प्रतिविन्ध्यन्तु समरे कुर्वाणं कर्म दारुणम्। दुःशासनस्त्रिभिर्वाणैर्ललाटे समविध्यत ॥ ३६ ॥ सोऽतिविद्धो बलवता तव पुत्रेण धन्विना। विरराज महाराज सशृङ्ग इव पर्वतः॥ ३७ ॥ दुःशासनन्तु समरे प्रतिविन्ध्यो महारथः। नवभिः सायकैर्विद्धा पुनर्विव्याध सप्तभिः॥ ३८॥ तत्र भारत पुत्रस्ते कृतवान् कर्म्म दुष्करम्। प्रतिविन्ध्यहयानुग्रैः पातयामास सायकैः॥ ३९ ॥ सारथिञ्चास्य भल्लेन ध्वजञ्च समपातयत्। रथञ्च तिलशो राजन् व्यधमत्तस्य धन्विनः॥ ४० ॥ पताकाश्च सतूणीरा रश्मीन् योक्त्राणि च प्रभो। चिच्छेद तिलशः क्रुद्धः शरैः सन्नतपर्वभिः॥ ४१ ॥ विरथः स तु धर्मात्मा धनुष्पाणिरवस्थितः। अयोधयत्तव सुतं किरञ्छरशतान् बहून्॥ ४२॥ क्षुरप्रेण धनुस्तस्य चिच्छेद कृतहस्तवत्। अथैनं दशभिर्वाणैश्छिन्नधन्वानमार्दयत्॥ ४३॥ तं दृष्ट्वा भ्रातरं तत्र भ्रातरोऽस्य महारथाः। अन्ववर्त्तन्त वेगेन महत्या सेनया सह॥ ४४ ॥ सोऽद्रवत्तु ततो यानं श्रुतसोमस्य भास्वरम्। धनुर्गृह्य महाराज विव्याध तनयं तव॥ ४५ ॥ ततस्तु तावकाः सर्वे परिवार्य्य सुतं तव। अभ्यवर्त्तन्त वेगेन महत्या सेनया वृताः॥ ४६॥ ततः प्रववृते युद्धं तव तेषाञ्च भारत। निशीथे दारुणे काले यमराष्ट्रविवर्द्धनम्॥ ४७॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि शतानीकादियुद्धे एकोनसप्तत्यधिकशतोऽध्यायः॥ १६९॥

---

सञ्जय उवाच। नकुलं रभसं युद्धे निघ्नन्तं तव वाहिनीम्। अभ्ययात् सौबलः क्रुद्धस्तिष्ठतिष्ठेति चाब्रवीत्॥ १ ॥ कृतवैरौ तु तौ शूरावन्योऽन्यवधकाङ्क्षिणौ। शरैः पूर्णायतोत्सृष्टैरन्योऽन्य-

भभिजघ्नतुः ॥ २ ॥ यथैव नकुलो राजन् शरवर्षाण्यमुञ्चत ।
तथैव सौबलश्चापि शिक्षां सन्दर्शयन् युधि ॥ ३ ॥ तावुभौ समरे
राजञ्छरकण्टकिनौ तदा । व्यभ्राजेतां महाराज श्वाविधौ
शललैरिव ॥ ४ ॥ रुक्मपुङ्खैरजिह्माग्रैः शरैः छिन्नतनुच्छदौ ।
रुधिरौघपरिक्लिन्नौ व्यभ्राजेतां महामृधे ॥ ५ ॥ तपनीयनिभौ
चित्रौ कल्पवृक्षाविव द्रुमौ । किंशुकाविव चोत्फुल्लौ प्रकाशेते
रणाजिरे ॥ ६ ॥ तावुभौ समरे शूरौ शरकण्टकिनौ तदा ।
व्यराजेतां महाराज कण्टकैरिव शाल्मलौ ॥ ७ ॥ सुजिह्मं प्रेक्ष-
माणौ तौ राजन् विवृतलोचनौ । क्रोधरक्तान्तनयनैर्निर्द्दहन्तौ
परस्परम् ॥ ८ ॥ श्यालस्तव सुसंक्रुद्धो माद्रीपुत्रं हसन्निव ।
कर्णिनैकेन विव्याध हृदये निशितेन ह ॥ ९ ॥ नकुलस्तु भृशं
विद्धः श्यालेन तव धन्विना । निषसाद रथोपस्थे कश्मलञ्चैन-
माविशत् ॥ १० ॥ अत्यन्तवैरिणं दृप्तं दृष्ट्वा शत्रुं तथागतम् ।
ननाद शकुनिस्तत्र तपान्ते जलदो यथा ॥ ११ ॥ प्रतिलभ्य ततः
संज्ञां नकुलः पाण्डुनन्दनः । अभ्ययात् सौबलं भूयो व्यात्तानन
इवान्तकः ॥ १२ ॥ स क्रुद्धः शकुनिं षष्ट्या विव्याध भरतर्षभ ।
पुनश्चैनं शतेनैव नाराचानां स्तनान्तरे ॥ १३ ॥ ततोऽस्य सशर-
ञ्चापं मुष्टिदेशे द्विधाच्छिनत् । ध्वजञ्च त्वरितं छित्त्वा रथाद्भूमा-
वपातयत् ॥ १४ ॥ विशिखेन च तीक्ष्णेन पीतेन निशितेन च ।
ऊरू निर्भिद्य चैकेन नकुलः पाण्डुनन्दनः ॥ १५ ॥ श्येनं सपक्षं
व्याधेन पातयामास तं तदा । सोऽतिविद्धो महाराज रथोपस्थ
उपाविशत् ॥ १६ ॥ ध्वजयष्टिं परिक्लिश्य कामिनीं कामुको यथा ।
तं विसंज्ञं निपतितं दृष्ट्वा श्यालं तवानघ ॥ १७ ॥ अपोवाह
रथेनाशु सारथिर्ध्वजिनीमुखात् । ततः सञ्चुक्रुशुः पार्था ये च
तेषां पदानुगाः ॥ १८ ॥ निर्ज्जित्य च रणे शत्रून् नकुलः शत्रु-
तापनः । अब्रवीत् सारथिं तत्र द्रोणानीकाय मां वह ॥ १९ ॥

तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य सारथिः । प्रायास्तेन तदा राजन् येन द्रोणो व्यवस्थितः ॥ २० ॥ शिखण्डिनन्तु समरे द्रोणप्रेप्सुं महाबलम् । कृपः शारद्वतो यत्तः प्रत्युद्गच्छत वेगितः ॥ २१ ॥ गौतमं द्रुतमायान्तं द्रोणान्तिकमरिन्दमः । विव्याध नवभिर्बाणैः शिखण्डी प्रहसन्निव ॥ २२ ॥ तमाचार्य्यो महाराज विद्धा पञ्चभिराशुगैः । पुनर्विव्याध विंशत्या पुत्राणां प्रियकृत्तव ॥ २३ ॥ महद्युद्धं तयोरासीद्घोररूपं विशाम्पते । यथा देवासुरे युद्धे शम्बरामरराजयोः ॥ २४ ॥ शरजालावृतं व्योम चक्रतुस्तौ महारथौ । मेघाविव तपापाये वीरौ समरदुर्मदौ ॥ २५ ॥ प्रकृत्या घोररूपं तदासीद्घोरतरं ततः । रात्रिश्च भरतश्रेष्ठ योधानां युद्धशालिनाम् ॥ २६ ॥ कालरात्रिनिभा चासीद्घोररूपा भयावहा । शिखण्डी तु महाराज गौतमस्य महद्धनुः ॥ २७ ॥ अर्द्धचन्द्रेण चिच्छेद ससज्जं च शितान् शरान् । तस्य क्रुद्धः कृपो राजंश्छक्तिञ्चिक्षेप दारुणाम् ॥ २८ ॥ रुक्मदण्डामकुण्ठाग्रां कर्मारपरिमार्ज्जिताम् । तामापतन्तीञ्चिच्छेद शिखण्डी दशभिः शरैः ॥ २९ ॥ सा पपात च मेदिन्यां शक्तिर्हेमविभूषिता । अथान्यद्धनुरादाय गौतमो वदताम्वरः ॥३०॥ प्राच्छादयच्छितैर्बाणैर्महाराज शिखण्डिनम् । स छाद्यमानः समरे गौतमेन महात्मना ॥ ३१ ॥ व्यसीदत रथोपस्थे शिखण्डी रथिनाम्वरः । सीदन्तञ्चैनमालोक्य कृपः शारद्वतो युधि ॥ ३२ ॥ आजघ्ने बहुभिर्बाणैर्जिघांसन्निव भारत । विमुखं तं रणे दृष्ट्वा याज्ञसेनिं महारथम् ॥ ३३ ॥ पाञ्चालाः सोमकाश्चैव परिवव्रुः समन्ततः । तथैव तव पुत्राश्च परिवव्रुर्द्विजोत्तमम् ॥ ३४ ॥ महत्या सेनया सार्द्धं ततो युद्धमभूत् पुनः । रथिनाञ्च रणे राजन्नन्योऽन्यमभिधावताम् ॥ ३५ ॥ बभूव तुमुलः शब्दो मेघानामिव भारत । द्रवतां सादिनाञ्चैव गजानाञ्च विशाम्पते ॥ ३६ ॥ अन्योऽन्यं निघ्नतां राजन् क्रूरमायोधनं बभौ ।

पत्तीनां द्रवतां चैव पादशब्देन मेदिनी ॥ ३७ ॥ अकम्पत महाराज योषित्त्रस्ता भयादिव । रथिनो रथमारुह्य प्रद्रुता वेगवत्तरम् ॥ ३८ ॥ अगृह्णन् बहवो राजन् शलभान् वायसा इव । तथा गजान् प्रभिन्नाङ्गान् सुप्रभिन्ना महागजाः ॥ ३९ ॥ तस्मिन्नेव पदे यत्ता निगृह्णन्ति स्म भारत । सादी सादिनमासाद्य पदातीयः पदातिनम् ॥ ४० ॥ समासाद्य रणेऽन्योऽन्यं संरब्धा नातिचक्रमुः । धावतां द्रवताञ्चैव पुनरावर्त्ततामपि ॥ ४१ ॥ बभूव तत्र सैन्यानां शब्दस्तु तुमुलो निशि । दीप्यमानाः प्रदीपाश्च रथवारणवाजिषु ॥ ४२ ॥ अदृश्यन्त महाराज महोल्का इव खाच्चुताः । सा निशा भरतश्रेष्ठ प्रदीपैरवभासिता ॥ ४३ ॥ दिवसप्रतिमा राजन् बभूव रणमूर्द्धनि । आदित्येन यथा व्याप्तं तमो घोरं प्रणश्यति ॥ ४४ ॥ तथा नष्टं तमो घोरं दीपैर्द्दीप्तैरणे कृतम् । दिवञ्च पृथिवीञ्चैव दिशश्च प्रदिशस्तथा ॥ ४५ ॥ रजसा तमसा व्याप्ता द्योतिताः प्रभया पुनः । शस्त्राणां कवचानाञ्च मणीनाञ्च महात्मनाम् ॥ ४६ ॥ अन्तर्दधुः प्रभाः सर्वा दीप्तैस्तैरवभासिताः । तस्मिन् युद्धे महारौद्रे वर्त्तमाने निशामुखे ॥ ४७ ॥ न कश्चिद्विदुरात्मानमयमस्मीति भारत । अवधीत् समरे पुत्रं पिता भरतसत्तम ॥ ४८ ॥ पुत्रश्च पितरं मोहात् सखायञ्च तथा सखा । सम्बन्धिनञ्च सम्बन्धी स्वस्रीयञ्चापि मातुलः ॥४९॥ स्वे स्वान् परे स्वकीयांश्च निजघ्नुस्तत्र भारत । निर्म्मर्य्यादमभूद्राजन् रात्रौ युद्धं भयानकम् ॥ ५० ॥

इतिद्रोणपर्वणि घटोत्कचवधपर्वणि रात्रिसङ्कुलयुद्धे सप्तत्यधिकशततोऽध्यायः ॥ १७० ॥

---

सञ्जय उवाच। तस्मिन् सुतुमुले युद्धे वर्त्तमाने भयावहे। धृष्टद्युम्नो महाराज द्रोणमेवाभ्यवर्त्तत॥१॥ सन्दधानो धनुः श्रेष्ठं ज्यां विकर्षन् पुनः पुनः। अभ्यद्रवत द्रोणस्य रथं रुक्मविभूषितम्॥२॥ धृष्टद्युम्नमथायान्तं द्रोणस्यान्तं चिकीर्षया। परिवव्रुर्महाराज पाञ्चालाः पाण्डवैः सह॥३॥ तथा परिवृतं दृष्ट्वा द्रोणमाचार्य्यसत्तमम्। पुत्रास्ते सर्वतो यत्ता ररक्षुर्द्रोणमाहवे॥४॥ बलार्णवौ ततस्तौ तु समेयातां निशामुखे। वातोद्धूतौ क्षुब्धसत्त्वौ भैरवौ सागराविव॥५॥ ततो द्रोणं महाराज पाञ्चाल्यः पञ्चभिः शरैः। विव्याध हृदये तूर्णं सिंहनादं ननाद च॥६॥ तं द्रोणः पञ्चविंशत्या विद्ध्वा भारत संयुगे। चिच्छेदान्येन भल्लेन धनुरस्य महाप्रभम्॥७॥ धृष्टद्युम्नस्तु निर्विद्धो द्रोणेन भरतर्षभ। उत्सृज्य च धनुः शीघ्रं सन्दश्य दशनच्छदम्॥८॥ ततः क्रुद्धो महाराज धृष्टद्युम्नः प्रतापवान्। आददेऽन्यद्धनुः श्रेष्ठं द्रोणस्यान्तं चिकीर्षया॥९॥ विकृष्य तद्धनुः श्रीमानाकर्णात् परवीरहा। द्रोणस्यान्तकरं घोरं व्यसृजत् सायकं ततः॥१०॥ स विसृष्टो बलवता तस्मिन्नौद्रे महामृधे। भासयामास तत् सैन्यं दिवाकर इवोदितः॥११॥ तन्तु दृष्ट्वा शरं घोरं देवगन्धर्वदानवाः। स्वस्त्यस्तु समरे राजन् द्रोणायेत्यब्रुवन् वचः॥१२॥ तन्तु सायकमायान्तमाचार्य्यस्य रथं प्रति। कर्णो द्वादशधा राजंश्चिच्छेद कृतहस्तवत्॥१३॥ स छिन्नो बहुधा राजन् धृष्टद्युम्नस्य मारिष। निपपात शरस्तूर्णं निर्विषो भुजगो यथा॥१४॥ छित्त्वा तु समरे वाणान् शरैः सन्नतपर्वभिः। धृष्टद्युम्नं ततः कर्णो विव्याध निशितैः शरैः॥१५॥ पञ्चभिर्द्रौणपुत्रस्तु स्वयं द्रोणश्च पञ्चभिः। शल्यस्तु नवभिर्भल्लैस्त्रिभिर्दुःशासनस्तथा॥१६॥ दुर्य्योधनस्तु विंशत्या शकुनिश्चापि पञ्चभिः। पाञ्चाल्यं त्वरिताविध्यन् सर्व एव महा-

रथाः ॥ १७ ॥ स विद्धः सप्तभिर्वीरैर्द्रौणव्राणार्थमाहवे । स चापि प्रतिविव्याध सर्व्वानेव त्रिभिस्त्रिभिः ॥ १८ ॥ द्रोणं कर्णञ्च द्रौणिञ्च विव्याध तनयं तव । त्वरायुक्तो महाराज धृष्टद्युम्नो महामृधे ॥ १९ ॥ निर्भिन्ना धन्विना तेन धृष्टद्युम्नं पुनर्मृधे । विव्यधुः समवेतास्ते मुञ्चन्तो भैरवान् रवान् ॥ २० ॥ द्रुमसेनन्तु संक्रुद्धो राजन् विव्याध पत्रिणा । पुनश्च विशिखैस्तूर्णं तिष्ठ-तिष्ठेति चाब्रवीत् ॥ २१ ॥ स तु तं प्रतिविव्याध त्रिभिस्तीक्ष्णै-रजिह्मगैः । स्वर्णपुङ्खैः शिलाधौतैः प्राणान्तकरणैर्युधि ॥ २२ ॥ भल्लेनान्येन तु पुनः सुवर्णोज्ज्वलकुण्डलम् । उन्ममाथ शिरः कायात् द्रुमसेनस्य संयुगे ॥ २३ ॥ तच्छिरः प्रापतद्भूमौ सन्द-ष्टौष्ठपुटं रणे । महावातसमुद्भूतं पक्वं तालफलं यथा ॥ २४ ॥ तांश्च विद्ध्वा पुनर्योधान् वीरः सुनिशितैः शरैः । राधेयस्याच्छि-नत् भल्लैः कार्मुकं चित्रयोधिनः ॥ २५ ॥ न च तन्ममृषे कर्णो धनुषश्छेदनं तदा । विलेखनमिवात्युग्रो लाङ्गूलस्य यथा हरिः ॥ २६ ॥ सोऽन्यद्धनुः समादाय क्रोधरक्तेक्षणः श्वसन् । अभ्य-वर्षच्छरौघेण धृष्टद्युम्नं महाबलम् ॥ २७ ॥ दृष्ट्वा कर्णन्तु संरब्धं ते वीराः षड्रथर्षभाः । पाञ्चालपुत्रं त्वरिताः परिवव्रुर्जिघांसवः ॥ २८ ॥ षण्णां योधप्रवीराणां तावकानां पुरस्कृतम् । मृत्यो-रास्यमनुप्राप्तं मेनिरे सैनिका विभो ॥ २९ ॥ एतस्मिन्नेव काले तु दाशार्हो विकिरन् शरान् । धृष्टद्युम्नं पराक्रान्तं सात्यकिः प्रत्यपद्यत ॥ ३० ॥ तमापतन्तं सम्प्रेक्ष्य सात्वतं युद्धदुर्म्मदम् । राधेयो दशभिर्बाणैस्ततो विव्याध संयुगे ॥ ३१ ॥ तं सात्यकि-र्महाराज विव्याध दशभिः शरैः । पश्यतां सर्व्ववीराणां मागा-स्तिष्ठेति चाब्रवीत् ॥ ३२ ॥ स सात्यकेस्तु बलिनः कर्णस्य च महात्मनः । आसीत् समागमो राजन् बलिवासवयोरिव ॥ ३३ ॥ त्रासयन्नथघोषेण क्षत्रियान् क्षत्रियर्षभः । राजीवलोचनं कर्णं

सात्यकिः प्रत्यविध्यत ॥ ३४ ॥ कम्पयन्निव घोषेण धनुषो वसुधां
बली। सूतपुत्रो महाराज सात्यकिं प्रत्ययोधयत् ॥ ३५ विपा-
ठकर्णिनाराचैर्वत्सदन्तैः क्षुरैरपि। कर्णः शरशतैश्चापि शैनेयं
प्रत्यविध्यत ॥ ३६ ॥ तथैव युयुधानोऽपि वृष्णीनां प्रवरो युधि।
अभ्यवर्षच्छरैः कर्णं तद्युद्धमभवत् समम् ॥ ३७ ॥ कर्णं प्रमु-
खतः कृत्वा पुत्रास्तव विशाम्पते। सात्यकिं विव्यधुः सर्वे समन्ता-
न्निशितैः शरैः ॥ ३८ ॥ अस्त्रैरस्त्राणि संवार्य तेषां कर्णस्य वा
विभो। अविध्यत् सात्यकिस्तूर्णं वृषसेनं स्तनान्तरे ॥ ३९ ॥
तेन वाणेन निर्विद्धो वृषसेनो महाद्युतिः। न्यपतच्च रथे तूर्णं
धनुरुत्सृज्य वीर्य्यवान् ॥ ४० ॥ ततः कर्णो हतं मत्वा वृषसेनं
महारथम्। पुत्रशोकाभिसन्तप्तः सात्यकिं प्रत्यपीड़यत् ॥ ४१ ॥
पीड्यमानस्तु कर्णेन युयुधानो महारथः। विव्याध बहुभिः
कर्णं त्वरमाणः पुनः पुनः ॥ ४२ ॥ स कर्णं दशभिर्विद्धा वृष-
सेनञ्च पञ्चभिः। सहस्तावापधनुषो तयोश्चिच्छेद सात्वतः ॥ ४३ ॥
तावन्ये धनुषी सज्ये कृत्वा शत्रुभयङ्करे। युयुधानमविध्येतां सम-
न्तान्निशितैः शरैः ॥ ४४ ॥ वर्त्तमाने तथा रौद्रे तस्मिन् वीर-
वरक्षये। अतीव शुश्रुवे राजन् गाण्डीवस्य महास्वनः ॥ ४५ ॥
श्रुत्वा तु रथनिर्घोषं गाण्डीवस्य च निस्वनम्। सूतपुत्रोऽब्रवी-
द्राजन् दुर्य्योधनमिदं वचः ॥ ४६ ॥ एष सर्वाश्चमूं हत्वा मुख्य-
शश्च नरर्षभान्। कौरवांश्च महेष्वासान् गाण्डीवनिनदो महान्
॥ ४७ ॥ श्रुयते रथनिर्घोषो वासवस्येव गर्ज्जतः। करोति
पाण्डवो व्यक्तं कर्मौपयिकमात्मनः ॥ ४८ ॥ एष पार्थो महाराज
नर्द्दयेत् सुमहाचमूः। विप्रकीर्णान्यनेकानि नावतिष्ठन्ति कर्हि-
चित् ॥ ४९ ॥ वातेनेव समुद्धूतमभ्रजालं विदीर्य्यते। सव्यसाचिन-
मासाद्य भिन्ना नौरिव सागरे ॥ ५० ॥ द्रवतां योधमुख्यानां
गाण्डीवप्रेषितैः शरैः। पततां शमरे राजन् श्रूयते निनदो

महान् ॥ ५१ ॥ शृणु दुन्दुभिनिर्घोषमर्ज्जुनस्य रथं प्रति । निशीथे राजशार्दूल स्तनयित्नोरिवाम्बरे ॥ ५२ ॥ हाहाकाररवाश्चैव सिंहनादांश्च पुष्कलान् । शृणु शब्दान् बहुविधानर्जुनस्य रथं प्रति ॥ ५३ ॥ अयं मध्ये स्थितोऽस्माकं सात्यकिः सत्वताम्वरः । इह चेल्लभ्यते लक्ष्यं कृतस्तान् जेष्यामहे परान् ॥ ५४ ॥ एवं पाञ्चालराजस्य पुत्रो द्रोणेन सङ्गतः । सर्वतः संवृतः शूरैरथैः पुरुषसत्तमैः ॥ ५५ ॥ सात्यकिं यदि हन्याम धृष्टद्युम्नञ्च पार्षतम् । असंशयं महाराज ध्रुवो नो विजयी भवेत् ॥ ५६ ॥ सौभद्रवदिमौ वीरौ परिवार्य्य महारथौ । प्रयताम महाराज निहन्तुं वृष्णिपार्षतौ ॥ ५७ ॥ सव्यसाची पुरोऽभ्येति द्रोणानीकाय भारत । संसक्तं सात्यकिं ज्ञात्वा बहुभिः कुरुपुङ्गवैः ॥ ५८॥ तत्र गच्छन्तु बहवः प्रवरा रथसत्तमाः । यावत् पार्थो न जानाति सात्यकिं बहुभिर्वृतम् ॥ ५९ ॥ ते त्वरध्वं महाशूराः शराणां मोक्षणे भृशम् । यथा त्विह व्रजत्येष परलोकाय माधवः ॥६०॥ कर्णस्य मतमाज्ञाय पुत्रस्ते प्राह सौबलम् । यथेन्द्रः समरे राजन् प्राह विष्णुं महायशाः ॥ ६१ ॥ वृतः सहस्रैर्दशभिर्गजानामनिवर्त्तिनाम् । रथैश्च दशसाहस्रैर्वृतो याहि धनञ्जयम् ॥६२॥ दुःशासनो दुर्विषहः सुबाहुर्दुष्प्रधर्षणः । एते त्वामनुयास्यन्ति पत्तिभिर्बहुभिर्वृताः ॥ ६३ ॥ जहि कृष्णौ महेष्वासौ धर्मराजञ्च मातुल । नकुलं सहदेवञ्च भीमसेनञ्च पाण्डवम् ॥ ६४ ॥ देवानामिव देवेन्द्रे जयाशा त्वयि मे स्थिता । जहि मातुल कौन्तेयानसुरानिव पावकिः ॥ ६५ ॥ एवमुक्तो ययौ पार्थान् तव पुत्रेण चोदितः । महत्या सेनया सार्द्धं तव पुत्रैश्च दंशितः ॥ ६६ ॥ प्रियार्थं तव पुत्रस्य दिधक्षुः पाण्डुनन्दनान् । ततः प्रववृते युद्धं तावकानां परैः सह ॥ ६७ ॥ प्रयाते सौबले राजन् पाण्डवानामनीकिनीम् । बलेन महता युक्तः सूतपुत्रस्तु सात्वतम् ॥ ६८ ॥

अभ्ययास्त्वरितो युद्धे किरन् शरशतान् बहून् । समेत्य तावकाः सर्वे सात्यकिं पर्य्यवारयन् ॥ ६९ ॥ भारद्वाजस्ततो गत्वा धृष्टद्युम्नरथं प्रति । महद्युद्धं तदा चक्रे निशीथे भरतर्षभ । धृष्टद्युम्नेन शूरेण पाञ्चाल्यैश्च महाद्भुतम् ॥ ७० ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि सङ्कुलयुद्धे
एकसप्तत्यधिकशतोऽध्यायः ॥ १७१ ॥

---

सञ्जय उवाच । ततस्ते पार्थिवाः सर्वे त्वदीया युद्धदुर्मदाः । अमृष्यमाणाः संरब्धा युयुधानरथं प्रति ॥ १ ॥ ते रथैः कल्पितै राजन् हेमरत्नविभूषितैः । सादिभिश्च गजैश्चैव परिवव्रुः स्म सात्वतम् ॥ २ ॥ अथैनं कोष्ठकीकृत्य सर्वतस्ते महारथाः । सिंहनादं महत् कृत्वा तर्ज्जयन्तश्चतुर्द्दिशम् ॥ ३ ॥ तेऽभ्यवर्षञ्छरै-स्तीक्ष्णैः सात्यकिं सत्यविक्रमम् । त्वरमाणा महावीरा माधवस्य वधैषिणः ॥ ४ ॥ तान् दृष्ट्वापततस्तूर्णं शैनेयः परवीरहा । प्रत्यगृह्लान्महाबाहुः प्रमुञ्चन विशिखान् बहून् ॥ ५ ॥ तत्र वीरो महेष्वासः सात्यकिर्युद्धदुर्मदः । निचकर्त्त शिरांस्युग्रैः शरैः सन्नत-पर्वभिः ॥ ६ ॥ हस्तिहस्तान् हयग्रीवान् बाहूनपि न साङ्गदान् । क्षुरप्रैः शातयामास तावकानान्तु माधवः ॥ ७ ॥ पतितैश्चामरैश्चैव श्वेतच्छत्रैश्च भारत । बभूव धरणी पूर्णा नक्षत्रैर्द्यौरिव प्रभो ॥ ८ ॥ तेषान्तु युयुधानेन वध्यतां युधि भारत । बभूव तुमुलः शब्दः प्रेतानामिव क्रन्दताम् ॥ ९ ॥ तेन शब्देन महता पूरितेयं वसुन्धरा । रात्रिः समभवच्चापि घोररूपा भयावहा ॥ १० ॥ दीर्य्यमाणं बलं दृष्ट्वा युयुधानशराहतम् । श्रुत्वा तु विपुलं नादं निशीथे लोमहर्षणम् ॥ ११ ॥ सुतस्तवाब्रवीद्राजन् सारथिं रथिनाम्वरः । यत्रैष शब्दस्तत्राश्वांश्चोदयेति पुनः पुनः ॥ १२ ॥

ततो दुर्य्योधनो राजा दृढ़धन्वा जितक्लम. । शीघ्रहस्तश्चित्रयोधी युयुधानमुपाद्रवत् ॥ १३ ॥ ततः पूर्णायतोत्सृष्टैर्मांसशोणित-भोजनैः । दुर्य्योधनं द्वादशभिर्माधवः प्रत्यविध्यत ॥ १४ ॥ दुर्य्यो-धनस्तेन तथा पूर्वमेवार्द्दितः शरैः । शैनेयं दशभिर्बाणैः प्रत्य-विध्यदमर्षितः ॥ ५ ॥ ततः समभवद्युद्धमद्भुतोपमदर्शनम् । पाञ्चालानाञ्च सर्व्वेषां तावकानाञ्च सर्वशः ॥ १६ ॥ शैनेयस्तु रणे क्रुद्धस्तव पुत्रं महारथम् । सायकानामशीत्या तु विव्याधोरसि भारत ॥ १७ ॥ ततोऽस्य वाहान् समरे शरैर्निन्ये यमक्षयम् । सारथिञ्च रथात्तूर्णं पातयामास शत्रुहा ॥ १८ ॥ हताश्वे तु रथे तिष्ठन् पुत्रस्तव विशाम्पते । मुमोच निशितान् वाणाञ्छैने-यस्य रथं प्रति ॥ १९ ॥ शरान् पञ्चाशतस्तांस्तु शैनेयः कृत-हस्तवत् । चिच्छेद समरे राजन् प्रेषितांस्तनयेन ते ॥ २० ॥ अथापरेण भल्लेन मुष्टिदेशे महद्धनुः । चिच्छेद रभसा युद्धे तव पुत्रस्य माधवः ॥ २१ ॥ विरथो विधनुष्कश्च सर्व्वलोकेश्वरः प्रभुः । आरुरोह रथं तूर्णं भास्वरं कृतवर्म्मणः ॥ २२ ॥ दुर्य्योधने परावृत्ते शैनेयस्तव वाहिनीम् । द्रावयामास विशिखैर्निशामध्ये विशाम्पते ॥ २३ ॥ शकुनिश्चार्जुनं राजन् परिवार्य्य समन्ततः । रथैरनेकसाहस्रैर्गजैश्चैव सहस्रशः ॥ २४ ॥ तथा हयसहस्रैश्च तुमुलं सर्व्वतोऽकरोत् । ते महास्त्राणि दिव्यानि विकिरन्तो-ऽर्जुनं प्रति ॥२५॥ अर्जुनं योधयन्ति स्म क्षत्रियाः कालचोदिताः । तान्यर्जुनः सहस्राणि रथवारणवाजिनाम् ॥ २६ ॥ प्रत्यवारय-दायस्तः प्रकुर्वन् विमुखं रिपुम् । ततोऽर्जुनमरिघ्नन्तं विव्याध युधि सौबलः ॥ २७ ॥ रोषताम्रेक्षणः क्रुद्धो विंशत्या सायकै-र्भृशम् । पुनश्चैव शतेनास्य संरुरोध महारथम् ॥ २८ ॥ तम-र्जुनस्तु विंशत्या विव्याध युधि भारत । अथेतरान् महेष्वासां-स्त्रिभिस्त्रिभिरविध्यत ॥ २९ ॥ निवार्य्य तान् वाणगणान् युधि

राजन् धनञ्जयः। निजघ्ने तावकान् योधान् वज्रवेगैः शरोत्तमैः ॥ ३० ॥ भुजैश्छिन्नैर्महाराज शरीरैश्च सहस्रशः। समास्तीर्णा धरा तत्र बभौ पुष्पैरिवावृता ॥ ३१ ॥ शिरोभिः सकिरीटैश्च सुनसैश्चारुकुण्डलैः। सन्दष्टौष्ठपुटैः क्रुद्धैस्तथैवोद्वृत्तलोचनैः ॥ ३२ ॥ निष्कचूड़ामणिधरैः क्षत्रियाणां प्रियम्वदैः। चम्पकैरिव विन्यस्तैः पर्वतैर्विबभौ मही ॥ ३३ ॥ कृत्वा तत् कर्म बीभत्सुरुग्रमुग्रपराक्रमः। स विद्ध्वा शकुनिं भूयः पञ्चभिर्नतपर्वभिः ॥३४॥ उलूकं पुनराजघ्ने युधि बाणेन रोषितः। तमुलूकं तथा विद्ध्वा सौवलस्यैव पश्यतः ॥ ३५ ॥ ननाद च महानादं पूरयन् वसुधातलम्। ततो देवेन्द्रतनयः शकुनेर्धनुराच्छिनत् ॥ ३६ ॥ निन्ये च चतुरो वाहान् यमस्य सदनं प्रति। ततो रथादवप्लुत्य सौवलो भरतर्षभ ॥ ३७ ॥ उलूकस्य रथं तूर्णमारुरोह त्वरान्वितः। तावेकरथमारूढौ पितापुत्रौ महारथौ ॥ ३८ ॥ पार्थं ववृषतुर्बाणैर्गिरिं मेघाविवोत्थितौ। ततो विद्ध्वा महाराज पाण्डवो निशितैः शरैः ॥ ३९ ॥ विद्रावयंस्तव चमूं शतशोऽथ सहस्रशः। अनिलेन यथाभ्राणि विच्छिन्नानि ततस्ततः ॥ ४० ॥ विच्छिन्नानि तथा राजन् बलान्यासन् विशाम्पते। तद्बलं भरतश्रेष्ठ वध्यमानं तदा निशि ॥ ४१ ॥ प्रदुद्राव दिशः सर्वा वीक्षमाणं भयार्द्दितम्। उत्सृज्य वाहान् समरे चोदयन्तस्तथापरे ॥४२॥ अम्लस्ताः पर्य्यवर्त्तन्त तस्मिंस्तमसि दारुणे। निर्ज्जित्य समरे योधांस्तावकान् भरतर्षभ ॥ ४३ ॥ दध्मतुर्मुदितौ शङ्खौ वासुदेवधनञ्जयौ। धृष्टद्युम्नो महाराज द्रोणं विद्ध्वा त्रिभिः शरैः ॥ ४४ ॥ चिच्छेद धनुषस्तूर्णं ज्यां शितेन शरेण ह। स विहाय धनुर्भूमौ द्रोणः क्षत्रियमर्द्दनः ॥ ४५ ॥ आददेऽन्यद्धनुः शूरो वेगवत् सारवत्तमम्। धृष्टद्युम्नं ततो द्रोणो विद्ध्वा सप्तभिराशुगैः ॥ ४६ ॥ सारथिं पञ्चभिर्बाणैर्विव्याध भरतर्षभ। तं

निवार्य्य शरैर्द्रोणं धृष्टद्युम्नो महारथः ॥ ४७ ॥ व्यधमत् कौरवीं सेनामासुरीं मघवानिव। वध्यमाने बले तस्मिंस्तव पुत्रस्य मारिष ॥ ४८ ॥ प्रावर्त्तत नदी घोरा शोणितौघतरङ्गिणी। उभयोः सेनयोर्मध्ये नराश्वद्विपवाहिनी ॥ ४९ ॥ यथा वैतरणी राजन् यमराष्ट्रं प्रति प्रभो। द्रावयित्वा तु तत् सैन्यं धृष्टद्युम्नः प्रतापवान् ॥ ५० ॥ अभ्यराजत तेजस्वी शक्रो देवगणेष्विव। अथ दध्मुर्महाशङ्खान् धृष्टद्युम्नशिखण्डिनौ ॥ ५१ ॥ यमौ च युयुधानश्च पाण्डवश्च वृकोदरः। जित्वा राजसहस्राणि तावकानां तरस्विनाम् ॥ ५२ ॥ सिंहनादरवांश्चक्रुः पाण्डवा जितकाशिनः। पश्यतस्तव पुत्रस्य कर्णस्य च रणोत्कटा। तथा द्रोणस्य शूरस्य द्रौणेश्चैव विशाम्पते ॥ ५३ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि सङ्कुलयुद्धे द्विसप्तत्यधिकशततोऽध्यायः ॥ १७२ ॥

---

सञ्जय उवाच। विद्रुतं स्वबलं दृष्ट्वा वध्यमानं महात्मभिः। क्रोधेन महताविष्टः पुत्रस्तव विशाम्पते ॥ १ ॥ अभ्येत्य सहसा कर्णं द्रोणञ्च जयताम्वरम्। अमर्षवशमापन्नो वाक्यज्ञो वाक्यमब्रवीत् ॥ २ ॥ भवद्भ्यामिह संग्रामः क्रुद्धाभ्यां सम्प्रवर्त्तितः। आहवे निहतं दृष्ट्वा सैन्धवं सव्यसाचिना ॥ ३ ॥ निहन्यमानां पाण्डूनां बलेन मम वाहिनीम्। भूत्वा तद्विजये शक्तावशक्ताविव पश्यतः ॥ ४ ॥ यद्यहं भवतोस्त्याज्यो न वाच्योऽस्मि तदैव हि। आवां पाण्डुसुतान् सङ्ख्ये जेष्याव इति मानदौ ॥ ५ ॥ तदैवाहं वचः श्रुत्वा भवद्भ्यामनुसम्मतम्। नाकरिष्यमिदं पार्थवैरं योधविनाशनम् ॥ ६ ॥ यदि नाहं परित्याज्यो भवद्भ्यां पुरुषर्षभौ। युध्यतामनुरूपेण विक्रमेण सुविक्रमौ ॥ ७ ॥

वाक्प्रतोदेन तौ वीरौ प्रनुन्नौ तनयेन ते। प्रावर्त्तयेतां तौ युद्धं
घट्टिताविव पन्नगौ॥ ८॥ ततस्तौ रथिनां श्रेष्ठौ सर्वलोकधनु-
र्द्धरौ। शैनेयप्रमुखान् पार्थानभिदुद्रुवतूरणे॥ ९॥ तथैव
सहिताः पार्थाः स्वेन सैन्येन सर्वशः। अभ्यवर्त्तन्त तौ वीरौ
नर्द्दमानौ मुहुर्मुहुः॥ १०॥ अथ द्रोणो महेष्वासो दशभिः
शिनिपुङ्गवम्। अविध्यत्त्वरितं क्रुद्धः सर्वशस्त्रभृतांवरः॥ ११॥
कर्णश्च दशभिर्वाणैः पुत्रश्च तव सप्तभिः। दशभिर्वृषसेनस्य सौबल-
श्चापि सप्तभिः॥ १२॥ एते कौरवसंक्रन्दे शैनेयं पर्य्यवाकिरन्।
दृष्ट्वा च समरे द्रोणं निघ्नन्तं पाण्डवीं चमूम्॥ १३॥ विव्यधुः
सोमकास्तूर्णं समन्ताच्छरवृष्टिभिः। तत्र द्रोणोऽहरत् प्राणान्
क्षत्रियाणां विशाम्पते॥ १४॥ रश्मिभिर्भास्करो राजंस्तमांसीव
समन्ततः। द्रोणेन बध्यमानानां पाञ्चालानां विशाम्पते॥ १५॥
शुश्रुवे तुमुलः शब्दः क्रोशतामितरेतरम्। पुत्रानन्ये पितॄनन्ये
भ्रातॄनन्ये च मातुलान्॥ १६॥ भागिनेयान् वयस्यांश्च तथा
सम्बन्धिबान्धवान्। उत्सृज्योत्सृज्य गच्छन्ति त्वरिता जीवि-
तेप्सवः॥ १७॥ अपरे मोहिता मोहात्तमेवाभिमुखा ययुः।
पाण्डवानां बले योधाः परलोकं गताः परे॥ १८॥ तथा सा
पाण्डवी सेना पीड्यमाना महात्मना। निशि सम्प्राद्रवद्राजन्
विसृज्योल्काः समन्ततः॥ १९॥ पश्यतो भीमसेनस्य विजय-
स्याच्युतस्य च। यमयोर्धर्मपुत्रस्य पार्षतस्य च पश्यतः॥ २०॥
तमसा संवृते लोके न प्राज्ञायत किञ्चन। कौरवाणां प्रकाशेन
दृश्यन्ते विद्रुताः परे॥ २१॥ द्रवमाणन्तु तत् सैन्यं द्रोणकर्णौ
महारथौ। जग्मतुः पृष्ठतो राजन् किरन्तौ सायकान् बहून्
॥ २२॥ पाञ्चालेषु प्रभग्नेषु च्चीयमाणेषु सर्वतः। जनार्द्दनो
दीनमनाः प्रत्यभाषत फाल्गुनम्॥ १३॥ द्रोणकर्णौ महे-
ष्वासावेतौ पार्षतसात्यकी। पाञ्चालैश्चैव सहितौ जग्मतुः सायकैः-

र्युधि ॥ २४ ॥ सा तदा शरवर्षेण प्रभग्ना महती चमूः । वार्य्य-
माणापि कौन्तेय पृतना नावतिष्ठते ॥ २५ ॥ तान्तु विद्रवतीं
दृष्ट्वा ऊचतुः केशवार्जुनौ । माभिद्रवत वित्रस्ता भयं त्यजत
पाण्डवाः ॥ २६ ॥ एतावावां सर्व्वसैन्यैर्व्यूढ़ौ सम्यगुदायुधौ ।
द्रोणञ्च सूतपुत्रञ्च प्रयातौ सम्प्रबाधितुम् ॥ २७ ॥ वृकोदरमथा-
यान्तं दृष्ट्वा तत्र जनार्द्दनः । पुनरेवाब्रवीद्राजन् हर्षयन्निव पाण्ड-
वम् ॥ २८ ॥ एष भीमो रणश्लाघी वृतः सोमकपाण्डवैः । अभ्य-
वर्त्तत वेगेन द्रोणकर्णौ महारथौ ॥ २९ ॥ एतेन सहितो युध्य
पाञ्चालैश्च महारथैः । गच्छाश्वन्तं त्वमप्यद्य सैन्यानां पाण्डु-
नन्दन ॥ ३० ॥ ततस्तौ पुरुषव्याघ्रावुभौ पाण्डवमाधवौ । द्रोण-
कर्णौ समासाद्य धिष्ठितौ रणमूर्द्धनि ॥ ३१ ॥

सञ्जय उवाच । ततस्तत् पुनरावृत्तं युधिष्ठिरबलं महत् ।
यतो द्रोणश्च कर्णश्च परान् ममृदतुर्युधि ॥ ३२ ॥ सम्प्रहारस्तु
तुमुलो निशीथे चाभवन्महान् । यथा सागरयो राजन् चन्द्रो-
दय समृद्धयोः ॥ ३३ ॥ तत उत्सृज्य पाणिभ्यां प्रदीपांस्तव
वाहिनी । युयुधे पाण्डवैः सार्द्धमुन्मत्तवदसम्भ्रमम् ॥ ३४ ॥ रजसा
तमसा चैव संग्रामे भृशदारुणे । केवलं नाममात्रेण प्रायुध्यन्त
रणाजिरे ॥३५॥ अश्रूयन्त हि नामानि श्राव्यमाणानि पार्थिवैः ।
प्रहरद्भिर्महाराज स्वयम्वर इवाहवे ॥ ३६ ॥ निःशब्दमासीत्
सहसा पुनः शब्दो महानभूत् । क्रुद्धानां युध्यमानानां जयतां
जीयतामपि ॥ ३७ ॥ यत्र यत्र स्म दृश्यन्ते प्रदीपाः कुरुपुङ्गव ।
ते शूरास्तत्र तत्र स्म निपतन्ति पतङ्गवत् ॥ ३८ ॥ तथा संयुध्य-
मानानां विगाढ़ाभून्महानिशा । पाण्डवानाञ्च राजेन्द्र कौर-
वाणाञ्च भारत ॥ ३९ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि सङ्कुलयुद्धे
त्रिसप्तत्यधिकशततोऽध्यायः ॥ १७३ ॥

सञ्जय उवाच । ततः कर्णो रणे दृष्ट्वा पार्षतं परवीरहा । आजघानोरसि शरैर्दशभिर्मर्मभेदिभिः ॥ १ ॥ प्रतिविव्याध तं कर्णं धृष्टद्युम्नो महारणे । पञ्चभिः सायकैस्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ २ ॥ तावन्योऽन्यं शरैराजन् सञ्छाद्य सुमहारणे । पुनः पूर्णायतोत्सृष्टैर्विव्याधाते परस्परम् ॥ ३ ॥ ततः पाञ्चाल-मुख्यस्य धृष्टद्युम्नस्य संयुगे । सारथिञ्चतुरश्चाश्वान् कर्णो निन्ये यमक्षयम् ॥ ४ ॥ कार्मुकप्रवरञ्चास्य चिच्छेद निशितैः शरैः । सारथिञ्चास्य भल्लेन रथनीड़ादपातयत् ॥ ५ ॥ धृष्टद्युम्नस्तु विरथो हताश्वो हतसारथिः । अवप्लुत्य रथात्तूर्णं गदामादाय वीर्य्यवान् ॥ ६ ॥ स वध्यमानः कर्णेन शरैः सन्नतपर्वभिः । गत्वा कर्णसमीपन्तु जघान चतुरो हयान् ॥ ७ ॥ पुनरावर्त्तत्र वेगेन पार्षतः परवीरहा । धनञ्जयरथं क्षिप्रमारुह्य रथिनाम्वरः ॥ ८ ॥ प्रयातुकामः कर्णाय वारितो धर्मसूनुना । कर्णस्तु सुमहातेजाः सिंहनादविमिश्रितम् ॥ ९ ॥ धनुः शब्दं महच्चक्रे दध्मौ तारेण चाम्बुजम् । दृष्ट्वा विनिर्ज्जितं युद्धे पार्षतं ते महारथाः ॥ १० ॥ अमर्षवशमापन्नाः पाञ्चालाः सह सोमकैः । सूतपुत्रवधार्थाय शस्त्राण्यादाय सर्वशः ॥ ११ ॥ प्रययुः कर्णमुद्दिश्य मृत्युं कृत्वा निवर्त्तनम् । कर्णस्यापि रथे वाहानन्यान् सूतोऽप्ययोजयत् ॥१२॥ शङ्खवर्णान् महावेगान् सैन्धवान् साधुवादिनः । लब्धलक्षस्तु राधेयः पाञ्चालानां महारथान् ॥ १३ ॥ अभ्यपीड़यदायस्तः शरैर्मेघ इवाचलम् । सा पीड्यमाना कर्णेन पाञ्चालानामनी-किनी ॥ १४ ॥ सम्प्राद्रवत् सुसन्त्रस्ता सिंहेनेवार्द्दिता मृगी । प्रपतन्तो रणेभ्यश्च गजेभ्यश्च महीपते ॥ १५ ॥ रथेभ्यो रथिन-स्तूर्णमदृश्यन्त समन्ततः । धावमानस्य योधस्य क्षुरप्रैश्च महा-मृधे ॥ १६ ॥ बाहू चिच्छेद वै कर्णः शिरश्चैव सकुण्डलम् । ऊरू चिच्छेद चान्यस्य गजस्थस्य विशाम्पते ॥ १७ ॥ वाजिपृष्ठगत-

स्यापि भूमिष्ठस्य च मारिष। नाशाम्निपुर्धावमाना बहवोऽन्ये महारथाः ॥ १८ ॥ संच्छिन्नान्यात्मगात्राणि वाहनानि च संयुगे। वध्यमानाः शरैर्घोरैः पाञ्चालाः सृञ्जयैः सह ॥ १९ ॥ तृण-विसन्दनाश्चापि सूतपुत्रञ्च मेनिरे। अपि स्वं समरे योधं धाव-मानं विचेतसः ॥ २० ॥ कर्णमेवाभ्यमन्यन्त ततो भीता द्रवन्ति ते। तान्यनीकानि भग्नानि द्रवमाणानि भारत ॥ २१ ॥ अभ्य-द्रवद्द्रुतं कर्णः सर्वतो विकिरञ्छरान्। वध्यन्ते समरे योधा धावमाना विचेतसः॥ २२ ॥ नाशक्नुवन्नवस्थातुं काल्यमाना महात्मना। कर्णेनाभ्याहता राजन् पाञ्चालाः परमेषुभिः ॥ २३ ॥ द्रोणेन च दिशः सर्वा वीक्ष्यमानाः प्रदुद्रुवुः। ततो युधिष्ठिरो राजा स्वसैन्यं प्रेक्ष्य विद्रुत ॥ २४ ॥ अपयाने मतिं कृत्वा फाल्गुनं वाक्यमब्रवीत्। पश्य कर्णं महेष्वासं धनुष्पाणिमवस्थितम् ॥२५॥ निशीथे दारुणे काले तपन्तमिव भास्करम्। कर्ण सायकनुन्नानां क्रोशतामेष निस्वनः ॥ २६ ॥ अनिशं श्रूयते पार्थ त्वद्वन्धूनामनाथ-वत्। यथा विसृजतश्चास्य सन्दधानस्य चाशुगान् ॥ २७ ॥ पश्यामि नान्तरं पार्थ क्षपयिष्यति बान्धवान्। यदत्रानन्तरं कार्य्यं प्राप्तकालं प्रपश्यसि ॥ २८ ॥ कर्णस्य बधसंयुक्तं तत् कुरुष्व धन-ञ्जय। एवमुक्तो महाराज पार्थः कृष्णमथाब्रवीत् ॥ २९ ॥ भीतो धर्म्मसुतो राजा राधेयस्याद्य विक्रमात्। एवङ्गते प्राप्तकालं कर्णानीके पुनः पुनः ॥ ३० ॥ भवान् व्यवस्यतां शीघ्रं द्रवते हि वरूथिनी। द्रोणसायकनुन्नानां भग्नानां मधुसूदन ॥ ३१ ॥ कर्णेन त्रास्यमानानामवस्थानं न विद्यते। पश्यामीह तथा कर्णं विचरन्तमभीतवत् ॥ ३२ ॥ द्रवमाणाञ्शथोदारान् किरन्तं निशितैः शरैः। नैनं शक्ष्यामि संसोढुं चरन्तं रणमूर्द्धनि ॥ ३३ ॥ प्रत्यक्षं वृष्णिशार्दूल पादस्पर्शमिवोरगः। स भवांस्तत्र यात्वाशु यत्र कर्णो महारथः। अहमेनं बधिष्यामि मां वैष मधुसूदन ॥ ३४ ॥

वासुदेव उवाच। पश्यामि कर्णं कौन्तेय देवराजमिवाहवे।
विचरन्तं नरव्याघ्रमतिमानुषविक्रमम् ॥ ३५ ॥ न तथान्योऽस्ति
समरे प्रत्युद्याता धनञ्जय। ऋते त्वां पुरुषव्याघ्र राक्षसाद्वा
घटोत्कचात् ॥ ३६ ॥ न तु तावदहं मन्ये प्राप्तकालं तवानघ।
समागमं महावाहो सूतपुत्रेण संयुगे ॥ ३७ ॥ दीप्यमाना महो-
ल्केव तिष्ठत्यस्य हि वासवी। त्वदर्थञ्च महाबाहो सूतपुत्रेण
संयुगे ॥ ३८ ॥ रक्ष्यते शक्तिरेषा हि रौद्रं रूपं बिभर्त्ति च
सततञ्चानुरक्तो वै हितैषी च घटोत्कचः ॥ ३९ ॥ घटोत्कचस्तु
राधेयं प्रत्युद्यातु महाबलः। स हि भीमेन बलिना जातः सुर-
पराक्रमः ॥ ४० ॥ तस्मिन्नस्त्राणि दिव्यानि राक्षसान्यासुराणि
च। विजेष्यति रणे कर्णमिति मे नास्ति संशयः ॥ ४१ ॥ एव-
मुक्तो महाबाहुः पार्थः पुष्करलोचनः। आजुहावाथ तद्रक्षस्तच्चा-
सीत् प्रादुरग्रतः ॥ ४२ ॥ कवची सशरः खड्गी सधन्वा च
विशाम्पते। अभिवाद्य ततः कृष्णं पाण्डवञ्च धनञ्जयम् ॥ ४३ ॥
अब्रवीत् स तदा गर्वादयमस्मि प्रशाधि माम्। ततस्तं मेघ-
सङ्काशं दीप्तास्यं दीप्तलोचनम्। अभ्यभाषत हैडिम्बिं दाशार्हः
प्रहसन्निव ॥ ४४ ॥

वासुदेव उवाच। घटोत्कच विजानीहि यत्त्वां वक्ष्यामि
तच्छृणु। प्राप्तो विक्रमकालोऽयं तव नान्यस्य कस्यचित् ॥ ४५ ॥
स त्वं निमज्जतां युद्धे पाण्डवानां प्लवो भव। विविधानि तवा-
स्त्राणि सन्ति माया च राक्षसी ॥ ४६ ॥ पश्य कर्णेन हैडिम्बे
पाण्डवानामनीकिनी। काल्यमाना यथा गावः पालेन रण-
मूर्द्धनि ॥ ४८ ॥ एष कर्णो महेष्वासो मतिमान् दृढविक्रमः।
पाण्डवानामनीकेषु दहति क्षत्रियर्षभान् ॥ ४८ ॥ किरन्तः शर-
वर्षाणि महान्ति दृढधन्विनः। नाशक्नुवन्नवस्थातुं पीड्यमानाः
शरार्चिषा ॥ ४९ ॥ निशीथे सूतपुत्रेण शरवर्षेण पीडिताः। एते

द्रवन्ति पाञ्चालाः सिंहेनेवार्द्दिता मृगाः ॥ ५० ॥ एतस्यैवं प्रवृत्तस्य सूतपुत्रस्य संयुगे। निषेद्धा विद्यते नान्यस्त्वामृते भीमविक्रम ॥ ५१ ॥ स त्वं कुरु महाबाहो कर्म्म युक्तमिहात्मनः। मातुलानां पितॄणाञ्च तेजसा च बलेन च ॥ ५२ ॥ एतदर्थं हि हैड़िम्बे पुत्रानिच्छन्ति मानवाः। कथं न तारयेद्दुर्गात् स त्वं तारय बान्धवान् ॥ ५३ ॥ इच्छन्ति पितरः पुत्रान् स्वार्थहेतोर्घटोत्कच। इह लोकात् परे लोके तारयिष्यन्ति ये हिताः ॥५४॥ तवाप्यसह्यं घोरं बलं युद्धे महात्मतः। संग्रामे युध्यमानस्य न समस्तव विद्यते ॥ ५५ ॥ पाण्डवानां प्रभग्नानां कर्णेन निशिसायकैः। मज्जतां धार्त्तराष्ट्रेषु भव पारं परन्तप ॥ ५६ ॥ रात्रौ हि राक्षसा भूयो भवन्त्यमितविक्रमाः। बलवन्तः सुदुर्धर्षाः शूरा विक्रान्तयोधिनः ॥ ५७ ॥ जहि कर्णं महेष्वासं निशीथे मायया रणे। पार्था द्रोणं बधिष्यन्ति धृष्टद्युम्नपुरोगमाः ॥५८॥

सञ्जय उवाच। केशवस्य वचः श्रुत्वा बीभत्सुरपि राक्षसम्। अभ्यभाषत कौरव्य घटोत्कचमरिन्दमम् ॥ ५९ ॥ घटोत्कच भवांश्चैव दीर्घबाहुश्च सात्यकिः। मतौ मे सर्व्वसैन्येषु भीमसेनस्तु पाण्डवः ॥ ६० ॥ स भवान् यातु कर्णेन द्वैरथं संयुगे निशि। सात्यकिः पृष्ठतो गोप्ता भविष्यति महारथः ॥ ६१ ॥ जहि कर्णं रणे शूरं सात्वतेन सहायवान्। यथेन्द्रस्तारकं पूर्व्वं स्कन्देन सह जघ्निवान् ॥ ६२ ॥

घटोत्कच उवाच। अलमेवास्मि कर्णाय द्रोणायालञ्च भारत। अन्येषां क्षत्रियाणां वै कृतास्त्राणां महात्मनाम् ॥ ६३ ॥ अद्य दास्यामि संग्रामं सूतपुत्राय तं निशि। यं जनाः सम्प्रवक्ष्यन्ति यावद्भूमिर्धरिष्यति ॥ ६४ ॥ न चात्र शूरान्मोक्ष्यामि न भीतान्न कृताञ्जलीन्। सर्व्वमेव वधिष्यामि राक्षसं धर्म्ममास्थितः ॥ ६५ ॥

सञ्जय उवाच। एवमुक्त्वा महाबाहुर्हैड़िम्बिः परवीरहा।

अभ्ययात्तुमुले कर्णं तव सैन्यं विभीषयन्॥ ६६॥ तमापतन्तं संक्रुद्धं दीप्तास्यं दीप्तमूर्द्धजम्। प्रहसन् पुरुषव्याघ्रः प्रतिजग्राह सूतजः॥ ६७॥ तयोः समभवद्युद्धं कर्णराक्षसयोर्मृधे। गर्ज्जतो राजशार्दूल शक्रप्रह्लादयोरिव॥ ६८॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि घटोत्कचयाने
चतुःसप्तत्यधिकशतोऽध्यायः॥ १७४॥

---

सञ्जय उवाच। दृष्ट्वा घटोत्कचं राजन् सूतपुत्ररथं प्रति। प्रतियातं महाबाहुं जिघांसुं कर्णमाहवे॥ १॥ अब्रवीत्तव पुत्रस्ते दुःशासनमिदं वचः। एतद्रक्षो रणे तूर्णं दृष्ट्वा कर्णस्य विक्रमम्॥ २॥ अभियाति रणे कर्णं तद्वारय महारथम्। वृतः सैन्येन महता याहि यत्र महाबलः॥ ३॥ कर्णो वैकर्त्तनो युद्धे राक्षसेन युयुत्सति। रक्ष कर्णं रणे यत्तो वृतः सैन्येन मानद॥ ४॥ मा कर्णं राक्षसो घोरः प्रमादान्नाशयिष्यति। एतस्मिन्नन्तरे राजन् जटासुरसुतो बली॥ ५॥ दुर्य्योधनमुपागम्य प्राह प्रहरताम्वरः। दुर्य्योधन तवामित्रान् प्रख्यातान् युद्धदुर्मदान्॥ ६॥ पाण्डवान् हन्तुमिच्छामि त्वयाज्ञप्तः सहानुगान्। जटासुरो मम पिता राक्षसाग्र्यो बली पुरा॥ ७॥ प्रयुज्य कर्म रक्षोघ्नं क्षुद्रैः पार्थैर्न्निपातितः। तस्यापचितिमिच्छामि शत्रुशोणितपूजया॥ ८॥ शत्रुमांसैश्च राजेन्द्र मामनुज्ञातुमर्हसि। तमब्रवीत्ततो राजा प्रीयमाणः पुनः पुनः॥ ९॥ द्रोणकर्णादिभिः सार्द्धं पर्य्याप्तोऽहं द्विषज्जये। त्वन्तु गच्छ मयाज्ञप्तो जहि युद्धे घटोत्कचम्॥ १०॥ राक्षसं क्रूरकर्माणं रक्षोमानुषसम्भवम्। पाण्डवानां हितं नित्यं हस्त्यश्वरथघातिनम्॥११॥ वैहायसगतं युद्धे प्रेषयेद्यमसादनम्। तथेत्युक्त्वा महाकायः

समाहूय घटोत्कचम्॥१२॥ जटासुरिर्भैमसेनिं नानाशस्त्रैरवाकिरत्। अलम्बुषश्च कर्णश्च कुरुसैन्यञ्च दुस्तरम्॥१३॥ हैड़िम्बिः प्रममाथैको महावातोम्बुदानिव। ततो मायावलं दृष्ट्वा रक्षस्तूर्णमलम्बुषः॥१४॥ घटोत्कचं शरव्रातर्नानालिङ्गैः समाकिरत्। विद्ध्वा तु बहुभिर्वाणैर्भैमसेनिमलम्बुषः॥१५॥ व्यद्रावयच्छरैस्तूर्णं पाण्डवानामनीकिनीम्। तेन विद्राव्यमाणानि पाण्डुसैन्यानि भारत॥१६॥ निशीथे विप्रकीर्य्यन्त वातनुन्ना घना इव। घटोत्कचशरैर्नुन्ना तथैव तव वाहिनी॥१७॥ निशीथे प्राद्रवद्राजन्नुत्सृज्योल्का सहस्रशः। अलम्बुषस्ततः क्रुद्धो भैमसेनिं महामृधे॥१८॥ आजघ्ने बहुभिर्वाणैः स्तोत्रैरिव महाद्विपम्। तिलशश्च ततो यानं सूतं सर्वायुधानि च॥१९॥ घटोत्कचः प्रचिच्छेद प्राहसच्चातिभैरवम्। ततः कर्णं शरव्रातैः कुरूंश्चापि सहस्रशः॥२०॥ अलम्बुषञ्चाभ्यवर्षन्मेघो मेरुमिवाचलम्। ततः सञ्चुक्षुभे सैन्यं कुरूणां राक्षसार्द्दितम्॥२१॥ उपर्य्युपरि चान्योऽन्यं चतुरङ्गं ममर्द्द ह। जाटासुरिर्महाराज विरथो हतसारथिः॥२२॥ घटोत्कचं रणे क्रुद्धो मुष्टिनाभ्यहनच्च सः। मुष्टिनाभ्याहतः सोऽथ प्रचचाल घटोत्कचः॥२३॥ क्षितिकम्पे यथा शैलः सवृक्षस्तृणगुल्मवान्। ततः स परिघाभेन द्विषद्घ्नेन तु वाहुना॥२४॥ जाटासुरिं भैमसेनिरवधीत् क्रोधमूर्च्छितः। ततः प्रमथ्य तं क्रुद्धं तूर्णं हैड़िम्बिराक्षिपत्॥२५॥ द्वाभ्यां भुजाभ्यां संगृह्य निष्पिपेष महीतले। जाटासुरिर्मोक्षयित्वा आत्मानञ्च घटोत्कचात्॥२६॥ पुनरुत्थाय वेगेन घटोत्कचमुपाद्रवत्। अलम्बुषोऽपि विक्षिप्य समुत्क्षिप्य च राक्षसम्॥२७॥ घटोत्कचं रणे रोषान्निष्पिपेष महीतले। तयोः समभवद्युद्धं गर्ज्जतोरतिकाययोः॥२८॥ घटोत्कचालम्बुषयोस्तुमुलं लोमहर्षणम्। विशेषयन्तावन्योऽन्यं मायाभि-

रतिमानिनौ ॥ २९ ॥ युयुधाते महावीर्य्याविन्द्रवैरोचनाविव। पावकाम्बुनिधी भूत्वा पुनर्गरुड़तक्षकौ ॥ ३० ॥ पुनर्मेघमहावातौ पुनर्वज्रमहाचलौ। पुनः कुञ्जरशार्दूलौ पुनः स्वर्भानुभास्करौ ॥ ३१ ॥ एवं मायाशतसृजावन्योन्यबधकाङ्क्षिणौ। भृशञ्चित्रमयुध्येतामलम्बुषघटोत्कचौ ॥३२॥ परिघैश्च गदाभिश्च प्रासमुद्गरपट्टिशैः। मुषलैः पर्वताग्रैश्च तावन्योऽन्यं निजघ्नतुः ॥ ३३ ॥ हयाभ्याञ्च गदाभ्याञ्च पदातिरथिनौ पुनः। युयुधाते महामायौ राक्षसां प्रवरौ युधि ॥ ३४ ॥ ततो घटोत्कचो राजन्नलम्बुषबधेप्सया। उत्पपात भृशं क्रुद्धः श्येनवन्निपपात च ॥ ३५ ॥ गृहीत्वा च महाकायं राक्षसेन्द्रमलम्बुषम्। उद्यतं न्यवधीद्भूमौ मयं विष्णुरिवाहवे ॥ ३६ ॥ ततो घटोत्कचः खड्गमुद्गृह्याद्भुतदर्शनम्। रौद्रस्य कायाद्धि शिरो भीमं विकृतदर्शनम् ॥ ३७ ॥ स्फुरतस्तस्य समरे नदतश्चातिभैरवम्। विचकर्त्त महाराज शत्रोरमितविक्रमः ॥३८॥ शिरस्तच्चापि सङ्गृह्य केशेषु रुधिरोक्षितम्। ययौ घटोत्कचस्तूर्णं दुर्य्योधनरथं प्रति ॥ ३९ ॥ अभ्येत्य च महाबाहुः स्मयमानः स राक्षसः। शिरो रथेऽस्य निक्षिप्य विकृताननमूर्द्धजम् ॥४०॥ प्राणदद्भैरवं नादं प्रावृषीव बलाहकः। अब्रवीच्च ततो राजन् दुर्य्योधनमिदं वचः ॥ ४१ ॥ एष ते निहतो बन्धुस्त्वया संदृष्टविक्रमः। पुनर्द्रष्टासि कर्णस्य निष्ठामेतां तथात्मनः ॥ ४२ ॥ स्वधर्ममर्थं कामञ्च त्रितयं योभिवाञ्छति। रिक्तपाणिर्न पश्येत राजानं ब्राह्मणं स्त्रियम् ॥ ४३ ॥ सुप्रीतस्तावत् तिष्ठस्व यावत् कर्णं वधाम्यहम्। एवमुक्त्वा ततः प्रायात् कर्णं प्रति नरेश्वर ॥४४॥ किरञ्छरशतांस्तीक्ष्णान् विमुञ्चन कर्णमूर्द्धनि। ततः समभवद्युद्धं घोररूपं भयानकम्। विस्मापनं महाराज नरराक्षसयोर्मृधे ॥४५॥

इति द्रोणपर्वणि घटोत्कचबधपर्वणि अलम्बुषबधे पञ्चसप्तत्यधिकशततोऽध्यायः ॥ १७५ ॥

धृतराष्ट्र उवाच । यत्तद्वैकर्त्तनः कर्णो राक्षसश्च घटोत्कचः । निशीथे समसज्जेतां तद्युद्धमभवत् कथम् ॥ १ ॥ कीदृशञ्चाभवद्रूपं तस्य घोरस्य रक्षसः । रथश्च कीदृशस्तस्य हयाः सर्व्वायुधानि च ॥ २ ॥ किम्प्रमाणा हयास्तस्य रथकेतुर्द्धनुस्तथा । कीदृशं वर्म्म चैवास्य शिरस्त्राणञ्च कीदृशम् । पृष्टस्त्वमेतदाचक्ष्व कुशलो ह्यसि सञ्जय ॥ ३ ॥

सञ्जय उवाच । लोहिताक्षो महाकायस्ताम्रास्यो निम्नतोदरः । ऊर्द्ध्वरोमा हरितश्मश्रुः शङ्कुकर्णो महाहनुः ॥ ४ ॥ आकर्णाद्दारितास्यश्च तीक्ष्णदंष्ट्रः करालवान् । सुदीर्घताम्रजिह्वौष्ठो लम्बभ्रूः स्थूलनासिकः ॥ ५ ॥ नीलाङ्गो लोहितग्रीवो गिरिवर्ष्मा भयङ्करः । महाकायो महाबाहुर्म्महाशीर्षो महाबलः ॥ ६ ॥ विकृतः परुषस्पर्शो विकटोद्बद्धपिण्डिकः । स्थूलस्फिग्गूढ़नाभिश्च शिथिलोपचयो महान् ॥ ७ ॥ तथैव हस्ताभरणी महामायोऽङ्गदी तथा । उरसा धारयन्निष्कमग्निमालां यथाचलः ॥ ८ ॥ तस्य हेममयञ्चित्रं बहुरूपकशोभितम् । तोरणप्रतिमं शुभ्रं किरीटं मूर्द्ध्न्यशोभत ॥ ९ ॥ कुण्डले बालसूर्य्याभे मालां हेममयीं शुभाम् । धारयन् विपुलं कांस्यं कवचञ्च महाप्रभम् ॥ १० ॥ किङ्किणीशतनिर्घोषं रक्तध्वजपताकिनम् । ऋक्षचर्म्मावनद्धाङ्गं नल्वमात्रं महारथम् ॥ ११ ॥ सर्व्वायुधवरोपेतमास्थितं ध्वजमालिनम् । अष्टचक्रसमायुक्तं मेघगम्भीरनिस्वनम् ॥ १२ ॥ मत्तमातङ्गसङ्काशा लोहिताक्षा विभीषणाः । कामवर्णजवोपेता बलवन्तश्च ते हयाः ॥ १३ ॥ वहन्तो राक्षसं घोरं बलवन्तो जितश्रमाः । विपुलाभिः सटाभिस्ते ह्रेषमाणा मुहुर्मुहुः ॥ १४ ॥ राक्षसोऽस्य विरूपाक्षः सूतो दीप्तास्यकुण्डलः । रश्मिभिः सूर्य्यरश्म्याभैः सञ्जग्राह हयान्रणे ॥ १५ ॥ स तेन सहितस्तस्थावरुणेन यथा रविः । संसक्त इव चाभ्रेण यथाद्रि-

महता महान्॥ १६॥ दिवस्पृक् सुमहाकेतुः स्यन्दनेऽस्य समुच्छ्रितः। रक्तोत्तमाङ्गः क्रव्यादो गृध्रः परमभीषणः॥ १७॥ वासवाशनिनिर्घोषं दृढ़ज्यमतिविक्षिपन्। व्यक्तं किष्कुपरीणाहं द्वादशारत्निकार्मुकम्॥ १८॥ रथाक्षमात्रैरिषुभिः सर्वाः प्रच्छादयन् दिशः। तस्यां वीरापहारिण्यां निशायां कर्णमभ्ययात्॥ १९॥ तस्य विक्षिपतश्चापं रथे विष्टभ्य तिष्ठतः। अश्रूयत धनुर्घोषो विस्फूर्जितमिवाशनेः॥ २०॥ तेन वित्रास्यमानानि तव सैन्यानि भारत। समकम्पन्त सर्वाणि सिन्धोरिव महोर्मयः॥२१॥ तमापतन्तं सम्प्रेक्ष्य विरूपाक्षं विभीषणम्। उत्स्मयन्निव राधेयस्त्वरमाणो न्यवारयत्॥ २२॥ ततः कर्णोऽभ्ययादेनमस्यन्नस्यन्तमन्तिकात्। मातङ्गमिव मातङ्गो यूथर्षभ इवर्षभम्॥२३॥ स सन्निपातस्तुमुलस्तयोरासीद्विशाम्पते। कर्णराक्षसयोराजन्निन्द्रशम्बरयोरिव॥ २४॥ तौ प्रगृह्य महाभीमे धनुषी भीमनिस्वने। प्राच्छादयेतामन्योऽन्यं तक्षमाणौ महेषुभिः॥ २५॥ ततः पूर्णायतोत्सृष्टैः शरैः सन्नतपर्वभिः। व्यदारयेतामन्योऽन्यं कांस्ये निर्भिद्य वर्मणी॥ २६॥ तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ। रथशक्तिभिरन्योऽन्यं विशिखैस्तौ ततक्षतुः॥ २७॥ संछिन्दन्तौ च गात्राणि सन्दधानौ च सायकान्। दहन्तौ च शरव्रातैर्दुष्प्रेक्ष्यौ च बभूवतुः॥ २८॥ तौ शरक्षतसर्वाङ्गौ शोणितौघपरिप्लुतौ। विभ्राजेतां यथा वारिस्रवन्तौ गैरिकाचलौ॥२९॥ तौ शराग्रविभिन्नाङ्गौ निर्भिदन्तौ परस्परम्। नाकम्पयेतामन्योन्यं यतमानौ महारथौ॥ ३०॥ तत् प्रवृत्तं निशायुद्धं चिरं सममिवाभवत्। प्राणयोर्दीव्यतोराजन् कर्णराक्षसयोर्मृधे॥ ३१॥ तस्य सन्दधतस्तीक्ष्णान् शरांश्चासक्तमस्यतः। धनुर्घोषेण वित्रस्ताः स्वे परे च तदाभवन्॥ ३२॥ घटोत्कचं तदा कर्णो न विशेषयते नृप। प्रादुश्चक्रे ततो दिव्यमस्त्रमस्त्रविदाम्वरः॥ ३३॥ कर्णेन

सन्धितं दृष्ट्वा दिव्यमस्त्रं घटोत्कचः । प्रादुश्चक्रे ततो मायां राक्षसीं राक्षसेश्वरः ॥ ३४ ॥ शूलपर्वतधारिण्या शैलमुद्गरहस्तया । रक्षसां घोररूपाणां महत्या सेनया वृतः ॥ ३५ ॥ [समुद्यतमहाशस्त्रं दृष्ट्वा ते व्यथिता नृपाः । भूतान्तकमिवायान्तं कालदण्डोग्रधारिणम् ॥ ३६ ॥ घटोत्कचप्रमुक्तेन सिंहनादेन भीषिताः । प्रसुस्रुवुर्गजा मूत्रं विव्यथुश्च नरा भृशम् ॥ ३७ ॥ ततोऽश्मवृष्टिरत्युग्रा महतासीत् समन्ततः । अर्द्धरात्राधिकबलैर्विमुक्ता राक्षसैर्भृशम् ॥ ३८ ॥ आयसानि च चक्राणि भुशुण्ड्यः शक्तितोमराः । पतन्त्यविरलाः शूलाः शतघ्न्यः पट्टिशास्तथा ॥ ३९ ॥ तमुग्रमतिरौद्रञ्च दृष्ट्वा युद्धं नराधिपाः । पुत्राश्च तव योधाश्च व्यथिता विप्रदुद्रुवुः ॥ ४० ॥ तत्रैकोऽस्त्रबलश्लाघी कर्णो मानी न विव्यथे । व्यधमत् स शरैर्मायां घटोत्कचविनिर्मिताम् । विससर्ज शरान् घोरान् सूतपुत्रवधेप्सया ॥ ४१ ॥ ततस्ते रुधिराभ्यक्ता भित्त्वा कर्णं महाहवे । विविशुर्धरणीं बाणाः संक्रुद्धा इव पन्नगाः ॥ ४२ ॥ सूतपुत्रस्तु संक्रुद्धो लघुहस्तः प्रतापवान् । घटोत्कचमतिक्रम्य विभेद दशभिः शरैः ॥ ४३ ॥ घटोत्कचो विनिर्भिन्नः सूतपुत्रेण मर्मसु । चक्रं दिव्यं सहस्रारमगृह्णाद्व्यथितो भृशम ॥ ४४ ॥ क्षुरान्तं बालसूर्य्याभं मणिरत्नविभूषितम् । चिक्षेपाधिरथेः क्रुद्धो भैमसेनिर्जिघांसया ॥ ४५ ॥ प्रविद्धमतिवेगेन विच्छिन्नं कर्णसायकैः । अभाग्यस्येव सङ्कल्पस्तन्मोघमपतद्भुवि ॥ ४६ ॥ घटोत्कचः सुसंक्रुद्धो दृष्ट्वा चक्रं निपातितम् । कर्णं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करम् ॥ ४७ ॥ सूतपुत्रस्त्वसम्भ्रान्तो रुद्रोपेन्द्रेन्द्रविक्रमः । घटोत्कचरथं तूर्णं छादयामास पत्रिभिः ॥ ४८ ॥ घटोत्कचेन तु गदा नद्धहेमाङ्गदा तदा । क्षिप्ता भ्राम्य शरैश्चापि कर्णेनाभ्याहतापतत् ॥ ४९ ॥ ततोऽन्तरीक्षमुत्पत्य कालमेघ इवोन्नदन् । प्रववर्ष महाकायो द्रुमवर्षं नभस्तलात् ॥ ५० ॥ ततो मायाविनं

कर्णो भीमसेनसुतं दिवि । मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः ॥ ५१ ॥ तस्य सर्वान् हयान् हत्वा संछिद्य शतधा रथम् । अभ्यवर्षच्छरैः कर्णः पर्जन्य इव वृष्टिमान् ॥ ५२ ॥ न तस्यासीदनिर्भिन्नं गात्रे द्व्यङ्गुलमन्तरम् । सोऽदृश्यत मुहूर्त्तेन श्वाविच्छललितो यथा ॥ ५३ ॥ न हयान्न रथं तस्य न ध्वजं न घटोत्कचम् । दृष्टवन्तः स्म समरे शरौघेनाभिसंवृतम् ॥ ५४ ॥ स तु कर्णस्य तद्दिव्यमस्त्रमस्त्रेण शातयन् । मायायुद्धेन मायावी सूतपुत्रमयोधयत् ॥ ५५ ॥ सोऽयोधयत्तदा कर्णं मायया लाघवेन च । अलक्ष्यमाणानि दिवि शरजालानि सम्पतन् ॥ ५६ ॥ भैमसेनिर्महामायी मायया कुरुसत्तम । विचचाराक्षनात्मानं मोहयन्निव भारत ॥ ५७ ॥ स तु कृत्वा विरूपाणि वदनान्यशुभानि च । अग्रसत् सूतपुत्रस्य दिव्यान्यस्त्राणि वीर्य्यवान् ॥ ५८ ॥ पुनश्चापि महाकायः संछिन्नः शतधा रणे । हतसत्त्वो निरुत्साहो पतितः समदृश्यत ॥ ५९ ॥ हतं तं मन्यमानाश्च प्रणेदुः कुरुपुङ्गवाः । अथ देहैर्नवैरन्यैर्दिक्षु सर्वास्वदृश्यत ॥ ६० ॥ पुनश्चापि महाकायः शतशीर्षः शतोदरः । व्यदृश्यत महाराज मैनाक इव पर्वतः ॥ ६१ ॥ अङ्गुष्ठमात्रो भूत्वा च पुनरेव स राक्षसः । सागरोर्मिरिवोद्धूतस्तिर्य्यगूर्द्ध्वमवर्त्तत ॥ ६२ ॥ वसुधां दारयित्वा च पुनरप्सु न्यमज्जत । अदृश्यत तदा तत्र पुनरुन्मज्जितोऽन्यतः ॥ ६३ ॥ सोऽवतीर्य्य पुनस्तस्थौ रथे हेमपरिष्कृतम् । क्षितिं खञ्च दिशश्चैव माययाभ्येत्य दंशितः ॥ ६४ ॥ गत्वा कर्णरथाभ्याशं विचलत् कुण्डलाननः । प्राह वाक्यमसम्भ्रान्तः सूतपुत्रं विशाम्पते ॥ ६५ ॥ तिष्ठेदानीं क्व मे जीवन् सूतपुत्र गमिष्यसि । युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे ॥ ६६ ॥ इत्युक्त्वा रोषताम्राक्षं रक्षः क्रूरपराक्रमम् । उत्पपातान्तरीक्षञ्च जहास च सुविस्तरम् ॥ ६७ ॥ कर्णमभ्यहनच्चैव गजेन्द्रमिव केशरी । रथाक्ष-

मालैरिषुभिरभ्यवर्षद्घटोत्कचः ॥६८॥ रथिना मृषभं कर्णं धाराभि-
रिव तोयदः । शरवृष्टिश्च तं कर्णो दूरात् प्राप्तामघातयत् ॥६९॥
दृष्ट्वा च विहतां मायां कर्णेन भरतर्षभ । घटोत्कचस्ततो मायां
ससर्ज्जान्तर्हितः पुनः ॥ ७० ॥ सोऽभवद्गिरिरत्युच्चः शिखरैस्तरु-
सङ्कटैः । शूलप्रासासिमुषलैर्ज्जलप्रस्रवणो महान् ॥ ७१ ॥ तम-
ञ्जनचयप्रख्यं कर्णो दृष्ट्वा महीधरम् । प्रपातैरायुधान्युग्रारयुद्‌-
हन्तं न चुक्षुभे ॥ ७२ ॥ स्मयन्निव ततः कर्णो दिव्यमस्त्रमुदैरयत् ।
ततः सोऽस्त्रेण शैलेन्द्रो विक्षिप्तो वै व्यनश्यत ॥ ७३ ॥ ततः स
तोयदो भूत्वा नीलः सेन्द्रायुधो दिवि । अश्मवृष्टिभिरत्युग्रः
सूतपुत्रमवाकिरत् ॥ ७४ ॥ अथ सन्धाय वायव्यमस्त्रमस्त्रविदा-
म्वरः । व्यधमत् कालमेघं तं कर्णो वैकर्त्तनो वृषः ॥ ७५ ॥
स मार्गणगनैः कर्णो दिशः प्रच्छाद्य सर्वशः । जघानास्त्रं महा-
राज घटोत्कचसमीरितम् ॥ ७६ ॥ ततः प्रहस्य समरे भैमसेनि-
र्महाबलः । प्रादुश्चक्रे महाकायां कर्णं प्रति महारथम् ॥ ७७ ॥
स दृष्ट्वा पुनरायान्तं रथेन रथिनाम्वरम् । घटोत्कचमसम्भ्रान्तं
राक्षसैर्बहुभिर्वृतम् ॥ ७८ ॥ सिंहशार्दूलसदृशैर्मत्तमातङ्गविक्रमैः ।
गजस्थैश्च रथस्थैश्च वाजिपृष्ठगतैस्तथा ॥ ७९ ॥ नानाशस्त्रधरै-
र्घोरैर्नानाकवचभूषणैः । वृतं घटोत्कचं क्रूरैर्मरुद्भिरिव वासवम्
॥ ८० ॥ दृष्ट्वा कर्णो महेष्वासो योधयामास राक्षसम् । घटोत्-
कचस्ततः कर्णं विद्ध्वा पञ्चभिराशुगैः ॥ ८१ ॥ ननाद भैरवं नादं
भीषयन् सर्वपार्थिवान् । भूयश्चाञ्जलिकेनाथ समार्गणगणं महत्
॥ ८२ ॥ कर्णहस्तस्थितञ्चापं चिच्छेदाशु घटोत्कचः । अथान्य-
द्धनुरादाय दृढ़म्भारसहं महत् ॥ ८३ ॥ विचकर्ष बलात् कर्ण-
इन्द्रायुधमिवोच्छ्रितम् । ततः कर्णो महाराज प्रेषयामास सायः-
कान् ॥ ८४ ॥ सुवर्णपुङ्खाञ्छत्रुघ्नान् खचरान् राक्षसान् प्रति ।
तद्बाणैरर्द्दितं यूथं रक्षसां पीनवक्षसाम् ॥ ८५ ॥ सिंहेनेवार्द्दितं

वन्यं गजानामाकुलं कुलम्। विधम्य राक्षसान् बाणैः साश्वसूतगजान् विभुः॥ ८६॥ ददाह भगवान् वह्निर्भूतानीव युगक्षये। स हत्वा राक्षसीं सेनां शुशुभे सूतनन्दनः॥ ८७॥ पुरेव त्रिपुरं दग्ध्वा दिवि देवो महेश्वरः। तेषु राजसहस्रेषु पाण्डवेयेषु मारिष॥ ८८॥ नैनं निरीक्षितुमपि कश्चिच्छक्नोति पार्थिव। ऋते घटोत्कचाद्राजन् राक्षसेन्द्रान्महाबलात्॥ ८९॥ भीमवीर्य्यबलोपेतात् क्रुद्धाद्वैवस्वतादिव। तस्य क्रुद्धस्य नेत्राभ्यां पावकः समजायत॥ ९०॥ महोल्काभ्यां यथा राजन् सार्च्चिषः स्नेहबिन्दवः। तलं तलेन संहत्य सन्दश्य दशनच्छदम्॥ ९१॥ रथमास्थाय च पुनर्मायया निर्मितं ततः। युक्तं गजनिभैर्वाहैः पिशाचवदनैः खरैः॥ ९२॥ स सूतमब्रवीत् क्रुद्धः सूतपुत्राय मां वह। स ययौ घोररूपेण रथेन रथिनाम्वरः॥ ९३॥ द्वैरथं सूतपुत्रेण पुनरेव विशाम्पते। स चिक्षेप पुनः क्रुद्धः सूतपुत्राय राक्षसः॥ ९४॥ अष्टचक्रां महाघोरामशनीं रुद्रनिर्मिताम्। तामवप्लुत्य जग्राह कर्णो न्यस्य रथे धनुः॥ ९५॥ चिक्षेप चैनां तस्यैव स्यन्दनात् सोऽवपुप्लुवे। साश्वसूतध्वजं यानं भस्म कृत्वा महाप्रभा॥ ९६॥ विवेश वसुधां भित्त्वा सुरास्तत्र विसिस्मियुः। कर्णञ्च सर्वभूतानि पूजयामासुरञ्जसा॥ ९७॥ यदवप्लुत्य जग्राह देवसृष्टां महाशनीम्। एवं कृत्वा रणे कर्ण आरुरोह रथं पुनः॥ ९८॥ ततो मुमोच विशिखान् सूतपुत्रः परन्तपः। अशक्यं कर्त्तुमन्येन सर्वभूतेषु मानद॥ ९९॥ यदकार्षीत्तदा कर्णः संग्रामे भीमदर्शने। स हन्यमानो नाराचैर्धाराभिरिव पर्वतः॥ १००॥ गन्धर्वनगराकारः पुनरन्तरधीयत। एवं स वै महाकायो मायया लाघवेन च॥ १०१॥ अस्त्राणि तानि दिव्यानि जघान रिपुसूदनः। निहन्यमानेष्वस्त्रेषु मायया तेन रक्षसा॥ १०२॥ असम्भ्रान्तस्ततः कर्णस्तद्रक्षः प्रत्ययोधयत्।

ततः क्रुद्धो महाराज भैमसेनिर्महाबलः ॥ १०३ ॥ चकार बहुधात्मानं भीषयाणो महारथान्। ततो दिग्भ्यः समापेतुः सिंहव्याघ्रतरक्षवः ॥ १०४ ॥ अग्निजिह्वास्तु भुजगा विहगाश्चाप्ययोमुखाः। आकीर्य्यमाणो विशिखैः कर्णचापच्युतैः शरैः ॥ १०५ ॥ नगराजसमप्रख्यस्तत्रैवान्तरधीयत। राक्षसाश्च पिशाचाश्च यातुधानास्तथैव च ॥ १०६ ॥ शालावृकाश्च बहवो वृकाश्च विकृताननाः। ते कर्णं भक्षयिष्यन्तः सर्वतः समुपाद्रवन् ॥ १०७ ॥ अथैनं वाग्भिरुग्राभिस्त्रासयाञ्चक्रिरे तदा। उद्यतैर्बहुभिर्घोरैरायुधैः शोणितोक्षितैः ॥ १०८ ॥ तेषामनेकैरेकैकं कर्णो विव्याध चाशुगैः। प्रतिहत्य तु तां मायां दिव्येनास्त्रेण राक्षसीम् ॥१०९॥ आजघान हयान् घोरान् शरैः सन्नतपर्वभिः। ते भग्ना विकृताङ्गाश्च छिन्नपृष्ठाश्च सायकैः ॥ ११० ॥ वसुधामन्वपद्यन्त पश्यतस्तस्य रक्षसः। स भग्नमायो हैड़िम्बिः कर्णं वैकर्त्तनं ततः। एष ते विदधे मृत्युमित्युक्त्वान्तरधीयत ॥ १११ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि कर्णघटोत्कचयुद्धे षट्सप्तत्यधिकशततोऽध्यायः ॥ १७६ ॥

---

सञ्जय उवाच। तस्मिंस्तथा वर्त्तमाने कर्णराक्षसयोर्मृधे। अलायुधो राक्षसेन्द्रो वीर्य्यवानभ्यवर्त्तत ॥ १ ॥ महत्या सेनया युक्तः सुयोधनमुपागमत्। राक्षसानां विरूपाणां सहस्रैः परिवारितः ॥ २ ॥ नानारूपधरैर्वीरैः पूर्व्ववैरमनुस्मरन्। तस्य ज्ञातिर्हि विक्रान्तो ब्राह्मणादो बको हतः ॥ ३ ॥ किर्म्मीरश्च महातेजा हिड़िम्बश्च तथा सखा। स दीर्घकालाध्युषितं पूर्व्ववैरमनुस्मरन् ॥ ४ ॥ विज्ञायैतन्निशायुद्धं जिघांसुर्भीममाहवे। स मत्त इव मातङ्गः संक्रुद्ध इव चोरगः ॥ ५ ॥ दुर्य्योधनमिदं

वाक्यमब्रवीद्युद्धलालसः। विदितं ते महाराज यथा भीमेन राक्षसाः॥ ६॥ हिड़िम्बवककिर्मीरा निहता मम बान्धवाः। परामर्षश्च कन्याया हिड़िम्बायाः कृतः पुरा॥ ७॥ किमन्य-द्राक्षसानन्यानस्मांश्च परिभूय ह। तमहं सगणं राजन् सवाजि-रथकुञ्जरम्॥ ८॥ हैड़िम्बिञ्च सहामात्यं हन्तुमभ्यागतः स्वयम्। अद्य कुन्तीसुतान् सर्वान् वासुदेवपुरोगमान्॥ ९॥ हत्वा सम्भ-क्षयिष्यामि सर्वैरनुचरैः सह। निवारय बलं सर्वं वयं योत्स्याम पाण्डवान्॥ १०॥ तस्य तद्वचनं श्रुत्वा हृष्टो दुर्य्योधनस्तदा। प्रतिगृह्याब्रवीद्वाक्यं भ्रातृभिः परिवारितः॥ ११॥ त्वां पुरस्कृत्य सगणं वयं योत्स्यामहे परान्। न हि वैरान्तमनसः स्थास्यन्ति मम सैनिकाः॥ १२॥ एवमस्त्विति राजानमुक्त्वा राक्षसपुङ्गवः। अभ्ययात्त्वरितो भीमं सहितः पुरुषादकैः॥ १३॥ दीप्यमानेन वपुषा रथेनादित्यवर्च्चसा। तादृशेनैव राजेन्द्रः यादृशेन घटोत्-कचः॥ १४॥ तस्याप्यतुलनिर्घोषो बहुतोरणचित्रितः। ऋक्ष-चर्मावनद्धाङ्गो नल्वमात्रो महारथः॥ १५॥ तस्यापि तुरगाः शीघ्रं हस्तिकायाः खरस्वराः। शतं युक्ता महाकाया मांस-शोणितभोजनाः॥ १६॥ तस्यापि रथनिर्घोषो महामेघरवो-पमः। तस्यापि सुमहच्चापं दृढ़ज्यं बलवत्तरम्॥ १७॥ तस्या-प्यक्षसमा वाणा रुक्मपुङ्खाः शिलाशिताः। सोऽपि वीरो महा-वाहुर्यथैव स घटोत्कचः॥ १८॥ तस्यापि गोमायुबलाभिगुप्तो बभूव केतुर्ज्वलनार्कतुल्यः। स चापि रूपेण घटोत्कचस्य श्रीमत्तमो व्याकुलदीपितास्यः॥ १९॥ दीप्ताङ्गदो दीप्तकिरीटमाली वद्ध-स्रगुष्णीषनिवद्धखड्गः। गदी भुशुण्डी मुषली हली च शरा-सनी वारणतुल्यवर्मा॥ २०॥ रथेन तेनानलवर्च्चसा तदा विद्रा-वयन् पाण्डववाहिनीं ताम्। रराज सङ्ख्ये परिवर्त्तमानो विद्यु-न्माली मेघ इवान्तरीक्षे॥ २१॥ ते चापि सर्वे प्रवरा नरेन्द्रा

महाबला वर्म्मिणश्चर्म्मिणश्च । हर्षान्विता युयुधुस्तत्र राजन् समन्ततः पाण्डवयोधवीराः ॥ २२ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि अलायुधयुद्धे सप्तसप्तत्यधिकशततोऽध्यायः ॥ १७७ ॥

---

सञ्जय उवाच । तमागतमभिप्रेक्ष्य भीमकर्म्माणमाहवे । हर्षमाहारयाञ्चक्रुः कुरवः सर्व एव ते ॥ १ ॥ तथैव तव पुत्रास्ते दुर्य्योधनपुरोगमाः । अप्लवाः प्लवमासाद्य तर्त्तुकामा इवार्णवम् ॥ २ ॥ पुनर्ज्जातमिवात्मानं मन्वानाः पार्थिवास्तदा । अलायुधं राक्षसेन्द्रं स्वागतेनाभ्यपूजयन् ॥ ३ ॥ तस्मिंस्त्वमानुषे युद्धे वर्त्तमाने भयावहे । कर्णराक्षसयोर्नक्तं दारुणप्रतिदर्शनम् ॥ ४ ॥ उपप्रैक्षन्त पाञ्चालाः स्मयमानाः सराजकाः । तथैव तावका राजन् रक्षमाणास्ततस्ततः ॥ ५ ॥ चुक्रुशुर्न्निदमस्तीति द्रोणद्रौणिकृपादयः । तत् कर्म्म दृष्ट्वा सम्भ्रान्ता हैडिम्बस्य रणाजिरे ॥ ६ ॥ सर्वमाविग्नमभवत् हाहाभूतमचेतनम् । तव सैन्यं महाराज निराशं कर्णजीविते ॥ ७ ॥ दुर्य्योधनस्तु सम्प्रेक्ष्य कर्णमार्त्तिं परां गतम् । अलायुधं राक्षसेन्द्रमाहूयेदमथाब्रवीत् ॥ ८ ॥ एष वैकर्त्तनः कर्णो हैडिम्बेन समागतः । कुरुते कर्म्म सुमहद्यदस्यौपयिकं मृधे ॥ ९ ॥ पश्यैतान् पार्थिवान् शूरान् निहतान् भैमसेनिना । नानाशस्त्रैरभिहतान् पादपानिव दन्तिना ॥ १० ॥ तवैष भागः समरे राजमध्ये मया कृतः । तवैवानुमते वीर तं विक्रम्य निवर्हय ॥ ११ ॥ पुरा वैकर्त्तनं कर्णमेष पापो घटोत्कचः । मायाबलमुपाश्रित्य मारयत्यरिकर्षण ॥ १२ ॥ एवमुक्तः स राज्ञा तु राक्षसस्तीव्रविक्रमः । तथेत्युक्त्वा महाबाहुर्घटोत्कचमुपाद्रवत् ॥ १३ ॥ ततः कर्णं समुत्सृज्य भैमसेनिरपि प्रभो । प्रत्यमित्रमुपायान्तं मर्द्दयामास मार्गणैः ॥ १४ ॥ ततः

समभवद्युद्धं क्रुद्धयोराक्षसेन्द्रयोः । मत्तयोर्वाशिताहेतोर्द्विपयो-
रिव कानने ॥ १५ ॥ राक्षसाद्विप्रमुक्तस्तु कर्णोऽपि रथिनां-
वरः । अभ्ययाद्भीमसेनं रथेनादित्यवर्चसा ॥ १६ ॥ तमायान्त-
मनादृत्य दृष्ट्वा ग्रस्तं घटोत्कचम् । अलायुधेन समरे सिंहेनेव
गवाम्पतिम् ॥ १७ ॥ रथेनादित्यवपुषा भीमः प्रहरताम्वरः ।
किरन् शरौघान् प्रययावलायुधरथं प्रति ॥ १८ ॥ तमायान्त-
मभिप्रेक्ष्य स तदालायुधः प्रभो । घटोत्कचं समुत्सृज्य भीमसेनं
ततोऽभ्ययात् ॥ १९ ॥ तं भीमः सहसाभ्येत्य राक्षसान्तकरः प्रभो ।
सगणं राक्षसेन्द्रं तं शरवर्षैरवाकिरत् ॥ २० ॥ तथैवालायुधो
राजंश्छित्त्वा धौतैरजिह्मगैः । अभ्यवर्षत कौन्तेयं पुनः पुन-
रिन्दिम ॥ २१ ॥ तथा ते राक्षसाः सर्वे भीमसेनमुपाद्रवन् ।
नानाप्रहरणा भीमास्त्वत्सुतानां जयैषिणः ॥ २२ ॥ स
ताड्यमानो बहुभिर्भीमसेनो महाबलः । पञ्चभिः पञ्चभिः सर्वां-
स्तानविध्यच्छितैः शरैः ॥ २३ ॥ ते युध्यमाना भीमेन राक्षसाः
क्रूरबुद्धयः । विनेदुश्च महानादान् दुद्रुवुश्च दिशो दश ॥ २४ ॥
तांस्त्रास्यमानान् भीमेन दृष्ट्वा रक्षो महाबलम् । अभिदुद्राव
वेगेन शरैश्चैनमवाकिरत् ॥ २५ ॥ तं भीमसेनः समरे तीक्ष्णाग्रै-
रक्षिणोच्छरैः । अलायुधस्ततस्तांस्तान् भीमेन विशिखान्रणे ॥२६॥
चिच्छेद कांश्चित् समरे त्वरया कांश्चिदग्रहीत् । स तं दृष्ट्वा
राक्षसेन्द्रं भीमो भीमपराक्रमः ॥ २७ ॥ गदाञ्चिक्षेप वेगेन वज्र-
पातोपमां तदा । तामापतन्तीं वेगेन गदां ज्वालाकुलां ततः
॥ २८ ॥ गदया ताड़यामास सा गदाभीममाद्रवत् । स राक्ष-
सेन्द्रं कौन्तेयः शरवर्षैरवाकिरत् ॥ २९ ॥ तानप्यस्याकरोन्मोघा-
न्राक्षसो निशितैः शरैः । ते चापि राक्षसाः सर्वे सैनिका भीम-
रूपिणः ॥ ३० ॥ शासनाद्राक्षसेन्द्रस्य निजघ्नुरथ कुञ्जरान् ।
पाञ्चालाः सृञ्जयाश्चैव वाजिनः परमद्विपाः ॥ ३१ ॥ न शान्तिं

लेभिरे तत्र राक्षसैः प्रपीड़िताः। तं दृष्ट्वा तु महाघोरं वर्त्तमानं महाहवम् ॥ ४२॥ अब्रवीत् पुरुषश्रेष्ठो धनञ्जयमिदं वचः। पश्य भीमं महाबाहुं राक्षसेन्द्रवशङ्गतम् ॥ ४३ ॥ पदमस्यानुगच्छ त्वं मा विचारय पाण्डव। धृष्टद्युम्नः शिखण्डी च युधामन्यूत्तमौजसौ ॥ ४४ ॥ सहितौ द्रौपदेयाश्च कर्णं यान्तु महारथाः। नकुलः सहदेवश्च युयुधानश्च वीर्य्यवान् ॥ ४५ ॥ इतरान्राक्षसान् घ्नन्तु शासनात्तव पाण्डव। त्वमपीमां महाबाहो चमूं द्रोणपुरस्कृताम् ॥ ४६ ॥ वारयस्व महाबाहो महद्धि भयमागतम्। एवमुक्ते तु कृष्णेन यथोद्दिष्टा रथोत्तमाः ॥ ४७ ॥ जग्मुर्वैकर्त्तनं कर्णं राक्षसांश्चेतरान्रणे। अथ पूर्णायतोत्सृष्टैः शरैराशीविषोपमैः ॥ ४८ ॥ धनुश्चिच्छेद भीमस्य राक्षसेन्द्रः प्रतापवान्। हयांश्चैव शितैर्बाणैः सारथिञ्च महाबलः ॥ ४९ ॥ जघान मिषतः सङ्ख्ये भीमसेनस्य भारत। सोऽवतीर्य्य रथोपस्थाद्धताश्वो हतसारथिः ॥ ५० ॥ तस्मै गुर्वीं गदां घोरां स विनद्योत्ससर्ज्ज ह। ततस्तां भीमनिर्घोषामापतन्तीं महागदाम् ॥५१॥ गदया राक्षसो घोरो निजघान ननाद च। तद्दृष्ट्वा राक्षसेन्द्रस्य घोरं कर्म भयावहम् ॥ ५२ ॥ भीमसेनः प्रहृष्टात्मा गदामुग्रां परामृशत्। तयोः समभवद्युद्धं तुमुलं नररक्षसोः ॥ ५३ ॥ गदानिपातसंह्रादैर्भुवं कम्पयतो भृशम्। गदाविमुक्तौ तौ भूयः समासाद्येतरेतरम् ॥ ५४ ॥ मुष्टिभिर्वज्रसंह्रादैरन्योऽन्यमभिजघ्नतुः। रथचक्रैर्युगैरक्षैरधिष्ठानैरुपस्करैः ॥ ५५ ॥ यथासन्नमुपादाय तौ जघ्नतुरमर्षणौ। तौ विक्षरन्तौ रुधिरं समासाद्येतरेतरम् ॥५६॥ मत्ताविव महानागौ चकृषाते परस्परम्। तदपश्यद्धृषीकेशः पाण्डवानां हिते रतः। स भीमसेनरक्षार्थं हैड़िम्बिं प्रत्यचोदयत् ॥५७॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि अलायुधयुद्धे अष्टसप्तत्यधिकशततोऽध्यायः ॥ १७८ ॥

सञ्जय उवाच । सन्दृश्य भीमं समरे रक्षसा ग्रस्तमन्तिकात् । वासुदेवोऽब्रवीद्वाक्यं घटोत्कचमिदं ततः ॥ १ ॥ पश्य भीमं महाबाहो रक्षसा ग्रस्तमाहवे । पश्यतां सर्वसैन्यानां तव चैव महाद्युते ॥ २ ॥ स कर्णं त्वं समुत्सृज्य राक्षसेन्द्रमलायुधम् । जहि क्षिप्रं महाबाहो पश्चात् कर्णं वधिष्यसि ॥ ३ ॥ स वार्ष्णेयवचः श्रुत्वा कर्णमुत्सृज्य वीर्य्यवान् । युयुधे राक्षसेन्द्रेण बकभ्राता घटोत्कचः ॥ ४ ॥ तयोस्तु तुमुलं युद्धं बभूव निशि रक्षसोः । अलायुधस्य चैवोग्रं हैड़िम्बस्य च भारत ॥ ५ ॥ अलायुधस्य योधांस्तु राक्षसान् घोरदर्शनान् । वेगेनापततः शूरान् प्रगृहीतशरासनान् ॥ ६ ॥ आत्तायुधः सुसंक्रुद्धो युयुधानो महारथः । नकुलः सहदेवश्च विभिदुर्निशितैः शरैः ॥ ७ ॥ सर्वांश्च समरे राजन् किरीटी क्षत्रियर्षभान् । परिचिक्षेप बीभत्सुः सर्वतः प्रक्षिपन् शरान् ॥ ८ ॥ कर्णश्च समरे राजन् व्यद्रावयत पार्थिवान् । धृष्टद्युम्नशिखण्ड्यादीन् पाञ्चालानां महारथान् ॥९॥ तान् वध्यमानान् दृष्ट्वा तु भीमो भीमपराक्रमः । अभ्ययात्त्वरितः कर्णं विशिखान् विकिरन्रणे ॥ १० ॥ ततस्तेऽप्याययुर्हत्वा राक्षसान् यत्र सूतजः । नकुलः सहदेवश्च सात्यकिश्च महारथः ॥ ११ ॥ ते कर्णं योधयामासुः पाञ्चाला द्रोणमेव तु । अलायुधस्तु संक्रुद्धो घटोत्कचमरिन्दमम् ॥ १२ ॥ परिघेनातिकायेन ताड़यामास मूर्द्धनि । स तु तेन प्रहारेण भैमसेनिर्महाबलः ॥ १३ ॥ ईषन्मूर्च्छान्वितात्मानं स्तम्भयामास वीर्य्यवान् । ततो दीप्ताग्निसङ्काशां शतघण्टामलङ्कृताम् ॥ १४ ॥ चिक्षेप समरे तस्मै गदां काञ्चनभूषणाम् । सा हयान् सारथिञ्चास्य रथञ्चास्य महास्वनम् ॥ १५ ॥ चूर्णयामास वेगेन निसृष्टा भीमकर्मणा । स भग्नहयचक्राक्षाद्विशीर्णध्वजकूवरात् ॥ १६ ॥ उत्पपात रथात्तर्णं मायामास्थाय राक्षसीम् । स समास्थाय मायान्तु ववर्ष

रुधिरं बहु ॥ १७ ॥ विद्युद्विभ्राजितञ्चासीत्तिमिराभ्राकुलं नभः। ततो वज्रनिपाताश्च साशनिस्तनयित्नवः ॥ १८ ॥ महांश्चटचटाशब्दस्तत्रासीद्धि महाहवे। तां प्रेक्ष्य विहितां मायां राक्षसो राक्षसेन तु ॥ १९ ॥ ऊर्द्ध्वमुत्पत्य हैड़िम्बिस्तां मायां मायया-वधीत्। सोऽभिवीक्ष्य हतां मायां मायावी माययैव ह ॥ २० ॥ अश्मवर्षं सुतुमुलं विससर्ज घटोत्कचे। अश्मवर्षं स तद्घोरं शर-वर्षेण वीर्य्यवान् ॥ २१ ॥ दिक्षु विध्वंसयामास तदद्भुतमिवा-भवत्। ततो नानाप्रहरणैरन्योऽन्यमभिवर्षताम् ॥ २२ ॥ आयसैः परिघैः शूलैर्गदामुषलमुद्गरैः। पिनाकैः करवालैश्च तोमरप्रास-कम्पनैः ॥ २३ ॥ नाराचैर्निशितैर्भल्लैः शरैश्चक्रैः परश्वधैः। अयो-गुड़ैर्भिन्दिपालैर्गोशीर्षोलूखलैरपि ॥ २४ ॥ उत्पाट्य च महा-शाखैर्विविधैर्जगतीरुहैः। शमीपीलुकरीरैश्च चम्पकैश्चैव भारत ॥२५॥ इङ्गुदीवदरीभिश्च कोविदारैश्च पुष्पितैः। पलाशैररिमेदैश्च प्लक्षन्यग्रोधपिप्पलैः ॥ २६ ॥ महद्भिः संयुगे तस्मिन्नन्योऽन्यमभि-जघ्नतुः। विविधैः पर्वताग्रैश्च नानाधातुभिराचितैः ॥ २७ ॥ तेषां शब्दो महानासीद्वज्राणां भिद्यतामिव। युद्धं तत्राभवद्घोरं भैम्यलायुधयोर्नृप ॥ २८ ॥ हरीन्द्रयोर्यथा राजन् वालिसुग्री-वयोः पुरा। तौ युद्ध्वे विविधैर्घोरैरायुधैर्विशिखैस्तथा ॥ २९ ॥ प्रगृह्य निशितौ खड्गावन्योऽन्यमभिजघ्नतुः। तावन्योऽन्यमभि-द्रुत्य केशेषु सुमहाबलौ ॥ ३० ॥ प्रभिन्नागात्रौ प्रस्वेदं सुस्रुवाते जनाधिप। रुधिरञ्च महाकायावभिवृष्टाविवाम्बुदौ ॥ ३१ ॥ अथाभिपत्य वेगेन समुद्भ्राम्य च राक्षसम्। बलेनाक्षिप्य हैड़िम्बिश्चकर्त्तास्य शिरो महत् ॥ ३२ ॥ सोऽपहृत्य शिरस्तस्य कुण्ड-लाभ्यां विभूषितम्। ततः सुतुमुलं नादं ननाद सुमहाबलः ॥ ३३ ॥ हतं दृष्ट्वा महाकायं वकज्ञातिमरिन्दमम्। पाञ्चालाः पाण्डवा-श्चैव सिंहनादान् विनेदिरे ॥ ३४ ॥ ततो भेरीसहस्राणां शङ्खा-

नामयुतानि च। अवादयन् पाण्डवेयास्तस्मिन्रक्षसि पातिते ॥३४॥ अतीव सा निशा तेषां बभूव विजयावहा। विद्योतमाना विबभौ समन्ताद्दीपमालिनी ॥ ३५ ॥ अलायुधस्य तु शिरो भैमसेनिर्महाबलः। दुर्य्योधनस्य प्रमुखे चिक्षेप गतचेतसः ॥ ३६ ॥ अथ दुर्य्योधनो दृष्ट्वा हतं वीरमलायुधम्। बभूव परमोद्विग्नः सह सैन्येन भारत ॥ ३७ ॥ तेनह्यस्य प्रतिज्ञातं भीमसेनमहं युधि। हन्तेति स्वयमागम्य स्मरता वैरमुत्तमम् ॥ ३८ ॥ ध्रुवं स तेन हन्तव्य इत्यमन्यत पार्थिवः। जीवितञ्चिरकालाय भ्रातृणामित्यमन्यत ॥ ३९ ॥ स तं दृष्ट्वा विनिहतं भीमसेनात्मजेन वै। प्रतिज्ञां भीमसेनस्य पूर्णामेवाभ्यमन्यत ॥ ४० ॥

इति द्रोणपर्वणि घटोत्कचवधपर्वणि अलायुधयुद्धे
एकोनाशीत्यधिकशततोऽध्यायः ॥ १७९ ॥

---

सञ्जय उवाच। निहत्यालायुधं रक्षः प्रहृष्टात्मा घटोत्कचः। ननाद विविधान्नादान् वाहिन्याः प्रमुखे स्थितः ॥ १ ॥ तस्य तं तुमुलं शब्दं श्रुत्वा कुञ्जरकम्पनम्। तावकानां महाराज भयमासीत् सुदारुणम् ॥ २ ॥ अलायुधनिषक्तन्तु भैमसेनिं महाबलम्। दृष्ट्वा कर्णो महाबाहुः पाञ्चालान् समुपाद्रवत् ॥ ३ ॥ दशभिर्द्दशभिर्बाणैर्धृष्टद्युम्नशिखण्डिनौ। दृढैः पूर्णायतोत्सृष्टैर्विभेद नतपर्वभि ॥ ४ ॥ ततः परमनाराचैर्युधामन्यूत्तमौजसौ। सात्यकिञ्च रथोदारं कम्पयामास मार्गणैः ॥ ५ ॥ तेषामप्यस्यतां सङ्ख्ये सर्वेषां सव्यदक्षिणम्। मण्डलान्येव चापानि व्यदृश्यन्त जनाधिप ॥ ६ ॥ तेषां ज्यातलनिर्घोषो रथनेमिस्वनश्च ह। मेघानामिव घर्मान्ते बभूव तुमुलो निशि ॥ ७ ॥ ज्यानेमिघोषस्तनयित्नु मांश्च धनुस्तडिन्मण्डलकेतुशृङ्गः। शरौघवर्षाकुलवृष्टि-

सांश्च संग्राममेघः स बभूव राजन् ॥ ८ ॥ तदद्भुतं शैल इवा-
प्रकम्पो वर्षं महाशैलसमानरूपः । विध्वंसयामास रणे नरेन्द्र
वैकर्त्तनः शत्रुगणावमर्द्दी ॥ ९ ॥ स तोमरैर्वज्रनिपाततुल्यैः शितैः
शरैः काञ्चनचित्रपुङ्खैः । शत्रून् व्यपोहन् समरे महात्मा वैकर्त्तनः
पुत्त्रहितैरतस्ते ॥ १० ॥ संच्छिन्नभिन्नध्वजिनश्च केचित्तीक्ष्णैः
शरैरार्द्दितभिन्नदेहाः । केचिद्विसूता विहयाश्च केचिद्वैकर्त्तनेनाशु
कृता बभूवुः ॥ ११ ॥ अविन्दमानस्त्वथ शर्म शङ्को यौधिष्ठिरं
तद्बलमभ्यपद्यत । तान् प्रेक्ष्य भग्नान् विमुखीकृतांश्च घटोत्कचो
रोषमतीव चक्रे ॥ १२ ॥ आस्थाय तं काञ्चनरत्नचित्रं रथोत्तमं
सिंहवत् संननाद । वैकर्त्तनं कर्णमुपेत्य चापि विव्याध वज्र-
प्रतिमैः पृषत्कैः ॥ १३ ॥ तौ कर्णिनाराचशिलीमुखैश्च नालीक-
दण्डाशनिवत्सदन्तैः । वराहकर्णैः सविषाणशृङ्गैः क्षुरप्रसङ्घैश्च
ववर्षतुः खम् ॥ १४ ॥ तद्बाणवर्षावृतमन्तरीक्षं तिर्य्यग्गताभिः
समरे रराज । सुवर्णपुङ्खज्वलितप्रभाभिर्विचित्रपुष्पाभिरिव
स्रजोभिः ॥ १५ ॥ समं हि तावप्रतिमप्रभावावन्योऽन्यमाजघ्नतु-
रुत्तमास्त्रैः । तयोर्हि वीरोत्तमयोर्न कश्चिद्ददर्श तस्मिन् समरे
विशेषम् ॥ १६ ॥ अतीव तं चित्रमतुल्यरूपं बभूव युद्धं रवि-
भीमसून्वोः । समाकुलं शस्त्रनिपातघोरं दिवीव राह्वंशुमतोः
प्रदीप्तम् ॥ १७ ॥

सञ्जय उवाच । घटोत्कचो यदा कर्णं न विशेषयते नृप ।
ततः प्रादुश्चकारोग्रमस्त्रमस्त्रविदाम्वरः ॥ १८ ॥ तेनास्त्रेण हयान्
पूर्वं निहत्य तस्य राक्षसः । सारथिञ्चैव हैड़िम्बः क्षिप्रमन्तर-
धीयत ॥ १९ ॥

धृतराष्ट्र उवाच । तथा त्वन्तर्हिते तस्मिन् कूटयोधिनि
राक्षसे । यन्मामकैः प्रतिपन्नं तन्ममाचक्ष्व सञ्जय ॥ २० ॥

सञ्जय उवाच । अन्तर्हितं राक्षसं तं विदित्वा सम्प्राक्रोशन्

कुरवः सर्व एव। कथं नायं राक्षसः कूटयोधी हन्यात् कर्णं समरे पश्यमानः॥ २१॥ ततः कर्णो लघुचित्रास्त्रयोधी सर्वा दिशो व्यावृणोद्बाणजालैः। न वै किञ्चिद्व्यपश्येत भूतं तमोभूते सायकैरन्तरीक्षे॥ २२॥ न चाददानो न च सन्दधानो न चेषुधी स्पृश्यमानः कराग्रैः। अदृश्यद्वै लाघवात् सूतपुत्रः सर्वं बाणै-श्छादयानोऽन्तरीक्षम्॥ २३॥ ततो मायां विहितामन्तरीक्षे घोरां भीमां राक्षसीं दारुणेन। तां पश्यामो लोहिताभ्रप्रकाशां देदीप्यन्तीमग्निशिखामिवोग्राम॥ २४॥ ततस्ततो विद्युतः प्रादुरासन्नुल्काश्चापि ज्वलिताः कौरवेन्द्र। घोषश्चासीत् प्रादु-रासीत् सुघोरः सहस्रशो नदतां दुन्दुभीनाम्॥ २५॥ ततः शराः प्रापतन् रुक्मपुङ्खाः शक्तयः प्रासा मुसलान्यायुधानि। पर-श्वधास्तैलधौताश्च खड्गाः प्रदीप्ताग्राः पट्टिशास्तोमराश्च॥ २६॥ मयूखिनः परिघा लोहबद्धा गदाश्चित्राः शितधाराश्च शूलाः। गुर्व्यो गदा हेमपट्टावनद्धाः शतघ्न्यश्च प्रादुरासन् समन्तात्॥ २७॥ महाशिलाश्चापतंस्तत्र तत्र सहस्रशः साशनयश्च वज्राः। चक्राणि चानेकशतक्षुराणि प्रादुर्बभूवुर्ज्वलनप्रभाणि॥ २८॥ तां शक्ति-पाशासिपरश्वधानां प्रासर्ष्टिवज्राशनिमुद्गराणाम्। वृष्टिं विशालां ज्वलितां पतन्तीं कर्णः शरौघैर्न शशाक हन्तुम्॥ २९॥ शरा-हतानां पततां हयानां वज्राहतानाञ्च महागजानाम्। शस्त्रा-हतानाञ्च महारथानां महान्निनादः पततां बभूव॥३०॥ सुभीम-नानाविधशस्त्रपातैर्घटोत्कचेनाभिहतं समन्तात्। दौर्य्योधनं तद्बलमार्त्तमासीदावर्त्तमानं ददृशे भ्रमत्तत्॥ ३१॥ हाहाकृतं सम्परिवर्त्तमानं संलीयमानञ्च विषण्णरूपम्। ते चार्य्यभावात् पुरुषप्रवीराः पराङ्मुखा न बभूवुस्तदानीम्॥ ३२॥ तां राक्षसीं घोरतरां सुभीमां वृष्टिं महाशस्त्रमयीं पतन्तीम्। दृष्ट्वा बलौ-घांश्च निपात्यमानान् महद्भयं तव पुत्रान् विवेश॥ ३३॥ शिवाश्च

वैश्वानरदीप्तजिह्वाः सुभीमनादाः शतशो नदन्तीः । रक्षोगणा-न्नर्दतश्चापि वीक्ष्य नरेन्द्रयोधा व्यथिता बभूवुः ॥ ३४ ॥ ते दीप्त-जिह्वाननतीक्ष्णदंष्ट्रा विभीषणाः शैलनिकाशकायाः । नभोगताः शक्तिविषक्तहस्ता मेघा व्यमुञ्चन्निव वृष्टिमुग्राम् ॥ ३५ ॥ तै-राहतास्ते शरशक्तिशूलैर्गदाभिरुग्रैः परिघैश्च दीप्तैः । वज्रैः पिनाकैरशनिप्रहारैश्चक्रैः शतघ्न्या मथिताश्च पेतुः ॥ ३६ ॥ शूलां-श्चभुशुण्डाश्मगुड़ाः शतघ्नः स्थूणाश्च कार्ष्णायसपट्टनद्धाः । अवा-किरंस्तव पुत्रस्य सेनां ततो रौद्रं कश्मलं प्रादुरासीत् ॥ ३७ ॥ विशीर्षास्त्रा निहतैरुत्तमाङ्गैः सम्भग्नाङ्गाः शेरते तत्र शूराः । छिन्ना हयाः कुञ्जराश्चावभग्नाः सञ्चूर्णिताश्चैव रथाः शिलाभिः ॥ ३८ ॥ एवं महच्छरवर्षं सृजन्तस्ते यातुधाना भुवि घोर-रूपाः । मायाः सृष्टास्तत्र घटोत्कचेन नामुञ्चन् वै याचमानं स भीतम् ॥ ३९ ॥ तस्मिन् क्रूरे कुरुवीरावमर्द्दे कालोत्सृष्टे क्षत्रि-याणामभावे । ते वै भग्नाः सहसा व्यद्रवन्त तत्राक्रोशन् कौरवाः सर्व एव ॥ ४० ॥ पलायध्वं कौरवा नैतदस्ति सेन्द्रा देवा घ्नन्ति न पाण्डवार्थे । ततो तेषां मज्जतां भारतानां न स्म द्वीपस्तत्र बभूव कश्चित् ॥ ४१ ॥ तस्मिन् संक्रन्दे तुमुले वर्त्तमाने सैन्ये भग्ने लीयमाने कुरूणाम् । अनीकानां प्रविभागे प्रकाशे न ज्ञायन्ते कुरवो नेतरे वै ॥ ४२ ॥ निर्मर्य्यादे विद्रवे घोररूपे सर्वा दिशः प्रेक्षमाणाश्च शून्याः तां शस्त्रवृष्टिं सहसा गाहमानं कर्णञ्चैकं तत्र राजन्नपश्यन् ॥ ४३ ॥ ततो बाणैराववृणोदन्तरीक्षं दिव्यां मायां योधयन्राक्षसस्य । ह्रीमान् कुर्वन् दुष्करञ्चार्य्यकर्म नैवा-मुह्यत् संयुगे सूतपुत्रः ॥ ४४ ॥ ततो भीताः समुदैक्षन्त कर्णं राजन् सर्वे सैन्धवा बाह्लिकाश्च । असंमोहं पूजयन्तोऽस्य सङ्ग्रे सम्पश्यन्तो वै विजयं राक्षसस्य ॥ ४५ ॥ तेनोत्सृष्टा चक्रयुक्ता शतघ्नी सर्मं सर्वांश्चतुरोऽश्वान् जघान । ते जानुभिर्जगतीमन्व-

पश्यन् गतासवो निर्दृश्यनाचि जिह्वाः ॥ ४६ ॥ ततो हताश्वा-द्वरुह्य यानादन्तर्मनाः कुरुषु प्रद्रवत्सु । दिव्ये चास्त्रे मायया बध्यमाने नैवामुह्यच्चिन्तयन् प्राप्तकालम् ॥ ४७ ॥ ततोऽब्रुवन् कौरवाः सर्व एव कर्णं दृष्ट्वा घोररूपाञ्च मायाम् । शक्त्या रक्षो जहि कर्णाद्य तूर्णं नश्यन्त्येते कुरवो धार्त्तराष्ट्राः ॥ ४८ ॥ करि-ष्यतः किञ्च नो भीमपार्थौ तपन्तमेनं जहि पापं निशीथे । यो नः संग्रामाद्घोररूपाद्विमुच्येत् स पार्थान् योत्स्यते संयुगेषु ॥ ४९ ॥ तस्मादेनं राक्षसं घोररूपं शक्त्या जहि त्वं दत्तया वासवेन । मा कौरवाः सर्वं एवेन्द्रकल्पा रात्रियुद्धे कर्ण नेशुः सयोधाः ॥ ५० ॥ अवध्यमाने राक्षसे वै निशीथे दृष्ट्वा राजंस्त्रासमानं बलञ्च । महत् श्रुत्वा निनदं कौरवाणां मतिं दध्रे शक्तिमोक्षाय कर्णः ॥ ५१ ॥ स वै क्रुद्धः सिंह इवात्यमर्षी नामर्षयन् प्रतिघातं रणेऽसौ । शक्तिं श्रेष्ठां वैजयन्तीमजय्यां समाददे तस्य बधञ्चिकीर्षुः ॥ ५२ ॥ यासौ राजन्निहिता वर्षपूगान् बधायाजौ सत्कृता पाण्डवस्य । यां वै प्रादात् सूतपुत्राय शक्रः शक्तिं श्रेष्ठां कुण्डलाभ्यां निनाय ॥ ५३ ॥ तां वै घोरां लेलिहानां प्रदीप्तां पाशैर्युक्तामन्तकस्यैकजिह्वाम् । मृत्योः स्वसारं ज्वलमानामिवोग्रां वैकर्त्तनः प्राहिणोद्राक्षसाय ॥ ५४ ॥ तामुत्तमां परकायापहन्त्रीं दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम् । भीतं रक्षः सम्प्रदुद्राव राजन् कृत्वात्मानं विन्ध्यपादप्रमाणम् ॥ ५५ ॥ दृष्ट्वा शक्तिं कर्णबाह्वन्तरस्थां नेदुर्भूता-न्यन्तरीक्षे नरेन्द्र । ववुर्वातास्तुमुलाश्चापि राजन् सनिर्घाता चाशनिर्गां जगाम ॥ ५६ ॥ सा तां मायां भस्म कृत्वा ज्वलन्तीं भित्त्वा गाढ़ं हृदयं राक्षसस्य । ऊर्द्ध्वं ययौ दीप्यमाना निशायां नक्षत्राणामन्तराण्या विवेश ॥ ५७ ॥ युद्ध्वा चित्रैर्विविधैः शस्त्र-पूगैर्द्दिव्यैर्वीरैराक्षसैर्मानुषैश्च । नदन्नादान् विविधान् भैरवांश्च प्राणानिष्टांस्त्याजितः शक्र शक्त्या ॥ ५८ ॥ इदञ्चान्यच्चित्रमाश्चर्य-

रूपं चकाराशौ कर्म शत्रुचयाय। तस्मिन् काले शक्तिनिर्भिन्न-मर्मा बभौ राजन् शैलमेघप्रकाशः॥ ५९॥ स तद्रूपं भैरवं भीम-कर्मा भीमं कृत्वा भैमसेनिः पपात। हतोऽप्येवं तव सैन्यैकदेशं व्यपोथयत् स्वेन देहेन राजन्॥ ६०॥ पतद्रक्षः स्वेन कायेन तूर्णमतिप्रमाणेन विवर्द्धता च। प्रियं कुर्व्वन् पाण्डवानां गतासु-रक्षौहिणीं तव तूर्णं जघान॥ ६१॥ ततो मिश्राः प्राणदन् सिंहनादैः शङ्खा भेर्य्यो मुरजाश्चानकाश्च। दग्धां मायां निहतं राक्षसञ्च दृष्ट्वा हृष्टाः प्राणदन् कौरवेयाः॥ ६२॥ ततः कर्णः कुरुभिः पूज्यमानो यथा शक्रो वृत्रवधे मरुद्भिः। अन्वारूढ़स्तव पुत्रस्य यानं हृष्टश्चापि प्राविशत् तत् स्वसैन्यम्॥ ६३॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि घटोत्कचवधे अशीत्यधिकशततोऽध्यायः॥ १८०॥

---

सञ्जय उवाच। हैड़िम्बं निहतं दृष्ट्वा विकीर्णमिव पर्व्वतम्। बभूवुः पाण्डवाः सर्व्वे शोकवाष्पाकुलेक्षणाः॥ १॥ वासुदेवस्तु हर्षेण महताभिपरिप्लुतः। ननाद सिंहनादेन व्यथयन्निव पाण्डवान्॥ २॥ विनद्य च महानादं परिष्वजत पाण्डवम्। स विनद्य महानादमभीषून् सन्नियम्य च॥ ३॥ ननर्त्त हर्ष-सम्वीतो वातोद्धूत इव द्रुमः। ततः परिष्वज्य पुनः पार्थमास्फोट्य चासकृत्॥ ४॥ रथोपस्थगतो धीमान् प्राणदत् पुनरच्युतः। प्रहर्षं तस्य तं ज्ञात्वा केशवस्य धनञ्जयः॥ ५॥ अर्जुनोऽथा-ब्रवीद्राजन्नातिहृष्टमना इव। अति हर्षोऽयमस्थाने तवाद्य मधु-सूदन॥ ६॥ शोकस्थाने परे प्राप्ते हैड़िम्बस्य वधेन तु। विमु-खानि तु सैन्यानि हतं दृष्ट्वा घटोत्कचम्॥ ७॥ वयञ्च भृशमुद्विग्ना हैड़िम्बस्य निपातनात्। नैतत् कारणमल्पं हि भविष्यति जना-

र्द्दन ॥ ८ ॥ तदद्य मम मे पृष्टः सत्यं सत्यवताम्बर । यद्येतन्न रहस्यन्ते वक्तुमर्हस्यरिन्दम ॥ ९ ॥ धैर्य्यस्य वैकृतं ब्रूहि त्वमद्य मधुसूदन । समुद्रस्येव सङ्क्षोभो मेरोरिव विसर्पणम् । तथैतल्लाघवं मन्ये तव कर्म जनार्द्दन ॥ १० ॥

वासुदेव उवाच । अतिहर्षमिमं प्राप्तं शृणु मे त्वं धनञ्जय । अतीव मनसः सद्यः प्रसादकरमुत्तमम् ॥ ११ ॥ शक्तिं घटोत्कचेनेमां व्यंसयित्वा महाद्युते । कर्णं निहतमेवाजौ विद्धि सद्यो धनञ्जय ॥ १२ ॥ शक्तिहस्तं पुनः कर्णं न लोकेऽस्ति पुमानिह । य एनमभितस्तिष्ठेत् कार्त्तिकेयमिवाहवे ॥ १३ ॥ दिष्ट्यापनीतकवचो दिष्ट्यापहृतकुण्डलः । दिष्ट्या विध्वंसिता शक्तिरमोघस्य घटोत्कचे ॥ १४ ॥ यदि हि स्यात् सकवचस्तथैव स्यात् सकुण्डलः । सामरानपि लोकांस्त्रीनेकः कर्णो जयेद्वशी ॥ १५ ॥ वासवो वा कुवेरो वा वरुणो वा जलेश्वरः । यमो वा नोत्सहेत् कर्णं रणे प्रतिसमासितुम् ॥ १६ ॥ गाण्डीवमुद्यम्य भवांश्चक्रञ्चाहं सुदर्शनम् । न शक्तौ स्वो रणे जेतुं तथा युक्तं नरर्षभम् ॥ १७ ॥ त्वद्धितार्थन्तु शक्रेण मायापहृतकुण्डलः । विहीनकवचश्चायं कृतः परपुरञ्जयः ॥ १८ ॥ उत्कृत्य कवचं यस्मात् कुण्डले विमले च ते । प्रादाच्छक्राय कर्णो वै तस्माद्वैकर्त्तनः कृतः ॥ १९ ॥ आशीविष इव क्रुद्धो जृम्भितो मन्त्रतेजसा । तथाद्य भाति कर्णो मे शान्तज्वाल इवानलः ॥ २० ॥ यदाप्रभृति कर्णाय शक्तिर्दत्ता महात्मना । वासवेन महाबाहो प्राप्ता यासौ घटोत्कचम् ॥ २१ ॥ कुण्डलाभ्यां निनायाथ दिव्येन कवचेन च । तां प्राप्यामन्यत वृषः सततं त्वां हतं रणे ॥ २२ ॥ एवङ्गतोऽपि शक्योऽयं हन्तुं नान्येन केनचित् । ऋते त्वां पुरुषव्याघ्र शपे सत्येन चानघ ॥२३॥ ब्रह्मण्यः सत्यवादी च तपस्वी नियतव्रतः । रिपुष्वपि दयावांश्च तस्मात् कर्णो वृषः स्मृतः ॥ २४ ॥ युद्धशौण्डो महाबाहुर्नित्योद्यत-

शरासनः। केशरीव वने नर्द्दन्मत्तान्मातङ्गयूथपान् ॥ २५ ॥ विमर्द्दाव्रथशार्दूलान् कुरुते रणमूर्द्धनि। मध्यङ्गत इवादित्यो यो न शक्य उदीक्षितुम् ॥ २६ ॥ त्वदीयैः पुरुषव्याघ्र योधमुख्यै-र्महात्मभिः। शरजालसहस्रांशुः शरदीव दिवाकरः ॥ २७ ॥ तपान्ते जलदो यद्वत् शरधाराः क्षरन्मुहुः। दिव्यास्त्रजलदः कर्णः पर्ज्जन्य इव वृष्टिमान् ॥ २८ ॥ त्रिदशैरपि चास्यद्भिः शर-वर्षं समन्ततः। अशक्यस्तदयं जेतुं स्रवद्भिर्मांसशोणितम् ॥२९॥ कवचेन विहीनश्च कुण्डलाभ्याञ्च पाण्डव। सोऽद्य मानुषतां प्राप्तो विमुक्तः शक्रदत्तया ॥ ३० ॥ एको हि योगोऽस्य भवेद्वधाय छिद्रे ह्येनं स्वप्रमत्तः प्रमत्तम। कृच्छ्रप्राप्तं रथचक्रे निमग्ने हन्याः पूर्वं त्वन्तु संज्ञां विचार्य्य ॥ ३१ ॥ न सूद्यतास्त्रं युधि हन्यादजय्य-मप्येकवीरो बलजित् सवज्रः। जरासन्धश्चेदिराजो महात्मा महा-बाहुश्चैकलव्यो निषादः ॥ ३२ ॥ एकैकशो निहताः सर्व एते योगैस्तैस्तैस्त्वद्धितार्थं मयैव। अथापरे निहता राक्षसेन्द्रा हिड़िम्ब किर्मीरबकप्रधानाः। अलायुधः परसैन्यावमर्द्दी घटोत्कचश्चोग्र-कर्मावमर्द्दी ॥ ३३ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि कृष्णहर्षे एकाशीत्यधिकशतोऽध्यायः ॥ १८१ ॥

---

अर्जुन उवाच। कथमस्मद्धितार्थं ते कैश्च योगैर्ज्जनार्द्दन। जरासन्धप्रभृतयो घातिताः पृथिवीश्वराः ॥ १ ॥

वासुदेव उवाच। जरासन्धश्चेदिराजो नैषादिश्च महाबलः। यदि स्युर्न हताः पूर्वमिदानीं स्युर्भयङ्कराः ॥ २ ॥ दुर्य्योधन-स्तानवश्यं वृणुयाद्रथसत्तमान्। तेऽस्माभिर्नित्यविद्दिष्टाः संश्रयि-ष्युश्च कौरवान् ॥ ३ ॥ ते हि वीरा महेष्वासाः कृतास्त्राः दृढ़-

योधिनः। धार्त्तराष्ट्रञ्च ते सर्व्वे रचेयुरमरा इव॥ ४॥ सूतपुत्रो जरासन्धश्चेदिराजो निषादजः। सुयोधनं समाश्रित्य जयेयुः पृथिवीमिमाम्॥ ५॥ योगैरपि हतास्तैस्तैस्तन्मे शृणु धनञ्जय। अजय्या हि मृधे योगादृते ते दैवतैरपि॥ ६॥ एकैको हि पृथक् तेषां समस्तां सुरवाहिनीम्। योधयेत् समरे पार्थ लोकपालाभिरक्षिताम्॥ ७॥ जरासन्धोऽतिरुषितो रौहिणेयप्रधर्षितः। अस्मद्वधार्थञ्चिक्षेप गदां वै सर्वघातिनीम्॥ ८॥ सीमन्तमिव कुर्वाणां नभसः पावकप्रभाम्। व्यदृश्यत पतन्ती सा शक्रमुक्ता इवाशनिः॥ ९॥ तामापतन्तीं दृष्ट्वैव गदां रौहिणिनन्दनः। प्रतिघातार्थमस्त्रं वै स्थूणाकर्णमवासृजत्॥ १०॥ अस्त्रवेगप्रतिहता सा गदा प्रापतद्भुवि। दारयन्ती धरां देवीं कम्पयन्तीव पर्वतान्॥ ११॥ तत्र स्म राक्षसी घोरा जरा नाम सुविक्रमा। सन्धयामास तं राजन् सरासन्धमरिन्दमम्॥ १२॥ द्वाभ्यां जातः स मातृभ्यामर्द्धदेहः पृथक् पृथक्। तया स सन्धितो यस्माज्जरासन्धस्ततोऽभवत्॥ १३॥ सा तु भूमिं गता पार्थ हता ससुतबान्धवा। गदया तेन चास्त्रेण स्थूणाकर्णेन राक्षसी॥ १४॥ विनाभूतः स गदया जरासन्धो महामृधे। निहतो भीमसेनेन पश्यतस्ते धनञ्जय॥ १५॥ यदि हि स्याद्गदापाणिर्जरासन्धः प्रतापवान्। सेन्द्रा देवा न तं हन्तुं रणे शक्ता नरोत्तम॥ १६॥ त्वद्धितार्थञ्च नैषादिरङ्गुष्ठेन वियोजितः। द्रोणेनाचार्य्यकं कृत्वा छद्मना सत्यविक्रमः॥ १७॥ स हि बद्धाङ्गुलित्राणो नैषादिर्दृढ़विक्रमः। अतिमानी वनचरो बभौ राम इवापरः॥ १८॥ एकलव्यं हि साङ्गुष्ठमशक्ता देवदानवाः। सराक्षसोरगाः पार्थ विजेतुं युधि कर्हिचित्॥ १९॥ किमु मानुषमात्रेण शक्यः सम्प्रति वीक्षितुम्। दृढ़मुष्टिः कृती नित्यमस्यमानो दिवानिशम्॥ २०॥ त्वद्धितार्थन्तु स मया हतः संग्राममूर्द्धनि। चेदिराजो

हि विक्रान्तः प्रत्यक्षं निहतस्तव ॥ २१ ॥ स चाप्यशक्यः संग्रामे जेतुं सर्वैः सुरासुरैः । बधार्थं तस्य जातोऽहमन्येषाञ्च सुरद्विषाम् ॥ २२ ॥ त्वत्सहायो नरव्याघ्र लोकानां हितकाम्यया । हिड़िम्बवककिर्म्मीरा भीमसेनेन पातिताः ॥ २३ ॥ रावणेन समप्राणा ब्रह्मयज्ञविनाशनः । हतस्तथैव मायावी हैड़िम्बेनाप्यलायुधः ॥ २४ ॥ हैड़िम्बश्चाप्युपायेन शक्त्या कर्णेन पातितः । यदि ह्येनं नाहनिष्यत् कर्णः शक्त्या महामृधे ॥ २५ ॥ मया वध्योऽभविष्यत् स भैमसेनिर्घटोत्कचः । मया न निहतः पूर्व्वमेष युष्मत्प्रियेप्सया ॥ २६ ॥ एष हि ब्राह्मणद्वेषी यज्ञद्वेषी च राक्षसः । यज्ञहन्ता च पापात्मा तस्मादेवं निपातितः ॥ २७ ॥ व्यंसिता चाप्युपायेन शक्रदत्ता मयानघ । ये हि धर्मस्य लोप्तारो वध्यास्ते मम पाण्डव ॥ २८ ॥ धर्म्मसंस्थापनार्थाय प्रतिज्ञैषा मया कृता । ब्रह्म सत्यं दमः शौचं धर्म्मो ह्रीः श्रीर्धृतिः क्षमा ॥ २९ ॥ यत्र यत्र भवेन्नित्यमहं तत्राभवं सदा । अप्रमादस्त्वया कार्य्यः कर्णं वैकर्त्तनं प्रति ॥ ३० ॥ उपदेक्ष्याम्युपायेन येन तं प्रसहिष्यसि । सुयोधनञ्चापि रणे हनिष्यति वृकोदरः ॥ ३१ ॥ तस्य चापि बधोपायं वक्ष्ये च तव पाण्डव । वर्द्धते तुमुलस्त्वेष शब्दः परचमूं प्रति ॥ ३२ ॥ विद्रवन्ति हि सैन्यानि त्वदीयानि दिशो दश । लब्धलक्ष्या हि कौरव्या विधमन्ति चमूं तव । दहत्येव च नः सङ्ख्ये द्रोणः प्रहरतां वरः ॥ ३३ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि कृष्णवाक्ये द्व्यशीत्यधिकशतोऽध्यायः ॥ १८२ ॥

---

धृतराष्ट्र उवाच । एकवीरवधे मोघा शक्तिः सूतात्मजे हि वै । कस्मात् सर्व्वान् समुत्सृज्य स तां पार्थे न मुक्तवान् ॥ १ ॥

तस्मिन् हते हताः शक्त्या सर्वे सञ्जयपाण्डवाः। फाल्गुनस्य वधे कस्माद्युद्धे न जयमादधे ॥ २ ॥ आहूतो न निवर्त्तेयमिति तेन व्रतं कृतम्। स्वयमाह्वयितव्य स सूतपुत्रेण फाल्गुनः ॥ ३ ॥ ततो द्वैरथमानीय फाल्गुन शक्रदत्तया। न जघान वृषः कस्मात्तन्ममाचक्ष्व सञ्जय ॥ ४ ॥ नूनं बुद्धिविहीनश्चाप्यसहायश्च मे सुतः। शत्रुभिर्व्यंसितः पापः स कथं नु जयेदरीन् ॥ ५ ॥ या ह्यस्य परमा शक्तिर्जयस्य च परायणा। सा शक्तिर्वासुदेवेन व्यंसिता च घटोत्कचे ॥ ६ ॥ कुणेर्यथा हस्तगतं ह्रियेत् फलं बलीयसा। तथा शक्तिरमोघा सा मोघीभूता घटोत्कचे ॥ ७ ॥ यथा वराहस्य शुनश्च युद्धे तयोरभावे श्वपचस्य लाभः। मन्ये विद्वन् वासुदेवस्य तद्वद्वधे लाभः कर्णहैडिम्बयोर्वै ॥ ८ ॥ घटोत्कचो यदि हन्याद्धि कर्णं परो लाभः समरे पाण्डवानाम्। वैकर्त्तनो यदि वा तन्निहन्यात्तथा कृत्यं शक्तिनाशात् कृतं स्यात् ॥ ९ ॥ इति प्राज्ञः प्रज्ञयैवं विचार्य्य घटोत्कचं सूतपुत्रेण युद्धे। अघातयद्वासुदेवो नृसिंहः प्रियं कुर्वन् पाण्डवानां हितञ्च ॥ १० ॥

सञ्जय उवाच। एतच्चिकीर्षितं ज्ञात्वा कर्णस्य मधुहा नृप। नियोजयामास तदा द्वैरथे राक्षसेश्वरम् ॥ ११ ॥ घटोत्कचं महावीर्य्यं महाबुद्धिर्जनार्द्दनः। अमोघाया विघातार्थं राजन् दुर्मन्त्रिते तव ॥ १२ ॥ तदैव कृतकार्य्या हि वयं स्याम कुरूद्वह। न रक्षेद्यदि कृष्णस्तं कर्णात् पार्थं महारथम् ॥ १३ ॥ साश्वध्वजरथः सङ्ख्ये धृतराष्ट्रहतो भवेत्। विना जनार्द्दनं पार्थो योगानामीश्वरं प्रभुम् ॥ १४ ॥ तैस्तैरुपायैर्बहुभीरक्ष्यमाणः स पार्थिवः। जयत्यभिमुखाञ्छत्रून् पार्थः कृष्णेन पालितः ॥ १५ ॥ सविशेषात्त्वमोघायाः कृष्णो रक्षति पाण्डवान्। हन्यात् क्षिप्रं हि कौन्तेयं शक्तिर्वृक्षमिवाशनिः ॥ १६ ॥

धृतराष्ट्र उवाच। विरोधी च कुमन्त्री च प्राज्ञमानी ममा-

त्मजः। यस्यैष समतिक्रान्तो बधोपायो जयं प्रति ॥ १७ ॥ स वा कर्णो महाबुद्धिः सर्व्वशस्त्रभृताम्वरः। न मुक्तवान् कथं सूत ताममोघां धनञ्जये ॥ १८ ॥ तवापि समतिक्रान्तमेतद्गावल्गणे कथम्। एनमर्थं महाबुद्धे यत्त्वया नावबोधितः ॥ १९ ॥

सञ्जय उवाच। दुर्य्योधनस्य शकुनेर्मम दुःशासनस्य च। रात्रौ रात्रौ भवत्येषा नित्यमेव समर्थना ॥ २० ॥ त्वं सर्व्वसैन्यमुत्सृज्य जहि कर्ण धनञ्जयम्। प्रेष्यवत् पाण्डुपाञ्चालानुपभोक्ष्यामहे ततः ॥ २१ ॥ अथ वा निहते पार्थे पाण्डुष्वन्यतमं ततः। स्थापयेद्युधि वार्ष्णेयस्तस्मात् कृष्णो निपात्यताम् ॥ २२ ॥ कृष्णो हि मूलं पाण्डूनां पार्थ स्कन्ध इवोद्गतः। शाखा इवेतरे पार्थाः पाञ्चालाः पत्रसंज्ञकाः ॥ २३ ॥ कृष्णाश्रयाः कृष्णबलाः कृष्णनाथाश्च पाण्डवाः। कृष्णः परायणञ्चैषां ज्योतिषामिव चन्द्रमाः ॥ २४ ॥ तस्मात् पर्णानि शाखाश्च स्कन्धञ्चोत्सृज सूतज। कृष्णं हि विद्धि पाण्डूनां मूलं सर्व्वत्र सर्व्वदा ॥ २५ ॥ हन्याद्यदि हि दाशार्हं कर्णो यादवनन्दनम्। कृत्स्ना वसुमती राजन् वशे ते स्यान्न संशयः ॥ २६ ॥ यदि स निहतः शयीत भूमौ यदुकुलपाण्डवनन्दनो महात्मा। ननु तव वसुधा नरेन्द्र सर्व्वा सगिरिसमुद्रवना वशं व्रजेत् ॥ २७ ॥ सा तु बुद्धिः कृताप्येवं जाग्रति त्रिदशेश्वरे। अप्रमेये हृषीकेशे युद्धकाले व्यमुह्यत ॥ २८ ॥ अर्जुनञ्चापि कौन्तेयं सदा रक्षति केशवः। न ह्येनमैच्छत् प्रमुखे सौतेः स्थापयितुं रणे ॥ २९ ॥ अन्यांश्चास्मै रथोदारानुपास्थापयदच्युतः। अमोघां तां कथं शक्तिं मोघां कुर्य्यामिति प्रभो ॥ ३० ॥ यश्चैवं रक्षते पार्थं कर्णात् कृष्णो महामनाः। आत्मानं स कथं राजन्न रक्षेत् पुरुषोत्तमः ॥ ३१ ॥ परिचिन्त्य तु पश्यामि चक्रायुधमरिन्दमम्। न सोऽस्ति त्रिषु लोकेषु यो जयेत जनार्द्दनम् ॥ ३२ ॥

सञ्जय उवाच। ततः कृष्णं महाबाहुं सात्यकिः सत्यविक्रमः।

पप्रच्छ रथशार्दूलः कर्णं प्रति महारथम् ॥ ३३ ॥ अयञ्च प्रत्ययः कर्ण शक्तिश्चामितविक्रमा। किमर्थं सूतपुत्रेण न मुक्ता फाल्गुने तदा ॥ ३४ ॥

वासुदेव उवाच। दुःशासनश्च कर्णश्च शकुनिश्च ससैन्धवः। सततं मन्त्रयन्ति स्म दुर्य्योधनपुरोगमाः ॥ ३५ ॥ कर्ण कर्ण महेष्वास रणेऽमितपराक्रम। नान्यस्य शक्तिरेषा ते मोक्तव्या जयताम्वर ॥ ३६ ॥ ऋते महारथात् पार्थात् कुन्तीपुत्राद्धनञ्जयात्। स हि तेषामतियशा देवानामिव वासवः ॥ ३७ ॥ तस्मिन् विनिहते सर्वे पाण्डवाः सृञ्जयैः सह। भविष्यन्ति हतात्मानः सुरा इव निरग्नयः ॥ ३८ ॥ तथेति च प्रतिज्ञाते कर्णेन शिनिपुङ्गवः। हृदि नित्यन्तु कर्णस्य वधो गाण्डीवधन्वनः ॥ ३९ ॥ अहमेव तु राधेयं मोहयामि युधाम्वर। ततो नावासृजच्छक्तिं पाण्डवे श्वेतवाहने ॥ ४० ॥ फाल्गुनस्य हि तं मृत्युमनिवार्य्यं युयुत्सतः। न निद्रा न च मे हर्षो मनसोऽस्ति युधाम्वर ॥ ४१ ॥ घटोत्कचे व्यंसितां तु दृष्ट्वा तां शिनिपुङ्गव। मृत्योरास्यान्तरान्मुक्तं पश्याम्यद्य धनञ्जयम् ॥ ४२ ॥ न पिता न च मे माता न यूयं भ्रातरस्तथा। न च प्राणास्तथा रक्ष्या यथा वीभत्सुराहवे ॥ ४३ ॥ त्रैलोक्यराज्याद्यत्किञ्चिद्भवेदन्यत् सुदुर्लभम्। नेच्छेयं सात्वताहं तद्विना पार्थं धनञ्जयम् ॥ ४४ ॥ अतः प्रहर्षः सुमहान् युयुधानाद्य मेऽभवत्। मृतं प्रत्यागतमिव दृष्ट्वा पार्थं धनञ्जयम् ॥ ४५ ॥ अतश्च प्रहितो युद्धे मया कर्णाय राक्षसः। न ह्यन्यः समरे रात्रौ शक्तः कर्णं प्रबाधितुम् ॥ ४६ ॥

सञ्जय उवाच। इति सात्यकये प्राह तदा देवकिनन्दनः। धनञ्जयहितं युक्तस्तत्प्रिये सततं रतः ॥ ४७ ॥

इति द्रोणपर्वणि घटोत्कचवधपर्व्वणि कृष्णवाक्ये त्र्यशीत्यधिकशततोऽध्यायः ॥ १८३ ॥

धृतराष्ट्र उवाच। कर्णदुर्य्योधनादीनां शकुनेः सौबलस्य च। अपनीतं महत्तात तव चैव विशेषतः ॥ १ ॥ यदा जानीत तां शक्तिमेकघ्नीं सततं रणे। अनिवार्य्यामसह्याञ्च देवैरपि सवासवैः ॥ २ ॥ सा किमर्थं कर्णेन प्रवृत्ते समरे पुरा। न देवकीसुते मुक्ता फाल्गुने वापि सञ्जय ॥ ३ ॥

सञ्जय उवाच। संग्रामाद्विनिवृत्तानां सर्व्वेषां नो विशाम्पते। रात्रौ कुरुकुलश्रेष्ठ मन्त्रो नः समजायत ॥ ४ ॥ प्रभातकाले श्वोभूते केशवायार्ज्जुनाय वा। शक्तिरेषा विमोक्तव्या कर्ण कर्णेति नित्यशः ॥ ५ ॥ ततः प्रभातसमये राजन् कर्णस्य दैवतैः। अन्येषाञ्चैव योधानां सा बुद्धिर्नाश्यते पुनः ॥ ६ ॥ दैवमेव परं मन्ये यत् कर्णो हस्तसंस्थया। न जघान रणे पार्थं कृष्णं वा देवकीसुतम् ॥ ७ ॥ तस्य हस्तस्थिता शक्तिः कालरात्रिरिवोद्यता। दैवोपहतबुद्धित्वान्न तां कर्णो विमुक्तवान् ॥ ८ ॥ कृष्णे वा देवकीपुत्रे मोहितो देवमायया। पार्थे वा शक्रकल्पे वै वधार्थं वासवीं विभो ॥ ९ ॥

धृतराष्ट्र उवाच। दैवेनैव हता यूयं स्वबुद्ध्या केशवेन च। गता हि वासवी हत्वा तृणभूतं घटोत्कचम् ॥ १० ॥ कर्णश्च मम पुत्राश्च सर्व्वे चान्ये च पार्थिवाः। अनेन दुष्प्रणीतेन गता वैवस्वतक्षयम् ॥ ११ ॥ भूय एव च मे शंस यथा युद्धमवर्त्तत। कुरूणां पाण्डवानाञ्च हैड़िम्बे निहते तदा ॥ १२ ॥ ये च तेऽभ्यद्रवन् द्रोणं व्यूढ़ानीकाः प्रहारिणः। सृञ्जयाः सह पाञ्चालैस्तेऽप्यकुर्व्वन् कथं रणम् ॥ १३ ॥ सौमदत्तेर्व्वधाद्द्रोणमायान्तं सैन्धवस्य च। अमर्षाज्जीवितं त्यक्त्वा गाहमानं वरूथिनीम् ॥ १४ ॥ जृम्भमाणमिव व्याघ्रं व्यात्ताननमिवान्तकम्। कथं प्रत्युद्ययुर्द्रोणमस्यन्तं पाण्डुसृञ्जयाः ॥ १५ ॥ आचार्य्यं ये च तेऽरक्षन् दुर्य्योधनपुरोगमाः। द्रौणिकर्णकृपास्तात ते वाकुर्व्वन् किमाहवे ॥ १६ ॥

भारद्वाजं जिघांसन्तौ धनञ्जयवृकोदरौ । समार्च्छन्मामका युद्धे कथं सञ्जय शंस मे ॥ १७ ॥ सिन्धुराजवधेनेमे घटोत्कचवधेन ते । अमर्षिताः सुसंरब्धा रणञ्चक्रुः कथं निशि ॥ १८ ॥

सञ्जय उवाच । हते घटोत्कचे राजन् कर्णेन निशि राक्षसे । प्रणदत्सु च हृष्टेषु तावकेषु युयुत्सुषु ॥ १९ ॥ आपतत्सु च वेगेन वध्यमाने बलेऽपि च । विगाढ़ायां रजन्याञ्च राजा दैन्यं परङ्गतः ॥ २० ॥ अब्रवीच्च महाबाहुर्भीमसेनं परन्तप । आवारय महाबाहो धार्त्तराष्ट्रस्य वाहिनीम् ॥ २१ ॥ हैड़िम्बस्य च घातेन मोहो मामाविशन्महान् । एवं भीमं समादिश्य स्वरथे समुपाविशत् ॥ २२ ॥ अश्रुपूर्णमुखो राजा निश्वसंश्च पुनः पुनः । कश्मलं प्राविशद्घोरं दृष्ट्वा कर्णस्य विक्रमम् ॥ २३ ॥ तं तथा व्यथितं दृष्ट्वा कृष्णो वचनमब्रवीत् । मा व्यथां कुरु कौन्तेय नैतत्त्वय्युपपद्यते ॥ २४ ॥ वैक्लव्यं भरतश्रेष्ठ यथा प्राकृतपूरुषे । उत्तिष्ठ राजन् युध्यस्व वह गुर्वीं धुरं विभो ॥ २५ ॥ त्वयि वैक्लव्यमापन्ने संशयो विजये भवेत् । श्रुत्वा कृष्णस्य वचनं धर्मपुत्रो युधिष्ठिरः ॥ २६ ॥ विमृज्य नेत्रे पाणिभ्यां कृष्णं वचनमब्रवीत् । विदिता मे महाबाहो धर्माणां परमा गतिः ॥ २७ ॥ ब्रह्महत्याफलं तस्य यः कृतं नावबुध्यते । अस्माकं हि वनस्थानां हैड़िम्बेन महात्मना ॥ २८ ॥ बालेनापि सता तेन कृतं साह्यं जनार्द्दन । अस्त्रहेतोर्गतं ज्ञात्वा पाण्डवं श्वेतवाहनम् ॥ २९ ॥ असौ कृष्ण महेष्वासः काम्यके मामुपस्थितः । उषितश्च सहास्माभिर्यावन्नासीद्धनञ्जयः ॥ ३० ॥ गन्धमादनयात्रायां दुर्गेभ्यश्च स्म तारिताः । पाञ्चालीञ्च परिश्रान्तां पृष्ठेनोद्वहनात्मना ॥ ३१ ॥ आरम्भश्चैव युद्धानां यदेष कृतवान् प्रभो । मदर्थं दुष्कृतं कर्म कृतं तेन महात्मना ॥ ३२ ॥ स्वभावाद्या च मे प्रीतिः सहदेवे जनार्द्दन । सैव मे द्विगुणा प्रीती राक्षसेन्द्रे घटोत्कचे ॥ ३३ ॥

भक्तश्च मे महाबाहुः प्रियोऽस्याहं प्रियश्च मे। तेन विन्दामि वार्ष्णेय कश्मलं शोकतापितः॥ ३४॥ पश्य सैन्यानि वार्ष्णेय द्राव्यमाणानि कौरवैः। द्रोणकर्णौ च संयत्तौ पश्य युद्धे महारथौ॥ ३५॥ निशीथे पाण्डवं सैन्यमेतत् पश्य प्रमर्द्दितम्। गजाभ्यामिव मत्ताभ्यां यथा नववनं महत्॥ ३६॥ अनादृत्य बलं बाह्वोर्भीमसेनस्य माधव। चित्रास्त्रताञ्च पार्थस्य विक्रमन्ति स्म कौरवाः॥ ३७॥ एष द्रोणश्च कर्णश्च राजा चैव सुयोधनः। निहत्य राक्षसं युद्धे हृष्टा नन्दन्ति संयुगे॥ ३८॥ कथमस्मासु जीवत्सु त्वयि चैव जनार्द्दन। हैड़िम्बः प्राप्तवान् मृत्युं सूतपुत्रेण सङ्गतः॥ ३९॥ कदर्थीकृत्य नः सर्व्वान् पश्यतः सव्यसाचिन। निहतो राक्षसः कृष्ण भैमसेनिर्महाबलः॥ ४०॥ यदाभिमन्युर्निहतो धार्त्तराष्ट्रैर्दुरात्मभिः। नासीत्तत्र रणे कृष्ण सव्यसाची महारथः॥ ४१॥ निरुद्धाश्च वयं सर्व्वे सैन्धवेन महात्मना। निमित्तमभवद्द्रोणः सपुत्रस्तत्र कर्म्मणि॥ ४२॥ उपदिष्टो बधोपायः कर्णस्य गुरुणा स्वयम्। व्यायच्छतश्च खड़्गेन द्विधा खड़्गञ्चकार ह॥ ४३॥ व्यसने वर्त्तमानस्य कृतवर्म्मा नृशंसवत्। अश्वान् जघान सहसा तथोभौ पार्ष्णिसारथी॥ ४४॥ तथेतरे महेष्वासाः सौभद्रं युद्यपातयन्। अल्पे च कारणे कृष्ण हतो गाण्डीवधन्वना॥ ४५॥ सैन्धवो यादवश्रेष्ठ तत्तु नातिप्रियं मम। यदि शत्रुबधो न्याय्यो भवेत् कर्त्तुञ्च पाण्डवैः॥ ४६॥ द्रोणकर्णौ रणे पूर्व्वं हन्तव्याविति मे मतिः। एतौ मूलं हि दुःखानामस्माकं पुरुषर्षभ॥ ४७॥ एतौ रणे समासाद्य समाश्वस्तः सुयोधनः। यत्र वध्यो भवेद्द्रोणः सूतपुत्रश्च सानुगः॥४८॥ तत्रावधीन्महाबाहुः सैन्धवं दूरवासिनम्। अवश्यन्तु मया कार्य्यः सूतपुत्रस्य निग्रहः॥ ४९॥ ततो यास्याम्यहं वीर सूतपुत्रजिघांसया। भीमसेनो महाबाहुर्द्रोणानीकेन सङ्गतः॥ ५०॥

एवमुक्त्वा ययौ कर्णं त्वरमाणो युधिष्ठिरः। स विस्फार्य्य महच्चापं शङ्खं प्रध्माप्य भैरवम् ॥ ५१ ॥ ततो रथसहस्राणां गजानाञ्च शतैस्त्रिभिः। वाजिभिः पञ्चसाहस्रैः पाञ्चालैः प्रभद्रकैः ॥ ५२ ॥ वृतः शिखण्डी त्वरितो राजानं पृष्ठतोऽन्वयात्। ततो भेरीः समाजघ्नुः शङ्खान् दध्मुश्च दंशिताः ॥ ५३ ॥ पाञ्चालाः पाण्डवाश्चैव युधिष्ठिरपुरोगमाः। ततोऽब्रवीन्महाबाहुर्वासुदेवो धनञ्जयम् ॥५४॥ एष प्रयाति त्वरितः क्रोधाविष्टो युधिष्ठिरः। जिघांसुः सूतपुत्रस्य तेऽस्यापेक्षा न युज्यते ॥ ५५ ॥ एवमुक्त्वा हृषीकेशः शीघ्रमश्वानचोदयत्। दूरञ्च यातं राजानमन्वगच्छज्जनार्दनः ॥ ५६ ॥ तं दृष्ट्वा सहसायान्तं सूतपुत्रजिघांसया। शोकोपहतसङ्कल्पं दह्यमानमिवाग्निना। अभिगम्याब्रवीद्व्यासो धर्मपुत्रं युधिष्ठिरम् ॥ ५७ ॥

व्यास उवाच। कर्णमासाद्य संग्रामे दिष्ट्या जीवति फाल्गुनः। सव्यसाचिवधाकाङ्क्षी शक्तिं रक्षितवान् हि सः ॥ ५८ ॥ न चागाद्द्वैरथं जिष्णुर्दिष्ट्या तु भरतर्षभ। सृजेतां स्पर्द्धिनावेतौ दिव्यान्यस्त्राणि सर्वतः ॥ ५९ ॥ वध्यमानेषु चास्त्रेषु पीड़ितः सूतनन्दनः। वासवीं समरे शक्तिं ध्रुवं मुञ्चेद्युधिष्ठिर ॥ ६० ॥ ततो भवेत्ते व्यसनं घोरं भरतसत्तम। दिष्ट्या रक्षो हतं युद्धे सूतपुत्रेण मानद ॥ ६० ॥ वासवीं कारणं कृत्वा कालेनापि हतो ह्यसौ। तवैव कारणाद्रक्षो निहतं तात संयुगे ॥ ६१ ॥ मा क्रुधो भरतश्रेष्ठ मा च शोके मनः कृथाः। प्राणिनामिह सर्वेषामेषा निष्ठा युधिष्ठिर ॥ ६२ ॥ भ्रातृभिः सहितः सर्वैः पार्थिवैश्च महात्मभिः। कौरवान् समरे सर्वानभियुध्यस्व भारत ॥ ६३ ॥ पञ्चमे दिवसे चैव पृथिवी ते भविष्यति। नित्यञ्च पुरुषव्याघ्र धर्ममेव विचिन्तय ॥ ६४ ॥ आनृशंस्यं तपो दानं

क्षमा सत्यञ्च पाण्डव। सेवस्व परमप्रीतो यतो धर्मस्ततो जयः। इत्युक्ता पाण्डवं व्यासस्तत्रैवान्तरधीयत ॥ ६५ ॥

इति द्रोणपर्व्वणि घटोत्कचवधपर्व्वणि व्यासवाक्ये चतुरशीत्यधिकशततोऽध्यायः समाप्तञ्चघटोत्कचवधपर्व्व ॥ १८४ ॥

---

## अथ द्रोणवधपर्व्व ।

सञ्जय उवाच। व्यासेनैवमथोक्तस्तु धर्मराजो युधिष्ठिरः। स्वयं कर्णवधाद्वीरो निवृत्तो भरतर्षभ ॥ १ ॥ घटोत्कचे तु निहते सूतपुत्रेण तां निशाम्। दुःखामर्षवशं प्राप्तो धर्मराजो युधिष्ठिरः ॥ २ ॥ दृष्ट्वा भीमेन महतीं वार्य्यमाणाञ्चमूंस्तव। धृष्टद्युम्न-मुवाचेदं कुम्भयोनिं निवारय ॥ ३ ॥ त्वं हि द्रोणविनाशाय समुत्पन्नो हुताशनात्। शरः कवची खड्गी धन्वी च पर-तापनः ॥ ४ ॥ अभिद्रव रणे हृष्टो न च ते भीः कथञ्चन। जन-मेजय शिखण्डी च दौर्मुखिश्च यशोधरः ॥ ५ ॥ अभिद्रवन्तु संक्रुद्धाः कुम्भयोनिं समन्ततः। नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः ॥ ६ ॥ द्रुपदश्च विराटश्च पुत्रभ्रातृसमन्वितौ। सात्यकिः कैकयाश्चैव पाण्डवाश्च धनञ्जयः ॥ ७ ॥ अभिद्रवन्तु वेगेन भार-द्वाजं जिघांसवः। तथैव रथिनः सर्व्वे हस्त्यश्वं यच्च किञ्चन ॥ ८ ॥ पादाताश्च रणे द्रोणं पातयन्तु महारथम्। तथाज्ञप्तास्तु ते सर्व्वे पाण्डवेन महात्मना ॥ ९ ॥ अभ्यद्रवन्त वेगेन कुम्भयोनिं जयेप्सया। आगच्छतस्तान् सहसा सर्व्वोद्योगेन पाण्डवान् ॥ १० ॥ प्रतिजग्राह समरे द्रोणः शस्त्रभृतांवरः। ततो दुर्य्योधनो राजा सर्व्वोद्योगेन पाण्डवान् ॥ ११ ॥ अभ्यद्रवत् सुसंक्रुद्ध इच्छन् द्रोणस्य जीवितम्। ततः प्रववृते युद्धं श्रान्तवाहनसैनिकम् ॥ १२ ॥ पाण्डवानां कुरूणाञ्च गर्ज्जतामितरेतरम्। निद्रान्धाश्च

महाराज परिश्रान्ताश्च संयुगे ॥ १३ ॥ नाभ्यजानन्त समरे काञ्चि-
च्चेष्टां महारथाः । त्रियामा रजनी चैषा घोररूपा भयानका
॥ १४ ॥ सहस्रयामप्रतिमा बभूव प्राणहारिणी । बध्यताञ्च
तथा तेषां हतानाञ्च विशेषतः ॥ १५ ॥ अर्द्धरात्रिः समाजग्मे
निद्रान्धानां विशेषतः । सर्व्वे ह्यासन् निरुत्साहाः क्षत्रिया दीन-
चेतसः ॥ १६ ॥ तव सैन्ये परेषाञ्च गतास्त्रा विगतेषवः । ते
तदा पारयन्तश्च ह्रीमन्तश्च मनस्विनः ॥ १७ ॥ स्वधर्ममनुपश्यन्तो
न जहुः स्वामनीकिनीम् । शस्त्राण्यन्ये समुत्सृज्य निद्रान्धाः
शेरते जनाः ॥ १८ ॥ गजेष्वन्ये रथेष्वन्ये हयेष्वन्ये च भारत ।
निद्रान्धा नो बुबुधिरे काञ्चिच्चेष्टां नराधिप ॥ १९ ॥ तानन्ये समरे
योधाः प्रेषयन्ति यमक्षयम् । स्वप्नायमानास्त्वपरे परानिति विचे-
तसः ॥ २० ॥ आत्मानं समरे जघ्नुः स्वानेव च परानपि । नाना-
वाचो विमुञ्चन्तः प्रयुद्धास्ते महारणे ॥ २१ ॥ अस्माकन्तु महा-
राज परेभ्यो बहवो जनाः । योद्धव्यमिति तिष्ठन्तो निद्रासंसक्त-
लोचनाः ॥ २२ ॥ संसर्पन्तो रणे केचिन्निद्रान्धास्ते परस्परम् ।
जघ्नुः शूरा रणे शूरास्तस्मिंस्तमसि दारुणे ॥ २३ ॥ हन्य-
मानमथात्मानं परेभ्यो बहवो जनाः । नाभ्यजानन्त समरे निद्रया
मोहिता भृशम् ॥ २४ ॥ तेषामेतादृशीञ्चेष्टां विज्ञाय पुरुषर्षभ ।
उवाच वाक्यं वीभत्सुरुच्चैः सन्नादयन्निव ॥ २५ ॥ श्रान्ता भवन्तो
निद्रान्धाः सर्व्वे एव सवाहनाः । तमसा च वृते सैन्ये रजसा
बहुलेन च ॥ २६ ॥ ते यूयं यदि मन्यध्वमुपारमत सैनिकाः ।
निमीलयत चात्रैव रणभूमौ मुहूर्त्तकम् ॥ २७ ॥ ततो विनिद्रा
विश्रान्ताश्चन्द्रमस्युदिते पुनः । संसाधयिष्यथान्योऽन्यं स्वर्गाय कुरु-
पाण्डवाः ॥ २८ ॥ तद्वचः सर्व्वधर्म्मज्ञा धार्म्मिकस्य निशम्य ते ।
अरोचयन्त सैन्यानि तदा चान्योऽन्यमब्रुवन् ॥ २९ ॥ चुक्रुशुः
कर्ण कर्णेति राजन् दुर्य्योधनेति च । उपारमत पाण्डूनां विरता

ह्वि वरूथिनी ॥ ३० ॥ तथा विक्रोशतस्तस्य फाल्गुनस्य ततस्ततः । उपारमत पाण्डूनां सेना तव च भारत ॥ ३१ ॥ तामस्य वाचं देवाश्च ऋषयश्च महात्मनः । सर्व्व सैन्यानि चाक्षुद्रां प्रहृष्टाः प्रत्यपूजयन् ॥ ३२ ॥ तत् सम्पूज्य वचोऽक्रूरं सर्व्वसैन्यानि भारत । मुहूर्त्तमस्वपन्राजन् श्रान्तानि भरतर्षभ ॥ ३३ ॥ सा तु सम्प्राप्य विश्रामं ध्वजिनी तव भारत । सुखमाप्तवती काममर्ज्जुनं प्रत्यपूजयन् ॥ ३४ ॥ त्वयि वेदास्तथास्त्राणि त्वयि बुद्धिपराक्रमौ । धर्म्मस्त्वयि महाबाहो दया भूतेषु चानघ ॥ ३५ ॥ यच्चाश्वस्तास्तवेच्छामः शर्म्म पार्थ तदस्तु ते । मनसश्च प्रियानर्थान् वीर क्षिप्रमवाप्नुहि ॥ ३६ ॥ इति ते तं नरव्याघ्रं प्रशंसन्तो महारथाः । निद्रया समवाक्षिप्तास्तूष्णीमासन् विशाम्पते ॥ ३७ ॥ अश्वपृष्ठेषु चाप्यन्ये रथनीड़ेषु चापरे । गजस्कन्धगताश्चान्ये शेरते चापरे क्षितौ ॥ ३८ ॥ सायुधाः सगदाश्चैव सखड़्गाः सपरश्वधाः । सप्रासकवचाश्चान्ये नराः सुप्ताः पृथक् पृथक् ॥ ३९ ॥ गजाः पन्नगभोगाभैर्हस्तैर्भूरेणुभूषितैः । निद्रान्धा वसुधाञ्चक्रुः घ्राणनिश्वासशीतलाम् ॥ ४० ॥ गजाः शुशुभिरे तत्र निःश्वसन्तो महीतले । विकीर्णा गिरयो यद्वन्निश्वसद्भिर्महोरगैः ॥ ४१ ॥ समाञ्च विषमाञ्चक्रुः खुराग्रैर्विक्षतां महीम् । हयाः काञ्चनयोक्त्राश्च केशरालम्बिभिर्युगैः ॥ ४२ ॥ सुषुपुस्तत्र राजेन्द्र युक्ता वाहेषु सर्व्वशः । एवं हयाश्च नागाश्च योधाश्च भरतर्षभ ॥ ४३ ॥ युद्धाद्विरम्य सुषुपुः श्रमेण महतान्विताः । तत् तथा निद्रया मग्नमबोधमस्वपद्बलम् । कुशलैरिव विन्यस्तं पटे चित्रमिवाद्भुतम् ॥ ४४ ॥ ते क्षत्रियाः कुण्डलिनो युवानः परस्परं सायकविक्षताङ्गाः । कुम्भेषु लीनाः सुषुपुर्गजानां कुचेषु लग्ना इव कामिनीनाम् ॥ ४५ ॥ ततः कुमुदनाथेन कामिनीगण्डपाण्डुना । नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ॥ ४६ ॥ दशशताक्षककुब्दरि-

निःसृतः किरणकेशरभासुरपिञ्जरः। तिमिरवारणयूथविदारणः समुदियादुदयाचलकेशरी ॥ ४७ ॥ हरवृषोदरगात्रसमद्युतिः स्मरशरासनपूर्णसमप्रभः। नववधूस्मितचारुमनोहरः प्रविकसत्-कुमुदाकरबान्धवः ॥ ४८ ॥ ततो मुहूर्त्तात् च भगवान् पुरस्तात् शशलक्षणः। अरुणं दर्शयामास ग्रसन् ज्योतिः प्रभां प्रभुः ॥ ४९ ॥ अरुणस्य च तस्यानुजातरूपसमप्रभम्। रश्मिजालं महच्चन्द्रो मन्दं मन्दमिवासृजत् ॥ ५० ॥ उत्सारयन्तः प्रभया ततस्ते चन्द्ररश्मयः। प्रत्यगच्छञ्छनैः सर्वा दिशः खञ्च क्षितिं तथा ॥५१॥ ततो मुहूर्त्ताद्भुवनं ज्योतिर्भूतमिवाभवत्। अप्रख्यमप्रकाशञ्च जगामाशु तमस्तथा ॥ ५२ ॥ प्रतिप्रकाशिते लोके दिवाभूते निशाकरे। विचेरुर्न विचेरुश्च राजन्नक्तञ्चरास्ततः ॥ ५३ ॥ बोधमानन्तु तत्सैन्यं राजंश्चन्द्रस्य रश्मिभिः। बुबुधे शतपत्राणां वनं सूर्य्यांशुभिर्यथा ॥ ५४ ॥ यथा चन्द्रोदयोद्भूतः क्षुभितः साग-रोऽभवत्। तथा चन्द्रोदयोद्भूतः स बभूव बलार्णवः ॥ ५५ ॥ ततः प्रववृते युद्धं पुनरेव विशाम्पते। लोके लोकविनाशाय लोकं परममीप्सताम् ॥ ५६ ॥

इति द्रोणपर्व्वणि द्रोणवधपर्व्वणि सैन्यनिद्रायां
पञ्चाशीत्यधिकशततोऽध्यायः ॥ १८५ ॥

---

सञ्जय उवाच। ततो दुर्य्योधनो द्रोणमभिगम्येदमब्रवीत्। अमर्षवशमापन्नो जनयन् हर्षतेजसी ॥ १ ॥

दुर्य्योधन उवाच। न मर्षणीयाः संग्रामे विश्रमन्तः श्रमा-न्विताः। सपत्ना ग्लानमनसो लब्धलक्षा विशेषतः ॥ २ ॥ यत्तु-मर्षितमस्माभिर्भवतः प्रियकाम्यया। तत एते परिश्रान्ताः पाण्डवा बलवत्तराः ॥ ३ ॥ सर्वथा परहीनाः स्म तेजसा च बलेन च।

भवता पाल्यमानास्ते वर्द्धन्ते स्म पुनः पुनः ॥ ४ ॥ दिव्यान्यस्त्राणि सर्वाणि ब्रह्मास्त्राणि च यान्यपि। तानि सर्वाणि तिष्ठन्ति भवत्येव विशेषतः ॥ ५ ॥ न पाण्डवेया न वयं नान्ये लोके धनुर्द्धराः। युध्यमानस्य ते तुल्याः सत्यमेतद्ब्रवीमि ते ॥ ६ ॥ ससुरासुरगन्धर्व्वानिमान् लोकान् द्विजोत्तम। सर्व्वास्त्रविद्भवान् हन्याद्दिव्यैरस्त्रैर्न संशयः ॥ ७ ॥ स भवान् मर्षयत्येतांस्त्वत्तो भीतान् विशेषतः। शिष्यत्वं वा पुरस्कृत्य मम वा मन्दभाग्यताम् ॥ ८ ॥

सञ्जय उवाच। एवमुद्धर्षितो द्रोणः कोपितश्चात्मजेन ते। समन्युरब्रवीद्राजन् दुर्य्योधनमिदं वचः ॥ ९ ॥ स्थविरः सन् परं शक्त्या घटे दुर्य्योधनाहवे। अतः परं मया कार्य्यं क्षुद्रं विजयवर्द्धिना ॥ १० ॥ अनस्त्रविदयं सर्व्वो हन्तव्योऽस्त्रविदा जनः। यद्भवान् मन्यते चापि शुभं वा यदि वाशुभम् ॥ ११ ॥ तद्वै कर्त्तास्मि कौरव्य वचनात्तव नान्यथा। निहत्य सर्व्वपाञ्चालान् युद्धे कृत्वा पराक्रमम् ॥ १२ ॥ विमोक्ष्ये कवचं राजन् सत्येनायुधमालभे। मन्यसे यच्च कौन्तेयमर्ज्जुनं श्रान्तमाहवे ॥ १३ ॥ तस्य वीर्य्यं महाबाहो शृणु सत्येन कौरव। तं न देवा न गन्धर्व्वा न यक्षा न च राक्षसाः ॥ १४ ॥ उत्सहन्ते रणे सोढुं कुपितं सव्यसाचिनम्। खाण्डवे येन भगवान् प्रत्युद्यातः सुरेश्वरः ॥ १५ ॥ सायकैर्वारितश्चापि वर्षमाणो महात्मना। यक्षा नागास्तथा दैत्या ये चान्ये बलगर्व्विताः ॥ १६ ॥ निहताः पुरुषेन्द्रेण तच्चापि विदितं तव। गन्धर्व्वा घोषयात्रायां चित्रसेनादयो जिताः ॥ १७ ॥ यूयं तैर्ह्रियमाणाश्च मोक्षिता दृढधन्वना। निवातकवचाश्चापि देवानां शत्रवस्तथा ॥ १८ ॥ सुरैरवध्याः संग्रामे तेन वीरेण निर्ज्जिताः। दानवानां सहस्राणि हिरण्यपुरवासिनाम् ॥ १९ ॥ विजिग्ये पुरुषव्याघ्रः स शक्यो मानुषैः कथम्। प्रत्यक्षञ्चैव

ते सर्वं यथा बलमिदं तव। क्षयितुं पाण्डुपुत्रेण चेष्टमानं विनाश्यते ॥ २० ॥

सञ्जय उवाच। तं तथा वै प्रशंसन्तमर्ज्जुनं कुपितस्तदा। द्रोणं तव सुतो राजन् पुनरेवेदमब्रवीत् ॥ २१ ॥ अहं दुःशासनः कर्णः शकुनिर्मातुलश्च मे। हनिष्यामोऽर्जुनं सङ्ख्ये द्वैधीकृत्याद्य भारतीम् ॥ २२ ॥ तस्य तद्वचनं श्रुत्वा भारद्वाजो हसन्निव। अन्ववर्त्तत वेगेन स्वस्ति तेऽस्त्विति चाब्रवीत् ॥ २३ ॥ को हि गाण्डीवधन्वानं ज्वलन्तमिव तेजसा। अक्षयं क्षपयेत् कश्चित् क्षत्रियः क्षत्रियर्षभम् ॥ २४ ॥ तं न वित्तपतिर्नेन्द्रो न यमो न जलेश्वरः। नासुरोरगरक्षांसि क्षपयेयुः सहायुधम् ॥ २५ ॥ मूढ़ास्त्वेवं प्रभाषन्ते यानीमान्यात्थ भारत। युद्धे त्वर्जुनमासाद्य स्वस्तिमान् को व्रजेद्गृहान् ॥ २६ ॥ त्वं हि सर्वाभिशङ्कित्वा-न्निष्ठुरः पापनिश्चयः। श्रेयसस्त्वद्धिते युक्तांस्तत्तद्वक्तुमिहेच्छसि ॥ २७ ॥ गच्छ त्वमपि कौन्तेयमात्मार्थे तं प्रबाधितुम्। त्वमप्या-शंससे युद्धं कुलजः क्षत्रियो ह्यसि ॥ २८ ॥ इमान् किं पार्थि-वान् सर्वान् घातयिष्यस्यनागसः। त्वमस्य मूलं वैरस्य तस्मा-दासादयार्ज्जुनम् ॥ २९ ॥ एष ते मातुलः प्राज्ञः क्षत्रधर्ममनु-व्रतः। दुर्द्यूतदेवी गान्धारे प्रयात्वर्जुनमाहवे ॥ ३० ॥ एषो-ऽक्षकुशलो जिह्मो द्यूतकृत् कैतवः शठः। देविता निकृतिप्राज्ञो युद्धे जेष्यति पाण्डवान् ॥ ३१ ॥ त्वया कथितमत्यर्थं कर्णेन सह हृष्टवत्। असकृच्छून्यवन्मोहाद्धृतराष्ट्रस्य शृण्वतः ॥ ३२ ॥ अहञ्च तात कर्णश्च भ्राता दुःशासनश्च मे। पाण्डुपुत्रान् हनि-ष्यामः सहिताः समरे त्रयः ॥ ३३ ॥ इति ते जल्पमानस्य श्रुतं संसदि संसदि। अनुतिष्ठ प्रतिज्ञातं सत्यवाक् भव तैः सह ॥ ३४ ॥ एष ते पाण्डवः शत्रुरविशङ्कोऽग्रतः स्थितः। क्षत्र-धर्ममवेक्षस्व श्लाघ्यस्तव वधो जयात् ॥ ३५ ॥ दत्तं भुक्तमधी

तच्च प्राप्तमैश्वर्य्यमीप्सितम् । कृतकृत्योऽनृणश्चासि मा भैर्युध्यस्व पाण्डवम् ॥ ३६ ॥ इत्युक्ता समरे द्रोणो न्यवर्त्तत अतः परे । द्वैधीकृत्य ततः सेनां युद्धं समभवत्तदा ॥ ३७ ॥

इति द्रोणपर्वणि द्रोणवधपर्वणि सैन्यद्वैधीकरणे षड़शीत्यधिकशततोऽध्यायः ॥ १८६ ॥

---

सञ्जय उवाच । त्रिभागमात्रशेषायां रात्र्यां युद्धमवर्त्तत । कुरूणां पाण्डवानाञ्च संहृष्टानां विशाम्पते ॥ १ ॥ अथ चन्द्रप्रभां मुष्णन्नादित्यस्य पुरःसरः । अरुणोऽभ्युदयाञ्चक्रे ताम्रीकुर्व्वन्निवाम्बरम् ॥ २ ॥ प्राच्यां दिशि सहस्रांशोररुणेनारुणीकृतम् । तापनीयं यथा चक्रं भ्राजते रविमण्डलम् ॥ ३ ॥ ततो रथाश्वांश्च मनुष्ययानान्युत्सृज्य सर्वे कुरुपाण्डुयोधाः । दिवाकरस्याभिमुखा जयन्तः सन्ध्यागताः प्राञ्जलयो बभूवुः ॥ ४ ॥ ततो द्वैधीकृते सैन्ये द्रोणः सोमकपाण्डवान् । अभ्यद्रवत् स पाञ्चालान् दुर्य्योधनपुरोगमः ॥ ५ ॥ द्वैधीकृतान् कुरून् दृष्ट्वा माधवोऽर्जुनमब्रवीत् । सपत्नान् सव्यतः कृत्वा अपसव्यमिमं कुरु ॥ ६ ॥ स माधवमनुज्ञाप्य कुरुष्वेति धनञ्जयः । द्रोणकर्णौ महेष्वासौ सव्यतः पर्य्यवर्त्तत ॥ ७ ॥ अभिप्रायन्तु कृष्णस्य ज्ञात्वा परपुरञ्जयः । आजिशीर्षगतं पार्थं भीमसेनोऽभ्युवाच ह ॥ ८ ॥

भीमसेन उवाच । अर्ज्जुनार्ज्जुन बीभत्सो शृणुष्वैतद्वचो मम । यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ॥ ९ ॥ अस्मिंश्चेदागते काले श्रेयो न प्रतिपत्स्यसे । असम्भावितरूपः सन्नानृशंस्यं करिष्यसि ॥ १० ॥ सत्यश्रीधर्मयशसां वीर्य्येणानृण्यमाप्नुहि । भिन्ध्यनीकं युधां श्रेष्ठ अपसव्यमिमान् कुरु ॥ ११ ॥

सञ्जय उवाच । सव्यसाची च भीमेन चोदितः केशवेन च ।

कर्णं द्रोणात्रतिक्रम्य समन्तात् पर्य्यवारयत् ॥ १२ ॥ तमाजिशीर्ष-
मायान्तं दहन्तं क्षत्रियर्षभान् । पराक्रान्तं पराक्रम्य ततः क्षत्रिय-
पुङ्गवाः ॥ १३ ॥ नाशक्नुवन् वारयितुं वर्द्धमानमिवानलम् । अथ
दुर्य्योधनः कर्णः शकुनिश्चापि सौवलः ॥ १४ ॥ अभ्यवर्षञ्छरव्रातैः
कुन्तीपुत्रं धनञ्जयम् । तेषामस्त्राणि सर्व्वेषामुत्तमास्त्रविदाम्वरः
॥ १५ ॥ कदर्थीकृत्य राजेन्द्र शरवर्षैरवाकिरत् । अस्त्रैरस्त्राणि
सन्धार्य्य लघुहस्तो जितेन्द्रियः ॥ १६ ॥ सर्व्वानविध्यन्निशितैर्दशभि-
र्दशभिः शरैः । उद्धूता रजसो वृष्टिः शरवृष्टिस्तथैव च ॥ १७ ॥
तमश्च घोरशब्दश्च तदा समभवन्महान् । न द्यौर्न भूमिर्न दिशः
प्राज्ञायन्तः तथागते ॥ १८ ॥ सैन्येन रजसा मूढं सर्व्वमन्धमिवा-
भवत् । नैव ते न वयं राजन् प्राज्ञासिष्म परस्परम् ॥ १९ ॥
उद्देशेन हि तेन स्म समयुध्यन्त पार्थिवाः । विरथा रथिनो राजन्
समासाद्य परस्परम् ॥ २० ॥ केशेषु समसज्जन्त कवचेषु भुजेषु
च । हताश्वा हतसूताश्च निश्चेष्टा रथिनस्तथा ॥ २१ ॥ जीवन्त
इव तत्र स्म व्यदृश्यन्त भयार्द्दिताः । हतान् गजान् समाश्लिष्य
पर्व्वतानिव वाजिनः ॥ २२ ॥ गतसत्त्वा व्यदृश्यन्त तथैव सह
सादिभिः । ततस्त्वभ्यवसृत्यैव सङ्ग्रामादुत्तरां दिशम् ॥ १३ ॥
अतिष्ठदाहवे द्रोणो विधूम इव पावकः । तमाजिशीर्षादेकान्त-
मपक्रान्तं निशम्य तु ॥ २४ ॥ समकम्पन्त सैन्यानि पाण्डवानां
विशाम्पते । भ्राजमानं श्रिया युक्तं ज्वलन्तमिव तेजसा ॥ २५ ॥
दृष्ट्वा द्रोणं परे त्रेषुश्चेलुर्मम्लुश्च भारत । आह्वयन्तं परानीकं
प्रभिन्नमिव वारणम् ॥ २६ ॥ नैनमाशंसिरे जेतुं दानवा वासवं
यथा । केचिदासन्निरुत्साहाः केचित् क्रुद्धा मनस्विनः ॥ २७ ॥
विस्मिताश्चाभवन् केचित् केचिदासन्नमर्षिताः । हस्तैर्हस्ताग्रमपरे
प्रत्यपिंषन्नराधिपाः ॥ २८ ॥ अपरे दशनैरोष्ठानदशन् क्रोध-
मूर्च्छिताः । व्याक्षिपन्नायुधान्यन्ये ममृदुश्चापरे भुजान् ॥ २९ ॥

अन्ये चाभ्यद्रवन् द्रोणं जितात्मानो महौजसः। पाञ्चालास्तु विशेषेण द्रोणसायकपीड़िताः॥ ३०॥ समसज्जन्त राजानं समरे भृशवेदनाः। ततो विराटद्रुपदौ द्रोणं प्रतीयतुरणे॥ ३१॥ तथा चरन्तं संग्रामे भृशं परमदुर्ज्जयम्। द्रुपदस्य ततः पौत्रास्त्रय एव विशाम्पते॥ ३२॥ चेदयश्च महेष्वासा द्रोणमेवाभ्ययुर्युधि। तेषां द्रुपदपौत्राणां त्रयाणां निशितैः शरैः॥ ३३॥ त्रिभिर्द्रोणोऽहरत् प्राणांस्ते हता न्यपतन् भुवि। ततो द्रोणोऽजयद्युद्धे चेदिकैकेयसृञ्जयान्॥ ३४॥ मत्स्यांश्चैवाजयत् सर्वान् भारद्वाजो महारथः। ततस्तु द्रुपदः क्रोधात् शरवर्षं समासृजत॥३५॥ द्रोणं प्रति महाराज विराटश्चैव संयुगे। तं निहत्येषुवर्षन्तु द्रोणः क्षत्रियमर्द्दनः॥ ३६॥ तौ शरैश्छादयामास विराटद्रुपदावुभौ। द्रोणेन छाद्यमानौ तौ क्रुद्धौ संग्राममूर्द्धनि॥ ३७॥ द्रोणं शरैर्विव्यधतुः परमं क्रोधमास्थितौ। ततो द्रोणो महाराज क्रोधामर्षसमन्वितः॥ ३८॥ भल्लाभ्यां भृशतीक्ष्णाभ्यां चिच्छेद धनुषी तयोः। ततो विराटः कुपितः समरे तोमरान् दश॥३९॥ दश चिक्षेप च शरान् द्रोणस्य वधकाङ्क्षया। शक्तिञ्च द्रुपदो घोरामायसीं स्वर्णभूषिताम्॥ ४०॥ चिक्षेप भुजगेन्द्राभां क्रुद्धो द्रोणरथं प्रति। ततो भल्लैः सुनिशितैश्छित्त्वा तांस्तोमरान्दश॥ ४१॥ शक्तिं कनकवैदूर्य्यां द्रोणश्चिच्छेद सायकैः। ततो द्रोणः सुपीताभ्यां भल्लाभ्यामरिमर्द्दनः॥ ४२॥ द्रुपदञ्च विराटञ्च प्रेषयामास मृत्यवे। हते विराटे द्रुपदे कैकेयेषु तथैव च॥ ४३॥ तथैव चेदिमत्स्येषु पाञ्चालेषु तथैव च। हतेषु त्रिषु वीरेषु द्रुपदस्य च नप्तृषु॥ ४४॥ द्रोणस्य कर्म तद्दृष्ट्वा कोपदुःखसमन्वितः। शशाप रथिनां मध्ये धृष्टद्युम्नो महामनाः॥ ४५॥ इष्टापूर्त्तात्तथा चात्राद्ब्राह्मण्याच्च स नश्यतु। द्रोणो यस्याद्य मुच्येत यं वा द्रोणः पराभवेत्॥ ४६॥ इति तेषां प्रतिश्रुत्य मध्ये

सर्वधनुष्मताम्। आयाद्द्रोणं महानीकः पाञ्चाल्य परवीरहा ॥४७॥ पाञ्चालास्त्वेकतो द्रोणमभ्यघ्नन् पाण्डवोऽन्यतः। दुर्य्योधनश्च कर्णश्च शकुनिश्चापि सौबलः॥ ४८॥ सोदर्य्याश्च यथा मुख्यास्तेऽरक्षन् द्रोणमाहवे। रक्ष्यमाणं तदा द्रोणं समरे तैर्महात्मभिः॥ ४९॥ यतमानास्तु पाञ्चाला न शेकुः प्रतिवीक्षितुम्। तत्राक्रुध्यद्भीमसेनो धृष्टद्युम्नस्य मारिष। स एनं वाग्भिरुग्राभिस्ततक्ष पुरुषर्षभ॥ ५०॥

भीमसेन उवाच। द्रुपदस्य कुले जात सर्वास्त्रेष्वस्त्रवित्तम। कः क्षत्रियो मन्यमानः प्रेक्षेतारिमवस्थितम्॥ ५१॥ पितृपुत्रवधं प्राप्य पुमान् कः परिपालयेत्। विशेषतस्तु शपथं शपित्वा राजसंसदि॥ ५२॥ एष वैश्वानर इव समिद्धः स्वेन तेजसा। शरचापेन्धनो द्रोणः क्षत्रं दहति तेजसा॥ ५३॥ पुरा करोति निःशेषां पाण्डवानामनीकिनीम्। स्थिताः पश्यत मे कर्म द्रोणमेव व्रजाम्यहम्॥ ५४॥ इत्युक्त्वा प्राविशत् क्रुद्धो द्रोणानीकं वृकोदरः। शरैः पूर्णायतोत्सृष्टैर्द्रावयंस्तव वाहिनीम्॥ ५५॥ धृष्टद्युम्नोऽपि पाञ्चाल्यः प्रविश्य महतीञ्चमूम्। आससाद रणे द्रोणं तदासीत्तुमुलं महत्॥ ५६॥ नैव नस्तादृशं युद्धं दृष्टपूर्व्वं न च श्रुतम्। यथा सूर्य्योदये राजन् समुत्पिञ्जोऽभवन्महान्॥५७॥ संसक्तान्येव चादृश्यन् रथवृन्दानि मारिष। हतानि च विशीर्णानि शरीराणि शरीरिणाम्॥ ५८॥ केचिदन्यत्र गच्छन्तः पथि चान्यैरुपद्रुताः। विमुखाः पृष्ठतश्चान्ये ताड्यन्ते पार्श्वतः परे॥ ५९॥ तथा संसक्तयुद्धन्तदभवद्भृशदारुणम्। अथ सन्ध्यागतः सूर्य्यः क्षणेन समपद्यत॥ ६०॥

इतिद्रोणपर्व्वणि द्रोणवधपर्व्वणि सङ्कुलयुद्धे

सप्ताशीत्यधिकशततोऽध्यायः॥ १८७॥

---

सञ्जय उवाच । ते तथैव महाराज दंशिता रणमूर्द्धनि ।
सन्ध्यागतं सहस्रांशुमादित्यमुपतस्थिरे ॥ १ ॥ उदिते तु सह-
स्रांशौ तप्तकाञ्चनसंप्रभे । प्रकाशितेषु लोकेषु पुनर्युद्धमवर्त्तत ॥ २ ॥
द्वन्द्वानि यानि तत्रासन् संसक्तानि पुरोदयात् । तान्येवाभ्युदिते
सूर्य्ये समसज्जन्त भारत ॥ ३ ॥ रथैर्हया हयैर्नागाः पादाता-
श्चापि कुञ्जरैः । हया हयैः समाजग्मुः पादाताश्च पदातिभिः ॥४॥
रथा रथैरिभैर्नागा हयैश्च भरतर्षभ । संयुक्ताश्च वियुक्ताश्च योधाः
सन्न्यपतन्रणे ॥ ५ ॥ ते रात्रौ कृतकर्माणः श्रान्ताः सूर्य्यस्य
तेजसा । क्षुत्पिपासापरीताङ्गा विसंज्ञा बहवोऽभवन् ॥ ६ ॥
शङ्खभेरीमृदङ्गानां कुञ्जराणाञ्च गर्ज्जताम् । विस्फारितविकृष्टानां
कार्म्मुकाणाञ्च कूजताम् ॥ ७ ॥ शब्दः समभवद्राजन् दिवस्पृक्
भरतर्षभ । द्रवताञ्च पदातीनां शस्त्राणां पततामपि ॥ ८ ॥
हयानां हेषताञ्चैव रथानां विनिवर्त्तताम् । क्रोशतां गर्ज्जताञ्चैव
तदासीत्तुमुलं महत् ॥ ९ ॥ विवृद्धस्तुमुलः शब्दो द्यामगच्छन्महा-
स्तदा । नानायुधनिकृत्तानां चेष्टतामातुरः स्वनः ॥ १० ॥ भूमा-
वश्रूयत महांस्तदासीत् कृपणं महत् । पततां पतितानाञ्च
पत्त्यश्वरथहस्तिनाम् ॥ ११ ॥ तेषु सर्व्वेष्वनीकेषु व्यतिषक्तेष्वने-
कशः । स्वे स्वान् जघ्नुः परे स्वांश्च स्वान् परे च परान् परे ॥१२॥
वीरबाहुविसृष्टाश्च योधेषु च गजेषु च । राशयः प्रत्यदृश्यन्त वाससां
नेजनेष्विव ॥ १३ ॥ उद्यतप्रतिविद्धानां खड्गानां वीरबाहुभिः ।
स एव शब्दस्तद्रूपो वाससां निज्यतामिव ॥ १४ ॥ अर्द्धासिभि-
स्तथा खड्गैस्तोमरैः सपरश्वधैः । निकृष्टयुद्धं संसक्तं मह-
दासीत् सुदारुणम् ॥ १५ ॥ गजाश्वकायप्रभवां नरदेहप्रवा-
हिनीम् । शस्त्रमत्स्यसुसम्पूर्णां मांसशोणितकर्द्दमाम् ॥ १६ ॥
आर्त्तनादस्वनवतीं पताकावस्त्रफेनिलाम् । नदीं प्रावर्त्तयन् वीराः
परलोकप्रवाहिनीम् ॥ १७ ॥ सर्व्वशस्त्राहताः क्लान्ता रात्रि-

मूढ़ात्मचेतसः। विसृज्य सर्वगात्राणि व्यतिष्ठन् गजवाजिनः ॥१८॥ संशुष्कवदना वीराः शिरोभिश्चारुकुण्डलैः। युद्धोपकरणैश्चैव तत्र तत्र चकाशिरे ॥ १९ ॥ क्रव्यात्सङ्घैः समाकीर्णा मृतैरर्द्धमृतैरपि। नासीद्रथपथस्तत्र सर्वमायोधनं प्रति ॥ २० ॥ सज्जत्सु चक्रेषु रथान् सत्त्वमास्थाय वाजिनः। कथञ्चिदवहन् श्रान्ता वेपमानाः शरार्द्दिताः ॥ २१ ॥ कुलसत्त्ववलोपेता वाजिनो वारणोपमाः। विह्वलं तत् समुद्भ्रान्तं सभयं भारतातुरम् ॥ २२ ॥ बलमासीत्तदा सर्वमृते द्रोणार्जुनावुभौ। तावेवास्तां निलयनं तावार्त्तायनमेव च ॥ २३ ॥ तावेवान्ये समासाद्य जग्मुर्वैवस्वतक्षयम्। आविग्नमभवत् सर्वं कौरवाणां महद्बलम् ॥ २४ ॥ पाञ्चालानाञ्च संसक्तं न प्राज्ञायत किञ्चन। अन्तकाक्रीड़सदृशे भीरूणां भयवर्द्धने ॥२५॥ पृथिव्यां राजवंश्यानामास्थिते महति क्षये। न तत्र कर्णं न द्रोणं नार्जुनं न युधिष्ठिरम् ॥ २६ ॥ न भीमसेनं न यमौ न पाञ्चाल्यं न सात्यकिम्। न च दुःशासनं द्रौणिं न दुर्य्योधनसौवलौ ॥ २७ ॥ न कृपं मद्रराजं वा कृतवर्माणमेव च। न चान्यान्नैव चात्मानं न क्षितिं न दिशस्तथा ॥ २८ ॥ पश्याम राजन् संसक्तान् सैन्येन रजसा वृतान्। संवृत्ते तुमुले घोरे रजोमेघे समुत्थिते ॥ २९ ॥ द्वितीयमिव सम्प्राप्ताममन्यन्त निशां तदा। न ज्ञायन्ते कौरवेया न पाञ्चाला न पाण्डवाः ॥ ३० ॥ न दिशो न वियन्नोर्वी न समं विषमं तथा। हस्तसंस्पर्शं सम्पन्नान् परान् वाप्यथ वा स्वकान् ॥ ३१ ॥ न्यपातयंस्तदा युद्धे नराः स्म विजयैषिणः। उद्धतत्वाच्च रजसः प्रसेकाच्छोणितस्य च ॥ ३२ ॥ प्रशशाम रजो भौमं शीघ्रत्वादनिलस्य च। तत्र नागा हया योधा रथिनोऽथ पदातयः ॥ ३३ ॥ पारिजातवनानीव व्यरोचन्रुधिरोक्षिताः। ततो दुर्य्योधनः कर्णो द्रोणो दुःशासनस्तथा ॥ ३४ ॥ पाण्डवैः समसज्जन्तचतुर्भिश्चतुरो रथाः। दुर्य्योधनः सह भ्रात्रा यमाभ्यां

समसज्जत ॥ ३५ ॥ वृकोदरेण राधेयो भारद्वाजेन चार्जुनः । तद्घोरं महदाश्चर्य्यं सर्व्वे प्रैक्षन्त सर्व्वतः ॥ ३६ ॥ रथनारीर्विचित्रैश्च विचित्ररथसङ्कुलम् । रथर्षभानां मुख्यानां सन्निपातसमाकुलम् ॥ ३७ ॥ अपश्यन्रथिनो युद्धं विचित्रञ्चित्रयोधिनाम् । यतमानाः पराक्रान्ताः परस्परजिगीषवः ॥ ३८ ॥ जीमूता इव घर्मान्ते शरवर्षैरवाकिरन् । ते रथान् सूर्य्यसङ्काशानास्थिताः पुरुषर्षभाः ॥ ३९ ॥ अशोभन्त महामेघाः शारदाः समुपस्थिताः । योधास्ते तु महाराज क्रोधामर्षसमन्विताः ॥ ४० ॥ स्पर्द्धिनः शरमेष्वासाः कृतयत्ना धनुर्द्धराः । अभ्यगच्छंस्तथान्योऽन्यं मत्ता गजवृषा इव ॥ ४१ ॥ न नूनं देहभेदोऽस्ति काले तस्मिन् समागमे । यत्र सर्व्वेण युगपद्व्यशीर्य्यन्त महारथाः ॥ ४२ ॥ बाहुभिश्चरणैश्छिन्नैः शिरोभिश्चारुकुण्डलैः । कार्म्मुकैर्व्विशिखैः प्रासैः खड्गैः परशुपट्टिशैः ॥ ४३ ॥ नालीकैः क्षुरनाराचैर्नखरैः शक्तितोमरैः । अन्यैश्च विविधाकारैर्धौतैः प्रहरणोत्तमैः ॥ ४४ ॥ चित्रैश्च विविधाकारैः शरीरावरणैरपि । विचित्रैश्च रथैर्भग्नैर्हतैश्च गजवाजिभिः ॥ ४५ ॥ शून्यैश्च नगराकारैर्हतयोधैर्ध्वजै रथैः । अमनुष्यैर्हयैस्त्रस्तैः कृष्यमाणैस्ततस्ततः ॥ ४६ ॥ वातायमानैरसकृद्धतवीरैरलङ्कृतैः । व्यजनैः कङ्कटैश्चैव ध्वजैश्च विनिपातितैः ॥ ४७ छत्रैराभरणैर्व्वस्त्रैर्माल्यैश्च सुसुगन्धिभिः । हारैः किरीटैर्मुकुटैरुष्णीषैः किङ्किणीगणैः ॥ ४८ ॥ उरस्थैर्मणिभिर्न्निष्कैश्चूडामणिभिरेव च । आसीदायोधनं तत्र नभस्तारागणैरिव ॥ ४९ ॥ ततो दुर्य्योधनस्यासीन्नकुलेन समागमः । अमर्षितेन क्रुद्धस्य क्रुद्धेनामर्षितस्य च ॥ ५० ॥ अपसव्यञ्चकाराथ माद्रीपुत्रस्तवात्मजम् । किरञ्छरशतैर्हृष्टस्तत्र नादो महानभूत् ॥ ५१ ॥ अपसव्यं कृतः सङ्ख्ये भ्रातृव्येनात्यमर्षिणा । सोऽमर्षितस्तमप्याजौ प्रतिचक्रेऽपसव्यतः ॥ ५२ ॥ पुत्रस्तव महाराज राजा दुर्य्योधनोऽद्भुतम् ।

ततः प्रतिचिकीर्षन्तमपश्यन्तु ते सुतम् ॥५३॥ न्यवारयत तेजस्वी नकुलश्चित्रमार्गवित्। स सर्वतो निवार्य्यैनं शरजालेन पीड़यन्॥५४ विमुखं नकुलश्चक्रे तत्सैन्याः समपूजयन्। तिष्ठ तिष्ठेति नकुलो बभाषे तनयं तव। संस्मृत्य बहुदुःखानि तव दुर्मन्त्रितेन च ॥५५॥

इति द्रोणपर्वणि द्रोणवधपर्वणि नकुलयुद्धे
अष्टाशीत्यधिकशततोऽध्यायः ॥ १८८ ॥

---

सञ्जय उवाच। ततो दुःशासनः क्रुद्धः सहदेवमुपाद्रवत्। रथवेगेन तीव्रेण कम्पयन्निव मेदिनीम् ॥ १ ॥ तस्यापतत एवाशु भल्लेनामित्रकर्षणः। माद्रीसुतः शिरो यन्तुः सशिरस्त्राणमाच्छिनत् ॥ २ ॥ नैनं दुःशासनः सूतं नापि कश्चन सैनिकः। कृत्तोत्तमाङ्गमाशुत्वात् सहदेवेन बुद्धवान् ॥ ३ ॥ रथस्यासंगृहीतत्वात् प्रयान्त्यश्वा यथासुखम्। ततो दुःशासनः सूतं बुद्धवान् गतचेतसम् ॥ ४ ॥ स हयान् सन्निगृह्याजौ स्वयं हयविशारदः। युयुधे रथिनां श्रेष्ठो लघु चित्रञ्च सुष्ठु च ॥ ५ ॥ तदस्यापूजयन् कर्म स्वे परे चैव संयुगे। हतसूतरथेनाजौ व्यचरद्यदभीतवत् ॥ ६ ॥ सहदेवस्तु तानश्वांस्तीक्ष्णैर्बाणैरवाकिरत्। पीड्यमानाः शरैश्चाशु प्राद्रवंस्ते ततस्ततः ॥ ७ ॥ स रश्मिषु विषक्तत्वादुत्ससर्ज्ज शरासनम्। धनुषा कर्म कुर्वंस्तु रश्मीन् स पुनरुत्सृजन् ॥ ८ ॥ छिद्रेषु तेषु तं बाणैर्माद्रीपुत्रोऽप्यवाकिरत्। परीप्संस्त्वत्सुतं कर्णस्तदनन्तरमथापतत् ॥ ९ ॥ वृकोदरस्ततः कर्णं त्रिभिर्भल्लैः समाहितः। आकर्णपूर्णैरभ्यघ्नन् बाह्वोरुरसि चार्पयत् ॥ १० ॥ न्यवर्त्तत ततः कर्णः सङ्घट्टित इवोरगः। भीममावारयामास विकिरन्निशिताञ्छरान् ॥११॥ ततोऽभूत्तुमुलं युद्धं भीमराधेययोस्तदा। तौ वृषाविव नर्द्दन्तौ विवृत्तनयनावुभौ ॥ १२ ॥ वेगेन

महतान्योन्यं संरब्धावभिनेदतुः। अतिसंश्लिष्टयोस्तत्र तयो-राहवशौण्डयोः॥ १३॥ विच्छिन्नशरपातत्वात् गदायुद्धमवर्त्तत। गदया भीमसेनस्तु कर्णस्य रथकूवरम्॥ १४॥ विभेदाशु ततो राजंस्तदद्भुतमिवाभवत्। ततो भीमस्य राधेयो गदामादाय वीर्य्यवान्॥ १५॥ अवासृजद्रथे तान्तु विभेद गदया गदाम्। ततो भीमः पुनर्गुर्वीं चिक्षेपाधिरथेर्गदाम्॥ १६॥ तां शरै-र्बहुभिः कर्णः सुपुङ्खैः सुप्रवेजितैः। प्रत्यविध्यत् पुनश्चान्यैः सा भीमं पुनराव्रजत्॥ १७॥ व्यालीव मन्त्राभिहता कर्णबाणैरभि-द्रुता। तस्याः प्रतिनिपातेन भीमस्य विपुलो ध्वजः॥ १८॥ पपात सारथिश्चास्य मुमोह गदया हतः। स कर्णे सायकानष्टौ व्यसृजत् क्रोधमूर्च्छितः॥ १९॥ ध्वजे शरासने चैव शरावापे च भारत। तैस्तस्य निशितैस्तीक्ष्णै र्भीमसेनो महाबलः। चिच्छेद परवीरघ्नः प्रहसन्निव भारत॥ २०॥ ध्वजं शरासनञ्चैव शरावापञ्च भारत। कर्णोऽप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरासदम्॥ २१॥ ततः पुनस्तु राधेयो हयानस्य रथेषुभिः। ऋक्ष-वर्णान् जघानाशु तथोभौ पार्ष्णिसारथी॥ २२॥ स विपन्न-रथो भीमो नकुलस्याप्लुतो रथम। हरिर्यथा गिरेः शृङ्गं समा-क्रामदरिन्दमः॥ २३॥ तथा द्रोणार्जुनौ चित्रमयुध्येतां महा-रथौ। आचार्य्यशिष्यौ राजेन्द्र कृतप्रहरणौ युधि॥ २४॥ लघु-सन्धानयोगाभ्यां रथयोश्चरणेन च। मोहयन्तौ मनुष्याणां चक्षूंषि च मनांसि च॥ २५॥ उपारमन्त तेऽन्योन्यं योधाश्चकम्पिरे तथा। अदृष्टपूर्वं पश्यन्तस्तद्युद्धं गुरुशिष्ययोः॥ २६॥ विचित्रं पृतनामध्ये रथमार्गप्रदर्शिनोः। अन्योऽन्यमपसव्यन्तु कर्त्तुं वीरौ तदैषतुः॥ २७॥ पराक्रमं तयोर्योधा ददृशुस्तं सुविस्मिताः। तयोः सम-भवद्युद्धं द्रोणपाण्डवयोर्महत्॥ २८॥ आमिषार्थे महाराज गगने श्येनयोरिव। यद्यच्चकार द्रोणस्तु कुन्तीपुत्रजिगीषया॥२९

तस्य तस्य विघातार्थं तत्तत् स कुरुतेऽर्जुनः। यदा द्रोणो न शक्नोति पाण्डवस्य विशेषितुम् ॥ ३० ॥ ततः प्रादुश्चकारास्त्रमस्त्रमार्गविशारदः। ऐन्द्रं पाशुपतं त्वाष्ट्रं वायव्यमथ वारुणम् ॥३१॥ मुक्तं मुक्तं द्रोणचापत्तज्जघान धनञ्जयः। अस्त्राण्यस्त्रैर्यदा तस्य विधिवद्धन्ति पाण्डवः ॥ ३२ ॥ ततोऽस्त्रैः परमैर्दिव्यैर्द्रोणः पार्थमवाकिरत्। यद्यदस्त्रं स पार्थाय प्रयुङ्क्ते विजिगीषया ॥ ३३ ॥ तस्य तस्य निघाताय तत्तद्धि कुरुतेऽर्जुनः। स वध्यमानेष्वस्त्रेषु दिव्येष्वपि यथाविधि ॥ ३४ ॥ अर्जुनेनार्जुनं द्रोणो मनसैवाभ्यपूजयत्। मेने चात्मानमधिकं पृथिव्यामपि भारत ॥ ३५ ॥ तेन शिष्येण सर्वेभ्यः शस्त्रविद्भ्यः परन्तपः। वार्य्यमाणस्तु पार्थेन तथा मध्ये महात्मनाम् ॥ ३६ ॥ यतमानोऽर्जुनं प्रीत्या प्रत्यवारयदुत्स्मयन्। ततोऽन्तरीक्षे देवाश्च गन्धर्वाश्च सहस्रशः ॥ ३७ ॥ ऋषयः सिद्धसङ्घाश्च व्यदृश्यन्त समन्ततः। तदप्सरोभिराकीर्णं यक्षराक्षससङ्कुलम् ॥ ३८ ॥ श्रमदाकाशमभवद्भूयो मेघाकुलं यथा। तत्र स्मान्तर्हिता वाचो विचरन्ति पुनः पुनः ॥ ३९ ॥ द्रोणसंस्तवसंयुक्ताः पार्थस्य च महात्मनः। विसृज्यमानेष्वस्त्रेषु ज्वालयत्सु ततस्ततः ॥ ४० ॥ अब्रुवंस्तत्र सिद्धाश्च ऋषयश्च समागताः। नैवेदं मानुषं युद्धं नासुरं न च राक्षसम् ॥ ४१ ॥ न दैवं न च गान्धर्वं ब्राह्मं ध्रुवमिदं परम्। विचित्रमिदमाश्चर्य्यं न नो दृष्टं न च श्रुतम् ॥ ४२ ॥ अतिपाण्डवमाचार्य्यो द्रोणञ्चाप्यतिपाण्डवः। नानयोरन्तरं द्रष्टुं शक्यमन्येन केनचित् ॥ ४३ ॥ यदि रुद्रो द्विधाकृत्य युध्येतात्मानमात्मना। तत्र शक्योपमा कर्त्तुमन्यत्र न तु वर्त्तते ॥ ४४ ॥ ज्ञानमेकस्थमाचार्य्ये ज्ञानं योगश्च पाण्डवे। शौर्य्यमेकस्थमाचार्य्ये बलं शौर्य्यञ्च पाण्डवे ॥ ४५ ॥ नेमौ शक्यौ महेष्वासौ रणे क्षपयितुं परैः। इच्छमानौ पुनरिमौ हन्येतां सामरं जगत् ॥ ४६ ॥ इत्यब्रुवन्महाराज दृष्ट्वा तौ पुरुषर्षभौ।

श्चान्तर्हितानि भूतानि प्रकाशानि च सङ्घशः ॥ ४७ ॥ ततो द्रोणो ब्राह्ममस्त्रं प्रादुश्चक्रे महामतिः। सन्तापयन्रणे पार्थं भूतान्यन्तर्हितानि च ॥ ४८ ॥ ततश्चचाल पृथिवी सपर्व्वतवनद्रुमा। ववौ च विषमो वायुः सागराश्चापि चुक्षुभुः ॥ ४९ ॥ ततस्त्रासो महानासीत् कुरुपाण्डवसैन्ययोः। सर्व्वेषाञ्चैव भूतानामुद्यतेऽस्त्रे महात्मना ॥ ५० ॥ ततः पार्थोऽप्यसम्भ्रान्तस्तदस्त्रं प्रतिजघ्निवान्। ब्रह्मास्त्रेणैव राजेन्द्र ततः सर्व्वमशीशमत् ॥ ५१ ॥ यदा न गम्यते पारं तयोरन्यतरस्य वा। तदा सङ्कुलयुद्धेन तद्युद्धं व्याकुलीकृतम् ॥ ५२ ॥ नाज्ञायत ततः किञ्चित् पुनरेव विशाम्पते। प्रवृत्ते तुमुले युद्धे द्रोणपाण्डवयोर्मृधे ॥ ५३ ॥ शरजालैः समाकीर्णे मेघजालैरिवाम्बरे। न स्म सम्पतते कश्चिदन्तरीक्षचरस्तदा ॥५४॥

इति द्रोणपर्व्वणि द्रोणवधपर्व्वणि सङ्कुलयुद्धे
एकोननवत्यधिकशतोऽध्यायः ॥ १८९ ॥

---

सञ्जय उवाच। तस्मिंस्तदा वर्त्तमाने नराश्वगजसङ्क्षये। दुःशासनो महाराज धृष्टद्युम्नमयोधयत् ॥ १ ॥ स तु रुक्मरथासक्तो दुःशासनशरार्द्दितः। अमर्षात्तव पुत्रस्य शरैर्वाहानवाकिरत् ॥ २ ॥ क्षणेन स रथस्तस्य सध्वजः सहसारथिः। नादृश्यत महाराज पार्षतस्य शरैश्चितः ॥ ३ ॥ दुःशासनस्तु राजेन्द्र पाञ्चाल्यस्य महात्मनः। नाशकत् प्रमुखे स्थातुं शरजालप्रपीड़ितः ॥४॥ स तु दुःशासनं वाणैर्विमुखीकृत्य पार्षतः। किरञ्छरसहस्राणि द्रोणमेवाभ्ययाद्रणे ॥ ५ ॥ प्रत्यपद्यत हार्द्दिक्यः कृतवर्मा त्वनन्तरम्। सोदर्य्याणां त्रयश्चैव तत्वेनं पर्य्यवारयन् ॥ ६ ॥ तं यमौ पृष्ठतोऽन्वितौ रक्षन्तौ पुरुषर्षभौ। द्रोणायाभिमुखं यान्तं दीप्यमानमिवानलम् ॥ ७ ॥ सम्प्रहारमकुर्वंस्ते सर्व्वे च सुमहारथाः।

अमर्षिताः सत्त्ववन्तः कृत्वा मरणमग्रतः ॥ ८ ॥ शुद्धात्मानः शुद्धवृत्ता राजन् स्वर्गपुरस्कृताः। आर्य्यं युद्धमकुर्वंस्ते परस्परजिगीषवः ॥ ९ ॥ शुक्लाभिजनकर्माणो मतिमन्तो जनाधिपाः। धर्मयुद्धमयुध्यन्त पश्यन्तो गतिमुत्तमाम् ॥ १० ॥ न तत्रासीदधर्मिष्ठमशस्त्रं युद्धमेव च। नात्र कर्णी न नालीको न लिप्तो न च वस्तिकः ॥ ११ ॥ न सूचीकपिशो नैव न गवास्थिगजास्थिकः। इषुरासीन्न संश्लिष्टो न पूतिर्न च जिह्मगः ॥ १२ ॥ ऋजून्येव हि शुद्धानि सर्वे शस्त्राण्यधारयन्। सुयुद्धेन परान् लोकानीप्सन्तः कीर्त्तिमेव च ॥ १३ ॥ यदासीत्तुमुलं युद्धं सर्वदोषविवर्ज्जितम्। चतुर्णां तव योधानां तैस्त्रिभिः पाण्डवैः सह ॥ १४ ॥ धृष्टद्युम्नस्तु तान् दृष्ट्वा तव राजन्नृषर्षभान्। यमाभ्यां वारितान् वीरान् शीघ्रास्त्रो द्रोणमभ्ययात् ॥ १५ ॥ निवारितास्तु ते वीरास्तयोः पुरुषसिंहयोः। समसज्जन्त चत्वारो वाताः पर्वतयोरिव ॥ १६ ॥ द्वाभ्यां द्वाभ्यां यमौ सार्द्धं रथाभ्यां रथपुङ्गवौ। समासक्तौ ततो द्रोणं धृष्टद्युम्नोऽभ्यवर्षत ॥ १७ ॥ दृष्ट्वा द्रोणाय पाञ्चाल्यं व्रजन्तं युद्धदुर्मदम्। यमाभ्यां तांश्च संसक्तांस्तदनन्तरमुपाद्रवत् ॥ १८ ॥ दुर्य्योधनो महाराज किरञ्छोणितभोजनान्। तं सात्यकिः शीघ्रतरं पुनरेवाभ्यवर्त्तत ॥१९॥ तौ परस्परमासाद्य समीपे कुरुमाधवौ। हन्यमानौ नृशार्दूलावभितः समसज्जताम् ॥ २० ॥ बाल्ये वृत्तानि सर्वाणि प्रीयमाणौ विचिन्त्य तौ। तावन्योऽन्यं प्रेक्षमाणौ हसमानौ पुनः पुनः ॥ २१ ॥ अथ दुर्य्योधनो राजा सात्यकिं प्रत्यभाषत। प्रियं सखायं सततं गर्हयन् वृत्तमात्मनः ॥ २२ ॥ धिक् क्रोधं धिक् सखे लोभं धिक् मोहं धिगमर्षितम्। धिगस्तु क्षात्रमाचारं धिगस्तु बलमौरसम् ॥ २३ ॥ यत्र मामभिसन्धत्से त्वाञ्चाहं शिनिपुङ्गव। त्वं हि प्राणैः प्रियतरो ममाहञ्च तदा तव ॥ २४ ॥ स्मरामि तानि सर्वाणि बाल्ये

वृत्तानि यानि नौ। तानि सर्व्वाणि जीर्णानि साम्प्रतं नौ रणा-
जिरे ॥ २५ ॥ किमद्य क्रोधलोभाभ्यां युद्धमेवाद्य सात्त्वत। तं
तथावादिनं राजन् सात्त्वतः प्रत्यभाषत ॥ २६ ॥ प्रहसन् विशिखां-
स्तीक्ष्णानुद्यम्य परमास्त्रवित्। नेयं सभा राजपुत्र नवाचार्य्य-
निवेशनम्। यत्र क्रीड़ितमस्माभिस्तदा राजन् समागतैः ॥ २७ ॥

दुर्य्योधन उवाच। क्व सा क्रीड़ा गतास्माकं बाल्ये वै शिनि-
पुङ्गव। क्व च युद्धमिदम्भूयः कालो हि दुरतिक्रमः ॥ २८ ॥
किन्तु नो विद्यते कृत्यं धनेन धनलिप्सया। यत्र युध्यामहे सर्व्वे
धनलोभात् समागताः ॥ २९ ॥

सञ्जय उवाच। तं तथावादिनं तत्र राजानं सात्त्वतोऽब्रवीत्।
एवं वृत्तं सदा क्षात्रं युध्यन्तीह गुरूनपि ॥ ३० ॥ यद्यहं ते
प्रियो राजन् जहि मां मा चिरं कृथाः। त्वत्कृते सुकृतान् लोकान्
गच्छेयं भरतर्षभ ॥ ३१ ॥ या ते शक्तिर्बलञ्चैव तत् क्षिप्रं मयि
दर्शय। नेच्छामि तदहं द्रष्टुं मित्राणां व्यसनं महत् ॥ ३२ ॥
इत्येवं व्यक्तमाभाष्य प्रतिभाष्य च सात्यकिः। अन्वयात्तूर्णमव्यग्रो
निरपेक्षं विशाम्पते ॥ ३३ ॥ तमायान्तमभिप्रेक्ष्य प्रत्यगृह्णात्तवा-
त्मजः। शरैश्चावाकिरद्राजन् शैनेयं तनयस्तव ॥ ३४ ॥ ततः
प्रववृते युद्धं कुरुमाधवसिंहयोः। अन्योऽन्यं क्रुद्धयोर्घोरं यथा
द्विरदसिंहयोः ॥ ३५ ॥ ततः पूर्णायतोत्सृष्टैः सात्त्वतं युद्ध-
दुर्म्मदम्। दुर्य्योधनः प्रत्यविध्यत् सात्त्वतं निशितैः शरैः ॥ ३६ ॥
तं सात्यकिः प्रत्यविध्यत् त्वरं निशितैः शरैः। पञ्चाशता पुन-
श्चाजौ विंशत्या दशभिश्च वै ॥ ३७ ॥ सात्यकिन्तु रणे राजन्
प्रहसंस्तनयस्तव। आकर्णसृष्टैर्निशितैर्विव्याध त्रिंशता शरैः ॥३८॥
ततोऽस्य सशरञ्चापं क्षुरप्रेण द्विधाकरोत्। सोऽन्यत् कार्मुक-
मादाय लघुहस्तस्ततो दृढ़म् ॥ ३९ ॥ सात्यकिर्व्यसृजच्चापि शर-
श्रेणीं सुतस्य ते। तामापतन्तीं सहसा शरश्रेणीं जिघांसया ॥४०

चिच्छेद बहुशो राजन् तत उच्चुक्रुशुर्जनाः। सात्यकिञ्च त्रि-
सप्तत्या पीड़यामास वेगितः ॥ ४१ ॥ स्वर्णपुङ्खैः शिलाधौतै-
राकर्णपूर्णनिःसृतैः। तस्य सन्दधतश्चेषून् संहितेषु कार्मुकम्
॥ ४२ ॥ अच्छिनत् सात्यकिस्तूर्णं शरैश्चैवाभ्यवीवृषत्। स गाढ़-
विद्धो व्यथितः प्रत्यपायाद्रथान्तरम् ॥ ॥४३॥ दुर्य्योधनो महाराज
दाशार्हशरपीड़ितः। समाश्वस्य तु पुत्रस्ते सात्यकिं पुनरभ्ययात्
॥ ४४ ॥ विसृजन्निषुजालानि युयुधाने रथं प्रति। तथैव
सात्यकिर्बाणान् दुर्य्योधनरथं प्रति ॥ ४५ ॥ सततं व्यसृजद्राजं-
स्तत्सङ्कुलमवर्त्तत। तत्रेषुभिः क्षिप्यमाणैः पतद्भिश्च समन्ततः ॥४६॥
अग्नेरिव महाकक्षे शब्दः समभवन्महान्। तयोः शरसहस्रैश्च
संच्छन्नं वसुधातलम् ॥ ४७ ॥ अगम्यरूपञ्च शरैराकाशं सम-
पद्यत। तत्राप्यधिकमालक्ष्य माधवं रथसत्तमम् ॥ ४८॥ क्षिप्र-
मभ्यपतत् कर्णः परीप्संस्तनयं तव। न तु तं मर्षयामास भीम-
सेनो महाबलः ॥ ४९ ॥ अभ्ययात्त्वरितः कर्णं व्यसृजत् सायकान्
बहून्। तस्य कर्णः शितान् बाणान् प्रतिहन्य हसन्निव ॥ ५० ॥
धनुः शरांश्च चिच्छेद सूतञ्चाभ्यहनच्छरैः। भीमसेनस्तु संक्रुद्धो
गदामादाय पाण्डवः ॥ ५१ ॥ ध्वजं धनुश्च सूतञ्च सम्ममर्द्दाहवे
रिपोः। रथचक्रञ्च कर्णस्य बभञ्ज स महाबलः ॥ ५२ ॥ भग्ने
चक्रे रथे तिष्ठन्नाकम्पच्छैलराड़िव। एकचक्रं रथं तस्य तमूहुः
सुचिरं हयाः ॥ ५३ ॥ एकचक्रमिवार्कस्य रथं सप्त हया यथा।
अमृष्यमाणः कर्णस्तु भीमसेनमयुध्यत ॥ ५४ ॥ विविधैरिषुजालैश्च
नानाशस्त्रैश्च संयुगे। भीमसेनस्तु संक्रुद्धः सूतपुत्रमयोधयत् ॥५५॥
सङ्कुले वर्त्तमाने तु राजा धर्मसुतोऽब्रवीत्। पाञ्चालानां रथ-
व्याघ्रान्मत्स्यांश्चैव नरर्षभान् ॥ ५६ ॥ ये नः प्राणाः शिरो ये च
ये नो योधा महाबलाः। त एते धार्त्तराष्ट्रेषु विषक्ताः पुरुष-
र्षभाः ॥ ५७ ॥ किं तिष्ठत यथा मूढ़ाः सर्वे विगतचेतसः। तत्र

गच्छत यत्रैते युध्यन्ते मामका रथाः॥ ५८॥ चत्रधर्मं पुरस्कृत्य सर्व एव गतज्वराः। जयन्तो बध्यमाना वा गतिमिष्टां गमिष्यथ ॥ ५९॥ जित्वा च बहुभिर्यज्ञैर्यजध्वं भूरिदक्षिणैः। हता वा देवसाद्भूत्वा लोकान् प्राप्स्यथ पुष्कलान्॥ ६०॥ ते राज्ञा चोदिता वीरा योत्स्यमाना महारथाः। चात्रधर्मं पुरस्कृत्य त्वरिता द्रोणमभ्ययुः॥ ६१॥ पाञ्चालास्त्वेकतो द्रोणमभ्यघ्नन् बहुभिः शरैः। भीमसेनपुरोगाश्चाप्येकतः पर्य्यवारयन्॥ ६२॥ आसंस्तु पाण्डुपुत्राणां त्रयो जिह्मा महारथाः। यमौ च भीमसेनश्च प्राक्रोशन्त धनञ्जयम्॥ ६३॥ अभिद्रवार्ज्जुन क्षिप्रं कुरून् द्रोणादपानुद। तत एनं हनिष्यन्ति पाञ्चाला हतरक्षिणम्॥६४॥ कौरवेयांस्ततः पार्थः सहसा समुपाद्रवत्। पाञ्चालानेव तु द्रोणो धृष्टद्युम्नपुरोगमान्। मम्दुस्तरसा वीराः पञ्चमेऽहनि भारत॥६५

इति द्रोणपर्व्वणि द्रोणवधपर्व्वणि सङ्कुलयुद्ध नवत्यधिकशततोऽध्यायः॥ १९०॥

---

सञ्जय उवाच। पाञ्चालानां ततो द्रोणस्त्वकरोत् कदनं महत्। यथा क्रुद्धो रणे शक्रो दानवानां चयं पुरा॥ १॥ द्रोणास्त्रेण महाराज वध्यमानाः परे युधि। नात्रसन्त रणे द्रोणात् सत्त्ववन्तो महारथाः॥२॥ युध्यमाना महाराज पाञ्चालाः सृञ्जयास्तथा। द्रोणमेवाभ्ययुर्युद्धे योधयन्तो महारथाः॥ ३॥ तेषान्तु छाद्यमानानां पाञ्चालानां समन्ततः। अभवद्भैरवो नादो वध्यतां शरशक्तिभिः॥ ४॥ वध्यमानेषु संग्रामे पाञ्चालेषु महात्मना। उदीर्य्यमाणे द्रोणास्त्रे पाण्डवान् भयमाविशत्॥ ५॥ दृष्ट्वाश्वनरयोधानां विपुलञ्च चयं युधि। पाण्डवेयाश्च महाराज नाशशंसुर्ज्जयं तदा॥ ६॥ कच्चित् द्रोणो न नः सर्वान् चपयेत्

परमास्त्रवित् । समिद्धः शिशिरापाये दहन् कच्चमिवानलः ॥ ७ ॥
न चैनं संयुगे कश्चित् समर्थः प्रतिवीक्षितुम् । न चैनमर्जुनो जातु
प्रतियुध्येत धर्मवित् ॥ ८ ॥ त्रस्तान् कुन्तीसुतान् दृष्ट्वा द्रोण-
सायकपीड़ितान् । मतिमान् श्रेयसे युक्तः केशवोऽर्जुनमब्रवीत्
॥ ९ ॥ नैष युद्धेन संग्रामे जेतुं शक्यः कथञ्चन । सधनुर्धन्विनां
श्रेष्ठो देवैरपि सवासवैः ॥ १० ॥ न्यस्तशस्त्रस्तु संग्रामे शक्यो
हन्तुं भवेन्नृभिः । आस्थीयतां जये योगो धर्मसुतस्त्वच्य पाण्डवाः
॥ ११ ॥ यथा नः संयुगे सर्वान्न हन्याद्रुक्मवाहनः । अश्वत्थाम्नि
हते नैष युध्येदिति मतिर्मम ॥ १२ ॥ तं हतं संयुगे कश्चिदस्मै
शंसतु मानवः । एतन्नारोचयद्राजन् कुन्तीपुत्रो धनञ्जयः ॥१३ ॥
अन्ये त्वरोचयन् सर्वे कृच्छ्रेण तु युधिष्ठिरः । ततो भीमो महा-
बाहुरनीके स्वे महागजम् ॥ १४ ॥ जघान गदया राजन्नश्व-
त्थामानमित्युत । परप्रमथनं घोरं मालवस्येन्द्रवर्मणः ॥ १५ ॥
भीमसेनस्तु सव्रीड़ उपेत्य द्रोणमाहवे । अश्वत्थामा हत इति
शब्दमुच्चैश्चकार सः ॥ १६ ॥ अश्वत्थामेति हि गजः ख्यातो
नाम्नाहतोऽभवत् । कृत्वा मनसि तं भीमो मिथ्या व्याहृतवांस्तदा
॥ १७ ॥ भीमसेनवचः श्रुत्वा द्रोणस्तत् परमाप्रियम् । मनसो
सन्नगात्रोऽभूत् यथा सैकतमम्भसि ॥ १८ ॥ शङ्कमानः स तन्मिथ्या
वीर्यज्ञः स्वसुतस्य वै । हतः स इति च श्रुत्वा नैव धैर्यादकम्पत
॥ १९ ॥ स लब्ध्वा चेतनां द्रोणः क्षणेनैव समाश्वसत् । अनु-
चिन्त्यात्मनः पुत्रमविषह्यमरातिभिः ॥ २० ॥ स पार्षतमभिद्रुत्य
जिघांसुर्मृत्युमात्मनः । अवाकिरत् सहस्रेण तीक्ष्णानां कङ्कपत्रि-
णाम् ॥ २१ ॥ तं वै विंशतिसाहस्राः पाञ्चालानां रथर्षभाः ।
तथा चरन्तं संग्रामे सर्वतो व्यकिरन् शरैः ॥ २२ ॥ तैः शरैरावृतं
द्रोणं नापश्याम महारथम् । भास्करं जलदैरुद्धं वर्षास्विव विशा-
म्पते ॥ २३ ॥ विधूय तान् बाणगणान् पाञ्चालानां महारथः ।

प्रादुश्चक्रे ततो द्रोणो ब्राह्ममस्त्रं परन्तपः ॥ २४ ॥ बधाय तेषां शूराणां पाञ्चालानाममर्षितः। ततो व्यरोचत द्रोणो विधूमोऽग्निरिव ज्वलन् ॥ २५ ॥ तथैव स पुनः क्रुद्धो भारद्वाजः प्रतापवान्। ततो व्यरोचत द्रोणो विनिघ्नन् सर्वसोमकान् ॥ २६ ॥ शिरांस्यापातयच्चापि पाञ्चालानां महामृधे। तथैव परिघाकारान् बाहून् कनकभूषणान् ॥ २७ ॥ ते वध्यमानाः समरे भारद्वाजेन पार्थिवाः। मेदिन्यामन्वतीर्य्यन्त वाततुन्ना इव द्रुमाः ॥ २८ ॥ कुञ्जराणाञ्च पततां हयानाञ्चैव भारत। अगम्यरूपा पृथिवी मांसशोणितकर्द्दमा ॥ २९ ॥ हत्वा विंशतिसाहस्रान् पाञ्चालानां रथव्रजान्। अतिष्ठदाहवे द्रोणो विधूमोऽग्निरिव ज्वलन् ॥ ३० ॥ तथैव स पुनः क्रुद्धो भारद्वाजः प्रतापवान्। वसुदानस्य भल्लेन शिरः कायादपाहरत् ॥ ३१ ॥ पुनः पञ्चशतान् मत्स्यान् षट्सहस्रांश्च सृञ्जयान्। हस्तिनामयुतं हत्वा जघानाश्वायुतं पुनः ॥ ३२ ॥ क्षत्रियाणामभावाय दृष्ट्वा द्रोणमवस्थितम्। ऋषयोऽभ्यागमंस्तूर्णं हव्यवाहपुरोगमाः ॥ ३३ ॥ विश्वामित्रो जमदग्निर्भारद्वाजोऽपि गौतमः। वशिष्ठः कश्यपोऽत्रिश्च ब्रह्मलोकं निनीषवः ॥ ३४ ॥ सिकताः पृश्नयो गर्गा वालिखिल्या मरीचिपाः। भृगवोऽङ्गिरसश्चैव सूक्ष्माश्चान्ये महर्षयः ॥ ३५ ॥ त एनमब्रुवन् सर्वे द्रोणमाहवशोभिनम्। अधर्मतः कृतं युद्धं समयो निधनस्य ते ॥ ३६ ॥ न्यस्यायुधं रणे द्रोण समीत्यास्मानिह स्थितान्। नातः क्रूरतरं कर्म पुनः कर्त्तुं त्वमर्हसि ॥ ३७ ॥ वेदवेदाङ्गविदुषः सत्यधर्मपरस्य ते। ब्राह्मणस्य विशेषेण तवैतन्नोपपद्यते ॥ ३८ ॥ न्यस्यायुधममोहस्त्वं तिष्ठ वर्त्मनि शाश्वते। परिपूर्णस्तु कालस्ते वस्तुं लोकेऽद्य मानुषे ॥ ३९ ॥ ब्रह्मास्त्रेण त्वदग्धा अनस्त्रज्ञा नरा भुवि। यदेतदीदृशं विप्र कृतं कर्म न साधु तत् ॥ ४० ॥ न्यस्यायुधं रणे क्षिप्रं द्रोण मा त्वं चिरं कृथाः। मा पापिष्ठतरं कर्म

करिष्यसि पुनर्द्विज ॥ ४१ ॥ इति तेषां वचः श्रुत्वा भीमसेनवचश्च तत्। धृष्टद्युम्नञ्च सम्प्रेक्ष्य रणे स विमनाभवत् ॥ ४२ ॥ सन्दह्यमानो व्यथितः कुन्तीपुत्रं युधिष्ठिरम्। अहतं वा हतं वेति पप्रच्छ सुतमात्मनः ॥ ४३ ॥ स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यतेऽनृतम्। त्रयाणामपि लोकानामैश्वर्य्यार्थे कथञ्चन ॥ ४४ ॥ तस्मात्तं परिपप्रच्छ नान्यं कञ्चिद्द्विजर्षभः। तस्मिंस्तस्य हि सत्याशा बाल्यात् प्रभृति पाण्डवे ॥ ४५ ॥ ततो निष्पाण्डवामुर्वीं करिष्यन्तं युधाम्पतिम्। द्रोणं ज्ञात्वा महाराजं गोविन्दो व्यथितोऽब्रवीत् ॥४६॥ यद्यर्द्धदिवसं द्रोणो युध्यते मन्युमास्थितः। सत्यं ब्रवीमि ते सेना विनाशं समुपैष्यति ॥ ४७ ॥ स भवांस्त्रातु नो द्रोणात् सत्याज्ज्यायोऽनृतं वचः। अनृतं जीवितस्यार्थे वदन्न स्पृश्यतेऽनृतैः ॥४८॥ कामिनीषु विवाहेषु गवां भक्ते तथैव च। ब्राह्मणाभ्युपपत्तौ च अनृते नास्ति पातकम् ॥ ४९ ॥ तयोः सम्वदतोरेवं भीमसेनोऽब्रवीदिदम्। श्रुत्वैवं ते महाराज वधोपायं महात्मनः ॥ ५० ॥ गाहमानस्य ते सेनां मालवस्येन्द्रवर्मणः। अश्वत्थामेति विक्रान्तो गजः शक्रगजोपमः ॥ ५१ ॥ निहतो युधि विक्रम्य ततोऽहं द्रोणमब्रुवम्। अश्वत्थामा हतो ब्रह्मन्निवर्त्तस्वाहवादिति ॥५२॥ नूनं नाश्रद्दधद्वाक्यमेष मे पुरुषर्षभ। स त्वं गोविन्दवाक्यानि मानयस्व जयैषिणः ॥ ५३ ॥ द्रोणाय निहतं शंस राजन् शारद्वतीसुतम्। त्वयोक्तो नैष युध्येत जातु राजन् द्विजर्षभः ॥ ५४ ॥ सत्यवान् हि त्रिलोकेऽस्मिन् भवान् ख्यातो जनाधिप। तस्य तद्वचनं श्रुत्वा कृष्णवाक्यप्रचोदितः ॥ ५५ ॥ भावित्वाच्च महाराज वक्तुं समुपचक्रमे। तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः ॥५६॥ अव्यक्तमब्रवीद्वाक्यं हतः कुञ्जर इत्युत। तस्य पूर्वं रथः पृथ्व्यां चतुरङ्गुलमुन्नतः ॥ ५७ ॥ बभूवैवन्तु तेनोक्ते तस्य वाहाः स्पृहन्महीम्। युधिष्ठिरात्तु तद्वाक्यं श्रुत्वा द्रोणो महारथः ॥ ५८ ॥

पुत्रव्यसनसन्तप्तो निराशो जीवितेऽभवत्। आगस्कृतमिवात्मानं पाण्डवानां महात्मनाम्॥ ५९॥ ऋषिवाक्येन मन्वानः श्रुत्वा विनिहतं सुतम्। विचेताः परमोद्विग्नो धृष्टद्युम्नमवेक्ष्य च। योद्धुं नाशक्नुवद्राजन् यथा पूर्वमरिन्दम॥ ६०॥

इति द्रोणपर्ब्बणि द्रोणवधपर्व्वणि युधिष्ठिरासत्यकथने
एकनवत्यधिकशततोऽध्यायः॥ १९१॥

---

सञ्जय उवाच। तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसम्। पाञ्चालराजस्य सुतो धृष्टद्युम्नः समाद्रवत्॥ १॥ य इष्ट्वा मनुजेन्द्रेण द्रुपदेन महामखे। लब्धो द्रोणविनाशाय समिद्धाद्धव्यवाहनात्॥ २॥ स धनुर्जैत्रमादाय घोरं जलदनिस्वनम्। दृढ़ज्यमजरं दिव्यं शरांश्चाशीविषोपमान्॥ ३॥ सन्दधे कार्मुके तस्मिंश्छरमाशीविषोपमम्। द्रोणं जिघांसुः पाञ्चाल्यो महाज्वालमिवानलम्॥ ४॥ तस्य रूपं शरस्यासीद्धनुर्ज्यामण्डलान्तरे। द्योततो भास्करस्येव घनान्ते परिवेषिणः॥ ५॥ पार्षतेन परामृष्टं ज्वलन्तमिव तद्धनुः। अन्तकालमनुप्राप्तं मेनिरे वीक्ष्य सैनिकाः॥ ६॥ तमिषुं सन्धितं तेन भारद्वाजः प्रतापवान्। दृष्ट्वामन्यत देहस्य कालपर्य्यायमागतम्॥ ७॥ ततः प्रयत्नमातिष्ठदाचार्य्यस्तस्य वारणे। न चास्यास्त्राणि राजेन्द्र प्रादुरासन्महात्मनः॥ ८॥ तस्य त्वहानि चत्वारि क्षपा चैकास्यतो गता। तस्य चाह्नस्त्रिभागेन क्षयं जग्मुः पतत्रिणः॥ ९॥ स शरक्षयमासाद्य पुत्रशोकेन चार्द्दितः। विविधानाञ्च दिव्यानामस्त्राणामप्रसादतः॥ १०॥ उत्स्रष्टुकामः शस्त्राणि विप्रवाक्यप्रचोदितः। तेजसा पूर्य्यमाणस्तु युयुधे न यथा पुरा॥ ११॥ अथान्यत् स समादाय दिव्यमाङ्गिरसं धनुः। शरांश्च ब्रह्मदण्डा-

भान् धृष्टद्युम्नमयोधयत्॥ १२ ॥ ततस्तं शरवर्षेण महता समवाकिरत्। व्यशातयच्च संक्रुद्धो धृष्टद्युम्नममर्षणम्॥ १३ ॥ शरांश्च शतधा चास्य द्रौणिश्चिच्छेद सायकैः। ध्वजं धनुश्च निशितैः सारथिञ्चाभ्यपातयत्॥ १४॥ धृष्टद्युम्नः प्रहस्यान्यत् पुनरादाय कार्मुकम्। शितेन चैनं वाणेन प्रत्यविध्यत् स्तनान्तरे॥ १५॥ सोऽतिविद्धो महेष्वासः सम्भ्रान्त इव संयुगे। भल्लेन शितधारेण चिच्छेदास्य पुनर्धनुः॥ १६॥ यच्चास्य वाणं विक्रतं धनूंषि च विशाम्पते। सर्वञ्चिच्छेद दुर्द्धर्षो गदां खड्गञ्च वर्जयन्॥ १७॥ धृष्टद्युम्नं ततोऽविध्यन्नवभिर्न्निशितैः शरैः। जीवितकान्तरैः क्रुद्धः क्रुद्धरूपं परन्तप॥ १८॥ धृष्टद्युम्नो रथस्याश्वान् स्वरथाश्वैर्महारथः। व्यामिश्रयदमेयात्मा ब्राह्ममस्त्रमुदीरयन्॥ १९॥ तैर्मिश्रा वह्वशोभन्त जवना वातरंहसः। पारावतसवर्णाश्चा शोणाश्वाः भरतर्षभ॥ २० ॥ यथा सविद्युतो मेघा नदन्तो जलदागमे। तथा रेजुर्महाराज विमिश्रा रणमूर्द्धनि॥ २१॥ ईषाबन्धं चक्रवन्धं रथवन्धं तथैव च। प्राणाशयदमेयात्मा धृष्टद्युम्नस्य स द्विजः॥ २२॥ स छिन्नधन्वा विरथो हताश्वो हतसारथिः। उत्तमामापदं प्राप्य गदा वीरः परा मृशत्॥ २३ ॥ तामस्य विशिखैस्तीक्ष्णैः चिप्यमाणां महारथः। निजघान शरैर्द्रोण क्रुद्धः सत्यपराक्रमः॥ २४॥ तां दृष्ट्वा स नरव्याघ्रो द्रोणेन निहतां शरैः। विमलं खड्गमादत्त शरचन्द्रञ्च भानुमत्॥२५॥ असंशयं तथा भूते पाञ्चाल्यः साध्वमन्यत। बधमाचार्य्यमुख्यस्य प्राप्तकालं महात्मनः॥ २६॥ ततः स्वरथनीड़स्थं स्वरथस्य रथेषया। अगच्छदसिमुद्यम्य शतचन्द्रञ्च भानुमत्॥ २७॥ चिकीर्षुर्दुष्करं मोहाद्धृष्टद्युम्नो महारथः। इयेष वक्षो भेत्तुञ्च भारद्वाजस्य संयुगे॥ २८॥ सोऽतिष्ठद्युगमध्ये वै युगसन्नहनेषु च। शोणानां जघनार्द्धेषु तत् सैन्याः समपूजयन्॥ २९॥ तिष्ठतो

युगपालीषु घोणानप्यधितिष्ठतः । नापश्यदन्तरं द्रोणस्तदद्भुत-
मिवाभवत् ॥ ३० ॥ क्षिप्रं श्येनस्य चरतो यथैवामिषकाङ्क्षिणः ।
तद्वदासीदभीसारो द्रोणपार्षतयोरणे ॥ ३१ ॥ तस्याश्वान्रथ-
शक्त्यासौ तदा क्रुद्धः पराक्रमी । सर्व्वानेकैकशो द्रोणो नीलवर्णा-
नजीघनत् ॥ ३२ ॥ ते हता न्यपतन् भूमौ धृष्टद्युम्नस्य वाजिनः ।
शोणाश्वाः पर्य्यमुच्यन्त रथबन्धाद्विशाम्पते ॥ ३३ ॥ तान् हया-
न्निहतान् दृष्ट्वा द्विजाग्र्येण स पार्षतः । नामृष्यत युधां श्रेष्ठो
याज्ञसेनिर्महारथ ॥ ३४ ॥ विरथः स गृहीत्वा तु खड्गं
खड्गभृताम्वरः । द्रोणमभ्यपतद्राजन् वैनतेय इवोरगम् ॥ ३५ ॥
तस्य रूपं बभौ राजन् भारद्वाजं जिघांसतः । यथा रूपं पुरा
विष्णोर्हिरण्यकशिपोर्वधे ॥ ३६ ॥ सोऽचरद्विविधान् मार्गान्
प्रवरानेकविंशतिम् । दर्शयामास कौरव्य पार्षतो विचरन्रणे ॥३७॥
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं प्रसृतं सृतम् । परिवृत्तं निवृत्तञ्च
खड्गं चर्म च धारयन् ॥ ३८ ॥ सम्पातं समुदीर्णञ्च दर्शयामास
पार्षतः । भारतं कौशिकञ्चैव सात्वतञ्चैव शिक्षया ॥ ३९ ॥
दर्शयन्नचरद्युद्धे द्रोणस्यान्तचिकीर्षया । चरतस्तस्य तान्मार्गान्
विचित्रान् खड्गचर्म्मिणः ॥ ४० ॥ व्यस्मयन्त रणे योधा देवताश्च
समागताः । ततः शरसहस्रेण शतचन्द्रमपातयत् ॥ ४१ ॥ खड्ग-
ञ्चर्म च सम्बाधे धृष्टद्युम्नस्य स द्विजः । ते तु वैतस्तिका नाम
शरा ह्यासन्नयोधिनः ॥ ४२ ॥ निकृष्टयुद्धे द्रोणस्य नान्येषां सन्ति
ते शराः । ऋते शारद्वतात् पार्थाद्द्रौणेर्वैकर्त्तनात्तथा ॥ ४३ ॥
प्रद्युम्नयुयुधानाभ्यामभिमन्योश्च ते शराः । अथेषुं स समाधत्त
दृढं परमवेगिनम् ॥ ४४ ॥ अन्तेवासिनमाचार्य्यो जिघांसुः पुत्र-
सम्मितम् । तं शरैर्दशभिस्तीक्ष्णैश्चिच्छेद शिनिपुङ्गवः ॥ ४५ ॥
पश्यतस्तव पुत्रस्य कर्णस्य च महात्मनः । ग्रस्तमाचार्य्यमुख्येन
धृष्टद्युम्नममोचयत् ॥ ४६ ॥ चरन्तं रथमार्गेषु सात्यकिं सत्य-

विक्रमम् । द्रोणकर्णान्तरगतं कृपस्यापि च भारत ॥ ४७ ॥ अपश्येतां महात्मानौ विष्वक्सेनधनञ्जयौ । अपूजयेतां वार्ष्णेयं ब्रुवाणं साधु साध्विति ॥ ४८ ॥ दिव्यान्यस्त्राणि सर्वेषां युधि निघ्नन्तमच्युतम् । अभिपत्य ततः सेना विष्वक्सेनधनञ्जयौ ॥४९॥ धनञ्जयस्ततः कृष्णमब्रवीत् पश्य केशव । आचार्य्यरथमुख्यानां मध्ये क्रीड़न्मधूद्वहः ॥ ५० ॥ आनन्दयति मां भूयः सात्यकिः सत्यविक्रमः । माद्रीपुत्रञ्च भीमञ्च राजानञ्च युधिष्ठिरम् ॥ ५१ ॥ यः शिक्षयानुद्धतः सन् रणे चरति सात्यकिः । महारथानुपक्रीड़न् वृष्णीनां कीर्त्तिवर्द्धनम् ॥ ५२ ॥ तमेते प्रतिनन्दन्ति सिद्धाः सैन्याश्च विस्मिताः । अजेयं समरे दृष्ट्वा साधु साध्विति सात्त्वतम् । योधाश्चोभयतः सर्वे कर्मभिः समपूजयन् ॥ ५३ ॥

इति द्रोणपर्वणि द्रोणवधपर्वणि द्रोणधृष्टद्युम्नयुद्धे
द्विनवत्यधिकशततोऽध्यायः ॥ १९२ ॥

---

सञ्जय उवाच । सात्त्वतस्य तु तत् कर्म दृष्ट्वा दुर्य्योधनादयः । शैनेयं सर्वतः क्रुद्धा वारयामासुरञ्जसा ॥ १ ॥ कृपः कर्णोऽथ समरे तव पुत्राश्च मारिष । शैनेयं त्वरयाभ्येत्य विनिघ्नन् निशितैः शरैः ॥ २ ॥ युधिष्ठिरस्ततो राजा माद्रीपुत्रौ च पाण्डवौ । भीमसेनश्च बलवान् सात्त्वतं पर्य्यवारयन् ॥ ३ ॥ कर्णश्च शरवर्षेण गौतमश्च महारथः । दुर्य्योधनादयश्चैव शैनेयं पर्य्यवारयन् ॥ ४ ॥ तां वृष्टिं सहसा राजन्नुत्थितां घोररूपिणीम् । वारयामास शैनेयो योधयंस्तान्महारथान् ॥ ५ ॥ तेषामस्त्राणि दिव्यानि सन्धितानि महात्मनाम् । वारयामास विधिवद्दिव्यैरस्त्रैर्महामृधे ॥ ६ ॥ क्रूरमायोधनं जज्ञे तस्मिन्राजसमागमे । रुद्रस्येव हि क्रुद्धस्य निघ्नतस्तान् पशून् पुरा ॥ ७ ॥ हस्तानामुत्तमाङ्गानां

कार्मुकाणाञ्च भारत। छत्राणाञ्चापविद्धानां चामराणाञ्च सञ्चयैः
॥ ८ ॥ रश्मयः स्म व्यदृश्यन्त तत्र तत्र रणाजिरे। भग्नचक्रै-
रथैश्चापि पतितैश्च महाभुजैः ॥ ९ ॥ वाजिभिश्च हतैः शूरैः
सङ्कीर्णा वसुधाभवत्। बाणपातनिकृत्तास्तु योधास्ते कुरुसत्तम
॥ १० ॥ चेष्टन्तो विविधाश्चेष्टा व्यदृश्यन्त महाहवे। वर्त्तमाने
तथा युद्धे घोरे देवासुरोपमे ॥ ११ ॥ अब्रवीत् क्षत्रियांस्तत्र धर्म-
राजो युधिष्ठिरः। अभिद्रवत संयत्ताः कुम्भयोनिं महारथाः
॥ १२ ॥ एष हि पार्षतो वीरो भारद्वाजेन सङ्गतः। घटते च
यथाशक्ति भारद्वाजस्य नाशने ॥ १३ ॥ यादृशानि हि रूपाणि
दृश्यन्ते स्म महारणे। अद्य द्रोणञ्च संक्रुद्धः पातयिष्यति पार्षतः
॥ १४ ॥ ते यूयं सहिता भूत्वा युध्यध्वं कुम्भसम्भवम्। युधिष्ठिर-
समाज्ञप्ताः सृञ्जयानां महारथाः ॥ १५ ॥ अभ्यद्रवन्त संयत्ता
भारद्वाजं जिघांसवः। तान् समापततः सर्वान् भारद्वाजो महा-
रथः ॥ १६ ॥ अभ्यवर्त्तत वेगेन मर्त्तव्यमिति निश्चितः। प्रयाते
सत्यसन्धे तु समकम्पत मेदिनी ॥ १७ ॥ ववुर्वातास्ततो घोरा-
स्त्रासयाना वरूथिनीम्। पपात महती चोल्का आदित्यान्निश्चर-
न्निव ॥ १८ ॥ दीपयन्तीव पाकेन शंसतीव महद्भयम्। जज्वलु-
श्चैव शस्त्राणि भारद्वाजस्य मारिष ॥ १९ ॥ रथाः स्वनन्ति चात्यर्थं
हयाश्चाश्रूण्यपातयन्। हतौजा इव चाप्यासीद्भारद्वाजो महा-
रथः ॥ २० ॥ प्रास्फुरन्नयनञ्चास्य वामबाहुस्तथैव च। विमनस्को-
ऽभवद्युद्धे दृष्ट्वा पार्षतमग्रतः ॥ २१ ॥ ऋषीणां ब्रह्मवादीनां
स्वर्गस्य गमनं प्रति। सुयुद्धेन ततः प्राणानुत्स्रष्टुमुपचक्रमे ॥२२॥
ततश्चतुर्द्दिशं सैन्यैर्द्रुपदस्याभिसंवृतः। निर्द्दहन् क्षत्रियव्रातान्
द्रोणः पर्य्यचरद्रणे ॥ २३ ॥ हत्वा विंशतिसाहस्रान क्षत्रिया-
नरिमर्द्दनः। दशायुतानि तीक्ष्णाग्रैरवधीद्विशिखैः शितैः ॥ २४ ॥
सोऽतिष्ठदाहवे यत्तो विधूम इव पावकः। क्षत्रियाणामभावाय

ब्राह्मनस्त्रं समास्थितः ॥ २५ ॥ पाञ्चाल्यं विरथं भीमो हतसर्वा-
युधं वशी । अविषह्यं महात्मानं त्वरमाणः समभ्ययात् ॥ २६ ॥
ततः स्वरथमारोप्य पाञ्चाल्यमरिमर्द्दनः । अब्रवीदभिसम्प्रेक्ष्य
द्रोणमस्यन्तमन्तिकात् ॥ २७ ॥ न त्वदन्य इहाचार्य्यं योद्धुमुत्-
सहते पुमान् । त्वरस्व प्राग्वधादस्य त्वयि भारः समाहितः ॥ २८ ॥
स तथोक्तो महाबाहुः सर्वभारसहं नवम् । अभिपत्याददे क्षिप्र-
मायुधप्रवरं दृढ़म् ॥ २९ ॥ संरब्धश्च शरानस्यन् द्रोणं दुर्वारणं
रणे । निवारयिषुराचार्य्यं शरवर्षैरवाकिरत् ॥ ३० ॥ तौ
निवारयतां श्रेष्ठौ संरब्धौ रणशोभिनौ । उदीरयेतां ब्राह्माणि
दिव्यान्यस्त्राण्यनेकशः ॥ ३१ ॥ स महास्त्रैर्महाराज द्रोणमाच्छा-
दयद्रणे । निहत्य सर्वाण्यस्त्राणि भारद्वाजस्य पार्षतः ॥ ३२ ॥
स वशातीन् शिवींश्चैव वाह्लिकान् कौरवानपि । रक्षिष्यमाणान्
संग्रामे द्रोणं व्यधमदच्युतः ॥ ३३ ॥ धृष्टद्युम्नस्ततो राजन् गभ-
स्तिभिरिवांशुमान् । बभौ प्रच्छादयन्नाशाः शरजालैः समन्ततः
॥ ३४ ॥ तस्य द्रोणो धनुश्छित्त्वा विद्ध्वा चैनं शिलीमुखैः । मर्मा-
ण्यभ्यहनद्भूयः स व्यथां परमामगात् ॥ ३५ ॥ ततो भीमो
दृढ़क्रोधो द्रोणस्याश्लिष्य तं रथम् । शनकैरिव राजेन्द्र द्रोणं
वचनमब्रवीत् ॥ ३६ ॥ यदि नाम न युध्येरंश्छिक्षिता ब्रह्मबन्धवः ।
स्वकर्मभिरसन्तुष्टा न स्म क्षत्रं क्षयं व्रजेत् ॥ ३७ ॥ अहिंसा सर्व-
भूतेषु धर्मस्य विस्तरं विदुः । तस्य च ब्राह्मणो मूलं भवान् हि
ब्रह्मवित्तमः ॥ ३८ ॥ श्वपाकवत् म्लेच्छगणान् हत्वा चान्यान्
पृथग्विधान् । अज्ञानान्मूढ़वद्ब्रह्मन् पुत्रदारधनेप्सया ॥ ३९ ॥
एकस्यार्थे बहून् हत्वा पुत्रस्याधर्मविद्यया । स्वकर्मस्थान् विक-
र्मस्थो न व्यपत्रपसे कथम् ॥ ४० ॥ यस्यार्थे शस्त्रमादाय यमपेक्ष्य
च जीवसि । स चाद्य पतितः शेते पृष्ठेनावेदितस्तव ॥ ४१ ॥
धर्मराजेन यद्वाक्यं नाभिशङ्कितुमर्हसि । एवमुक्तस्ततो द्रोणो

भीमेनोत्सृज्य तद्धनुः ॥ ४२ ॥ सर्व्वाण्यस्त्राणि धर्मात्मा हातु-
कामोऽभ्यभाषत । कर्ण कर्ण महेष्वास कृप दुर्य्योधनेति च ॥४३॥
संग्रामे क्रियतां यत्नो ब्रवीम्येष पुनः पुनः । पाण्डवेभ्यः शिवं
वोऽस्तु शस्त्रमभ्युत्सृजाम्यहम् ॥ ४४ ॥ इति तत्र महाराज
प्राक्रोशद्द्रौणिमेव च । स उत्सृज्य रणे शस्त्रं रथोपस्थो निविश्य
च ॥ ४५ ॥ अभयं सर्व्वभूतानां प्रददौ योगयुक्तवान् । तस्य
तच्छिद्रमाज्ञाय धृष्टद्युम्नः समुत्थितः ॥ ४६ ॥ सशरं तद्धनुर्घोरं
संन्यस्याथ रथे ततः । खड्गी रथादवप्लुत्य सहसा द्रोणमभ्य-
यात् ॥ ४७ ॥ हाहाकृतानि भूतानि मानुषाणीतराणि च । द्रोणं
तथा गतं दृष्ट्वा धृष्टद्युम्नवशङ्गतम् ॥ ४८ ॥ हाहाकारं भृशञ्चक्रु-
रहो धिगिति चाब्रुवन् । द्रोणोऽपि शस्त्राण्युत्सृज्य परमं
साम्यमास्थितः ॥ ४९ ॥ तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महा-
तपाः । पुराणं पुरुषं विष्णुं जगाम मनसा परम् ॥ ५० ॥ मुखं
किञ्चित् समुन्नाम्य विष्टभ्य उरमग्रतः । निमीलिताक्षः सत्त्वस्थो
निक्षिप्य हृदि धारणाम् ॥ ५१ ॥ ओमित्येकाक्षरं ब्रह्म ज्योति-
र्भूतो महातपाः । स्मरित्वा देवदेवेशमक्षरं परमं प्रभुम् ॥ ५२ ॥
दिवमाक्रामदाचार्य्यः साक्षात् सद्भिर्दुराक्रमम् । द्वौ सूर्य्याविति
नो बुद्धिरासीत्तस्मिंस्तथा गते ॥ ५३ ॥ एकाग्रमिव चासीद्धि-
ज्योतिर्भिः पूरितं नभः । समपद्यत चार्काभे भारद्वाजदिवाकरे
॥ ५४ ॥ निमेषमात्रेण च तज्ज्योतिरन्तरधीयत । आसीत् किल
किलाशब्दः प्रहृष्टानां दिवौकसाम् ॥ ५५ ॥ ब्रह्मलोकं गते द्रोणे
धृष्टद्युम्ने च मोहिते । वयमेव तदाद्राक्ष्म पञ्च मानुषयोनयः ॥५६॥
योगयुक्तं महात्मानं गच्छन्तं परमाङ्गतिम् । अहं धनञ्जयः पार्थो
भारद्वाजस्य चात्मजः ॥ ५७ ॥ वासुदेवश्च वार्ष्णेयो धर्मराजोऽथ
पाण्डवः । अन्ये सर्व्वे च नापश्यन् भारद्वाजस्य धीमतः ॥ ५८ ॥
महिमानं महाराज योगयुक्तस्य गच्छतः । ब्रह्मलोकञ्च तद्दिव्यं

देवगुह्यं हि तत्परम् ॥ ५९ ॥ गतिमैकान्तिकीं प्राप्तमजानन्तो नृयोनयः। नापश्यन् गच्छमानं हि तं शार्ङ्गमृषिपुङ्गवैः ॥ ६० ॥ आचार्य्यं योगमास्थाय ब्रह्मलोकमरिन्दम। वितुन्नाङ्गं शरव्रातैर्न्यस्तायुधमसृक्क्षरम् ॥ ६१ ॥ धिक्कृतः पार्षतस्तन्तु सर्वभूतैः परामृशत्। तस्य मूर्द्धानमालोक्य गतसत्त्वस्य देहतः ॥ ६२ ॥ किञ्चिद्दब्रुवतः कायाद्विचकर्त्तासिना शिरः। हर्षेण महता युक्तो भारद्वाजे निपातिते ॥ ६३ ॥ सिंहनादरवञ्चक्रे भ्रामयन् खड्गमाहवे। आकर्णपलितः श्यामो वयसाशीतिपञ्चकः ॥ ६४ ॥ त्वत्कृते व्यचरत् सङ्ख्ये स तु षोड़शवर्षवत्। उक्तवांश्च महाबाहुः कुन्तीपुत्रो धनञ्जयः ॥ ६५ ॥ जीवन्तमानयाचार्य्यं मा वधीर्द्रुपदात्मज। न हन्तव्यो न हन्तव्य इति ते सैनिकाश्च ह ॥६६॥ उत्क्रोशन्नर्जुनश्चैव सानुक्रोशस्तमाद्रवत्। क्रोशमानेऽर्जुने चैव पार्थिवेषु च सर्वशः ॥ ६७ ॥ धृष्टद्युम्नोऽवधीद्द्रोणं रथतल्पे नरर्षभ। शोणितेन परिक्लिन्नो रथाद्भूमिमरिन्दमः ॥ ६८ ॥ लोहिताङ्ग इवादित्यो दुर्द्धर्षः समपद्यत। एवं तं निहतं सङ्ख्ये ददृशे सैनिको जनः ॥ ६९ ॥ धृष्टद्युम्नस्ततो राजन् भारद्वाजशिरो महत्। तावकानां महेष्वासः प्रमुखे तत्समाक्षिपत् ॥ ७० ॥ ते तु दृष्ट्वा शिरो राजन् भारद्वाजस्य तावकाः। पलायनकृतोत्साहा दुद्रुवुः सर्वतो दिशः ॥ ७१ ॥ द्रोणस्तु दिवमास्थाय नक्षत्रपथमाविशत्। अहमेव तदाद्राक्षं द्रोणस्य निधनं नृप ॥ ७२ ॥ ऋषेः प्रसादात् कृष्णस्य सत्यवत्याः सुतस्य तु। विधूमामिव संयान्तीमुल्कां प्रज्वलितामिव ॥ ७३ ॥ अपश्याम दिवं स्तब्ध्वा गच्छन्तं तं महाद्युतिम्। हते द्रोणे निरुत्साहाः कुरुपाण्डवसृञ्जयाः ॥ ७४ ॥ अभ्यद्रवन्महावेगास्ततः सैन्यं व्यदीर्य्यत। निहता हतभूयिष्ठाः सङ्ग्रामे निशितैः शरैः ॥७५॥ तावका निहते द्रोणे गतासव इवाभवन्। पराजयमथावाप्य परत्र च मह-

ज्ञयम् ॥ ७६ ॥ उभयेनैव ते हीना नाविदन् धृतिमात्मनः।
अन्विच्छन्तः शरीरन्तु भारद्वाजस्य पार्थिवाः ॥ ७७ ॥ नान्वगच्छ-
न्महाराज कबन्धायुतसंवृते। पाण्डवास्तु जयं लब्ध्वा परत्र च
महद्यशः ॥ ७८ ॥ वाणशङ्खरवांश्चक्रुः सिंहनादांश्च पुष्कलान्।
भीमसेनस्ततो राजन् धृष्टद्युम्नश्च पार्षतः ॥ ७९ ॥ वरूथिन्या-
मनृत्येतां परिष्वज्य परस्परम्। अब्रवीच्च तदा भीमः पार्षतं
शत्रुतापनः ॥ ८० ॥ भूयोऽहं त्वां विजयिनं परिष्वक्ष्यामि पार्षत।
सूतपुत्रे हते पापे धार्त्तराष्ट्रे च संयुगे ॥ ८१ ॥ एतावदुक्त्वा
भीमस्तु हर्षेण महता युतः। बाहुशब्देन पृथिवीं कम्पयामास
पाण्डवः ॥ ८२ ॥ तस्य शब्देन वित्रस्ताः प्राद्रवंस्तावका युधि।
क्षत्रधर्मं समुत्सृज्य पलायनपरायणाः ॥ ८३ ॥ पाण्डवास्तु जयं
लब्ध्वा हृष्टा ह्यासन् विशाम्पते। अरिक्षयञ्च संग्रामे तेन ते सुख-
माप्नुवन् ॥ ८४ ॥

इति द्रोणपर्व्वणि द्रोणवधपर्व्वणि द्रोणवधे
त्रिनवत्यधिकशतोऽध्यायः समाप्तञ्च द्रोणवधपर्व ॥ १९३ ॥

---

## अथ नारायणास्त्रमोक्षपर्व।

सञ्जय उवाच। ततो द्रोणे हते राजन् कुरवः शस्त्र-
पीड़िताः। हतप्रवीरा विध्वस्ता भृशं शोकपरायणाः ॥ १ ॥
उदीर्णांश्च परान् दृष्ट्वा कम्पमानाः पुनः पुनः। अश्रुपूर्णेक्षणा-
स्त्रस्ता दीनाश्चासन् विशाम्पते ॥ २ ॥ विचेतसो हतोत्साहाः
कश्मलाभिहतौजसः। आर्त्तस्वरेण महता पुत्रन्ते पर्य्यवारयन्
॥ ३ ॥ रजस्वला वेपमाना वीक्षमाणा दिशो दश। अश्रुकण्ठा
यथा दैत्या हिरण्याक्षे पुरा हते ॥ ४ ॥ स तैः परिवृतो राजं-
स्त्रस्तैः क्षुद्रमृगैरिव। अशक्नुवन्नवस्थातुमपायात्तनयस्तव ॥ ५ ॥

क्षुत्पिपासापरिग्लानास्ते योधास्तव भारत। आदित्येनेव सन्तप्ता दृढं विमनसोऽभवन् ॥ ६ ॥ भास्करस्येव पतनं समुद्रस्येव शोषणम्। विपर्य्यासं यथा मेरोर्वासवस्येव निर्ज्जयम् ॥ ७ ॥ अमर्षणीयं तद्दृष्ट्वा भारद्वाजस्य पातनम्। त्रस्तरूपतरा राजन् कौरवाः प्राद्रवन् भयात् ॥ ८ ॥ गान्धारराजः शकुनिस्त्रस्तस्त्रस्ततरैः सह। हतं रुक्मरथं दृष्ट्वा प्राद्रवत् सहितो रथैः ॥ ९ ॥ वरूथिनीं वेगवतीं विद्रुतां सपताकिनीम्। परिगृह्य महासेनां सूतपुत्रोऽपयाद्भयात् ॥ १० ॥ रथनागाश्वकलिलामुपहृत्य तु वाहिनीम्। मद्राणामीश्वरः शल्यो वीक्ष्यमाणोऽपयाद्भयात् ॥ ११ ॥ हतप्रवीरैर्भूयिष्ठैर्द्विपैर्बहुपदातिभिः। वृतः शारद्वतोऽगच्छत् कष्टं कष्टमिति ब्रुवन् ॥ १२ ॥ भोजानीकेन शिष्टेन कलिङ्गारट्टवाह्लिकैः। कृतवर्म्मा वृतो राजन् प्रायात् सुजवनैर्हयैः ॥ १३ ॥ पदातिगणसंयुक्तस्त्रस्तो राजन् भयार्द्दितः। उलूकः प्राद्रवत्तत्र दृष्ट्वा द्रोणं निपातितम् ॥ १४ ॥ दर्शनीयो युवा चैव शौर्य्ये च कृतलक्षणः। दुःशासनो भृशोद्विग्नः प्राद्रवद्गजसंवृतः ॥ १५ ॥ रथानामयुतं गृह्य त्रिसाहस्रांश्च दन्तिनः। वृषसेनो ययौ तूर्णं दृष्ट्वा द्रोणं निपातितम् ॥ १६ ॥ गजाश्वरथसंयुक्तो वृतश्चैव पदातिभिः। दुर्य्योधनो महाराज प्रायात्तव महारथः ॥ १७ ॥ संशप्तकगणान् गृह्य हतशेषान् किरीटिना। सुशर्म्मा प्राद्रवद्राजन् दृष्ट्वा द्रोणं निपातितम् ॥ १८ ॥ गजान्रथान् समारुह्य व्युदस्य च हयान् जनाः। प्राद्रवन् सर्वतः सङ्ख्ये दृष्ट्वा रुक्मरथं हतम् ॥ १९ ॥ त्वरयन्तः पितॄनन्ये भ्रातॄनपि च मातुलान्। पुत्रानन्ये वयस्यांश्च प्राद्रवन् कुरवस्तथा ॥ २० ॥ चोदयन्तश्च सैन्यानि स्वस्रीयांश्च तथा परे। सम्बन्धिनस्तथा चान्ये प्राद्रवन्त दिशो दश ॥ २१ ॥ प्रकीर्णकेशा विध्वस्ता न द्वावेकत्र धावतः। नेदमस्तीति पुरुषा हतोत्साहा हतौजसः ॥ २२ ॥ उत्सृज्य कवचानन्ये प्राद्रवंस्तावका विभो।

अन्योऽन्यं ते समाक्रोशन् सैनिका भरतर्षभ ॥ २३ ॥ तिष्ठ तिष्ठेति न च ते स्वयं तत्रावतस्थिरे। धुर्य्यानुत्सृज्य तु रथान् भूषणै-श्चाप्यलङ्कृतान् ॥ २४ ॥ अधिरुह्य हयान् योधाः चिप्रं पद्भि-रचोदयन्। द्रवमाणे तथा सैन्ये त्रस्तरूपे हतौजसि ॥ २५ ॥ प्रतिस्रोत इव ग्राहो द्रोणपुत्रः परानियात्। तस्यासीत् सुमहद्युद्धं शिखण्डिप्रमुखैर्गणैः ॥ २६ ॥ प्रभद्रकैश्च पाञ्चालैश्चेदिभिश्च सकेकयैः। हत्वा बहुविधाः सेनाः पाण्डूनां युद्धदुर्मदाः ॥ २७ ॥ कथञ्चित्सङ्कटान्मुक्तो मत्तद्विरदविक्रमः। द्रवमाणं बलं दृष्ट्वा पलायनकृतक्षणम् ॥ २८ ॥ दुर्य्योधनं समासाद्य द्रोणपुत्रोऽब्रवी-दिदम्। किमियं द्रवते सेना त्रस्तरूपेव भारत ॥ २९ ॥ द्रव-माणं च राजेन्द्र नावस्थापयसे रणे। त्वञ्चापि न यथा पूर्वं प्रकृतिस्थ नराधिपः ॥ ३० ॥ कस्मिन्निदं हते राजन्नयसिंहे बलं तव। एतामवस्थां सम्प्राप्तं तन्ममाचक्ष्व कौरव ॥ ३१ ॥ कर्णप्रभृतयश्चेमे नावतिष्ठन्ति पार्थिवं। अन्येष्वपि च युद्धेषु नैव सेनाद्रवत्तथा ॥ ३२ ॥ कच्चित् चेमं महाराज तव सैन्यस्य भारत। तत्र दुर्य्योधनः श्रुत्वा द्रोणपुत्रस्य भाषितम् ॥ ३३ ॥ घोरमप्रिय-माख्यातुं नाशकत् पार्थिवर्षभः। भिन्ना नौरिव ते पुत्रो निमग्नः शोकसागरे ॥ ३४ ॥ वाष्पेणापिहितो दृष्ट्वा द्रोणपुत्रं रथे स्थितम्। ततः शारद्वतं राजन् सव्रीड़मिदमब्रवीत् ॥ ३५ ॥ शंसेह पूर्वं भद्रन्ते यथा सैन्यमिदं द्रुतम्। अथ शारद्वतो राजन्नार्त्तिमार्च्छन् पुनः पुनः। शशंस द्रोणपुत्राय यथा द्रोणो निपातितः ॥ ३६ ॥

कृप उवाच। वयं द्रोणं पुरस्कृत्य पृथिव्यां प्रवरं रथम्। प्रावर्त्तयाम संग्रामं पाञ्चालैरेव केवलैः ॥३७॥ ततः प्रवृत्ते संग्रामे विमिश्राः कुरुसोमकाः। अन्योऽन्यमभिगर्ज्जन्तः शस्त्रैर्द्देहानपा-तयन् ॥ ३८ ॥ वर्त्तमाने तथा युद्धे चीयमाणेषु संयुगे। धार्त्त-राष्ट्रेषु संक्रुद्धः पिता तेऽस्त्रमुदैरयत् ॥ ३९ ॥ ततो द्रोणो ब्राह्म-

मस्त्रं विकुर्वाणो नरर्षभः। न्यहन् यच्छात्रववान् भल्लैः शतशोऽथ सहस्रशः॥ ४०॥ पाण्डवाः कैकया मत्स्याः पाञ्चालाश्च द्विजोत्तम। सङ्ग्रे द्रोणरथं प्राप्य व्यनशन् कालचोदिताः॥ ४१॥ सहस्रं नरसिंहानां द्विसाहस्रञ्च दन्तिनाम्। द्रोणो ब्रह्मास्त्रयोगेन प्रेषयामास मृत्यवे॥ ४२॥ आकर्णपलितः श्यामो वयसाशीतिपञ्चकः। रणे पर्य्यचरद्द्रोणो वृद्धः षोड़शवर्षवत्॥ ४३॥ क्लिश्यमानेषु सैन्येषु युध्यमानेषु राजसु। अमर्षवशमापन्नाः पाञ्चाला विमुखाभवन्॥ ४४॥ तेषु किञ्चित् प्रभग्नेषु विमुखेषु सपत्नजित्। दिव्यमस्त्रं विकुर्वाणो बभूवार्क इवोदितः॥ ४५॥ स मध्यं प्राप्य पाण्डूनां शररश्मिः प्रतापवान्। मध्यं गत इवादित्यो दुष्प्रेच्यस्ते पिताभवत्॥ ४६॥ ते दह्यमाना द्रोणेन सूर्य्येणेव विराजता। दग्धवीर्य्या निरुत्साहा बभूवुर्गतचेतसः॥ ४७॥ तान् दृष्ट्वा पीड़ितान् वाणैर्द्रोणेन मधुसूदनः। जयैषी पाण्डुपुत्राणामिदं वचनमब्रवीत्॥ ४८॥ नैष जातु परैः शक्यो जेतुं शस्त्रभृताम्वरः। अपि वृत्रहणा सङ्ग्रे रथयूथपयूथपः॥ ४९॥ ते यूयं धर्ममुत्सृज्य जयं रक्षत पाण्डवाः। यथा वः संयुगे सर्वान्न हन्याद्रुक्मवाहनः॥ ५०॥ अश्वत्थाम्नि हते नैष युध्येदिति मतिर्मम। हतं तं संयुगे कश्चिदाख्यात्वस्य मृषा नरः॥ ५१॥ एतन्नारोचयद्वाक्यं कुन्तीपुत्रो धनञ्जयः। अरोचयंस्तु सर्वेऽन्ये कृच्छ्रेण तु युधिष्ठिरः॥ ५२॥ भीमसेनस्तु सव्रीड़मब्रवीत् पितरं तव। अश्वत्थामा हत इति नाचाबुध्यत ते पिता॥ ५३॥ स शङ्कमानस्तन्मिथ्या धर्म्मराजमपृच्छत। हतं वाप्यहतं वाजौ त्वां पिता पुत्रवत्सलः॥ ५४॥ तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः। अश्वत्थामानमायोधे हतं दृष्ट्वा महागजम्॥ ५५॥ भीमेन गिरिवर्ष्माणं मालवस्येन्द्रवर्मणः। अभिसृत्य ततो द्रोणमुच्चैरिदमभाषत॥ ५६॥ यस्यार्थे शस्त्रमाधत्से यमवेच्य च जीवसि। पुत्रस्ते दयितो नित्यं

सोऽश्वत्थामा निपातितः ॥ ५७ ॥ शेते विनिहतो भूमौ वने सिंह-
भिर्युर्यथा। जानन्नप्यनृतस्याथ दोषान् स द्विजसत्तमम् ॥ ५८ ॥
अव्यक्तमब्रवीद्राजा हतः कुञ्जर इत्युत। स त्वां विहतमाक्रन्दे
श्रुत्वा सन्तापपीड़ितः ॥ ५९ ॥ नियम्य दिव्यान्यस्त्राणि नायुध्यत
यथा पुरा। तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसम् ॥ ६० ॥
पाञ्चालराजस्य सुतः क्रूरकर्मा समाद्रवत्। तं दृष्ट्वा विहितं मृत्युं
लोकतत्त्वविचक्षणः ॥ ६१ ॥ दिव्यान्यस्त्राण्यथोत्सृज्य रणे प्राय
उपाविशत्। ततोऽस्य केशान् सव्येन गृहीत्वा पाणिना तदा
॥ ६२ ॥ पार्षतः क्रोशमानानां वीराणामच्छिनच्छिरः। न
हन्तव्यो न हन्तव्य इति ते सर्व्वतोऽब्रुवन् ॥ ६३ ॥ तथैव चार्ज्जुनो
वाहादवरुह्यैनमाद्रवत्। उद्यम्य त्वरितो बाहू ब्रुवाणश्च पुनः
पुनः ॥ ६४ ॥ जीवन्तमानयाचार्य्यं नावधीरपि धर्मवित्। तथापि
बाध्यमानेन कौरवैरर्ज्जुनेन च ॥ ६५ ॥ हत एव नृशंसेन पिता
तव नरर्षभ। सैनिकाश्च ततः सर्व्वे प्राद्रवन्त भयार्द्दिताः। वय-
ञ्चापि निरुत्साहा हते पितरि तेऽनघ ॥ ६६ ॥

सञ्जय उवाच। तच्छ्रुत्वा द्रोणपुत्रस्तु निधनं पितुराहवे।
क्रोधमाहारयत्तीव्रं पदाहत इवोरगः ॥ ६७ ॥ ततः क्रुद्धो रणे
द्रौणिर्भृशं जज्वाल मारिष। यथेन्धनं महत् प्राप्य प्राज्वलद्धव्य-
वाहनः ॥ ६८ ॥ तलं तलेन निष्पिष्य दन्तैर्द्दन्तानुपस्पृशन्।
निःश्वसन्नुरगो यद्वल्लोहिताक्षोऽभवत्तदा ॥ ६९ ॥

इति द्रोणपर्व्वणि नारायणास्त्रमोक्षपर्व्वणि अश्वत्थामावधे
चतुर्नवत्यधिकशततोऽध्यायः ॥ १९४ ॥

---

धृतराष्ट्र उवाच। अधर्म्मेण हतं श्रुत्वा धृष्टद्युम्नेन सञ्जय।
ब्राह्मणं पितरं वृद्धमश्वत्थामा किमब्रवीत् ॥ १ ॥ मानवं वारु-

णाग्नेयं ब्राह्ममस्त्रञ्च बीर्य्यवान् । ऐन्द्रं नारायणञ्चैव यस्मिन्नित्यं प्रतिष्ठितम् ॥ २ ॥ तमधर्म्मेण धर्म्मिष्ठं धृष्टद्युम्नेन संयुगे । श्रुत्वा निहतमाचार्य्यं सोऽश्वत्थामा किमब्रवीत् ॥ ३ ॥ येन रामादवाप्येह धनुर्वेदं महात्मना । प्रोक्तान्यस्त्राणि दिव्यानि पुत्राय गुणकाङ्क्षिणा ॥ ४ ॥ एकमेव हि लोकेऽस्मिन्नात्मनो गुणवत्तरम् । इच्छन्ति पुरुषा लोके पुत्रं नान्यं कथञ्चन ॥ ५ ॥ आचार्य्याणां भवन्त्येव रहस्यानि महात्मनाम् । तानि पुत्राय वा दद्युः शिष्यायानुगताय वा ॥ ६ ॥ स शिष्यः प्राप्य तत्सर्वं स विशेषञ्च सञ्जय । शूरः शारद्वतीपुत्रः सङ्ख्ये द्रोणादनन्तरः ॥ ७ ॥ रामस्यानुमतः सङ्ख्ये पुरन्दरसमो युधि । कार्त्तवीर्य्यसमो वीर्य्ये वृहस्पतिसमो मतौ ॥ ८ ॥ महीधरसमो धृत्या तेजसाग्निसमो युवा । समुद्र इव गाम्भीर्य्ये क्रोधे सर्पविषोपमः ॥ ९ ॥ स रथी प्रथमो लोके जितधन्वा जितक्लमः । शीघ्रोऽनिल इवाक्रन्दे चरन् क्रुद्ध इवान्तकः ॥ १० ॥ अस्यता येन संग्रामे धरण्यभिनिपीड़िता । यो न व्यथति संग्रामे वीरः सत्यपराक्रमः ॥ ११ ॥ वेदस्नातो ब्रतस्नातो धनुर्वेदे च पारगः । महोदधिरिवाक्षोभ्यो रामो दाशरथिर्यथा ॥१२॥ तमधर्म्मेण धर्म्मिष्ठं धृष्टद्युम्नेन संयुगे । श्रुत्वा निहतमाचार्य्यं सोऽश्वत्थामा किमब्रवीत् ॥ १३ ॥ धृष्टद्युम्नस्य यो मृत्युः सृष्टस्तेन महात्मना । यथा द्रोणस्य पाञ्चाल्यो यज्ञसेनसुतोऽभवत् ॥ १४ ॥ तं नृशंसेन पापेन क्षुद्रेणात्यल्पदर्शिना । श्रुत्वा निहतमाचार्य्यमश्वत्थामा किमब्रवीत् ॥ १५ ॥

इतिद्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि अश्वत्थामाक्रोधे पञ्चनवत्यधिकशततोऽध्यायः ॥ १९५ ॥

सञ्जय उवाच। छद्मना निहतं श्रुत्वा पितरं पापकर्मणा। बाष्पेणापूर्य्यत द्रौणी रोषेण च नरर्षभ ॥ १ ॥ तस्य क्रुद्धस्य राजेन्द्र वपुर्द्दीप्तमदृश्यत। अन्तकस्येव भूतानि जिहीर्षोः कालपर्य्यये ॥ २ ॥ अश्रुपूर्णे ततो नेत्रे अपमृज्य पुनः पुनः। उवाच कोपान्निःश्वस्य दुर्य्योधनमिदं वचः ॥ ३ ॥ पिता मम यथा क्षुद्रै-र्न्यस्तशस्त्रो निपातितः। धर्मध्वजवता पापं कृतं तद्विदितं मम ॥ ४ ॥ अनार्य्यं सुनृशंसञ्च धर्मपुत्रस्य मे श्रुतम्। युद्धेष्वपि प्रवृत्तानां ध्रुवौ जयपराजयौ ॥ ५ ॥ द्वयमेतद्भवेद्राजन् वधस्तत्र प्रशस्यते। न्यायवृत्तगो वधो यस्तु सङ्ग्रामे युध्यतो भवेत् ॥ ६ ॥ न स दुःखाय भवति यथा दृष्टो हि स द्विजैः। गतः स वीरलोकाय पिता मम न संशयः ॥ ७ ॥ न शोच्यः पुरुषव्याघ्रस्तथा स निधनं गतः। यत्तु धर्मप्रवृत्तः सन् केशग्रहणमाप्तवान् ॥ ८ ॥ पश्यतां सर्वसैन्यानां तन्मे मर्म्माणि कृन्तति। मयि जीवति मत्तातः केशग्रहणमाप्तवान् ॥ ९ ॥ कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम्। कामात् क्रोधादयाज्ञानात् द्वेषाद्बाल्येन वा पुनः ॥ १० ॥ विधर्मिकाणि कुर्वन्ति तथा परिभवन्ति च। तदिदं पार्षतेनेह महदाधर्मिकं कृतम् ॥ ११ ॥ अवज्ञाय च मां नूनं नृशंसेन दुरात्मना। तस्यानुबन्धं स द्रष्टा धृष्टद्युम्नः सुदारुणम् ॥ १२ ॥ अनार्य्यं परमं कृत्वा मिथ्यावादी स पाण्डवः। यो ह्यसौ छद्मनाचार्य्यं शस्त्रं सन्त्याजयत्तदा ॥ १३ ॥ तस्याद्य धर्मराजस्य भूमिः पास्यति शोणितम्। अपि सत्येन कौरव्य इष्टापूर्त्तेन चैव हि ॥ १४ ॥ अहत्वा सर्वपाञ्चालान् जीवेयं न कथञ्चन। सर्वोपायैर्यतिष्यामि पाञ्चालानां महाहवे ॥ १५ ॥ धृष्टद्युम्नञ्च समरे हन्ताहं पापकारिणम्। कर्मणा येन तेनेह मृदुना दारुणेन च ॥ १६ ॥ पाञ्चालानां वधं कृत्वा शान्तिं लब्धास्मि कौरव। यदर्थं पुरुषव्याघ्र पुत्रानिच्छन्ति मानवाः ॥ १७ ॥ प्रेत्य चेह च सम्प्राप्ता-

स्त्रायन्ते महतो भयात्। पिता तु मम तावस्था प्राप्ता निर्बन्धुना यथा॥ १८॥ मयि शैलप्रतीकाशे पुत्रे शिष्येऽत्र जीवति। धिङ् ममास्त्राणि दिव्यानि धिक् बाहू धिक् पराक्रमम्॥ १९॥ यन्मां द्रोणः सुतं प्राप्य केशग्रहणमाप्तवान्। स तथाहं करिष्यामि यथा भरतसत्तम॥ २०॥ परलोकगतस्यापि भविष्याम्यनृणः पितुः। आर्य्येण तु न कर्त्तव्या कदाचित् स्तुतिरात्मनः॥ २१॥ पितुर्बधममृष्यंस्तु वच्याम्यद्येह पौरुषम्। अद्य पश्यन्तु मे वीर्य्यं पाण्डवाः सजनार्द्दनाः॥ २२॥ मृद्नतः सर्वसैन्यानि युगान्तमिव कुर्वतः। न हि देवा न गन्धर्वा नासुरोरगराक्षसाः॥ २३॥ अद्य शक्ता रणे जेतुं रथस्थं मां नरर्षभाः। मदन्यो नास्ति लोकेऽस्मिन्नर्जुनाद्वास्त्रवित् क्वचित्॥ २४॥ अहं हि ज्वलतां मध्ये मयूखानामिवांशुमान्। प्रयोक्ता देवसृष्टानामस्त्राणां पृतनागतः॥ २५॥ भृशमिष्वासनादद्य मत्प्रयुक्ता महाहवे। दर्शयन्तः शरा वीर्य्यं प्रमथिष्यन्ति पाण्डवान्॥ २६॥ अद्य सर्वा दिशो राजन् धाराभिरिव सङ्कुलाः। आवृताः पत्रिभिस्तीक्ष्णैर्द्रष्टारो मामकैरिह॥२७॥ विकिरन् शरजालानि सर्वतो भैरवस्वनम्। शत्रून्निपातयिष्यामि महावात इव द्रुमान्॥ २८॥ न हि जानाति बीभत्सुस्तदस्त्रं न जनार्द्दनः। न भीमसेनो न यमौ न च राजा युधिष्ठिरः॥२९॥ न पार्षतो दुरात्मासौ न शिखण्डी न सात्यकिः। यदिदं मम कौरव्य सकल्पं सनिवर्त्तनम्॥ ३०॥ नारायणाय मे पिता प्रणम्य विधिपूर्वकम्। उपहारः पुरा दत्तो ब्रह्मरूप उपस्थितः॥ ३१॥ तं स्वयं प्रतिगृह्याथ भगवान् स वरं ददौ। वव्रे पिता मे परममस्त्रं नारायणं ततः॥ ३२॥ अथैनमब्रवीद्राजन् भगवान् देवसत्तमः। भविता तत्समो नान्यः कश्चिद्युधि नरः क्वचित्॥ ३३॥ न त्विदं सहसा ब्रह्मन् प्रयोक्तव्यं कथञ्चन। न ह्येतदस्त्रमन्यत्र वधाच्छत्रोर्निवर्त्तते॥ ३४॥ न चैतच्छक्यते ज्ञातुं कं

न बध्येदिति प्रभो। अबध्यमपि हन्याद्धि तस्मान्नैतत् प्रयोजयेत्
॥ ३५ ॥ अथ सङ्ग्रे रथस्यैव शस्त्राणाञ्च विसर्ज्जने। प्रयाचताञ्च
शत्रूणां गमनं शरणस्य च ॥ ३६ ॥ एते प्रशमने योगा महास्त्रस्य
परन्तप। सर्व्वथा पीड़िते हि स्यादवध्यान् पीड़यन्रणे ॥ ३७ ॥
तज्जग्राह पिता मह्यमब्रवीच्चैव स प्रभुः। त्वं वर्षिष्यसि दिव्यानि
शस्त्रवर्षाण्यनेकशः ॥ ३८ ॥ अनेनास्त्रेण संग्रामे तेजसा प्रज्वलि-
ष्यसि। एवमुक्त्वा स भगवान् दिवमाचक्रमे प्रभुः ॥ ३९ ॥ एत-
न्नारायणादस्त्रं तत् प्राप्तं मम बन्धुना। तेनाहं पाण्डवांश्चैव
पाञ्चालान्मत्स्यकैकयान् ॥ ४० ॥ विद्रावयिष्यामि रणे शचीपति-
रिवासुरान्। यथा यथाहमिच्छेयं तथा भूत्वा शरा मम ॥ ४१ ॥
निपतेयुः सपत्नेषु विक्रमस्यापि भारत। यथेष्टमस्त्रवर्षेण प्रव-
र्षिष्ये रणे स्थितः ॥ ४२ ॥ अयोमुखैश्च विहगैर्द्रावयिष्ये रथो-
त्तमान्। परश्वधांश्च विविधानुत्स्रक्ष्येऽहमसंशयम् ॥ ४३ ॥
सोऽहं नारायणास्त्रेण महता शत्रुतापनः। शत्रून् विध्वंसयि-
ष्यामि कदर्थीकृत्य पाण्डवान् ॥ ४४ ॥ मित्रब्रह्मगुरुद्वेषी जाल्मकः
सुविगर्हितः। पाञ्चालापसदश्चाद्य न मे जीवन् विमोक्ष्यते ॥ ४५ ॥
तच्छ्रुत्वा द्रोणपुत्रस्य पर्य्यवर्त्तत वाहिनी। ततः सर्व्वे महाशङ्खान्
दध्मुः पुरुषसत्तमाः ॥ ४६ ॥ भेरीश्चाभ्यहनन् हृष्टा डिण्डिमांश्च
सहस्रशः। तथा ननाद वसुधा खुरनेमिप्रपीड़िता ॥ ४७ ॥ स
शब्दस्तुमुलः खं द्यां पृथिवीञ्च व्यनादयत्। तं शब्दं पाण्डवाः
श्रुत्वा पर्ज्जन्यनिनदोपमम् ॥ ४८ ॥ समेत्य रथिनां श्रेष्ठाः सहिताः
समभन्त्रयन्। तथोक्त्वा द्रोणपुत्रोऽपि वार्य्युपस्पृश्य भारत। प्रादु-
श्चकार तद्दिव्यमस्त्रं नारायणं तदा ॥ ४९ ॥

इति द्रोणपर्व्वणि नारायणास्त्रमोक्षपर्व्वणि अश्वत्थामक्रोधे
षसवत्यधिकशततोऽध्यायः ॥ १९६ ॥

———

सञ्जय उवाच। प्रादुर्भूते ततस्तस्मिन्नस्त्रे नारायणे तदा। प्रावात् सपृषतो वायुरनभ्रे स्तनयित्नुमान्॥ १॥ चचाल पृथिवी चापि समुद्राश्चैव चुक्षुभुः। प्रतिस्रोतः प्रवृत्ताश्च गन्तुं तत्र समुद्रगाः॥ २॥ शिखराणि व्यदीर्य्यन्त गिरीणां तत्र भारत। अपसव्यं मृगाश्चैव पाण्डुपुत्रान् प्रचक्रिरे॥ ३॥ तमसा चावकीर्य्यन्त सूर्य्यश्च कलुषोऽभवत्। सम्पतन्ति च भूतानि क्रव्यादानि प्रहृष्टवत्॥ ४॥ देवदानवगन्धर्वास्त्रस्ताश्चासन् विशाम्पते। कथं कथाभवत्तीव्रा दृष्ट्वा तद्व्याकुलं महत्॥ ५॥ व्यथिताः सर्वराजानस्त्रस्ताश्चासन् विशाम्पते। तं दृष्ट्वा घोररूपन्तु द्रोणेरस्त्रं भयावहम्॥ ६॥

धृतराष्ट्र उवाच। निवर्त्तितेषु सैन्येषु द्रोणपुत्रेण संयुगे। भृशं शोकाभितप्तेन पितुर्वधममृष्यता॥ ७॥ कुरूनापततो दृष्ट्वा धृष्टद्युम्नस्य रक्षणे। को मन्त्रः पाण्डवस्यासीत्तन्ममाचक्ष्व सञ्जय॥८॥

सञ्जय उवाच। प्रागेव विद्रुतान् दृष्ट्वा धार्त्तराष्ट्रान् युधिष्ठिरः। पुनश्च तुमुलं युद्धं श्रुत्वार्ज्जुनमथाब्रवीत्॥ ९॥

युधिष्ठिर उवाच। आचार्य्ये निहते द्रोणे धृष्टद्युम्नेन संयुगे। निहते वज्रहस्तेन यथा वृत्रे महासुरे॥ १०॥ नाशंसन्त जयं युद्धे दीनात्मानो धनञ्जय। आत्मत्राणे मतिं कृत्वा प्राद्रवन् कुरवो रणात्॥ ११॥ केचिद्भ्रान्तैरथैस्तूर्णं निहतैः पार्ष्णियन्तृभिः। विपताकध्वजच्छत्रैः पार्थिवाः शीर्णकूबरैः॥ १२॥ भग्ननीड़ैराकुलैश्च प्रासन्नान्यान् विचेतसः। भीताः पादैर्हयान् केचित् त्वरयन्तः स्वयं रथान्॥ १३॥ युगचक्राक्षभग्नैश्च द्रुताः केचिद्भयातुराः। हयपृष्ठगताश्चान्ये कृष्यन्तेऽर्द्धच्युतासनाः॥ १४॥ गजस्कन्धैश्च संस्यूता नाराचैश्चलितासनाः। शरार्त्तैर्विद्रुतैर्नागैर्हृताः केचिद्दिशो दश॥ १५॥ विशस्त्रकवचाश्चान्ये वाहनेभ्यः क्षितिङ्गताः। संछिन्ना नेमिभिश्चैव मर्दिताश्च हयद्विपैः॥ १६॥ क्रोशन्तस्तात पुत्रेति पलायन्त्यपरे भयात्। नाभिजानन्ति चान्योन्यं

कश्मलाभिहतौजसः ॥ १७ ॥ पुत्रान् पितॄन् सखीन् भ्रातॄन् समारोप्य दृढ़क्षतान्। जलेन क्लेदयन्त्यन्ये विमुच्य कवचान्यपि ॥ १८ ॥ अवस्थां तादृशीं प्राप्य हते द्रोणे द्रुतं बलम्। पुनरावर्त्तितं केन यदि जानासि शंस मे ॥ १९ ॥ हयानां ह्रेषतां शब्दः कुञ्जराणाञ्च बृंहिताम्। रथनेमिस्वनैश्चात्र विमिश्रः श्रूयते महान् ॥ २० ॥ एते शब्दा भृशं तीव्राः प्रवृत्ताः कुरुसागरे। मुहुर्मुहुरुदीर्य्यन्ते कम्पयन्ति हि मामकान् ॥ २१ ॥ य एष तुमुलः शब्दः श्रूयते लोमहर्षणः। सेन्द्रानप्येव लोकांस्त्रीन् ग्रसेदिति मतिर्मम ॥ २२ ॥ मन्ये वज्रधरस्यैष निनादो भैरवस्वनः। द्रोणे हते कौरवार्थं व्यक्तमभ्येति वासवः ॥ २३ ॥ प्रहृष्टरोमकूपाश्च संविग्ना रथपुङ्गवाः। धनञ्जय गुरुं श्रुत्वा तत्र नादं विभीषणम् ॥ २४ ॥ क एष भैरवान् दीर्णानवस्थाप्य महारथः। निवर्त्तयति युद्धार्थं मृधे देवेश्वरो यथा ॥ २५ ॥

अर्ज्जुन उवाच। उद्यम्यात्मानमुग्राय कर्म्मणे धैर्य्यमास्थितः। धमन्ति कौरवाः शङ्खान् यस्य वीर्य्यमुपाश्रिताः ॥ २६ ॥ यत्र ते संशयो राजन् न्यस्तशस्त्रे गुरौ हते। धार्त्तराष्ट्रनवस्थाप्य क एष नदतीति हि ॥ २७ ॥ ह्रीमन्तं तं महाबाहुं मत्तद्विरदगामिनम्। व्याघ्रास्यमुग्रकर्म्माणं कुरूणामभयङ्करम् ॥ २८ ॥ यस्मिन् जाते ददौ द्रोणो गवां दशशतं धनम्। ब्राह्मणेभ्यो महार्हेभ्य सोऽश्वत्थामैष गर्ज्जति ॥ २९ ॥ जातमात्रेण वीरेण येनोच्चैःश्रवसा इव। ह्रेषता कम्पिता भूमिर्लोकाश्च सकलास्त्रयः ॥ ३० ॥ तच्छ्रुत्वान्तर्हितं भूतं नाम तस्याकरोत् प्रभो। अश्वत्थामेति सोऽद्यैष शूरो नदति पाण्डव ॥ ३१ ॥ यो ह्यनाथ इवाक्रम्य पार्षतेन हतस्तदा। कर्म्मणा सुनृशंसेन तस्य नाथो व्यवस्थितः ॥ ३२ ॥ गुरुं मे यत्र पाञ्चाल्यः केशपक्षे परामृशत्। तन्न जातु क्षमेद्द्रौणिर्ज्जानन् पौरुषमात्मनः ॥ ३३ ॥ उपचीर्णो

गुरुर्मिथ्या भवता राज्यकारणात् । धर्मज्ञेन सता नाम सोऽधर्मः सुमहान् कृतः ॥ ३४ ॥ चिरं स्थास्यति चाकीर्त्तिस्त्रैलोक्ये सचराचरे । रामे वालिवधाद्यद्वदेवं द्रोणे निपातिते ॥ ३५ ॥ सर्वधर्मोपपन्नोऽयं मम शिष्यश्च पाण्डवः । नायं वक्ष्यति मिथ्येति प्रत्ययं कृतवांस्त्वयि ॥ ३६ ॥ स सत्यकञ्चुकं नाम प्रविष्टेन ततोऽनृतम् । आचार्य्य उक्तो भवता हतः कुञ्जर इत्युत ॥ ३७ ॥ ततः शस्त्रं समुत्सृज्य निर्ममो गतचेतनः । आसीत् स विह्वलो राजन् यथा दृष्टस्त्वया विभुः ॥ ३८ ॥ स तु शोकसमाविष्टो विमुखः पुत्रवत्सलः । शाश्वतं धर्ममुत्सृज्य शिष्येण निहतो गुरुः ॥ ३९ ॥ न्यस्तशस्त्रमधर्म्मेण घातयित्वा गुरुं भवान् । रक्षस्त्विदानीं सामात्यो यदि शक्नोषि पार्षतम् ॥ ४० ॥ ग्रस्तमाचार्य्यपुत्रेण क्रुद्धेन हतबन्धुना । सर्वे वयं परित्रातुं न शक्ष्यामोऽद्य पार्षतम् ॥ ४१ ॥ सौहार्द्दं सर्वभूतेषु यः करोत्यतिमानुषः । सोऽद्य केशग्रहं श्रुत्वा पितुर्धक्ष्यति नो रणे ॥ ४२ ॥ विक्रोशमाने हि मयि भृशमाचार्य्यगृद्धिनि । अपाकीर्य्य स्वयं धर्मं शिष्येण निहतो गुरुः ॥ ४३ ॥ यदा गतं वयो भूयः शिष्टमल्पतरञ्च नः । तस्येदानीं विकारोऽयमधर्मोऽयं कृतो महान् ॥४४॥ पितेव नित्यं सौहार्द्दात् पितेव हि च धर्मतः । सोऽल्पकालस्य राज्यस्य कारणाद्घातितो गुरुः ॥ ४५ ॥ धृतराष्ट्रेण भीष्माय द्रोणाय च विशाम्पते । विसृष्टा पृथिवी सर्वा सह पुत्रैश्च तत्परैः ॥ ४६ ॥ सम्प्राप्य तादृशीं वृत्तिं सत्कृतः सततं परैः । अवृणीत सदा पुत्रान्मामेवाभ्यधिकं गुरुः ॥ ४७ ॥ अक्षीयमाणो न्यस्तास्त्रस्त्वद्वाक्ये नाहवे हतः । न हि तं युध्यमानं वै हन्यादपि शतक्रतुः ॥ ४८ ॥ तस्याचार्य्यस्य वृद्धस्य द्रोहो नित्योपकारिणः । कृतो ह्यनार्य्यैरस्माभी राज्यार्थे लघुवृत्तिभिः ॥ ४९ ॥ अहो वत महत्पापं कृतं कर्म सुदारुणम् । यद्राज्यसुखलोभेन द्रोणोऽयं साधुघातितः ॥५०

पितॄन् भ्रातॄन् सुतान् दारान् जीवितञ्चैव वासवि: । त्यजेत् सर्वं मम प्रेम्ना जानात्येवं हि मे गुरु: ॥ ५१ ॥ स मया राजकामेन हन्यमाने ह्युपेक्षित: । तस्मादवाक्शिरा राजन् प्राप्तोऽस्मि नरकं विभो ॥ ५२ ॥ ब्राह्मणं वृद्धमाचार्य्यं न्यस्तशस्त्रं महामुनिम् । घातयित्वाद्य राज्यार्थिन्मृतं श्रेयो न जीवितम् ॥ ५३ ॥

इति द्रोणपर्व्वणि नारायणास्त्रमोक्षपर्व्वणि अर्ज्जुनवाक्ये सप्तनवत्यधिकशतोऽध्याय: ॥ १९७ ॥

---

सञ्जय उवाच । अर्ज्जुनस्य वच: श्रुत्वा नोचुस्तत्र महारथा: । अप्रियं वा प्रियं वापि महाराज धनञ्जयम् ॥ १ ॥ तत: क्रुद्धो महाबाहुर्भीमसेनोऽभ्यभाषत । कुत्सयन्निव कौन्तेयमर्ज्जुनं भरतर्षभ ॥ २ ॥ मुनिर्य्यथारण्यगतो भाषते धर्म्मसंहितम् । न्यस्तदण्डो यथा पार्थ ब्राह्मण: संशितव्रत: ॥ ३ ॥ क्षतत्राता क्षताज्जीवन् हन्ता स्त्रीष्वथ साधुषु । क्षत्रिय: क्षितिमाप्नोति क्षिप्रं धर्म्मयश:श्रिय: ॥ ४ ॥ स भवान् क्षत्रियगुणैर्युक्त: सर्व्वै: कुलोद्वह: । अविपश्चिद्यथा वाचं व्याहरन्नाद्य शोभसे ॥ ५ ॥ पराक्रमस्ते कौन्तेय शक्रस्येव शचीपते: । न चातिवर्त्तसे धर्म्मं वेलामिव महोदधि: ॥६॥ न पूजयेत्त्वां कोन्वद्य यत्त्रयोदशवार्षिकम् । अमर्षं पृष्ठत: कृत्वा धर्म्ममेवाभिकाङ्क्षसे ॥ ७ ॥ दिष्ट्या तात मनस्तेऽद्य स्वधर्म्ममनुवर्त्तते । आनृशंस्यञ्च ते दिष्ट्या बुद्धि: सततमच्युत ॥ ८ ॥ यत्तु धर्म्मप्रवृत्तस्य हृतं राज्यमधर्म्मत: । द्रौपदी च परामृष्टा सभामानीय शत्रुभि: ॥ ९ ॥ वनं प्रव्रजिताश्च स्म वल्कलाजिनवासस: । अनर्हमाणास्तं भावं त्रयोदश समा: परै: ॥ १० ॥ एतान्यमर्षस्थानानि मर्षितानि त्वयानघ । क्षत्रधर्म्मप्रसक्तेन सर्व्वमेतदनुष्ठितम् ॥ ११ ॥ तमधर्म्ममपाक्रष्टुं स्मृत्वाद्य सहितस्त्वया । सानुबन्धान्

हनिष्यामि क्षुद्रान्राज्यहरानहम् ॥ १२ ॥ त्वया तु कथितं पूर्वं क्षुद्रायाभ्युद्यता वयम्। घटाम च यथाशक्ति त्वन्तु नोऽद्य जुगुप्ससे ॥ १३ ॥ धर्ममन्विच्छसि भ्रातुं मिथ्यावचनमेव ते। भयार्द्दितानामस्माकं वाचा मर्माणि क्रन्तसि ॥ १४ ॥ वपन् व्रणे क्षारमिव क्षतानां शत्रुकर्षन। विदीर्य्यते मे हृदयं त्वया वाक्शल्यपीड़ितम् ॥ १५ ॥ अधर्मतत्त्वं विपुलं धार्म्मिकः सन्न बुध्यसे। यस्त्वयात्मानमस्मांश्च प्रशस्यान्न प्रशंससि ॥ १६ ॥ वासुदेवे स्थिते चापि द्रोणपुत्रं प्रशंससि। यः कलां षोड़शीं पूर्णां धनञ्जय न तेऽर्हति ॥ १७ ॥ स्वयमेवात्मनो दोषान् ब्रुवाणः किन्न लज्जसे। दारयेयं महीं क्रोधाद्विकिरेयञ्च पर्वतान् ॥ १८ ॥ आविध्य तां गदां गुर्वीं भीमां काञ्चनमालिनीम्। गिरिप्रकाशान् क्षितिजान् भञ्जेयमनिलो यथा ॥ १९ ॥ द्रावयेयं शरैश्चापि सेन्द्रान् देवान् समागतान्। सराक्षसगणान् पार्थ सासुरोरगमानवान् ॥ २० ॥ स त्वमेवम्विधो जानन् भ्रातरं मां नरर्षभ। द्रोणपुत्राद्भयं कर्त्तुं नार्हस्यमितविक्रम ॥ २१ ॥ अथवा तिष्ठ बीभत्सो सह सर्वैर्नरर्षभैः। अहमेनं गदापाणिर्जेष्याम्येको महारणे ॥ २२ ॥ संक्रुद्धमिव गर्ज्जन्तं हिरण्यकशिपुर्हरिम्। ततः पाञ्चालराजस्य पुत्रः पार्थमथाब्रवीत् ॥ २३ ॥

धृष्टद्युम्न उवाच। बीभत्सो विप्रकर्माणि विहितानि मनीषिणाम्। याजनाध्यापने दानं तथा यज्ञप्रतिग्रहौ ॥ २४ ॥ षष्ठमध्ययनं नाम तेषां कस्मिन् प्रतिष्ठितः। हतो द्रोणो मया यत्तत् किं मां पार्थ विगर्हसे ॥ २५ ॥ अपक्रान्तः स्वधर्माच्च क्षत्रधर्ममुपाश्रितः। अमानुषेण हन्त्यस्मानस्त्रेण क्षुद्रकर्मकृत् ॥ २६ ॥ यथा मायां प्रयुञ्जानमसह्यं ब्राह्मणब्रुवम्। माययैव निहन्याद्यो न युक्तं तत्र पार्थ किम् ॥ २७ ॥ तस्मिंस्तथा मया शस्ते यदि द्रौणायनीरुषा। कुरुते भैरवं नादं तत्र किं मम हीयते ॥ २८ ॥

न चाद्भुतमिदं मन्ये यद्द्रौणिर्युद्धसंज्ञया । घातयिष्यति कौरव्यान् परित्रातुमशक्नुवन् ॥ २९ ॥ यच्च मां धार्म्मिको भूत्वा ब्रवीषि गुरुघातिनम् । तदर्थमहमुत्पन्नः पाञ्चाल्यस्य सुतोऽनलात् ॥ ३० ॥ यस्य कार्य्यमकार्य्यं वा युध्यतः स्यात् समं रणे । ब्राह्मणं तं कथं ब्रूयात् क्षत्रियं वा धनञ्जय ॥ ३१ ॥ यो ह्यनस्त्रविदो हन्याद्ब्रह्मास्त्रैः क्रोधमूर्च्छितः । सर्व्वोपायैर्न स कथं बध्यः पुरुषसत्तम ॥ ३२ ॥ विधर्म्मिणं धर्म्मविद्भिः प्रोक्तमेव विषोपमम् । जानन् धर्म्मार्थतत्त्वज्ञः किमर्ज्जुन विगर्हसे ॥ ३३ ॥ नृशंसः स मयाक्रम्य रथ एव निपातितः । तं मामनिन्द्यं बीभत्सो किमर्थं नाभिनन्दसे ॥ ३४ ॥ कालानलसमं पार्थ ज्वलनार्कविषोपमम् । भीमं द्रोणशिरश्छिन्नं प्रशस्यं न प्रशंससि ॥ ३५ ॥ योऽसौ ममैव नान्यस्य बान्धवान् युधि जघ्निवान् । छित्त्वापि तस्य मूर्द्धानं नैवास्मि विगतज्वरः ॥ ३६ ॥ तच्च मे कृन्तते मर्म्म यन्न तस्य शिरो मया । निषादविषये क्षिप्तं जयद्रथशिरो यथा ॥ ३७ ॥ अयावधश्च शत्रूणामधर्म्मः श्रूयतेऽर्ज्जुन । क्षत्रियस्य त्वयं धर्म्मो हन्याद्धन्येत वा पुनः ॥ ३८ ॥ स शत्रुर्निहत सङ्ख्ये मया धर्म्मेण पाण्डव । यथा त्वया हतः शूरो भगदत्तः पितुः सखा ॥ ३९ ॥ पितामहं रणे हत्वा मन्यसे धर्म्ममात्मनः । मया शत्रौ हते कस्मात् पापे धर्म्मं न मन्यसे ॥ ४० ॥ सम्बन्धावनतं पार्थ न मा त्वं वक्तुमर्हसि । स्वगात्रकृतसोपानं निषण्णमिव दन्तिनम् ॥ ४१ ॥ क्षमामि ते सर्व्वमेव वाग्व्यतिक्रममर्ज्जुन । द्रौपद्या द्रौपदेयानां कृते नान्येन हेतुना ॥ ४२ ॥ कुलक्रमागतं वैरं ममाचार्य्येण विश्रुतम् । तथा जानात्ययं लोके न यूयं पाण्डुनन्दनाः ॥ ४३ ॥ नानृती पाण्डवो ज्येष्ठो नाहं वाधार्म्मिकोऽर्ज्जुन । शिष्यद्रोही हतः पापो युध्यस्व विजयस्तव ॥४४॥

इति द्रोणपर्व्वणि नारायणास्त्रमोक्षपर्व्वणि धृष्टद्युम्नवाक्ये अष्टनवत्यधिकशततोऽध्यायः ॥ १९८ ॥

धृतराष्ट्र उवाच। साङ्गा वेदा यथान्यायं येनाधीता महात्मना। यस्मिन् साक्षाद्धनुर्वेदो ह्रीनिषेवे प्रतिष्ठितः॥ १॥ यस्मिन्नाक्रुश्यति द्रोणे महर्षितनये तथा। नीचात्मना नृशंसेन क्षुद्रेण गुरुघातिना॥ २॥ यस्य प्रसादात् कर्माणि कुर्वन्ति पुरुषर्षभाः। अमानुषाणि सर्वाणि दैवैरसुकराणि च॥ ३॥ तस्मिन्नाक्रुश्यति द्रोण समक्षं पापकर्मणा। नामर्षन्तत्र कुर्वन्ति धिक् क्षात्रं धिगमर्षिताम्॥ ४॥ पार्थाः सर्वे च राजानः पृथिव्यां ये धनुर्द्धराः। श्रुत्वा किमाहुः पाञ्चाल्यं तन्ममाचक्ष्व सञ्जय॥ ५॥

सञ्जय उवाच। श्रुत्वा द्रुपदपुत्रस्य ता वाचः क्रूरकर्मणः। तूष्णीम्भूतास्तदा राजन् सर्व एव विशाम्पते॥ ६॥ अर्जुनस्तु कटाक्षेण जिह्मं विप्रेक्ष्य पार्षतम्। सवाष्पमतिनिःश्वस्य धिग्धिगित्येव चाब्रवीत्॥ ७॥ युधिष्ठिरश्च भीमश्च यमौ कृष्णस्तथापरे। आसन् सुव्रीड़िता राजन् सात्यकिस्त्वब्रवीदिदम्॥ ८॥ न ह्यस्ति पुरुषः कश्चिद्य इमं पापपूरुषम्। भाषमाणमकल्याणं शीघ्रं हन्यान्नराधमम्॥ ९॥ एते त्वां पाण्डवाः सर्वे कुत्सयन्ति विकुत्सया। कर्मणानेन पापेन श्वपाकं ब्राह्मणा इव॥ १०॥ एतत् कृत्वा महत् पापं निन्दितः सर्वसाधुभिः। न लज्जसे कथं वक्तुं समितिं प्राप्य शोभनाम्॥ ११॥ कथञ्च शतधा जिह्वा न ते मूर्द्धावदीर्य्यते। गुरुमाक्रोशतः क्षुद्र न चाधर्मेण पात्यसे॥ १२॥ वाच्यस्त्वमसि पार्थैश्च सर्वैश्चान्धकवृष्णिभिः। यत् कर्म कलुषं कृत्वा श्लाघसे जनसंसदि॥ १३॥ अनार्य्यं तादृशं कृत्वा पुनरेव गुरुं द्विषन्। वध्यस्त्वं न त्वयार्थोऽस्ति मुहूर्त्तमपि जीवता॥ १४॥ कस्त्वेदध्यवसेदार्य्यस्त्वदन्यः पुरुषाधमः। निगृह्य केशेषु वधं गुरोर्धर्मात्मनः सतः॥१५॥ सप्तावरे तथा पूर्वे बान्धवास्ते निपातिताः। यशसा च परित्यक्तास्त्वां प्राप्य कुलपांशनम्॥ १६॥ उक्तवांश्चापि यत् पार्थं भीष्मं प्रति नरर्षभम्। तथान्तो विहितस्तेन स्वयमेव

महात्मना ॥ १७ ॥ तस्यापि तव सोदर्य्यौ निहन्ता पापकृत्तमः । नान्यः पाञ्चालपुत्रेभ्यो विद्यते भुवि पापकृत् ॥ १८ ॥ स चापि सृष्टः पित्रा ते भीष्मस्यान्तकरः किल । शिखण्डी रक्षितस्तेन स च मृत्युर्महात्मनः ॥ १९ ॥ पाञ्चालाश्चलिता धर्मात् क्षुद्रा मित्र-गुरुद्रुहः । त्वं प्राप्य सहसोदर्य्यं धिक्कृतं सर्वसाधुभिः ॥ २० ॥ पुनश्चेदीदृशीं वाचं मत्समीपे वदिष्यसि । शिरस्ते पातयिष्यामि गदया वज्रकल्पया ॥ २१ ॥ त्वाञ्च ब्रह्महणं दृष्ट्वा जनः सूर्य्य-मवेक्षते । ब्रह्महत्या हि ते पाप प्रायश्चित्तार्थमात्मनः ॥ २२ ॥ पाञ्चालक सुदुर्वृत्त ममैव गुरुमग्रतः । गुरुर्गुरुवधं भूयः क्षिप-न्नैवेह लज्जसे ॥ २३ ॥ तिष्ठ तिष्ठ सहस्वैकं गदापातमिमं मम । तव चापि सहिष्येऽहं गदापातानेकशः ॥ २४ ॥ सात्वतेनैव-माक्षिप्तः पार्षतः परुषाक्षरम् । संरब्धं सात्यकिं प्राह संक्रुद्धः प्रहसन्निव ॥ २५ ॥

धृष्टद्युम्न उवाच । श्रूयते श्रूयते चापि क्षम्यते चेति माधव । सदानार्य्योऽशुभः साधुं पुरुषं क्षेप्तुमिच्छसि ॥ २६ ॥ क्षमा प्रश-स्यते लोके न तु पापोऽर्हति क्षमाम् । क्षमावन्तं हि पापात्मा जितोऽयमिति मन्यते ॥ २७ ॥ स त्वं क्षुद्रसमाचारो नीचात्मा पापनिश्चयः । आकेशाग्रान्नखाग्राच्च वक्तव्ये वक्तुमिच्छसि ॥ २८ ॥ यत् स भूरिश्रवाश्छिन्नभुजः प्रायगतस्त्वया । वार्य्यमाणेन निहत स्ततः पापतरं नु किम् ॥ २९ ॥ व्यूहमानो मया द्रोणो दिव्ये-नास्त्रेण संयुगे । विसृष्टशस्त्रो निहतः किन्तत्र क्रूर दुष्कृतम् ॥ ३० ॥ अयुध्यमानं यस्त्वाजौ तथा प्रायगतं मुनिम् । छिन्नबाहुं परै-र्हन्यात् सात्यके स कथं वदेत् ॥ ३१ ॥ निहत्य त्वां पदा भूमौ स विक्रामति वीर्य्यवान् । किन्तदा न निहंस्तेन भूत्वा पुरुषसत्तमः ॥ ३२ ॥ त्वया पुनरनार्य्येण पूर्वं पार्थेन निर्जितः । यदा तदा हतः शूरः सौमदत्तिः प्रतापवान् ॥ ३३ ॥ यत्र यत्र च पाण्डूनां

द्रोणो द्रावयते चमूम्। किरञ्छरसहस्राणि तत्र तत्र प्रयाम्यहम्
॥ ३४ ॥ स त्वमेवंविधं कृत्वा कर्म चाण्डालवत् स्वयम्। वक्तु-
मिच्छसि वक्तव्यः कस्मात्त्वं परुषाख्यथ ॥ ३५ ॥ कर्त्ता त्वं कर्मणो-
ऽस्यस्य नाहं वृष्णिकुलाधम। पापानाञ्च त्वमावासः कर्मणां मा
पुनर्वद ॥ ३६ ॥ जोषमास्व न मां भूयो वक्तुमर्हस्यतः परम्।
अधरोत्तरमेतद्धि न मां त्वं वक्तुमर्हसि ॥ ३७ ॥ अथ वक्ष्यसि मां
मौर्ख्याद्भूयः परुषमीदृशम्। गमयिष्यामि वाणैस्त्वां युद्धे वैवस्वत-
क्षयम् ॥ ३८ ॥ न चैवं मूर्ख धर्मेण केवलेनैव शक्यते। तेषामपि
ह्यधर्मेण चेष्टितं शृणु यादृशम् ॥ ३९ ॥ वञ्चितः पाण्डवः पूर्व-
मधर्मेण युधिष्ठिरः। द्रौपदी च परिक्लिष्टा तथाधर्मेण सात्यके
॥ ४० ॥ प्रव्राजिता वने सर्वे पाण्डवाः सह कृष्णया। सर्वस्व-
मपकृष्टञ्च तथाधर्मेण बालिश ॥ ४१ ॥ अधर्मेणापकृष्टश्च मद्रराजः
परैरितः। अधर्मेण तथा बालः सौभद्रो विनिपातितः ॥ ४२ ॥
इतोऽप्यधर्मेण हतो भीष्मः कुरुपितामह। भूरिश्रवा ह्यधर्मेण
त्वया धर्मविदा हतः ॥ ४३ ॥ एवं परैराचरितं पाण्डवेयैश्च
संयुगे। रक्षमाणैर्जयं वीरैर्धर्मज्ञैरपि सात्वत ॥ ४४ ॥ दुर्ज्ञेयः
स परो धर्मस्तथाधर्मः सुदुर्विदः। युध्यस्व कौरवैः सार्द्धं मा गाः
पितृनिवेशनम् ॥ ४५ ॥

सञ्जय उवाच। एवमादीनि वाक्यानि क्रूराणि परुषाणि
च। श्रावितः सात्यकिः श्रीमानाकम्पित इवाभवत् ॥ ४६ ॥
तच्छ्रुत्वा क्रोधताम्राक्षः सात्यकिश्चाददे गदाम्। विनिःश्वस्य
यथा सर्पः प्रणिधाय रथे धनुः ॥ ४७ ॥ ततोऽभिपत्य पाञ्चाल्यं
संरम्भेणेदमब्रवीत्। न त्वां वक्ष्यामि परुषं हनिष्ये त्वां वधक्षमम्
॥ ४८ ॥ तमापतन्तं सहसा महाबलममर्षणम्। पाञ्चाल्यायाभि-
संक्रुद्धमन्तकायान्तकोपमम् ॥ ४९ ॥ चोदितो वासुदेवेन भीम-
सेनो महाबलः। अवप्लुत्य रथात्तूर्णं बाहुभ्यां समवारयत् ॥५०॥

द्रवमाणस्तथा क्रुद्धः सात्यकिः पाण्डवं बली। प्रस्यन्दमानमादाय जगाम बलिनं बलात् ॥ ५१ ॥ स्थित्वा विष्टभ्य चरणौ भीमेन शिनिपुङ्गवः। निगृहीतः पदे षष्ठे बलेन बलिनाम्वरः ॥ ५२ ॥ अवप्लुत्य रथात्तन्तु ध्रियमाणं बलीयसा। उवाच श्लक्ष्णया वाचा सहदेवो विशाम्पते ॥ ५३ ॥ अस्माकं पुरुषव्याघ्र मित्रमन्यन्न विद्यते। परमन्धकवृष्णिभ्यः पाञ्चालेभ्यश्च माधव ॥ ५४ ॥ तथैवान्धकवृष्णीनां तथैव च विशेषतः। कृष्णस्य च तथास्मत्तो मित्रमन्यन्न विन्दते ॥ ५५ ॥ पाञ्चालानाञ्च वार्ष्णेय समुद्रान्तं विचिन्वताम्। नान्यदस्ति परं मित्रं यथा पाण्डववृष्णयः ॥ ५६ ॥ स भवानीदृशं मित्रमस्यैष च तथा तव। भवन्तश्च यथास्माकं भवताञ्च यथा वयम् ॥ ५७ ॥ स एवं सर्वधर्मज्ञ मित्रधर्ममनुस्मरन्। नियच्छ मन्युं पाञ्चाल्यात् प्रशाम्य शिनिपुङ्गव ॥ ५८ ॥ पार्षतस्य क्षम त्वं वै क्षमताञ्चैव पार्षतः। वयं क्षमयितारश्च किमन्यत्र समाङ्गवेत् ॥५९॥ प्रशाम्यमाने शैनेये सहदेवेन मारिष। पाञ्चालराजस्य सुतः प्रहसन्निदमब्रवीत् ॥ ६० ॥ मुञ्च मुञ्च शिनेः पौत्रं भीम युद्धमदान्वितम्। आसादयतु मामेष धराधरमिवानिलः ॥ ६१ ॥ यावदस्य शितैर्बाणैः संरम्भं पातयाम्यहम्। युद्धश्रद्धाञ्च कौन्तेय जीवितञ्चास्य संयुगे ॥ ६२ ॥ किन्तु शक्यं मया कर्त्तुं कार्य्यं यदिदमुद्यतम्। सुमहत् पाण्डुपुत्राणामायान्त्येते हि कौरवाः ॥ ६३ ॥ अथ वा फाल्गुनः सर्वान् वारयिष्यति संयुगे। अहमप्यस्य मूर्द्धनि पातयिष्यामि सायकैः ॥ ६४ ॥ मन्यते छिन्नबाहुं मां भूरिश्रवसमाहवे। उत्सृजैनमहञ्चैनमेष मां वा हनिष्यति ॥ ६५ ॥ शृण्वन् पाञ्चालवाक्यानि सात्यकिः सर्पवत् श्वसन्। भीमबाह्वन्तरे सक्तो विस्फुरत्यनिशं बली ॥ ६६ ॥ तौ वृषाविव नर्द्दन्तौ बलिनौ बाहुशालिनौ। त्वरया वासुदेवश्च धर्मराजश्च मारिष ॥ ६७ ॥ यत्नेन महता वीरौ वारयामासतु-

र्षणम्। निवार्य्य परमेष्वासौ क्रोधसंरक्तलोचनौ। युयुत्सू-
न्परान् सङ्ग्रे प्रतीयुः क्षत्रियर्षभाः॥ ६८॥

इति द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि धृष्टद्युम्नसात्यकि-
क्रोधे नवनवत्यधिकशतोऽध्यायः॥ १९९॥

---

सञ्जय उवाच। ततः स कदनञ्चक्रे रिपूणां द्रोणनन्दनः।
युगान्ते सर्व्वभूतानां कालसृष्ट इवान्तकः॥ १॥ ध्वजद्रुमं शस्त्रशृङ्गं
हतनागमहाशिलम्। अश्वकिम्पुरुषाकीर्णं शरासनलतावृतम्॥२॥
वकक्रव्यादसङ्घाढ्यं भूतपक्षिगणाकुलम्। निहत्य शात्रवान् भल्लैः
सोऽचिनोद्देहपर्वतम्॥ ३॥ ततो वेगेन महता विनद्य भरतर्षभ।
प्रतिज्ञां श्रावयामास पुनरेव तवात्मजम्॥ ४॥ यस्माद्युध्यन्त-
माचार्य्यं धर्मकञ्चुकमाश्रितः। मुञ्च शस्त्रमिति प्राह कुन्तीपुत्रो
युधिष्ठिरः॥ ५॥ तस्मात् सम्पश्यतस्तस्य द्रावयिष्यामि वाहिनीम्।
विद्राव्य सर्वान् हन्तास्मि पाञ्चाल्यं पापमेव च॥ ६॥ सर्वानेतान्
हनिष्यामि यदि योत्स्यन्ति मां रणे। सत्यं ते प्रतिजानामि
परावर्त्तय वाहिनीम्॥ ७॥ तच्छ्रुत्वा तव पुत्रस्तु वाहिनीं पर्य्य-
वर्त्तयत्। सिंहनादेन महता व्यपोह्य सुमहद्भयम्॥ ८॥ ततः
समागमो राजन् कुरुपाण्डवसेनयोः। पुनरेवाभवत्तीव्रः पूर्ण-
सागरयोरिव॥९॥ संरब्धा हि स्थिरीभूत्वा द्रोणपुत्रेण कौरवाः।
उदग्राः पाण्डुपाञ्चाला द्रोणस्य निधनेन च॥ १०॥ तेषां परम-
हृष्टानां जयमात्मनि पश्यताम्। संरब्धानां महावेगः प्रादुरासी-
द्रणाजिरे॥ ११॥ यथा शिलोच्चये शैलाः सागरैः सागरा यथा।
प्रतिहन्येत राजेन्द्र तथासन् कुरुपाण्डवाः॥ १२॥ ततः शङ्ख-
सहस्राणि भेरीणामयुतानि च। अवादयन्त संहृष्टाः कुरुपाण्डव-
सैनिकाः॥ १३॥ यथा निर्मथ्यमानस्य सागरस्य सुनिस्वनः।

अभवत्तस्य सैन्यस्य सुमहानद्भुतोपमः ॥ १४ ॥ प्रादुश्चक्रे ततो द्रौणिरस्त्रं नारायणं तदा। अभिसन्धाय पाण्डूनां पाञ्चालानाञ्च वाहिनीम् ॥ १५ ॥ प्रादुरासंस्ततो वाणा दीप्ताग्राश्च सहस्रशः। पाण्डवान् क्षपयिष्यन्तो दीप्तास्या इव पन्नगाः ॥ १६ ॥ ते दिशः खञ्च सैन्यञ्च समावृण्वन् महाहवे। मुहूर्त्ताद्भास्करस्येव राजन् लोके गभस्तयः ॥ १७ ॥ तथापरे द्योतमाना ज्योतींषीवाम्बरेऽमले। प्रादुरासन्महीपाल कार्ष्णायसमया गुड़ाः ॥ १८ ॥ चतुश्चक्रा विचित्राश्च शतघ्न्योऽथ गुड़ा गदाः। चक्राणि च क्षुरान्तानि मण्डलानीव भास्वतः ॥ १९ ॥ शस्त्राकृतिभिराकीर्णमतीव भरतर्षभ। दृष्ट्वान्तरीक्षमाविग्नाः पाण्डुपाञ्चालसृञ्जयाः ॥ २० ॥ यथा यथा ह्ययुध्यन्त पाण्डवानां महारथाः। तथा तथा तदस्त्रं वै व्यवर्द्धत जनाधिप ॥ २१ ॥ वध्यमानास्तथास्त्रेण तेन नारायणेन वै। दह्यमानानलेनेव सर्वतोऽभ्यर्द्दिता रणे ॥ २२ ॥ यथा हि शिशिरापाये दहेत् कक्षं हुताशनः। तथा तदस्त्रं पाण्डूनां ददाह ध्वजिनीं प्रभो ॥ २३ ॥ जगाम परमं त्रासं धर्मराजो युधिष्ठिरः। आपूर्य्यमाणेनास्त्रेण सैन्ये क्षीयति च प्रभो ॥ २४ ॥ द्रवमाणस्तु तत्सैन्यं दृष्ट्वा विगतचेतनम्। मध्यस्थताञ्च पार्थस्य धर्मपुत्रोऽब्रवीदिदम् ॥ २५ ॥ धृष्टद्युम्न पलायस्व सह पाञ्चालसेनया। सात्यके त्वञ्च गच्छस्व वृष्ण्यन्धकवृतः स्वयम् ॥ २६ ॥ वासुदेवोऽपि धर्मात्मा करिष्यत्यात्मनः क्षमम्। उपदेष्टुं समर्थोऽयं लोकस्य किमुतात्मनः ॥ २७ ॥ सङ्ग्रामस्तु न कर्त्तव्यः सर्वसैन्यान् ब्रवीमि वः। अहं हि सह सोदर्य्यैः प्रवेक्ष्ये हव्यवाहनम् ॥ २८ ॥ भीष्मद्रोणार्णवं तीर्त्वा संग्रामे भीरुदुस्तरे। विमङ्क्ष्यामि सलिले सगणो द्रौणिगोष्पदे ॥ २९ ॥ कामः सम्पद्यतामद्य राज्ञो दुर्य्योधनस्य च। कल्याणवृत्तिराचार्य्यो मया युधि निपातितः ॥ ३० ॥ येन वालः स सौभद्रो युद्धानामविशारदः। समर्थैर्बहुभिः क्रूरै-

र्षितितो नाभिपालितः ॥ ३१ ॥ येन विब्रुवती प्रश्नं यथा कृष्णा सभागता। उपेक्षिता सपुत्रेण दासभावं नियच्छती ॥ ३२ ॥ जिघांसुर्धार्त्तराष्ट्रश्च श्रान्तेष्वन्येषु फाल्गुनम् । कवचेन तथा युक्तो रक्षार्थं सैन्धवस्य च ॥ ३३ ॥ येन ब्रह्मास्त्रविदुषा पाञ्चालाः सत्यजिन्मुखाः। कुर्वाणा मज्जये यत्नं समूला विनिपातिताः ॥ ३४ ॥ येन प्रव्राज्यमानाश्च राज्यादयमधर्मतः। निवार्य्यमाणा न वयं नानुयातास्तदैषिणः ॥ ३५ ॥ योऽसावत्यन्तमस्माकं कुर्वाणः सौहृदं परम्। हतस्तदर्थमरणं गमिष्यामि सबान्धवः ॥ ३६ ॥ एवं ब्रुवति कौन्तेये दाशार्हस्त्वरितस्ततः। निवार्य्य सैन्यं बाहुभ्यामिदं वचनमब्रवीत् ॥ ३७ ॥ शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश्चावरोहत। एष योगोऽत्र विहितः प्रतिघाते महात्मना ॥ ३८ ॥ द्विपाश्वस्यन्दनेभ्यश्च क्षितिं सर्वेऽवरोहत। एवमेतन्नवो हन्यादस्त्रं भूमौ निरायुधान् ॥ ३९ ॥ यथा यथा ह्ययुध्यन्त ये वा ह्यस्त्रबलं प्रति। तथा तथा भवन्त्येते कौरवा बलवत्तराः ॥ ४० ॥ निक्षेप्स्यन्ति च शस्त्राणि वाहनेभ्योऽवरुह्य ये। तान्नैतदस्त्रं संग्रामे निहनिष्यति मानवान् ॥ ४१ ॥ ये त्वेतत् प्रतियोत्स्यन्ति मनसापीह केचन। निहनिष्यति तान् सर्वान् रसातलगतानपि ॥ ४२ ॥ ते वचस्तस्य तच्छ्रुत्वा वासुदेवस्य भारत। ईषुः सर्वे समुत्स्रष्टुं मनोभिःकरणेन च ॥ ४३ ॥ तत उत्स्रष्टुकामांस्ताञ्छस्त्राण्यालोक्य पाण्डवः। भीमसेनोऽब्रवीद्राजन्निदं संहर्षयन् वचः ॥ ४४ ॥ न कथञ्चन शस्त्राणि मोक्तव्यानीह केनचित्। अहमावारयिष्यामि द्रोणपुत्रास्त्रमाशुगैः ॥ ४५ ॥ गदयाप्यनया गुर्व्या हेमविग्रहया रणे। कालवद्विचरिष्यामि द्रौणेरस्त्रं विशातयन् ॥ ४६ ॥ न हि मे विक्रमे तुल्यः कश्चिदस्ति पुमानिह। यथैव सवितुस्तुल्यं ज्योतिरन्यन्न विद्यते ॥ ४७ ॥ पश्यध्वं मे दृढौ बाहू नागराजकरोपमौ। समर्थौ पर्वतस्यापि शैशिरस्य निपातने ॥४८

नागायुतसमप्राणो ह्यहमेको नरेष्विह । शक्रो यथाप्रतिद्वन्द्वो दिवि देवेषु विश्रुतः ॥ ४९ ॥ अद्य पश्यन्तु मे वीर्य्यं वाह्वोः पीनांसयोर्युधि । ज्वलमानस्य दीप्तस्य द्रौणेरस्त्रस्य वारणे ॥ ५० ॥ यदि नारायणास्त्रस्य प्रतियोद्धा न विद्यते । अथैनं प्रतियोत्स्यामि पश्यत्सु कुरुपाण्डुषु ॥ ५१ ॥ अर्ज्जुनार्ज्जुन बीभत्सो न न्यस्यं गाण्डिवं त्वया । शशाङ्कस्येव ते कायात् नैर्मल्यं पातयिष्यति ॥५२॥

अर्जुन उवाच । भीम नारायणास्त्रे मे गोषु च ब्राह्मणेषु च । एतेषु गाण्डिवं न्यस्यमेतद्धि व्रतमुत्तमम् ॥ ५३ ॥ एवमुक्तस्ततो भीमो द्रोणपुत्रमरिन्दमः । अभ्ययान्मेघघोषेण रथेनादित्यवर्च्चसा ॥ ५४ ॥ स एनमिषुजालेन लघुत्वाच्छीघ्रविक्रमः । निमेषमात्रेणासाद्य कुन्तीपुत्रोऽभ्यवाकिरत् ॥ ५५ ॥ ततो द्रौणिः प्रहस्यैनं द्रवन्तमभिभाष्य च । अवाकिरत् प्रदीप्ताग्रैः शरैस्तैरभिमन्त्रितैः ॥ ५६ ॥ पन्नगैरिव दीप्तास्यैर्मर्मभिद्भिरलं रणे । अवकीर्णोऽभवत्पार्थः स्फुलिङ्गैरिव काञ्चनैः ॥ ५७ ॥ तस्य रूपमभूद्राजन् भीमसेनस्य संयुगे । खद्योतैरावृतस्येव पर्वतस्य दिनक्षये ॥ ५८ ॥ तदस्त्रं द्रोणपुत्रस्य तस्मिन् प्रति समस्यति । अवर्द्धत महाराज यथाग्निरनिलोद्धतः ॥ ५९ ॥ आवर्द्धमानमालक्ष्य तदस्त्रं भीमविक्रमम् । पाण्डुसैन्यमृते भीमं सुमहद्भयमाविशत् ॥ ६० ॥ ततः शस्त्राणि दिव्यानि समुत्सृज्य महीतले । अवरोहन्रथेभ्यश्च तुरगेभ्यश्च सर्वशः ॥ ६१ ॥ तेषु निक्षिप्तशस्त्रेषु वाहनेभ्यश्च्युतेषु च । तदस्त्रं वीर्य्यविपुलं भीममूर्द्धन्यथापतत् ॥ ६२ ॥ हाहाकृतानि भूतानि पाण्डवाश्च विशेषतः । भीमसेनमपश्यन्त तेजसा संवृते तदा ॥ ६३ ॥

इति द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि पाण्डवसैन्यास्त्रत्यागे द्विशततमोऽध्यायः ॥ २०० ॥

---

सञ्जय उवाच। भीमसेनं समाकीर्णं दृष्ट्वास्त्रेण धनञ्जयः।
तेजसः प्रतिघातार्थं वारुणेन समावृणोत् ॥ १ ॥ नालक्षयत तत्
कश्चिद्वारुणास्त्रेण संवृतम्। अर्जुनस्य लघुत्वाच्च संवृतत्वाच्च तेजसः
॥ २ ॥ साश्वसूतरथो भीमो द्रोणपुत्रास्त्रसंवृतः। अग्नावग्नि-
रिव न्यस्तो ज्वालामाली सुदुर्दृशः ॥ ३ ॥ यथा रात्रिक्षये राजन्
ज्योतींष्यस्तगिरिं प्रति। समापेतुस्तथा बाणा भीमसेनरथं प्रति
॥ ४ ॥ स हि भीमो रथाश्वस्य हयाः सूतश्च मारिष। संवृतो
द्रोणपुत्रेण पावकान्तर्गतोऽभवत् ॥ ५ ॥ यथा जग्ध्वा जगत्कृत्स्नं
समये सचराचरम्। गच्छेदग्निर्विभोरास्यं तथास्त्रं भीममावृ-
णोत् ॥ ६ ॥ सूर्य्यमग्निप्रविष्टः स्याद्यथा चाग्निं दिवाकरः। तथा
प्रविष्टं तत्तेजो न प्राज्ञायत किञ्चन ॥ ७ ॥ विकीर्णमस्त्रं तद्दृष्ट्वा
तथा भीमरथं प्रति। उदीर्य्यमाणं द्रौणिञ्च निष्प्रतिद्वन्द्वमाहवे
॥ ८ ॥ सर्वसैन्यानि पाण्डूनां न्यस्तशस्त्राण्यनेकशः। युधिष्ठिर-
पुरोगांश्च विमुखांस्तान्महारथान् ॥ ९ ॥ अर्जुनो वासुदेवश्च त्वर-
माणौ महाद्युती। अवप्लुत्य रथाद्वीरौ भीममाद्रवतां तदा ॥१०॥
ततस्तौ द्रोणपुत्रस्य तेजोऽस्त्रबलसम्भवम्। विगाह्य तौ सुबलिनौ
मायामाविशतां तदा ॥ ११ ॥ न्यस्तशस्त्रौ ततस्तौ तु नादहत्
सोऽस्त्रजोऽनलः। वारुणास्त्रप्रयोगाच्च वीर्य्यवत्त्वाच्च कृष्णयोः ॥१२
ततश्चकृषतुर्भीमं तस्य सर्वायुधानि च। नारायणास्त्रशान्त्यर्थं नर-
नारायणौ बलात् ॥ १३ ॥ आकृष्यमाणः कौन्तेयो नदत्येव महा-
रथः। वर्द्धते चैव तद्घोरं द्रौणेरस्त्रं सुदुर्जयम् ॥ १४ ॥ तम-
ब्रवीद्वासुदेवः किमिदं पाण्डुनन्दन। वार्य्यमाणोऽपि कौन्तेय
यद्युद्धान्न निवर्त्तसे ॥ १५ ॥ यदि युद्धेन जेयाः स्युरिमे कौरव-
नन्दनाः। वयमप्यत्र युध्येम तथा चेमे नरर्षभाः ॥ १६ ॥ रथेभ्य-
स्त्ववतीर्णाः स्मः सर्व एव हि तावकाः। तस्मात्त्वमपि कौन्तेय
रथात्तूर्णमपाक्रम ॥ १७ ॥ एवमुक्त्वा ततः कृष्णो रथाद्भूमिमपा-

हरत्। निश्वसन्तं यथा नागं क्रोधसंरक्तलोचनम्॥ १८ ॥
यदापकृष्टः स रथान्नाशितश्चायुधं युधि। ततो नारायणास्त्रं तत्
प्रशान्तं शत्रुतापनम्॥ १९ ॥

सञ्जय उवाच। तस्मिन् प्रशान्ते विधिना तथा तेजस्वि दुःसहे।
बभूवुर्विमलाः सर्वा दिशः प्रदिश एव च॥ २०॥ प्रववुश्च शिवा
वाताः प्रशान्ता मृगपक्षिणः। वाहनानि प्रहृष्टानि योधाश्च मनु-
जर्षभ॥ २१॥ व्यपोढे च ततो घोरे तस्मिंस्तेजसि भारत।
बभौ भीमो निशापाये धीमान् सूर्य्य इवोदितः॥ २२॥ हतशेषं
बलं तत्र पाण्डवानामतिष्ठत। अस्त्रव्युपरमं दृष्ट्वा तव पुत्रजिघां-
सया॥ २३॥ व्यवस्थिते बले तस्मिन्नस्त्रे प्रतिहते तथा। दुर्य्यो-
धनो महाराज द्रोणपुत्रमथाब्रवीत्॥२४॥ अश्वत्थामन् पुनः शीघ्र-
मस्त्रमेतत् प्रयोजय। व्यवस्थिता हि पाञ्चालाः पुनरेव जयैषिणः
॥ २५॥ अश्वत्थामा तथोक्तस्तु तव पुत्रेण मारिष। सुदीनमति-
निःश्वस्य राजानमिदमब्रवीत्॥ २६ ॥ नैतदावर्त्तते राजन्नस्त्रं
द्विर्नोपपद्यते। आवृत्ते हि निहन्त्येतत् प्रयोक्तारं न संशयः॥२७॥
एवञ्चास्त्रप्रतीघातं वासुदेवः प्रयुक्तवान्। अतो न विहितः सङ्ग्रे
वधः शत्रोर्ज्जनाधिप॥ २८॥ पराजयो वा मृत्युर्वा श्रेयो मृत्युर्न
निर्ज्जयः। निर्ज्जिताश्चारयो ह्येते शस्त्रोत्सर्गान्मृतोपमाः॥ २९॥

दुर्य्योधन उवाच। आचार्य्यपुत्र यद्येतत् द्विरस्त्रं न प्रयुज्यते
अन्यैर्गुरुघ्ना वध्यन्तामस्त्रैरस्त्रविदाम्वर॥ ३०॥ त्वयि दिव्यानि
चास्त्राणि त्र्यम्बके चामितौजसि। इच्छतो हि न ते मुच्येत्
क्रुद्धो ह्यपि पुरन्दरः॥ ३१॥

धृतराष्ट्र उवाच। तस्मिन्नस्त्रे प्रतिहते द्रोणे चोपाधिना हते।
तथा दुर्य्योधनेनोक्तो द्रौणिः किमकरोत् पुनः॥ ३२॥ दृष्ट्वा
पार्थांस्तु सङ्ग्रामे युद्धाय समुपस्थितान्। नारायणास्त्रनिर्मुक्तां-
श्चरतः पृतनामुखे॥ ३३॥

सञ्जय उवाच। जानन् पितुः स निधनं सिंहलाङ्गूलकेतनः। संक्रोधो भयमुत्सृज्य सोऽभिदुद्राव पार्षतम् ॥ ३४ ॥ अभिद्रुत्य च विंशत्या क्षुद्रकाणां नरर्षभः। पञ्चभिश्चातिवेगेन विव्याध पुरुषर्षभः ॥ ३५ ॥ धृष्टद्युम्नस्ततो राजन् ज्वलन्तमिव पावकम्। द्रोणपुत्रं चतुःषष्ट्या राजन् विव्याध पत्रिणाम् ॥ ३६ ॥ सारथिञ्चास्य विंशत्या स्वर्णपुङ्खैः शिलाशितैः। हयांश्च चतुरोऽविध्यच्चतुर्भिर्निशितैः शरैः ॥ ३७ ॥ विद्धा विद्धा नदन् द्रौणिं कम्पयन्निव मेदिनीम्। आददे सर्वलोकस्य प्राणानिव महारणे ॥ ३८ ॥ पार्षतस्तु बली राजन् कृतास्त्रः कृतनिश्चयः। द्रौणिमेवाभिदुद्राव कृत्वा मृत्युनिवर्त्तनम् ॥ ३९ ॥ ततो वाणमयं वर्षं द्रोणपुत्रस्य मूर्द्धनि। अवासृजदमेयात्मा पाञ्चाल्या रथिनाम्वरः ॥ ४० ॥ तं द्रौणिः समरे क्रुद्धं छादयामास पत्रिभिः। विव्याध चैनं दशभिः पितुर्वधमनुस्मरन् ॥ ४१ ॥ द्वाभ्याञ्च सुविसृष्टाभ्यां क्षुराभ्यां ध्वजकार्मुके। छित्त्वा पाञ्चालराजस्य द्रौणिरन्यैः समार्द्दयत् ॥ ४२ ॥ व्यश्वसूतरथञ्चैव द्रौणिश्चक्रे महाहवे। तस्य चानुचरान् सर्वान् क्रुद्धः प्राच्छादयच्छरैः ॥ ४३ ॥ प्रदुद्राव ततः सैन्यं पाञ्चालानां विशाम्पते। सम्भ्रान्तरूपमार्त्तञ्च शरवर्षपरिक्षतम् ॥ ४४ ॥ दृष्ट्वा तु विमुखान् योधान् धृष्टद्युम्नञ्च पीड़ितम्। शैनेयश्चोदयत्तूर्णं रथं द्रौणिरथं प्रति ॥ ४५ ॥ अष्टभिर्निशितैश्चैव सोऽश्वत्थामानमार्द्दयत्। विंशत्या पुनराहत्य नानारूपैरमर्षिणम् ॥ ४६ ॥ विव्याध च तथा सूतं चतुर्भिश्चतुरो हयान्। धनुर्ध्वजञ्च संयत्तैश्चिच्छेद कृतहस्तवत् ॥ ४७ ॥ स साश्वं व्यधमच्चापि रथं हेमपरिष्कृतम्। हृदि विव्याध समरे त्रिंशता सायकैर्भृशम् ॥ ४८ ॥ एवं स पीड़ितो राजन्नश्वत्थामा महाबलः। शरजालैः परिवृतः कर्त्तव्यं नान्वपद्यत ॥ ४९ ॥ एवङ्कृते गुरोः पुत्रे तव पुत्रो महारथः। कृपकर्णादिभिः सार्द्धं शरैः सात्त्वतमावृणोत् ॥ ५० ॥

दुर्य्योधनस्तु विंशत्या कृपः शारद्वतस्त्रिभिः । कृतवर्म्मा च दशभिः
कर्णः पञ्चाशता शरैः ॥ ५१ ॥ दुःशासनः शतेनैव वृषसेनश्च
सप्तभिः । सात्यकिं विव्यधुस्तूर्णं समन्तान्निशितैः शरैः ॥ ५२ ॥
ततः स सात्यकी राजन् सर्व्वानेव महारथान् । विरथान् विमुखां-
श्चैव क्षणेनैवाकरोन्नृप ॥ ५३ ॥ अश्वत्थामा तु सम्प्राप्य चेतनां
भरतर्षभ । चिन्तयामास दुःखार्त्तो निःश्वसंश्च पुनः पुनः ॥ ५४ ॥
ततो रथान्तरं द्रौणिः समारुह्य परन्तपः । सात्यकिं वारयामास
किरञ्छरशतान् बहून् ॥ ५५ ॥ तमापतन्तं सम्प्रेक्ष्य भारद्वाज-
सुतं रणे । विरथं विमुखञ्चैव पुनश्चक्रे महारथः ॥ ५६ ॥
ततस्ते पाण्डवा राजन् दृष्ट्वा सात्यकिविक्रमम् । शङ्खशब्दान्
भृशञ्चक्रुः सिंहनादांश्च नेदिरे ॥ ५७ ॥ एवं तं विरथं कृत्वा
सात्यकिः सत्यविक्रमः । जघान वृषसेनस्य त्रिसाहस्रान्महारथान्
॥ ५८ ॥ अयुतं दन्तिनां सार्द्धं कृपस्य निजघान सः । पञ्चा-
युतानि चाश्वानां शकुनेर्निजघान ह ॥ ५९ ॥ ततो द्रौणिर्महा-
राज रथमारुह्य वीर्य्यवान् । सात्यकिं प्रति संक्रुद्धः प्रययौ तद्-
वधेप्सया ॥ ६० ॥ पुनस्तमागतं दृष्ट्वा शैनेयो निशितैः शरैः ।
अदारयत् क्रूरतरैः पुनः पुनररिन्दमः ॥ ६१ ॥ सोऽतिविद्धो
महेष्वासो नानालिङ्गैरमर्षणः । युयुधानेन वै द्रौणिः प्रहसन्
वाक्यमब्रवीत् ॥६२॥ शैनेयाभ्युपपत्तिं ते जानाम्याचार्य्यघातिनि ।
न चैनं त्रास्यसि मया ग्रस्तमात्मानमेव च ॥ ६३ ॥ शपे तवाहं
शैनेय सत्येन तपसा तथा । अहत्वा सर्व्वपाञ्चालान् यदि शान्ति-
मवाप्नुयाम् ॥ ६४ ॥ यद्बलं पाण्डवेयानां वृष्णीनामपि यद्बलम् ।
क्रियतां सर्व्वमेवेह निहनिष्यामि सोमकान् ॥ ६५ ॥ एवमुक्त्वार्क-
रश्म्याभं सुपर्व्वाणं शरोत्तमम् । व्यसृजत् सात्वते द्रौणिर्व्वज्रं
वृत्रे यथा हरिः ॥ ६६ ॥ स तं निर्भिद्य तेनास्तः सायकः सशरा-
वरम् । विवेश वसुधां भित्त्वा श्वसन् बिलमिवोरगः ॥ ६७ ॥ स

भिन्नकवचः शूरस्तोत्रार्द्दित इव द्विपः । विमुच्य सशरञ्चापं भूरि-
व्रणपरिस्रवः ॥ ६८ ॥ सीदन् रुधिरसिक्तश्च रथोपस्थ उपाविशत् ।
सूतेनापहृतस्तूर्णं द्रोणपुत्राद्रथान्तरम् ॥ ६७ ॥ अथान्येन सुपु-
ङ्खेन शरेणानतपर्व्वणा । आजघान भ्रुवोर्मध्ये धृष्टद्युम्नं परन्तपः
॥ ६८ ॥ स पूर्व्वमतिविद्धश्च भृशं पश्चात् सुमर्द्दितः । ससाद युधि
पाञ्चाल्यो व्यपाश्रयत च ध्वजम् ॥ ६९ ॥ तं मत्तमिव सिंहेन
राजन् कुञ्जरमर्द्दितम् । जवेनाभ्यद्रवञ्छूराः पञ्च पाण्डवतो
रथाः ॥ ७० ॥ किरीटी भीमसेनश्च वृहत्‌क्षत्रश्च पौरवः । युव-
राजश्च चेदीनां मालवस्तु सुदर्शनः ॥ ७१ ॥ एते हाहाकृताः सर्व्वे
प्रगृहीतशरासनाः । वीरं द्रौणायनिं वीराः सर्व्वतः पर्य्यवारयन्
॥ ७२ ॥ ते विंशतिपदे यत्ता गुरुपुत्रममर्षणम् । पञ्चभिः पञ्चभि-
र्व्बाणैरभ्यघ्नन् सर्व्वतः समम् ॥ ७३ ॥ आशीविषाभैर्व्विंशद्भिः पञ्च-
भिश्च शितैः शरैः । चिच्छेद युगपद्द्रौणिः पञ्चविंशतिसायकान्
॥ ७४ ॥ सप्तभिश्च शितैर्व्वाणैः पौरवं द्रौणिरार्द्दयत् । मालव
त्रिभिरेकेन पार्थं षड्‌भिर्व्वृकोदरम् ॥ ७५ ॥ ततस्तैर्व्विव्यधुः सर्व्वे
द्रौणिं राजन्महारथाः । युगपच्च पृथक् चैव रुक्मपुङ्खैः शिला-
शितैः ॥ ७६ ॥ युवराजश्च विंशत्या द्रौणिं विव्याध पत्रिणाम् ।
पार्थश्च पुनरष्टाभिस्तदा सर्व्वे त्रिभिस्त्रिभिः ॥ ७७ ॥ ततोऽर्ज्जुनं
षड्‌भिरथाजघान द्रौणायनिर्द्दशभिर्व्वासुदेवम् । भीमं दशार्द्धै-
र्युवराजं चतुर्भिर्द्वाभ्यां द्वाभ्यां मालवं पौरवन्तु ॥ ७८ ॥ सूतं
विद्ध्वा भीमसेनस्य षड्‌भिर्द्वाभ्यां छित्त्वा कार्मुकञ्च ध्वजञ्च । पुनः
पार्थं शरवर्षेण विद्ध्वा द्रौणिर्घोरं सिंहनादं ननाद ॥ ७९ ॥ तस्या-
स्यतः सुनिशितान् पीतधारान् द्रौणेः शरान् पृष्ठतश्चाग्रतश्च ।
धरा वियद्द्यौः प्रदिशो दिशश्च छन्ना बाणैरभवन् घोररूपैः ॥८०॥
आसन्नस्य स्वरथमुग्रतेजाः सुदर्शनस्येन्द्रकेतुप्रकाशौ । भुजौ शिर-
श्चेन्द्रसमानवीर्य्यस्त्रिभिः शरैर्युगपत् सञ्चकर्त्त ॥ ८१ ॥ सपौरवं

रथशक्त्याभिहत्य छित्त्वा रथं तिलशश्चापि वाणैः। छित्त्वा च बाहू वरचन्दनाक्तौ भल्लेन कायाच्छिर उच्चकर्त्त ॥ ८२ ॥ युवानमिन्दीवरदामवर्णं चेदिप्रभुं युवराजं प्रसह्य। वाणैस्त्वरावान् ज्वलिताग्निकल्पैर्विद्धा प्रादान्मृत्यवे शाल्वसूतम् ॥ ८३ ॥ मालवं पौरवञ्चैव युवराजञ्च चेदिपम्। दृष्ट्वा समक्षं निहतं द्रोणपुत्त्रेण पाण्डवः ॥ ८४ ॥ भीमसेनो महाबाहुः क्रोधमाहारयत् परम्। ततः शरशतैस्तीक्ष्णैः स क्रुद्धाशीविषोपमैः ॥ ८५ ॥ छादयामास समरे द्रोणपुत्त्रं परन्तपः। ततो द्रौणिर्महातेजाः शरवर्षं निहत्य तम् ॥ ८६ ॥ विव्याध निशितैर्वाणैर्भीमसेनममर्षणः। ततो भीमो महाबाहुर्द्रौणेर्युधि महाबलः ॥ ८७ ॥ क्षुरप्रेण धनुश्छित्त्वा द्रौणिं विव्याध पत्त्रिणा। तदपास्य धनुश्छिन्नं द्रोणपुत्त्रो महामनाः ॥ ८८ ॥ अन्यत् कार्मुकमादाय भीमं विव्याध पत्त्रिभिः। तौ द्रौणिभीमौ समरे पराक्रान्तौ महाबलौ ॥ ८९ ॥ अवर्षतां शरवर्षं वृष्टिमन्ताविवाम्बुदौ। भीमनामाङ्किता वाणाः स्वर्णपुङ्खाः शिलाशिताः ॥ ९० ॥ द्रौणिं सञ्छादयामासुर्मेघौघा इव भास्करम्। तथैव द्रौणिनिर्मुक्तैर्भीमः सन्नतपर्वभिः ॥ ९१ ॥ अवाकीर्य्यत स क्षिप्रं शरैः शतसहस्रशः। सञ्छाद्यमानः समरे द्रौणिना रणशालिना ॥ ९२ ॥ न विव्यथे महाराज तदद्भुतमिवाभवत्। ततो भीमो महाबाहुः कार्त्तस्वरविभूषितान् ॥ ९३ ॥ नाराचान् दश सम्प्रैषीद्यमदण्डनिभान् शितान्। ते जत्रुदेशमासाद्य द्रोणपुत्त्रस्य मारिष ॥९४॥ निर्भिद्य विविशुस्तूर्णं वल्मीकमिव पन्नगाः। सोऽतिविद्धो भृशं द्रौणिः पाण्डवेन महात्मना ॥ ९५ ॥ ध्वजयष्टिं समाश्रित्य न्यमीलयत लोचने। स मुहूर्त्तात् पुनः संज्ञां लब्ध्वा द्रौणिर्नराधिप ॥ ९६ ॥ क्रोधं परममातस्थौ समरे रुधिरोक्षितः। दृढं सोऽभिहतस्तेन पाण्डवेन महात्मना ॥ ९७ ॥ वेगञ्चक्रे महाबाहुर्भीमसेनरथं प्रति। तत्र आकर्णपूर्णानां शराणां तिग्म-

तेजसाम्॥ ९८ ॥ शतमाशीविषाभानां प्रेषयामास भारत।
भीमोऽपि समरश्लाघी तस्य वीर्य्यमचिन्तयन्॥ ९९॥ तूर्णं प्रासृज-
दुग्राणि शरवर्षाणि पाण्डवः। ततो द्रौणिर्महाराज छित्त्वास्य
विशिखैर्धनुः॥ १००॥ आजघानोरसि क्रुद्धः पाण्डवं निशितैः
शरैः। ततोऽन्यद्धनुरादाय भीमसेनोऽत्यमर्षणः॥ १०१॥ विव्याध
निशितैर्बाणैर्द्रौणिं पञ्चभिराहवे। जीमूताविव घर्मान्ते तौ
शरौघप्रवर्षिणौ॥ १०२॥ अन्योऽन्य क्रोधताम्राक्षौ छादया-
मासतुर्युधि। तलशब्दैस्ततो घोरैश्छादयन्तौ परस्परम्॥ १०३॥
अयुध्येतां सुसंरब्धौ कृतप्रतिकृतैषिणौ। ततो विस्फार्य्य सुमहच्चापं
रुक्मविभूषितम्॥ १०४॥ भीमं प्रैक्षत स द्रौणिः शरानस्यन्त-
मन्तिकात्। शरद्यहर्मध्यगतो दीप्तार्चिरिव भास्करः॥ १०५॥
आददानस्य विशिखान् सन्दधानस्य चाशुगान्। विकर्षतो मुञ्च-
तश्च नान्तरं ददृशुर्जनाः॥ १०६॥ अलातचक्रप्रतिमं तस्य मण्डल
मायुधम्। द्रौणेराशीन्महाराज बाणान् विसृजतस्तदा॥ १०७॥
धनुश्च्युताः शरास्तस्य शतशोऽथ सहस्रशः। आकाशे प्रत्यदृश्यन्त
शलभानामिवायतीः॥ १०८॥ ते तु द्रौणिधनुर्मुक्ताः शरा हेम-
विभूषिताः। अजस्रमन्वकीर्य्यन्त घोरा भीमरथं प्रति॥ १०९॥
तत्राद्भुतमपश्याम भीमसेनस्य विक्रमम्। बलं वीर्य्यं प्रभावञ्च
व्यवसायञ्च भारत॥ ११०॥ तां समेघामिवोद्भूतां बाणवृष्टिं
समन्ततः। जलवृष्टिं महाघोरां तपान्त इव चिन्तयन्॥ १११॥
द्रोणपुत्रवधप्रेप्सुर्भीमो भीमपराक्रमः। अमुञ्चच्छरवर्षाणि प्रावृ-
षीव वलाहकः॥ ११२॥ तद्रुक्मपृष्ठं भीमस्य धनुर्घोरं महद्रणे।
विकृष्यमाणं विबभौ शक्रचापमिवापरम्॥ ११३॥ तस्माच्छराः
प्रादुरासन् शतशोऽथ सहस्रशः। सञ्छादयन्तः समरे द्रौणि-
माहवशोभिनम्॥११४॥ तयोर्विसृजतोरेवं शरजालानि मारिष।
वायुरप्यन्तरा राजन्नाशक्नोत् स विसर्पितुम्॥ ११५॥ तथा

द्रौणिर्महाराज शरान् हेमविभूषितान्। तैलधौतान् प्रसन्नाग्रान् प्राहिणोद्वधकाङ्क्षया ॥ ११६ ॥ तानन्तरीक्षे विशिखैस्त्रिधैकैकमशातयत्। विशेषयन् द्रोणसुतं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ११७ ॥ पुनश्च शरवर्षाणि घोराण्युग्राणि पाण्डवः। व्यसृजद्बलवान् क्रुद्धो द्रोणपुत्रवधेप्सया ॥ ११८ ॥ ततोऽस्त्रमायया तूर्णं शरवृष्टिं निवार्य्य ताम्। धनुश्चिच्छेद भीमस्य द्रोणपुत्रो महास्त्रवित् ॥ ११९ ॥ शरैश्चैनं सुबहुभिः क्रुद्धः सङ्ख्ये पराभिनत्। स छिन्नधन्वा बलवान् रथशक्तिं सुदारुणाम् ॥ १२० ॥ वेगेनाविध्य चिक्षेप द्रोणपुत्ररथं प्रति। तामापतन्तीं सहसा महोल्काभां शितैः शरैः ॥ १२१ ॥ चिच्छेद समरे द्रौणिर्दर्शयन् पाणिलाघवम्। एतस्मिन्नन्तरे भीमो दृढ़माद्राय कार्मुकम् ॥ १२२ ॥ द्रौणिं विव्याध विशिखैः स्मयमानो वृकोदरः। ततो द्रौणिर्महाराज भीमसेनस्य सारथिम् ॥ १२३ ॥ ललाटे दारयामास शरेणानतपर्व्वणा। सोऽतिविद्धो बलवता द्रोणपुत्रेण सारथि ॥ १२४ ॥ व्यामोहमगमद्राजन् रश्मीनुत्सृज्य वाजिनाम्। ततोऽश्वाः प्राद्रवंस्तूर्णं मोहिते रथसारथौ ॥ १२५ ॥ भीमसेनस्य राजेन्द्र पश्यतां सर्व्वधन्विनाम्। तं दृष्ट्वा प्रद्रुतैरश्वैरपकृष्टं रणाजिरात् ॥ १२६ ॥ दध्मौ प्रमुदितः शङ्खं बृहन्तमपराजितः। ततः सर्व्वे च पाञ्चाला भीमसेनश्च पाण्डवः ॥ १२७ ॥ धृष्टद्युम्नरथं त्यक्त्वा भीताः सम्प्राद्रवन् दिशः। तान् प्रभग्नांस्ततो द्रौणिः पृष्ठतो विकिरन् शरैः ॥ १२८ ॥ अभ्यवर्त्तत वेगेन कालयन् पाण्डुवाहिनीम्। ते वध्यमानाः समरे द्रोणपुत्रेण क्षत्रियाः। द्रोणपुत्र भयाद्राजन् दिशः सर्व्वाश्च भेजिरे ॥ १२९ ॥

इति द्रोणपर्व्वणि नारायणास्त्रमोक्षपर्व्वणि अश्वत्थामपराक्रमे एकाधिकद्विशततोऽध्यायः ॥ २०१ ॥

---

सञ्जय उवाच। तत् प्रभग्नं बलं दृष्ट्वा कुन्तीपुत्रो धनञ्जयः। न्यवारयदमेयात्मा द्रोणपुत्रवधेप्सया॥ १ ॥ ततस्ते सैनिका राजन्नेवं तत्रावतस्थिरे। संवार्य्यमाणा यत्नेन गोविन्देनार्जुनेन वै॥ २ ॥ एक एव तु बीभत्सुः सोमकावयवैः सह। मत्स्यैरन्यैश्च सन्धाय पौरवैः स न्यवर्त्तत ॥३॥ ततो द्रुतमतिक्रम्य सिंहलाङ्गूल-केतनम्। सव्यसाची महेष्वासमश्वत्थामानमब्रवीत्॥ ४ ॥ या शक्तिर्यश्च ते वीर्य्यं यज्ज्ञानं यच्च पौरुषम्। धार्त्तराष्ट्रेषु या प्रीतिः प्रद्वेषोऽस्मासु यश्च ते॥ ५ ॥ यच्च भूयोऽस्ति तेजस्तत्परमं मम दर्शय। स एव द्रोणहन्ता ते दर्पं भेत्स्यति पार्षतः॥ ६ ॥ कालानलसमप्रख्यं द्विषतामन्तकोपमम्। समासादय पाञ्चाल्यं माञ्चापि सहकेशवम्। दर्पं नाशयितास्म्यद्य तवोद्धतस्य संयुगे ॥७॥

धृतराष्ट्र उवाच। आचार्य्यपुत्रो मानार्हो बलवांश्चापि सञ्जय। प्रीतिर्धनञ्जये चास्य प्रियश्चापि महात्मनः॥ ८ ॥ न भूतपूर्वं बीभत्सोर्वाक्यं परममीदृशम्। अथ कस्मात् स कौन्तेयः सखायं रूक्षमब्रवीत्॥ ९ ॥

सञ्जय उवाच। युवराजे हते राजन् वृहत्क्षत्रे च पौरवे। इष्वस्त्रविधिसम्पन्ने मालवे च सुदर्शने॥ १० ॥ धृष्टद्युम्ने सात्यकौ च भीमे चापि पराजिते। युधिष्ठिरस्य तैर्वाक्यैर्मर्मस्वपि च घट्टिते॥ ११ ॥ अन्तर्भेदे च सञ्जाते दुःखं संस्मृत्य च प्रभो। अभूत-पूर्वो बीभत्सोर्दुःखान्मन्युरजायत॥ १२ ॥ तस्मादनर्हमश्लील-मप्रियं द्रौणिमब्रवीत्। मान्यमाचार्य्यतनयं रूक्षं कापुरुषो यथा॥ १३ ॥ एवमुक्तस्तु स क्रोधान्महेष्वासतमो नृप। पार्थेन परुषं वाक्यं सर्वमर्मघ्नया गिरा॥ १४ ॥ द्रौणिश्चुकोप पार्थाय कृष्णाय च विशेषतः। स तु यत्तो रथे स्थित्वा वार्य्युपस्पृश्य वीर्य्यवान्॥ १५ ॥ देवैरपि सुदुर्द्धर्षमस्त्रमाग्नेयमाददे। दृश्यादृश्यानरि-गणानुद्दिश्याचार्य्यनन्दनः॥ १६ ॥ सोऽभिमन्त्र्य शरं दीप्तं विधूम-

मिव पावकम् । सर्व्वतः क्रोधमाविश्य चिक्षेप परवीरहा ॥ १७ ॥
ततस्तुमुलमाकाशे शरवर्षमजायत । पावकार्च्चिः परीतं तत्
पार्थमेवाभिपुप्लुवे ॥ १८ ॥ उल्काश्च गगनात् पेतुर्द्दिशश्च न चका-
शिरे । तमश्च सहसा रौद्रं चमूमवततार ताम् ॥ १९ ॥ रक्षांसि
च पिशाचाश्च विनेदुरभिसङ्गताः । ववुश्चाप्यशिवा वाताः सूर्य्यो
नैव ततापं च ॥ २० ॥ चक्रुश्चुर्वायसाश्चापि दिक्षु सर्व्वासु भैरवम् ।
रुधिरञ्चाभिवर्षन्तो विनेदुस्तोयदा दिवि ॥ २१ ॥ पक्षिणः पशवो
गावो मुनयश्चापि सुव्रताः । परमं प्रयतात्मानो न शान्तिमुप-
लेभिरे ॥ २२ ॥ भ्रान्तसर्व्वमहाभूतमावर्त्तितदिवाकरम् । त्रैलोक्य-
मभिसन्तप्तं ज्वराविष्टमिवाभवत् ॥ २३ ॥ अस्त्रतेजोभिसन्तप्ता
नागा भूमिशयास्तथा । निःश्वसन्त समुत्पेतुस्तेजो घोरं मुमु-
क्षवः ॥ २४ ॥ जलजानि च सत्त्वानि दह्यमानानि भारत । न
शान्तिमुपजग्मुर्हि तप्यमानैर्ज्जलाशयैः ॥ २५ ॥ दिग्भ्यः प्रदिग्भ्यः
खाद्भूमेः सर्व्वतः शरवृष्टयः । उच्चावचानि पेतुर्व्वै गरुड़ानिल-
रंहसः ॥ २६ ॥ तैः शरैर्द्रोणपुत्रस्य वज्रवेगैः समाहताः । प्रदग्धाः
शत्रवः पेतुरग्निदग्धा इव द्रुमाः ॥ २७ ॥ दह्यमाना महानागाः
पेतुरुर्व्व्यां समन्ततः । नदन्तो भैरवान्नादान् जलदोपमनिस्वनान्
॥ २८ ॥ अपरे प्रद्रुतास्तत्र दह्यमाना महागजाः । रेमस्त्रस्ता
यथा घोरा वने दावाग्निसंवृताः ॥ २९ ॥ द्रुमाणां शिखराणीव
दावदग्धानि मारिष । अश्ववृन्दान्यदृश्यन्त रथवृन्दानि वा विभो
॥ ३० ॥ अपतन्त रथौघाश्च तत्र तत्र सहस्रशः । तत्सैन्यं भग-
वानग्निर्द्ददाह युधि भारत ॥ ३१ ॥ युगान्ते सर्व्वभूतानि सम्व-
र्त्तक इवानलः । दृष्ट्वा तु पाण्डवीं सेनां दह्यमानां महाहवे ॥३२॥
प्रहृष्टास्तावका राजन् सिंहनादान् विनेदिरे । ततस्तूर्य्यसह-
स्राणि नानालिङ्गानि भारत ॥ ३३ ॥ तूर्य्यमाजघ्निरे हृष्टास्तावका
जितकाशिनः । कृत्स्ना ह्यक्षौहिणी राजन् सव्यसाची च पाण्डवः

॥ ३४ ॥ तमसा संवृते लोके नादृश्यन्त महाहवे। नैव तस्तादृशं
राजन् दृष्टपूर्वं न च श्रुतम् ॥ ३५ ॥ यादृशं द्रोणपुत्रेण सृष्टमस्त्र-
ममर्षिणा। अर्जुनस्तु महाराज ब्राह्ममस्त्रमुदैरयत् ॥ ३६ ॥
सर्वास्त्रप्रतिघाताय विहितं पद्मयोनिना। ततो मुहूर्त्तादिव तत्तमो
व्यपशशाम ह ॥ ३७ ॥ प्रववौ चानिलः शीतो दिशश्च विमला
बभुः। तत्राद्भुतनपश्याम कृत्स्नामक्षौहिणीं हताम् ॥ ३८ ॥
अनभिज्ञेयरूपाञ्च प्रदग्धामस्त्रतेजसा। ततो वीरौ महेष्वासौ
विमुक्तौ केशवार्जुनौ ॥ ३९ ॥ सहितौ समदृश्येतां नभसीव
तमोनुदौ। ततो गाण्डीवधन्वा च केशवश्चाक्षतावुभौ ॥ ४० ॥
सपताकध्वजहयः सानुकर्षवरायुधः। प्रबभौ सरथो मुक्तस्ताव-
कानाम्भयङ्करः ॥४१॥ ततः किलकिलाशब्दः शङ्खभेरीस्वनैः सह।
पाण्डवानां प्रहृष्टानां क्षणेन समजायत ॥ ४२ ॥ हताविति
तयोरासीत् सेनयोरुभयोर्मतिः। तरसाभ्यागतौ दृष्ट्वा विमुक्तौ
केशवार्जुनौ ॥ ४३ ॥ तावव्यतौ प्रमुदितौ दध्मतुर्वारिजोत्तमौ।
दृष्ट्वा प्रमुदितान् पार्थांस्त्वदीया व्यथिता भृशम् ॥ ४४ ॥ विमुक्तौ
च महात्मानौ दृष्ट्वा द्रौणिः सुदुःखितः। मुहूर्त्तं चिन्तयामास
किन्त्वेतदिति मारिष ॥ ४५ ॥ चिन्तयित्वा तु राजेन्द्र ध्यानशोक-
परायणः। निःश्वसन् दीर्घमुष्णञ्च विमनश्चाभवत्ततः ॥ ४६ ॥
ततो द्रौणिर्धनुर्न्यस्य रथात् प्रस्कन्द्य वेगितः। धिग्धिक् सर्वमिदं
मिथ्येत्युक्त्वा सम्प्राद्रवद्रणात् ॥ ४७ ॥ ततः स्निग्धाम्बुदाभासं
वेदव्यासमकल्मषम्। वेदव्यासं सरस्वत्यावासं व्यासं ददर्श ह
॥ ४८ ॥ तं द्रौणिरग्रतो दृष्ट्वा स्थितं कुरुकुलोद्वह। सन्नकण्ठो-
ऽब्रवीद्वाक्यमभिवाद्य सुदीनवत् ॥ ४९ ॥ भो भो माया यदृच्छा
वा न विद्मः किमिदम्भवेत्। अस्त्रन्त्विदं कथं मिथ्या मम कश्च
व्यतिक्रमः ॥५०॥ अधरोत्तरमेतद्वा लोकानाञ्च पराभवः। यदिमौ
जीवतः कृष्णौ कालो हि दुरतिक्रमः ॥ ५१ ॥ नासुरा न च

गन्धर्वा न पिशाचा न राक्षसाः । न सर्पयक्षपतगा न मनुष्याः कथञ्चन ॥ ५२ ॥ उत्सहन्ते त्वया कर्त्तुमेतदस्त्रं मयेरितम् । तदिदं केवलं हत्वा शान्तमक्षौहिणीं ज्वलत् ॥ ५३ ॥ सर्वघाति मया मुक्तमस्त्रं परमदारुणम् । केन मानुषधर्माणौ नावधीत् केशवार्जुनौ ॥ ५४ ॥ एतन्मे ब्रूहि भगवन् मया पृष्टो यथातथम् । श्रोतुमिच्छामि तत्त्वेन सर्वमेतन्महामुने ॥ ५५ ॥

व्यास उवाच । महान्तमेतमर्थं मां यत्त्वं पृच्छसि विस्मयात् । तत्प्रवक्ष्यामि ते सर्वं समाधाय मनः शृणु ॥ ५६ ॥ योऽसौ नारायणो नाम पूर्वेषामपि पूर्वजः । अजायत च कार्य्यार्थं पुत्रो धर्मस्य विश्वकृत् ॥ ५७ ॥ स तपस्तीव्रमातस्थे शिशिरं गिरिमाश्रितः । ऊर्द्ध्वबाहुर्महातेजा ज्वलनादित्यसन्निभः ॥ ५८ ॥ षष्टिं वर्षसहस्राणि तावन्त्येव शतानि च । अशोषयत्तदात्मानं वायुभक्षोऽम्बुजेक्षणः ॥ ५९ ॥ तथा परं तपस्तप्त्वा द्विस्ततोऽन्यत् पुनर्महत् । द्यावापृथिव्योर्विवरं तेजसा समपूरयत् ॥ ६० ॥ स तेन तपसा तात ब्रह्मभूतो यदाभवत् । ततो विश्वेश्वरं योनिं विश्वस्य जगतः पतिम् ॥ ६१ ॥ ददर्श भृशदुर्द्दर्शं सर्वदेवेशमीश्वरम् । अणीयांसमणुभ्यश्च बृहद्भ्यश्च महत्तरम् ॥ ६२ ॥ रुद्रमीशानमृषभं हरं शम्भुं कपर्द्दिनम् । चेकितानं परं योनिं तिष्ठतो गच्छतश्च ह ॥ ६३ ॥ दुर्वारणं दुर्द्दृशं तिग्ममन्युं महात्मानं सर्वहरं प्रचेतसम् । दिव्यञ्चापमिषुधी चाददानं हिरण्यवर्माणमनन्तवीर्य्यम् ॥ ६४ ॥ पिनाकिनं वज्रिणं दीप्तशूलं परश्वधिनं गदिनं स्वायतासिम । शुभ्रुं जटिलं मुषलिनं शूलपाणिं व्याघ्राजिनं परिधिणं दण्डपाणिम् ॥ ६५ ॥ शुभाङ्गदं नागयज्ञोपवीतं विश्वेर्गणैः शोभितं भूतसङ्घैः । एकीभूतं तपसां सन्निधानं वयोतिगैः सुष्टु तमिष्टवाग्भिः ॥ ६६ ॥ जलं दिवं खं क्षितिं सूर्य्यचन्द्रौ तथा वायुग्नी प्रमिमाणं जगच्च । नालं द्रष्टुं यमजं भिन्नवृत्ता ब्रह्म-

द्विषघ्नमस्तस्य योनिम् ॥ ६७ ॥ यं पश्यन्ति ब्राह्मणा साधुवृत्ताः क्षीणे पापे मनसा वीतशोकाः । तं निष्टपन्तं तपसा धर्ममीड्यं तद्भक्तो वै विश्वरूपं ददर्श । दृष्ट्वा चैनं वाङ्मनोबुद्धिदेहैः संहृष्टात्मा सुमुदे वासुदेवः ॥ ६८ ॥ अक्षमालापरिक्षिप्तं ज्योतिषां परमं निधिम् । ततो नारायणो देवं ववन्दे विश्वसम्भवम् ॥ ६९ ॥ वरदं पृथुचार्वङ्ग्या पार्वत्या सहितं प्रभुम् । क्रीड़मानं महात्मानं भूतसङ्घगणैर्वृतम् ॥ ७० ॥ अजमीशानमव्यक्तं कारणात्मानमच्युतम् । अभिवाद्याथ रुद्राय सद्योऽन्धकनिपातिने । पद्माक्षस्तं विरूपाक्षमभितुष्टाव भक्तिमान् ॥ ७१ ॥

नारायण उवाच । त्वत्सम्भूता भूतकृतो वरेण्य गोप्तारोऽस्य भुवनस्यादिदेव । आविश्येमां धरणीं येऽभ्यरक्षन् पुरा पुराणीं तव देव सृष्टिम् ॥७२॥ सुरासुरान्नागरक्षःपिशाचान्नरान् सुपर्णानथ गन्धर्वयक्षान् । पृथग्विधान् भूतसङ्घान् सविश्वांस्त्वत्सम्भूतान् विद्म सर्वांस्तथैव ॥ ७३ ॥ ऐन्द्रं याम्यं वारुणं वैत्तपाल्यं पैत्रं त्वाष्ट्रं कर्म सौम्यञ्च तुभ्यम् । रूपं ज्योतिः शब्द आकाशवायुः स्पर्शः स्वाद्यं सलिलं गन्ध उर्वी ॥ ७४ ॥ कालो ब्रह्मा ब्रह्म च ब्राह्मणाश्च त्वत् सम्भूतं स्थास्नु चरिष्णु चेदम् । अद्भ्यस्तोका यान्ति यथा पृथक् त्वं ताभिश्चैक्यं सङ्क्षये यान्ति भूयः ॥ ७५ ॥ एवं विद्वान् प्रभवञ्चाप्ययञ्च मत्त्वा भूतानां तव सायुज्यमेति । दिव्यावृत्तौ मानसौ द्वौ सुपर्णौ वाचा शाखाः पिप्पलाः सप्त गोपाः ॥ ७६ ॥ दश चान्ये ये पुरं धारयन्ति त्वया सृष्टास्त्वं हि तेभ्यः परश्च । भूतं भव्यं भविता चाप्यधृष्यं त्वत्सम्भूता भुवनानीह विश्वा ॥ ७७ ॥ भक्तञ्च मां भजमानं भजस्व मारीरिषो ममाहिताहितेन । आत्मानं त्वामात्मनानन्यबोधं विद्वानेवं गच्छति ब्रह्म शुक्रम् ॥७८॥ अस्तौषं त्वां तव सम्मानमिच्छन् विचिन्वन् वै सदृशं देववर्य । सुदुर्लभान् देहि वरान् ममेष्टानभिष्टुतः प्रविकार्षीश्च मायाम् ॥७९

व्यास उवाच । तस्मै वरानचिन्त्यात्मा नीलकण्ठः पिनाकधृक् । अर्हते वासुदेवाय प्रायच्छदृषिसंस्तुतः ॥ ८० ॥

श्रीभगवानुवाच । मत्प्रसादान्मनुष्येषु देवगन्धर्व्वयोनिषु । अप्रमेयबलात्मा त्वं नारायण भविष्यसि ॥ ८१ ॥ न च त्वां प्रसहिष्यन्ति देवासुरमहोरगाः । न पिशाचा न गन्धर्व्वा न नरा न च राक्षसाः ॥ ८२ ॥ न सुपर्णास्तथा नागा न च विश्वे वियोनिजाः । न कश्चित्त्वाञ्च देवोऽपि समरेषु विजेष्यति ॥ ८३ ॥ न शस्त्रेण न वज्रेण नाग्निना न च वायुना । न चार्द्रेण न शुष्केण त्रसेन स्थावरेण च ॥ ८४ ॥ कश्चित्तव रुजं कर्त्ता मत्प्रसादात् कथञ्चन । अपि चेत् समरं गत्वा भविष्यसि ममाधिकः ॥ ८५ ॥ एवमेते वरा लब्धाः वरास्ते विद्धि शौरिणा । स एष देवश्चरति मायया मोहयन् जगत् ॥ ८६ ॥ तस्यैव तपसो जातं नरं नाम महामुनिम् । तुल्यमेतेन देवेन त्वं जानीह्यर्जुनं सदा ॥ ८७ ॥ तावेतौ पूर्व्वदेवानां परमौ पठितावृषी । लोकयात्राविधानार्थं सञ्जायेते युगे युगे ॥ ८८ ॥ तत्रैव कर्म्मणः कृत्स्नं महतस्तपसोऽपि च । तेजोमन्युश्च विभ्रस्त्वं जातो रौद्रो महामुने ॥ ८९ ॥ स भवान् देहवान् प्राज्ञो ज्ञात्वा भवभयं जगत् । अवाकर्षस्त्वमात्मानं नियमैस्तत् प्रियेप्सया ॥ ९० ॥ शुभ्रं स तु भवान् कृत्वा महापुरुषविग्रहम् । ईजिवांस्त्वं जपैर्होमैरुपहारैश्च मानद ॥ ९१ ॥ स तथा पूज्यमानस्ते पूर्व्वदेहेष्वतूतुषत् । पुष्कलांश्च वरान् प्रादात्तव विद्वन् हृदि स्थितान् ॥ ९२ ॥ जन्मकर्म्मतपो योगास्तयोस्तव स पुष्कलाः । ताभ्यां लिङ्गेऽर्च्चितो देवस्त्वयार्च्चायां युगे युगे ॥ ९३ ॥ स एष रुद्रभक्तश्च केशवो रुद्रसम्भवः । सर्व्वरूपं भवं ज्ञात्वा लिङ्गमर्च्चयति प्रभुम् ॥ ९४ ॥ आत्मयोगाश्च तस्मिन् वै शास्त्रयोगाश्च शाश्वताः । एनमेवायजन् देवाः सिद्धाश्च परमर्षयः ॥९५॥ पार्थयन्ति परं लोके स्थाणुमेकं स सर्व्वकृत् । कृष्ण एव हि

यष्टव्यो यज्ञैश्चैव सनातनः ॥ ८६ ॥ सर्वभूतभवं ज्ञात्वा लिङ्गमर्चति यः प्रभुः । तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः ॥ ८७ ॥

सञ्जय उवाच । तस्य तद्वचनं श्रुत्वा द्रोणपुत्रो महारथः । नमश्चकार रुद्राय बहु मेने च केशवम् ॥८८॥ हृष्टरोमा च वश्यात्मा नमस्कृत्य महर्षये । वरूथिनीमभिप्रेक्ष्य ह्यवहारमकारयत् ॥८९॥ ततः प्रत्यवहारोऽभूत् पाण्डवानां विशाम्पते । कौरवाणाञ्च दीनानां द्रोणे युधि निपातिते ॥१००॥ युद्धं कृत्वा दिनान् पञ्च द्रोणो हत्वा वरूथिनीम् । ब्रह्मलोके गतो राजन् ब्राह्मणो वेदपारग ॥१०१॥

इति द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि व्यासवाक्ये द्व्यधिकद्विशततोऽध्यायः ॥ २०२ ॥

---

धृतराष्ट्र उवाच । तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै । मामकाः पाण्डवाश्चैव किमकुर्वंस्ततः परम् ॥ १ ॥

सञ्जय उवाच । तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै । कौरवेषु च भग्नेषु कुन्तीपुत्रो धनञ्जयः ॥ २ ॥ दृष्ट्वा सुमहदाश्चर्य्यमात्मनो विजयावहम् । यदृच्छया गतं व्यासं प्रपच्छ भरतर्षभ॥३॥

अर्ज्जुन उवाच । सङ्ग्रामे न्यहनं शत्रून् शरौघैर्विमलैरहम् । अग्रतो लक्षये यान्तं पुरुषं पावकप्रभम् ॥ ४ ॥ ज्वलन्तं शूलमुद्यम्य यां दिशं प्रतिपद्यते । तस्यां दिशि विशीर्य्यन्ते शत्रवो मे महामुने ॥ ५ ॥ तेन भग्नानरीन् सर्वान्मद्भग्नान्मन्यते जनः । तेन भग्नानि सैन्यानि पृष्ठतोऽनुनुदाम्यहम् ॥ ६ ॥ भगवांस्तन्ममाचक्ष्व को वै स पुरुषोत्तमः । शूलपाणिर्मया दृष्टस्तेजसा सूर्य्यसन्निभः ॥ ७ ॥ न पद्भ्यां स्पृशते भूमिं न च शूलं विमुञ्चति । शूलाच्छूलसहस्राणि निपेतुस्तस्य तेजसा ॥ ८ ॥

व्यास उवाच । प्रजापतीनां प्रथमं तेजसं पुरुषं प्रभुम् । भुवनं भूर्भुवं देवं सर्वलोकेश्वरं प्रभुम् ॥ ९ ॥ ईशानं वरदं पार्थ

दृष्टवानसि शङ्करम्। तं गच्छ शरणं देवं वरदं भुवनेश्वरम् ॥ १० ॥ महादेवं महात्मानमीशानं जटिलं शिवम्। त्र्यक्षं महाभुजं रुद्रं शिखिनं चीरवाससम ॥ ११ ॥ महादेवं हरं स्थाणुं वरदं भुवनेश्वरम्। जगत्प्रधानमधिकं जगत्प्रीतिमधीश्वरम् ॥ १२ ॥ जगद्योनिं जगद्दीपं जयिनं जगतो गतिम्। विश्वात्मानं विश्वसृजं विश्वमूर्त्तिं यशस्विनम् ॥ १३ ॥ विश्वेश्वरं विश्वनरं कर्मणामीश्वरं प्रभुम्। शम्भुं स्वयम्भुं भूतेशं भूतभव्यभवोद्भवम् ॥ १४ ॥ योगं योगीश्वरं सर्वं सर्वलोकेश्वरेश्वरम्। सर्वश्रेष्ठं जगच्छ्रेष्ठं वरिष्ठं परमेष्ठिनम ॥ १५ ॥ लोकत्रयविधातारमेकं लोकत्रयाश्रयम्। सुदुर्ज्जयं जगन्नाथं जन्ममृत्युजरातिगम् ॥१६॥ ज्ञानात्मानं ज्ञानगम्यं ज्ञानश्रेष्ठं सुदुर्विदम्। दातारञ्चैव भक्तानां प्रसादविहितान् वरान् ॥ १७ ॥ तस्य पारिषदा दिव्या रूपैर्नानाविधैर्विभोः। वामना जटिला मुण्डा ह्रस्वग्रीवा महोदराः ॥ १८ ॥ महाकाया महोत्साहा महाकर्णास्तथापरे। आननैर्विकृतैः पादैः पार्थ वेशैश्च वैकृतैः ॥ १९ ॥ ईदृशैः स महादेवः पूज्यमानो महेश्वर। स शिवस्तात तेजस्वी प्रसादाद्याति तेऽग्रतः ॥ २० ॥ तस्मिन् घोरे सदा पार्थ संग्रामे लोमहर्षणे। द्रौणिकर्णकृपैर्गुप्तां महेष्वासैः प्रहारिभिः ॥ २१ ॥ कस्तां सेनां तदा पार्थ मनसापि प्रधर्षयेत्। ऋते देवान्महेष्वासाद्वहुरूपान्महेश्वरात् ॥ २२ ॥ स्थातुमुत्सहते कश्चिन्न तस्मिन्नग्रतः स्थिते। न हि भूतं समन्तेन त्रिषु लोकेषु विद्यते ॥ २३ ॥ गन्धेनापि हि संग्रामे तस्य क्रुद्धस्य शत्रवः। विसंज्ञा हतभूयिष्ठा वेपन्ति च पतन्ति च ॥ २४ ॥ तस्मै नमस्तु कुर्वन्तो देवास्तिष्ठन्ति वै दिवि। ये चान्ये मानवा लोके ये च स्वर्गजितो नराः ॥ २५ ॥ ये भक्ता वरदं देवं शिवं रुद्रमुमापतिम्। इह लोके सुखं प्राप्य ते यान्ति परमाङ्गतिम् ॥ २६ ॥ नमस्कुरुष्व कौन्तेय तस्मै शान्ताय वै सदा।

रुद्राय शितिकण्ठाय कनिष्ठाय सुवर्च्चसे ॥ २७ ॥ कपर्द्दिने कराlाय हर्य्यक्षवरदाय च। याम्यायारक्तकेशाय सद्वृत्ते शङ्कराय च ॥ २८ ॥ काम्याय हरिनेत्राय स्थाणवे पुरुषाय च। हरिकेशाय मुण्डाय कनिष्ठाय सुवर्च्चसे ॥ २९ ॥ भास्कराय सुतीर्थाय देवदेवाय रंहसे। बहुरूपाय सर्वाय प्रियाय प्रियवाससे ॥ ३० ॥ उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढ़षे। गिरिशाय सुशान्ताय पतये चीरवाससे ॥३१॥ हिरण्यवाहवे राजन्नुग्राय पतये दिशाम्। पर्ज्जन्यपतये चैव भूतानां पतये नमः ॥ ३२ ॥ वृक्षाणाम्पतये चैव गवाञ्च पतये तथा। वृक्षैरावृतकायाय सेनान्ये मध्यमाय च ॥३३॥ स्रुवहस्ताय देवाय धन्विने भार्गवाय च। बहुरूपाय विश्वस्य पतये मुञ्जवाससे ॥ ३४ ॥ सहस्रशिरसे चैव सहस्रनयनाय च। सहस्रवाहवे चैव सहस्रचरणाय च ॥ ३५ ॥ शरणं गच्छ कौन्तेय वरदं भुवनेश्वरम्। उमापतिं विरूपाक्षं दक्षयज्ञनिवर्हणम् ॥३६॥ प्रजानाम्पतिमव्यग्रं भूतानां पतिमव्ययम्। कपर्द्दिनं वृषावर्त्तं वृषनाभं वृषध्वजम् ॥ ३७ ॥ वृषदर्पं वृषपतिं वृषशृङ्गं वृषर्षभम्। वृषाङ्कं वृषभोदारं वृषभं वृषभेक्षणम् ॥ ३८ ॥ वृषायुधं वृषशरं वृषभूतं महेश्वरम्। महोदरं महाकायं द्वीपिचर्मनिवासिनम् ॥ ३९ ॥ लोकेशं वरदं मुण्डं ब्रह्मण्यं ब्राह्मणप्रियम्। त्रिशूलपाणिं वरदं खड्गचर्म्मधरं शुभम् ॥ ४० ॥ पिनाकिनं खण्डपरशुं लोकानां पतिमीश्वरम। प्रपद्ये देवमीशानं शरण्यं चीरवाससम् ॥ ४१ ॥ नमस्तस्मै सुरेशाय यस्य वैश्रवणः सखा। सुवाससे नमो नित्यं सुव्रताय सुधन्विने ॥ ४२ ॥ धनुर्द्धराय देवाय प्रियधन्वाय धन्विने। धन्वन्तराय धनुषे धन्वाचार्य्याय ते नमः ॥ ४३ ॥ उग्रायुधाय देवाय नमः सुरवराय च। नमोऽस्तु बहुरूपाय नमस्ते बहुधन्विने ॥ ४४ ॥ नमोऽस्तु स्थाणवे नित्यं नमस्तस्मै सुधन्विने। नमोऽस्तु त्रिपुरघ्नाय भगघ्नाय च वै नमः ॥ ४५ ॥

वनस्पतीनां पतये नराणां पतये नमः। मातृणाम्पतये चैव गणा-
नाम्पतये नमः ॥ ४६ ॥ गवाञ्च पतये नित्यं यज्ञानां पतये नमः।
अपाञ्च पतये नित्यं देवानां पतये नमः ॥ ४७ ॥ पूष्णो दन्त-
विनाशाय त्र्यक्षाय वरदाय च। हराय नीलकण्ठाय स्वर्ण-
केशाय वै नमः ॥ ४८ ॥ कर्म्माणि यानि दिव्यानि महादेवस्य
धीमतः। तानि ते कीर्त्तयिष्यामि यथाप्रज्ञं यथाश्रुतम् ॥ ४९ ॥
न सुरा नासुरा लोके न गन्धर्वा न राक्षसाः। सुखमेधन्ते कुपिते
तस्मिन्नपि गुहागताः ॥ ५० ॥ दक्षस्य यजमानस्य विधिवत्संभृतं
पुरा। विव्याध कुपितो यज्ञं निर्द्दयस्त्वभवत्तदा ॥५१॥ धनुषा
बाणमुत्सृज्य सघोषं विननाद च। ते न शर्म्म कुतः शान्तिं लेभिरे
स्म सुरास्तदा ॥ ५२ ॥ विद्रुते सहसा यज्ञे कुपिते च महेश्वरे।
तेन ज्यातलघोषेण सर्व्वे देवाः समाकुलाः ॥ ५३ ॥ वभूवुर्व्वशगाः
पार्थं निपेतुश्च सुरासुराः। आपश्चुक्षुभिरे सर्व्वाश्चकम्पे च वसु-
न्धरा ॥ ५४ ॥ पर्व्वताश्च व्यशीर्य्यन्त दिशो नागाश्च मोहिताः।
अन्धेन तमसा लोका न प्राकाशन्त संवृताः ॥ ५५ ॥ जघ्निवान्
सह सूर्य्येण सर्व्वेषां ज्योतिषां प्रभाम्। चुक्षुभुर्भयभीताश्च शान्ति-
ञ्चक्रुस्तथैव च ॥ ५६ ॥ ऋषयः सर्व्वभूतानामात्मनश्च सुखैषिणः।
पूषाणमभ्यद्रवत् शङ्करः प्रहसन्निव ॥ ५७ ॥ पुरोडाशं भक्षयतो
दशनान् वै व्यशातयत्। ततो निश्चक्रमुर्द्देवा वेपमाना नताः स्म
तम् ॥ ५८ ॥ पुनश्च सन्दधे दीप्तान् देवानां निशितान् शरान्।
सधूमान् सस्फुलिङ्गांश्च विद्युत्तोयदसन्निभान् ॥ ५९ ॥ तं दृष्ट्वा
तु सुराः सर्व्वे प्रणिपत्य महेश्वरम्। रुद्रस्य यज्ञभागञ्च विशिष्टं
तेऽन्वकल्पयन् ॥ ६० ॥ भयेन त्रिदशा राजन् शरणञ्च प्रपे-
दिरे। तेन चैवातिकोपेन स यज्ञः सन्धितस्तदा ॥ ६१ ॥ भग्ना-
श्चापि सुराश्चासन् भीताश्चाद्यापि तं प्रति। असुराणां पुराण्यासं-
स्त्रीणि वीर्य्यवतां दिवि ॥ ६२ ॥ आयसं राजतञ्चैव सौवर्णं

परमं महत् । सौवर्णं कमलाचस्य तारकाचस्य राजतम् ॥ ६३ ॥
तृतीयन्तु परं तेषां विद्युन्मालिन आयसम् । न शक्तस्तानि
मघवा नेतुं सर्वायुधैरपि ॥ ६४ ॥ अथ सर्वे सुरा रुद्रं जग्मुः
शरणमर्दिताः । ते तमुचुर्महात्मानं सर्वे देवाः सवासवाः ॥ ६५ ॥
ब्रह्मदत्तवरा ह्येते घोरास्त्रिपुरवासिनः । पीड़यन्त्यधिकं लोकं
यस्मात्ते वरदर्पिताः ॥ ६६ ॥ त्वदृते देवदेवेश नान्यः शक्तः
कथञ्चन । हन्तुं दैत्यान्महादेव जहि तांस्त्वं सुरद्विषः ॥ ६७ ॥
रुद्र रौद्रा भविष्यन्ति पशवः सर्वकर्मसु । निपातयिष्यसे चैता-
नसुरान् भुवनेश्वर ॥ ६८ ॥ स तथोक्तस्तथेत्युक्त्वा देवानां हित-
काम्यया । गन्धमादनविन्ध्यौ च कृत्वा वंशध्वजौ हरः ॥ ६९ ॥
पृथ्वीं ससागरवनां रथं कृत्वा च शङ्करः । अचं कृत्वा तु नागेन्द्रं
शेषं नाम त्रिलोचनः ॥ ७० ॥ चक्रे कृत्वा तु चन्द्रार्कौ देवदेवः
पिनाकधृक् । अणीकृत्यैलपुत्रञ्च पुष्पदन्तञ्च त्र्यम्बकः ॥ ७१ ॥ यूपं
कृत्वा तु मलयमवनाहञ्च तचकम् । योक्त्राङ्गानि च सत्त्वानि कृत्वा
सर्वः प्रतापवान् ॥ ७२ ॥ वेदान् कृत्वाथ चतुरश्चतुरोऽश्वान् महे-
श्वरः । उपवेदान् खलीनांश्च कृत्वा लोकत्रयेश्वरः ॥ ७३ ॥
गायत्रीं प्रग्रहं कृत्वा सावित्रीञ्च महेश्वरः । कृत्वोङ्कारं प्रतोदञ्च
ब्रह्माणञ्चैव सारथिम् ॥ ७४ ॥ गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा
च वासुकिम् । विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैव च ॥ ७५ ॥
वायुं कृत्वाथ वाजाभ्यां पुङ्खे वैवस्वतं यमम् । विद्युत् कृत्वाथ
निस्वानं मेरुं कृत्वाथ वै ध्वजम् ॥ ७६ ॥ आरुह्य स रथं दिव्यं
सर्वदेवमयं शिवः । त्रिपुरस्य वधार्थाय स्थाणुः प्रहताम्बरः ॥७७॥
असुराणामन्तकरः श्रीमानतुलविक्रमः । स्तूयमानः सुरैः पार्थ
ऋषिभिश्च तपोधनैः ॥ ७८ ॥ स्थानं महेश्वरं कृत्वा दिव्यमप्रतिमं
प्रभुः । अतिष्ठत् स्थाणुभूतः स सहस्रं परिवत्सरान् ॥ ७९ ॥
यदा त्रीणि समेतानि अन्तरीचे पुराणि च । त्रिपर्वणा त्रि-

शक्येन तदा तानि बिभेद सः ॥ ८० ॥ पुराणि न च तं शेकु-र्दानवाः प्रतिवीक्षितुम् । शरं कालाग्निसंयुक्तं विष्णुसोमसमा-युतम् ॥ ८१ ॥ पुराणि दग्धवन्तं तं देवी याता प्रवीक्षितुम् । बालमङ्कगतं कृत्वा स्वयं पञ्चशिखं पुनः ॥ ८२ ॥ उमा जिज्ञास-माना वै कोऽयमित्यब्रवीत् सुरान् । असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः ॥ ८३ ॥ बाहुं सवज्रं तं तस्य क्रुद्धस्यास्तम्भयत् प्रभुः । प्रहस्य भगवांस्तूर्णं सर्वलोकेश्वरो विभुः ॥ ८४ ॥ ततः संस्तम्भितभुजः शक्रो देवगणैर्वृतः । जगाम ससुरस्तूर्णं ब्रह्माणं प्रभुमव्ययम् ॥ ८५ ॥ ते तं प्रणम्य शिरसा प्रोचुः प्राञ्जलयस्तदा । किमप्यङ्कगतं ब्रह्मन् पार्वत्या भूतमद्भुतम् ॥ ८६ ॥ बालरूपधरं दृष्ट्वा नास्माभिरभिवादितः । तस्मात्त्वां प्रष्टुमिच्छामो निर्जिता येन वै वयम् ॥ ८७ ॥ अयुध्यता हि बालेन लीलया सपुरन्दराः । तेषां तद्वचनं श्रुत्वा ब्रह्मा ब्रह्मविदाम्वरः ॥ ८८ ॥ ध्यात्वा स शम्भुं भगवान् बालञ्चामिततेजसम् । उवाच भगवान् ब्रह्मा शक्रादींश्च सुरोत्तमान् ॥ ८९ ॥ चराचरस्य जगतः प्रभुः स भग-वान् हरः । तस्मात् परतरं नान्यत् किञ्चिदस्ति महेश्वरात् ॥९०॥ यो दृष्टो ह्युमया सार्द्धं युष्माभिरमितद्युतिः । स पार्वत्याः कृते देवः कृतवान् बालरूपताम् ॥ ९१ ॥ ते मया सहिता यूयं प्रापयध्वं तमेव हि । स एव भगवान् देवः सर्वलोकेश्वरः प्रभुः ॥ ९२ ॥ न सम्बुबुधिरे चैनं देवास्तं भुवनेश्वरम् । सप्रजापतयः सर्वे बालार्कसदृशप्रभम् ॥ ९३ ॥ अथाभ्येत्य ततो ब्रह्मा दृष्ट्वा च सं महेश्वरम् । अयं श्रेष्ठ इति ज्ञात्वा ववन्दे तं पितामहः ॥ ९४ ॥

ब्रह्मोवाच । त्वं यज्ञो भुवनस्यास्य त्वं गतिस्त्वं परायणः । त्वम्भवस्त्वं महादेवस्त्वं धाम परमं पदम् ॥ ९५ ॥ त्वया सर्वमिदं व्याप्तं जगत् स्थावरजङ्गमम् । भगवन् भूतभव्येश लोकनाथ जग-त्पते । प्रसादं कुरु शक्रस्य त्वया क्रोधार्दितस्य वै ॥ ९६ ॥

व्यास उवाच। पद्मयोनेर्वचः श्रुत्वा ततः प्रीतो महेश्वरः।
प्रासादाभिमुखो भूत्वा अट्टहासमथाकरोत् ॥ ९७ ॥ ततः प्रसा-
दयामासुरुमां रुद्रञ्च ते सुराः। अभवच्च पुनर्बाहुः प्रकृतिस्थो
हि वज्रिणः ॥ ९८ ॥ तेषां प्रसन्नो भगवान् सपत्नीको वृषध्वजः।
देवानां त्रिदशश्रेष्ठो दक्षयज्ञविनाशनः ॥ ९९ ॥ स वै रुद्रः स च
शिवः सोऽग्निः सर्वः स सर्ववित्। स चेन्द्रश्चैव वायुश्च सोऽश्विनौ
स च विद्युतः ॥ १०० ॥ स भवः स च पर्ज्जन्यो महादेवः स
चानघः। स चन्द्रमाः स चेशानः स सूर्य्यो वरुणश्च सः ॥ १०१ ॥
स कालः सोऽन्तको मृत्युः स यमो रात्र्यहानि च। मासार्द्धमासा
ऋतवः सन्ध्ये संवत्सराणि च ॥ १०२ ॥ धाता च स विधाता
च विश्वात्मा विश्वकर्म्मकृत्। सर्वासां देवतानाञ्च धारयत्यवपु-
र्वपुः ॥ १०३ ॥ सर्व्वैर्देवैः स्तुतो देवः सैकधा बहुधा च सः।
शतधा सहस्रधा चैव तथा शतसहस्रधा ॥ १०४ ॥ द्वे तनू तस्य
देवस्य वेदज्ञा ब्राह्मणा विदुः। घोरा चान्या शिवा चान्या ते
तनू बहुधा पुनः ॥ १०५ ॥ घोरा तु या तनुस्तस्य सोऽग्निर्विष्णुः
स भास्करः। सौम्या तु पुनरेवास्य आपो ज्योतींषि चन्द्रमाः
॥ १०६ ॥ वेदाङ्गाः सोपनिषदः पुराणाध्यात्मनिश्चयाः। यदत्र
परमं गुह्यं स वै देवो महेश्वरः ॥ १०७ ॥ ईदृशश्च महादेवो
भूयांश्च भगवानजः। न हि सर्वं मया शक्या वक्तुं भगवतो गुणाः
॥ १०८ ॥ अपि वर्षसहस्रेण सततं पाण्डुनन्दन। सर्वैर्ग्रहै-
र्गृहीतान् वै सर्वपापसमन्वितान् ॥ १०९ ॥ स मोचयति सुप्रीतः
शरण्यः शरणागतान्। आयुरारोग्यमैश्वर्य्यं वित्तं कामांश्च
पुष्कलान् ॥ ११० ॥ स ददाति मनुष्येभ्यः स चैवाक्षिपते पुनः।
सेन्द्रादिषु च देवेषु तस्य चैश्वर्य्यमुच्यते ॥ १११ ॥ स चैव व्यापृतो
लोके मनुष्याणां शुभाशुभे। ऐश्वर्य्याच्चैव कामानामीश्वरश्च स
उच्यते ॥ ११२ ॥ महेश्वरश्च भूतानां महतामीश्वरश्च सः।

बहुभिर्बहुधारूपैर्विश्वं व्याप्नोति वै जगत्॥ ११३॥ तस्य देवस्य यद्भस्म समुद्रे तदतिष्ठत। वड़वामुखेऽतिविख्यातं पिवत्तोयमयं हविः॥ ११४॥ एष चैव श्मशानेषु देवो वसति नित्यशः। यजन्त्येनं जनास्तत्र वीरस्थान इतीश्वरम्॥ ११५॥ अस्य दीप्तानि रूपाणि घोराणि च बहूनि च। लोके यान्यस्य पूज्यन्ते मनुष्याः प्रवदन्ति च॥ ११६॥ नामधेयानि लोकेषु बहून्यस्य यथार्थवित्। निरुच्यते महत्त्वाच्च विभुत्वात् कर्मभिस्तथा॥ ११७॥ वेदे चास्य समाम्नातं शतरुद्रियमुत्तमम्। नाम्ना चानन्तरुद्रेति ह्युपस्थानं महात्मनः॥ ११८॥ स कामानां प्रभुर्देवो ये दिव्या ये च मानुषाः। स विभुः स प्रभुर्देवो विश्वं व्याप्नोति वै महत्॥ ११९॥ ज्येष्ठभूतं वदन्त्येनं ब्राह्मणा मुनयस्तथा। प्रथमो ह्येष देवानां मुखादस्यानिलोऽभवत्॥ १२०॥ सर्व्वथा यत् पशून् पाति तैश्च यद्रमते पुनः। तेषामधिपतिर्यच्च तस्मात् पशुपतिः स्मृतः॥ १२१॥ नित्येन ब्रह्मचर्य्येण लिङ्गमस्य यदा स्थितम्। महयत्येष लोकांश्च महेश्वर इति स्मृतः॥ १२२॥ ऋषयश्चैव देवाश्च गन्धर्व्वाप्सरसस्तथा। लिङ्गमस्यार्च्चयन्ति स्म तच्चाप्यूर्द्ध्वं समास्थितम्॥ १२३॥ पूज्यमाने ततस्तस्मिन् मोदते स महेश्वरः। सुखी प्रीतश्च भवति प्रहृष्टश्चैव शङ्करः॥ १२४॥ यदस्य बहुधा रूपं भूतभव्यभवत्स्थितम्। स्थावरं जङ्गमञ्चैव बहुरूपस्तत स्मृतः॥ १२५॥ एकाक्षो जाज्वलन्नास्ते सर्व्वतोऽक्षिमयोऽपि वा। क्रोधाद्यश्चाविशल्लोकांस्तस्मात् सर्व्व इति स्मृतः॥ १२६॥ धूम्ररूपञ्च यत्तस्य धूर्ज्जटिस्तेन चोच्यते। विश्वे देवाश्च यत्तस्मिन् विश्वरूपस्ततः स्मृतः॥ १२७॥ तिस्रो देव्यो यदा चैनं भजन्ते भुवनेश्वरम्। द्यौरापः पृथिवी चैव त्र्यम्बकस्तु ततः स्मृतः॥ १२८॥ समेधयति यन्नित्यं सर्व्वार्थान् सर्व्वकर्मसु। शिवमिच्छन् मनुष्याणां तस्मादेष शिवः स्मृतः॥ १२९॥ सहस्राक्षो-

ऽच्युताक्षो वा सर्वतोऽक्षिमयोऽपि वा। यच्च विश्वं महत् पाति महादेवस्ततः स्मृतः ॥ १३० ॥ दहत्यूर्द्धं स्थितो यच्च प्राणोत्पत्ति-स्थितश्च यत्। स्थितलिङ्गश्च यन्नित्यं तस्मात् स्थाणुरिति स्मृतः ॥ १३१ ॥ सूर्य्याचन्द्रमसौ लोके प्रकाशन्ते रुचश्च याः। ते केशसंज्ञितास्त्र्यक्षे व्योमकेश इति स्मृतः ॥ १३२ ॥ ब्रह्माणमिन्द्रा-वरुणौ यमं धनदमेव च। निगृह्य हरते यस्मात्तस्माद्धर इति स्मृतः ॥ १३३ ॥ भूतं भव्यं भविष्यच्च यच्च सर्वमशेषतः। भव एव ततो यस्माद्भूतभव्यभवोद्भवः ॥ १३४ ॥ विषमस्थः शरीरेषु समश्च प्राणिनामिह। स वायुर्विषमस्थेषु प्राणोऽपानः शरीरिषु ॥१३५॥ पूजयेद्विग्रहं यस्तु लिङ्गञ्चापि महात्मनः। लिङ्ग पूजयिता नित्यं महतीं श्रियमश्नुते ॥ १३६ ॥ ऊरुभ्यामर्द्धमाग्नेयं सोमार्द्धञ्च शिवा तनुः। आत्मनोऽर्द्धं तथा चाग्निः सोमार्द्धं पुनरुच्यते ॥ ४३७ ॥ तैजसी महतीदीप्ता देवेभ्योऽस्य शिवा तनुः। भास्वती मानुषे-ष्वस्य तनुर्घोराग्निरुच्यते ॥ १३८ ॥ ब्रह्मचर्य्यं चरत्येष शिवा यास्य तनुस्तथा। यस्य घोरतमा मूर्त्तिः सर्वानत्ति तथेश्वरः ॥ १३९ ॥ यन्निर्द्दहति यत्तीक्ष्णो यदुग्रो यत् प्रतापवान्। मांस-शोणितमज्जादो उच्यते रुद्र उच्यते ॥ १४० ॥ कपिः श्रेष्ठ इति प्रोक्तो धर्मश्च वृष उच्यते। स देवदेवो भगवान् कीर्त्त्यतेऽतो वृषाकपिः ॥ १४१ ॥ उन्मीलिताभ्यां नेत्राभ्यां बलाद्देवो महे-श्वरः। ललाटे नेत्रमसृजत्तेन त्र्यक्ष इति स्मृतः ॥ १४२ ॥ एष देवो महादेवो योऽसौ पार्थ तवाग्रतः। संग्रामे शात्रवान्निघ्नं-स्त्वया दृष्टः पिनाकधृक् ॥ १४३ ॥ सिन्धुराजवधार्थाय प्रतिज्ञाय त्वयानघ। कृष्णेन दर्शितः स्वप्ने यस्तु शैलेन्द्रमूर्द्धनि ॥ १४८ ॥ एष वै भगवान्देवः संग्रामे याति तेऽग्रतः। येन दत्तानि ते-ऽस्त्राणि यैस्त्वया दानवा हताः ॥ १४५ ॥ धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च सम्मितम्। देवदेवस्य ते पार्थ व्याख्यातं शतरुद्रियम्

॥ १४६ ॥ सर्वार्थसाधनं पुण्यं सर्वकिल्बिषनाशनम् । सर्वपाप-
प्रशमनं सर्वदुःखभयापहम् ॥ १४७ ॥ चतुर्विधमिदं स्तोत्रं यः
शृणोति नरः सदा । विजित्य शत्रून् सर्वान् स रुद्रलोके महो-
यते ॥ १४८ ॥ चरितं महात्मनो दिव्यं सांग्रामिकमिदं शुभम् ।
पठन् वै शतरुद्रीयं शृखंश्च सततोत्थितम् ॥ १४९ ॥ भक्तो
विश्वेश्वरं देवं मानुषेषु तु यः सदा । वरान् कामान् स लभते
प्रसन्ने त्र्यम्बके नरः ॥ १५० ॥ गच्छ युध्यस्व कौन्तेय न तवास्ति
पराजयः । यस्य मन्त्री च गोप्ता च पार्श्वतस्ते जनार्द्दन ॥ १५१ ॥

सञ्जय उवाच । एवमुक्त्वार्जुनं सङ्ख्ये पराशरसुतस्तदा ।
जगाम भरतश्रेष्ठ यथागतमरिन्दम ॥ १५२ ॥

इति द्रोणपर्व्वणि नारायणास्त्रमोक्षपर्व्वणि शतरुद्रिये
त्र्यधिकद्विशतोऽध्यायः ॥ २०३ ॥

---

सञ्जय उवाच । युद्धं कृत्वा महाघोरं पञ्चाहानि महाबलः ।
ब्राह्मणो निहतो राजन् ब्रह्मलोकमवाप्तवान् ॥ १ ॥ अधीते यत्
फलं वेदे तदस्मिन्नपि पर्व्वणि । क्षत्रियाणामभीरूणामुक्तमत्र
महद्यशः ॥ २ ॥ य इदं पठते पर्व शृणुयाद्वापि नित्यशः । स
मुच्यते महापापैः कृतैर्घोरैश्च कर्मभिः ॥ ३ ॥ यज्ञावाप्तिर्ब्राह्मण-
स्येह नित्यं घोरे युद्धे क्षत्रियाणां जयश्च । शेषा वर्णाः काममिष्टं
लभते पुत्रान् पौत्रान् नित्यमिष्टांस्तथैव ॥ ४ ॥

इति द्रोणपर्व्वणि नारायणास्त्रमोक्षपर्व्वणि द्रोणपर्व्वपाठफलश्रुतौ
चतुरधिकद्विशतोऽध्यायः । समाप्तञ्चनारायणास्त्रमोक्षपर्व ॥२०४॥

---

॥ समाप्तञ्च द्रोणपर्व्व ॥

# MAHABHARATAM

## KARNA PARVA

TEXT

PUBLISHED AND DISTRIBUTED GRATIS

BY

PRATAPA CHANDRA ROY, C. I. E.

# श्रीमहाभारतम्।

श्रीमन्महर्षिवेदव्यासविरचितम्।

कर्णपर्व्व।

सि, आइ, इ, उपाधिधारिणा

रायश्रीप्रतापचन्द्रेण

प्रकाशितम्

मूल्यं विना वितीर्णञ्च।

" [illegible] "

---

तृतीयसंस्करणम्।

कलिकाता वीडन् ष्ट्रीटान्तर्गत

१ नं राजा गुरुदास ष्ट्रीट् भारतयन्त्रे

श्रीकालिदास सेनेन मुद्रितम्।

शकाब्दाः १८११।

# श्रीमहाभारतम्।

कर्णपर्व।

---

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

वैशम्पायन उवाच। ततो द्रोणे हते राजन् दुर्य्योधनमुखा नृपाः। भृशमुद्विग्नमनसो द्रोणपुत्रमुपागमन्॥ १॥ ते द्रोणमनुशोचन्तः कश्मलाभिहतौजसः। पर्य्युपासन्त शोकार्त्तास्ततः शारद्वतीसुतम्॥ २॥ ते मुहूर्त्तं समाश्वास्य हेतुभिः शास्त्रनिश्चितैः। रात्रागमे महीपालाः स्वानि वेश्मानि भेजिरे॥३॥ तेषु वेश्मसु कौरव्य पृथ्वीशा नाप्नुवन् सुखम्। चिन्तयन्तः क्षयं तीव्रं न निद्राञ्चोपलेभिरे॥ ४॥ विशेषतः सूतपुत्रो राजा चैव सुयोधनः। दुःशासनश्च शकुनिर्न निद्रामुपलेभिरे॥ ५॥ सहितास्तां निशान्ते तु दुर्य्योधननिवेशने। चिन्तयन्तः परिक्लेशान् पाण्डवानां महात्मनाम्॥ ६॥ यत्ते द्यूतपरिक्लिष्टाः कृष्णाचानायिता सभाम्। तत् स्मरन्तोऽन्वतप्यन्त भृशमुद्विग्नचेतसः॥७॥ तथा तेषां चिन्तयतां तान् क्लेशान् द्यूतकारितान्। दुःखेन क्षणदा राजन् जगामाब्दशतोपमा॥ ८॥ ततः प्रभातसमये स्थिता दिष्टस्य शासने। चक्रुरावश्यकं सर्व्वं विधिदृष्टेन कर्म्मणा॥ ९॥

ते कृत्वावश्यकार्य्याणि समाश्वस्य च भारत। योगमाज्ञापया-मासुर्युद्धाय च विनिर्ययुः॥ १०॥ कर्णं सेनापतिं कृत्वा कृत-कौतुकमङ्गलाः। वाचयित्वा द्विजश्रेष्ठान् दधिपात्रघृताक्षतैः॥११॥ निष्कैर्गोभिर्हिरण्यैश्च वासोभिश्च महाधनैः। वन्द्यमाना जया-शीर्भिः सूतमागधवन्दिभिः॥ १२॥ तथैव पाण्डवा राजन् कृत-पूर्वाह्णिकक्रियाः। शिविरान्निर्ययू राजन् युद्धाय कृतनिश्चयाः॥ १३॥ ततः प्रववृते युद्धं तुमुलं लोमहर्षणम्। कुरूणां पाण्डवानाञ्च परस्परजयैषिणाम्॥१४॥ तयोर्द्विदिवसं युद्धं कुरु-पाण्डवसेनयोः। कर्णे सेनापतौ राजन् बभूवातीव दारुणम्॥१५ ततः शत्रुक्षयं कृत्वा सुमहान्तं रणे वृषः। पश्यतां धार्त्तराष्ट्राणां फाल्गुनेन निपातितः॥ १६॥ ततस्तत् सञ्जयः सर्वं गत्वा नाग-पुरं प्रति। आचष्ट धृतराष्ट्राय यद्वृत्तं कुरुजाङ्गले॥ १७॥

जनमेजय उवाच। आपगेयं हतं श्रुत्वा द्रोणञ्चापि महा-रथम्। जगाम परमामार्त्तिं वृद्धो राजाम्बिकासुतः॥ १८॥ स श्रुत्वा निहतं कर्णं दुर्य्योधनहितैषिणम्। कथं द्विजवर प्राणा-नधारयत दुःखितः॥ १९॥ यस्मिन् जयाशां पुत्राणाममन्यत स पार्थिवः। तस्मिन् हते स कौरव्यः कथं प्राणानधारयत्॥ २०॥ दुर्मरं बत मन्येऽहं नृणां कृच्छ्रेऽपि वर्त्तताम्। यत्र कर्णं हतं श्रुत्वा नात्यजज्जीवितं नृपः॥ २१॥ तथा शान्तनवं वृद्धं ब्रह्मन् वाह्लीकमेव च। द्रोणञ्च सोमदत्तञ्च भूरिश्रवसमेव च॥ २२॥ तथैव चान्यान् सुहृदः पुत्रान् पौत्रांश्च पातितान्। श्रुत्वा यन्ना-जहात् प्राणांस्तन्मन्ये दुष्करं द्विज॥ २३॥ एतानि सर्वाण्याचक्ष्व विस्तरेण यथातथम्। न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत्॥ २४॥

इति कर्णपर्वणि जनमेजयवाक्ये प्रथमोऽध्यायः॥ १॥

वैशम्पायन उवाच। हते कर्णे महाराज निशि गावल्गणि-
स्तदा। दीनो ययौ नागपुरमश्वैर्वातसमैर्जवे ॥ १ ॥ स हास्तिन-
पुरं प्राप्तो भृशमुद्विग्नमानसः। जगाम धृतराष्ट्रस्य चयं प्रचीण-
बान्धवम् ॥ २ ॥ समुद्वीक्ष्य स राजानं कश्मलाभिहतौजसम्।
ववन्दे प्राञ्जलिर्भूत्वा मूर्द्ध्ना पादौ नृपस्य ह ॥ ३ ॥ सम्पूज्य च
यथान्यायं धृतराष्ट्रं महीपतिम्। हा कष्टमिति चोक्ता स ततो
वचनमाददे ॥ ४ ॥ सञ्जयोऽहं चितिपते कच्चिदास्ते सुखं भवान्।
स्वदोषैरापदं प्राप्य कच्चिन्नाद्य विमुह्यसि ॥ ५ ॥ हितान्युक्तानि
विदुरद्रोणगाङ्गेयकेशवैः। न गृहीतान्यनुस्मृत्य कच्चिन्न कुरुषे
व्यथाम् ॥ ६ ॥ रामनारदकण्वाद्यैर्हितमुक्तं सभातले। न गृहीत-
मनुस्मृत्य कच्चिन्न कुरुषे व्यथाम् ॥ ७ ॥ सुहृदस्त्वद्धिते युक्तान्
भीष्मद्रोणमुखान् परैः। निहतान् युधि संस्मृत्य कच्चिन्न कुरुषे
व्यथाम् ॥ ८ ॥ तमेवंवादिनं राजा सूतपुत्रं कृताञ्जलिम्। सुदीर्घ-
मुष्णं निश्वस्य दुःखार्त्त इदमब्रवीत् ॥ ९ ॥

धृतराष्ट्र उवाच। आपगेये हते शूरे दिव्यास्त्रवति सञ्जय।
द्रोणे च परमेष्वासे भृशं मे व्यथितं मनः ॥ १० ॥ यो रथानां
सहस्राणि दंशितानां दशैव ह। अहन्यहनि तेजस्वी निजघ्ने
वसुसम्भवः ॥ ११ ॥ स हतो यज्ञसेनस्य पुत्रेणेह शिखण्डिना।
पाण्डवेयाभिगुप्तेन भृशं मे व्यथितं मनः ॥ १२ ॥ भार्गवः प्रददौ
यस्मै परमास्त्रं महात्मने। साचाद्रामेण यो बाल्ये धनुर्वेद उपा-
कृतः ॥ १३ ॥ यस्य प्रसादात् कौन्तेया राजपुत्रा महारथाः।
महारथत्वं संप्राप्तास्तथान्ये वसुधाधिपाः ॥ १४ ॥ तं द्रोणं निहतं
श्रुत्वा धृष्टद्युम्नेन संयुगे। सत्यसन्धं महेष्वासं भृशं मे व्यथितं
मनः ॥ १५ ॥ ययोर्लोके पुमानस्त्रेन समोऽस्ति चतुर्विधे। तौ
द्रोणभीष्मौ श्रुत्वा तु हतौ मे व्यथितं मनः ॥ १६ ॥ त्रैलोक्ये
यस्य चास्त्रेषु न पुमान् विद्यते समः। तं द्रोणं निहतं श्रुत्वा

किमकुर्वत मामकाः ॥ १७ ॥ सृञ्जयानाञ्च बलं पाण्डवेन महात्मना। धनञ्जयेन विक्रम्य गमितं यमसादनम् ॥ १८ ॥ नारायणास्त्रे च हते द्रोणपुत्रस्य धीमतः । विप्रद्रुतेष्वनीकेषु किमकुर्वत मामकाः ॥ १९ ॥ विप्रद्रुतानहं मन्ये निमग्नान् शोकसागरे । प्लवमानान् हते द्रोणे भिन्ननौकानिवार्णवे ॥ २० ॥ दुर्य्योधनस्य कर्णस्य भोजस्य कृतवर्मणः । मद्रराजस्य शल्यस्य द्रोणेश्चैव कृपस्य च ॥ २१ ॥ मत्स्यपुत्रस्य शेषस्य तथान्येषाञ्च सञ्जय । विप्रद्रुतेष्वनीकेषु मुखवर्णोऽभवत् कथम् ॥ २२ ॥ एतत् सर्वं यथा वृत्तं तत्त्वं गावल्गणे रणे । आचक्ष्व पाण्डवेयानां मामकानाञ्च विक्रमम् ॥ २३ ॥

सञ्जय उवाच । तवापराधाद्यद्वृत्तं कौरवेयेषु मारिष । तच्छ्रुत्वा मा व्यथां कार्षीर्दिष्टे न व्यथते बुधः ॥ २४ ॥ तस्माद्भावी भावी वा भवेदर्थो नरं प्रति । अप्राप्तौ तस्य वा प्राप्तौ न बुधः कुरुते व्यथाम् ॥ २५ ॥

धृतराष्ट्र उवाच । न व्यथाभ्यधिका काचिद्विद्यते मम सञ्जय । दिष्टमेतत्परं मन्ये कथयस्व यथेच्छकम् ॥ २६ ॥

इति कर्णपर्वणि सञ्जयधृतराष्ट्रसंवादे
द्वितीयोऽध्यायः ॥ २ ॥

---

सञ्जय उवाच । हते द्रोणे महेष्वासे तव पुत्रा महारथाः । बभूवुरस्वस्थमुखा विषण्णा गतचेतसः ॥ १ ॥ अवाङ्मुखाः शस्त्रभृतः सर्व एव विशाम्पते । अप्रेक्षमाणाः शोकार्त्ता नाभ्यभाषन् परस्परम् ॥ २ ॥ तान् दृष्ट्वा व्यथिताकारान् सैन्यानि तव भारत । ऊर्द्ध्वमेव निरैक्षन्त दुःखत्रस्तान्यनेकशः ॥ ३ ॥ अस्त्राण्येषान्तु राजेन्द्र शोणितांक्तान्यनेकशः । प्राभ्रश्यन्त कराग्रेभ्यो दृष्ट्वा द्रोणं

हतं युधि ॥ ४ ॥ तानि बह्वान्यनेकानि लम्बमानानि भारत । अदृश्यन्त महाराज नक्षत्राणि यथा दिवि ॥ ५ ॥ तथा तत् स्तिमितं दृष्ट्वा गतसत्त्वमवस्थितम् । बलं तव महाराज राजा दुर्य्योधनोऽब्रवीत् ॥ ६ ॥ भवतां बाहुवीर्य्यं हि समाश्रित्य मया युधि । पाण्डवेयाः समाहूता युद्धञ्चेदं प्रवर्त्तितम् ॥ ७ ॥ तदिदं निहते द्रोणे विषण्णमिव लक्ष्यते । युध्यमानाश्च समरे योधा बध्यन्ति सर्व्वशः ॥ ८ ॥ जयो वापि वधो वापि युध्यमानस्य संयुगे । भवेत् किमत्र चित्रं वै युध्यध्वं सर्व्वतोमुखाः ॥ ९ ॥ पश्यध्वञ्च महात्मानं कर्णं वैकर्त्तनं युधि । प्रचरन्तं महेष्वासं दिव्यैरस्त्रैर्महाबलम् ॥ १० ॥ यस्य वै युधि सन्त्रासात् कुन्तीपुत्रो धनञ्जयः । निवर्त्तते सदा मन्दः सिंहात् क्षुद्रमृगो यथा ॥ ११ ॥ येन नागायुतप्राणो भीमसेनो महाबलः । मानुषेणैव युद्धेन तामवस्थां प्रवेशितः ॥ १२ ॥ येन दिव्यास्त्रवित् शूरो मायावी स घटोत्कचः । अमोघया रणे शक्त्या निहतो भैरवं नदन् ॥ १३ ॥ तस्य दुष्पारवीर्य्यस्य सत्यसन्धस्य धीमतः । बाह्वोर्द्रविणमक्षय्यमद्य द्रक्ष्यथ संयुगे ॥ १४ ॥ द्रोणपुत्रस्य विक्रान्तं राधेयस्यैव चोभयोः । पाण्डुपाञ्चालसैन्येषु द्रक्ष्यथाद्य महात्मनोः ॥ १५ ॥ सर्व्व एव भवन्तश्च शक्ताः प्रत्येकशोऽपि वा । पाण्डुपुत्रान् रणे हन्तुं ससैन्यान् किमु संहता । वीर्य्यवन्तः कृतास्त्राश्च द्रक्ष्यथाद्य परस्परम् ॥ १६ ॥

सञ्जय उवाच। एवमुक्त्वा ततः कर्णं चक्रे सेनापतिं तदा । तव पुत्रो महावीर्य्यो भ्रातृभिः सहितोऽनघ ॥ १७ ॥ सैन्यापत्यमवाप्याथ कर्णो राजन् महारथाः । सिंहनादं विनद्योच्चैः प्रायुध्यत रणोत्कटः ॥ १८ ॥ स सृञ्जयानां सर्व्वेषां पाञ्चालानाञ्च पश्यताम् । केकयानां विदेहानामकरोत् कदनं महत् ॥ १९ ॥ तस्येषुधाराः शतशः प्रादुरासन् शरासनात् । अग्रे पुङ्खेषु संसक्ता

यथा भ्रमरपङ्क्तयः ॥ २० ॥ स पीड़यित्वा पाञ्चालान् पाण्डवांश्च तरस्विनः । हत्वा सहस्रशो योधानर्ज्जुनेन निपातितः ॥ २१ ॥

इति कर्णपर्वणि सञ्जयवाक्ये तृतीयोऽध्यायः ॥ ३ ॥

---

वैशम्पायन उवाच । एतत् श्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः । शोकस्यान्तमपश्यन् वै हतं मेने सुयोधनम् । विह्वलः पतितो भूमौ नष्टचेता इव द्विपः ॥ १ ॥ तस्मिन्निपतिते भूमौ विह्वले राजसत्तमे । आर्त्तनादो महानासीत् स्त्रीणां भरतसत्तम । स शब्दः पृथिवीं कृत्स्नां पूरयामास सर्वशः ॥ २ ॥ शोकार्णवे महाघोरे निमग्ना भरतस्त्रियः । रुरुदुर्भृशसन्तप्ता अतीवोद्विग्नमानसाः ॥ ३ ॥ राजानञ्च समासाद्य गान्धारी भरतर्षभ । निःसंज्ञा पतिता भूमौ सर्वाण्यन्तः पुराणि च ॥ ४ ॥ ततस्ताः सञ्जयो राजन् समाश्वासयदातुराः । मुह्यमानाः सुबहुशो मुञ्चन्तीर्वारि नेत्रजम् ॥ ५ ॥ समाश्वस्ताः स्त्रियस्तास्तु वेपमाना मुहुर्मुहुः । कदल्य इव वातेन धूयमानाः समन्ततः ॥ ६ ॥ राजानं विदुरश्चापि प्रज्ञाचक्षुषमीश्वरम् । आश्वासयामास तदा सिञ्चंस्तोयेन कौरवम् ॥ ७ ॥ स लब्ध्वा शनकैः संज्ञां ताश्च विज्ञाय योषितः । उन्मत्त इव राजा तु स्थितस्तूष्णीं विशाम्पते ॥ ८ ॥ ततो ध्यात्वा चिरं कालं निश्वसंश्च पुनः पुनः । स्वान् पुत्रान् गर्हयामास बहु मेने च पाण्डवान् ॥ ९ ॥ गर्हयंश्चात्मनो बुद्धिं शकुनेः सौवलस्य च । ध्यात्वा च सुचिरं कालं वेपमानो मुहुर्मुहुः ॥ १० ॥ संस्तभ्य च मनो भूयो राजा धैर्य्यसमन्वितः । पुनर्गावल्गणिं सूतं पर्य्यपृच्छत सञ्जयम् ॥ ११ ॥

धृतराष्ट्र उवाच । त्वया यत् कथितं वाक्यं श्रुतं सञ्जय तन्मया । कच्चिद्दुर्य्योधनः सूत न गतो वै यमक्षयम् ॥ १२ ॥

जये निराशः पुत्रो मे सततं जयकामुकः। ब्रूहि सञ्जय तत्त्वेन पुनरुक्तां कथामिमाम् ॥ १३ ॥

वैशम्पायन उवाच। एवमुक्तोऽब्रवीत् सूतो राजानं जनमेजयः। हतो वैकर्त्तनो राजन् सह पुत्रैर्महारथः। भ्रातृभिश्च महेष्वासैः सूतपुत्रैस्तनुत्यजैः ॥ १४ ॥ दुःशासनश्च निहतः पाण्डवेन यशस्विना। पीतञ्च रुधिरं कोपात् भीमसेनेन संयुगे ॥ १५ ॥

इति कर्णपर्वणि धृतराष्ट्रशोके चतुर्थोऽध्यायः ॥ ४ ॥

---

वैशम्पायन उवाच। एतत् श्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः। अब्रवीत् सञ्जयं सूतं शोकव्याकुलचेतनः ॥ १ ॥ दुष्प्रणीतेन मे तात पुत्रस्यादीर्घदर्शिनः। हतं वैकर्त्तनं श्रुत्वा तन्मे मर्माणि कृन्तति ॥२॥ तत्र मे संशयं छिन्धि दुःखपारं तितीर्षतः। कुरूणां पाण्डवानाञ्च के नु जीवन्ति के मृताः ॥ ३ ॥

सञ्जय उवाच। हतः शान्तनवो राजन् दुराधर्षः प्रतापवान्। हत्वा सञ्जयपाञ्चालान् भीष्मोऽथ दशभिर्द्दिनैः ॥ ४ ॥ ततो द्रोणो महेष्वासः पाञ्चालानामनीकिनीम्। निहत्य युधि दुर्द्धर्षः पश्चाद्रुक्मरथो हतः ॥ ५ ॥ हतशिष्टस्य भीष्मेन द्रोणेन च महात्मना। अर्द्धं निहत्य सैन्यस्य कर्णो वैकर्त्तनो हतः ॥ ६ ॥ विविंशतिर्महाराज राजपुत्रो महाबलः। आनर्त्तयोधान् शतशो निहत्य निहतो युधि ॥ ७ ॥ अथ पुत्रो विकर्णस्ते क्षत्रधर्ममनुस्मरन्। क्षीणवाहायुधः शूरः स्थितो ह्यभिमुखः परान् ॥ ८ ॥ घोररूपान् परिक्लेशान् दुर्य्योधनकृतान् बहून्। प्रतिज्ञां स्मरता चैव भीमसेनेन पातितः ॥ ९ ॥ विन्दानुविन्दावावन्त्यौ राजपुत्रौ महाबलौ। कृत्वा नसुकरं कर्म गतौ वैवस्वतक्षयम् ॥ १० ॥ सिन्धुराष्ट्रमुखानीह दशराष्ट्राणि यस्य वै। वशे तिष्ठन्ति वीरस्य

यः स्थितस्तव शासने ॥ ११ ॥ अक्षौहिणीर्दशैकाञ्च निर्जित्य निशितैः शरैः । अर्जुनेन हतो राजन् महावीर्य्यो जयद्रथः ॥१२॥ तथा दुर्य्योधनसुतस्तरस्वी युद्धदुर्मदः । वर्त्तमानः पितुः शास्त्रे सौभद्रेण निपातितः ॥ १३ ॥ तथा दौःशासनि शूरो बाहुशाली रणोत्कटः । द्रौपदेयेन विक्रम्य गमितो यमसादनम ॥ १४ ॥ किरातानामधिपतिः सागरानूपवासिनाम् । देवराजस्य धर्म्मात्मा प्रियो बहुमतः सखा ॥ १५ ॥ भगदत्तो महीपालः क्षत्रधर्म्मरतः सदा । धनञ्जयेन विक्रम्य गमितो यमसादनम् ॥ १६ ॥ तथा कौरवदायादः सौमदत्तिर्म्महायशाः । हतो भूरिश्रवा राजन् शूरः सात्यकिना युधि ॥ १७ ॥ श्रुतायुरपि चाम्बष्ठः क्षत्रियाणां धुरन्धरः । चरन्नभीतवत् सङ्ख्ये निहतः सव्यसाचिना ॥ १८ ॥ तव पुत्रः सदामर्षी कृतास्त्रो युद्धदुर्म्मदः । दुःशासनो महाराज भीमसेनेन पातितः ॥ १९ ॥ यस्य राजन् गजानीकं बहुसाहस्रमद्भुतम् । सुदक्षिणः स सङ्ग्रामे निहतः सव्यसाचिना ॥ २० ॥ कोशलानामधिपतिर्हत्वा बहुशतान् परान् । सौभद्रेणेह विक्रम्य गमितो यमसादनम् ॥ २१ ॥ बहुशो योधयित्वा च भीमसेनं महारथम् । चित्रसेनस्तव सुतो भीमसेनेन पातितः ॥ २२ ॥ मद्रराजानुजः शूरः परेषां भयवर्द्धनः । असिचर्म्मधरः श्रीमान् सौभद्रेण निपातितः ॥ २३ ॥ समः कर्णस्य समरे यः स कर्णस्य पश्यतः । वृषसेनो महातेजाः शीघ्रास्त्रो दृढविक्रमः ॥ २४ ॥ अभिमन्योर्वधं स्मृत्वा प्रतिज्ञामपि चात्मनः । धनञ्जयेन विक्रम्य गमितो यमसादनम् ॥ २५ ॥ नित्यं प्रसक्तवैरो यः पाण्डवैः पृथिवीपतिः । विश्राव्य वैरं पार्थेन श्रुतायुः स निपातितः ॥२६॥ शल्यपुत्रस्तु विक्रान्तः सहदेवेन मारिष । हतो रुक्मरथो राजन् भ्राता मातुलजो युधि ॥ २७ ॥ राजा भगीरथो वृद्धो वृहत्क्षत्रश्च कैकयः । पराक्रमन्तौ विक्रान्तौ निहतौ वीर्य्यवत्तरौ ॥२८॥

भगदत्तसुतो राजन् कृतप्रज्ञो महाबलः। श्येनवच्चरता सङ्ग्रे नकुलेन निपातितः ॥ २९ ॥ पितामहस्तव तथा वाह्लिकः सह वाह्लिकैः। निहतो भीमसेनेन महाबलपराक्रमः ॥ ३० ॥ जयत्सेनस्तथा राजन् जारासन्धिर्महाबलः। मागधो निहतः सङ्ग्रे सौभद्रेण महात्मना ॥ ३१ ॥ पुत्रस्ते दुर्मुखो राजन् दुःसहश्च महारथः। गदया भीमसेनेन निहतौ शूरमानिनौ ॥ ३२ ॥ दुर्मर्षणो दुर्विषहो दुर्ज्जयश्च महारथः। कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् ॥ ३३ ॥ उभौ कलिङ्गवृषभौ भ्रातरौ युद्धदुर्मदौ। कृत्वा नसुकरं कर्म गतौ वैवस्वतक्षयम् ॥ ३४ ॥ सचिवो वृषवर्मा ते सुतः परमवीर्य्यवान्। भीमसेनेन विक्रम्य गमितो यमसादनम् ॥ ३५ ॥ तथैव पौरवो राजा नागायुतबलो महान्। सगणः पाण्डुपुत्रेण निहतः सव्यसाचिना ॥ ३६ ॥ वसातयो महाराज द्विसाहस्राः प्रहारिणः। शूरसेनाश्च विक्रान्ताः सर्व्वे युधि निपातिताः ॥ ३७ ॥ अभीषाहाः कवचिनः प्रहरन्तो रणोत्कटाः। शिवयश्च रथोदाराः कलिङ्गसहिता हताः ॥ ३८ ॥ गोकुले नित्यसंवृद्धा युद्धे परमकोपनाः। तेऽपावृत्तकवीराश्च निहताः सव्यसाचिना ॥ ३९ ॥ श्रेणयो बहुसाहस्राः संशप्तकगणाश्च ये। ते सर्व्वे पार्थमासाद्य गता वैवस्वतक्षयम् ॥ ४० ॥ श्यालौ तव महाराज राजानौ वृषकाचलौ। त्वदर्थमितिविक्रान्तौ निहतौ सव्यसाचिना ॥ ४१ ॥ उग्रकर्मा महेष्वासो नामतः कर्मतस्तथा। शाल्वराजो महाबाहुर्भीमसेनेन पातितः ॥ ४२ ॥ अघोवांश्च महाराज वृहन्तः सहितौ रणे। पराक्रमन्तौ मित्रार्थे गतौ वैवस्वतक्षयम् ॥ ४३ ॥ तथैव रथिनां श्रेष्ठः क्षेमधूर्त्तिर्विशाम्पते। निहतो गदया राजन् भीमसेनेन संयुगे ॥ ४४ ॥ तथा राजा महेष्वासो जलसन्धो महाबलः। सुमहत् कदनं कृत्वा हतः सात्यकिना रणे ॥ ४५ ॥ अलायुधो राक्षसेन्द्रः खरवन्धुरयानवान्। घटोत्कचेन

विक्रम्य गमितो यमसादनम् ॥ ४६ ॥ राधेयाः सूतपुत्राश्च भ्रातरश्च महारथाः। कैकेयाः सर्वशश्चापि निहताः सव्यसाचिना ॥ ४७ ॥ मालवा मद्रकाश्चैव द्रविड़ाश्चोग्रविक्रमाः। यौधेयाश्च ललित्याश्च क्षुद्रकाश्चाप्युशीनराः ॥ ४८ ॥ मावेल्लकास्तुण्डिकेराः सावित्रीपुत्रकाश्च ये। प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च मारिष ॥ ४९ ॥ पत्तीनां निहताः सङ्घा हयानां प्रयुतानि च। रथव्रजाश्च निहता हताश्च वरवारणाः ॥ ५० ॥ सध्वजाः सायुधाः शूराः सवर्माम्बरभूषणाः। कालेन महता यत्ताः कुलशीलविवर्द्धिताः ॥ ५१ ॥ ते हताः समरे सर्वे पार्थेनाक्लिष्टकर्मणा। अन्ये तथामितबलाः परस्परवधैषिणः ॥ ५२ ॥ एते चान्ये च बहवो राजानः सगणा रणे। हताः सहस्रशो राजन् यन्मां त्वं परिपृच्छसि ॥ ५३ ॥ एवमेष क्षयो वृत्तः कर्णार्ज्जुनसमागमे। महेन्द्रेण यथा वृत्रो यथा रामेण रावणः ॥ ५४ ॥ यथा कृष्णेन नरको मुरश्च निहतो रणे। कार्त्तवीर्य्यश्च रामेण भार्गवेण बलोयसा ॥ ५५ ॥ सज्ञातिबान्धवः शूरः समरे युद्धदुर्मदः। रणे कृत्वा महद्युद्धं घोरं त्रैलोक्यविश्रुतम् ॥ ५६ ॥ हतः स्कन्देन महिषो यथा रुद्रेण चान्धकः। तथार्ज्जुनेन निहतो द्वैरथे युद्धदुर्मदः ॥ ५७ ॥ सामात्यबान्धवो राजन् कर्णः प्रहरतां वरः। जयाशा धार्त्तराष्ट्राणां वैरस्य च मुखं यतः ॥ ५८ ॥ तीर्णं तत् पाण्डवैरद्य यत् पुरा नावबुध्यसे। उच्यमानो महाराज बन्धुभिर्हितवादिभिः। तदिदं समनुप्राप्तं व्यसनं सुमहात्ययम् ॥ ५९ ॥ पुत्राणां राज्यकामानां त्वया राजन् हितैषिणा। अहितान्येव चीर्णानि तेषां तत्फलमागतम् ॥ ६० ॥

इति कर्णपर्वणि सञ्जयवाक्ये पञ्चमोऽध्यायः ॥ ५ ॥

---

धृतराष्ट्र उवाच। आख्याता मामकास्तात निहता युधि पाण्डवैः। निहतान् पाण्डवेयानां मामकैर्ब्रूहि सञ्जय ॥ १ ॥

सञ्जय उवाच। कुन्तयो युधि विक्रान्ता महासत्त्वा महाबलाः। सानुबन्धाः सहामात्या भीष्मेण युधि पातिताः ॥ २ ॥ नारायणा बलवाश्च रामाश्च शतशो रणे। अनुरक्ताश्च विजयी भीष्मेण युधि पातिताः ॥ ३ ॥ समः किरीटिना सङ्ग्रे वीर्य्येण च बलेन च। सत्यजित् सत्यसन्धेन द्रोणेन निहतो युधि ॥ ४ ॥ पाञ्चालानां महेष्वासाः सर्वे युद्धविशारदाः। द्रोणेन सह सङ्गम्य गता वैवस्वतक्षयम् ॥ ५ ॥ तथा विराटद्रुपदौ वृद्धौ सहसुतौ नृपौ। पराक्रमन्तौ मित्रार्थे द्रोणेन निहतौ रणे ॥ ६ ॥ यो बाल एव समरे सम्मितः सव्यसाचिना। केशवेन च दुर्द्धर्षो बलदेवेन वा विभो ॥ ७ ॥ परेषां कदनं कृत्वा महद्रणविशारदः। परिवार्य्य महामात्रैः षड्भिः परमकैः रथैः ॥ ८ ॥ अशक्नुवद्भिर्बीभत्सुमभिमन्युर्निपातितः। तं कृतं विरथं वीरं क्षत्रधर्मे व्यवस्थितम्। दौःशासनिर्महाराज सौभद्रं हतवान्रणे ॥ ९ ॥ पटच्चरनिहन्ता च महत्या सेनया वृतः। अम्बष्ठसहितः श्रीमान् मित्रहेतोः पराक्रमन् ॥ १० ॥ आसाद्य लक्षणं वीरं दुर्य्योधनसुतं रणे। सुमहत् कदनं कृत्वा गतो वैवस्वतक्षयम् ॥ ११ ॥ बृहन्तस्तु महेष्वासः कृतास्त्रो युद्धदुर्मदः। दुःशासनेन विक्रम्य गमितो यमसादनम् ॥ १२ ॥ मणिमान् दण्डधारश्च राजानौ युद्धदुर्मदौ। पराक्रमन्तौ मित्रार्थे द्रोणेन विनिपातितौ ॥ १३ ॥ अंशुमान् भोजराजश्च सहसैन्यो महारथः। भारद्वाजेन विक्रम्य गमितो यमसादनम् ॥ १४ ॥ सामुद्रश्चित्रसेनश्च सह पुत्रेण भारत। समुद्रसेनेन बलात् गमितो यमसादनम् ॥ १५ ॥ अनूपवासी नीलश्च व्याघ्रदत्तश्च वीर्य्यवान्। अश्वत्थाम्ना महाराज गमितो यमसादनम् ॥ १६ ॥ चित्रायुधश्चित्रयोधी कृत्वा तौ कदनं महत्।

चित्रमार्गेण विक्रम्य विकर्णेन हतौ युधि॥ १७॥ वृकोदरसमो युद्धे वृतः कैकेययोधिभिः। कैकेयेन च विक्रम्य भ्राता भ्राता निपातितः॥ १८॥ जनमेजयो गदायोधी पार्वतीयः प्रतापवान्। दुर्मुखेन महाराज तव पुत्रेण पातितः॥ १९॥ रोचमानौ नरश्रेष्ठौ रोचमानौ ग्रहाविव। द्रोणेन युगपद्राजन् दिवं संप्रापितौ शरैः॥ २०॥ नृपाश्चान्ये प्रयुध्यन्तः पराक्रान्ता विशाम्पते। कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम्॥ २१॥ पुरुजित् कुन्तिभोजश्च मातुलः सव्यसाचिनः। संग्रामे निर्जितांल्लोकान् गमितो द्रोणसायकैः॥ २२॥ अभिभूः काशिराजश्च बहुभिः काशिभिर्वृतः। वसुदानस्य पुत्रेण न्यासितो देहमाहवे॥ २३॥ अमितौजा युधामन्युरुत्तमौजाश्च वीर्य्यवान्। निहत्य शतशः शूरानस्मदीयैर्निपातिताः॥ २४॥ मित्रवर्म्मा च पाञ्चालः क्षत्रधर्मा च भारत। द्रोणेन परमेष्वासौ गमितौ यमसादनम्॥ २५॥ शिखण्डितनयो वीरः क्षत्रदेवो युधाम्पतिः। लक्ष्मणेन हतो राजंस्तव पौत्रेण मारिष॥ २६॥ सुचित्रचित्रवर्मौ च पितापुत्रौ महाबलौ। प्रचरन्तौ रणे वीरौ द्रोणेन विनिपातितौ॥ २७॥ वार्द्धक्षेमिर्महाराज समुद्र इव पर्वणि। आयुधक्षयमासाद्य प्रशान्तिं परमां गतः॥ २८॥ सेनाविन्दुः कुरुश्रेष्ठः शात्रवान् प्रदहन् युधि। वाह्लिकेन महाराज कौरवेण निपातितः॥ २९॥ धृष्टकेतुर्महाराज चेदीनां प्रवरो रथः। कृत्वा नसुकरं कर्म्म गतो वैवस्वतक्षयम्॥ ३०॥ तथा सत्यधृतिर्वीरः कृत्वा कदनमाहवे। पाण्डवार्थे पराक्रान्तो गमितो यमसादनम्॥ ३१॥ पुत्रस्तु शिशुपालस्य सुकेतुः पृथिवीपतिः। निहत्य शात्रवान् सङ्ख्ये द्रोणेन निहतो युधि॥ ३२॥ विराटपुत्रः शङ्खस्तु उत्तरश्च महाबलः। कुर्वन्तौ दुष्करं कर्म गतौ वैवस्वतक्षयम्॥ ३३॥ तथा सत्यधृतिर्मात्स्यो मदिराश्वश्च वीर्य्यवान्। सूर्य्यदत्तश्च विक्रान्तो निहतो द्रोण-

सायकैः ॥ ३४ ॥ श्रेणिमांस्तु महाराज युध्यमानः पराक्रमी ।
कृत्वा नसुकरं कर्म्म गतो वैवस्वतक्षयम् ॥ ३५ ॥ तथैव युधि-
विक्रान्तो मागधः परमास्त्रवित् । भीष्मेण निहतो राजन् शेते
ऽद्य परवीरहा ॥ ३६ ॥ वसुदानश्च कदनं कुर्वाणोऽतीव संयुगे ।
भारद्वाजेन विक्रम्य गमितो यमसादनम् ॥ ३७ ॥ एते चान्ये च
बहवः पाण्डवानां महारथाः । हता द्रोणेन विक्रम्य यन्मां त्वं
परिपृच्छसि ॥ ३८ ॥

इति कर्णपर्व्वणि सञ्जयवाक्ये षष्ठोऽध्यायः ॥ ६ ॥

---

धृतराष्ट्र उवाच । मामकस्यास्य सैन्यस्य हतशेषस्य सञ्जय ।
अवशेषं न पश्यामि स्तुदिते ककुदे सति ॥ १ ॥ तौ हि वीरौ
महेष्वासौ मदर्थं कुरुसत्तमौ । भीष्मद्रोणौ हतौ श्रुत्वा को न्वर्थो
जीविते सति ॥ २ ॥ न मृष्यामि च राधेयं हतमाहवशोभिनम् ।
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतं शतम् ॥ ३ ॥ हतप्रवीरे
सैन्येऽस्मिन्मामके वदतां वर । अहतान् शंस मे सूत येऽत्र
जीवन्ति केचन ॥ ४ ॥ एतेषु निहतेष्वद्य ये त्वया परिकीर्त्तिताः ।
येऽपि जीवन्ति ते सर्व्वे मृता एवेति मे मतिः ॥ ५ ॥

सञ्जय उवाच । यस्मिन्महास्त्राणि समर्पितानि चित्राणि
शुभ्राणि चतुर्विधानि । दिव्यानि राजन्निहितानि चैव द्रोणेन
वीरे द्विजसत्तमेन ॥ ६ ॥ महारथः कृतिमान् क्षिप्रहस्तो दृढ़ा-
युधो दृढ़मुष्टिर्दृढ़ेषुः । स दूरपाती द्रोणपुत्रो महात्मा व्यवस्थितो
योद्धुकामस्त्वदर्थे ॥ ७ ॥ आनर्त्तवासी हृदिकात्मजोऽसौ महा-
रथः सात्वतानां वरिष्ठः । स्वयं भोजः कृतवर्म्मा त्वदर्थे व्यवस्थितो
योद्धुकामः कृतास्त्रः ॥ ८ ॥ आर्त्तायनिः समरे दुष्प्रकम्प्यः सेना-
ग्रणीः प्रथमस्तावकानाम् । यः स्वस्रीयान् पाण्डवेयान् विसृज्य

सत्यां वाचं तां चिकीर्षुस्तरस्वी ॥ ९ ॥ तेजोवधं सूतपुत्रस्य सङ्ख्ये प्रतिश्रुत्याजातशत्रोः पुरस्तात्। दुराधर्षः शक्रसमानवीर्य्यः शल्यः स्थितो योद्धुकामस्त्वदर्थे ॥ १० ॥ आजानेयैः सैन्धवैः पार्वतीयैर्नदीजकाम्बोजवनायुवाह्लिकैः। गान्धारराजः सुबलेन युक्तो व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ११ ॥ शारद्वतो गौतमश्चापि राजन्महाबलो बहुचित्रास्त्रयोधी। धनुश्चित्रं सुमहद्भारसाहं व्यवस्थितो योद्धुकामः प्रगृह्य ॥ १२ ॥ महाधनुः केकयराजपुत्रः समश्वयुक्तञ्च पताकिनञ्च। रथाग्रमारुह्य नरप्रवीरो व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १३ ॥ तथा सुतस्ते ज्वलनार्कतुल्यं रथं समास्थाय कुरुप्रवीरः। व्यवस्थितः पुरुमित्रो नरेन्द्र व्यभ्रे सूर्य्यो भ्राजमानो यथा खे ॥ १४ ॥ दुर्य्योधनो नागकुलस्य मध्ये महावीर्य्यः सह सैन्यप्रवीरैः। रथेन जाम्बूनदभूषणेन व्यवस्थितः समरे योत्स्यमानः ॥ १५ ॥ स राजमध्ये पुरुषप्रवीरो रराज जाम्बूनदचित्रवर्मा। पद्मप्रभो वह्निरिवाल्पधूमो मेघान्तरे सूर्य्य इव प्रकाशः ॥ १६ ॥ तथा सुषेणोऽप्यसिचर्मपाणिस्तवात्मजः सत्यसेनश्च वीरः। व्यवस्थितौ चित्रसेनेन सार्द्धं हृष्टात्मानौ समरे योद्धुकामौ ॥ १७ ॥ ह्रीनिषेवा भारतराजपुत्राश्चित्रायुधः श्रुतवर्मा जयश्च। शलश्च सत्यव्रतदुःशलौ च व्यवस्थिता बलिनो योद्धुकामाः ॥ १८ ॥ कैतव्यानामधिपः शूरमानी रणे चरन् शत्रुहा राजपुत्रः। पत्ती हयौ नागरथप्रयायौ व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १९ ॥ वीरः श्रुतायुश्च श्रुतायुधश्च चित्राङ्गदश्चित्रवर्मा तथैव। व्यवस्थितो योद्धुकामा नराग्र्याः प्रहारिणो मानिनः सत्यसन्धाः ॥ २० ॥ कर्णात्मजः सत्यसन्धो महात्मा व्यवस्थितः समरे योद्धुकामः। अथापरौ कर्णसुतौ वरास्त्रौ व्यवस्थितौ लघुहस्तौ नरेन्द्र। बलं महद्दुर्भिदमल्पवीर्य्यैः समाश्रितौ यात्समानौ त्वदर्थे ॥ २१ ॥ एतैश्च मुख्यैरपरैश्च राजन् योधप्रवीरै-

रमितप्रभावैः। व्यवस्थितो नागकुलस्य मध्ये यथा महेन्द्रः कुरु-राजो जयाय ॥ २२ ॥

धृतराष्ट्र उवाच। आख्याता जीवमाना ये परेभ्योऽपि यथा-तथम्। इतीदमवगच्छामि व्यक्तमर्थाभिपत्तितः ॥ २३ ॥

वैशम्पायन उवाच। एवं ब्रुवन्नेव तदा धृतराष्ट्रोऽम्बिकासुतः। हतप्रवीरभूयिष्ठं किञ्चिच्छेषं वलं स्वकम् ॥ २४ ॥ श्रुत्वा तु मोह-मगनच्छोकव्याकुलचेतनः। मुह्यमानोऽब्रवीच्चापि मुहूर्त्तं तिष्ठ सञ्जय ॥ २५ ॥

धृतराष्ट्र उवाच। व्याकुलं मे मनस्तात श्रुत्वा सुमहदप्रियम्। मनो मुह्यति चाङ्गानि न च शक्नोमि धारितुम् ॥ २६ ॥ इत्येव-मुक्त्वा वचनं धृतराष्ट्रोऽम्बिकासुतः। नष्टचित्तस्तथा सोऽथ पपात जगतीपतिः ॥ २७ ॥

इति कर्णपर्वणि सञ्जयवाक्ये सप्तमोऽध्यायः ॥ ७ ॥

---

जनमेजय उवाच। श्रुत्वा कर्णं हतं युद्धे पुत्रांश्चैव निपा-तितम्। नरेन्द्रः किञ्चिदाश्वस्तो द्विजश्रेष्ठ किमब्रवीत् ॥ १ ॥ प्राप्तवान् परमं दुःखं पुत्रव्यसनजं महत्। तस्मिन् यदुक्तवान् काले तन्ममाचक्ष्व पृच्छतः ॥ २ ॥

वैशम्पायन उवाच। श्रुत्वा कर्णस्य निधनमश्रद्धेयमिवा-द्भुतम्। भूतसम्मोहनं भीमं मेरोः प्रपतनं यथा ॥ ३ ॥ चित्त-मोहमिवायुक्तं भार्गवस्य महामतेः। पराजयमिवेन्द्रस्य द्विषद्भ्यो भीमकर्मणः ॥ ४ ॥ दिवः प्रपतनं भानोरुर्व्यामिव महाद्युतेः। संशोषणमिवाचिन्त्यं समुद्रस्याक्षयाम्भसः ॥ ५ ॥ महीवियद्दिग-म्बूनां सर्वनाशमिवाद्भुतम्। कर्मणोरिव वैफल्यमुभयोः पुण्य-पापयोः ॥ ६ ॥ सञ्चिन्त्य निपुणं बुद्ध्या धृतराष्ट्रो जनेश्वरः।

नेदमस्तीति सञ्चिन्त्य कर्णस्य समरे बधम्॥ ७॥ प्राणिनामेव मन्येषां स्यादपीति विचार्य्य सः। शोकाग्निना दह्यमानो दह्यमान इवोरगः॥ ८॥ विस्रस्ताङ्गः श्वसन् दीनो हाहेत्युक्त्वा सुदुःखितः। विललाप महाराज धृतराष्ट्रोऽम्बिकासुतः॥ ९॥

धृतराष्ट्र उवाच। सञ्जयाधिरथिर्वीरः सिंहद्विरदविक्रमः। ऋषभप्रतिमस्कन्धो वृषभाक्षगतिस्वनः॥ १०॥ ऋषभो वृषभस्येव यो युद्धे न निवर्त्तते। शत्रोरपि महेन्द्रस्य वज्रसंहननो युवा॥ ११॥ यस्य ज्यातलशब्देन शरवृष्टिरवेण च। नराश्वरथमातङ्गा नाधितिष्ठन्ति संयुगे॥ १२॥ यमाश्रित्य महाबाहुं द्विषत्सङ्घघ्नमच्युतम्। दुर्य्योधनोऽकरोद्वैरं पाण्डुपुत्रैर्महारथैः॥ १३॥ स कथं रथिनां श्रेष्ठः कर्णः पार्थेन संयुगे। निहतः पुरुषव्याघ्रः प्रसह्यासह्यविक्रमः॥ १४॥ यो नामन्यत वै नित्यमच्युतञ्च धनञ्जयम्। न वृष्णीन्नाहितानन्यान् स्वबाहुबलमाश्रितः॥ १५॥ शार्ङ्गगाण्डीवधन्वानौ सहितावपराजितौ। अहं दिव्याद्रथादेकः पातयिष्यामि संयुगे॥ १६॥ इति यः सततं मन्दमवोचल्लोभमोहितम्। दुर्य्योधनमवाचीनं राज्यकामुकमातुरम्॥ १७॥ यश्चाजैषीदतिबलानमित्रानतिदुर्जयान्। गान्धारान्मद्रकान् मत्स्यांस्त्रिगर्त्तांस्तङ्गणान् खशान्॥ १८॥ पाञ्चालांश्च विदेहांश्च कुलिन्दान् काशिकोशलान्। सुह्मानङ्गांश्च वङ्गांश्च निषधान् पुण्ड्रकीचकान्॥ १९॥ वत्सान् कलिङ्गांस्तरलानश्मकानृषिकानपि। यो जित्वा समरे वीरांश्चक्रे बलिभृतः पुरा॥ २०॥ शरव्रातैः सुनिशितैः सुतीक्ष्णैः कङ्कपत्रिभिः। दुर्य्योधनस्य वृद्ध्यर्थं वर्त्तते यो जयाय च॥ २१॥ सेनागोपश्च स कथं शत्रुभिः परमास्त्रवित्। घातितः पाण्डवैः शूरैः समरे बलशालिभिः॥ २२॥ वृषो महेन्द्रो देवेषु वृषः कर्णो नरेष्वपि। तृतीयमन्यं लोकेऽस्मिन् वृषं नैवानुशुश्रुम॥ २३॥ उच्चैःश्रवा वरोऽश्वानां राज्ञां

धनुर्धरो वरः । वरो महेन्द्रो देवानां कर्णः प्रहरतां वरः ॥२४॥ योऽजितः पार्थिवैः शूरैः समर्थैर्वीर्य्यशालिभिः । दुर्य्योधनस्य वृद्धार्थं कृत्स्नामुर्वीमथाजयत् ॥ २५ ॥ यं लब्ध्वा मागधो राजा सान्त्वमानार्थगौरवैः । अरोचयत् पार्थिवं क्षत्रमृते कौरवयादवान् ॥ २६ ॥ तं श्रुत्वा निहतं कर्णं द्वैरथे सव्यसाचिना । शोकार्णवे निमग्नोऽस्मि समुद्रे भिन्ननौरिव ॥ २७॥ तृवृषं निहतं श्रुत्वा द्वैरथे रथिनां वरम् । शोकार्णवे निमग्नोऽहमप्लवः सागरे यथा ॥ २८ ॥ ईदृशैर्यद्यहं दुःखैर्न विनश्यामि सञ्जय । वज्राद्दृढ़तरं मन्ये हृदयं मम दुर्भिदम् ॥ २९ ॥ ज्ञातिसम्बन्धिमित्राणामिमं श्रुत्वा पराभवम् । को मदन्यः पुमान् लोके न जह्यात् सूत जीवितम् ॥ ३० ॥ विषमग्निं प्रपातं वा पर्वताग्रादहं वृणे । न हि शक्ष्यामि दुःखानि सोढुं कष्टानि सञ्जय ॥ ३१ ॥

इति कर्णपर्वणि धृतराष्ट्रवाक्ये अष्टमोऽध्यायः ॥ ८ ॥

---

सञ्जय उवाच । श्रिया कुलेन यशसा तपसा च श्रुतेन च । त्वामद्य सन्तो मन्यन्ते ययातिमिव नाहुषम् ॥ १ ॥ श्रुते महर्षिप्रतिमः कृतकृत्योऽसि पार्थिव । पर्य्यवस्थापयात्मानं मा विषादे मनः कृथाः ॥ २ ॥

धृतराष्ट्र उवाच । दैवमेव परं मन्ये पौरुषन्तु निरर्थकम् । यत्र शालप्रतीकाशः कर्णोऽवध्यत संयुगे ॥ ३ ॥ हत्वा युधिष्ठिरानीकं पाञ्चालानां रथव्रजान् । प्रताप्य शरवर्षेण दिशः सर्वा महारथः ॥ ४ ॥ मोहयित्वा रणे पार्थान् वज्रहस्त इवासुरान् । कथं स निहतः शेते वातरुग्ण इव द्रुमः ॥ ५ ॥ शोकस्यान्तं न पश्यामि समुद्रस्येव विप्लुतः । चिन्ता मे वर्द्धते तीव्रा मुमूर्षा चापि जायते ॥ ६ ॥ कर्णस्य निधनं श्रुत्वा विजयं फाल्गुनस्य च ।

अश्मसारमयं नूनं हृदयं सुदृढं मम। यत् श्रुत्वा निहतं कर्णं न दीर्य्यति सहस्रधा ॥ ८ ॥ आयुर्नूनं सुदीर्घं मे विहितं दैवतैः पुरा। यत्र कर्णं हतं श्रुत्वा जीवाम्यद्य सुदुःखितः। धिग्जीवितमिदञ्चैव सुहृद्धीनस्य सञ्जय ॥ ९ ॥ अद्य चाहं दशामेतां गतः सञ्जय गर्हिताम्। कृपणं वर्त्तयिष्यामि शोच्यः सर्व्वस्य मन्दधीः ॥ १० ॥ अहमेव पुरा भूत्वा सर्व्वलोकस्य सत्कृतः। परिभूतः कथं सूत परैः शक्यामि जीवितुम् ॥ ११ ॥ दुःखात् सुदुःखं व्यसनं प्राप्तवानस्मि सञ्जय। भीष्मद्रोणवधेनैव कर्णस्य च महात्मनः ॥ १२ ॥ नात्र शेषं प्रपश्यामि सूतपुत्रे हते युधि। स हि पारं महानासीत् पुत्राणां मम सञ्जय ॥ १३ ॥ युद्धे विनिहतः शूरो विसृजन् सायकान् बहून्। को हि मे जीवितेनार्थस्तमृते पुरुषर्षभम् ॥१४॥ रथाद्राधेयिर्नूनं न्यपतत् सायकार्द्दितः। पर्व्वतस्येव शिखरं वज्रपाताद्विदारितम् ॥ १५ ॥ स शेते पृथिवीं नूनं शोभयन् रुधिरोक्षितः। मातङ्ग इव मत्तेन द्विपेन्द्रेण निपातितः ॥ १६ ॥ यद्बलं धार्त्तराष्ट्राणां पाण्डवानां यतो भयम्। सोऽर्ज्जुनेन हतः कर्णः प्रतिमानं धनुष्मताम् ॥ १७ ॥ स हि वीरो महेष्वासः पुत्राणां मेऽभयङ्करः। शेते विनिहतो वीरो देवेन्द्रेण इवाचलः ॥ १८ ॥ पङ्गोरिवाध्वगमनं दरिद्रस्येव कामितम्। दुर्य्योधनस्य चाकूतं तृषितस्येव विप्रुषः ॥ १९ ॥ अन्यथा चिन्तितं कार्य्यमन्यथा तत्तु जायते। अहो नु बलवद्दैवं कालश्च दुरतिक्रमः ॥ २० ॥ पलायमानः कृपणो दीनात्मा दीनपौरुषः। कच्चिद्विनिहतः सूत पुत्रो दुःशासनो मम ॥ २१ ॥ कच्चिन्न दीनाचरितं कृतवांस्तात सञ्जय। कच्चिन्न निहतः शूरो यथान्ये क्षत्रिया हताः ॥ २२ ॥ युधिष्ठिरस्य वचनं मा युध्यस्वेति सर्व्वदा। दुर्य्योधनो नाभ्यगृह्णान्मूढ़ः पथ्यमिवौषधम् ॥ २३ ॥ शरतल्पे शयानेन भीष्मेण सुमहायशाः।

पानीयं याचितः पार्थः सोऽविध्यन्मेदिनीतलम् ॥ २४ ॥ जलस्य धारां जनितां दृष्ट्वा पाण्डुसुतेन च । अब्रवीत् स महाबाहुस्तात संशाम्य पाण्डवैः ॥ २५ ॥ प्रशमाद्धि भवेच्छान्तिर्मदन्तं युद्धमस्तु वः । भ्रातृभावेन पृथिवीं भुङ्क्ष्व पाण्डुसुतैः सह ॥ २६ ॥ अकुर्वन् वचनं तस्य नूनं शोचति पुत्रकः । तदिदं समनुप्राप्तं वचनं दीर्घदर्शिनः ॥ २७ ॥ अहन्तु निहतामात्यो हतपुत्रस्तु सञ्जय । द्यूततः कृच्छ्रमापन्नो लूनपक्ष इव द्विजः ॥ २८ ॥ यथाहि शकुनिं गृह्य छित्त्वा पक्षौ च सञ्जय । विसर्जयन्ति संहृष्टाः क्रीड़माना: कुमारकाः ॥ २९ ॥ लूनपक्षतया तस्य गमनं नोपपद्यते । तथाहमपि संप्राप्तो लूनपक्ष इव द्विजः ॥ ३० ॥ क्षीणः सर्वार्थहीनश्च निर्ज्ञातिर्बन्धुवर्ज्जितः । कां दिशं प्रतिपत्स्यामि दीनः शत्रुवशं गतः ॥ ३१ ॥ योऽजयत् सर्वकाम्बोजानम्वष्ठान् कैकयैः सह । गान्धारांश्च विदेहांश्च जित्वा कार्य्यार्थमाहवे ॥ ३२ ॥ दुर्य्योधनस्य हृद्यर्थं पृथिवीं योऽजयत् प्रभुः । स जितः पाण्डवैः शूरैः समर्थैर्बाहुशालिभिः ॥ ३३ ॥ तस्मिन् हते महेष्वासे कर्णे युधि किरीटिना । के वीराः पर्य्यतिष्ठन्त तन्ममाचक्ष्व सञ्जय ॥ ३४ ॥ कच्चिन्नैकः परित्यक्तः पाण्डवैर्निहतो रणे । उक्तं त्वया पुरा तात यथा वीरा निपातिताः ॥ ३५ ॥ भीष्ममप्रतियुध्यन्तं शिखण्डी सायकोत्तमैः । पातयामास समरे सर्वशस्त्रभृतां वरम् ॥ ३६ ॥ तथा द्रौपदिना द्रोणो न्यस्तसर्वायुधो युधि । युक्तयोगो महेष्वासः शरैर्बहुभिराचितः । निहतः खड्गमुद्यम्य धृष्टद्युम्नेन सञ्जय ॥ ३७ ॥ अन्तरेण हतावेतौ छलेन च विशेषतः । अश्रौषमहमेतद्वै भीष्मद्रोणौ निपातितौ ॥ ३८ ॥ भीष्मद्रोणौ हि समरे न हन्याद्वज्रभृत् स्वयम् । न्यायेन युध्यमानौ हि तद्वै सत्यं ब्रवीमि ते ॥ ३९ ॥ कर्णस्त्वस्यन्नस्त्राणि दिव्यानि च बहूनि च । कथमिन्द्रोपमं वीरं मृत्युर्युद्धे समस्पृशत् ॥ ४० ॥ यस्य विद्युत्प्रभा

शक्तिं दिव्यां कनकभूषणाम्। प्रायच्छत् द्विषतां हन्त्रीं कुण्डलाभ्यां पुरन्दरः ॥ ४१ ॥ यस्य सर्पमुखो दिव्यः शरः काञ्चनभूषणः। अशेत निहितः पत्रौ चन्दनेष्वरिसूदनः ॥ ४२ ॥ भीष्मद्रोणमुखान् वीरान् योऽवमन्य महारथान्। जामदग्न्यान्महाराज ब्राह्ममस्त्रमशिक्षत ॥ ४३ ॥ यश्च द्रोणमुखान् दृष्ट्वा विमुखानर्दितान् शरैः। सौभद्रस्य महाबाहुर्व्यधमत् कार्मुकं शितैः ॥४४॥ यश्च नागायुतप्राणं वातरंहसमच्युतम्। विरथं सहसा कृत्वा भीमसेनमथाहसत् ॥ ४५ ॥ सहदेवञ्च निर्जित्य शरैः सन्नतपर्वभिः। कृपया विरथं कृत्वा नाहनद्धर्मचिन्तया ॥ ४६ ॥ यश्च मायासहस्राणि विकुर्वाणं जयैषिणम्। घटोत्कचं राक्षसेन्द्रं शक्रशक्त्या निजघ्निवान् ॥ ४७ ॥ एतांश्च दिवसान् यस्य युद्धे भीतो धनञ्जयः। नागमद्द्वैरथं वीरः स कथं निहतो रणे ॥४८॥ रथभङ्गो न चेत्तस्य धनुर्वा न व्यशीर्य्यत। न चेदस्त्राणि निर्णेशुः स कथं निहतः परैः ॥ ४९ ॥ को हि शक्तो रणे कर्णं विधुन्वानं महद्धनुः। विमुञ्चन्तं शरान् घोरान् दिव्यान्यस्त्राणि चाहवे। जेतुं पुरुषशार्दूलं शार्दूलमिव वेगितम् ॥ ५० ॥ ध्रुवं तस्य धनुश्छिन्नं रथो वापि महीं गतः। अस्त्राणि वा प्रनष्टानि यथा शंससि मे हतम्। न ह्यन्यदपि पश्यामि कारणं तस्य नाशने ॥ ५१ ॥ न हन्मि फाल्गुनं यावत् तावत् पादौ न धावये। इति यस्य महद्घोरं व्रतमासीन्महात्मनः ॥ ५२ ॥ यस्य भीतो वने निद्रां धर्मराजो युधिष्ठिरः। त्रयोदशसमा नित्यं नालभत् पुरुषर्षभः ॥ ५३ ॥ यस्य वीर्य्यवतो वीर्य्यं समाश्रित्य महात्मनः। मम पुत्रः सभां भार्य्यां पाण्डूनां नीतवान् बलात् ॥ ५४ ॥ तत्रापि च सभामध्ये पाण्डवानाञ्च पश्यताम्। दासभार्य्येति पाञ्चालीमब्रवीत् कुरुसन्निधौ ॥ ५५ ॥ न सन्ति पतयः कृष्णे सर्वे षण्डतिलैः समाः। उपतिष्ठस्व भर्त्तारमन्यं वा वरवर्णिनी ॥ ५६ ॥ इत्येवं

यः पुमान् वाचो रुक्षाः संश्रावयन्नुषा । सभायां सूतजः कृष्णां स कथं निहतः परैः ॥ ५७ ॥ यस्य गाण्डीवमुक्तानां स्पर्शमुग्रमचिन्तयन् । अपतिर्ह्यसि कृष्णेति ब्रुवन् पार्थानवैक्षत ॥ ५८ ॥ यस्य नासीद्भयं पार्थैः सपुत्रैः सजनार्द्दनैः । स्वबाहुबलमाश्रित्य मुहूर्त्तमपि सञ्जय ॥ ५९ ॥ तस्य नाहं वधं मन्ये देवैरपि सवासवैः । प्रतीपमभिधावद्भिः किं पुनस्तात पाण्डवैः ॥ ६० ॥ न हि ज्यां संस्पृशानस्य तलत्रे चापि गृह्णतः । पुमानाधिरथेः स्थातुं कश्चित् प्रमुखतोऽर्हति ॥ ६१ ॥ अपि स्यान्मेदिनी हीना सोमसूर्य्यप्रभांशुभिः । न वधः पुरुषेन्द्रस्य संयुगेष्वपलायिनः ॥ ६२ ॥ येन मन्दः सहायेन भ्रात्रा दुःशासनेन च । वासुदेवस्य दुर्बुद्धिः प्रत्याख्यानमरोचत ॥ ६३ ॥ स ननं वृषभस्कन्धं कर्णं दृष्ट्वा निपातितम् । दुःशासनञ्च निहतं मन्ये शोचति पुत्रकः ॥ ६४ ॥ हतं वैकर्त्तनं दृष्ट्वा द्वैरथे सव्यसाचिना । जयतः पाण्डवांश्चापि किंस्वित् दुर्य्योधनोऽब्रवीत् ॥ ६५ ॥ दुर्मर्षणं हतं दृष्ट्वा वृषसेनञ्च संयुगे । प्रभग्नञ्च बलं दृष्ट्वा वध्यमानं महारथैः ॥ ६६ ॥ पराङ्मुखांश्च राज्ञस्तु पलायनपरायणान् । विद्रुतान् रथिनो दृष्ट्वा मन्ये शोचति पुत्रकः ॥ ६७ ॥ अनेयश्चाभिमानी च दुर्बुद्धिरजितेन्द्रियः । हतोत्साहं बलं दृष्ट्वा किंस्विद्दुर्य्योधनोऽब्रवीत् ॥ ६८ ॥ स्वयं वैरं महत् कृत्वा वार्य्यमाणः सुहृद्गणैः । प्रधने हतभूयिष्ठः किंस्विद्दुर्य्योधनोऽब्रवीत् ॥ ६९ ॥ भ्रातरं निहतं दृष्ट्वा भीमसेनेन संयुगे । रुधिरे पीयमाने च किंस्विद्दुर्य्योधनोऽब्रवीत् ॥ ७० ॥ सह गान्धारराजेन सभायां यदभाषत । कर्णोऽर्जुनं रणे हन्ता हते तस्मिन् किमब्रवीत् ॥ ७१ ॥ द्यूतं कृत्वा पुरा हृष्टो वञ्चयित्वा च पाण्डवम् । शकुनिः सौबलस्तात हते कर्णे किमब्रवीत् ॥ ७२ ॥ कृतवर्म्मा महेष्वासः सात्त्वतानां महारथः । हतं वैकर्त्तनं दृष्ट्वा हार्द्दिक्यः किमभाषत ॥ ७३ ॥ ब्राह्मणाः क्षत्रिया वैश्या यस्य

ष्यिच्चामुपासते । धनुर्वेदं चिकीर्षन्तो द्रोणपुत्रस्य धीमतः ॥ ७४ ॥ युवा रूपेण सम्पन्नो दर्शनीयो महायशाः । अश्वत्थामा हते कर्णे किमभाषत सञ्जय ॥ ७५ ॥ आचार्य्यो यो धनुर्वेदे गौतमो रथसत्तमः । कृपः शारद्वतस्तात हते कर्णे किमब्रवीत् ॥ ७६ ॥ मद्रराजो महेष्वासः शल्यः समितिशोभनः । दृष्ट्वा विनिहतं कर्णं सारथ्ये रथिनां वरः ॥ ७७ ॥ किमभाषत सौवीरो मद्राणामधिपो बली । दृष्ट्वा विनिहतं सर्वे योधा वा रणदुर्ज्जयाः ॥ ७८ ॥ ये च केचन राजानः पृथिव्यां योद्धुमागताः । वैकर्त्तनं हतं दृष्ट्वा कान्यभाषन्त सञ्जय ॥ ७९ ॥ द्रोणे तु निहते वीरे रथव्याघ्रे नरर्षभे । के वा मुखमनीकानामासन् सञ्जय भागशः ॥ ८० ॥ मद्रराजः कथं शल्यो नियुक्तो रथिनां वरः । वैकर्त्तनस्य सारथ्ये तन्ममाचक्ष्व सञ्जय ॥ ८१ ॥ केऽरक्षन् दक्षिणं चक्रं सूतपुत्रस्य युध्यतः । वामं चक्रं ररक्षुर्वा के वा वीरस्य पृष्ठतः ॥ ८२ ॥ के कर्णं न जहुः शूराः के क्षुद्राः प्राद्रवंस्ततः । कथञ्च वः समेतानां हतः कर्णो महारथः ॥ ८३ ॥ पाण्डवांश्च कथं शूराः प्रत्युद्ययुर्महारथाः । सृजन्तः शरवर्षाणि वारिधारा इवाम्बुदाः ॥ ८४ ॥ स च सर्पमुखो दिव्यो महेषुप्रवरस्तदा । व्यर्थः कथं समभवत्तन्ममाचक्ष्व सञ्जय ॥ ८५ ॥ मामकस्यास्य सैन्यस्य हतोत्साहस्य सञ्जय । अवशेषं न पश्यामि ककुदे मृदिते सति ॥ ८६ ॥ तौ हि वीरौ महेष्वासौ मदर्थे त्यक्तजीवितौ । भीष्मद्रोणौ हतौ श्रुत्वा को न्वर्थो जीवितेन मे ॥ ८७ ॥ पुनः पुनर्न मृष्यामि हतं कर्णञ्च पाण्डवैः । यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतं शतम् ॥ ८८ ॥ द्रोणे हते च यद्वृत्तं कौरवाणां परैः सह । संग्रामे नरवीराणां तन्ममाचक्ष्व सञ्जय ॥ ८९ ॥ यथा कर्णेन कौन्तेयाः सह युद्धमयोजयन् । यथा च द्विषतां हन्ता रणे शान्तस्तदुच्यताम् ॥ ९० ॥

इति कर्णपर्वणि धृतराष्ट्रानुतापे नवमोऽध्यायः ॥ ९ ॥

सञ्जय उवाच। हते द्रोणे महेष्वासे तस्मिन्नहनि भारत। कृते च मोघसङ्कल्पे द्रोणपुत्रे महारथे ॥ १ ॥ द्रवमाणे महाराज कौरवाणां बलार्णवे। व्यूह्य पार्थः स्वकं सैन्यमतिष्ठद्भ्रातृभिः सह ॥ २ ॥ तमवस्थितमाज्ञाय पुत्रस्ते भरतर्षभ। विद्रुतं स्वबलं दृष्ट्वा पौरुषेण न्यवारयत् ॥ ३ ॥ स्वमनीकमवस्थाप्य बाहुवीर्य्यमुपाश्रितः। युद्धा च सुचिरं कालं पाण्डवैः सह भारत ॥ ४ ॥ लब्धलक्षैः परैर्हृष्टैर्व्यायच्छद्भिश्चिरं तदा। सन्ध्याकालं समासाद्य प्रत्याहारमकारयत् ॥ ५ ॥ कृत्वावहारं सैन्यानां प्रविश्य शिविरं स्वकम्। कुरवः स्वहितं मन्त्रं मन्त्रयाञ्चक्रिरे मिथः ॥ ६ ॥ पर्य्यङ्केषु परार्द्ध्येषु स्पर्द्ध्यास्तरणवत्सु च। वरासनेषूपविष्टाः सुखशय्यास्विवामराः ॥ ७ ॥ ततो दुर्य्योधनो राजा साम्ना परमवल्गुना। तानाभाष्य महेष्वासान् प्राप्तकालमभाषत ॥ ८ ॥

दुर्य्योधन उवाच। मतं मतिमतां श्रेष्ठाः सर्व्वे प्रब्रूत मा चिरम्। एवं गते तु किं कार्य्यं किञ्चकार्य्यतरं नृपाः ॥ ९ ॥

सञ्जय उवाच। एवमुक्ते नरेन्द्रेण नरसिंहा युयुत्सवः। चक्रुर्नानाविधाश्चेष्टाः सिंहासनगतास्तदा ॥ १० ॥ तेषां निशम्येङ्गितानि युद्धे प्राणान् जुहूषताम्। समुद्वीक्ष्य मुखं राज्ञो बालार्कसमवर्च्चसम ॥ ११ ॥ आचार्य्यपुत्रो मेधावी वाक्यज्ञो वाक्यमाददे। रागो योगस्तथा दाक्ष्यं नयश्चेत्यर्थसाधकाः। उपायाः पण्डितैः प्रोक्तास्ते तु दैवमुपाश्रिताः ॥ १२ ॥ लोकप्रवीरा येऽस्माकं देवकल्पा महारथाः। नीतिमन्तस्तथा युक्ता दक्षा रक्ताश्च ते हताः ॥ १३ ॥ न त्वेव कार्य्यं नैराश्यमस्माभिर्विजयं प्रति। सुनीतैरिह सर्व्वार्थैर्दैवमप्यनुलोम्यते ॥ १४ ॥ ते वयं प्रवरं नृणां सर्व्वैर्गुणगणैर्युतम्। कर्णमेवाभिषेक्ष्यामः सैन्यापत्येन भारत ॥ १५ ॥ कर्णं सेनापतिं कृत्वा प्रमथिष्यामहे रिपून्। एषो ह्यतिबलः शूरः कृतास्त्रो युद्धदुर्म्मदः। वैवस्वत इवासह्यः शक्तो जेतुं रणे रिपून्

॥ १६ ॥ एतदाचार्य्यतनयात् श्रुत्वा राजंस्तवात्मजः। आशाञ्च महतीञ्चक्रे कर्णं प्रति स वै तदा ॥ १७ ॥ हते भीष्मे च द्रोणे च कर्णो जेष्यति पाण्डवान्। तामाशां हृदये कृत्वा समाश्वास्य च भारत ॥ १८ ॥ ततो दुर्य्योधनः प्रीतः प्रियं श्रुत्वास्य तद्वचः। प्रीतिसत्कारसंयुक्तं तथ्यमात्महितं शुभम् ॥ १९ ॥ स्वं मनः समवस्थाप्य बाहुवीर्य्यमुपाश्रितः। दुर्य्योधनो महाराज राधेयमिदमब्रवीत् ॥ २० ॥ कर्ण जानामि ते वीर्य्यं सौहृदञ्च परं मयि। तथापि त्वां महाबाहो प्रवक्ष्यामि हितं वचः ॥ २१ ॥ श्रुत्वा यथेष्टञ्च कुरु वीर यत्तव रोचते। भवान् प्राज्ञतमो नित्यं मम चैव परा गतिः ॥ २२ ॥ भीष्म द्रोणावतिरथौ हतौ सेनापती मम। सेनापतिर्भवानस्तु ताभ्यां द्रविणवत्तरः ॥ २३ ॥ वृद्धौ हि तौ महेष्वासौ सापेक्षौ च धनञ्जये। मानितौ च मया वीरौ राधेय वचनात्तव ॥ २४ ॥ पितामहत्वं संप्रेक्ष्य पाण्डुपुत्रा महारणे। रक्षितास्तात भीष्मेण दिवसानि दशैव च ॥ २५ ॥ न्यस्तशस्त्रे च भवति हतो भीष्मः प्रतापवान्। शिखण्डिनं पुरस्कृत्य फाल्गुनेन महाहवे ॥ २६ ॥ हते तस्मिन् महेष्वासे शरतल्पगते तदा। त्वयोक्ते पुरुषव्याघ्र द्रोणो ह्यासीत् पुरःसरः ॥ २७ ॥ तेनापि रक्षिताः पार्थाः शिष्यत्वादिति मे मतिः। स चापि निहतो वृद्धो धृष्टद्युम्नेन सत्वरम् ॥ २८ ॥ निहताभ्यां प्रधानाभ्यां ताभ्याममितविक्रमम्। त्वत्समं समरे योधं नान्यं पश्यामि चिन्तयन् ॥ २९ ॥ भवानेवाद्य नः शक्तो विजयाय न संशयः। पूर्वं मध्ये च पश्चाच्च तथैव विहितं हितम् ॥ ३० ॥ स भवान् धुर्य्यवत् सङ्ख्ये धुरमुद्वोढुमर्हति। अभिषेचय सेनान्ये स्वयमात्मानमात्मना ॥ ३१ ॥ देवतानां यथा स्कन्दः सेनानीः प्रभुरव्ययः। तथा भवानिमां सेनां धार्त्तराष्ट्रीं बिभर्त्तु वै। जहि शत्रुगणान् सर्व्वान् महेन्द्रो दानवानिव ॥ ३२ ॥ अवस्थितं रणे

दृष्ट्वा पाण्डवास्त्वां महारथाः । द्रविष्यन्ति सपाञ्चाला विष्णुं दृष्ट्वेव दानवाः । तस्मात्त्वं पुरुषव्याघ्र प्रकर्षैतां महाचमूम् ॥३३॥ भवत्यवस्थिते यत्ते पाण्डवा मन्दचेतसः । द्रविष्यन्ति सहामात्याः पाञ्चाला सृञ्जयाश्च ह ॥ ३४ ॥ यथा ह्यभ्युदितः सूर्य्यः प्रतपन् स्वेन तेजसा । व्यपोहति तमस्तीव्रं तथा शत्रून् प्रतापय ॥ ३५ ॥

सञ्जय उवाच । आशा वलवती राजन् पुत्रस्य तव साऽभवत् । हते भीष्मे च द्रोणे च कर्णो जेष्यति पाण्डवान् ॥ ३६ ॥ तामाशां हृदये कृत्वा कर्णमेवं तदाब्रवीत् । सूतपुत्र न ते पार्थः स्थित्वाग्रे संयुयुत्सति ॥ ३७ ॥

कर्ण उवाच । उक्तमेतन्मया पूर्वं गान्धारे तव सन्निधौ । जेष्यामि पाण्डवान् सर्वान् सपुत्रान् सजनार्द्दनान् ॥ ३८ ॥ सेनापतिर्भविष्यामि तवाहं नात्र संशयः । स्थिरो भव महाराज जितान् विद्धि च पाण्डवान् ॥ ३९ ॥

सञ्जय उवाच । एवमुक्तो महाराज ततो दुर्य्योधनो नृपः । उत्तस्थौ राजभिः सार्द्धं देवैरिव शतक्रतुः । सैनापत्येन सत्कर्त्तुं कर्णं स्कन्दमिवामराः ॥ ४० ॥ ततोऽभिषिषिचुः कर्णं विधिदृष्टेन कर्म्मणा । दुर्य्योधनमुखा राजन् राजानो विजयैषिणः ॥ ४१ ॥ शातकुम्भमयैः कुम्भैर्म्माहेयैश्चैवानुमन्त्रितैः । तोयपूर्णैर्विषाणैश्च द्विपखड्गमहर्षभैः ॥ ४२ ॥ मणिमुक्तायुतैश्चान्यैः पुण्यगन्धैस्तथौषधैः । औडुम्बरे सुखासीनमासने क्षौमसंवृते ॥ ४३ ॥ शास्त्रदृष्टेन विधिना सम्भारैश्च सुसंभृतैः । ब्राह्मणाः क्षत्रिया वैश्यास्तथा शूद्राश्च सम्मताः । तुष्टुवुस्तं महात्मानमभिषिक्तं वरासने ॥४४॥ ततोऽभिषिक्तो राजेन्द्र निष्कैर्गोभिर्धनेन च । वाचयामास विप्राग्र्यान् राधेयः परवीरहा ॥ ४५ ॥ जय पार्थान् सगोविन्दान् सानुगांस्तान्महाहवे । इति ते वन्दिनः प्राहुर्द्विजाश्च पुरुषर्षभ ॥ ४६ ॥ जहि पार्थान् सपाञ्चालान् राधेय विजयाय

नः उद्यन्निव सदा भानुस्तमांस्युग्रैर्गभस्तिभिः ॥ ४७ ॥ न ह्यलं त्वद्विसृष्टानां शराणां वै सकेशवाः। कृतघ्नाः सूर्य्यरश्मीनां ज्वलतामिव दर्शने ॥ ४८ ॥ न च पार्थाः सपाञ्चालाः स्थातुं शक्तास्तवाग्रतः। आत्तशस्त्रस्य समरे महेन्द्रस्येव दानवाः ॥ ४९ ॥ अभिषिक्तस्तु राधेयः प्रभया सोऽमितप्रभः। अत्यरिच्यत रूपेण दिवाकर इवापरः ॥ ५० ॥ सैन्यापत्ये तु राधेयमभिषिच्य सुतस्तव। अमन्यत तदात्मानं कृतार्थं कालचोदितः ॥ ५१ ॥ कर्णोऽपि राजन् संप्राप्य सैनापत्यमरिन्दमः। योगमाज्ञापयामास सूर्य्यस्योदयनं प्रति ॥ ५२ ॥ तव पुत्रैर्वृतः कर्णः शुशुभे तत्र भारत। देवैरिव यथा स्कन्दः संग्रामे तारकामये ॥२५ ॥

इति कर्णपर्वणि कर्णाभिषेके दशमोऽध्यायः ॥ १० ॥

---

धृतराष्ट्र उवाच। सैनापत्यन्तु संप्राप्य कर्णो वैकर्त्तनस्तदा। तथोक्तश्च स्वयं राज्ञा स्निग्धं भ्रातृसमं वचः ॥ १ ॥ योगमाज्ञाप्य सेनानामादित्येऽभ्युदिते तदा। अकरोत् किं महाप्राज्ञस्तन्ममाचक्ष्व सञ्जय ॥ २ ॥

सञ्जय उवाच। कर्णस्य मतमाज्ञाय पुत्रास्ते भरतर्षभ। योगमाज्ञापयामासुर्नन्दितूर्य्यपुरःसरम् ॥ ३ ॥ महत्यपररात्रे च तव सैन्यस्य पार्थिव। योग योगेति सहसा प्रादुरासीन्महास्वनः ॥ ४ ॥ कल्पतां नागमुख्यानां रथानाञ्च वरूथिनाम्। सन्नह्यतां पदातीनां वाजिनाञ्च विशाम्पते ॥ ५ ॥ क्रोशताञ्चापि योधानां त्वरितानां परस्परम्। बभूव तुमुलः शब्दो दिवस्पृक् सुमहांस्ततः ॥ ६ ॥ ततः श्वेतपताकेन बलाकावर्णवाजिना। हेमपृष्ठेन धनुषा नागकक्षेण केतुना ॥ ७ ॥ तूणीरशतपूर्णेन साङ्गदेन वरूथिना। शतघ्नीकिङ्किणीशक्तिशूलतोमरधारिणा ॥ ८ ॥ कार्मुकैरुपपन्नेन

विमलादित्यवर्चसा । रथेनातिपताकेन सूतपुत्रोऽभ्यदृश्यत ॥ ९ ॥ ध्मापयन् वारिजं राजन् हेमजालविभूषितम् । विधुन्वानो महच्चापं कार्त्तस्वरविभूषितम् ॥ १० ॥ दृष्ट्वा कर्णं महेष्वासं रथस्थं रथिनां वरम् । भानुमन्तमिवोद्यन्तं तमोघ्नन्तं दुरासदम् ॥११॥ न भीष्मव्यसनं केचिन्नापि द्रोणस्य मारिष । नान्येषां पुरुषव्याघ्र मेनिरे तत्र कौरवाः ॥ १२ ॥ ततस्तु त्वरयन् योधान् शङ्खशब्देन मारिष । कर्णो निष्कर्षयामास कौरवाणां महद्बलम् ॥ १३ ॥ व्यूहं व्यूह्य महेष्वासो मकरं शत्रुतापनः । प्रत्युद्ययौ तदा कर्णः पाण्डवान् विजिगीषया ॥ १४ ॥ मकरस्य तु तुण्डे वै कर्णो राजन् व्यवस्थितः । नेत्राभ्यां शकुनिः शूर उलूकश्च महारथः ॥ १५ ॥ द्रोणपुत्रस्तु शिरसि ग्रीवायां सर्व्वसोदराः । मध्ये दुर्य्योधनो राजा बलेन महतावृतः ॥ १६ ॥ वामे पादे तु राजेन्द्र कृतवर्मा व्यवस्थितः । नारायणबलैर्युक्तो गोपालैर्युद्धदुर्म्मदैः ॥ १७ ॥ पादे तु दक्षिणे राजन् गौतमः सत्यविक्रमः । त्रिगर्त्तैश्च महेष्वासैर्दाक्षिणात्यैश्च संवृतः ॥ १८ ॥ अनुपादस्तु यो वामस्तत्र शल्यो व्यवस्थितः । महत्या सेनया सार्द्धं मद्रदेशसमुत्थया ॥ १९ ॥ दक्षिणे तु महाराज सुषेणः सत्यसङ्गरः । वृतो रथसहस्रेण दन्तिनाञ्च त्रिभिः शतैः ॥ २० ॥ पुच्छेऽप्यास्तां महावीर्य्यौ भ्रातरौ पार्थिवौ तदा । चित्रश्च चित्रसेनश्च महत्या सेनया वृतौ ॥ २१ ॥ तथा प्रयाते राजेन्द्र कर्णे नरवरोत्तमे । धनञ्जयमभिप्रेक्ष्य धर्म्मराजोऽब्रवीदिदम् ॥ २२ ॥ पश्य पार्थ यथा सेना धार्त्तराष्ट्रीह संयुगे । कर्णेन विहिता वीर गुप्ता वीरैर्म्महारथैः ॥ २३ ॥ हतवीरतमा ह्येषा धार्त्तराष्ट्री महाचमूः । फल्गुशेषा महाबाहो तृणैस्तुल्या मता मम । एको ह्यत्र महेष्वासः सूतपुत्रो विराजते ॥ २४ ॥ सदेवासुरगन्धर्वैः सकिन्नरमहोरगैः । चराचरैस्त्रिभिर्लोकैर्योऽजय्यो रथिनां वरः ॥२५॥ तं हत्वाद्य महाबाहो विजय-

स्तव फाल्गुनः। उद्धृतस्य भवेच्छल्यो मम द्वादशवार्षिकः। एवं ज्ञात्वा महाबाहो व्यूहं व्यूह्य यथेच्छसि॥२६॥ भ्रातुरेतद्वचः श्रुत्वा पाण्डवः श्वेतवाहनः। अर्द्धचन्द्रेण व्यूहेन प्रत्यव्यूहत तां चमूम्॥२७॥ वामपार्श्वे तु तस्याथ भीमसेनो व्यवस्थितः। दक्षिणे च महेष्वासो धृष्टद्युम्नो व्यवस्थितः॥२८॥ मध्ये व्यूहस्य राजा तु पाण्डवश्च धनञ्जयः। नकुलः सहदेवश्च धर्मराजस्य पृष्ठतः॥२९॥ चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ। नार्जुनं जहतुर्युद्धे पाल्यमानौ किरीटिना॥३०॥ शेषा नृपतयो वीराः स्थिताः व्यूहस्य दंशिताः। यथाभागं यथोत्साहं यथायत्नञ्च भारत॥३१॥ एवमेतन्महाव्यूहं व्यूह्य भारत पाण्डवाः। तावकाश्च महेष्वासा युद्धायैव मनो दधुः॥३२॥ दृष्ट्वा व्यूढां तव चमूं सूतपुत्रेण संयुगे। निहतान् पाण्डवान् मेने धार्त्तराष्ट्रः सबान्धवः॥३३॥ तथैव पाण्डवीं सेनां व्यूढां दृष्ट्वा युधिष्ठिरः। धार्त्तराष्ट्रान् हतान् मेने सकर्णान् वै जनाधिप॥३४॥ ततः शङ्खाश्च भेर्य्यश्च पणवानकदुन्दुभीः। डिण्डिमाश्चाप्यहन्यन्त झर्झराश्च समन्ततः॥३५॥ सेनयोरुभयो राजन् प्रावाद्यन्त महास्वनाः। सिंहनादश्च संजज्ञे शूराणां जयगृद्धिनाम्॥३६॥ हयहेषितशब्दाश्च वारणानाञ्च बृंहताम्। रथनेमिस्वनाश्चोग्राः संबभूवुर्जनाधिप॥३७॥ न द्रोणव्यसनं कश्चिज्जानीते तत्र भारत। दृष्ट्वा कर्णं महेष्वासं मुखे व्यूहस्य दंशितम्॥३८॥ उभे सैन्ये महाराज प्रहृष्टनरसङ्कुले। योद्धुकामे स्थिते राजन् हन्तुमन्योऽन्यमञ्जसा॥३९॥ तत्र यत्तौ सुसंरब्धौ दृष्ट्वान्योन्यं व्यवस्थितौ। अनीकमध्ये राजेन्द्र चेरतुः कर्णपाण्डवौ॥४०॥ नृत्यमेव च ते सेने समेयातां परस्परम्। तेषां पक्षैः प्रपक्षैश्च निर्जग्मुस्ते युयुत्सवः॥४१॥ ततः प्रववृते युद्धं नरवारणवाजिनाम्। रथानाञ्च महाराज अन्योऽन्यमभिनिघ्नताम्॥४२॥

इति कर्णपर्वणि युद्धारम्भे एकादशोऽध्यायः॥११॥

सञ्जय उवाच। ते सेनेऽन्योऽन्यमासाद्य प्रहृष्टाश्वनरद्विपे। बृहत्यौ संप्रजग्माते देवासुरसमप्रभे॥ १॥ ततो नररथाश्वेभाः पत्तयश्चोग्रविक्रमाः। संप्रहारान् भृशञ्चक्रुर्देहपाप्मप्रणाशनान्॥२॥ पूर्णचन्द्रार्कपद्मानां कान्तिभिर्गन्धतः समैः। उत्तमाङ्गैर्नृसिंहानां नृसिंहास्तस्तरुर्महीम्॥ ३॥ अर्द्धचन्द्रैस्तथा भल्लैः क्षुरप्रैरसिपट्टिशैः। परश्वधैश्चाप्यकृन्तन्नुत्तमाङ्गानि युध्यताम्॥ ४॥ व्यायतायतबाहूनां व्यायतायतबाहुभिः। बाहवः पातिता रेजुर्धरण्यां सायुधाङ्गदाः॥ ५॥ तैः स्फुरद्भिर्मही भाति रक्ताङ्गुलितलैस्तथा। गरुड़प्रहतैःरुग्रैः पञ्चास्यैरुरगैरिव॥ ६॥ द्विरदस्यन्दनाश्वेभ्यः पेतुर्वीरा द्विषद्धताः। विमानेभ्यो यथा क्षीणे पुण्य स्वर्गसदस्तथा॥ ७॥ गदाभिरन्ये गुर्व्वीभिः परिघैर्मुषलैरपि। पोथिताः शतशः पेतुर्वीरा वीरतरै रणे॥ ८॥ रथा रथैर्विमथिता मत्ता मत्तैर्द्विपैर्द्विपाः। सादिनः सादिभिश्चैव तस्मिन् परमसंकुले॥ ९॥ रथैर्नरा रथा नागैरश्वारोहाश्च पत्तिभिः। अश्वारोहैः पदाताश्च निहता युधि शेरते॥ १०॥ रथाश्वपत्तयो नागै रथाश्वेभाश्च पत्तिभिः। रथपत्तिद्विपाश्चाश्वै रथैश्चापि नरद्विपाः॥ ११॥ रथाश्वेभनराणान्तु नराश्वेभरथैः कृतम्। पाणिपादैश्च शस्त्रैश्च रथैश्च कदनं महत्॥ १२॥ तथा तस्मिन् बले शूरैर्वध्यमाने हतेऽपि च। अस्मानभ्याययुः पार्थां वृकोदरपुरोगमाः॥ १३॥ धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः। सात्यकिश्चेकितानश्च द्राविड़ैः सैनिकैः सह॥ १४॥ वृता व्यूहेन महता पाण्ड्याश्चोलाः सकेरलाः। व्यूढ़ोरस्का दीर्घभुजाः प्रांशवः पृथुलोचनाः॥ १५॥ आपीड़िनो रक्तदन्ता मत्तमातङ्गविक्रमाः। नानाविरागवसना गन्धचूर्णावचूर्णिताः॥ १६॥ बद्धासयः पाशहस्ता वारणप्रतिवारणाः। समानमृत्यवो राजन् नात्यजन्त परस्परम्॥ १७॥ कलापिनश्चापहस्ता दीर्घकेशाः प्रियम्वदाः।

पत्तयः सात्यकेरश्चा घोररूपपराक्रमाः ॥ १८ ॥ अथापरे पुनः
शूराश्चेदिपाञ्चालकैकयाः । कारूषा कोशलाः काश्या मागधा-
श्चाभिदुद्रुवुः ॥ १९ ॥ तेषां रथाश्वनागाश्च प्रवराश्चोग्रपत्तय ।
नानावाद्यरवैर्हृष्टा नृत्यन्ति च हसन्ति च ॥ २० ॥ तस्य सैन्यस्य
महतो महामात्रवरैर्वृतः । मध्ये वृकोदरोऽभ्यायात्त्वदीयान्नाग-
धूर्गतः ॥ २१ ॥ स नागप्रवरोऽत्युग्रो विधिवत्कल्पितो बभौ ।
उदयाग्र्याद्रिभवनं यथाभ्युदितभास्करम् ॥ २२ ॥ तस्यायसं वर्म-
वरं वररत्नविभूषितम् । ताराव्याप्तस्य नभसः शारदस्य समत्विषम्
॥ २३ ॥ स तोमरव्यग्रकरश्चारुमौलिः स्वलंकृतः । शरन्मध्य-
न्दिनार्काभस्तेजसा व्यदहद्रिपून् ॥ २४ ॥ तं दृष्ट्वा द्विरदं दूरात्
क्षेमधूर्त्तिर्द्विपस्थितः । आह्वयन्नभिदुद्राव प्रमनाः प्रमनस्तरम् ॥२५
तयो समभवद्युद्धं द्विपयोरुग्ररूपयोः । यदृच्छया द्रुमवतोर्महा-
पर्वतयोरिव ॥ २६ ॥ संसक्तनागौ तौ वीरौ तोमरैरितरेतरम् ।
बलवत् सूर्य्यरश्म्याभैर्भित्त्वान्योऽन्यं विनेदतुः ॥ २७ ॥ अपसृत्य
तु नागाभ्यां मण्डलानि विचेरतुः । प्रगृह्य चोभौ धनुषी जघ्नतुर्वै
परस्परम् ॥ २८ ॥ क्ष्वेडितास्फोटितरवैर्बाणशब्दैश्च सर्वतः । तौ
जनं हर्षयन्तौ च सिंहनादं प्रचक्रतुः ॥ २९ ॥ समुद्यतकराभ्यां तौ
द्विपाभ्यां कृतिनावुभौ । वातोद्धूतपताकाभ्यां युयुधाते महाबलौ
॥ ३० ॥ तावन्योऽन्यस्य धनुषी छित्त्वान्योऽन्यं विनेदतुः । शक्ति-
तोमरवर्षेण प्रावृण्मेघाविवाम्बुभिः ॥ ३१ ॥ क्षेमधूर्त्तिस्तदा भीमं
तोमरेण स्तनान्तरे । निर्बिभेदातिवेगेन षड्भिश्चाप्यपरैर्नदन्
॥ ३२ ॥ स भीमसेनः शुशुभे तोमरैरङ्गमाश्रितैः । क्रोधदीप्तवपु-
र्मेघैः सप्तसप्तिरिवांशुमान् ॥ ३३ ॥ ततो भास्करवर्णाभमञ्जोगति-
मयस्मयम् । ससर्ज तोमरं भीमः प्रत्यमित्राय यत्नवान् ॥ ३४ ॥
ततः कुलूताधिपतिश्चापमायम्य सायकैः । दशभिस्तोमरं छित्त्वा
षष्ट्या विव्याध पाण्डवम् ॥ ३५ ॥ अथ कार्मुकमादाय भीमो

जलदनिस्वनम् । रिपोरभ्यर्द्दयन्नागमुद्रन्नन् पाण्डव शरैः ॥ ३६ ॥ स शरैरर्द्दितो नागो भीमसेनेन संयुगे । गृह्यमाणोऽपि नातिष्ठ-द्वातोद्धूत इवाम्बुदः ॥ ३७ ॥ तमभ्यधावद्द्विरदं भीमो भीमस्य नागराट् । महावातेरितं मेघं वातोद्धूत इवाम्बुदः ॥ ३८ ॥ सं-निवर्त्त्यात्मनो नागं क्षेमधूर्त्तिः प्रतापवान् । विव्याधाभिद्रुतं वाणै-र्भीमसेनस्य कुञ्जरम् ॥ ३९ ॥ ततः साधुविसृष्टेन क्षुरेणानत-पर्वणा । छित्त्वा शरासनं शत्रोर्नागमामित्रमार्द्दयत् ॥ ४० ॥ ततः क्रुद्धो रणे भीमं क्षेमधूर्त्तिः पराभिनत् । जघान चास्य द्विरदं नाराचैः सर्वमर्म्मसु । स पपात महानागो भीमसेनस्य भारत ॥ ४१ ॥ पुरा नागस्य पतनादवप्लुत्य स्थितो महीम् । तस्य भीमोऽपि द्विरदं गदया समपोथयत् ॥ ४२ ॥ तस्मात् प्रमथिता-न्नागात् क्षेमधूर्त्तिमवप्लुतम् । उद्यतायुधमायान्तं गदयाहन् वृको-दरः ॥ ४३ ॥ स पपात हतः साश्विर्व्यसुस्तमभितो द्विपम् । वज्र-प्रभग्नमचलं सिंहो वज्रहतो यथा ॥ ४४ ॥ तं हतं नृपतिं दृष्ट्वा कुलूतानां यशस्करम् । प्राद्रवद्‌व्यथिता सेना त्वदीया भरतर्षभ ॥४५

इति कर्णपर्वणि क्षेमधूर्त्तिवधे द्वादशोऽध्यायः ॥ १२ ॥

---

सञ्जय उवाच । ततः कर्णो महेष्वासः पाण्डवानामनीकिनीम् । जघान समरे शूरः शरैः सन्नतपर्वभिः ॥ १ ॥ तथैव पाण्डवा राजं-स्तव पुत्रस्य वाहिनीम् । कर्णस्य प्रमुखे क्रुद्धा निजघ्नुस्ते महा-रथाः ॥ २ ॥ कर्णोऽपि राजन् समरे व्यहनत् पाण्डवीं चमूम् । नाराचैरर्करश्म्याभैः कर्म्मारपरिमार्ज्जितैः ॥ ३ ॥ तत्र भारत कर्णेन नाराचैस्ताड़िता गजाः । नेदुः सेदुश्च मम्लुश्च वभ्रमुश्च दिशो दश ॥ ४ ॥ वध्यमाने वले तस्मिन् सूतपुत्रेण मारिष । नकुलो-ऽभ्यद्रवत्तूर्णं सूतपुत्रं महारथम् ॥ ५ ॥ भीमसेनस्तथा द्रौणिं

कुर्वाणं कर्म दुष्करम्। विन्दानुविन्दौ कैकेयौ सात्यकिः सम-
वारयत्॥ ६॥ श्रुतकर्माणमायान्तं चित्रसेनो महीपतिः। प्रति-
विव्यधस्तथा चित्रं चित्रकेतनकार्मुकम्॥ ७॥ दुर्य्योधनस्तु राजानं
धर्मपुत्रं युधिष्ठिरम्। संशप्तकगणान् क्रुद्धानभ्यधावद्धनञ्जयः॥८॥
धृष्टद्युम्नः कृपं प्रायात् तस्मिन् वीरवरक्षये। शिखण्डी कृतवर्माणं
समासादयदच्युतः॥ ९॥ श्रुतकीर्त्तिस्तथा शल्यं माद्रीपुत्रः सुतं
तव। दुःशासनं महाराज सहदेवः प्रतापवान्॥ १०॥ कैकेयौ
सात्यकिं युद्धे शरवर्षेण भास्वता। सात्यकिः कैकयौ चापि छाद-
यामास भारत॥११॥ तावेनं भ्रातरौ वीरौ जघ्नतुर्हृदये भृशम्।
विषाणाभ्यां यथा नागौ प्रतिनागं महारणे॥ १२॥ शरसंभिन्न-
मर्माणौ तावुभौ भ्रातरौ रणे। सात्यकिं सत्यकर्माणं राजन्
विभिदतुः शरैः॥ १३॥ तौ सात्यकिर्महाराज प्रहसन् सर्वतो
दिशः। छादयन् शरवर्षेण वारयामास भारत॥ १४॥ वार्य्य-
माणौ ततस्तौ हि शैनेयशरवृष्टिभिः। शैनेयस्य रथं तूर्णं छाद-
यामासतुः शरैः॥ १५॥ तयोस्तु धनुषी चित्रे छित्त्वा शौरि-
र्महायशाः। अथ तौ सायकैस्तीक्ष्णैर्वारयामास संयुगे॥ १६॥
अथान्ये धनुषी चित्रे प्रगृह्य च महाशरान्। सात्यकिं छादयन्तौ
तौ चेरतुर्लघु सुष्ठु च॥ १७॥ ताभ्यां मुक्ता महाबाणाः कङ्क-
बर्हिणवाससः। द्योतयन्तो दिशः सर्वाः संपेतुः स्वर्णभूषणाः
॥ १८॥ बाणान्धकारमभवत् तयो राजन्महामृधे। अन्योऽन्यस्य
धनुश्चैव चिच्छिदुस्ते महारथाः॥ १९॥ तत क्रुद्धो महाराज
सात्त्वतो युद्धदुर्मदः। धनुरन्यत् समादाय सज्यं कृत्वा च संयुगे।
क्षुरप्रेण सुतीक्ष्णेन अनुविन्दशिरोऽहरत्॥ २०॥ अपतत्तच्छिरो
राजन् कुण्डलोपचितं महत्। शम्बरस्य शिरो यद्वन्निहतस्य
महारणे। शोचयन् कैकयान् सर्वान् जगामाशु वसुन्धराम्॥२१॥
तं दृष्ट्वा निहतं शूरं भ्राता तस्य महारथः। सज्यमन्यद्धनु कृत्वा

शैनेयं पर्य्यवारयत् ॥ २२ ॥ स षष्ट्या सात्यकिं विद्ध्वा स्वर्णपुङ्खैः शिलाशितैः । ननाद बलवन्नादं तिष्ठ तिष्ठेति चाब्रवीत् ॥ २३ ॥ सात्यकिश्च ततस्तूर्णं कैकेयानां महारथः । शरैरनेकसाहस्रै-र्बाह्वोरुरसि चार्पयत् ॥ २४ ॥ स शरैः क्षतसर्व्वाङ्गः सात्यकिः सत्यविक्रमः । रराज समरे राजन् सपुष्प इव किंशुकः ॥ २५ ॥ सात्यकिः समरे विद्धः कैकेयेन महात्मना । कैकेयं पञ्चविंशत्या विव्याध प्रहसन्निव ॥ २६ ॥ तावन्योऽन्यस्य समरे सञ्छिद्य धनुषी शुभे । हत्वा च सारथिं तूर्णं हयांश्च रथिनां वरौ । विरथा-वसियुद्धाय समाजग्मतुराहवे ॥ २७ ॥ शतचन्द्रचिते गृह्य चर्म्मणी सुभुजौ तथा । व्यरोचेतां महारङ्गे निस्त्रिंशवरधारिणौ । यथा देवासुरे युद्धे जम्भशक्रौ महाबलौ ॥ २८ ॥ मण्डलानि ततस्तौ तु विचरन्तौ महारणे । अन्योऽन्यमभितस्तूर्णं समाजग्मतुराहवे । अन्योऽन्यस्य वधे चैव चक्रतुर्यत्नमुत्तमम् ॥ २९ ॥ कैकेयस्य द्विधा चर्म्म ततश्चिच्छेद सात्वतः । सात्यकेस्तु तथैवासौ चर्म्म चिच्छेद पार्थिवः ॥ ३० ॥ चर्म्म छित्त्वा तु कैकेयस्तारागणशतैर्वृतम् । चचार मण्डलान्येव गतप्रत्यागतान्यपि ॥ ३१ ॥ तं चरन्तं महा-रङ्गे निस्त्रिंशवरधारिणम् । अपहस्तेन चिच्छेद शैनेयस्त्वरया-न्वितः ॥ ३२ ॥ सवर्म्मा कैकयो राजन् द्विधा छिन्नो महारणे । निपपात महेष्वासो वज्राहत इवाचलः ॥ ३३ ॥ तं निहत्य रणे शूरः शैनेयो रथसत्तमः । युधामन्युरथं तूर्णमारुरोह परन्तपः ॥ ३४ ॥ ततोऽन्यं रथमास्थाय विधिवत् कल्पितं पुनः । कैके-यानां महत् सैन्यं व्यधमत् सात्यकिः शरैः ॥ ३५ ॥ सा वध्यमाना समरे कैकेयानां महाचमूः । तमुत्सृज्य रणे शत्रुं प्रदुद्राव दिशो दश ॥ ३६ ॥

इति कर्णपर्व्वणि विन्दानुविन्दवधे त्रयोदशोऽध्यायः ॥ १३ ॥

---

सञ्जय उवाच। श्रुतकर्मा ततो राजंश्चित्रसेनं महीपतिम्। आजघ्ने समरे क्रुद्धः पञ्चाशद्भिः शिलीमुखैः ॥ १॥ अभिसारस्तु तं राजन्नवभिर्नतपर्वभिः। श्रुतकर्माणमाहत्य सूतं विव्याध पञ्चभिः ॥ २ ॥ श्रुतकर्मापि तं क्रुद्धश्चित्रसेनं चमूमुखे। नाराचेन सुतीक्ष्णेन मर्मदेशे समार्पयत् ॥ ३ ॥ सोऽतिविद्धो महाराज नाराचेन महात्मना। मूर्च्छामभिययौ वीरः कश्मलञ्च विवेश ह ॥ ४ ॥ एतस्मिन्नन्तरे चैनं श्रुतकीर्त्तिर्महायशाः। नवत्या जगतीपालं छादयामास पत्रिभिः ॥ ५ ॥ प्रतिलभ्य ततः संज्ञां चित्रसेनो महारथः। धनुश्चिच्छेद भल्लेन तञ्च विव्याध सप्तभिः ॥ ६ ॥ सोऽन्यत् कार्मुकमादाय वेगघ्नं रुक्मभूषणम्। चित्ररूपधरं चक्रे चित्रसेनं शरोर्मिभिः ॥ ७ ॥ स शरैश्चित्रितो राजा चित्रमाल्यधरो युवा। युवेव समरेऽशोभद्गोष्ठीमध्ये स्वलङ्कृतः ॥ ८ ॥ श्रुतकर्माणमथ वै नाराचेन स्तनान्तरे। बिभेद तरसा राजंस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ९ ॥ श्रुतकर्मापि समरे नाराचेन समर्पितः। सुस्राव रुधिरं तत्र गैरिकाम्भ इवाचलः ॥ १० ॥ ततः स रुधिराक्ताङ्गो रुधिरेण कृतच्छविः। रराज समरे वीरः सपुष्प इव किंशुकः ॥ ११ ॥ श्रुतकर्मा तदा राजन् शत्रुणा समभिद्रुतः। शत्रुसंवारणं क्रुद्धो द्विधा चिच्छेद कार्मुकम् ॥ १२ ॥ अथैनं छिन्नधन्वानं नाराचानां शतैस्त्रिभिः। छादयन् समरे राजन् विव्याध च सुपत्रिभिः ॥ १३ ॥ ततोऽपरेण भल्लेन तीक्ष्णेन निशितेन च। जहार सशिरस्त्राणं शिरस्तस्य महात्मनः ॥ १४ ॥ तच्छिरो न्यपतद्भूमौ चित्रसेनस्य दीप्तिमत्। यदृच्छया यथा चन्द्रश्च्युतः स्वर्गान्महीतलम् ॥ १५ ॥ राजानं निहतं दृष्ट्वा तेऽभिसारन्तु मारिष। अभ्यद्रवन्त वेगेन चित्रसेनस्य सैनिकाः ॥ १६ ॥ ततः क्रुद्धो महेष्वासस्तत् सैन्यं प्राद्रवच्छरैः। अन्तकाले यथा क्रुद्धः सर्वभूतानि प्रेतराट् ॥ १७ ॥ ते वध्यमानाः

समरे तव पौत्रेण धन्विना। व्यद्रवन्त दिशस्तूर्णं दावदग्धा इव द्विपाः ॥ १८ ॥ तांस्तु विद्रवतो दृष्ट्वा निरुत्साहान् द्विषज्जये। द्रावयन्निषुभिस्तीक्ष्णैः श्रुतकर्मा व्यरोचत ॥ १९ ॥ प्रतिविन्ध्यस्ततश्चित्रं भित्त्वा पञ्चभिराशुगैः। सारथिञ्च त्रिभिर्विद्ध्वा ध्वजमेकेषुणापि च ॥ २० ॥ तं छित्त्वा नवभिर्भल्लैर्बाह्वोरुरसि चार्दयत्। स्वर्णपुङ्खैः प्रसन्नाग्रैः कङ्कबर्हिणवाजितैः ॥ २१ ॥ प्रतिविन्ध्यो धनुश्छित्त्वा तस्य भारत सायकैः। पञ्चभिर्निशितैर्घोरैरथैनं सम्प्रजघ्निवान् ॥ २२ ॥ ततः शक्तिं महाराज स्वर्णघण्टां दुरासदाम्। प्राहिणोत्तव पौत्राय घोरामग्निशिखामिव ॥२३॥ तामापतन्तीं सहसा महोल्काप्रतिमां तदा। त्रिधा चिच्छेद समरे प्रतिविन्ध्यो हसन्निव ॥ २४ ॥ सा पपात त्रिधा छिन्ना प्रतिविन्ध्यशरैः शितैः। युगान्ते सर्वभूतानि त्रासयन्ती यथाशनिः ॥ २५ ॥ शक्तिं तां प्रहतां दृष्ट्वा चित्रो गृह्य महागदाम्। प्रतिविन्ध्याय चिक्षेप रुक्मजालविभूषिताम् ॥ २६ ॥ सा जघान हयांस्तस्य सारथिञ्च महारणे। रथं प्रमृद्य वेगेन धरणीमन्वपद्यत ॥ २७ ॥ एतस्मिन्नेव काले तु रथादाप्लुत्य भारत। शक्तिं चिक्षेप चित्राय स्वर्णघण्टामलङ्कृताम् ॥ २८ ॥ तामापतन्तीं जग्राह चित्रो राजा महामनाः। ततस्तामेव चिक्षेप प्रतिविन्ध्याय भारत ॥ २९ ॥ समासाद्य रणे शूरं प्रतिविन्ध्यं महाप्रभा। निर्भिद्य दक्षिणं बाहुं निपपात महीतले। पतिताभासयच्चैव तं देशमशनिर्यथा ॥ ३० ॥ प्रतिविन्ध्यस्ततो राजंस्तोमरं हेमभूषितम्। प्रेषयामास संक्रुद्धश्चित्रस्य वधकाम्यया ॥ ३१ ॥ स तस्य वर्मावरणं भित्त्वा हृदयमेव च। जगाम धरणीं तूर्णं महोरग इवाशयम् ॥ ३२ ॥ स पपात तदा राजा तोमरेण समाहतः। प्रसार्य विपुलौ बाहू पीनौ परिघसन्निभौ ॥ ३३ ॥ चित्रं संप्रेक्ष्य निहतं तावका रणशोभिनः। अभ्यद्रवन्त वेगेन प्रति-

विम्बंश समन्ततः ॥ ३५ ॥ सृजन्तो विविधान् बाणान् शतघ्नीश्च सकिङ्किणीः । तमवच्छादयामासुः सूर्य्यमभ्रगणा इव ॥ ३६ ॥ तान् विधम्य महाबाहुः शरजालेन संयुगे । व्यद्रावयत्तत्र चमूं वज्रहस्त इवासुरीम् ॥३७॥ ते वध्यमानाः समरे तावकाः पाण्डव-नृप । विप्राकीर्य्यन्त सहसा वाततुन्ना घना इव ॥ ३७ ॥ विप्र-द्रुते बले तस्मिन् वध्यमाने समन्ततः । द्रौणिरेकोऽभ्ययात्तूर्णं भीमसेनं महाबलम् ॥ ३८ ॥ ततः समागमो घोरो बभूव सहसा तयोः । यथा देवासुरे युद्धे वृत्रवासवयोरभूत् ॥ ३९ ॥

इति कर्णपर्व्वणि चित्रवधे चतुर्द्दशोऽध्यायः ॥ १४ ॥

---

सञ्जय उवाच । भीमसेनं ततो द्रौणी राजन् विव्याध पत्रिणा । परया त्वरया युक्तो दर्शयन्नस्त्रलाघवम् ॥ १ ॥ तथैव पुनराजघ्ने नवत्या निशितैः शरैः । सर्वमर्माणि संप्रेक्ष्य मर्म्मज्ञो लघुहस्तवत् ॥ २ ॥ भीमसेनः समाकीर्णो द्रौणिना निशितैः शरैः । रराज समरे राजन्रश्मिमानिव भास्करः ॥ ३ ॥ ततः शरसहस्रेण सुप्रयुक्तेन पाण्डवः । द्रोणपुत्रमवच्छाद्य सिंहनाद-ममुञ्चत ॥ ४ ॥ शरैः शरांस्ततो द्रौणिः संवार्य्य युधि पाण्डवम् । ललाटेऽभ्यहनद्राजन् नाराचेन स्मयन्निव ॥ ५ ॥ ललाटस्थं ततो बाणं धारयामास पाण्डवः । यथा शृङ्गं वने दृप्तः खड्गो धारयते नृप ॥ ६ ॥ ततो द्रौणिं रणे भीमो यतमानं पराक्रमी । त्रिभिर्विव्याध नाराचैर्ललाटे विस्मयन्निव ॥ ७ ॥ ललाटस्थैस्ततो बाणैर्ब्राह्मणोऽसौ व्यशोभत । प्रावृषीव यथा सिक्तस्त्रिशृङ्गः पर्वतोत्तमः ॥ ८ ॥ ततः शरशतैर्द्रौणिरर्द्दयामास पाण्डवम् । न चैनं कम्पयामास मातरिश्वेव पर्वतम् ॥ ९ ॥ तथैव पाण्डवो युद्धे द्रौणिं शरशतैः शितैः । नाकम्पयत संहृष्टो वार्य्योघ इव पर्व-

तम् ॥ १० ॥ तावन्योन्यं शरैर्घोरैश्छादयानौ महारथौ। रथवर्य्यंगतौ वीरौ शुशुभाते वलोत्कटौ ॥ ११ ॥ आदित्याविव संदीप्तौ लोकत्रयकरावुभौ। खरश्मिभिरिवान्योऽन्यं तापयन्तौ शरोत्तमैः ॥ १२ ॥ ततः प्रतिकृते यत्नं कुर्व्वाणौ तौ महारणे। कृतप्रतिकृते यत्तौ शरसंघैरभीतवत् ॥ १३ ॥ व्याघ्राविव च संग्रामे चेरतुस्तौ नरोत्तमौ। शरदंष्ट्रौ दुराधर्षौ चापवक्त्रौ भयङ्करौ ॥ १४ ॥ अभूतां तावदृश्यौ च शरजालैः समन्ततः। मेघजालैरिवच्छन्नौ गगणे चन्द्रभास्करौ ॥ १५ ॥ चकाशेते मुहूर्त्तेन ततस्तावप्यरिन्दमौ। विमुक्तावभ्रजालेन अङ्गारकबुधाविव ॥१६॥ अथ तत्रैव संग्रामे वर्त्तमाने सुदारुणे। अपसव्यं ततश्चक्रे द्रौणिस्तत्र वृकोदरम् ॥ १७ ॥ किरञ्छरशतैरुग्रैर्द्धाराभिरिव पर्वतम्। न तु तन्ममृषे भीमः शत्रोर्विजयलक्षणम् ॥ १८ ॥ प्रतिचक्रे ततो राजन् पाण्डवोऽप्यपसव्यतः। मण्डलानां विभागेषु गतप्रत्यागतेषु च ॥ १९ ॥ वभूव तुमुलं युद्धं तयोः पुरुषसिंहयोः। चरित्वा विविधान् मार्गान् मण्डलस्थानमेव च ॥ २० ॥ शरैः पूर्णायतोत्सृष्टैरन्योऽन्यमभिजघ्नतुः। अन्योऽन्यस्य वधे चैव चक्रतुर्यत्नमुत्तमम्। ईषतुर्विरथञ्चैव कर्त्तुमन्योऽन्यमाहवे ॥ २१ ॥ ततो द्रौणिर्महास्त्राणि प्रादुश्चक्रे महारथः। तान्यस्त्रैरेव समरे प्रतिजघ्नेऽस्य पाण्डवः ॥ २२ ॥ ततो घोरं महाराज अस्त्रयुद्धमवर्त्तत। ग्रहयुद्धं यथा घोरं प्रजासंहरणे ह्यभूत् ॥ २३ ॥ ते वाणाः समसज्जन्त मुक्तास्ताभ्यान्तु भारत। द्योतयन्तो दिशः सर्व्वास्तव सैन्यं समन्ततः ॥ २४ ॥ वाणसंघैर्वृतं तं घोरमाकाशं समपद्यत। उल्कापातावृतं यद्वत् प्रजानां सङ्क्षये नृप ॥ २५ ॥ वाणाभिघातात् सञ्जज्ञे तत्र भारत पावकः। सविस्फुलिङ्गो दीप्तार्च्चिर्योऽदहद्वाहिनीद्वयम् ॥ २६ ॥ तत्र सिद्धा महाराज संप्रतन्तोऽब्रुवन् वचः। युद्धानामति सर्व्वेषां युद्धमेतदिति प्रभो ॥ २७ ॥ सर्व्वयुद्धानि

चैतस्य कलां नार्हन्ति षोड़शीम्। नेदृशञ्च पुनर्युद्धं भविष्यति कदाचन॥ २८॥ अहो ह्यनेन सम्पन्नावुभौ ब्राह्मणक्षत्रियौ। अहो शौर्य्येण संयुक्तावुभौ चोग्रपराक्रमौ॥ २९॥ अहो भीमबलो भीम एतस्य च कृतास्त्रता। अहो वीर्य्यस्य सारत्वमहो सौष्ठवमेतयोः॥ ३०॥ स्थितावेतौ हि समरे कालान्तकयमोपमौ। रुद्रौ द्वाविव संभूतौ यथा द्वाविव भास्करौ॥ ३१॥ यमौ वा पुरुषव्याघ्रौ घोररूपावुभौ रणे। इति वाचः स्म श्रूयन्ते सिद्धानां वै मुहुर्मुहुः। सिंहनादश्च सञ्जज्ञे समेतानां दिवौकसाम्॥ ३२॥ अद्भुतञ्चाप्यचिन्त्यञ्च दृष्ट्वा कर्म तयो रणे। सिद्धचारणसङ्घानां विस्मयः समपद्यत॥ ३३॥ प्रशंसन्ति तदा देवाः सिद्धाश्च परमर्षयः। साधु द्रोणे महावाहो साधु भीमेति चाब्रुवन्॥३४॥ तौ शूरौ समरे राजन् परस्परकृतागसौ। परस्परमुदीक्षेतां क्रोधप्रस्फुरिताधरौ। क्रोधात् संदष्टदशनौ तथैवदशनच्छदौ॥ ३६॥ अन्योऽन्यं छादयन्तौ स्म शरवृष्ट्या महारथौ। शराम्बुधारौ समरे शस्त्रविद्युत्प्रकाशिनौ॥ ३७॥ तावन्योऽन्यं ध्वजं विद्धा सारथिञ्च महारणे। अन्योऽन्यस्य हयान् विद्धा विभिदाते परस्परम्॥ ३८॥ ततः क्रुद्धौ महाराज वाणौ गृह्य महाहवे। उभौ चिक्षिपतुस्तूर्णमन्योऽन्यस्य वधैषिणौ॥ ३९॥ तौ सायकैर्महाराज द्योतमानौ चमूमुखे। आजघ्नाते समासाद्य वज्रवेगौ दुरासदौ॥ ४०॥ तौ परस्परवेगाच्च शराभ्याञ्च भृशाहतौ। निपेततुर्महावीर्य्यौ रथोपस्थे तयोस्तदा॥ ४१॥ ततस्तु सारथिर्ज्ञात्वा द्रोणपुत्रमचेतनम्। अपोवाह रणाद्राजन् सर्वसैन्यस्य पश्यतः॥ ४२॥ तथैव पाण्डवं राजन् विह्वलं तं मुहुर्मुहुः। अपोवाह रथेनाजौ सारथिः शत्रुतापनम्॥ ४३॥

इति कर्णपर्वणि अश्वत्थामभीमयुद्धे पञ्चदशोऽध्यायः॥ १५॥

---

धृतराष्ट्र उवाच। यथा संशप्तकैः सार्द्धमर्ज्जुनस्याभवद्रणम्। अन्येषाञ्च महीपानां पाण्डवैस्तद्ब्रवीहि मे॥ १॥ अश्वत्थाम्ना तु यद्युद्धमर्ज्जुनस्य च सञ्जय। अन्येषाञ्च महीपानां सह पार्थैर्ब्रवीहि मे॥ २॥

सञ्जय उवाच। शृणु राजन् यथावृत्तं संग्रामो ब्रुवतो मम। वीराणां शत्रुभिः सार्द्धं देहपाप्मप्रणाशनम्॥ ३॥ पार्थः संशप्तकबलं प्रविश्यार्णवसन्निभम्। व्यक्षोभयदमित्रघ्नो महावात इवार्णवम्॥ ४॥ शिरांस्युन्मथ्य वीराणां शितैर्भल्लैर्धनञ्जयः। पूर्णचन्द्राभवक्त्राणि स्वक्षिभ्रूदशनानि च। सन्तस्तार क्षितिं क्षिप्रं विनालैर्नलिनैरिव॥ ५॥ सुवृत्तानायतान् पुष्टांश्चन्दनागुरुरूषितान्। सायुधान् सतलत्राणान् पञ्चास्योरगसन्निभान्। बाहून् क्षुरैरमित्राणां चिच्छेद समरेऽर्ज्जुनः॥ ६॥ धुर्य्यान् धुर्य्यगतान् सूतान् ध्वजांश्चापानि सायकान्। पाणीनरत्नीनसकृत् भल्लैश्चिच्छेद पाण्डवः॥ ७॥ रथान् द्विपान् हयांश्चैव सारोहानर्ज्जुनो युधि। शरैरनेकसाहस्रैर्निन्ये राजन् यमक्षयम्॥ ८॥ तं प्रवीराः सुसंरब्धा नर्द्दमाना इवर्षभाः। वाशितार्थमिव क्रुद्धा हुं कृत्वा चाभिदुद्रुवुः॥ ९॥ निघ्नन्तमभिजघ्नुस्ते शरैः शृङ्गैरिवर्षभाः। तस्य तेषाञ्च तद्युद्धमभवल्लोमहर्षणम्। त्रैलोक्यविजये यद्दैत्यानां सह वज्रिणा॥ १०॥ अस्त्रैरस्त्राणि संवार्य्य द्विषतां सर्वतोऽर्ज्जुनः। इषुभिर्बहुभिस्तूर्णं विद्ध्वा प्राणान् जहार सः॥ ११॥ छिन्नत्रिवेणुचक्राक्षान् हतयोधाश्वसारथीन्। विध्वस्तायुधतूणीरान् समुन्मथितकेतनान्॥ १२॥ संछिन्नयोक्त्ररश्मीकान् विवरूथान् विकूवरान्। विस्रस्तबन्धुरयुगान् विस्रस्ताक्षप्रमण्डलान्॥ १३॥ रथान् विशकलीकुर्वन् महाभ्राणीव मारुतः। विस्मापयन् प्रेक्षणीयं द्विषतां भयवर्द्धनः। महारथसहस्रस्य समं कर्म्माकरोज्जयः॥ १४॥ सिद्धा देवर्षिसङ्घाश्च चारणाश्चापि तुष्टुवुः। देव

दुन्दुभयो नेदुः पुष्पवर्षाणि चापतन् । केशवार्जुनयोर्मूर्द्ध्नि प्राह वागशरीरिणी ॥ १५ ॥ चन्द्राग्न्यनिलसूर्य्याणां कान्तिदीप्तिबलद्युतीः । यौ सदा बिभ्रतौ वीराविभौ तौ केशवार्जुनौ ॥ १६ ॥ ब्रह्मेशानाविवाजेयौ वीरावेकरथे स्थितौ । सर्वभूतवरौ वीरौ नरनारायणाविभौ ॥ १७ ॥ इत्येतन्महदाश्चर्य्यं दृष्ट्वा श्रुत्वा च भारत । अश्वत्थामा सुसंयत्तः कृष्णावभ्यद्रवद्रणे ॥ १८ ॥ अथ पाण्डवमस्यन्तमित्रघ्नकरान् शरान् । सेषुणा पाणिनाहूय प्रहसन् द्रौणिरब्रवीत् ॥ १९ ॥ यदि मां मन्यसे वीर प्राप्तमर्हमिवातिथिम् । ततः सर्वात्मनाद्य त्वं युद्धातिथ्यं प्रयच्छ मे ॥ २० ॥ एवमाचार्य्यपुत्रेण समाहूतो युयुत्सया । बहु मेनेऽर्जुनोत्मानमिदञ्चाह जनार्द्दनम् ॥ २१ ॥ संशप्तकाश्च मे वध्या द्रौणिराह्वयते च माम् । यदत्रानन्तरं प्राप्तं शंस मे तद्धि माधव । आतिथ्यकर्माभ्युत्थाय दीयतां यदि मन्यसे ॥ २२ ॥ एवमुक्तोऽवहत् पार्थं कृष्णो द्रोणात्मजान्तिकम् । जैत्रेण विधिनाहूतं वायुरिन्द्रमिवाध्वरे ॥ २३ ॥ तमामन्त्र्यैकमनसं केशवो द्रौणिमब्रवीत् । अश्वत्थामन् स्थिरो भूत्वा प्रहराशु सहस्व च ॥ २४ ॥ निर्वेष्टुं भर्तृपिण्डं हि कालोऽयमुपजीविनाम् । सूक्ष्मो विवादो विप्राणां स्थूलौ क्षात्रौ जयाजयौ ॥ २५ ॥ यामभ्यर्थयसे मद्दाहिव्यां पार्थस्य सत्क्रियाम् । तामाप्तुमिच्छन् युध्यस्व स्थिरो भूत्वाद्य पाण्डवम् ॥ २६ ॥ इत्युक्तो वासुदेवेन तथेत्युक्त्वा द्विजोत्तमः । विव्याध केशवं षष्ट्या नाराचैरर्जुनं त्रिभिः ॥ २७ ॥ तस्यार्जुनः सुसंक्रुद्धस्त्रिभिर्बाणैः शरासनम् । चिच्छेद चान्यदादत्त द्रौणिर्घोरतरं धनुः ॥ २८ ॥ सज्यं कृत्वा निमेषाच्च विव्याधार्जुनकेशवौ । त्रिभिः शतैर्वासुदेवं सहस्रेण च पाण्डवम् ॥ २९ ॥ ततः शरसहस्राणि प्रयुतान्यर्बुदानि च । ससृजे द्रौणिरायस्तः संस्तभ्य च रणेऽर्जुनम् ॥ ३० ॥ इषुधेर्धनुषो ज्याया अङ्गुलिभ्यश्च मारिष । बाह्वोः कराभ्यामुरसो

वदनघ्राणनेत्रतः ॥ ३१ ॥ कर्णाभ्यां शिरसोऽङ्गेभ्यो लोमवर्म्मभ्य एव च । रथध्वजेभ्यश्च शरा निष्पेतुर्ब्रह्मवादिनः ॥ ३२ ॥ शरजालेन महता विद्ध्वा माधवपाण्डवौ । ननाद मुदितो द्रौणिर्म्महामेघौघनिस्वनम् ॥३३॥ तस्य तं निनदं श्रुत्वा पाण्डवोऽच्युतमब्रवीत् । पश्य माधव दौरात्म्यं गुरुपुत्रस्य मां प्रति ॥ ३४ ॥ वधं प्राप्तौ मन्यते नौ प्रवेश्य शरवेश्मनि । एषोऽस्मि हन्मि सङ्कल्पं शिक्षया च बलेन च ॥ ३५ ॥ अश्वत्थाम्नः शरानस्तांश्छित्त्वैकैकं त्रिभिस्त्रिभिः । व्यधमद्भरतश्रेष्ठो नीहारमिव भास्करः ॥ ३६ ॥ ततः संशप्तकान् भूयः साश्वसूतरथद्विपान् । ध्वजपत्तिरथान्युग्रैर्बाणैर्विव्याध पाण्डवः ॥ ३७ ॥ ये ये ददृशिरे तत्र यद्यद्रूपास्तदा जनाः । ते ते तत्र शरैर्व्याप्तं मेनिरेऽत्मानमात्मना ॥३८॥ ते गाण्डीवप्रमुक्तास्तु नानारूपाः पतत्रिणः । क्रोशे साग्रे स्थितान् घ्नन्ति द्विपाश्वपुरुषान्रणे ॥ ३९ ॥ भल्लैश्छिन्नाः कराः पेतुः करिणां मदवर्षिणाम् । यथा वने परशुभिर्निकृत्ताः सुमहाद्रुमाः ॥ ४० ॥ पश्चात्तु शैलवत् पेतुस्ते गजाः सहसादिभिः । वज्रिवज्रप्रमथिता यथैवाद्रिचयास्तथा ॥४१॥ गन्धर्व्वनगराकारान्रथांश्चापि सुकल्पितान् । विनीतैर्ज्जवनैर्युक्तानास्थितान् युद्धदुर्म्मदैः ॥ ४२ ॥ शरैर्विशकलीकुर्व्वन्नमित्रानभ्यवीवृषत् । स्वलंकृतानश्वसादीन् पत्तींश्चाहन् धनञ्जयः ॥ ४३ ॥ धनञ्जययुगान्तार्कः संशप्तकमहार्णवम् । व्यशोषयत दुःशोषं तीक्ष्णैः शरगभस्तिभिः ॥४४॥ पुनर्द्रौणिं महाशैलं नाराचैः सूर्य्यसन्निभैः । निर्बिभेद महावेगैस्त्वरन् वज्रीव पर्वतम् ॥४५॥ तमाचार्य्यसुतः क्रुद्धः साश्वयन्तारमाशुगैः । युयुत्सुरागमद्योद्धुं पार्थस्तानच्छिनच्छरान् ॥४६॥ ततः परमसंक्रुद्धः काण्डकोषानवासृजत् । अश्वत्थामाभिरूपाय गृहानतिथये यथा ॥४७॥ अथ संशप्तकांस्त्यक्त्वा पाण्डवो द्रौणिमभ्ययात् । अपाङ्क्तेयानिव त्यक्त्वा दाता पाङ्क्तेयमर्थिनम् ॥ ४८ ॥

इति कर्णपर्व्वणि अश्वत्थामार्ज्जुनयुद्धे षोड़शोऽध्यायः ॥ १६ ॥

सञ्जय उवाच। ततः समभवद्युद्धं शुक्राङ्गिरसवर्चसोः।
नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव॥ १॥ सन्तापयन्ता-
वन्योऽन्यं दीप्तैः शरगभस्तिभिः। लोकत्रासकरावास्तां विमार्गस्थौ
ग्रहाविव॥ २॥ ततोऽविध्यत् भ्रुवोर्मध्ये नाराचेनार्जुनो भृशम्।
स तेन विबभौ द्रौणिरूर्द्ध्वरश्मिर्यथा रविः॥ ३॥ अथ कृष्णौ
शरशतैरश्वत्थाम्नार्द्दितौ भृशम्। स्वरश्मिजालविकचौ युगा-
न्तार्काविवासतुः॥ ४॥ ततोऽर्जुनः सर्वतोधारमस्त्रमवासृजद्वासु-
देवेऽभिभूते। द्रौणायनिं चाभ्यहनत् पृषत्कैर्वज्राग्निवैवस्वतदण्ड-
कल्पैः॥ ५॥ स केशवञ्चार्जुनञ्चातितेजा विव्याध मर्मस्वतिरौद्र-
कर्मा। बाणैः सुमुक्तैरतितीव्रवेगैर्यैराहतो मृत्युरपि व्यथेत॥६॥
द्रौणेरिषूनर्जुनः संनिवार्य्य व्यायच्छतस्तद्द्विगुणैः सुपुङ्खैः। तं
साश्वसूतध्वजमेकवीरमावृत्य संशप्तकसैन्यमार्च्छत्॥ ७॥ धनूंषि
बाणानिषुधीर्धनुर्ज्याः पाणीन् भुजान् पाणिगतञ्च शस्त्रम्। छत्राणि
केतूंस्तुरगानथेषां वस्त्राणि माल्यानि च भूषणानि॥ ८॥ वर्माणि
चर्माणि मनोरमानि प्रियाणि सर्वाणि शिरांसि चैव। चिच्छेद
पार्थो द्विषतां सुमुक्तैर्बाणैः स्थितानामपराङ्मुखानाम्॥ ९॥ सुक-
ल्पिताः स्यन्दनवाजिनागाः समास्थिता यत्नकृतैर्नृवीरैः। पार्थे-
रितैर्बाणशतैर्निरस्तास्तैरेव सार्द्धं नृवरा निपेतुः॥ १०॥ पद्मार्क-
पूर्णेन्दुनिभाननानि किरीटमालामुकुटोत्कटानि। भल्लार्द्धचन्द्र-
क्षुरहिंसितानि प्रपेतुरुर्व्यां नृशिरांस्यजस्रम्॥ ११॥ अथ द्विपै-
र्दत्यरिपुद्विपाभैर्देवारिदर्पापहमत्युदग्रम्। कलिङ्गवङ्गाङ्गनिषाद-
वीरा जिघांसवः पाण्डवमभ्यधावन्॥ १२॥ तेषां द्विपानां निचकर्त्त
पार्थो वर्माणि मर्माणि करान् नियन्तॄन्। ध्वजाः पताकाश्च ततः
प्रपेतुर्वज्राहतानीव गिरेः शिरांसि॥ १३॥ तेषु प्रभग्नेषु गुरो-
स्तनूजं बाणैः किरीटी नवसूर्य्यवर्णैः। प्रच्छादयामास महाभ्र-
जालैर्वायुः समुद्यन्तमिवांशुमन्तम्॥ १४॥ ततोऽर्जुनेषूनिषुभि-

निरस्य द्रौणिः शरैरर्जुनवासुदेवौ। प्रच्छादयित्वा दिवि चन्द्र-
सूर्य्यौ ननाद सोऽम्भोद इवातपान्ते ॥ १५ ॥ तमर्जुनस्तांश्च पुन-
स्त्वदीयानभ्यर्द्दितस्तैरभिसृत्य शस्त्रैः। वाणान्धकारं सहसैव कृत्वा
विव्याध सर्व्वानिषुभिः सुपुङ्खैः ॥ १६ ॥ नाप्याददत् सन्दधन्नैव
मुञ्चन् वाणान्रणेऽदृश्यत सव्यसाची। हतांश्च नागांस्तुरगान् पदा-
तीन् संस्यूतदेहान् ददृशूरथांश्च ॥ १७ ॥ सन्धाय नाराचवरान्
दशाशु द्रौणिस्त्वरन्नेकमिवोत्ससर्ज्ज। तेषान्तु पञ्चार्जुनमभ्यविध्यन्
पञ्चाच्युतं निर्व्विभिदुः सुमुक्ताः ॥ १८ ॥ तैराहतौ सर्व्वमनुष्य-
मुख्यावसृक् क्षरन्तौ धनदेन्द्रकल्पौ। समाप्तविद्येन तथाभिभूतौ
हतौ रणे ताविति मेनिरेऽन्ये ॥ १९ ॥ अथार्ज्जुनं प्राह दशार्हनाथः
प्रमाद्यसे किं जहि योधमेतम्। कुर्य्याद्धि दोषं समुपेक्षितोऽयं
कष्टो भवेद्व्याधिरिवाक्रियावान्। तथेति चोक्त्वाच्युतमप्रमादी
द्रोणिं प्रयत्नादिषुभिस्ततक्ष ॥ २० ॥ भुजौ वरौ चन्दनसारदिग्धौ
वक्षः शिरोऽथाप्रतिमौ तथोरू। गाण्डीवमुक्तैः कुपितो विकर्णै-
र्द्रौणिं शरैः संयति निर्व्विभेद। छित्त्वा तु रश्मींस्तुरगानविध्यत्ते
तं रणादूहुरतीव दूरम् ॥ २१ ॥ स तैर्हृतो वातजवैस्तुरङ्गैर्द्रौणि-
र्दृढं पार्थशराभिभूतः। इयेष नावृत्य पुनस्तु योद्धुं पार्थेन सार्द्धं
मतिमान् विमृष्य ॥ २२ ॥ जानन् जयं नियतं वृष्णिवीरे धनञ्जये
चाङ्गिरसां वरिष्ठः। विवेश कर्णस्य बलं तरस्वी क्षीणोत्साहः
क्षीणवाणास्त्रयोगः ॥ २३ ॥ नियम्य तु हयान् द्रौणिः समाश्वस्य
च मारिष। रथाश्वनरसंवाधं कर्णस्य प्राविशद्बलम् ॥ २४ ॥
प्रतीपकामे तु रणादश्वत्थाम्नि हृते हयैः। मन्त्रौषधिक्रियायोगै-
र्व्याधौ देहादिवाहृते ॥ २५ ॥ संशप्तकानभिमुखौ प्रयातौ केशवा-
र्ज्जुनौ। वातोद्धूतपताकेन स्यन्दनेनौघनादिना ॥ २६ ॥

इति कर्णपर्व्वणि अश्वत्थामपराजये सप्तदशोऽध्यायः ॥ १७ ॥

सञ्जय उवाच। अथोत्तरेण पाण्डूनां सेनायां ध्वनिरुत्थितः।
रथनागाश्वपत्तीनां दण्डधारेण बध्यताम् ॥ १ ॥ निवर्त्तयित्वा तु
रथं केशवोऽर्जुनमब्रवीत्। वाहयन्नेव तुरगान् गरुड़ानिलरंहसः
॥ २ ॥ मागधोऽप्रतिविक्रान्तो द्विरदेन प्रमाथिना। भगदत्तादनन्तरः
शिक्षया च बलेन च ॥ ३ ॥ एनं हत्वा निहन्तासि पुनः
संशप्तकानिति। वाक्यान्ते प्रापयत् पार्थं दण्डधारान्तिकं प्रति
॥ ४ ॥ स मागधानां प्रवरोऽङ्कुशग्रहे ग्रहेष्वसह्यो विकचो यथा
ग्रहः। सपत्नसेनां प्रममाथ दारुणो महीं समग्रां विकचो यथा
ग्रहः ॥ ५ ॥ सुकल्पितं दानवनागसन्निभं महाभ्रनिर्ह्रादममित्र
मर्द्दनम्। रथाश्वमातङ्गगणान् सहस्रशः समास्थितो हन्ति शरैर्नरानपि ॥ ६ ॥ रथानधिष्ठाय सवाजिसारथीन्नरांश्च पादैर्द्विरदो
व्यपोथयत्। द्विपांश्च पद्भ्यां ममर्द्द करेण द्विपोत्तमो हन्ति च
कालचक्रवत् ॥ ७ ॥ नरांश्च कार्ष्णायसवर्मभूषणान् निपात्य
साश्वानपि पत्तिभिः सह। व्यपोथयद्दन्तिवरेण शुष्मिणा सशब्दवत् स्थूलनलं यथा तथा ॥ ८ ॥ अथार्जुनो ज्यातलनेमिनिस्वने
मृदङ्गभेरीबहुशङ्खनादिते। रथाश्वमातङ्गसहस्रसंकुले रथोत्तमेनाभ्यपतद्द्विपोत्तमम् ॥९॥ ततोऽर्जुनं द्वादशभिः शरोत्तमैर्जनार्द्दनं
षोड़शभिः समार्पयत्। स दण्डधारस्तुरगांस्त्रिभिस्त्रिभिस्ततो
ननाद प्रजहास चासकृत् ॥ १० ॥ ततोऽस्य पार्थः सगुणेषुकार्मुकं
चकर्त्त भल्लैर्ध्वजमप्यलङ्कृतम्। पुनर्नियन्तॄन् सहपादगोप्तॄंस्ततः
स चुक्रोध गिरिव्रजेश्वरः ॥ ११ ॥ ततोऽर्जुनं भिन्नकटेन दन्तिना
घनोपमेनानिलतुल्यरंहसा। अतीव चुक्षोभयिषुर्जनार्द्दनं धनञ्जयञ्चाभिजघान तोमरैः ॥ १२ ॥ अथास्य बाहू द्विपहस्तसन्निभौ
शिरश्च पूर्णेन्दुनिभाननं त्रिभिः। क्षुरैः प्रचिच्छेद सहैव पाण्डवस्ततो द्विपं बाणशतैः समार्पयत् ॥ १३ ॥ स पार्थबाणैस्तपनीयः
भूषणैः समावृतः काञ्चनवर्मभृद्द्विपः। तथा चकाशे निशि पर्वतो

यथा दावाग्निना प्रज्वलितौषधिद्रुमः ॥ १४ ॥ स वेदनार्त्तोऽम्बुद-निस्वनो नदंश्चलन् भ्रमन् प्रस्खलितान्तरो द्रवन् । पपात रुग्नः सनियन्तृकस्तदा यथा गिरिर्वज्रविदारितस्तथा ॥ १५ ॥ हिमा-वदातेन सुवर्णमालिना हिमाद्रिकूटप्रतिमेन दन्तिना । हते रणे भ्रातरि दण्ड आव्रजज्जिघांसुरिन्द्रावरजं धनञ्जयम् ॥ १६ ॥ स तोमरैरर्ककरप्रभैस्त्रिभिर्जनार्द्दनं पञ्चभिरर्जुनं शितैः । समर्पयित्वा विननाद नर्द्दयंस्ततोऽस्य बाहू विचकर्त्त पाण्डवः ॥ १७ ॥ क्षुर-प्रकृत्तौ सुभृशं सतोमरौ शुभाङ्गदौ चन्दनरूषितौ भुजौ । गजात् पतन्तौ युगपद्विरेजतुर्यथाद्रिशृङ्गाद्रुचिरौ महोरगौ ॥१८॥ तथार्द्ध-चन्द्रेण हृतं किरीटिना पपात दण्डस्य शिरः क्षितिं द्विपात् । स्वशोणिताद्रं निपतद्विरेजे दिवाकरोऽस्तादिव पश्चिमां दिशम् ॥ १९ ॥ अथ द्विपं श्वेतवराभ्रसन्निभं दिवाकरांशुप्रतिमैः शरो-त्तमैः । बिभेद पार्थः स पपात नादयन् हिमाद्रिकूटं कुलिशाहतं यथा ॥ २० ॥ ततोऽपरे तत्प्रतिमा गजोत्तमा जिगीषवः संयति सव्यसाचिना । तथाकृतान्ते च यथैव तौ द्विपौ ततः प्रभग्नं सुमहद्रिपोर्बलम् ॥ २१ ॥ गजा रथाश्वाः पुरुषाश्च सङ्घशः पर-स्परघ्नाः परिपेतुराहवे । परस्परं प्रस्खलिताः समाहता भृशं निपेतुर्बहुभाषिणो हताः ॥२२॥ अथार्ज्जुनं स्वे परिवार्य्य सैनिकाः पुरन्दरं देवगणा इवाब्रुवन् । अभैष्म यस्मान्मरणादिव प्रजाः स वीर दिष्ट्या निहतस्त्वया रिपुः ॥ २३ ॥ न चेदरक्षिष्य इमान् जनान् भयाद्विषद्भिरेवं बलिभिः प्रपीड़ितान् । तथाभविष्यद्विषतां प्रमोदनं यथा हतेष्वेष्विह नोऽरिसूदन ॥ २४ ॥ इतीव भूयश्च सुहृद्भिरीरिता निशम्य वाचः सुमनास्ततोऽर्ज्जुनः । यथानुरूपं प्रतिपूज्य तं जनं जगाम संशप्तकसङ्घहा पुनः ॥ २५ ॥

इति कर्णपर्व्वणि दण्डधारबधे अष्टादशोऽध्यायः ॥ १८ ॥

सञ्जय उवाच । प्रत्यागत्य पुनर्जिष्णुर्जघ्ने संशप्तकान् बहून् ।
वक्रातिवक्रगमनादङ्गारक इव ग्रहः ॥ १ ॥ पार्थवाणहता राज-
न्नराश्वरथकुञ्जराः । विचेलुर्बभ्रमुर्नेशुः पेतुर्मम्लुश्च भारत ॥ २ ॥
धुर्य्यान् धुर्य्यगतान् सूतान् ध्वजांश्चापानि सायकान् । पाणीन्
पाणिगतं शस्त्रं बाहूनपि शिरांसि च ॥ ३ ॥ भल्लैः क्षुरैरर्द्धचन्द्रै-
र्वत्सदन्तैश्च पाण्डवः । चिच्छेदामित्रवीराणां समरे प्रतियुध्यताम्
॥ ४ ॥ वाशितार्थे युयुत्सन्तो वृषभा वृषभं यथा । निपतन्त्यर्ज्जुनं
शूराः शतशोऽथ सहस्रशः ॥ ५ ॥ तेषां तस्य च तद्युद्धमभवल्लोम-
हर्षणम् । त्रैलोक्यविजये यादृग्दैत्यानां सह वज्रिणा ॥ ६ ॥
तमविध्यत् त्रिभिर्वाणैर्द्दन्दशूकैरिवाहिभिः । उग्रायुधसुतस्तस्य
शिरः कायादपाहरत् ॥ ७ ॥ तेऽर्ज्जुनं सर्वतः क्रुद्धा नानाशस्त्रै-
रवीवृषन् । मरुद्भिः प्रेषिता मेघा हिमवन्तमिवोष्णगे ॥ ८ ॥
अस्त्रैरस्त्राणि संवार्य्य द्विषतां सर्वतोऽर्ज्जुनः । सम्यगस्तैः शरैः
सर्वानहितानहनद्बहून् ॥ ९ ॥ छिन्नत्रिवेणुसङ्घातान् हताश्व-
पार्ष्णिसारथीन् । विध्वस्तायुधतूणीरान् विचक्ररथकेतनान् ॥१०॥
संछिन्नरश्मियोक्त्राक्षान् व्यनुकर्षयुगान्रथान् । विध्वस्तसर्वसन्नाहान्
बाणैश्चक्रेऽर्ज्जुनस्तदा ॥ ११ ॥ ते रथास्तत्र विध्वस्ताः परार्द्ध्या
भान्त्यनेकशः । धनिनामिव वेश्मानि हतान्यग्न्यनिलाम्बुभिः ॥१२॥
द्विपाः सम्भिन्नवर्म्माणो वज्राशनिसमैः शरैः । पेतुर्गिर्य्यग्रवेश्मानि
वज्रपाताग्निभिर्यथा ॥ १३ ॥ सारोहास्तुरगाः पेतुर्बहवोऽर्ज्जुन-
ताड़िताः । निर्जिह्वान्त्राः क्षितौ क्षीणाः रुधिरार्द्राः सुदुर्द्दशः
॥ १४ ॥ नराश्वनागा नाराचैः संस्यूताः सव्यसाचिना । बभ्रमु-
श्चस्खलुः पेतुर्नेदुर्मम्लुश्च मारिष ॥ १५ ॥ अनेकैश्च शिलाधौतै-
र्वज्राशनिविषोपमैः । शरैर्निजघ्निवान् पार्थो महेन्द्र इव दानवान्
॥ १६ ॥ महार्हवर्म्माभरणा नानारूपा वरायुधाः । सरथाः
सध्वजा वीरा हताः पार्थेन शेरते ॥ १७ ॥ विजिताः पुण्यकर्म्माणो

विशिष्टाभिजनश्रुताः । गताः शरीरैर्वसुधामूर्ज्जितैः कर्मभिर्द्दिवम्
॥ १८ ॥ अथार्जुनं रथवरं त्वदीयाः समभिद्रवन् । नानाजन-
पदाध्यक्षाः सगणा जातमन्यवः ॥ १९ ॥ उह्यमाना रथाश्वेभैः
पत्तयश्च जिघांसवः । समाभ्यधावन्नस्यन्तो विविधं क्षिप्रमायुधम्
॥ २० ॥ तदायुधमहावर्षं सृष्टं योधमहाम्बुदैः । व्यधमन्निशि-
तैर्बाणैः क्षिप्रमर्ज्जुनमारुतः ॥ २१ ॥ साश्वपत्तिद्विपरथं महा-
शस्त्रौघसप्लवम् । ददृशुः सन्तितीर्षन्तं महाशस्त्रास्त्रसेतुना ॥२२॥
अथाब्रवीद्वासुदेवः पार्थं किं क्रीड़सेऽनघ । संशप्तकान् प्रमथ्यैतान्
ततः कर्णवधे त्वर ॥ २३ ॥ तथेत्युक्त्वार्ज्जुनः कृष्णं शिष्टान् सं-
शप्तकांस्तदा । आक्षिप्य शस्त्रेण बलात् दैत्यानिन्द्र इवावधीत् ॥२४॥
आददत् सन्दधन्नेषून् दृष्टः कैश्चिद्रणेऽर्ज्जुनः । विमुञ्चन् वा शरान्
शीघ्रं दृश्यतेऽवहितैरपि ॥ २५ ॥ आश्चर्य्यमिति गोविन्दः सम-
मन्यत भारत । हंसांशुगौरास्ते सेनां हंसाः सर इवाविशन् ॥२६॥
ततः संग्रामभूमिन्तु वर्त्तमाने जनक्षये । अवेक्षमाणो गोविन्दः
सव्यसाचिनमब्रवीत् ॥ २७ ॥ एष पार्थ महारौद्रो वर्त्तते भरत
क्षयः । पृथिव्यां पार्थिवानां वै दुर्य्योधनकृते महान् ॥ २८ ॥
पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम् । महतामपविद्धानि
कलापानिषुधींस्तथा ॥ २९ ॥ जातरूपमयैः पुङ्खैः शरांश्चानत-
पर्व्वणः । तैलधौतांश्च नाराचान् निर्म्मुक्तानिव पन्नगान् ॥ ३० ॥
आकीर्णांस्तोमरांश्चापि विचित्रान् हेमभूषितान् । वर्माणि चाप-
विद्धानि रुक्मपृष्ठानि भारत ॥ ३१ ॥ सुवर्णविकृतान् प्रासान्
शक्तीः कनकभूषिताः । जाम्बुनदमयैः पट्टैर्बद्धाश्च विपुला गदाः
॥ ३२ ॥ जातरूपमयीश्चर्ष्टीः पट्टिशान् हेमभूषितान् । दण्डैः
कनकचित्रैश्च विप्रविद्धान् परश्वधान् ॥ ३३ ॥ परिघान् भिन्दि-
पालांश्च भुषण्डीः कणयानपि । अयःकुन्तांश्च पतितान मुषलानि
गुरूणि च ॥ ३४ ॥ नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः ।

जीवन्त इव दृश्यन्ते गतसत्त्वास्तरस्विनः ॥ ३५ ॥ गदाविमर्दितै-
र्गात्रैर्मुषलैर्भिन्नमस्तकान्। गजवाजिरथैः क्षुण्णान् पश्य योधान्
सहस्रशः ॥३६॥ मनुष्यगजवाजीनां शरशक्त्यृष्टितोमरैः। निस्त्रिंशैः
पट्टिशैः प्रासैर्नखरैर्लगुडैरपि ॥ ३७ ॥ शरीरैर्बहुधाच्छिन्नैः
शोणितौघपरिप्लुतैः। गतासुभिरमित्रघ्न संवृता रणभूमयः ॥३८॥
बाहुभिश्चन्दनादिग्धैः साङ्गदैः शुभलक्षणैः। सतलत्रैः सकेयूरै-
र्भाति भारत मेदिनी ॥ ३९ ॥ साङ्गुलित्रैर्भुजाग्रैश्च विप्रविद्धै-
रलंकृतैः। हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम्। बद्ध-
चूड़ामणिवरैः शिरोभिश्च सकुण्डलैः ॥ ४० ॥ रथांश्च बहुधा
भग्नान् हेमकिङ्किणिनः शुभान्। अश्वांश्च बहुधा पश्य शोणितेन
परिप्लुतान्। अनुकर्षानुपासङ्गान् पताका विविधान् ध्वजान् ॥४१॥
योधानाञ्च महासङ्खान् पाण्डरांश्च प्रकीर्णकान्। निरस्तजिह्वा-
न्मातङ्गान् शयानान् पर्वतोपमान् ॥ ४२ ॥ वैजयन्तीर्विचित्रांश्च
हतांश्च गजयोधिनः। वारणानां परिस्तोमान् सुयुक्तानेककम्बलान्
॥ ४३ ॥ विपाटिता विचित्राश्च रूपचित्राः कुथास्तथा। भिन्नाश्च
बहुधा घण्टाः पतद्भिश्चूर्णिता गजैः ॥ ४४ ॥ वैदूर्यमणिदण्डांश्च
पतितांश्चाङ्कुशान् भुवि। अश्वानाञ्च युगापीड़ान् रत्नचित्रानुर-
श्छदान्। बद्धाः सदिध्वजाग्रेषु सुवर्णविकृताः कुथाः ॥ ४५ ॥
विचित्रान् मणिचित्रांश्च जातरूपपरिष्कृतान्। अश्वास्तरपरि-
स्तोमान् राङ्कवान् पतितान् भुवि ॥ ४६ ॥ चूड़ामणीन् नरेन्द्राणां
विचित्राः काञ्चनस्रजः। छत्राणि चापविद्धानि चामरव्यजनानि च
॥ ४७ ॥ चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः। कॢप्तश्मश्रुभिरा-
कीर्णां पूर्णचन्द्रनिभैर्महीम् ॥४८॥ कुमुदोत्पलपद्मानां षण्डैः फुल्लं
यथा सरः। तथा मही स्तृता वक्त्रैः कुमुदोत्पलसन्निभैः ॥ ४९ ॥
तारागणविचित्रस्य निर्म्मलेन्दुद्युतित्विषः। पश्येमां नभसस्तुल्यां
शरन्नक्षत्रमालिनीम् ॥५०॥ एतत्तवैवानुरूपं कर्म्मार्ज्जुन महाहवे।

दिवि वा देवराजस्य त्वया यत् कृतमद्य वै ॥५१॥ एवं तां दर्शयन् कृष्णो युद्धभूमिं किरीटिने। गच्छन्नेवाशृणोत् शब्दं दुर्य्योधनबले महत् ॥ ५२ ॥ शङ्खदुन्दुभिनिर्घोषं भेरीपटहनिस्वनम्। रथाश्वगजनादांश्च शस्त्रशब्दांश्च दारुणान् ॥ ५३ ॥ प्रविश्य तद्बलं कृष्णस्तुरगैर्वातवेगितैः। पाण्ड्येनाभ्यर्द्दितं सैन्यं त्वदीयं वीक्ष्य विष्ठितः ॥ ५४ ॥ स हि नानाविधैर्बाणैरिष्वस्त्रप्रवरो युधि। न्यहनद्द्विषतां पूगान् गतासूनन्तको यथा ॥ ५५ ॥ गजवाजिमनुष्याणां शरीराणि शितैः शरैः। भित्त्वा प्रहरतां श्रेष्ठो विदेहासूनपातयत् ॥ ५६ ॥ शत्रुप्रवीरैरस्तानि नानाशस्त्राणि सायकैः। छित्त्वा तानवधीत् शत्रून् पाण्ड्यः शक्र इवासुरान् ॥ ५७ ॥

इति कर्णपर्व्वणि सङ्कुलयुद्धे एकोनविंशोऽध्यायः ॥ १९ ॥

---

धृतराष्ट्र उवाच। प्रोक्तस्त्वया पूर्व्वमेव प्रवीरो लोकविश्रुतः। न त्वस्य कर्म्म संग्रामे त्वया सञ्जय कीर्त्तितम् ॥ १ ॥ तस्य विस्तरशो ब्रूहि प्रवीरस्याद्य विक्रमम्। शिक्षां प्रभावं वीर्य्यञ्च प्रमाणं दर्पमेव च ॥ २ ॥

सञ्जय उवाच। भीष्मद्रोणकृपद्रौणिकर्णार्ज्जुनजनार्द्दनान्। समाप्तविद्यान् धनुषि श्रेष्ठान् यान्मन्यसे रथान् ॥ ३ ॥ यो ह्याक्षिपति वीर्य्येण सर्व्वानेतान्महारथान्। न मेने चात्मना तुल्यं कञ्चिदेव जनेश्वरम् ॥ ४ ॥ तुल्यतां कर्णभीष्माभ्यामात्मनो यो न मृष्यते। वासुदेवार्ज्जुनाभ्याञ्च न्यूनतां नैच्छदात्मनि ॥ ५ ॥ स पाण्ड्यो नृपतिश्रेष्ठः सर्व्वशस्त्रभृताम्वरः। कर्णस्यानीकमहनत् पराभूत इवान्तकः ॥ ६ ॥ तदुदीर्णरथाश्वञ्च पत्तिप्रवरसङ्कुलम्। कुलालचक्रवत् भ्रान्तं पाण्ड्येनाभ्याहतं बलम् ॥ ७ ॥ व्यश्वसूतध्वजरथं विप्रविद्धायुधद्विपम्। सम्यगस्तैः शरैः पाण्ड्यो वायु-

र्मेघानिवाक्षिपत् ॥ ८ ॥ द्विरदान् द्विरदारोहान् विपताकायुध-
ध्वजान् । सपादरक्षानहनत् वज्रेणाद्रीनिवाद्रिहा ॥ ९ ॥ स
शक्तिप्रासतूणीरानश्वारोहान् हयानपि । पुलिन्दखसवाह्लीका-
न्निषादान्धकतङ्गणान् ॥ १० ॥ दाक्षिणात्यांश्च भोजांश्च शूरान्
संग्रामकर्कशान् । विशस्त्रकवचान् बाणैः कृत्वा चैवाकरोदसून्
॥ ११ ॥ चतुरङ्गबलं बाणैर्निघ्नन्तं पाण्ड्यमाहवे । दृष्ट्वा द्रौणि-
रसंभ्रान्तमसम्भ्रान्तस्ततोऽभ्ययात् ॥ १२ ॥ आभाष्य चैनं मधुर-
मानृत्यन्तमभीतवत् । प्राह प्रहरतां श्रेष्ठः स्मितपूर्वं समाह्वयन्
॥ १३ ॥ राजन् कमलपत्राक्ष विशिष्टाभिजनश्रुत । वज्रसंहनन-
प्रख्य प्रख्यातबलपौरुष ॥ १४ ॥ मुष्टिश्लिष्टायतज्यञ्च व्यायताभ्यां
दधद्धनुः । दोर्भ्यां विस्फारयन् भासि महाजलदवत् शुभम् ॥ १५ ॥
शरवर्षैर्महावेगैरमित्रानभिवर्षतः । मदन्यं नानुपश्यामि प्रतिवीरं
तवाहवे ॥ १६ ॥ रथद्विरदपत्त्यश्वानेकः प्रमथसे बहून् । मृग-
सङ्घानिवारण्ये विभीर्भीमबलो हरिः ॥ १७ ॥ महता रथघोषेण
दिवं भूमिञ्च नादयन् । वर्षान्ते शस्यहा मेघो भासि ह्लादीव
पार्थिव ॥ १८ ॥ संस्पृशानः शरांस्तीक्ष्णांस्तूणादाशीविषोपमान् ।
मयैवैकेन युध्यस्व त्र्यम्बकेनान्धको यथा ॥ १९ ॥ एवमुक्तस्तथे-
त्युक्त्वा प्रहरेति च ताड़ितः । कर्णिना द्रोणतनयं विव्याध मलय-
ध्वजः ॥ २० ॥ मर्मभेदिभिरत्युग्रैर्बाणैरग्निशिखोपमैः । स्मय-
न्नभ्यहनद्द्रौणिः पाण्ड्यमाचार्य्यसत्तमः ॥ २१ ॥ ततोऽपरान् सुती-
क्ष्णाग्रान् नाराचान्मर्मभेदिनः । गत्या दशम्या संयुक्तानश्वत्थामा-
प्यवासृजत् ॥ २२ ॥ तान् शराणच्छिनत् पाण्ड्यो नवभिर्निशितैः
शरैः । चतुर्भिरार्दयच्चाश्वानाशु ते व्यसवोऽभवन् ॥ २३ ॥ अथ
द्रोणसुतस्येषूंस्तांश्छित्त्वा निशितैः शरैः । धनुर्ज्यां विततां पाण्ड्य-
श्चिच्छेदादित्यतेजसः ॥ २४ ॥ विज्यं धनुरथाधिज्यं कृत्वा द्रौणि-
रमित्रहा । प्रेक्ष्य चाशु रथे युक्तान् नरैरन्यान् हयोत्तमान् ॥ २५ ॥

ततः शरसहस्राणि प्रेषयामास वै द्विजः। द्रुमसंबाधमाकाश-
मकरोद्दिश एव च ॥ २६ ॥ ततस्तानस्यतः सर्वान् द्रौणेर्बाणा-
न्महात्मनः। जानानोऽप्यस्त्रयान् पाण्ड्योऽशातयत् पुरुषर्षभ ॥२७॥
प्रयुक्तांस्तान् प्रयत्नेन छित्त्वा द्रौणेरिषूनरिः। चक्ररक्षौ रणे
तस्य प्राणदन्निशितैः शरैः ॥ २८ ॥ अथारेर्लाघवं दृष्ट्वा मण्डली-
कृतकार्मुकः। प्रास्यद्द्रोणसुतो बाणान् वृष्टिं पूषानुजो यथा
॥ २९ ॥ अष्टावष्टगवान्यूहुः शकटानि यदायुधम्। अह्नस्तदष्ट-
भागेन द्रौणिश्चिक्षेप मारिष ॥ ३० ॥ तदन्तकमिव क्रुद्धमन्तक-
स्यान्तकोपमम्। ये ये ददृशिरे तत्र विसंज्ञाः प्रायशोऽभवन्।
॥ ३१ ॥ पर्ज्जन्य इव घर्मान्ते वृष्ट्या साद्रिद्रुमां महीम्। आचार्य्य-
पुत्रस्तां सेनां बाणवृष्ट्याभ्यवीवृषत् ॥ ३२ ॥ द्रौणिपर्ज्जन्यमुक्तां
तां बाणवृष्टिं सुदुःसहाम्। वायव्यास्त्रेण सङ्क्षिप्य मुदा पाण्ड्या-
निलोऽनदत् ॥ ३३ ॥ तस्य नानदतः केतुं चन्दनागुरुरूषितम्।
मलयप्रतिमं द्रौणिश्छित्त्वाश्वांश्चतुरोऽहनत् ॥ ३४ ॥ सूतमेकेषुणा
हत्वा महाजलदनिस्वनम्। धनुश्छित्त्वार्द्धचन्द्रेण तिलशो व्यधम-
द्रथम् ॥ ३५ ॥ अस्त्रैरस्त्राणि संवार्य्य छित्त्वा सर्वायुधानि च।
प्राप्तमप्यहितं द्रौणिर्न जघान रणेप्सया ॥ ३६ ॥ एतस्मिन्नन्तरे
कर्णो गजानीकमुपाद्रवत्। द्रावयामास स तदा पाण्डवानां महद्-
बलम् ॥ ३७ ॥ विरथान्रथिनश्चक्रे गजानश्वांश्च भारत। योधान्
बहुभिरानर्च्छत् शरैः सन्नतपर्वभिः ॥ ३८ ॥ अथ द्रौणिर्महेष्वासः
पाण्ड्यं शत्रुनिवर्हणम्। विरथं रथिनां श्रेष्ठं नाहनद्युद्धकाङ्क्षया
॥ ३९ ॥ हतेश्वरो दन्तिवरः सुकल्पितस्त्वराभिसृष्टः प्रतिशब्दगो
बली। तमाद्रवद्द्रौणिशराहतस्त्वरन् जवेन कृत्वा प्रतिहस्ति-
गर्ज्जितम् ॥ ४० ॥ समागतं वारणयुद्धकोविदो द्विपोत्तमं पर्वत-
सानुसन्निभम्। तमभ्यतिष्ठन्मलयध्वजस्त्वरन् यथाद्रिशृङ्गं हरि-
रुन्नदंस्तथा ॥ ४१ ॥ स तोमरं भास्कररश्मिवर्च्चसं बलास्त्रसर्गो-

त्तमयत्नमन्युभिः । ससर्ज्ज शीघ्रं परिपीडयन् गजं गुरोः सुता-
याद्रिपतीश्वरो नदन् ॥ ४२ ॥ मणिप्रवेकोत्तमवज्रहाटकैरलं-
कृतं चांशुकमाल्यमौक्तिकैः । हतो हतोऽसीत्यसकृन्मुदा नदन्
पराभिनद्द्रौणिवराङ्गभूषणम् ॥ ४३ ॥ तदर्कचन्द्रग्रहपावकत्विषं
भृशाभिपातात् पतितं विचूर्णितम् । महेन्द्रवज्राभिहतं महास्वनं
यथाद्रिशृङ्गं धरणीतले तथा ॥ ४४ ॥ ततः प्रजज्वाल परेण
मन्युना पदाहतो नागपतिर्यथा तथा । समाददे चान्तकदण्ड-
सन्निभानिषूनमित्रार्त्तिकरांश्चतुर्द्दश ॥ ४५ ॥ द्विपस्य पादाग्रकरान्
स पञ्चभिर्नृपस्य बाहू च शिरोऽथ च त्रिभिः । जघान षड्भिः
षडुत्तमत्विषः स पाण्ड्यराजानुचरान्महारथान् ॥ ४६ ॥ सुदीर्घ-
वृत्तौ वरचन्दनोचितौ सुवर्णमुक्तामणिवज्रभूषणौ । भुजौ धरायां
पतितौ नृपस्य तौ विचेष्टतुस्तार्क्ष्यहताविवोरगौ ॥ ४७ ॥ शिरश्च
तत् पूर्णशशिप्रभाननं सरोषताम्रायतनेत्रमुन्नसम् । क्षिताविपि
भ्राजति तत् सकुण्डलं विशाखयोर्मध्यगतः शशी यथा ॥ ४८ ॥
स तु द्विपः पञ्चभिरुत्तमेषुभिः कृतः षडंशश्चतुरो नृपस्त्रिभिः ।
कृतो दशांशः कुशलेन युध्यता यथा हविस्तद्दशदैवतं तथा ॥ ४९ ॥
स पादशो राक्षसभोजनान् बहून् प्रदाय पाण्ड्योऽश्वमनुष्यकुञ्ज-
रान् । स्वधामिवाप्य ज्वलनः पितृप्रियस्ततः प्रशान्तः सलिल-
प्रवाहितः ॥ ५० ॥ समाप्तविद्यन्तु गुरोः सुतं नृपः समाप्तकर्माण-
मुपेत्य ते सुतः । सुहृद्वृतोऽत्यर्थमपूजयन्मुदा जिते बलौ विष्णु-
मिवामरेश्वरः ॥ ५१ ॥

इति कर्णपर्वणि पाण्ड्यवधे विंशतितमोऽध्यायः ॥ २० ॥

---

धृतराष्ट्र उवाच । पाण्ड्ये हते किमकरोदर्जुनो युधि सञ्जय ।
एकवीरेण कर्णेन द्रावितेषु परेषु च ॥ १ ॥ समाप्तविद्यो बलवान्

युक्तो वीरः स पाण्डवः। सर्व्वभूतेष्वनुज्ञातः शङ्करेण महात्मना
॥ २ ॥ तस्मान्महद्भयं तीव्रममित्रघ्नाद्धनञ्जयात्। स यत्तदा-
करोत् पार्थस्तन्ममाचक्ष्व सञ्जय ॥ ३ ॥

सञ्जय उवाच। हते पाण्ड्येऽर्जुनं कृष्णस्त्वरन्नाह वचो
हितम्। पश्यामि नाहं राजानमपयातांश्च पाण्डवान् ॥ ४ ॥
निवृत्तैश्च पुनः पार्थैर्भग्नं शत्रुबलं महत्। अश्वत्थाम्नश्च सङ्कल्पा-
द्धताः कर्णेन सृञ्जयाः ॥ ५ ॥ तथाश्वरथनागानां कृतञ्च कदनं
महत्। सर्व्वमाख्यातवान् वीरो वासुदेवः किरीटिने ॥ ६ ॥
एतच्छ्रुत्वा च दृष्ट्वा च भ्रातुर्घोरं महद्भयम्। वाहयाश्वान् हृषी-
केश क्षिप्रमित्याह पाण्डवः ॥ ७ ॥ ततः प्रायात् हृषीकेशो रथे
नाप्रतियोधिना। दारुणश्च पुनस्तत्र प्रादुरासीत् समागमः ॥ ८ ॥
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः। भीमसेनमुखाः पार्थाः
सूतपुत्रमुखा वयम् ॥ ९ ॥ ततः प्रववृते भूयः संग्रामो राज-
सत्तम। कर्णस्य पाण्डवानाञ्च यमराष्ट्रविवर्द्धनः ॥ १० ॥ धनूंषि
बाणान् परिघानसितोमरपट्टिशान्। मुषलानि भुशुण्डीश्च स-
शक्त्यृष्टिपरश्वधान् ॥ ११ ॥ गदाः प्रासान् शितान् कुन्तान् भिन्दि-
पालांस्तथाङ्कुशान्। प्रगृह्य क्षिप्रमापेतुः परस्परजिघांसया ॥१२॥
बाणज्यातलशब्देन द्यां दिशः प्रविशो वियत्। पृथिवीं नेमि-
घोषेण नादयन्तोऽभ्ययुः परान् ॥ १३ ॥ तेन शब्देन महता
संहृष्टाश्चक्रुराहवम्। वीरा वीरैर्महाघोरं कलहान्तं तितीषवः
॥ १४ ॥ ज्यातलत्रधनुःशब्दः कुञ्जराणाञ्च बृंहताम्। पादा-
तानाञ्च पततां नृणां नादो महानभूत् ॥ १५ ॥ बाणशब्दांश्च
विविधान् शूराणाञ्चाभिगर्ज्जताम्। श्रुत्वा तत्र भृशं त्रेसुः पेतु-
र्म्लुश्च सैनिकाः ॥ १६ ॥ तेषां निनदताञ्चैव शस्त्रवर्षञ्च मुञ्चताम्।
बहूनाधिरथिर्वीरः प्रममाथेषुभिः परान् ॥ १७ ॥ पञ्च पञ्चाल-
वीराणां रथान् दश च पञ्च च। साश्वसूतध्वजान् कर्णः शरै-

र्निन्ये यमक्षयम् ॥ १८ ॥ योधमुख्या महावीर्य्याः पाण्डूनां कर्ण-
माहवे। शीघ्रास्त्रा दिवमावृत्य परिवव्रुः समन्ततः ॥ १९ ॥
ततः कर्णो द्विषत्सेनां शरवर्षैर्विलोड़यन्। विजगाहाण्डजा-
कीर्णां पद्मिनीमिव यूथपः ॥ २० ॥ द्विषन्मध्यमवस्कन्द्य राधेयो
धनुरुत्तमम्। विधुन्वानः शितैर्बाणैः शिरांस्युन्मथ्य पातयन् ॥२१॥
चर्मवर्माणि संछिन्नान्यपतन् भुवि देहिनाम्। विषेहुर्नास्य संस्पर्शं
द्वितीयस्य पतत्त्रिणः ॥ २२ ॥ वर्मदेहासुमथनैर्धनुषः प्रच्युतैः शरैः।
मौर्व्या तलत्रेऽभ्यहनत् कशया वाजिनो यथा ॥ २३ ॥ पाण्डु-
सृञ्जयपाञ्चालान् शरगोचरमागतान्। ममर्द्द तरसा कर्णः सिंहो
मृगगणानिव ॥ २४ ॥ ततः पाञ्चालराजश्च द्रौपदेयाश्च मारिष।
यमौ च युयुधानश्च सहिताः कर्णमभ्ययुः ॥ २५ ॥ तेषु व्यायच्छ-
मानेषु कुरुपाञ्चालपाण्डुषु। प्रियानसून् रणे त्यक्त्वा योधा जघ्नुः
परस्परम् ॥ २६ ॥ सुसन्नद्धाः कवचिनः सशिरस्त्राणभूषणाः।
गदाभिर्मुषलैश्चान्यैः परिघैश्च महाबलाः ॥ २७ ॥ समभ्यधावन्त
भृशं कालदण्डैरिवोद्यतैः। नर्द्दन्तश्चाह्वयन्तश्च प्रवल्गन्तश्च मारिष
॥ २८ ॥ ततो निजघ्नुरन्योऽन्यं पेतुश्चान्योऽन्यताड़िताः। वमन्तो
रुधिरं गात्रैर्विमस्तिष्केक्षणा युधि ॥ २९ ॥ दन्तपूर्णैः सरुधिरै-
र्वक्त्रैर्दाड़िमसन्निभैः। जीवन्त इव चाप्येके तस्थुः शस्त्रोप-
बृंहिताः ॥ ३० ॥ परश्वधैश्चाप्यपरे पट्टिशैरसिभिस्तथा। शक्ति-
भिर्भिन्दिपालैश्च नखरप्रासतोमरैः ॥ ३१ ॥ ततक्षुश्चिच्छिदुश्चान्ये
विभिदुश्चिक्षिपुस्तथा। सञ्चकर्त्तुश्च जघ्नुश्च क्रुद्धा रणमहार्णवे ॥३२॥
पेतुरन्योन्यनिहता व्यसवो रुधिरोक्षिताः। क्षरन्तः सुरसं रक्तं
प्रकृत्ताश्चन्दना इव ॥ ३३ ॥ रथै रथा विनिहता हस्तिभिश्चापि
हस्तिनः। नरैर्नरा हताः पेतुरश्वाश्चाश्वैः सहस्रशः ॥ ३४ ॥
ध्वजाः शिरांसि छत्राणि द्विपहस्ता नृणां भुजाः। क्षुरैर्भल्लार्द्ध-
चन्द्रैश्च छिन्नाः पेतुर्महीतले ॥ ३५ ॥ नरांश्च नागान् सरथान्

हयान् ममृदुराहवे। अश्वारोहैर्हताः शूराश्छिन्नहस्ताश्च दन्तिनः ॥ ३६ ॥ सपताका ध्वजाः पेतुर्विशीर्णा इव पर्वताः। पत्तिभिश्च समाप्लुत्य द्विरदाः स्यन्दनास्तथा ॥ ३७ ॥ हताश्च हन्यमानाश्च पतिताश्चैव सर्वशः। अश्वारोहाः समासाद्य त्वरिताः पत्तिभिर्हताः ॥ ३८ ॥ सादिभिः पत्तिसङ्घाश्च निहता युधि शेरते। मृदितानीव पद्मानि प्रम्लाना इव च स्रजः ॥ ३९ ॥ हतानां वदनान्यासन् गात्राणि च महाहवे। रूपाण्यत्यर्थकान्तानि द्विरदाश्वनृणां नृप। समुन्नानीव वस्त्राणि ययुर्दुर्दृशतां पराम् ॥ ४० ॥

इति कर्णपर्वणि सङ्कुलयुद्धे एकविंशोऽध्यायः ॥ २१ ॥

---

सञ्जय उवाच। हस्तिभिस्तु महामात्रास्तव पुत्रेण चोदिताः। धृष्टद्युम्नं जिघांसन्तः क्रुद्धाः पार्षतमभ्ययुः ॥ १ ॥ प्राच्याश्च दाक्षिणात्याश्च प्रवरा गजयोधिनः। अङ्गा वङ्गाश्च पुण्ड्राश्च मागधास्ताम्रलिप्तकाः ॥ २ ॥ मेकलाः कोशला मद्रा दशार्णा निषधास्तथा। गजयुद्धेषु कुशलाः कलिङ्गैः सह भारत ॥ ३ ॥ शरतोमरनाराचैर्वृष्टिमन्त इवाम्बुदाः। सिषिचुस्ते ततः सर्वं पाञ्चालबलमाहवे ॥ ४ ॥ तान् सिमर्द्दयिषून् नागान् पार्ष्ण्यङ्गुष्ठाङ्कुशैर्भृशम्। चोदितान् पार्षतो बाणैर्नाराचैरभ्यवीवृषत् ॥ ५ ॥ एकैकः दशभिः षड्भिरष्टभिरपि भारत। द्विरदानभिविव्याध शितैर्गिरिनिभान् शरैः ॥ ६ ॥ प्रच्छाद्यमानं द्विरदैर्मेघैरिव दिवाकरम्। प्रययुः पाण्डुपाञ्चाला नदन्तो निशितायुधाः ॥ ७ ॥ तान्नागानभिवर्षन्तो ज्यातन्त्रीतलनादितैः। वीरनृत्यं प्रनृत्यन्तस्तलतालप्रणादितैः ॥ ८ ॥ नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः। सात्यकिश्च शिखण्डी च चेकितानश्च वीर्य्यवान्। समन्तात् सिषिचुर्वीरा मेघास्तोयैरिवाचलान् ९॥ ते म्लेच्छैः प्रेषिता

नागा नरानश्वान्रथानपि। हस्तैराक्षिप्य ममृदुः पद्भिश्चाप्यतिमन्यवः॥ १०॥ बिभिदुश्च विषाणाग्रैः समाक्षिप्य च चिक्षिपुः। विषाणलग्नाश्चाप्यन्ये परिपेतुर्विभीषणाः॥ ११॥ प्रमुखे वर्त्तमानन्तु द्विपं वङ्गस्य सात्यकिः। नाराचेनोग्रवेगेन भित्त्वा मर्म्मण्यपातयत्॥ १२॥ तस्यावर्जितकायस्य द्विरदादुत्पतिष्यतः। नाराचेनाहनद्वक्षः सात्यकिः सोऽपतद्भुवि॥ १३॥ पुण्ड्रस्यापततो नागं चलन्तमिव पर्वतम्। सहदेवः प्रयत्नास्तैर्नाराचैरहनत्त्रिभिः॥ १४॥ विपताकं वियन्तारं विवर्मध्वजजीवितम्। तं कृत्वा द्विरदं भूयः सहदेवोऽङ्गमभ्ययात्॥ १५॥ सहदेवन्तु नकुलो वारयित्वाङ्गमार्द्दयत्। नाराचैर्यमदण्डाभैस्त्रिभिर्नागं शतेन च॥ १६॥ दिवाकरकरप्रख्यानङ्गश्चिक्षेप तोमरान्। नकुलाय शतान्यष्टौ त्रिधैकैकन्तु सोऽच्छिनत्॥ १७॥ तथार्द्धचन्द्रेण शिरस्तस्य चिच्छेद पाण्डवः। स पपात हतो म्लेच्छस्तेनैव सह दन्तिना॥ १८॥ अथाङ्गपुत्रेण निहते हस्तिशिक्षाविशारदे। अङ्गाः क्रुद्धा महामात्रा नागैर्नकुलमभ्ययुः॥ १९॥ चलत्पताकैः सुमुखैर्हेमकक्षातनुच्छदैः। मिमर्द्दिषन्तस्त्वरिताः प्रदीप्तैरिव पर्वतैः॥२०॥ मेकलोत्कलकालिङ्गा निषधास्ताम्रलिप्तकाः। शरतोमरवर्षाणि विमुञ्चन्तो जिघांसवः॥ २१॥ तैश्छाद्यमानं नकुलं दिवाकरमिवाम्बुदैः। परिपेतुः सुसंरब्धाः पाण्डुपाञ्चालसोमकाः॥ २२॥ ततस्तदभवद्युद्धं रथिनां हस्तिभिः सह। सृजतां शरवर्षाणि तोमरांश्च सहस्रशः॥ २३॥ नागानां प्रास्फुटन् कुम्भा मर्म्माणि विविधानि च। दन्ताश्चैवातिविद्धानां नाराचैर्भूषणानि च॥२४॥ तेषामष्टौ महानागांश्चतुःषष्ट्या सुतेजनैः। सहदेवो जघानाशु तेऽपतन् सह सादिभिः॥ २५॥ अञ्जोगतिभिरायम्य प्रयत्नाद्धनुरुत्तमम्। नाराचैरहनन्नागान्नकुलः कुलनन्दनः॥ २६॥ ततः पाञ्चाल्यशैनेयौ द्रौपदेयाः प्रभद्रकाः। शिखण्डी च महानागान्

सिषिचुः शरवृष्टिभिः ॥ २७ ॥ ते पाण्डुयोधाम्बुधरैः शत्रुद्विरद-
पर्वताः । वाणवर्षैर्हताः पेतुर्वज्रवर्षैरिवाचलाः ॥ २८ ॥ एवं
हत्वा तव गजांस्ते पाण्डुरथकुञ्जराः । द्रुतां सेनामवैक्षन्त भिन्न-
कूलामिवापगाम् ॥ २९ ॥ तां ते सेनां समालोड्य पाण्डुपुत्रस्य
सैनिकाः । विक्षोभयित्वा च पुनः कर्णं समभिदुद्रुवुः ॥ ३० ॥

इति कर्णपर्वणि सङ्कुलयुद्धे द्वाविंशोऽध्यायः ॥ २२ ॥

---

सञ्जय उवाच । सहदेवं तथाक्रुद्धं दहन्तं तव वाहिनीम् ।
दुःशासनो महाराज भ्राता भ्रातरमभ्ययात् ॥ १ ॥ तौ समेतौ
महायुद्धे दृष्ट्वा तव महारथाः । सिंहनादरवांश्चक्रुर्वासांस्या-
दुधुवुश्च ह ॥ २ ॥ ततो भारत क्रुद्धेन तव पुत्रेण धन्विना ।
पाण्डुपुत्रस्त्रिभिर्वाणैर्वक्षस्यभिहतो बली ॥ ३ ॥ सहदेवस्ततो
राजन् नाराचेन तवात्मजम् । विद्ध्वा विव्याध सप्तत्या सारथिञ्च
त्रिभिः शरैः ॥ ४ ॥ दुःशासनस्ततश्चापं छित्त्वा राजन् महाहवे ।
सहदेवं त्रिसप्तत्या बाह्वोरुरसि चार्पयत् ॥ ५ ॥ सहदेवस्तु
संक्रुद्धः खड्गं गृह्य महाहवे । आविध्य प्रासृजत्तूर्णं तव पुत्र-
रथं प्रति ॥ ६ ॥ समार्गणगुणं चापं छित्त्वा तस्य महानसिः ।
निपपात ततो भूमौ च्युतः सर्प इवाम्बरात् ॥ ७ ॥ अथान्यद्धनु-
रादाय सहदेवः प्रतापवान् । दुःशासनाय चिक्षेप वाणमन्तकरं
ततः ॥ ८ ॥ तमापतन्तं विशिखं यमदण्डोपमत्विषम् । खड्गेन
शितधारेण द्विधा चिच्छेद कौरवः ॥ ९ ॥ ततस्तं निशितं खड्ग-
माविध्य युधि सत्वरः । धनुश्चान्यत् समादाय शरं जग्राह वीर्य्य-
वान् ॥ १० ॥ तमापतन्तं सहसा निस्त्रिंशं निशितैः शरैः ।
पातयामास समरे सहदेवो हसन्निव ॥ ११ ॥ ततो वाणांश्चतुः-
षष्टिं तव पुत्रो महारणे । सहदेवरथे तूर्णं प्रेषयामास भारत

॥ १२ ॥ तान् शरान् समरे राजन् वेगेनापततो बहून् । एकैकं पञ्चभिर्बाणैः सहदेवो न्यकृन्तत ॥ १३ ॥ स निवार्य्य महाबाणांस्तव पुत्रेण प्रेषितान् । अथास्मै सुबहून् बाणान् प्रेषयामास संयुगे ॥ १४ ॥ तान् बाणांस्तव पुत्रोऽपि छित्त्वैकैकं त्रिभिः शरैः । ननाद सुमहानादं नादयानो वसुन्धराम् ॥ १५ ॥ ततो दुःशासनो राजन् विद्धा पाण्डुसुतं रणे । सारथिं नवभिर्बाणैर्माद्रेयस्य समार्पयत् ॥ १६ ॥ ततः क्रुद्धो महाराज सहदेवः प्रतापवान् । समाधत्त शरं घोरं मृत्युकालान्तकोपमम् । विकृष्य बलवच्चापं तव पुत्राय सोऽसृजत् ॥ १७ ॥ स तं निर्भिद्य वेगेन भित्त्वा च कवचं महत् । प्राविशद्धरणीं राजन् वल्मीकमिव पन्नगः । ततः स मुमुहे राजंस्तव पुत्रो महारथः ॥ १८ ॥ मूढञ्चैनं समालोक्य सारथिस्त्वरितो रथम् । अपोवाह भृशं त्रस्तो बध्यमानः शितैः शरैः ॥ १९ ॥ पराजित्य रणे तन्तु कौरव्यं पाण्डुनन्दनः । दुर्य्योधनबलं दृष्ट्वा प्रममाथ समन्ततः ॥ २० ॥ पिपीलिकपुटं राजन् यथा मृद्नन्नरो रुषा । तथा सा कौरवी सेना मृदिता तेन भारत ॥ २१ ॥

इति कर्णपर्व्वणि सहदेवदुःशासनयुद्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

---

सञ्जय उवाच । नकुलं रभसं युद्धे द्रावयन्तं वरूथिनीम् । कर्णो वैकर्त्तनो राजन् वारयामास वै रुषा ॥ १ ॥ नकुलस्तु ततः कर्णं प्रहसन्निदमब्रवीत् । चिरस्य बत दृष्टोऽहं दैवतैः सौम्यचक्षुषा ॥ २ ॥ यस्य मे त्वं रणे पाप चक्षुर्विषयमागतः । त्वं हि मूलमनर्थानां वैरस्य कलहस्य च ॥ ३ ॥ त्वद्दोषात् कुरवः क्षीणाः समासाद्य परस्परम् । त्वामद्य समरे हत्वा कृतकृत्योऽस्मि विज्वरः ॥ ४ ॥ एवमुक्तः प्रत्युवाच नकुलं सूतनन्दनः । सदृशं

राजपुत्रस्य धन्विनश्च विशेषतः ॥ ५ ॥ प्रहरस्व च मे वीर पश्याम-
स्तव पौरुषम् । कर्म कृत्वा रणे शूर ततः कथितुमर्हसि ॥ ६ ॥
अनुक्त्वा समरे तात शूरा युध्यन्ति शक्तितः । स युध्यस्व मया
शक्त्या हनिष्ये दर्पमेव ते ॥ ७ ॥ इत्युक्त्वा प्राहरत्तूर्णं पाण्डुपुत्राय
सूतजः । विव्याध चैनं समरे त्रिसप्तत्या शिलीमुखैः ॥ ८ ॥
नकुलस्तु ततो विद्धः सूतपुत्रेण भारत । अशीत्याशीविषप्रख्यैः
सूतपुत्रमविध्यत ॥ ९ ॥ तस्य कर्णो धनुश्छित्त्वा स्वर्णपुङ्खैः शिला-
शितैः । त्रिंशता परमेष्वासः शरैः पाण्डवमार्द्दयत् ॥ १० ॥ ते
तस्य कवचं भित्त्वा पपुः शोणितमाहवे । आशीविषा यथा नागा
भित्त्वा गां सलिलं पपुः ॥ ११ ॥ अथान्यद्धनुरादाय हेमपृष्ठं
दुरासदम् । कर्णं विव्याध विंशत्या सारथिञ्च त्रिभिः शरैः ॥१२॥
ततः क्रुद्धो महाराज नकुलः परवीरहा । क्षुरप्रेण सुतीक्ष्णेन
कर्णस्य धनुराच्छिनत् ॥ १३ ॥ अथैनं छिन्नधन्वानं सायकानां
शतैस्त्रिभिः । आजघ्ने प्रहसन् वीरः सर्व्वलोकमहारथम् ॥ १४ ॥
कर्णमभ्यर्द्दितं दृष्ट्वा पाण्डुपुत्रेण मारिष । विस्मयं परमं जग्मू
रथिनः सह दैवतैः ॥ १५ ॥ अथान्यद्धनुरादाय कर्णो वैकर्त्तन-
स्तदा । नकुलं पञ्चभिर्बाणैर्जत्रुदेशे समार्पयत् ॥ १६ ॥ ततस्थे-
रथ बाणैस्तैर्माद्रीपुत्रो व्यशोभत । स्वरश्मिभिरिवादित्यो भुवने
विसृजन् प्रभाम् ॥ १७ ॥ नकुलस्तु ततः कर्णं विद्ध्वा सप्तभि-
राशुगैः । अथास्य धनुषः कोटिं पुनश्चिच्छेद मारिष ॥ १८ ॥
सोऽन्यत् कार्मुकमादाय समरे वेगवत्तरम् । नकुलस्य ततो बाणैः
समन्ताद्दारयद्दिशः ॥ १९ ॥ संछाद्यमानः सहसा कर्णचापच्युतैः
शरैः । चिच्छेद स शरांस्तूर्णं शरैरेव महारथः ॥ २० ॥ ततो
बाणमयं जालं विततं व्योम्नि दृश्यते । खद्योतानामिव व्रातैः
संपतद्भिर्यथा नभः ॥ २१ ॥ तैर्विमुक्तैः शरशतैश्छादितं गगणं
तदा । शलभानां यथाव्रातैस्तद्वदासीद्विशाम्पते ॥ २२ ॥ ते शरा

हेमविकृताः सम्पतन्तो मुहुर्मुहुः। श्रेणीकृता व्यकाशन्त क्रौञ्चाः श्रेणी कृता इव॥२३॥ वाणजालावृते व्योम्नि छादिते च दिवाकरे। न स्म सम्पतते भूम्यां किञ्चिदप्यन्तरीक्षगम्॥२४॥ निरुद्धे तत्र मार्गे च शरसङ्घैः समन्ततः। व्यरोचतां महात्मानौ कालसूर्य्याविवोदितौ॥२५॥ कर्णचापच्युतैर्वाणैर्वध्यमानास्तु सोमकाः। अवालीयन्त राजेन्द्र वेदनार्त्ता भृशार्द्दिताः॥२६॥ नकुलस्य तथा वाणैर्हन्यमाना चमूस्तव। व्यशीर्य्यत दिशो राजन् वातनुन्ना इवाम्बुदाः॥२८॥ ते सेने हन्यमाने तु ताभ्यां दिव्यैर्महाशरैः। शरपातमपक्रम्य तस्थतुः प्रेक्षिके इव॥२८॥ प्रोत्सारिते जने तस्मिन् कर्णपाण्डवयोः शरैः। अविध्येतां महात्मानावन्योऽन्यं शरवृष्टिभिः॥२९॥ विदर्शयन्तौ दिव्यानि शस्त्राणि रणमूर्द्धनि। छादयन्तौ च सहसा परस्परवधैषिणौ॥३०॥ नकुलेन शरा मुक्ताः कङ्कवर्हिणवाससः। सूतपुत्रमवच्छाद्य व्यतिष्ठन्त इवाम्बरे॥३१॥ तथैव सूतपुत्रेण प्रेषिताः परमाहवे। पाण्डुपुत्रमवच्छाद्य व्यतिष्ठन्ताम्बरे शराः॥३२॥ शरवेश्मप्रविष्टौ तौ ददृशाते न कैश्चन। सूर्य्याचन्द्रमसौ राजंश्छाद्यमानौ घनैरिव॥३३॥ ततः क्रुद्धो रणे कर्णः कृत्वा घोरतरं वपुः। पाण्डवं छादयामास समन्ताच्छरवृष्टिभिः॥३४॥ सोऽतिच्छन्नो महाराज सूतपुत्रेण पाण्डवः। न चकार व्यथां राजन् भास्करो जलदैर्यथा॥३५॥ ततः प्रहस्याधिरथिः शरजालानि मारिष। प्रेषयामास समरे शतशोऽथ सहस्रशः॥३६॥ एकच्छायमभूत् सर्वं तस्य वाणैर्महात्मनः। अभ्रच्छायेव सञ्जज्ञे सम्पतद्भिः शरोत्तमैः॥३७॥ ततः कर्णो महाराज धनुश्छित्त्वा महात्मनः। सारथिं पातयामास रथनीड़ाद्धसन्निव॥३८॥ ततोऽश्वांश्चतुरश्चास्य चतुर्भिर्निशितैः शरैः। यमस्य भवनं तूर्णं प्रेषयामास भारत॥३९॥ अथास्य तं रथं दिव्यं तिलशो व्यध-

मच्छरैः। पताकां चक्ररचांश्च गदां खड्गञ्च मारिष। शत-
चन्द्रञ्च तच्चर्म सर्व्वोपकरणानि च ॥ ४० ॥ हताश्वो विरथश्चैव
विचर्म्मा च विशाम्पते। अवतीर्य्य रथात्तूर्णं परिघं गृह्य विष्ठितः
॥ ४१ ॥ तमुद्यतं महाघोरं परिघं तस्य सूतजः। व्यहनत्
सायकै राजन् सुतीक्ष्णैर्भारसाधनैः ॥ ४२ ॥ व्यायुधञ्चैवमालक्ष्य
शरैः सन्नतपर्व्वभिः। अर्द्दयद्बहुभिः कर्णो न चैनं समपीड़यत् ॥४३॥
स हन्यमानः समरे कृतास्त्रेण बलीयसा। प्राद्रवत् सहसा राजन्
नकुलो व्याकुलेन्द्रियः ॥ ४४ ॥ तमनुद्रुत्य राधेयः प्रहसन् वै
पुनः पुनः। सज्यमस्य धनुः कण्ठे व्यपासृजत भारत ॥ ४५ ॥
ततः स शुशुभे राजन् कण्ठासक्तमहाधनुः। परिवेशमनुप्राप्तो
यथा स्याद्व्योम्नि चन्द्रमाः। यथैव चासितो मेघः शक्रचापेन
शोभितः ॥ ४६ ॥ तमब्रवीत्ततः कर्णो व्यर्थं व्याहृतवानसि।
वदेदानीं पुनर्हृष्टो वध्यमानः पुनः पुनः ॥ ४७ ॥ मा योत्सीः
कुरुभिः सार्द्धं बलवद्भिश्च पाण्डव। सदृशैस्तात युध्यस्व व्रीड़ां मा
कुरु पाण्डव ॥ ४८ ॥ गृहं वा गच्छ माद्रेय यत्र वा कृष्ण-
फाल्गुनौ। एवमुक्त्वा महाराज व्यसर्ज्जयत तं तदा ॥ ४९ ॥
बधप्राप्तन्तु तं शूरो नाहनद्धर्म्मवित्तदा। स्मृत्वा कुन्त्या वचो राजं-
स्तत एनं व्यसर्ज्जयत् ॥ ५० ॥ विसृष्टः पाण्डवो राजन् सूतपुत्रेण
धन्विना। व्रीड़न्निव जगामाथ युधिष्ठिररथं प्रति ॥ ५१ ॥
आरुरोह रथञ्चापि सूतपुत्रप्रतापितः। निश्वसन् दुःखसन्तप्तः
कुम्भस्थ इव पन्नगः ॥ ५२ ॥ तं विजित्याथ कर्णोऽपि पाञ्चालां-
स्त्वरितो ययौ। रथेनातिपताकेन चन्द्रवर्णहयेन च ॥ ५३ ॥
तत्राक्रन्दो महानासीत् पाण्डवानां विशाम्पते। दृष्ट्वा सेनापतिं
यान्तं पाञ्चालानां रथव्रजान् ॥ ५४ ॥ तत्राकरोन्महाराज कदनं
सूतनन्दनः। मध्यं प्राप्ते दिनकरे चक्रवद्विचरन् प्रभुः ॥ ५५ ॥
भग्नचक्रै रथैः कैश्चित् छिन्नध्वजपताकिभिः। हताश्वैर्हतसूतैश्च

प्रभग्नाश्चैव मारिष ॥ ५६ ॥ म्रियमाणानपश्याम पाञ्चालानां
रथव्रजान्। तत्र तत्र च संभ्रान्ता विचेरुरथ कुञ्जराः ॥ ५७ ॥
दावाग्निपरिदग्धाङ्गा यथैव सुमहावने। भिन्नकुम्भार्द्ररुधिरा-
श्छिन्नहस्ताश्च वारणाः ॥ ५८ ॥ छिन्नगात्रावराश्चैव छिन्नवालाश्च
मारिष। छिन्नाभ्राणीव संपेतुर्हन्यमाना महात्मना ॥ ५९ ॥
अपरे त्रासिता नागा राधेयशरतोमरैः। तमेवाभिमुखा जग्मुः
शलभा इव पावकम् ॥ ६० ॥ अपरे निष्टनन्तश्च व्यदृश्यन्त महा-
द्विपाः। क्षरन्तः शोणितं गात्रैर्नगा इव जलस्रवाः ॥ ६१ ॥
उरश्छदैर्विमुक्तांश्च वालवर्म्मैश्च वाजिनः। राजतैश्च तथा कांस्यैः
सौवर्णैश्चैव भूषणैः ॥ ६२ ॥ हीनांश्चाभरणैश्चैव खलीनैश्च विव-
र्ज्जितान्। चामरैश्च कुथाभिश्च तूणीरैः पतितैरपि ॥ ६३ ॥
निहतैः सादिभिश्चैव शूरैराहवशोभितैः। अपश्याम रणे तत्र
भ्राम्यमाणान् हयोत्तमान् ॥ ६४ ॥ प्रासैः खड्गैश्च संस्यूता-
नृष्टिभिश्चापि भारत। हययोधानपश्याम कञ्चुकोष्णीषधारिणः
॥ ६५ ॥ निहतान् वध्यमानांश्च वेपमानांश्च भारत। नानाङ्गा-
वयवैर्हीनांस्तत्र तत्रैव भारत ॥ ६६ ॥ रथान् हेमपरिष्कारान्
संयुक्तान् जवनैर्हयैः। भ्राम्यमाणानपश्याम हतेषु रथिषु द्रुतम्
॥ ६७ ॥ भग्नाक्षकूवरान् कांश्चित् भग्नचक्रांश्च भारत। विपताक-
ध्वजांश्चान्यांश्छिन्नेषादण्डवन्धुरान् ॥ ६८ ॥ विहीनान्रथिनस्तत्र
धावमानान् समन्ततः। सूतपुत्रशरैस्तप्तानपश्याम विशाम्पते।
विशस्त्रांश्च तथैवान्यान् सशस्त्रांश्च हतान् बहून् ॥ ६९ ॥ तारका-
जालसंछन्नान् वरघण्टाविशोभितान्। नानावर्णविचित्राभिः पता-
काभिरलंकृतान्। वारणानन्वपश्याम धावमानान् समन्ततः ॥७०॥
शिरांसि बाहूनूरूंश्च छिन्नानन्यांस्तथैव च। कर्णचापच्युतैर्बाणै-
रपश्याम समन्ततः ॥ ७१ ॥ महान् व्यतिकरो रौद्रो योधाना-
मन्वपद्यत। कर्णसायकनुन्नानां युध्यताञ्च शितैः शरैः ॥ ७२ ॥

ते बध्यमानाः समरे सूतपुत्रेण सृञ्जयाः । तमेवाभिमुखं यान्ति पतङ्गा इव पावकम् ॥ ७३ ॥ तं दहन्तमनीकानि तत्र तत्र महारथम् । क्षत्रिया वर्ज्जयामासुर्युगान्ताग्निमिवोल्बणम् ॥ ७४ ॥ हतशेषास्तु ये वीराः पाञ्चालानां महारथाः । तान् प्रभग्नान् द्रुतान् वीरः पृष्ठतो विकिरञ्छरैः । अभ्यधावत तेजस्वी विशीर्णकवचध्वजान् ॥ ७५ ॥ तापयामास तान् वाणैः सूतपुत्रो महाबलः । मध्यं दिनमनुप्राप्तो भूतानीव तमोनुदः ॥ ७६ ॥

इति कर्णपर्वणि कर्णपराक्रमे चतुर्विंशोऽध्यायः ॥ २४ ॥

---

सञ्जय उवाच । युयुत्सुं तव पुत्रस्य द्रावयन्तं बलं महत् । उलूकोऽभ्यपतत्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १ ॥ युयुत्सुश्च ततो राजन् शितधारेण पत्रिणा । उलूकं ताड़यामास वज्रेणेव महाचलम् ॥ २ ॥ उलूकस्तु ततः क्रुद्धस्तव पुत्रस्य संयुगे । क्षुरप्रेण धनुश्छित्त्वा ताड़यामास कर्णिना ॥ ३ ॥ तदपास्य धनुश्छिन्नं युयुत्सुर्वेगवत्तरम् । अन्यदादत्त सुमहच्चापं संरक्तलोचनः ॥ ४ ॥ उलूकन्तु ततः षष्ट्या विव्याध भरतर्षभ । सारथिं त्रिभिरानर्च्छत् तञ्च भूयोऽप्यविध्यत ॥ ५ ॥ उलूकस्तन्तु विंशत्या विद्ध्वा स्वर्णविभूषितैः । अथास्य समरे क्रुद्धो ध्वजं चिच्छेद काञ्चनम् ॥६॥ स छिन्नयष्टिः सुमहान् शीर्य्यमाणो महाध्वजः । पपात प्रमुखे राजन् युयुत्सोः काञ्चनध्वजः ॥ ७ ॥ ध्वजमुन्मथितं दृष्ट्वा युयुत्सुः क्रोधमूर्च्छितः । उलूकं पञ्चभिर्वाणैराजघान स्तनान्तरे ॥ ८ ॥ उलूकस्तस्य समरे तैलधौतेन मारिष । शिरश्चिच्छेद भल्लेन यन्तुर्भरतसत्तम ॥ ९ ॥ जघान चतुरोऽश्वांश्च तञ्च विव्याध पञ्चभिः । सोऽतिविद्धो बलवता प्रत्यपायाद्रथान्तरम् ॥ १० ॥ तं निर्जित्य रणे राजन्नुलूकस्त्वरितो ययौ । पाञ्चालान् सृञ्जयांश्चैव विनिघ्न-

न्निशितैः शरैः ॥ ११ ॥ शतानीकं महाराज श्रुतकर्मा सुतस्तव। व्यश्वसूतरथञ्चक्रे निमेषार्द्धादसम्भ्रमः ॥ १२ ॥ हताश्वे तु रथे तिष्ठन् शतानीको महारथः। गदां चिक्षेप संक्रुद्धस्तव पुत्रस्य मारिष ॥ १३ ॥ सा कृत्वा स्यन्दनं भस्म हयांश्चैव ससारथीन्। पपात धरणीं तूर्णं दारयन्तीव भारत ॥ १४ ॥ तावुभौ विरथौ वीरौ कुरूणां कीर्त्तिवर्द्धनौ। व्यपाक्रमेतां युद्धात्तु प्रेक्षमाणौ परस्परम् ॥ १५ ॥ पुत्रस्तु तव सम्भ्रान्तो विविंशो रथमाविशत्। शतानीकोऽपि त्वरितः प्रतिविन्ध्यरथं गतः ॥ १६ ॥ सुतसोमन्तु शकुनिर्विद्ध्वा सुनिशितैः शरैः। नाकम्पयत संक्रुद्धो वार्य्यौघ इव पर्वतम् ॥ १७ ॥ सुतसोमस्तु तं दृष्ट्वा पितुरत्यन्तवैरिणम्। शरैरनेकसाहस्रैश्छादयामास भारत ॥ १८ ॥ तान् शरान् शकुनिस्तूर्णं चिच्छेदान्यैः पतत्त्रिभिः। लघ्वस्त्रश्चित्रयोधी च जितकाशी च संयुगी ॥ १९ ॥ निवार्य्य समरे चापि शरांस्तान्निशितैः शरैः। आजघान सुसंक्रुद्धः सुतसोमं त्रिभिः शरैः ॥ २० ॥ तस्याश्वान् केतनं सूतं तिलशो व्यधमच्छरैः। श्यालस्तव महाराज तत उच्चुक्रुशुर्ज्जनाः ॥ २१ ॥ हताश्वो विरथश्चैव छिन्नकेतुश्च मारिष। धन्वी धनुर्द्धरं गृह्य रथाद्भूमावतिष्ठत ॥ २२ ॥ व्यसृजत् सायकांश्चैव स्वर्णपुङ्खान् शिलाशितान्। छादयामास समरे तव श्यालस्य तं रथम् ॥ २३ ॥ शलभानामिव व्रातान् शरव्रातान्महारथः। रथोपगान् समीक्ष्यैवं विव्यथे नैव सौवलः। प्रममाथ शरांस्तांस्तु शरव्रातैर्महायशाः ॥ २४ ॥ तत्रातुष्यन्त योधाश्च सिद्धाश्चापि दिवि स्थिताः। सुतसोमस्य तत् कर्म दृष्ट्वाश्रद्धेयमद्भुतम्। रथस्थं शकुनिं यस्तु पदातिः समयोधयत् ॥ २५ ॥ तस्य तीक्ष्णैर्महावेगैर्भल्लैः सन्नतपर्वभिः। व्यहनत् कार्मुकं राजंस्तूणीरांश्चैव सर्वशः ॥ २६ ॥ स छिन्नधन्वा विरथः खड्गमुद्यम्य चानदत्। वैदूर्य्योत्पलवर्णाभं हस्तिदन्तमयत्सरुम् ॥ २७ ॥ भ्राम्यमाणं तत-

स्तन्तु विमलाम्बरवर्च्चसम् । कालदण्डोपमं मेने सुतसोमस्य धीमतः ॥ २८ ॥ सोऽचरत् सहसा खड्गी मण्डलानि समन्ततः । चतुर्द्दश महाराज शिक्षाबलसमन्वितः ॥ २९ ॥ भ्रान्तमुद्भ्रान्तमाधूतमाप्लुतं प्लुतनिःसृतम् । सम्पातं समुदीर्णञ्च दर्शयामास संयुगे ॥ ३० ॥ सौवलस्तु ततस्तस्य शरांश्चिक्षेप वीर्य्यवान् । तानापतत एवाशु चिच्छेद परमासिना ॥ ३१ ॥ ततः क्रुद्धो महाराज सौवलः पुनरेव च । प्राहिणोत् सुतसोमाय शरानाशीविषोपमान् ॥३२॥ चिच्छेद तांस्तु खड्गेन शिक्षया च बलेन च । दर्शयल्लाघवं युद्धे तार्क्ष्यतुल्यपराक्रमः ॥ ३३ ॥ तस्य सञ्चरतो राजन् मण्डलावर्त्तने तदा । क्षुरप्रेण सुतीक्ष्णेन खड्गञ्चिच्छेद सुप्रभम् ॥ ३४ ॥ स छिन्नः सहसा भूमौ निपपात महानसिः । अर्द्धमन्यत् स्थितं हस्ते सुतसरोस्तस्य भारत ॥ ३५ ॥ छिन्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट् । प्राविध्यतः ततः शेषं सुतसोमो महारथः ॥३६॥ स छित्त्वा सगुणञ्चापं रणे तस्य महात्मनः । पपात धरणीं तूर्णं स्वर्णवज्रविभूषितम् ॥ ३७ ॥ सुतसोमस्ततोऽगच्छत् श्रुतकीर्त्तेर्महारथम् ॥ ३८ ॥ सौवलोऽपि धनुर्गृह्य घोरमन्यत् सुदुर्ज्जयम् । अभ्ययात् पाण्डवानीकं निघ्नन् शत्रुगणान् बहून् ॥ ३९ ॥ तत्र नादो महानासीत् पाण्डवानां विशाम्पते । सौवलं समरे दृष्ट्वा विचरन्तमभीतवत् ॥ ४० ॥ तान्यनीकानि दृप्तानि शस्त्रवन्ति महान्ति च । द्राव्यमाणान्यदृश्यन्त सौवलेन महात्मना ॥ ४१ ॥ यथा दैत्यचमूं राजन् देवराजो ममर्द्द ह । तथैव पाण्डवीं सेनां सौवलेयो व्यनाशयत् ॥ ४२ ॥

इति कर्णपर्व्वणि सुतसोमसौवलयुद्धे पञ्चविंशोऽध्यायः ॥ २५ ॥

---

सञ्जय उवाच। धृष्टद्युम्नं कृपो राजन् वारयामास संयुगे।
यथा दृप्तं वने सिंहं शरभो वारयेद्युधि ॥ १ ॥ निरुद्धः पार्षतस्तेन गौतमेन वलीयसा। पदात् पदं विचलितुं नाशकत्तत्र भारत ॥ २ ॥ गौतमस्य रथं दृष्ट्वा धृष्टद्युम्नरथं प्रति। वित्रेसुः सर्वभूतानि क्षयं प्राप्तञ्च मेनिरे ॥ ३ ॥ तत्रावोचन् विमनसो रथिनः सादिनस्तथा। द्रोणस्य निधनान्नूनं संक्रुद्धो द्विपदां वरः ॥ ४ ॥ शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः। अपि स्वस्ति भवेदद्य धृष्टद्युम्नस्य गौतमात् ॥ ५ ॥ अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात्। अप्ययं ब्राह्मणः सर्वान्न नो हन्यात् समागतान् ॥ ६ ॥ यादृशं दृश्यते रूपमन्तकप्रतिमं भृशम्। गमिष्यत्यद्य पदवीं भारद्वाजस्य गौतमः ॥ ७ ॥ आचार्य्यः क्षिप्रहस्तश्च विजयी च सदा युधि। अस्त्रवान् वीर्य्यसम्पन्नः क्रोधेन च समन्वितः। पार्षतश्च महायुद्धे विमुखोऽद्याभिलक्ष्यते ॥ ८ ॥ इत्येवं विविधा वाचस्तावकानां परैः सह। व्यश्रूयन्त महाराज तयोस्तत्र समागमे ॥ ९ ॥ विनिश्वस्य ततः क्रोधात् कृप शारद्वतो नृप। पार्षतञ्चार्द्दयामास निश्चेष्टं सर्वमर्मसु ॥ १० ॥ स हन्यमानः समरे गौतमेन महात्मना। कर्त्तव्यं न स्म जानाति मोहेन महता वृतः ॥ ११ ॥ तमब्रवीत्ततो यन्ता कच्चित् क्षेमं नु पार्षत। ईदृशं व्यसनं युद्धे न ते दृष्टं मया क्वचित् ॥ १२ ॥ दैवयोगात्तु ते वाणा नापतन्मर्मभेदिनः। प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वतः ॥ १३ ॥ व्यावर्त्तये रथं तूर्णं नदीवेगमिवार्णवात्। अवध्यं ब्राह्मणं। मन्ये येन ते विक्रमो हतः ॥ १४ ॥ धृष्टद्युम्नस्ततो राजन् शनकैरब्रवीद्वचः। मुह्यते मे मनस्तात गात्रे स्वेदश्च जायते ॥ १५ ॥ वेपथुश्च शरीरे मे लोमहर्षश्च जायते। वर्ज्जयन् ब्राह्मणं युद्धे शनैर्याहि यतोऽर्जुनः ॥ १६ ॥ अर्जुनं भीमसेनं वा समरे प्राप्य सारथे क्षेममद्य भवेदेवमेषा वै नैष्ठिकी मतिः ॥ १७ ॥ ततः

प्रायान्महाराज सारथिस्त्वरयन् हयान्। यतो भीमो महेष्वासो युयुधे तव सैनिकैः॥ १८ ॥ प्रद्रुतञ्च रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष। किरञ्छरशतान्येव गौतमोऽनुययौ तदा॥ १९ ॥ शङ्खञ्च पूरयामास मुहुर्मुहुररिन्दम। पार्षतं द्रावयामास महेन्द्रो नमुचिं यथा॥ २० ॥ शिखण्डिनन्तु समरे भीष्ममृत्युं दुरासदम्। हार्द्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः॥ २१ ॥ शिखण्डी तु समासाद्य हृदिकानां महारथम्। पञ्चभिर्निशितैर्भल्लैर्जत्रुदेशे समाहनत्॥ २२ ॥ कृतवर्मा तु संक्रुद्धो भित्त्वा षष्ट्या पतत्रिभिः। धनुरेकेन चिच्छेद हसन्राजन्महारथः॥ २३ ॥ अथान्यद्धनुरादाय द्रुपदस्यात्मजो बली। तिष्ठ तिष्ठेति संक्रुद्धो हार्द्दिक्यं प्रत्यभाषत॥ २४ ॥ ततोऽस्य नवतिं बाणान्रुक्मपुङ्खान् सुतेजनान्। प्रेषयामास राजेन्द्र तेऽस्याभ्रश्यन्त वर्मणः॥ २५ ॥ वितथांस्तान् समालक्ष्य पतितांश्च महीतले। क्षुरप्रेण सुतीक्ष्णेन कार्मुकं चिच्छिदे भृशम्॥ २६ ॥ अथैनं छिन्नधन्वानं भग्नशृङ्गमिवर्षभम्। अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्पयत्॥ २७ ॥ कृतवर्मा तु संक्रुद्धो मार्गणैः क्षतविक्षतः। ववाम रुधिरं गात्रैः कुम्भवक्त्रादिवोदकम्॥ २८ ॥ रुधिरेण परिक्लिन्नः कृतवर्मा व्यराजत। वर्षेण क्लेदितो राजन् यथा गैरिकपर्वतः॥ २९ ॥ अथान्यद्धनुरादाय समार्गणगुणं प्रभुः। शिखण्डिनं बाणवरैः स्कन्धदेशे व्यताडयत्॥ ३० ॥ स्कन्धदेशस्थितैर्बाणैः शिखण्डी तु व्यराजत। शाखाप्रशाखाविपुलः सुमहान् पादपो यथा॥ ३१ ॥ तावन्योऽन्यं भृशं विद्ध्वा रुधिरेण समुक्षितौ। अन्योऽन्यशृङ्गाभिहतौ रेजतुर्वृषभाविव॥ ३२ ॥ अन्योऽन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ। रथाभ्यां चेरतुस्तत्र मण्डलानि सहस्रशः॥ ३३ ॥ कृतवर्मा महाराज पार्षतं निशितैः शरैः। रणे विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः॥ ३४ ॥ ततोऽस्य समरे बाणं भोजः प्रहरतां वरः।

जीवितान्तकरं घोरं व्यसृजत्त्वरयान्वितः ॥ ३५ ॥ स तेनाभिहतो राजन् मूर्च्छामाशु समाविशत् । ध्वजयष्टिञ्च सहसा शिश्रिये कश्मलावृतः ॥ ३७ ॥ अपोवाह रणात्तूर्णं सारथी रथिनां वरम् । हार्द्दिक्यशरसन्तप्तं निश्वसन्तं पुनः पुनः ॥ ३७ ॥ पराजिते ततः शूरे द्रुपदस्यात्मजे प्रभो । व्यद्रवत् पाण्डवी सेना बध्यमाना समन्ततः ॥ ३८ ॥

इति कर्णपर्वणि शिखण्ड्यपयाने षड्विंशोऽध्यायः ॥ २६ ॥

---

सञ्जय उवाच । श्वेताश्वोऽपि महाराज व्यधमत्तावकं बलम् । यथा वायुः समासाद्य तूलराशिं समन्ततः ॥ १ ॥ प्रत्युद्ययुस्त्रिगर्त्तास्तं शिवयः कौरवैः सह । शाल्वाः संसप्तकाश्चैव नारायणबलञ्च यत् ॥ २ ॥ सत्यसेनश्चन्द्रदेवो मित्रदेवः श्रुतञ्जयः । सौश्रुतिश्चित्रसेनश्च मित्रवर्मा च भारत ॥ ३ ॥ त्रिगर्त्तराजः समरे भ्रातृभिः परिवारितः । पुत्रैश्चैव महेष्वासैर्नानाशस्त्रविशारदैः ॥ ४ ॥ व्यसृजन्त शरव्रातान् किरन्तोऽर्जुनमाहवे । अभ्यवर्षन्त सहसा वार्य्योघा इव सागरम् ॥ ५ ॥ ते त्वर्ज्जुनं समासाद्य योधाः शतसहस्रशः । अगच्छन् विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ॥ ६ ॥ ते बध्यमानाः समरे नाजहुः पाण्डवं तदा । दह्यमाना महाराज शलभा इव पावकम् ॥ ७ ॥ सत्यसेनस्त्रिभिर्बाणैर्विव्याध युधि पाण्डवम् । मित्रदेवस्त्रिषष्ट्या तु चन्द्रदेवस्तु सप्तभिः ॥ ८ ॥ मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि सप्तभिः । शत्रुञ्जयस्तु विंशत्या सुशर्मा नवभिः शरैः ॥ ९ ॥ स विद्धो बहुभिः सङ्ख्ये प्रतिविव्याध तान् नृपान् । सौश्रुतिं सप्तभिर्विद्धा सत्यसेनं त्रिभिः शरैः ॥१०॥ शत्रुञ्जयञ्च विंशत्या चन्द्रदेवं तथाष्टभिः । मित्रदेवं शतेनैव श्रुतसेनं त्रिभिः शरैः ॥ ११ ॥ नवभिर्मित्रवर्माणं सुशर्माणं तथाष्टभिः ।

अवुञ्जयञ्च राजानं हत्वा तत्र शिलाशितैः । सौश्रुतेः शिरस्त्राणां शिरः कायादपाहरत् ॥ १२ ॥ त्वरितश्चन्द्रदेवञ्च शरैर्निन्ये यमक्षयम् । तथेतरान्महाराज यतमानान्महारथान् । पञ्चभिः पञ्चभिर्बाणैरेकैकं प्रत्यवारयत् ॥ १३ ॥ सत्यसेनस्तु संक्रुद्धस्तोमरं व्यसृजन्महत् । समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च ॥ १४ ॥ स निर्भिद्य भुजं सव्यं माधवस्य महात्मनः । अयस्मयो हेमदण्डो जगाम धरणीं तदा ॥ १५ ॥ माधवस्य तु विद्धस्य तोमरेण महारणे । प्रतोदः प्रापतद्धस्ताद्रश्मयश्च विशाम्पते ॥ १६ ॥ वासुदेवं विभिन्नाङ्गं दृष्ट्वा पार्थो धनञ्जयः । क्रोधमाहारयत्तीव्रं कृष्णञ्चेदमुवाच ह ॥ १७ ॥ प्रापयाश्वान्महाबाहो सत्यसेनं प्रति प्रभो । यावदेनं शरैस्तीक्ष्णैर्नयामि यमसादनम् ॥ १८ ॥ स प्रतोदं प्रगृह्याशु तथा रश्मीन्महायशाः । वाहयामास तानश्वान् सत्यसेनरथं प्रति ॥ १९ ॥ विश्वक्सेनन्तु निर्भिन्नं दृष्ट्वा पार्थो धनञ्जयः । सत्यसेनं शरैस्तीक्ष्णैर्वारयित्वा महारथः ॥ २० ॥ ततः सुनिशितैर्भल्लै राज्ञस्तस्य महच्छिरः । कुण्डलोपचितं कायाच्चकर्त्त पृतनामुखे ॥ २१ ॥ तन्निकृत्य शितैर्बाणैश्चित्रवर्माणमाक्षिपत् । वत्सदन्तेन तीक्ष्णेन सारथिञ्चास्य मारिष ॥ २२ ॥ ततः शरशतैर्भूयः संशप्तकगणान् वली । पातयामास संक्रुद्धः शतशोऽथ सहस्रशः ॥ २३ ॥ ततो राजतपुङ्खेन राजन् शीर्षं महात्मनः । मित्रसेनस्य चिच्छेद क्षुरप्रेण महारथः । सुशर्माणञ्च संक्रुद्धो जत्रुदेशे समाहनत् ॥ २४ ॥ ततः संशप्तकाः सर्वे परिवार्य्य धनञ्जयम् । शस्त्रौघैर्ममृदुः क्रुद्धा नादयन्तो दिशो दश ॥ २५ ॥ अभ्यर्द्दितस्तु तैर्जिष्णुः शक्रतुल्यपराक्रमः । ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे महारथः । ततः शरसहस्राणि प्रादुरासन् विशाम्पते ॥ २६ ॥ ध्वजानां छिद्यमानानां कार्मुकाणाञ्च मारिष । रथानां सपताकानां तूणीराणां युगैः सह ॥ २७ ॥ अक्षाणामथ चक्राणां

योक्त्राणां रश्मिभिः सह। कूबराणां वरूथानां पृषत्कानाञ्च संयुगे ॥ २८ ॥ अश्वानां पततांश्चापि प्रासानामृष्टिभिः सह। गदानां परिघाणाञ्च शक्तितोमरपट्टिशैः ॥ २९ ॥ शतघ्नीनां सचक्राणां भुजानाञ्चोरुभिः सह। कण्ठसूत्राङ्गदानाञ्च केयूराणाञ्च मारिष ॥३०॥ हाराणामथ निष्काणां तनुत्राणाञ्च भारत। छत्राणां व्यजनानाञ्च शिरसां मुकुटैः सह। अश्रूयत महाशब्दस्तत्र तत्र विशाम्पते ॥ ३१ ॥ सकुण्डलानि स्वक्षीणि पूर्णचन्द्रनिभानि च। शिरांस्युर्व्यामदृश्यन्त ताराजालमिवाम्बरे ॥ ३२ ॥ सुस्रग्वीणि सुवासांसि चन्दनेनोक्षितानि च। शरीराणि व्यदृश्यन्त निहतानां महीतले ॥ ३३ ॥ गन्धर्वनगराकारं घोरमायोधनं तदा। निहतैराजपुत्रैश्च क्षत्रियैश्च महाबलैः ॥ ३४ ॥ हस्तिभिः पतितैश्चैव तुरगैश्चाभवन्मही। अगम्यरूपा समरे विशीर्णैरिव पर्वतैः ॥ ३५ ॥ नासीच्चक्रपथस्तत्र पाण्डवस्य महात्मनः। निघ्नतः शात्रवान् भल्लैर्हस्त्यश्वञ्चास्यतो महत् ॥३६॥ आतङ्कादिव सीदन्ति रथचक्राणि मारिष। चरतस्तस्य संग्रामे तस्मिंल्लोहितकर्द्दमे ॥३७॥ सीदमानानि चक्राणि समूहुस्तुरगा भृशम्। श्रमेण महता युक्ता मनोमारुतरंहसः ॥ ३८ ॥ वध्यमानन्तु तत् सैन्यं पाण्डुपुत्रेण धन्विना। प्रायशो विमुखं सर्वं नावतिष्ठति भारत ॥ ३९ ॥ तान् जित्वा समरे जिष्णुः संशप्तकगणान् बहून्। विरराज तदा पार्थो विधूमोऽग्निरिवोज्ज्वलन् ॥ ४० ॥

इति कर्णपर्वणि अर्जुनविजये सप्तविंशोऽध्यायः ॥ २७ ॥

---

सञ्जय उवाच। युधिष्ठिरं महाराज विसृजन्तं शरान् बहून्। स्वयं दुर्य्योधनो राजा प्रत्यगृह्णादभीतवत् ॥ १ ॥ तमापतन्तं सहसा तव पुत्रं महारथम्। धर्मराजो द्रुतं विद्ध्वा तिष्ठ तिष्ठेति

चाब्रवीत् ॥ २ ॥ स तु तं प्रतिविव्याध नवभिर्निशितैः शरैः ।
सारथिञ्चास्य भल्लेन भृशं क्रुद्धोऽभ्यताड़यत् ॥ ३ ॥ ततो युधि-
ष्ठिरो राजा स्वर्णपुङ्खान् शिलीमुखान् । दुर्य्योधनाय चिक्षेप
त्रयोदश शिलाशितान् ॥ ४ ॥ चतुर्भिश्चतुरो वाहांस्तस्य हत्वा
महारथः । पञ्चमेन शिरः कायात् सारथेस्तु समाक्षिपत् ॥ ५ ॥
षष्ठेन तु ध्वजं राज्ञः सप्तमेन तु कार्मुकम् । अष्टमेन तथा खड्गं
पातयामास भूतले ॥ ६ ॥ पञ्चभिर्नृपतिञ्चापि धर्मराजोऽर्द्दय-
द्भृशम् । हताश्वात्तु रथात्तस्मादवप्लुत्य सुतस्तव । उत्तमं व्यसनं
प्राप्तो भूमावेवावतिष्ठते ॥ ७ ॥ तन्तु कृच्छ्रगतं दृष्ट्वा कर्णद्रौणि-
कृपादयः । अभ्यवर्त्तन्त सहसा परीप्सन्तो नराधिपम् ॥ ८ ॥
अथ पाण्डुसुताः सर्व्वे परिवार्य्य युधिष्ठिरम् । अन्वयुः समरे
राजंस्ततो युद्धमवर्त्तत ॥ ९ ॥ ततस्तूर्य्यसहस्राणि प्रावाद्यन्त महा-
मृधे । ततः किलकिलाशब्दाः प्रादुरासन्महीपते ॥ १० ॥ यत्रा-
भ्यगच्छन् समरे पाञ्चालाः कौरवैः सह । नरा नरैः समाजग्मु-
र्वारणा वरवारणैः ॥ ११ ॥ रथाश्च रथिभिः सार्द्धं हयाश्च हय-
सादिभिः । द्वन्द्वान्यासन्महाराज प्रेक्षणीयानि संयुगे । विविधा-
न्यप्यचिन्त्यानि शस्त्रवन्त्युत्तमानि च ॥ १२ ॥ ते शूराः समरे सर्व्वे
चित्रं लघु च सुष्ठु च । अयुध्यन्त महावेगाः परस्परवधैषिणः
॥ १३ ॥ अन्योऽन्यं समरे जघ्नुर्योधव्रतमनुष्ठिताः । न हि ते
समरञ्चक्रुः पृष्ठतो वै कथञ्चन ॥ १४ ॥ मुहूर्त्तमेव तद्युद्धमासी-
न्मधुरदर्शनम् । तत उन्मत्तवद्राजन्निर्मर्य्यादमवर्त्तत ॥ १५ ॥ रथी
नागं समासाद्य दारयन्निशितैः शरैः । प्रेषयामास कालाय शरैः
सन्नतपर्वभिः ॥ १६ ॥ नागा हयान् समासाद्य विक्षिपन्तो बहू-
न्रणे । दारयामासुरत्युग्रं तत्र तत्र तदा तदा ॥ १७ ॥ हया-
रोहाश्च बहवः परिवार्य्य हयोत्तमान् । तलशब्दरवांश्चक्रुः सम्प-
तन्तस्ततस्ततः ॥ १८ ॥ धावमानांस्ततस्तांस्तु द्रवमाणान् महा-

गजान्। पार्श्वतः पृष्ठतश्चैव निजघ्नुर्हयसादिनः ॥ १९ ॥ विद्राव्य च बहूनश्वान्नागा राजन्मदोत्कटाः। विषाणैश्चापरे जघ्नुर्ममृदुश्चापरे भृशम् ॥ २० ॥ साश्वारोहांश्च तुरगान् विषाणैर्विव्यधू रुषा। अपरे चिक्षिपुर्वेगात् प्रगृह्यातिबलास्तदा ॥ २१ ॥ पादातैराहता नागा विवरेषु समन्ततः। चक्रुरार्त्तस्वरं घोरं दुद्रुवुश्च दिशो दश ॥ २२ ॥ पदातीनान्तु सहसा प्रद्रुतानां महाहवे। उत्सृज्याभरणं तूर्णमवप्लुत्य रणाजिरे ॥ २३ ॥ निमित्तं मन्यमानास्तु परिणाम्य महागजाः। जगृहुर्बिभिदुश्चैव चित्राण्याभरणानि च ॥ २४ ॥ तांस्तु तत्र पसक्तान् वै परिवार्य्य पदातयः। हस्त्यारोहान्निजघ्नुस्ते महावेगा बलोत्कटाः ॥ २५ ॥ अपरे हस्तिभिर्हस्तैः खे विक्षिप्ता महाहवे। निपतन्तो विषाणाग्रैर्भृशं विद्धाः सुशिक्षितैः ॥ २६ ॥ अपरे सहसा गृह्य विषाणैरवसूदिताः। सेनान्तरं समासाद्य केचित्तत्र महागजैः। क्षुण्णगात्रा महाराज विक्षिप्य च पुनः पुनः ॥ २७ ॥ अपरे व्यजनानीव विभ्राम्य निहता मृधे। पुरःसराश्च नागानामपरेषां विशाम्पते। शरीराण्यतिविद्धानि तत्र तत्र रणाजिरे ॥ २८ ॥ प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे। निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ॥ २९ ॥ निगृह्य च गजाः केचित् पार्श्वस्थैर्भृशदारुणैः। रथाश्वसादिभिस्तत्र संभिन्ना न्यपतन् भुवि ॥ ३० ॥ सहसा सादिनस्तत्र तोमरेण महामृधे। भूमावमृद्नन् वेगेन सवर्माणं पदातिनम् ॥ ३१ ॥ तथा सावरणान् कांश्चित्तत्र तत्र विशाम्पते। रथान्नागाः समासाद्य परिगृह्य च मारिष। व्यक्षिपन् सहसा तत्र घोररूपे भयानके ॥ ३२ ॥ नाराचैर्निहतश्चापि निपपात महागजः। पर्वतस्येव शिखरं वज्रभग्नं महीतले ॥ ३३ ॥ योधा योधान् समासाद्य मुष्टिभिर्व्यहनन् युधि। केशेष्वन्योऽन्यमाक्षिप्य चिक्षिपुर्बिभिदुश्च ह ॥ ३४ ॥ उद्यम्य च भुजानन्ये निक्षिप्य च

महीतले। तदा वीरः समाक्रम्य स्फुरन्तोऽपाहरच्छिरः॥ ३५॥ मृतमन्यो महाराज पद्भ्यां ताड़ितवांस्तदा। पततश्चापरो राजन् विजहारासिना शिरः॥ ३६॥ जीवतश्च तथैवान्यः शस्त्रं काये न्यमज्जयत्। मुष्टियुद्धं महच्चासीत् योधानां तत्र भारत। तथा केशग्रहश्चोग्रो बाहुयुद्धञ्च भैरवम्॥ ३७॥ समासक्तस्य चान्येन अविज्ञातस्तथापरः। जहार समरे प्राणान् नानाशस्त्रैरनेकधा॥ ३८॥ संसक्तेषु च योधेषु वर्त्तमाने च संकुले। कबन्धानुत्थितानि स्युः शतशोऽथ सहस्रशः॥ ३९॥ शोणितैः सिच्यमानानि शस्त्राणि कवचानि च। महारागानुरक्तानि वस्त्राणीव चकाशिरे॥ ४०॥ एवमेतन्महायुद्धं दारुणं शस्त्रसंकुलम्। उन्मत्तगङ्गप्रतिमं शब्देनापूरयज्जगत्॥ ४१॥ नैव स्वे न परे राजन् विज्ञायन्ते शरातुराः। योद्धव्यमिति युध्यन्ते राजानो जयगृद्धिनः॥४२॥ स्वान् स्वे जघ्नुर्महाराज परांश्चैव समागतान्। उभयोः सेनयो र्वीरैर्व्याकुलं समपद्यत॥ ४३॥ रथैर्भग्नैर्महाराज वारणैश्च निपातितैः। हयैश्च पतितैस्तत्र नरैश्च विनिपातितैः॥ ४४॥ अगम्यरूपा पृथिवी मांसशोणितकर्द्दमा। क्षणेनासीन्महीपाल हतजीवप्रवर्त्तिनी॥ ४५॥ पाञ्चालानहनत् कर्णस्त्रिगर्त्तांश्च धनञ्जयः। भीमसेनः कुरून् राजन् हस्त्यनीकञ्च सर्वशः॥ ४६॥ एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः। अपराह्णे गते सूर्य्ये काङ्क्षतां विपुलं यशः॥ ४७॥

इति कर्णपर्व्वणि सङ्कुलयुद्धे अष्टाविंशोऽध्यायः॥ २८॥

---

धृतराष्ट्र उवाच। अतितीव्राणि दुःखानि दुःसहानि बहूनि च। श्रुतोऽहं सञ्जयाशेषं पुत्राणाञ्चैव सङ्क्षयम्॥ १॥ यथा त्वं मे कथयसे यथा युद्धञ्च वर्त्तते। न सन्ति सूत कौरव्या इति

मे निश्चिता मतिः ॥ २ ॥ दुर्य्योधनश्च विरथः कृतस्तत्र महारणे ।
धर्मपुत्रः कथञ्चक्रे तस्य वा नृपतिः कथम् ॥ ३ ॥ अपराह्णे कथं युद्धमभवल्लोमहर्षणम् । तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि सञ्जय ॥४

सञ्जय उवाच । संसक्तेषु च सैन्येषु युध्यमानेषु भागशः । रथमन्यं समास्थाय पुत्रस्तव विशाम्पते । क्रोधेन महता युक्तः सविषो भुजगो यथा ॥ ५ ॥ दुर्य्योधनस्तु दृष्ट्वा वै धर्मराजं युधिष्ठिरम् । प्रोवाच सूतं त्वरितो याहि याहीति भारत ॥ ६ ॥ तत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः । ध्रियमाणातपत्रेण राजा राजति दंशितः ॥ ७ ॥ स सूतश्चोदितो राज्ञा राज्ञः स्यन्दनमुत्तमम् । युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे ॥ ८ ॥ ततो युधिष्ठिरः क्रुद्धः प्रभिन्न इव कुञ्जरः । सारथिञ्चोदयामास याहि यत्र सुयोधनः ॥ ९ ॥ तौ समाजग्मतुर्वीरौ भ्रातरौ रथसत्तमौ । समेत्य च महावीर्य्यौ संरब्धौ युद्धदुर्मदौ । ततक्षतुर्महेष्वासौ शरैरन्योऽन्यमाहवे ॥ १० ॥ ततो दुर्य्योधनो राजा धर्मशीलस्य मारिष । शिलाशितेन भल्लेन धनुश्चिच्छेद संयुगे ॥ ११ ॥ तन्नामृष्यत संक्रुद्धो ह्यवमानं युधिष्ठिरः ॥ १२ ॥ अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः । अन्यत् कार्मुकमादाय धर्मपुत्रश्चमूमुखे । दुर्य्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च ॥१३॥ अथान्यद्धनुरादाय प्रत्यविध्यत पाण्डवम् ॥ १४ ॥ तावन्योऽन्यं सुसंरब्धौ शस्त्रवर्षाण्यमुञ्चताम् । सिंहाविव सुसंरब्धौ परस्परजिगीषया ॥ १५ ॥ जघ्नतुस्तौ रणेऽन्योन्यं नर्द्दमानौ वृषाविव । अन्तरं मार्गमाणौ च चेरतुस्तौ महारथौ ॥ १६ ॥ ततः पूर्णायतोत्सृष्टैः शरैस्तौ तु कृतव्रणौ । विरेजतुर्महाराज किंशुकाविव पुष्पितौ ॥ १७ ॥ ततो राजन् प्रतिभयान् सिंहनादान्मुहुर्मुहुः । तलयोश्च तथा शब्दान् धनुषोश्च महाहवे । शङ्खशब्दवरांश्चैव चक्रतुस्तौ नरेश्वरौ ॥ १८ ॥ अन्योऽन्यं तौ महाराज पीड़या

चक्रतुर्भृशम् ॥ १९ ॥ ततो युधिष्ठिरो राजा पुत्रं तव शरैस्त्रिभिः । आजघानोरसि क्रुद्धो वज्रवेगैर्दुरासदैः ॥ २० ॥ प्रतिविव्याध तं तूर्णं तव पुत्रो महीपतिः । पञ्चभिर्निशितैर्बाणैः रुक्मपुङ्खैः शिलाशितैः ॥ २१ ॥ ततो दुर्य्योधनो राजा शक्तिं चिक्षेप भारत । सर्व्वपारशवीं तीक्ष्णां महोल्काप्रतिमां तदा ॥ २२ ॥ तामापतन्तीं सहसा धर्म्मराजः शितैः शरैः । त्रिभिश्चिच्छेद सहसा तञ्च विव्याध पञ्चभिः ॥ २३ ॥ निपपात ततः साथ स्वर्णदण्डा महास्वना । निपतन्ती महोल्केव व्यराजत् शिखिसन्निभा ॥ २४ ॥ शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशाम्पते । नवभिर्निशितैस्तीक्ष्णैर्निजघान युधिष्ठिरम् ॥ २५ ॥ सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः । दुर्य्योधनं समुद्दिश्य वाणं जग्राह सत्वरः ॥ २६ ॥ समाधत्त च तं वाणं धनुर्मध्ये महाबलः । चिक्षेप च महाराज ततः क्रुद्धः पराक्रमी ॥ २७ ॥ स तु वाणः समासाद्य तव पुत्रं महारथम् । व्यामोहयत राजानं धरणीञ्च जगाम ह ॥ २८ ॥ ततो दुर्य्योधनः क्रुद्धो गदामुद्यम्य वेगितः । विधित्सुः कलहस्यान्तं धर्म्मराजमुपाद्रवत् ॥ २९ ॥ तमुद्यतगदं दृष्ट्वा दण्डहस्तमिवान्तकम् । धर्म्मराजो महाशक्तिं प्राहिणोत्तव सूनवे । दीप्यमानां महावेगां महोल्कां ज्वलितामिव ॥ ३० ॥ रथस्थः स तया विद्धो मर्म्म भित्त्वा स्तनान्तरे । भृशं संविग्नहृदयः पपात च मुमोह च ॥ ३१ ॥ भीमस्तमाह च ततः प्रतिज्ञामनुचिन्तयन् । नायं बध्यस्तव नृप इत्युक्तः संन्यवर्त्तत ॥ ३२ ॥ ततस्त्वरितमागम्य कृतवर्म्मा तवात्मजम् । प्रत्यपद्यत राजानं निमग्नं व्यसनार्णवे ॥३३॥ गदामादाय भीमोऽपि हेमपट्टपरिष्कृताम् । अभिदुद्राव वेगेन कृतवर्म्माणमाहवे ॥ ३४ ॥ एवं तदभवद्युद्धं त्वदीयानां परैः सह । अपराह्णे महाराज काङ्क्षतां विजयं युधि ॥ ३५ ॥

इति कर्णपर्व्वणि सङ्कुलयुद्धे ऊनत्रिंशोऽध्यायः ॥ २९ ॥

सञ्जय उवाच । ततः कर्णं पुरस्कृत्य त्वदीया युद्धदुर्मदाः । पुनरावृत्य संग्रामं चक्रुर्देवासुरोपमम् ॥ १ ॥ द्विरदनररथाश्वशङ्खशब्दैः परिहृषिता विविधैश्च शस्त्रपातैः । द्विरदरथपदातिसादिसङ्घाः परिकुपिताभिमुखाः प्रजघ्निरे ते ॥ २ ॥ शितपरश्वधसासिपट्टिशैरिषुभिरनेकविधैश्च सादिताः । द्विरदरथहया महाहवे वरपुरुषैः पुरुषाश्च वाहनैः ॥ ३ ॥ कमलदिनकरेन्दुसन्निभैः सितदशनैः सुमुखाक्षिनासिकैः । रुचिरमुकुटकुण्डलैर्मही पुरुषशिरोभिरास्तृता बभौ ॥ ४ ॥ परिघमुषलशक्तितोमरैर्नखरभुशुण्डिगदाशतैर्हताः । द्विरदनरहयाः सहस्रशो रुधिरनदीप्रवाहास्तदाभवन् ॥ ५ ॥ प्रहतरथनराश्वकुञ्जरं प्रतिभयदर्शनमुल्वणव्रणम् । तदहितहतमावभौ बलं पितृपतिराष्ट्रमिव प्रजाक्षये ॥ ६ ॥ अथ तव नरदेव सैनिकास्तव च सुताः सुरसूनुसन्निभाः । अमितबलपुरःसरा रणे कुरुवृषभाः शिनिपुत्रमभ्ययुः ॥ ७ ॥ तदतिरुचिरभीममावभौ पुरुषवराश्वरथद्विपाकुलम् । लवणजलसमुद्धतस्वनं बलमसुरामरसैन्यसन्निभम् ॥ ८ ॥ सुरपतिसमविक्रमस्ततस्त्रिदशवरावरजोपमं युधि । दिनकरकिरणप्रभैः पृषत्कै रवितनयोऽभ्यहनच्छिनिप्रवीरम् ॥ ९ ॥ तमपि सरथवाजिसारथिं शिनिवृषभो विविधैः शरैस्त्वरन् । भुजगविषसमप्रभै रणे पुरुषवरं समवास्तृणोत्तदा ॥ १० ॥ शिनिवृषभशरप्रपीडितं तव सुहृदो वसुषेणमभ्ययुः । त्वरितमतिरथा रथर्षभं द्विरदरथाश्वपदातिभिः सह ॥ ११ ॥ तदुदधिनिभमाद्रवद्बलं त्वरिततरैः समभिद्रुतं परैः । द्रुपदसुतमुखैस्तदाभवत्पुरुषरथाश्वगजक्षयो महान् ॥ १२ ॥ अथ पुरुषप्रवरौ कृताह्निकौ भवमभिपूज्य यथाविधि प्रभुम् । अरिवधकृतनिश्चयौ द्रुतं तव बलमर्जुनकेशवौ सृतौ ॥ १३ ॥ जलदनिनदनिस्वनं रथं पवनविधूतपताककेतनम् । सितहयमुपयान्तमन्तिकं हृतमनसो ददृशुस्तदारयः

॥ १४ ॥ अथ विस्फार्य्य गाण्डीवं रथे नृत्यन्निवार्ज्जुनः । शर-
सम्बाधमकरोत् खं दिशः प्रदिशस्तथा ॥ १५ ॥ रथान् विमान-
प्रतिमान् सज्जयन् सायुधध्वजान् । ससारथींस्तदा बाणैरभ्रा-
णीवानिलोऽवधीत् ॥ १६ ॥ गजान् गजनियन्तृंश्च वैजयन्त्यायुध-
ध्वजान् । सादिनोऽश्वांश्च पत्तींश्च शरैर्निन्ये यमक्षयम् ॥ १७ ॥
तमन्तकमिव क्रुद्धमनिवार्य्यं महारथम् । दुर्य्योधनोऽभ्ययादेको
निघ्नन् बाणैरजिह्मगैः ॥ १८ ॥ तस्यार्ज्जुनो धनुः सूतमश्वान्
केतुञ्च सायकैः । हत्वा सप्तभिरेकेन छत्रं चिच्छेद पत्रिणा ॥१९॥
अन्तरञ्च समासाद्य व्यसृजत् प्राणघातिनम् । दुर्य्योधनायेषुवरं तं
द्रौणिः सप्तधाच्छिनत् ॥ २० ॥ ततो द्रौणेर्धनुश्छित्त्वा हत्वा चाश्व-
वराञ्छरैः । कृपस्यापि तदत्युग्रं धनुश्चिच्छेद पाण्डवः ॥ २१ ॥
हार्द्दिक्यस्य धनुश्छित्त्वा ध्वजञ्चाश्वांस्तथावधीत् । दुःशासनस्ये-
ष्वसनं छित्त्वा राधेयमभ्ययात् ॥ २२ ॥ अथ सात्यकिमुत्सृज्य
त्वरन् कर्णोऽर्ज्जुनं त्रिभिः । विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं
पुनः पुनः ॥ २३ ॥ न ग्लानिरासीत् कर्णस्य क्षिपतः सायकान्
बहून् । रणे विनिघ्नतः शत्रून् क्रुद्धस्येव शतक्रतोः ॥ २४ ॥ अथ
सात्यकिरागत्य कर्णं विद्ध्वा शितैः शरैः । नवत्या नवभिश्चोग्रैः
शतेन पुनरार्पयत् ॥ २५ ॥ ततः प्रवीराः पार्थानां सर्व्वे कर्णमपी-
डयन् । युधामन्युः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ॥ २६ ॥
उत्तमौजा युयुत्सुश्च यमौ पार्षत एव च । चेदिकारूषमत्स्यानां
कैकेयानाञ्च यद्बलम् ॥ २७ ॥ चेकितानश्च बलवान् धर्म्मराजश्च
सुव्रतः । एते रथाश्वद्विरदैः पत्तिभिश्चोग्रविक्रमैः ॥ २८ ॥ परि-
वार्य्य रणे कर्णं नानाशस्त्रैरवाकिरन् । भाषन्तो वाग्भिरुग्राभिः
सर्व्वे कर्णवधे धृताः ॥ २९ ॥ तां शस्त्रवृष्टिं बहुधा कर्णश्छित्त्वा
शितैः शरैः । अपोवाहास्त्रवीर्य्येण द्रुमं भङ्क्त्वेव मारुतः ॥ ३० ॥
रथिनः समहामात्रान् गजानश्वान् ससादिनः । पत्तिव्रातांश्च

संक्रुद्धो निघ्नन् कर्णो व्यदृश्यत ॥ ३१ ॥ तद्वध्यमानं पाण्डूनां बलं कर्णास्त्रतेजसा । विप्रस्नुतक्षतदेहन्तु प्राय आसीत् पराङ्मुखम् ॥ ३२ ॥ अथ कर्णास्त्रमस्त्रेण प्रतिहत्यार्जुनः स्मयन् । दिशः खञ्चैव भूमिञ्च प्रावृणोत् शरवृष्टिभिः ॥ ३३ ॥ मुषलानीव सम्पेतुः परिघा इव चेषवः । शतघ्न्य इव चाप्यन्ये वज्राण्युग्राणि चापरे ॥ ३४ ॥ तैर्बध्यमानं तत् सैन्यं सपत्त्यश्वरथद्विपम् । निमीलिताक्षमत्यर्थं बभ्राम च ननाद च ॥ ३५ ॥ निष्कैवल्यं तदा युद्धं प्रापुरश्वनरद्विपाः । हन्यमानाः शरैरार्त्तास्तदा भीताः प्रदुद्रुवुः ॥ ३६ ॥ त्वदीयानां तदा युद्धे संसक्तानां जयैषिणाम् । गिरिमस्तं समासाद्य प्रत्यपद्यत भानुमान् ॥ ३७ ॥ तमसा च महाराज रजसा च विशेषतः । न किञ्चित् प्रत्यपश्याम शुभं वा यदि वाशुभम् ॥ ३८ ॥ ते त्रस्यन्तो महेष्वासा रात्रियुद्धस्य भारत । अपयानं ततश्चक्रुः सहिताः सर्वयोधिभिः ॥ ३९ ॥ कौरवेष्वपयातेषु तदा राजन् दिनक्षये । जयं सुमनसः प्राप्य पार्थाः स्वशिविरं ययुः ॥४०॥ वादित्रशब्दैर्विविधैः सिंहनादैः सगर्ज्जितैः । परानुपहसन्तश्च स्तुवन्तश्चाच्युतार्जुनौ ॥४१॥ कृतेऽवहारे तैर्वीरैः सैनिकाः सर्व एव ते । आशीर्वाचः पाण्डवेषु प्रायुञ्जन्त नरेश्वराः ॥ ४२ ॥ ततः कृतेऽवहारे च प्रहृष्टास्तत्र पाण्डवाः । निशायां शिविरं गत्वा न्यवसन्त नरेश्वराः ॥ ४३ ॥ ततोरक्षःपिशाचाश्च श्वापदाश्चैव सङ्घशः । जग्मुरायोधनं घोरं रुद्रस्याक्रीड़सन्निभम् ॥ ४४ ॥

इति कर्णपर्वणि प्रथमदिवसयुद्धे त्रिंशोऽध्यायः ॥ ३०

---

धृतराष्ट्र उवाच । स्वेन छन्देन वः सर्वानवधीद्व्यक्तमर्जुनः । न ह्यस्य समरे मुच्येदन्तकोऽप्याततायिनः ॥ १ ॥ पार्थश्चैकोऽहरद्भद्रामेकश्चाग्निमतर्पयत् । एकश्चेमां महीं जित्वा चक्रे बलिभृतो

नृपान् ॥ २ ॥ एको निवातकवचानहनद्दिव्यकार्मुकः । एकः किरातरूपेण स्थितं शर्वमयोधयत् ॥ ३ ॥ एको ह्यरक्षद्भरतानेको भवमतोषयत् । तेनैकेन जिता सर्व्वे महीपा ह्युग्रतेजसा ॥ ४ ॥ न ते निन्द्याः प्रशस्यास्ते यत्ते चक्रुर्ब्रवीहि तत् । ततो दुर्य्योधनः सूत पश्चात् किमकरोत्तदा ॥ ५ ॥

सञ्जय उवाच । हतप्रहतविध्वस्तविवर्मायुधवाहनाः । दीनस्वरा दूयमाना मानिनः शत्रुनिर्ज्जिताः ॥ ६ ॥ शिविरस्थाः पुनर्मन्त्रं मन्त्रयन्ति स्म कौरवा । भग्नदंष्ट्रा हतविषाः पादाक्रान्ता इवोरगाः ॥ ७ ॥ तानब्रवीत् ततः कर्णः क्रुद्धः सर्प इव श्वसन् । करं करेण निष्पीड्य प्रेक्षमाणस्तवात्मजम् ॥ ८ ॥ यत्तो दृढ़श्च दक्षश्च धृतिमानर्जुनः सदा । संबोधयति चाप्येनं यथाकालमधोक्षजः ॥ ९ ॥ सहसास्त्रविसर्गेण वयं तेनाद्य वञ्चिताः । श्वस्त्वहं तस्य सङ्कल्पं सर्वं हन्ता महीपते ॥ १० ॥ एवमुक्तस्तथेत्युक्त्वा सोऽनुजज्ञे नृपोत्तमान् । तेऽनुज्ञाता नृपाः सर्व्वे स्वानि वेश्मानि भेजिरे ॥ ११ ॥ सुखोषितास्ते रजनीं हृष्टा युद्धाय निर्ययुः ॥१२॥ तेऽपश्यन् विहितं व्यूहं धर्मराजेन दुर्ज्जयम् । प्रयत्नात् कुरुमुख्येन बृहस्पत्युशनोमतम् ॥१३॥ अथ प्रतीपकर्त्तारं प्रवीरं परवीरहा । सस्मार वृषभस्कन्धं कर्णं दुर्य्योधनस्तदा ॥ १४ ॥ पुरन्दरसमं युद्धे मरुद्गणसमं बले । कार्त्तवीर्य्यसमं वीर्य्ये कर्णं राज्ञोऽगमन्मनः ॥ १५ ॥ सर्व्वेषाञ्चैव सैन्यानां कर्णमेवागमन्मनः । सूतपुत्रं महेष्वासं बन्धुमात्ययिकेष्विव ॥ १६ ॥

धृतराष्ट्र उवाच । यद्वोऽगमन्मनो मन्दाः कर्णं वैकर्त्तनं प्रति । अप्यपश्यत राधेयं शीतार्त्ता इव भास्करम् ॥ १७ ॥ कृतेऽवहारे सैन्यानां प्रवृत्ते च रणे पुनः । कथं वैकर्त्तनः कर्णस्तत्रायुध्यत सञ्जय ॥ १८ ॥ कथञ्च पाण्डवाः सर्व्वे युयुधुस्तत्र सूतजम् । कर्णो ह्येको महाबाहुर्हन्यात् पार्थान् ससृञ्जयान् ॥ १९ ॥ कर्णस्य

भुजयोर्वीर्य्यं शक्रविष्णुसमं युधि। तस्य शस्त्राणि घोराणि विक्रमश्च महात्मनः॥ २०॥ कर्णमाश्रित्य संग्रामे यत्तो दुर्य्योधनो नृपः। दुर्य्योधनं ततो दृष्ट्वा पाण्डवेन भृशार्द्दितम्। पराक्रान्तान् पाण्डुसुतान् दृष्ट्वा चापि महारथः॥ २१॥ कर्णमाश्रित्य संग्रामे मन्दो दुर्य्योधनः पुनः। जेतुमुत्सहते पार्थान् सपुत्रान् सहकेशवान् ॥ २२॥ अहोवत महद्दुःखं यत्र पाण्डुसुतान्रणे। नातरद्रभसः कर्णो दैवं नूनं परायणम्॥ २३॥ अहो द्यूतस्य निष्ठेयं घोरा सम्प्रति वर्त्तते। अहो तीव्राणि दुःखानि दुर्य्योधनकृतान्यहम्। सोढा घोराणि बहुशः शल्यभूतानि सञ्जय॥ २४॥ सौबलञ्च तदा तात नीतिमानिति मन्यते। कर्णश्च रभसो नित्यं राजानं चाप्यनुव्रतः॥ २५॥ यदेवं वर्त्तमानेषु महायुद्धेषु सञ्जय। अश्रौषं निहतान् पुत्रान् नित्यमेव च निर्ज्जितान्॥ २६॥ न पाण्डवानां समरे कश्चिदस्ति निवारकः। स्त्रीमध्यमिव गाहन्ते दैवन्तु बलवत्तरम्॥ २७॥

सञ्जय उवाच। राजन् पूर्वनिमित्तानि धर्मिष्ठानि विचिन्तय ॥ २८॥ अतिक्रान्तं हि यत् कार्य्यं पश्चाच्चिन्तयते नरः। तच्चास्य न भवेत् कार्य्यं चिन्तया च विनश्यति॥ २९॥ तदिदं तव कार्य्यन्तु दूरप्राप्तं विजानता। न कृतं यत्त्वया पूर्वं प्राप्ताप्राप्तविचारणम् ॥ ३०॥ उक्तोऽसि बहुधा राजन् मा युध्यस्वेति पाण्डवैः। गृह्णीषे न च तन्मोहादच नञ्च विशाम्पते॥ ३१॥ त्वया पापानि घोराणि समाचीर्णानि पाण्डुषु। त्वत्कृते वर्त्तते घोरः पार्थिवानां जनक्षयः ॥ ३२॥ तत्त्विदानीमतिक्रान्तं मा शुचो भरतर्षभ। शृणु सर्वं यथा वृत्तं घोरं वैशसमच्युत॥ ३३॥ प्रभातायां रजन्यान्तु कर्णो राजानमभ्ययात्। समेत्य च महाबाहुर्दुर्य्योधनमथाब्रवीत्॥३४॥

कर्ण उवाच। अद्य राजन् समेष्यामि पाण्डवेन यशस्विना। निहनिष्यामि तं वीरं स वा मां निहनिष्यति॥ ३५॥ बहुत्वान्मम

कार्य्याणां तथा पार्थस्य भारत। नाभूत् समागमो राजन् मम चैवार्जुनस्य च ॥ ३६ ॥ इदन्तु मे यथाप्रश्नं शृणु वाक्यं विशांपते। अनिहत्य रणे पार्थं नाहमेष्यामि भारत ॥ ३७ ॥ हतप्रवीरे सैन्येऽस्मिन् मयि चावस्थिते युधि। अभियास्यति मां पार्थः शक्रशक्त्या विनाकृतम् ॥ ३८ ॥ ततः श्रेयस्करं यच्च तन्निबोध जनेश्वर। आयुधानाञ्च मे वीर्य्यं दिव्यानामर्जुनस्य च ॥ ३९ ॥ कार्य्यस्य महतो भेदे लाघवे दूरपातने। सौष्ठवे चास्त्रपाते च सव्यसाची न मे समः ॥ ४० ॥ प्राणे शौर्य्ये च ज्ञाने च विक्रमे चापि भारत। निमित्तज्ञानयोगे च सव्यसाची न मत्समः ॥ ४१ ॥ सर्व्वायुधमहामात्रं विजयं नाम मे धनुः। इन्द्रार्थं प्रियकामेन निर्म्मितं विश्वकर्म्मणा ॥ ४२ ॥ येन दैत्यगणान्राजन् जितवान् वै शतक्रतुः। यस्य घोषेण दैत्यानां व्यामुह्यन्त दिशो दश ॥ ४३ ॥ तद्भार्गवाय प्रायच्छच्छक्रः परमसम्मतम्। तद्दिव्यं भार्गवो मह्यमददद्धनुरुत्तमम् ॥ ४४ ॥ तेन योत्स्ये महाबाहुमर्जुनं जयतांवरम्। यथेन्द्रः समरे सर्व्वान् दैतेयान् वै समागतान् ॥ ४५ ॥ धनुर्घोरं रामदत्तं गाण्डीवात्तद्विशिष्यते। त्रिःसप्तकृत्वः पृथिवी धनुषा येन निर्ज्जिता ॥ ४६ ॥ धनुषो ह्यस्य कर्म्माणि दिव्यानि प्राह भार्गवः। तद्रामो ह्यददन्मह्यं येन योत्स्यामि पाण्डवम् ॥४७ अद्य दुर्य्योधनाहं त्वां नन्दयिष्ये सबान्धवम्। निहत्य समरे वीरमर्जुनं जयतां वरम् ॥ ४८ ॥ सपर्व्वतवनद्वीपा हतवीरा ससागरा। पुत्रपौत्रप्रतिष्ठा ते भविष्यत्यद्य पार्थिव ॥ ४९ ॥ नाशक्यं विद्यते मेऽद्य त्वत्प्रियार्थं विशेषतः। सम्यग्धर्म्मानुरक्तस्य सिद्धिरात्मवतो यथा ॥ ५० ॥ न हि मां समरे सोढुं स शक्तोऽग्निं तरुर्यथा। अवश्यन्तु मया वाच्यं येन हीनोऽस्मि फाल्गुनात् ॥ ५१ ॥ ज्या तस्य धनुषो दिव्या तथाक्षय्यौ महेषुधी। सारथिस्तस्य गोविन्दो मम तादृङ्न विद्यते ॥ ५२ ॥ तस्य दिव्यं धनुःश्रेष्ठं गाण्डीव-

अजरं युधि । विजयश्च महद्दिव्यं ममापि धनुरुत्तमम् ॥ ५३ ॥
तत्राहमधिकः पार्थात् धनुषा तेन पार्थिव । येन चाप्यधिको वीरः
पाण्डवस्तान्निबोध मे ॥ ५४ ॥ रश्मिग्राहश्च दाशार्हः सर्वलोक-
नमस्कृतः । अग्निदत्तश्च वै दिव्यो रथ काञ्चनभूषणः ॥ ५५ ॥
अच्छेद्यः सर्वतो वीर वाजिनश्च मनोजवाः । ध्वजश्च दिव्यो द्युति-
मान् वानरो विस्मयङ्करः ॥ ५६ ॥ कृष्णश्च स्रष्टा जगतो रथं
तमभिरक्षति । एतैर्द्रव्यैरहं हीनो योद्धुमिच्छामि पाण्डवम्
॥ ५७ ॥ अयन्तु सदृशः शौरेः शल्यः समितिशोभनः । सारथ्यं
यदि मे कुर्य्यात् ध्रुवस्ते विजयो भवेत् ॥ ५८ ॥ तस्य मे सारथिः
शल्यो भवत्वसुकरः परैः । नाराचान् गार्द्धपत्रांश्च शकटानि वहन्तु
मे ॥५९॥ रथाश्च मुख्या राजेन्द्र युक्ता वाजिभिरुत्तमैः । आयान्तु
पश्चात् सततं मामेव भरतर्षभ ॥ ६० ॥ एवमभ्यधिकः पार्थात्
भविष्यामि गुणैरहम् । शल्योऽप्यभ्यधिकः कृष्णादर्जुनादपि चाप्य-
हम् ॥ ६१ ॥ यथाश्वहृदयं वेद दाशार्हः परवीरहा । तथा
शल्यो विजानीते हयज्ञानं महारथः ॥ ६२ ॥ बाहुवीर्य्ये समो
नास्ति मद्रराजस्य कश्चन ॥ ६३ ॥ यथास्त्रैर्मत्समो नास्ति कश्चि-
देव धनुर्द्धरः । तथा शल्यसमो नास्ति हयज्ञाने हि कश्चन ॥६४॥
सोऽयमभ्यधिकः पार्थाद्भविष्यति रथो मम । समुद्यातुं न शक्ष्यन्ति
देवा अपि सवासवाः ॥ ६५ ॥ एवं कृते रथस्थोऽहं गुणैरप्यधि-
कोऽर्जुनात् । भवेयं विजयेयञ्च फाल्गुनं कुरुसत्तम ॥ ६६ ॥ एतत्
कृतं महाराज त्वयेच्छामि परन्तप । क्रियतामेष कामो मे मा वः
कालोऽत्यगादयम् ॥ ६७ ॥ एवं कृते कृतं सह्यं सर्वकामैर्भवि-
ष्यति । ततो द्रक्ष्यसि संग्रामे यत् करिष्यामि भारत ॥ ५८ ॥
सर्वथा पाण्डवान् सङ्ख्ये विजेष्ये वै समागतान् । न हि मे समरे
शक्ताः समुद्यातुं सुरासुराः । किमु पाण्डुसुता राजन् रणे
मानुषयोनयः ॥ ६९ ॥

सञ्जय उवाच। एवमुक्तस्तव सुतः कर्णेनाहवशोभिना।
सम्पूज्य संप्रहृष्टात्मा ततो राधेयमब्रवीत् ॥ ७० ॥

दुर्य्योधन उवाच। एवमेतत् करिष्यामि यथा त्वं कर्ण मन्यसे।
सोपासङ्गा रथाः साश्वा अनुयास्यन्ति संयुगे ॥ ७१ ॥ नाराचान्
गार्द्धपत्रांश्च शकटानि वहन्तु ते। अनुयास्याम कर्ण त्वां वयं
सर्वे च पार्थिवाः ॥ ७२ ॥

सञ्जय उवाच। एवमुक्त्वा महाराज तव पुत्रः प्रतापवान्।
अभिगम्याब्रवीद्राजा मद्रराजमिदं वचः ॥ ७३ ॥

इति कर्णपर्वणि कर्णदुर्य्योधनसंवादे एकत्रिंशोऽध्यायः ॥ ३१ ॥

---

सञ्जय उवाच। पुत्रस्तव महाराज मद्रराज महारथम्।
विनयेनोपसङ्गम्य प्रणयाद्वाक्यमब्रवीत् ॥ १ ॥ सत्यव्रत महाभाग
द्विषतां तापवर्द्धन। मद्रेश्वर रणे शूर परसैन्यभयङ्कर ॥ २ ॥
श्रुतवानसि कर्णस्य ब्रुवतो वदताम्वर। यथा नृपतिसिंहानां
मध्ये त्वां वरयत्ययम् ॥ ३ ॥ स त्वामप्रतिवीर्य्याद्य शत्रुपक्षक्षयाय
च। मद्रेश्वर प्रयाचेऽहं शिरसा विनयेन च ॥ ४ ॥ तस्मात्
पार्थविनाशार्थं हितार्थं मम चैव हि। सारथ्यं रथिनां श्रेष्ठ
प्रणयात् कर्त्तुमर्हसि ॥ ५ ॥ त्वयि यन्तरि राधेयो विद्विषो मे
विजेष्यते ॥ ६ ॥ अभीषूणां हि कर्णस्य ग्रहीतान्यो न विद्यते।
ऋते हि त्वां महाभाग वासुदेवसमं युधि। स पाहि सर्वथा कर्णं
यथा ब्रह्मा महेश्वरम् ॥ ७ ॥ यथा च सर्वथापत्सु वार्ष्णेयः
पाति पाण्डवम्। तथा मद्रेश्वराद्य त्वं राधेयं प्रतिपालय ॥ ८ ॥
भीष्मो द्रोणः कृपः कर्णो भवान् भोजश्च वीर्य्यवान्। शकुनिः
सौबलो द्रौणिरहमेव च नो बलम् ॥ ९ ॥ एवमेष कृतो भागो
नवधा पृथिवीपते। न च भागोऽत्र भीष्मस्य द्रोणस्य च महा-

त्मनः ॥ १० ॥ ताभ्यामतीत्य तौ भागौ निहता मम शत्रवः ॥ ११ ॥ वृद्धौ हितौ नरव्याघ्रौ छलेन निहतौ च तौ। कृत्वा नसुकरं कर्म्म गतौ स्वर्गमितोऽनघ। तथान्ये पुरुषव्याघ्राः परैर्विनिहता युधि ॥ १२ ॥ अस्मदीयाश्च बहवः स्वर्गाय प्रहिता रणे। त्यक्त्वा प्राणान् यथाशक्ति चेष्टां कृत्वा च पुष्कलाम् ॥ १३ ॥ तदिदं हतभूयिष्ठं बलं मम नराधिप। पूर्व्वमप्यल्पकैः पार्थैर्हतं किमुत साम्प्रतम् ॥ १४ ॥ बलवन्तो महात्मानः कौन्तेयाः सत्यविक्रमा। बलशेषं न हन्युर्मे यथा तत् कुरु पार्थिव ॥ १५ ॥ हतवीरमिदं सैन्यं पाण्डवैः समरे विभो ॥ १६ ॥ कर्णो ह्येको महाबाहुरस्मत्प्रियहिते रतः। भवांश्च पुरुषव्याघ्र सर्व्वलोकमहारथः ॥१७॥ शल्य कर्णोऽर्जुनेनाद्य योद्धुमिच्छति संयुगे। तस्मिन् जयाशा विपुला मम मद्रजनाधिप ॥ १८ ॥ तस्याभीषुग्रहवरो नान्योऽस्ति भुवि कश्चन। पार्थस्य समरे कृष्णो यथाभीषुग्रहो वरः। तथा कर्णरथे राजंस्त्वमभीषुग्रहो भव ॥ १९ ॥ तेन युक्तो रणे पार्थो रक्ष्यमाणश्च मारिष। यानि कर्म्माणि कुरुते प्रत्यक्षाणि तवैव तत् ॥ २० ॥ पूर्वं न समरे ह्येवमवधीदर्जुनो रिपून्। इदानीं विक्रमो ह्यस्य कृष्णेन सहितस्य च ॥ २१ ॥ कृष्णेन सहितः पार्थो धार्त्तराष्ट्रीं महाचमूम्। अहन्यहनि मद्रेश द्रावयन् दृश्यते युधि ॥ २२ ॥ भागोऽवशिष्टः कर्णस्य तव चैव महाद्युते। तं भागं सह कर्णेन युगपन्नाशयाहवे ॥ २३ ॥ अरुणेन यथा सार्द्धं तमः सूर्य्यो व्यपोहति। तथा कर्णेन सहितो जहि पार्थं महाहवे ॥ २४ ॥ उद्यन्तौ च यथा सूर्य्यौ बालसूर्य्यसमप्रभौ। कर्णशल्यौ रणे दृष्ट्वा विद्रवन्तु महारथाः ॥ २५ ॥ सूर्य्यारुणौ यथा दृष्ट्वा तमो नश्यति मारिष। तथा नश्यन्तु कौन्तेयाः सपाञ्चालाः ससृञ्जयाः ॥ २६ ॥ रथिनां प्रवरः कर्णो यन्तॄणां प्रवरो भवान्। सन्निपाते समो लोके भवतोर्नास्ति कश्चन ॥ २७ ॥ यथा सर्व्वा

स्ववस्थासु वार्ष्णेयः पाति पाण्डवम् । तथा भवान् परित्रातु कर्णं वैकर्त्तनं रणे ॥ २८ ॥ त्वया सारथिना ह्येष अप्रधृष्यो भविष्यति । देवतानामपि रणे सशक्राणां महीपते । किं पुनः पाण्डवेयानां मा विशङ्कीर्वचो मम ॥ २९ ॥

सञ्जय उवाच । दुर्य्योधनवचः श्रुत्वा शल्यः क्रोधसमन्वितः । त्रिशिखां भ्रुकुटिं कृत्वा धुन्वन् हस्तौ पुनः पुनः ॥ ३० ॥ क्रोधरक्ते महानेत्रे परिवृत्य महाभुजः । कुलैश्वर्य्यश्रुतबलैर्दृप्तः शल्योऽब्रवीदिदम् ॥ ३१ ॥

शल्य उवाच । अवमन्यसि गान्धारे ध्रुवं वा परिशङ्कसे । यन्मां ब्रवीषि विस्रब्धं सारथ्यं क्रियतामिति ॥ ३२ ॥ अस्मत्तोऽभ्यधिकं कर्णं मन्यमानः प्रशंससि । न चाहं युधि राधेयं गणये तुल्यमात्मना ॥ ३३ ॥ आदिश्यतामभ्यधिको ममांशः पृथिवीपते । तमहं समरे हत्वा गमिष्यामि यथागतम् ॥ ३४ ॥ अथ वाप्येक एवाहं योत्स्यामि कुरुनन्दन । पश्य वीर्य्यं ममाद्य त्वं संग्रामे दहतो रिपून् ॥ ३५ ॥ न चाभिमानं कौरव्य निधाय हृदये पुमान् । अस्मद्विधः प्रवर्त्तेत मा मां त्वमभिशङ्किथाः । युधि चाप्यवमानो मे न कर्त्तव्यः कथञ्चन ॥ ३६ ॥ पश्य पीनौ मम भुजौ वज्रसंहननोपमौ । धनुः पश्य च मे चित्रं शरांश्चाशीविषोपमान् ॥ ३७ ॥ रथं पश्य च मे क्लृप्तं सदश्वैर्वातवेगितैः । गदाञ्च पश्य गान्धारे हेमपट्टविभूषिताम् ॥ ३८ ॥ दारयेयं महीं क्रुद्धो विकिरेयञ्च पर्वतान् । शोषयेयं समुद्रांश्च तेजसा स्वेन पार्थिव ॥ ३९ ॥ तं मामेवंविधं राजन् समर्थमरिनिग्रहे । कस्माद्युनक्षि सारथ्ये न्यूनस्याधिरथे रणे ॥ ४० ॥ न मामधुरि राजेन्द्र नियोक्तुं त्वमिहार्हसि । न हि पापीयसः श्रेयान् भूत्वा प्रेष्यत्वमुत्सहे ॥४१॥ यो ह्यभ्युपगतं प्रीत्या गरीयांसं वशे स्थितम् । वशे पापीयसो धत्ते तत्पापमधरोत्तरम् ॥ ४२ ॥ ब्रह्मासृजन्मुखे विप्रान् क्षत्रि-

यानपि बाहुतः । ऊरुभ्यामसृजद्वैश्यान् पद्भ्यां शूद्रानिति स्थितिः ॥ ४३ ॥ तेभ्यो वर्णविशेषाश्च प्रतिलोमानुलोमजाः । अथान्योऽन्यस्य संयोगात् चातुर्वर्ण्यस्य भारत ॥ ४४ ॥ गोप्तारः संग्रहीतारो दातारः क्षत्रियाः स्मृताः । याजनाध्यापनैर्विप्रा विशुद्धैश्च प्रतिग्रहैः । लोकस्यानुग्रहार्थाय स्थापिता ब्राह्मणा भुवि ॥ ४५ ॥ कृषिश्च पाशुपाल्यञ्च विशां दानञ्च धर्मतः । ब्रह्मक्षत्रविशां शूद्रा विहिताः परिचारकाः ॥ ४६ ॥ तथा वै क्षत्रियाणाञ्च सूता वै परिचारकाः । न क्षत्रिया वै सूतानां शृणु वाक्यं ममानघ ॥४७॥ सोऽहं मूर्द्धाभिषिक्तश्च राजर्षिकुलसम्भवः । महारथः समाख्यातः सेव्यः स्तव्यश्च वन्दिनाम् ॥ ४८ ॥ सोऽहमेतादृशो भूत्वा नेहारिबलसूदन । सूतपुत्रस्य संग्रामे सारथ्यं कर्त्तुमुत्सहे ॥ ४९ ॥ अवमानमहं प्राप्य न योत्स्यामि कथञ्चन । आपृच्छे त्वाद्य गान्धारे गमिष्यामि गृहाय वै ॥ ५० ॥

सञ्जय उवाच । एवमुक्त्वा नरव्याघ्रः शल्यः समितिशोभनः । उत्थाय प्रययौ तूर्णं राजमध्यादमर्षितः ॥ ५१ ॥ प्रणयाद्बहुमानाच्च निगृह्य च सुतस्तव । अब्रवीन्मधुरं वाक्यं साम्ना सर्वार्थसाधकम् ॥ ५२ ॥ यथा शल्य त्वमात्थेदमेवमेतदसंशयम् । अभिप्रायस्तु मे कश्चित्तन्निबोध जनेश्वर ॥ ५३ ॥ न कर्णोऽप्यधिकस्त्वत्तो न शङ्के त्वाञ्च पार्थिव । न हि मद्रेश्वरो राजा कुर्य्याद्यदनृतं भवेत् ॥ ५४ ॥ ऋतमेव हि पूर्वास्ते वदन्ति पुरुषोत्तमाः । तस्मादार्त्तायनिः प्रोक्तो भवानिति मतिर्मम ॥ ५५ ॥ शल्यभूतश्च शत्रूणां यस्मात्त्वं भुवि मानद । तस्माच्छल्येति ते नाम कथ्यते पृथिवीतले ॥ ५६ ॥ यदेव व्याहृतं पूर्वं भवता भूरिदक्षिण । तदेव कुरु धर्मज्ञ मदर्थं मद्यदुच्यसे ॥ ५७ ॥ न च त्वत्तो हि राधेयो न चाहमपि वीर्य्यवान् । वृणोमस्त्वं हयाग्र्याणां यन्तारमिति संयुगे ॥ ५८ ॥ यथा ह्यभ्यधिकः कर्णो गुणैस्तात धनञ्जयात् । वासु-

दैवादपि त्वञ्च लोकोऽयमिति मन्यते ॥ ५९ ॥ कर्णो ह्यभ्यधिकः पार्थादस्त्रैरेव नरर्षभ । भवानप्यधिकः कृष्णादश्वज्ञाने तथा बले ॥ ६० ॥ यथाश्वहृदयं वेद वासुदेवो महामनाः । द्विगुणं त्वं तथा वेत्सि मद्रराज न संशयः ॥ ६१ ॥

शल्य उवाच । यन्मां ब्रवीषि गान्धारे मध्ये सैन्यस्य कौरव । विशिष्टं देवकीपुत्रात् प्रीतिमानस्म्यहं त्वयि ॥ ६२ ॥ एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः । युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे ॥ ६३ ॥ समयश्च हि मे वीर कश्चिद्वैकर्त्तनं प्रति । उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य सन्निधौ ॥ ६४ ॥

सञ्जय उवाच । तथेति राजन् पुत्रस्ते सह कर्णेन भारत । अब्रवीन्मद्रराजस्य सुतं भरतसत्तम ॥ ६५ ॥

इति कर्णपर्वणि शल्यस्य कर्णसारथ्यस्वीकारे द्वात्रिंशोऽध्यायः॥३२॥

---

दुर्य्योधन उवाच । भूय एव तु मद्रेश यत्त्वां वक्ष्यामि तच्छृणु । यथा पुरावृत्तमिदं युद्धे देवासुरे प्रभो ॥ १ ॥ यदुक्तवान् पितुर्मह्यं मार्कण्डेयो महानृषिः । तदशेषेण ब्रुवतो मम राजर्षिसत्तम । तन्निबोध न चाप्यत्र कर्त्तव्या ते विचारणा ॥ २ ॥ देवानामसुराणाञ्च परस्परजयैषिणाम् । बभूव परमो राजन् संग्रामस्तारकामयः । निर्ज्जिताश्च तदा दैत्या दैवतैरिति नः श्रुतम् ॥३॥ निर्ज्जितेषु च दैत्येषु तारकस्य सुतास्त्रयः । ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव ॥ ४ ॥ तप उग्रं समास्थाय परमे नियमे स्थिताः । तपसा कर्षयामासुर्देहांस्ते शत्रुतापन ॥ ५ ॥ दमेन तपसा चैव नियमेन समाधिना । तेषां पितामहः प्रीतो वरदः प्रददौ वरान् ॥ ६ ॥ अवध्यत्वञ्च ते राजन् सर्व्वभूतेषु सर्व्वदा । सहिता वरयामासुः सर्व्वलोकपितामहम् ॥ ७ ॥ तानब्रवीत्तदा

देवो लोकानां प्रभुरीश्वरः। नास्ति सर्वामरत्वं वै निवर्त्तध्वमितोऽसुराः। अन्यं वरं वृणुध्वं वै यादृशं संप्ररोचते॥ ८॥ ततस्ते सहिता राजन् संप्रधार्य्यासकृद्बहु। सर्वलोकेश्वरं वाक्यं प्रणम्येदमथाब्रुवन्। अस्माकं त्वं वरं देव प्रयच्छेमं पितामह॥ ९॥ वयं पुराणि त्रीण्येव समास्थाय महीमिमाम्। विचरिष्याम लोकेऽस्मिंस्त्वत्प्रसादपुरस्कृताः॥ १०॥ ततो वर्षसहस्रे तु समेष्यामः परस्परम्। एकीभावं गमिष्यन्ति पुराण्येतानि चानघ॥११॥ समागतानि चैकत्वं यो हन्याद्भगवंस्तदा। एकेषुणा देववरः स नो मृत्युर्भविष्यति॥ १२॥ एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवम्॥ १३॥ ते तु लब्धवराः प्रीताः संप्रधार्य्य परस्परम्। पुरत्रयविसृष्ट्यर्थं मयं वव्रुर्महासुरम्। विश्वकर्माणमजरं दैत्यदानवपूजितम्॥ १४॥ ततो मयः स्वतपसा चक्रे धीमान् पुराणि च। त्रीणि काञ्चनमेकं वै रौप्यं कार्ष्णायसं तथा॥ १५॥ काञ्चनं दिवि तत्रासीदन्तरीक्षे च राजतम्। आयसञ्चाभवद्भौमं चक्रस्थं पृथिवीपते॥ १६॥ एकैकं योजनशतं विस्तारायामसम्मितम्। गृहाट्टालकसंयुक्तं बृहत्प्राकारतोरणम्॥ १७॥ गृहप्रवरसम्बाधमसम्बाधमहापथम्। प्रासादैर्विविधैश्चैव द्वारैश्चाप्युपशोभितम्॥ १८॥ पुरेषु चाभवन्राजन् राजानो वै पृथक् पृथक्॥ १९॥ काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः। राजतं कमलाक्षस्य विद्युन्मालिन आयसम्॥ २०॥ त्रयस्ते दैत्यराजानस्त्रींल्लोकानाशु तेजसा। आक्रम्य तस्थुर्वर्षांश्च कश्च नाम प्रजापतिः॥ २१॥ तेषां दानवमुख्यानां प्रयुतान्यर्बुदानि च। कोटयश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः॥ २२॥ मांसादाश्च सुदृप्ताश्च सुरैर्विनिकृताः पुरा। महदैश्वर्य्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः॥ २३॥ सर्वेषाञ्च पुनस्तेषां सर्वयोगवहो मयः। तमाश्रित्य हि ते सर्वे वर्त्तयन्त्यकुतोभयाः॥ २४॥ यो हि यं मनसा कामं दध्यात् त्रिपुरसंश्रयः।

तस्मै कामं मयस्तं तं विदधे मायया तदा ॥ २५ ॥ तारकाक्षसुतो वीरो हरिर्नाम महाबलः। तपस्तेपे परमकं येनातुष्यत् पितामहः ॥ २६ ॥ सन्तुष्टमवृणोद्देवं वापी भवतु नः पुरे। शस्त्रैर्विनिहता यत्र क्षिप्ताः स्युर्बलवत्तराः ॥ २७ ॥ स तु लब्धा वरं वीरस्तारकाक्षसुतो हरिः। ससृजे तत्र वापीं तां मृतसञ्जीवनीं प्रभो ॥ २८ ॥ येन रूपेण दैत्यास्तु येन वेशेन चैव ह। मृतस्तस्यां परिक्षिप्तास्तादृशेनैव जज्ञिरे ॥ २९ ॥ तां प्राप्य ते पुनस्तांस्तु सर्वान् लोकान् बबाधिरे। महता तपसा सिद्धाः सुराणां भयवर्द्धनाः ॥ ३० ॥ न तेषामभवद्राजन् क्षयो युद्धे कथञ्चन ॥३१॥ ततस्ते लोभमोहाभ्यामभिभूता विचेतसः। निर्ह्रीकाः संस्थितीः सर्वे स्थापिताः समलूलुपन् ॥ ३२ ॥ विद्राव्य सगणान् देवांस्तत्र तत्र तदा तदा। विचेरुः स्वेन कामेन वरदानेन दर्पिताः ॥ ३३ ॥ देवारण्यानि सर्वाणि प्रियाणि च दिवौकसाम्। ऋषीणामाश्रमान् पुण्यान् रम्यान् जनपदांस्तथा। व्यनाशयन्त मर्य्यादां दानवा दुष्टचारिणः ॥ ३४ ॥ पीड्यमानेषु लोकेषु ततः शक्रो मरुद्वृतः। पुराण्यायोधयाञ्चक्रे वज्रपातैः समन्ततः ॥ ३५ ॥ नाशकत्तान्यभेद्यानि यदा भेत्तुं पुरन्दरः। पुराणि वरदत्तानि धात्रा तेन नराधिप ॥ ३६ ॥ तदा भीतः सुरपतिर्मुक्त्वा तानि पुराण्यथ। तैरेव विबुधैः सार्द्धं पितामहमरिन्दम। जगामाथ तदाख्यातुं विप्रकारं सुरेतरैः ॥ ३७ ॥ ते तत्त्वं सर्वमाख्याय शिरोभिः संप्रणम्य च। बधोपायमपृच्छन्त भगवन्तं पितामहम् ॥ ३८ ॥ श्रुत्वा तद्भगवान् देवो देवानिदमुवाच ह। ममापि सोऽपराध्नोति यो युष्माकमसौम्यकृत् ॥ ३९ ॥ असुरा हि दुरात्मानः सर्व एव सुरद्विषः। अपराध्यन्ति सततं ये युष्मान् पीड़यन्त्युत ॥ ४० ॥ अहं हि तुल्यः सर्वेषां भूतानां नात्र संशयः। अधार्मिकास्तु हन्तव्या इति मे व्रतमाहितम् ॥ ४१ ॥ एकेषुणा विभेद्यानि तानि दुर्गाणि

नान्यथा। न च स्थाणुमृते शक्तो भेत्तुमेकेषुणापरः ॥ ४२ ॥ ते यूयं स्थाणुमीशानं जिष्णुमक्लिष्टकारिणम्। योद्धारं वृणुतादित्याः स तान् हन्ता सुरेतरान् ॥ ४३ ॥ इति तस्य वचः श्रुत्वा देवाः शक्रपुरोगमाः। ब्रह्माणमग्रतः कृत्वा वृषाङ्कं शरणं ययुः ॥ ४४ ॥ तपः परममातस्थुर्गृणन्तो ब्रह्म शाश्वतम्। ऋषिभिः सह धर्मज्ञा भवं सर्वात्मना गताः ॥ ४५ ॥ तुष्टुवुर्वाग्भिरुग्राभिर्भयेष्वभयदं नृप। सर्वात्मानं महात्मानं येनाप्तं सर्वमात्मना ॥ ४६ ॥ तपोविशेषैर्बहुभिर्योगं यो वेद चात्मनः। यः साङ्ख्यमात्मनो वेद यस्य चात्मा वशे सदा ॥ ४७ ॥ तं ते ददृशुरीशानं तेजोराशिमुमापतिम्। अनन्यसदृशं लोके प्रभवन्तमकल्मषम् ॥ ४८ ॥ एकञ्च भगवन्तं ते नानारूपमकल्पयन्। आत्मनः प्रतिरूपाणि रूपाण्यथ महात्मनि। परस्परस्य चापश्यन् सर्वे परमविस्मिताः ॥ ४९ ॥ सर्वभूतमयं दृष्ट्वा तमजं जगतः पतिम्। देवा ब्रह्मर्षयश्चैव शिरोभिर्धरणीं गताः ॥ ५० ॥ तान् स्वस्तिवादेनाभ्यर्च्य समुत्थाप्य च शङ्करः। वत ब्रूतेति भगवान् स्मयमानोऽभ्यभाषत ॥ ५१ ॥ त्र्यम्बकेणाभ्यनुज्ञातास्ततस्ते स्वस्थचेतसः। नमो नमो नमस्तेऽस्तु प्रभो इत्यब्रुवन् वचः ॥ ५२ ॥ नमो देवाधिदेवाय धन्विनेऽयातिमन्यवे। प्रजापतिमखघ्नाय प्रजापतिभिरीड्यते ॥ ५३ ॥ नमः स्तुताय स्तुत्याय स्तूयमानाय मृत्यवे। विलोहिताय चोग्राय नीलग्रीवाय शूलिने ॥ ५४ ॥ अमोघाय मृगाक्षाय प्रवरायुधयोधिने। अर्हाय चैव शुद्धाय क्षयाय क्रथनाय च ॥ ५५ ॥ दुर्वारणाय शुक्राय ब्रह्मणेब्रह्मचारिणे। ईशानायाप्रमेयाय नियन्त्रे चीरवाससे ॥ ५६ ॥ तपोनित्याय पिङ्गाय व्रतिने कृत्तिवाससे। कुमारपित्रे त्र्यक्षाय प्रवरायुधपाणिने ॥ ५७ ॥ प्रपन्नार्त्तिविनाशाय ब्रह्मद्विट्सङ्घघातिने। वनस्पतीनां पतये नराणां पतये नमः। गवाञ्च पतये नित्यं यज्ञानां पतये नमः ॥ ५८ ॥ नमोऽस्तु ते

सुसैन्याय त्र्यम्बकायोग्रतेजसे । मनोवाक्कर्मभिर्देव त्वां प्रपन्नान् भजस्व नः ॥ ५९ ॥ ततः प्रसन्नो भगवान् स्वागतेनाभिनन्द्य तान् । प्रोवाच व्येतु वस्त्रासो ब्रूत किं करवाणि वः ॥ ६० ॥

इति कर्णपर्वणि त्रिपुराख्याने त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

---

दुर्योधन उवाच । पितृदेवर्षिसङ्घेभ्योऽभये दत्ते महात्मना । सत्कृत्य शङ्करं प्राह लोकहितं वचः ॥ १ ॥ तवातिसर्गात् सर्वेश प्राजापत्यमिदं पदम् । मयाधितिष्ठता दत्ता दानवेभ्यो महान् वरः ॥ २ ॥ तानतिक्रान्तमर्य्यादान्नान्यः संहर्त्तुमर्हति । त्वामृते भूतभव्येश त्वं ह्येषां प्रत्यरिर्वधे ॥ ३ ॥ स त्वं देव प्रपन्नानां याचतां च दिवौकसाम् । कुरु प्रसादं देवेश दानवान् जहि शूलधृक् ॥ ४ ॥ त्वत्प्रसादाज्जगत् सर्वं सुखमेधतु मानद । शरण्यस्त्वं हि लोकेश ते वयं शरणं गताः ॥ ५ ॥

स्थाणुरुवाच । हन्तव्याः शत्रवः सर्वे युष्माकमिति मे मतिः । न त्वेक उत्सहे हन्तुं बलस्था हि सुरद्विषः ॥ ६ ॥ ते यूयं सहिताः सर्वे मदीयेनार्द्धतेजसा । जयध्वं युधि तान् शत्रून् सङ्घातो हि महाबलः ॥ ७ ॥

देवा ऊचुः । अस्मत्तेजोबलं यावत्तावद्द्विगुणमेव च । तेषामिति हि मन्यामो दृष्टतेजोबला हि ते ॥ ८ ॥

श्रीभगवानुवाच । वध्यास्ते सर्वतः पापा ये युष्मास्वपराधिनः । मम तेजोबलार्द्धेन सर्वान्निघ्नत शात्रवान् ॥ ९ ॥

देवा ऊचुः । बिभर्त्तुं तव तेजोऽर्द्धं न शक्ष्यामो महेश्वर । सर्वेषां नो बलार्द्धेन त्वमेव जहि शात्रवान् ॥ १० ॥

श्रीभगवानुवाच । यदि शक्तिर्न वः काचिद्बिभर्त्तुं मामकं बलम् । अहमेतान् हनिष्यामि युष्मत्तेजोऽर्द्धसंयुतः ॥ ११ ॥

दुर्य्योधन उवाच। ततस्तथेति देवेशस्तैरुक्तो राजसत्तम।
अर्द्धमादाय सर्व्वेभ्यस्तेजसाभ्यधिकोऽभवत्॥ १२ ॥ स तु देवो
बलेनासीत् सर्व्वेभ्यो बलवत्तरः। महादेव इति ख्यातस्ततः प्रभृति
शङ्करः॥ १३ ॥ ततोऽब्रवीन्महादेवो धनुर्बाणधरस्त्वहम्। हनि-
ष्यामि रथेनाजौ तान् रिपून् वो दिवौकसः॥ १४ ॥ ते यूयं मे
रथञ्चैव धनुर्बाणं तथैव च। पश्यध्वं यावदद्यैतान् पातयामि
महीतले॥ २५ ॥

देवा ऊचुः। मूर्त्तिं सर्वां समाधाय त्रैलोक्यस्य ततस्ततः।
रथं ते कल्पयिष्यामो देवेश्वर महौजसम्॥ १६ ॥ तथैव बुद्ध्या
विहितं विश्वकर्म्मकृतं महत्। ततो विबुधशार्दूलास्तं रथं सम-
कल्पयन्॥ १७ ॥ विष्णुं सोमं हुताशञ्च तस्येषुं समकल्पयन्।
शृङ्गमग्निर्बभूवास्य भल्लः सोमो विशाम्पते। कुड्मलञ्चाभवद्विष्णु-
स्तस्मिन्निषुवरे तदा॥ १८ ॥ वन्धुरं पृथिवीं देवीं विशालपुर-
मालिनीम्। सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा॥ १९ ॥ मन्दरः
पर्वतश्चाक्षं जङ्घा तस्य महानदी। दिशश्च प्रदिशश्चैव परिवारो
रथस्य ह॥ २० ॥ ईषा नक्षत्रवंशश्च युगः कृतयुगोऽभवत्।
कूवरश्च रथस्यासीद्वासुकिर्भुजगोत्तमः॥ २१ ॥ अपस्करमधिष्ठानं
हिमवान् विन्ध्यपर्वतः। उदयास्तावधिष्ठाने गिरी चक्रुः सुरो-
त्तमाः॥ २२ ॥ समुद्रमक्षमसृजन् दानवालयमुत्तमम्। सप्तर्षि-
मण्डलञ्चैव रथस्यासीत्परिष्कारः॥ २३ ॥ गङ्गा सरस्वती सिन्धु-
र्धुरमाकाशमेव च। उपस्करो रथस्यासन्नापः सर्वाश्च निम्नगाः
॥ २४ ॥ अहोरात्राः कलाश्चैव काष्ठाश्च ऋतवस्तथा। अनुकर्षं
ग्रहा दीप्ता वरूथञ्चापि तारकाः॥ २५ ॥ धर्मार्थकामसंयुक्तं
त्रिवेणुं दारुबन्धनम्। ओषधीर्वीरुधस्तत्र नानापुष्पफलोपगाः
॥ २६ ॥ सूर्य्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे। पक्षौ पूर्वा-
परौ तत्र कृते रात्र्यहनी शुभे॥ २७ ॥ दशनागपतीनीषां धृत-

राष्ट्रमुखान् दृढ़ान्। यां युगं युगचर्म्माणि संवर्त्तकवलाहकान्। सन्ध्यां धृतिञ्च मेधाञ्च स्थितिं सन्नतिमेव च ॥ २८ ॥ ग्रहनक्षत्रताराभिश्चर्म्म चित्रं नभस्तलम्। सुराम्बुप्रेतवित्तानां पतील्लोकेश्वरान् हयान् ॥ २९ ॥ कालपृष्ठोऽथ नहुषः कर्कोटकधनञ्जयौ। इतरे चाभवन्नागा हयानां वालबन्धनाः ॥ ३० ॥ दिशश्च प्रदिशश्चैव रश्मयो रथवाजिनाम्। वषट्कारः प्रतोदोऽभूत् गायत्री शीर्षबन्धनी ॥ ३१ ॥ सिनीवालीमनुमतिं कुहूं राकाञ्च सुव्रताम्। योक्त्राणि चक्रुर्वाहानां रोहकांस्तत्र कण्टकान् ॥ ३२ ॥ कर्म्म सत्यं तपोऽर्थश्च विहितास्तत्र रश्मयः। अधिष्ठानं मनश्चासीत् परिरथ्या सरस्वती ॥ ३३ ॥ नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः। विद्युदिन्द्रधनुर्नद्धं रथं दीप्तं व्यदीपयन् ॥ ३४ ॥ यो यज्ञे विहितः पूर्वमीशानस्य महात्मनः। सम्वत्सरो धनुस्तद्वै सावित्री ज्या महास्वना ॥ ३५ ॥ दिव्यञ्च वर्म्म विहितं महार्हं रत्नभूषितम्। अभेद्यं विरजस्कं वै कालचक्रवहिष्कृतम् ॥ ३६ ॥ ध्वजयष्टिरभून्मेरुः श्रीमान् कनकपर्व्वतः। पताकाश्चाभवन्मेघास्तड़िद्भिः समलंकृताः ॥ ३७ ॥ रेजुरध्वर्य्युमध्यस्था ज्वलन्त इव पावकाः। क्लृप्तन्तु तं रथं दृष्ट्वा विस्मिता देवताभवन् ॥ ३८ ॥ सर्व्वलोकस्य तेजांसि दृष्ट्वैकस्थानि मारिष। युक्तं निवेदयामासुर्देवास्तस्मै महात्मने ॥ ३९ ॥ एवं तस्मिन् महाराज कल्पिते रथसत्तमे। देवैर्मनुजशार्दूल द्विषतामभिमर्द्दने ॥ ४० ॥ स्वान्यायुधानि दिव्यानि न्यदधात् शङ्करो रथे। ध्वजयष्टिं वियत् कृत्वा स्थापयामास गोवृषम् ॥ ४१ ॥ ब्रह्मदण्डः कालदण्डो रुद्रदण्डस्तथा ज्वरः। परिष्कन्दा रथस्यासन् सर्व्वतोदिशमुद्यताः ॥ ४२ ॥ अथर्व्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः। ऋग्वेदः सामवेदश्च पुराणञ्च पुरःसराः ॥ ४३ ॥ इतिहासयजुर्व्वेदौ पृष्ठरक्षौ बभूवतुः। दिव्या वाचश्च दिव्याश्च परिपार्श्वचराः स्थिताः ॥ ४४ ॥ स्तोत्रा-

दयश्च राजेन्द्र वषट्कारस्तथैव च। ओङ्कारश्च मुखे राजन्नति-
शोभाकरोऽभवत् ॥ ४५ ॥ विचित्रमृतुभिः षड्भिः कृत्वा संवत्-
सरं धनुः। छायामेवात्मनश्चक्रे धनुर्ज्यामक्षयां रणे ॥ ४६ ॥
कालो हि भगवान्रुद्रस्तस्य संवत्सरो धनुः। तस्माद्रौद्री काल-
रात्रिर्ज्या कृता धनुषोऽजरा ॥ ४७ ॥ इषुश्चाप्यभवद्विष्णुर्ज्वलनः
सोम एव च। अग्नीषोमं जगत् कृत्स्नं वैष्णवञ्चोच्यते जगत्
॥ ४८ ॥ विष्णुश्चात्मा भगवतो भवस्यामिततेजसः। तस्माद्धनु-
र्ज्यासंस्पर्शं न विषेहुर्हरस्य ते ॥ ४९ ॥ तस्मिन् शरे तिग्ममन्यु-
र्मुमोचाविषहं प्रभुः। भृग्वङ्गिरोमन्युभवं क्रोधाग्निमतिदुःसहम्
॥ ५० ॥ स नीललोहितो धूम्रः कृत्तिवासा भयङ्करः। आदित्या
युतसङ्काशस्तेजोज्वालावृतोऽज्वलत् ॥५१॥ दुश्च्यावश्च्यावनो जेता
हन्ता ब्रह्मद्विषां हरः। नित्यं त्राता च हन्ता च धर्माधर्माश्रिता-
न्नरान् ॥ ५२ ॥ प्रमाथिभिर्भीमबलैर्भीमरूपैर्मनोजवैः। विभाति
भगवान् स्थाणुस्तैरेवात्मगुणैर्वृतः ॥ ५३ ॥ तस्याङ्गानि समा-
श्रित्य स्थितं विश्वमिदं जगत्। जङ्गमाजङ्गमं राजन् शुशुभेऽद्भुत-
दर्शनम् ॥ ५४ ॥ दृष्ट्वा तन्तु रथं युक्तं कवची स शरासनी।
वाणमादाय तं दिव्यं सोमविष्ण्वग्निसम्भवम् ॥ ५५ ॥ तस्य राजं
स्तदा देवाः कल्पयाञ्चक्रिरे प्रभोः। पुण्यगन्धवहं राजन् श्वसनं
देवसत्तमम् ॥ ५६ ॥ तमास्थाय महादेवस्त्रासयन् दैवतानपि।
आरुरोह तदा यत्तः कम्पयन्निव मेदिनीम् ॥ ५७ ॥ तमारुरुक्षुं
देवेशं तुष्टुवुः परमर्षयः। गन्धर्वा देवसङ्घाश्च तथैवाप्सरसांगणाः
॥ ५८ ॥ ब्रह्मर्षिभिस्तूयमानो वन्द्यमानश्च वन्दिभिः। तथैवाप्स-
रसांवृन्दैर्नृत्यद्भिर्नृत्यकोविदैः ॥ ५९ ॥ स शोभमानो वरदः
खड्गी वाणी शरासनी। हसन्निवाब्रवीद्देवान् सारथिः को
भविष्यति ॥ ६० ॥ तमब्रुवन् देवगणा यं भवान् संनियोक्ष्यते।
स भविष्यति देवेश सारथिस्ते न संशयः ॥ ६१ ॥ तानब्रवीत्

पुनर्द्देवो मत्तः श्रेष्ठतरो हि यः। तं सारथिं कुरुध्वं मे स्वयं
सञ्चिन्त्य मा चिरम् ॥ ६२ ॥ एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं
महात्मना। गत्वा पितामहं देवाः प्रसाद्येदं वचोऽब्रुवन् ॥ ६३ ॥
यथा त्वत्कथितं देव त्रिदशारिविनिग्रहे। तथा च कृतमस्माभिः
प्रसन्नो नो वृषध्वजः ॥ ६४ ॥ रथश्च विहितोऽस्माभिर्विचित्रायुध
संवृतः। सारथिञ्च न जानीमः कः स्यात्तस्मिन्रथोत्तमे ॥ ६५ ॥
तस्माद्विधीयतां कश्चित् सारथिर्द्देवसत्तमः। सफलां तां गिरं देव
कर्त्तुमर्हसि नो विभो ॥ ६६ ॥ एवमस्मासु हि पुरा भगवन्नुक्त-
वानसि। हितं कर्त्तास्मि भवतामिति तत् कर्त्तुमर्हसि ॥ ६७ ॥
स देवयुक्तो रथसत्तमो नो दुराधरो द्रावणः शात्रवाणाम्।
पिनाकपाणिर्विहितोऽत्र योद्धा विभीषयन् दानवानुद्यतोऽसौ ॥६८
तथैव वेदाश्चतुरो हयाग्र्या धरा सशैला च रथो महात्मनः।
नक्षत्रवंशानुगतो वरूथी हरो योद्धा सारथिर्नाभिलक्ष्यः ॥ ६९ ॥
तत्र सारथिरेष्टव्यः सर्व्वैरेतैर्विशेषवान्। तत्प्रतिष्ठो रथो देव
हरो योद्धा तथैव च। कवचानि सशस्त्राणि कार्म्मुकञ्च पितामह
॥ ७० ॥ त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम्। त्वं हि
सर्व्वगुणैर्युक्तो देवतेभ्योऽधिकः प्रभो ॥ ७१ ॥ स रथं तूर्णमारुह्य
संयच्छ परमान् हयान्। जयाय त्रिदशेशानां वधाय त्रिदश-
द्विषाम् ॥ ७२ ॥ इति ते शिरसा नत्वा त्रिलोकेशं पितामहम्।
देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम् ॥ ७३ ॥

पितामह उवाच। नात्र किञ्चिन्मृषा वाक्यं यदुक्तं त्रिदिवौ-
कसः। संयच्छामि हयानेष युध्यतो वै कपर्द्दिनः ॥ ७४ ॥ ततः
स भगवान्देवो लोकस्रष्टा पितामहः। सारथ्ये कल्पितो देवै-
रीशानस्य महात्मनः ॥ ७५ ॥ तस्मिन्नारोहति क्षिप्रं स्यन्दने
लोकपूजिते। शिरोभिरगमन् भूमिं ते हया वातरंहसः ॥ ७६ ॥
आरुह्य भगवान्देवो दीप्यमानः स्वतेजसा। अभीषून् हि प्रतो-

दत्त्व सन्त्रग्राह पितामहः ॥ ७७ ॥ तत उत्थाप्य भगवान् तान्
हयाननिलोपमान् । वभाषे च तदा स्थाणुमारोहेति सुरोत्तमम्
॥ ७८ ॥ ततस्तमिषुमादाय विष्णुसोमाग्निसम्भवम् । आरुरोह
तदा स्थाणुर्धनुषा कम्पयन् परान् ॥ ७९ ॥ तमारूढ़न्तु देवेशं
तुष्टुवुः परमर्षयः । गन्धर्वा देवसङ्घाश्च तथैवाप्सरसां गणाः ॥८०॥
स शोभमानो वरदः खड्गी वाणी शरासनी । प्रदीपयन्रथे
तस्थौ त्रींल्लोकान् स्वेन तेजसा ॥ ८१ ॥ ततो भूयोऽब्रवीद्देवो
देवानिन्द्रपुरोगमान् । न हन्यादिति कर्त्तव्यो न शोको वः कथ-
ञ्चन ॥ ८२ ॥ हतानीत्येव जानीत वाणेनानेन चासुरान् । ते
देवाः सत्यमित्याहुर्निहता इति चाब्रुवन् ॥ ८३ ॥ न च तद्वचनं
मिथ्या यदाह भगवान् प्रभुः । इति सञ्चिन्त्य वै देवाः परां तुष्टि-
मवाप्नुवन् ॥ ८४ ॥ ततः प्रयातो देवेशः सर्वैर्देवगणैर्वृतः । रथेन
महता राजन्नुपमा यस्य नास्ति ह ॥ ८५ ॥ स्वैश्च पारिषदैर्देवः
पूज्यमानो महायशाः । नृत्यद्भिरपरैश्चैव मांसभक्ष्यैर्दुरासदैः ।
धावमानैः समन्ताच्च तर्ज्जमानैः परस्परम् ॥ ८६ ॥ ऋषयश्च महा-
भागास्तपोयुक्ता महागुणाः । आशंसुर्विजयं देवा महादेवस्य
सर्वशः ॥ ८७ ॥ एवं प्रयाते वरदे लोकानामभयङ्करे । तुष्ट-
मासीज्जगत् सर्वं देवताश्च नरोत्तम ॥ ८८ ॥ ऋषयस्तत्र देवेशं
स्तुवन्तो बहुभिः स्तवैः । तेजश्चास्मै वर्द्धयन्तो राजन्नासन् पुनः
पुनः ॥ ८९ ॥ गन्धर्वाणां सहस्राणि प्रयुतान्यर्वुदानि च । वाद-
यन्ति प्रयाणेऽस्य वाद्यानि विविधानि च ॥ ९० ॥ ततोऽधिरूढ़े
वरदे प्रयाते चासुरान् प्रति । साधुसाध्विति विश्वेशः स्मयमानो-
ऽभ्यभाषत ॥ ९१ ॥ याहि देव यतो दैत्याश्चोदयाश्वानतन्द्रितः ।
पश्य वाह्वोर्बलं मेऽद्य निघ्नतः शात्रवान्रणे ॥ ९२ ॥ ततोऽश्वां-
श्चोदयामास मनोमारुतरंहसः । येन तत्त्रिपुरं राजन् दैत्यदानव-
रक्षितम् ॥ ९३ ॥ पिवद्भिरिव चाकाशं तैर्हयैर्लोकपूजितैः ।

जगाम भगवान् क्षिप्रं जयाय त्रिदिवौकसाम् ॥ ९४ ॥ प्रयाते रथमास्थाय त्रिपुराभिमुखे भवे । ननाद सुमहानादमृषभः पूरयन् दिशः ॥ ९५ ॥ ऋषभस्यास्य निनदं श्रुत्वा भयकरं महत् । विनाशमगमंस्तत्र तारकाः सुरशत्रवः ॥ ९६ ॥ अपरेऽवस्थितास्तत्र युद्धायाभिमुखास्तदा । ततः स्थाणुर्महाराज शूलधृक् क्रोधमूर्च्छितः ॥ ९७ ॥ त्रस्तानि सर्व्वभूतानि त्रैलोक्यं भूः प्रकम्पते । निमित्तानि च घोराणि तत्रासन्दधतः शरम् ॥ ९८ ॥ तस्मिन् सोमाग्निविष्णूनां क्षोभेण ब्रह्मरुद्रयोः । स रथो धनुषः क्षोभादतीव ह्यवसीदति ॥ ९९ ॥ ततो नारायणस्तस्माच्छरभागाद्विनिःसृतः । वृषरूपं समास्थाय उज्जहार महारथम् ॥ १०० ॥ सीदमाने रथे चैव नर्द्दमानेषु शत्रुषु । स संभ्रमात्तु भगवान् नादं चक्रे महाबलः ॥१०१॥ वृषभस्यास्थितो मूर्द्ध्नि हयपृष्ठे च मानद । तदा स भगवान् रुद्रो निरैक्षद्दानवं पुरम् ॥ १०२ ॥ वृषभस्यास्थितो रुद्रो हयस्य च नरोत्तम । स्तनांस्तदापातयत खुरांश्चैव द्विधाकरोत् ॥ १०३ ॥ ततः प्रभृति भद्रन्ते गवां द्वैधीकृताः खुराः । हयानाञ्च स्तना राजंस्तदाप्रभृति नाभवन् । पीड़ितानां बलवता रुद्रेणाद्भुतकर्म्मणा ॥ १०४ ॥ तथाधिज्यं धनुः कृत्वा सर्व्वः सन्धाय तं शरम् । युक्त्वा पाशुपतास्त्रेण त्रिपुरं समचिन्तयत् ॥ १०५ ॥ तस्मिन् स्थिते महाराज रुद्रे विधृतकार्म्मुके । पुराणि तेन कालेन जग्मुरेवैकतां तदा ॥ १०६ ॥ एकीभावं गते चैव त्रिपुरत्वमुपागते । बभूव तुमुलो हर्षो देवतानां महात्मनाम् ॥ १०७ ॥ ततो देवगणाः सर्व्वे सिद्धाश्च परमर्षयः । जयेति वाचो मुमुचुः संस्तुवन्तो महेश्वरम् ॥ १०८ ॥ ततोऽग्रतः प्रादुरभूत्त्रिपुरं जघ्नुषोऽसुरान् । अनिर्द्देश्योग्रवपुषो देवस्यासह्यतेजसः ॥ १०९ ॥ स तद्विकृष्य भगवान् दिव्यं लोकेश्वरो धनुः । त्रैलोक्यसारं तमिषुं मुमोच त्रिपुरं प्रति ॥ ११० ॥ उत्सृष्टे वै महाभाग तस्मिन्निषु-

वरे तदा । महानार्त्तस्वरो ह्यासीत् पुराणां पततां भुवि । तत्
सासुरगणं दग्ध्वा प्राक्षिपत् पश्चिमार्णवे ॥ १११ ॥ एवं तत्त्रिपुरं
दग्धं दानवाश्चाप्यशेषिताः । महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितै-
षिणा ॥ ११२ ॥ स चात्मक्रोधजो वह्निर्हाहेत्युक्त्वा निवारितः ।
मा कार्षीर्भस्मसाल्लोकानिति त्र्यक्षोऽब्रवीच्च तम् ॥ ११३ ॥ ततः
प्रकृतिमापन्ना देवा लोकास्तथर्षयः । तुष्टुवुर्वाग्भिरग्र्याभिः स्थाणु-
मप्रतिमौजसम् ॥ ११४ ॥ तेऽनुज्ञाता भगवता जग्मुः सर्वे यथा-
गतम् । कृतकामाः प्रयत्नेन प्रजापतिमुखाः सुराः ॥ ११५ ॥ एवं
स भगवान् देवो लोकस्रष्टा महेश्वरः । देवासुरगणाध्यक्षो
लोकानां विदधे शिवम् ॥ ११६ ॥ यथैव भगवान् ब्रह्मा लोकधाता
पितामहः । सारथ्यमकरोत्तत्र रुद्रस्य परमोऽव्ययः ॥ ११७ ॥
तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः । संयच्छतु हयानस्य
राधेयस्य महात्मनः ॥ ११८ ॥ त्वं हि कृष्णाच्च कर्णाच्च फाल्गुनाच्च
विशेषतः । विशिष्टो राजशार्दूल नास्ति तत्र विचारणा ॥११९॥
युद्धे ह्ययं रुद्रकल्पस्त्वञ्च ब्रह्मसमो नघ । तस्माच्छक्तौ युवां जेतुं
मच्छत्रूंस्तानिवासुरान् ॥ १२० ॥ यथा शल्याद्य कर्णोऽयं श्वेताश्वं
कृष्णसारथिम् । प्रमथ्य हन्यात् कौन्तेयं तथा शीघ्रं विधीयताम्
॥ १२१ ॥ त्वयि कर्णस्य राज्यञ्च वयञ्चैव प्रतिष्ठिताः । विजयश्चैव
संग्रामे संयच्छास्य हयोत्तमान् ॥ १२२ ॥ इमञ्चाप्यपरं भूय इति-
हासं निबोध मे । पितुर्मम सकाशे यं ब्राह्मणः प्राह धर्मवित्
॥ १२३ ॥ श्रुत्वा वै तद्वचश्चित्रं हेतुकार्य्यार्थसंहितम् । कुरु शल्य
विनिश्चित्य मा भूदत्र विचारणा ॥ १२४ ॥ भार्गवाणां कुले जातो
जमदग्निर्महातपाः । तस्य रामेति विख्यातः पुत्रस्तेजोगुणान्वितः
॥ १२५ ॥ स तीव्रं तप आस्थाय प्रसादयितवान् भवम् । अस्त्रहेतोः
प्रसन्नात्मा नियतः संयतेन्द्रियः ॥१२६॥ तस्य तुष्टो महादेवो भक्त्या
च प्रशमेन च । हृद्गतञ्चास्य विज्ञाय दर्शयामास शङ्करः ॥ १२७ ॥

महादेव उवाच। राम तुष्टोऽस्मि भद्रन्ते विदितं मे तवेप्सितम्। कुरुष्व पूतमात्मानं सर्व्वमेतदवाप्स्यसि ॥१२८॥ दास्यामि ते तदस्त्राणि तदा पूतो भविष्यसि। अपात्रमसमर्थञ्च दहन्त्यस्त्राणि भार्गव ॥१२९॥ इत्युक्तो जामदग्न्यस्तु देवदेवेन शूलिना। प्रत्युवाच महात्मानं शिरसावनतः प्रभुम् ॥ १३० ॥ यदा जानाति देवेशः पात्रं मामस्त्रधारणे। तदा शुश्रूषतेऽस्त्राणि भवान्मे दातुमर्हति ॥ १३१ ॥

दुर्य्योधन उवाच। ततः स तपसा चैव दमेन नियमेन च। पूजोपहारबलिभिर्होममन्त्रपुरस्कृतैः। आराधयितवान् सर्व्वं बहून् वर्षगणांस्तदा ॥ १३२ ॥ प्रसन्नश्च महादेवो भार्गवस्य महात्मनः। अब्रवीत्तस्य बहुशो गुणान् देव्याः समीपतः ॥ १३३ ॥ भक्तिमानेव सततं मयि रामो दृढ़व्रतः। एवं तस्य गुणान् प्रीतो बहुशोऽकथयत् प्रभुः। देवतानां पितॄणाञ्च समक्षमरिसूदन ॥ १३४ ॥ एतस्मिन्नेव काले तु दैत्या ह्यासन् महाबलाः। तैस्तदा दर्पमोहान्धैरबध्यन्त दिवौकसः ॥ १३५ ॥ ततः सम्भूय विबुधास्तान् हन्तुं कृतनिश्चयाः। चक्रुः शत्रुवधे यत्नं न शेकुर्जेतुमेव तान् ॥ १३६ ॥ अभिगम्य ततो देवा महेश्वरमुमापतिम्। प्रासादयन्त ते भक्त्या जहि शत्रुगणानिति ॥ १३७ ॥ प्रतिज्ञाय ततो देवो देवतानां रिपुक्षयम्। रामं भार्गवमाहूय सोऽभ्यभाषत शङ्करः ॥ १३७ ॥

रुद्र उवाच। रिपून् भार्गव देवानां जहि सर्व्वान् समागतान्। लोकानां हितकामार्थं मत्प्रीत्यर्थं तथैव च। एवमुक्तः प्रत्युवाच त्र्यम्बकं वरदं प्रभुम् ॥ १३९ ॥

राम उवाच। का शक्तिर्मम देवेश अकृतास्त्रस्य संयुगे। निहन्तुं दानवान् सर्व्वान् कृतास्त्रान् युद्धदुर्मदान् ॥ १४० ॥

महेश्वर उवाच। गच्छ त्वं मदनुज्ञातो निहनिष्यसि शात्र-

वान् । विजित्य च रिपून् सर्वान् गुणान् प्राप्स्यसि पुष्कलान् ॥१४१
एतच्छ्रुत्वा च वचनं प्रतिगृह्य च सर्वशः । रामः कृतस्वस्त्ययनः
प्रययौ दानवान् प्रति ॥ १४२ ॥ अब्रवीद्देवशत्रूंस्तान् मददर्प-
बलान्वितान् । मम युद्धं प्रयच्छध्वं दैत्या युद्धमदोत्कटाः ॥१४३॥
प्रेषितो देवदेवेन वो विजेतुं महासुरान् । इत्युक्ता भार्गवेणाथ
दैत्या योद्धुं प्रचक्रमुः ॥ १४४ ॥ स तान्निहत्य समरे दैत्यान्
भार्गवनन्दनः । वज्राशनिसमस्पर्शैः प्रहारैरेव भार्गवः ॥ १४५ ॥
स दानवैः क्षततनुर्जामदग्न्यो द्विजोत्तमः । संस्पृष्टः स्थाणुना
सद्यो निर्व्रणः समजायत ॥ १४६ ॥ प्रीतश्च भगवान्देवः कर्मणा
तेन तस्य वै । वरान् प्रादाद्बहुविधान् भार्गवाय महात्मने ॥१४७॥
उक्तश्च देवदेवेन प्रीतियुक्तेन शूलिना ॥ १४८ ॥ निपातात्तव
शस्त्राणां शरीरे याभवद्रुजा । तया ते मानुषं कर्म व्यपोढ़ं
भृगुनन्दन । गृहाणास्त्राणि दिव्यानि मत्सकाशात् यथेप्सि-
तम् ॥ १४९ ॥

दुर्य्योधन उवाच । ततोऽस्त्राणि समस्तानि वरांश्च मनसेप्-
सितान् । लब्ध्वा बहुविधान्रामः प्रणम्य शिरसा शिवम् ॥ १५० ॥
अनुज्ञां प्राप्य देवेशाज्जगाम स महातपाः । एवमेतत् पुरावृत्तं
तदा कथितवानृषिः ॥ १५१ ॥ भार्गवोऽप्यददत् सर्वं धनुर्वेदं महा-
त्मने । कर्णाय पुरुषव्याघ्र सुप्रीतेनान्तरात्मना ॥ १५२ ॥ वृजिनं
हि भवेत् किञ्चिद्यदि कर्णस्य पार्थिव । नास्मै ह्यस्त्राणि दिव्यानि
प्रादास्यद्भृगुनन्दनः ॥ १५३ ॥ नापि सूतकुले जातं कर्णं मन्ये
कथञ्चन । देवपुत्रमहं मन्ये क्षत्रियाणां कुलोद्भवम् ॥ १५४ ॥
विसृष्टमवबोधार्थं कुलस्येति मतिर्मम । सर्वथा न ह्ययं शल्य
कर्णः सूतकुलोद्भवः ॥ १५५ ॥ सकुण्डलं सकवचं दीर्घबाहुं
महारथम् । कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति ॥ १५६ ॥
यथा ह्यस्य भुजौ पीनौ नागराजकरोपमौ । वक्षः पश्य विशालञ्च

सर्व्वशत्रुनिवर्हणम् ॥ १५७ ॥ न ह्येष प्राकृतः कश्चित् कर्णो वैकर्त्तनो नृप। महात्मा ह्येष राजेन्द्र रामशिष्यः प्रतापवान् ॥१५८॥

इति कर्णपर्व्वणि त्रिपुरबधोपाख्याने चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

---

दुर्य्योधन उवाच। एवं स भगवान् देवः सर्व्वलोकपितामहः। सारथ्यमकरोत्तत्र ब्रह्मा रुद्रोऽभवद्रथी ॥ १ ॥ रथिनोऽभ्यधिको वीरः कर्त्तव्यो रथसारथिः। तस्मात्त्वं पुरुषव्याघ्र नियच्छ तुरगान् युधि ॥ २ ॥ यथा देवगणैस्तत्र वृतो यत्नात् पितामहः। तथास्माभिर्भवान् यत्नात् कर्णादभ्यधिको वृतः ॥ ३ ॥ यथा देवैर्महाराज ईश्वरादधिको वृतः। तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः। नियच्छ तुरगान् युद्धे राधेयस्य महाद्युते ॥ ४ ॥

शल्य उवाच। मयाप्येतन्नरश्रेष्ठ बहुशोऽमरसिंहयोः। कथ्यमानं श्रुतं दिव्यमाख्यानमतिमानुषम् ॥ ५ ॥ यथा च चक्रे सारथ्यं भवस्य प्रपितामहः। यथासुराश्च निहता इषुणैकेन भारत ॥ ६ ॥ कृष्णस्य चापि विदितं सर्व्वमेतत् पुरा ह्यभूत्। यथा पितामहो जज्ञे भगवान् सारथिस्तदा। अनागतमतिक्रान्तं वेद कृष्णोऽपि तत्त्वतः ॥ ७ ॥ एतदर्थं विदित्वा तु सारथ्यमुपजग्मिवान्। स्वायम्भुरिव रुद्रस्य कृष्णः पार्थस्य भारत ॥ ८ ॥ यदि हन्याच्च कौन्तेयं सूतपुत्रः कथञ्चन। दृष्ट्वा विनिहतं पार्थं स्वयं योत्स्यति केशवः। शङ्खचक्रगदापाणिर्धक्ष्यते तव वाहिनीम् ॥ ९ ॥ न चापि तस्य क्रुद्धस्य वार्ष्णेयस्य महात्मनः। स्थास्यते प्रत्यनीकेषु कश्चिदत्र नृपस्तव ॥ १० ॥

सञ्जय उवाच। तं तथा भाषमाणन्तु मद्रराजमरिन्दमः। प्रत्युवाच महाबाहुरदीनात्मा सुतस्तव ॥ ११ ॥ मावमंस्था महाबाहो कर्णं वैकर्त्तनं रणे। सर्व्वशस्त्रभृतां श्रेष्ठं सर्व्वशास्त्रार्थपारगम् ॥ १२ ॥ यस्य ज्यातलनिर्घोषं श्रुत्वा भयकरं महत्। पाण्ड-

वेयानि सैन्यानि विद्रवन्ति दिशो दश ॥ १३ ॥ प्रत्यक्षं ते महाबाहो यथा रात्रौ घटोत्कचः। मायाशतविकुर्वाणो हतो मायापुरस्कृतः ॥ १४ ॥ न चातिष्ठत बीभत्सुः प्रत्यनीके कथञ्चन। एतांश्च दिवसान् सर्वान् भयेन महता वृतः ॥ १५ ॥ भीमसेनश्च बलवान् धनुष्कोट्याभिचोदितः। उक्तश्चासंज्ञया राजन् मूढ़ औदरिकेति च ॥ १६ ॥ माद्रीपुत्रौ तथा शूरौ येन जित्वा महारणे। कमप्यर्थं पुरस्कृत्य न हतौ युधि मारिष ॥ १७ ॥ येन वृष्णिप्रवीरस्तु सात्यकिः सात्वतां बरः। निर्जित्य समरे वीरो विरथश्च तथा कृतः ॥ १८ ॥ सृञ्जयाश्चेतरे सर्व्वे धृष्टद्युम्नपुरोगमाः। असकृन्निर्जिता सङ्ख्ये स्मयमानेन संयुगे ॥ १९ ॥ तं कथं पाण्डवा युद्धे विजेष्यन्ति महारथम्। यो हन्यात् समरे क्रुद्धो वज्रहस्तं पुरन्दरम् ॥२०॥ त्वञ्च सर्वास्त्रविद्वीर सर्वविद्यासु पारगः। बाहुवीर्य्येण ते तुल्यः पृथिव्यां नास्ति कश्चन ॥ २१ ॥ त्वं शल्यभूतः शत्रूणामविषह्यः पराक्रमे। अतस्त्वमुच्यसे राजन् शल्य इत्यरिसूदन ॥ २२ ॥ तव बाहुबलं प्राप्य न शेकुः सर्वसात्वताः। तव बाहुबलाद्राजन् किन्नु कृष्णो बलाधिकः ॥ २३ ॥ यथा हि कृष्णेन बलं धार्य्यं वै फाल्गुने हते। तथा कर्णात्ययीभावे त्वया धार्य्यं महद्बलम् ॥ २४ ॥ किमर्थं समरे सैन्यं वासुदेवो न्यवारयत्। किमर्थञ्च भवान् सैन्यं न हनिष्यति मारिष ॥ २५ ॥ त्वत्कृते पदवीं गन्तुमिच्छेयं युधि मारिष। सोदराणाञ्च वीराणां सर्वेषाञ्च महीक्षिताम् ॥ २६ ॥

शल्य उवाच। यन्मां ब्रवीषि गान्धारे अग्रे सैन्यस्य मानद। विशिष्टं देवकीपुत्रात् प्रीतिमानस्म्यहं त्वयि ॥ २७ ॥ एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः। युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे ॥ २८ ॥ समयश्च हि मे वीर कश्चिद्वैकर्त्तनं प्रति। उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य सन्निधौ ॥ २९ ॥

सञ्जय उवाच । तथेति राजन् पुत्रस्ते सह कर्णेन मारिष ।
अब्रवीन्मद्रराजानं सर्व्वक्षत्रस्य सन्निधौ ॥ ३० ॥ सारथ्यस्याभ्युप-
गमात् शल्येनाश्वासितस्तदा । दुर्य्योधनस्तदा हृष्टः कर्णं समभि-
षस्वजे ॥ ३१ ॥ अब्रवीच्च पुनः कर्णं स्तूयमानः सुतस्तव । जहि
पार्थान्रणे सर्व्वान् महेन्द्रो दानवानिव ॥ ३२ ॥ स शल्येनाभ्युपगते
हयानां संनियच्छने । कर्णो हृष्टमना भूयो दुर्य्योधनमभाषत
॥ ३३ ॥ नातिहृष्टमना ह्येष मद्रराजोऽभिभाषते । राजन्मधुरया
वाचा पुनरेवं ब्रवीहि वै ॥ ३४ ॥ ततो राजा महाप्राज्ञः सर्व्वार्थ-
कुशलो बली । दुर्य्योधनोऽब्रवीच्छल्यं मद्रराजं महीपतिम् ।
पूरयन्निव घोषेण मेघगम्भीरया गिरा ॥ ३५ ॥ शल्य कर्णोऽर्जुने-
नाद्य योद्धव्यमिति मन्यते । तस्य त्वं पुरुषव्याघ्र नियच्छ तुरगान्
युधि ॥ ३६ ॥ कर्णो हत्वेतरान् सर्व्वान् फाल्गुनं हन्तुमिच्छति ।
अस्याभीषुग्रहे राजन् प्रयाचे त्वां पुनः पुनः ॥ ३७ ॥ पार्थस्य
सचिवः कृष्णो यथाभीषुग्रहो वरः । तथा त्वमपि राधेयं सर्व्वतः
परिपालय ॥ ३८ ॥

सञ्जय उवाच । ततः शल्यः परिष्वज्य सुतं ते वाक्यमब्रवीत् ।
दुर्य्योधनममित्रघ्नं प्रीतो मद्राधिपस्तदा ॥ ३९ ॥

शल्य उवाच । एवञ्चेन्मन्यसे राजन् गान्धारे प्रियदर्शन ।
तस्मात्ते यत् प्रियं किञ्चित् तत् सर्व्वं करवाण्यहम् ॥४०॥ यत्रास्मि
भरतश्रेष्ठ योग्यः कर्म्मणि कर्हिचित् । तत्र सर्व्वात्मना युक्तो वक्ष्ये
कार्य्यधुरं तव ॥ ४१ ॥ यत्तु कर्णमहं ब्रूयां हितकामः प्रिया-
प्रिये । मम तत् क्षमतां सर्व्वं भवान् कर्णश्च सर्व्वशः ॥ ४२ ॥

कर्ण उवाच । ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः ।
तथा नित्यं हिते युक्तो मद्रराज भवस्व नः ॥ ४३ ॥

शल्य उवाच । आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः ।
अनाचरितमार्य्याणां वृत्तमेतच्चतुर्व्विधम् ॥ ४४ ॥ यत्तु विद्वन् प्रव-

च्यामि प्रत्ययार्थमहं तव। आत्मनः स्तवसंयुक्तं सन्निबोध यथा तथम्॥ ४५॥ अहं शक्यस्य सारथ्ये योग्यो मातलिवत् प्रभो। अप्रमादप्रयोगाच्च ज्ञानविद्याचिकित्सितैः॥ ४६॥ ततः पार्थेन संग्रामे युध्यमानस्य तेऽनघ। वाहयिष्यामि तुरगान् विज्वरो भव सूतज॥ ४७॥

इति कर्णपर्वणि शल्यस्य कर्णसारथ्यस्वीकारे पञ्चत्रिंशोऽध्यायः॥ ३५

---

दुर्य्योधन उवाच। अयं ते कर्ण सारथ्यं मद्रराजः करिष्यति। कृष्णादप्यधिको यन्ता देवेशस्येव मातलिः॥ १॥ यथा हरि-हयैर्युक्तं संगृह्णाति स मातलिः। शल्यस्तथा तवाद्यायं संयन्ता रथवाजिनाम्॥ २॥ योधे त्वयि रथस्थे च मद्रराजे च सारथौ। रथश्रेष्ठो ध्रुवं सङ्ख्ये पार्थानभिभविष्यति॥ ३॥

सञ्जय उवाच। ततो दुर्य्योधनो भूयो मद्रराजं तरस्विनम्। उवाच राजन् संग्रामे व्युषिते पर्य्युपस्थिते॥ ४॥ कर्णस्य यच्छ संग्रामे मद्रराज हयोत्तमान्। त्वयाभिगुप्तो राधेयो विजेष्यति धनञ्जयम्। इत्युक्तो रथमास्थाय तथेति प्राह भारत॥ ५॥ शल्येऽभ्युपगते कर्णः सारथिं सुमनाब्रवीत्। त्वं सूत स्यन्दनं मह्यं कल्पयेत्यसकृत्त्वरम्॥ ६॥ ततो जैत्रं रथवरं गन्धर्वनगरोपमम्। विधिवत् कल्पितं भद्रं जयेत्युक्त्वा न्यवेदयत्॥ ७॥ तं रथं रथिनां श्रेष्ठः कर्णोऽभ्यर्च्य यथाविधि। सम्पादितं ब्रह्मविदा पूर्वमेव पुरोधसा॥ ८॥ कृत्वा प्रदक्षिणं यत्नादुपस्थाय च भास्करम्। समीपस्थं मद्रराजमारोह त्वमथाब्रवीत्॥ ९॥ ततः कर्णस्य दुर्द्धर्षं स्यन्दनप्रवरं महत्। आरुरोह महातेजाः शल्यः सिंह इवाचलम्॥ १०॥ ततः शल्यास्थितं दृष्ट्वा कर्णः स्वरथ-मुत्तमम्। अध्यतिष्ठद्यथाम्भोदं विद्युत्वन्तं दिवाकरः॥ ११॥

तावेकरथमारूढ़ावादित्याग्निसमत्विषौ । व्यभ्राजेतां यथा मेघं सूर्य्याग्नी सहितौ दिवि ॥ १२ ॥ संस्तूयमानौ तौ वीरौ तदास्तां द्युतिमत्तमौ । ऋत्विक्सदस्यैरिन्द्राग्नी स्तूयमानाविवाध्वरे ॥१३॥ स शल्यसंगृहीताश्वे रथे कर्णः स्थितोऽभवत् । धनुर्विस्फारयन् घोरं परिवेषीव भास्करः ॥ १४ ॥ आस्थितः स रथश्रेष्ठं कर्णः शरगभस्तिमान् । प्रबभौ पुरुषव्याघ्रो मन्दरस्थ इवांशुमान् ॥ १५ ॥ तं रथस्थं महाबाहुं युद्धायामिततेजसम् । दुर्य्योधनस्तु राधेयमिदं वचनमब्रवीत् ॥ १६ ॥ अकृतं द्रोणभीष्माभ्यां दुष्करं कर्म्म संयुगे । कुरुष्वाधिरथे वीर मिषतां सर्व्वधन्विनाम् ॥ १७ ॥ मनोगतं मम ह्यासीत् भीष्मद्रोणौ महारथौ । अर्ज्जुनं भीमसेनञ्च निहन्ताराविति ध्रुवम् ॥ १८ ॥ ताभ्यां यदकृतं वीर वीरकर्म्म महामृधे । तत् कर्म्म कुरु राधेय वज्रपाणिरिवापरः ॥ १९ ॥ गृहाण धर्म्मराजं वा जहि वा त्वं धनञ्जयम् । भीमसेनञ्च राधेय माद्रीपुत्रौ यमावपि ॥ २० ॥ जयश्च तेऽस्तु भद्रं ते प्रयाहि पुरुषर्षभ । पाण्डुपुत्रस्य सैन्यानि कुरु सर्व्वाणि भस्मसात् ॥ २१ ॥ ततस्तूर्य्यसहस्राणि भेरीणामयुतानि च । वाद्यमानान्यरोचन्त मेघशब्दा यथा दिवि ॥ २२ ॥ प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः । अभ्यभाषत राधेयः शल्यं युद्धविशारदम् ॥ २३ ॥ चोदयाश्वान्महाबाहो यावद्धन्मि धनञ्जयम् । भीमसेनं यमौ चोभौ राजानञ्च युधिष्ठिरम् ॥ २४ ॥ अद्य पश्यतु मे शल्य बाहुवीर्य्यं धनञ्जयः । अस्यतः कङ्कपत्राणां सहस्राणि शतानि च ॥ २५ ॥ अद्य क्षेप्स्याम्यहं शल्य शरान् परमतेजनान् । पाण्डवानां विनाशाय दुर्य्योधनजयाय च ॥ २६ ॥

शल्य उवाच । सूतपुत्र कथं नु त्वं पाण्डवानवमन्यसे । सर्व्वास्त्रज्ञान्महेष्वासान् सर्व्वानेव महाबलान् ॥ २७ ॥ अनिवर्त्तिनो महाभागान् अजय्यान् सत्यविक्रमान् । अपि सञ्जनयेयुर्ये भयं साक्षात्

शतक्रतोः ॥ २८ ॥ यदा श्रोष्यसि निर्घोषं विस्फूर्जितमिवाशनेः।
राधेय गाण्डीवस्याजौ तदा नैवं वदिष्यसि ॥ २९ ॥ यदा द्रक्ष्यसि
संग्रामे धर्मपुत्रं यमौ तथा। शितैः पृषत्कैः कुर्वाणानभ्रच्छाया-
मिवाम्बरे ॥ ३१ ॥ अस्यतः क्षिण्वतश्चारील्लघुहस्तान् दुरासदान्।
पार्थिवानपि चान्यांस्त्वं तदा नैवं वदिष्यसि ॥ ३२ ॥

सञ्जय उवाच। अनादृत्य तु तद्वाक्यं मद्रराजेन भाषितम्।
याहीत्येवाब्रवीत् कर्णो मद्रराजं तरस्विनम् ॥ ३३ ॥

इति कर्णपर्वणि कर्णशल्यसंवादे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

---

सञ्जय उवाच। दृष्ट्वा कर्णं महेष्वासं युयुत्सुं समवस्थितम्।
चुक्रुशुः कुरवः सर्वे हृष्टरूपाः समन्ततः ॥ १ ॥ ततो दुन्दुभि-
निर्घोषैर्भेरीणां निनदेन च। वाणशब्दैश्च विविधैर्गर्ज्जितैश्च तर-
स्विनाम्। निर्ययुस्तावका युद्धे मृत्युं कृत्वा निवर्त्तनम् ॥ २ ॥
प्रयाते तु ततः कर्णे योधेषु मुदितेषु च। चचाल पृथिवी राजन्
ररास च सुविस्तरम् ॥ ३ ॥ निश्चरन्तो व्यदृश्यन्त सूर्य्यात् सप्त
महाग्रहाः। उल्कापाताश्च सञ्जग्मुर्द्दिशां दाहास्तथैव च ॥ ४ ॥
शुष्काशन्यश्च सम्पेतुर्ववुर्वाताश्च भैरवाः ॥ ५ ॥ मृगपक्षिगणाश्चैव
पृतनां बहुशस्तव। अपसव्यं तदा चक्रुर्वेदयन्तो महाभयम् ॥ ६ ॥
प्रस्थितस्य च कर्णस्य निपेतुस्तुरगा भुवि। अस्थिवर्षञ्च पतित-
मन्तरीक्षाद्भयानकम् ॥ ७ ॥ जज्वलुश्चैव शस्त्राणि ध्वजाश्चैव
चकम्पिरे। अश्रूणि च व्यमुञ्चन्त वाहनानि विशाम्पते ॥ ८ ॥
एते चान्ये च बहव उत्पातास्तत्र दारुणाः। समुत्पेतुर्विनाशाय
कौरवाणां सुदारुणाः। न च तान् गणयामासुः सर्वे दैवेन
मोहिताः ॥ ९ ॥ प्रस्थितं सूतपुत्रञ्च जयेत्यूचुर्नराधिपाः। निर्ज्जि-
तान् पाण्डवांश्चैव मेनिरे तत्र कौरवाः ॥ १० ॥ ततो रथस्थः

परवीरहन्ता भीष्मद्रोणावस्त्रवीर्य्यौ समीक्ष्य । समुज्वलद्भास्कर-पावकाभो वैकर्त्तनोऽसौ रथकुञ्जरो नृपः ॥ ११ ॥ स शल्यमाभाष्य जगाद वाक्यं पार्थस्य कर्मातिशयं विचिन्त्य । मानेन दर्पेण विदह्य-मानः क्रोधेन दीप्यन्निव निश्वसंश्च ॥ १२ ॥ नाहं महेन्द्रादपि वज्रपाणेः क्रुद्धाद्बिभेम्यात्तधनू रथस्थः । दृष्ट्वा तु भीष्मप्रमुखान् शयानानतीव मां ह्यस्थिरता जहाति ॥१३॥ महेन्द्रविष्णुप्रतिमा-वनिन्दितौ रथाश्वनागप्रवरप्रमाथिनौ । अवध्यकल्पौ निहतौ यदा परैस्ततो ममाप्यस्ति रणेऽद्य साध्वसम् ॥ १४ ॥ समीक्ष्य सङ्ख्ये-ऽतिबलान्नराधिपान् ससूतमातङ्गरथान् परैर्हतान् । कथं न सर्वानहितान् रणेऽवधीन्महास्त्रविद्ब्राह्मणपुङ्गवो गुरुः ॥ १५ ॥ स संस्मरन् द्रोणमहं महाहवे ब्रवीमि सत्यं कुरवो निबोधत । न वो मदन्यः प्रसहेद्रणेऽर्ज्जुनं समागतं मृत्युमिवोग्ररूपिणम् ॥ १६ ॥ शिक्षाप्रसादश्च बलं धृतिश्च द्रोणे महास्त्राणि च सन्नतिश्च । स चेदगान्मृत्युवशं महात्मा सर्वानन्यानातुरानद्य मन्ये ॥ १७ ॥ नेह ध्रुवं किञ्चिदपि प्रचिन्तयन् विद्यां लोके कर्मणो नित्ययोगात् । सूर्य्योदये को हि विमुक्तसंशयो भावं कुर्वीताद्य गुरौ निपातिते ॥ १८ ॥ न नूनमस्त्राणि बलं पराक्रमः क्रिया सुनीतं परमायु-धानि वा । अलं मनुष्यस्य सुखाय वर्त्तितुं तथा हि युद्धे निहतः परैर्गुरुः ॥ १९ ॥ हुताशनादित्यसमानतेजसं पराक्रमे विष्णुपुर-न्दरोपमम् । नये बृहस्पत्युशनःसमं सदा न चैनमस्त्रं तदपात् सुदुःसहम् ॥ २० ॥ संप्राक्रुष्टे रुदिते स्त्रीकुमारे पराभूते पौरुषे धार्त्तराष्ट्रे । मया कृत्यमिति जानामि शल्य प्रयाहि तस्माद्द्विषता-मनीकम् ॥ २१ ॥ यत्र राजा पाण्डवः सत्यसन्धो व्यवस्थितो भीम-सेनार्ज्जुनौ च । वासुदेवः सात्यकिः सृञ्जयाश्च यमौ च कस्तान् विषहेन्मदन्यः ॥ २२ ॥ तस्मात् क्षिप्रं मद्रपते प्रयाहि रणे पाञ्चा-लान् पाण्डवान् सृञ्जयांश्च । तान् वा हनिष्यामि समेत्य सङ्ख्ये

यास्यामि वा द्रोणपथा यमाय ॥ २३ ॥ न ते वाहं न गमिष्यामि मध्यं तेषां शूराणामिति मां शल्य विद्धि । मित्रद्रोहो मर्षणीयो न मेऽयं त्यक्त्वा प्राणाननुयास्यामि द्रोणम् ॥ २४ ॥ प्राज्ञस्य मूढ़स्य च जीवितान्ते नास्ति प्रमोक्षोऽन्तकसत्कृतस्य । अतो विद्वन्नभियास्यामि पार्थान् दिष्टं न शक्यं व्यतिवर्त्तितुं वै ॥ २५ ॥ कल्याणवृत्तिः सततं हि राजन् वैचित्रवीर्य्यस्य सुतो ममासीत् । तस्यार्थं सिद्ध्यर्थमहं त्यजामि प्रियान् प्राणान् दुस्त्यजं जीवितञ्च ॥ २६ ॥ वैयाघ्रचर्माणमकूजनाक्षं हैमत्रिकोषं रजतत्रिवेणुम् । रथप्रवर्हं तुरगप्रवर्हैर्युक्तं प्रादान्मह्यमिमं हि रामः ॥ २७ ॥ धनूंषि चित्राणि निरीक्ष्य शल्य ध्वजान् गदाः सायकांश्चोग्ररूपान् । असिञ्च दीप्तं परमायुधञ्च शङ्खञ्च शुभ्रं स्वनवन्तमुग्रम् ॥ २८ ॥ पताकिनं वज्रनिपातनिस्वनं सिताश्वयुक्तं शुभतूणशोभिनम् । इमं समास्थाय रथं रथर्षभं रणे हनिष्याम्यहमर्जुनं बलात् ॥ २९ ॥ तञ्चेन्मृत्युः सर्वहरोऽभिरक्षेत् सदाप्रमत्तः समरे पाण्डुपुत्रम् । तं वा हनिष्यामि समेत्य युद्धे यास्यामि वा भीष्ममुखो यमाय ॥ ३० ॥ यमवरुणकुवेरवासवा यदि युगपत् सगणा महाहवे । जुगुपिषव इहेत्य पाण्डवं किमु बहुना सह तैर्जयामि तम् ॥ ३१ ॥

सञ्जय उवाच । इति रणरभसस्य कत्थतस्तदुपनिशम्य वचः स मद्रराट् । अवहसदवमन्य वीर्य्यवान् प्रतिषिषिधे च जगाद चोत्तरम् ॥ ३२ ॥

शल्य उवाच । विरम विरम कर्ण कत्थनादयिरभसोऽति चाप्ययुक्तवाक् । क्व च हि नरवरो धनञ्जयः क्व पुनरहो पुरुषाधमो भवान् ॥ ३३ ॥ यदुसदनमुपेन्द्रपालितं त्रिदिवमिवामरराजरक्षितम् । प्रसभमभिविलोड्य को हरेत् पुरुषवरावरजामृतेऽर्ज्जुनात् ॥ ३४ ॥ त्रिभुवनसृजमीश्वरेश्वरं क इह पुमान् भवमाह्वयेद्युधि । मृगबधकलहे ऋतेऽर्जुनात् सुरपतिवीर्य्यसम

प्रभावतः ॥ ३५ ॥ असुरसुरमहोरगान्नरान् गरुड़पिशाचयक्षराक्षसान्। इषुभिरजयदग्निगौरवात् स्वभिलषितञ्च हविर्ददौ जयः ॥ ३६ ॥ स्मरसि ननु यदा परैर्हृतः स च धृतराष्ट्रसुतोऽपि मोक्षितः। दिनकरसदृशैः शरोत्तमैर्युधा कुरुषु बहुम् विनिहत्य तानरीन् ॥ ३७ ॥ प्रथममपि पलायिते त्वयि प्रियकलहा धृतराष्ट्रसूनवः। स्मरसि ननु यदा प्रमोचिताः खचरगणानवजित्य पाण्डवैः ॥ ३८ ॥ समुदितबलवाहनाः पुनः पुरुषवरेण जिताः स्थ गोग्रहे। सगुरुगुरुसुताः सभीष्मकाः किमु न जितः स तदा त्वयार्ज्जुनः ॥ ३९ ॥ इदमपरमुपस्थितं पुनस्तव निधनाय सुयुद्धमद्य वै। यदि न रिपुभयात् पलायसे समरगतोऽद्य हतोऽसि सूतज ॥ ४० ॥

सञ्जय उवाच। इति बहु परुषं प्रभाषति प्रमनसि मद्रपतौ रिपुस्तवम्। भृशमभिरुषितः परन्तपः कुरुपृतनापतिराह मद्रपम् ॥ ४१ ॥

कर्ण उवाच। भवतु भवतु किं विकत्थसे ननु मम तस्य च युद्धमुद्यतम्। यदि स जयति मामिहाहवे तत इदमस्तु सुकत्थितं तव ॥ ४२ ॥

सञ्जय उवाच। एवमस्त्विति मद्रेश उक्त्वा नोत्तरमुक्तवान्। याहि शल्येति चाप्येनं कर्णः प्राह युयुत्सया ॥ ४३ ॥ स रथः प्रययौ शत्रून् श्वेताश्वः शल्यसारथिः। निघ्नन्नमित्रान् समरे तमो घ्नन् सविता यथा ॥ ४४ ॥ ततः प्रायात् प्रीतिमान् वै रथेन वैयाघ्रेण श्वेतयुजाथ कर्णः। स चालोक्य ध्वजिनीं पाण्डवानां धनञ्जयं त्वरया पर्य्यपृच्छत् ॥ ४५ ॥

इति कर्णपर्व्वणि कर्णशल्यसंवादे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

सञ्जय उवाच। प्रयानेव ततः कर्णो हर्षयन् वाहिनीं तव।
एकैकं समरे दृष्ट्वा पाण्डवं पर्य्यपृच्छत ॥ १ ॥ यो ममाद्य महा-
त्मानं दर्शयेत् श्वेतवाहनम्। तस्मै दद्यामभिप्रेतं धनं यन्मनसे-
च्छति ॥ २ ॥ स चेत्तदभिमन्येत तस्मै दद्यामहं पुनः। शकटं
रत्नपूर्णञ्च यो मे ब्रूयाद्धनञ्जयम् ॥ ३ ॥ स चेत्तदभिमन्येत पुरु-
षोऽर्जुनदर्शिवान्। शतं दद्यां गवां तस्मै नैत्यकं कांस्यदोहनम्
॥ ४ ॥ शतं ग्रामवरांश्चैव दद्यामर्ज्जुनदर्शिने। तथा तस्मै पुनर्द्दद्यां
श्वेतमश्वतरीरथम्। युक्तमञ्जनकेशीभिर्यो मे ब्रूयाद्धनञ्जयम् ॥५॥
स चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्। अन्यं तस्मै वरं दद्यां
सौवर्णं हस्तिषड्गवम् ॥ ६ ॥ तथाप्यस्मै पुनर्द्दद्यां स्त्रीणां शत-
मलंकृतम्। श्यामानां निष्ककण्ठीनां गीतवाद्यविपश्चिताम् ॥७॥
स चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान्। तस्मै दद्यां शतं नागान्
शतं ग्रामान् शतं रथान् ॥ ८ ॥ सुवर्णस्य च मुख्यस्य हयाग्र्याणां
शतं शतान्। ऋद्ध्या गुणैः सुदान्तांश्च धुर्य्यवाहान् सुशिक्षितान्
॥ ९ ॥ तथा सुवर्णशृङ्गीणां गोधेनूनां चतुःशतम्। दद्यां तस्मै
सवत्सानां यो मे ब्रूयाद्धनञ्जयम् ॥ १० ॥ स चेत्तदभिमन्येत
पुरुषोऽर्जुनदर्शिवान्। अन्यं तस्मै वरं दद्यां श्वेतान् पञ्च शतान्
हयान् ॥ ११ ॥ हेमभाण्डपरिच्छन्नान् सुमृष्टमणिभूषणान्।
सुदान्तानपि चैवाहं दद्यामष्टादशापरान् ॥ १२ ॥ रथञ्च शुभ्रं
सौवर्णं दद्यां तस्मै स्वलंकृतम्। युक्तं परमकाम्बोजैर्यो मे ब्रूया-
द्धनञ्जयम् ॥ १३ ॥ स चेत्तदभिमन्येत पुरुषोऽर्ज्जुनदर्शिवान्। अन्यं
तस्मै वरं दद्यां कुञ्जराणां शतानि षट् ॥ १४ ॥ काञ्चनैर्विविधै-
र्भाण्डैः संछन्नान् हेममालिनः। उत्पन्नानपरान्तेषु विनीतान्
हस्तिशिक्षकैः ॥ १५ ॥ स चेत्तदभिमन्येत पुरुषोऽर्ज्जुनदर्शिवान्।
अन्यं तस्मै वरं दद्यां वैश्यग्रामांश्चतुर्द्दश ॥ १६ ॥ सुस्फीतान् धन-
संयुक्तान् प्रत्यासन्नवनोदकान्। अकुतोभयान् सुसम्पन्नान् राज-

श्रोन्यांश्चतुर्द्दश ॥ १७ ॥ दासीनां निष्ककण्ठीनां मागधीनां शतं तथा। प्रत्यग्रवयसां दद्यां यो मे ब्रूयाद्धनञ्जयम् ॥ १८ ॥ स चेत्तदभिमन्येत पुरुषोऽर्ज्जुनदर्शिवान्। अन्यं तस्मै वरं दद्यां यमसौ कामयेत् स्वयम् ॥ १९ ॥ पुत्रदारान् विहारांश्च यदन्यद्वित्तमस्ति मे। तच्च तस्मै वरं दद्यां यद्यच्च मनसेच्छति ॥ २० ॥ हत्वा च सहितौ कृष्णौ तयोर्वित्तानि सर्वशः। तस्मै दद्यामहं यो मे प्रब्रूयात् केशवार्ज्जुनौ ॥ २१ ॥ एता वाचः स बहुशः कर्ण उच्चारयन् युधि। दध्मौ सागरसम्भूतं सुस्वरं शङ्खमुत्तमम् ॥ २२ ॥ ता वाचः सूतपुत्रस्य यथायुक्ता निशम्य ह। दुर्य्योधनो महाराज संहृष्टः सानुगोऽभवत् ॥ २३ ॥ ततो दुन्दुभिनिर्घोषो मृदङ्गानाञ्च सर्वशः। सिंहनादः सवादित्रः कुञ्जराणाञ्च निस्वनः ॥ २४ ॥ प्रादुरासीत्तदा राजन् सैन्येषु पुरुषर्षभ। योधानां संप्रहृष्टानां तथा समभवत् स्वनः ॥ २५ ॥ तथा प्रहृष्टे सैन्ये तु प्लवमानं महारथम्। विकत्थमानञ्च तदा राधेयमरिकर्षणम्। मद्रराजः प्रहस्येदं वचनं प्रत्यभाषत ॥ २६ ॥

इति कर्णपर्वणि कर्णावलेपे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

---

शल्य उवाच। मा सूतपुत्र दानेन सौवर्णं हस्तिषड्गवम्। प्रयच्छ पुरुषायाद्य द्रक्ष्यसि त्वं धनञ्जयम् ॥ १ ॥ बाल्यादिह त्वं त्यजसि वसु वैश्रवणो यथा। अयत्नेनैव राधेय द्रष्टास्यद्य धनञ्जयम् ॥ २ ॥ परासृजसि यद्वित्तं किञ्चित्त्वं बहु मूढवत्। अपात्रदाने ये दोषास्तान्मोहान्नावबुध्यसे ॥ ३ ॥ यत्त्वं प्रेरयसे वित्तं बहु तेन खलु त्वया। शक्यं बहुविधैर्यज्ञैर्यष्टुं सूत यजस्व तैः ॥ ४ ॥ यच्च प्रार्थयसे हन्तुं कृष्णौ मोहात् वृथैव तत्। न हि शुश्रुम संमर्द्दे क्रोष्ट्रा सिंहौ निपातितौ ॥ ५ ॥ अप्रार्थितं प्रार्थयसे

सुहृदो न हि सन्ति ते। ये त्वां निवारयन्त्याशु प्रपतन्तं हुताशने ॥ ६ ॥ कार्य्याकार्य्यं न जानीषे कालपक्कोऽस्यसंशयम्। बहुवद्ध-मकर्णीयं को हि ब्रूयाज्जिजीविषुः ॥ ७ ॥ समुद्रतरणं दोर्भ्यां कण्ठे बद्धा यथा शिलाम्। गिर्य्यग्राद्वा निपतनं तादृक् तव चिकीर्षितम् ॥ ८ ॥ सहितः सर्व्वयोधैस्त्वं व्यूढानीकैः सुरक्षितः। धनञ्जयेन युध्यस्व श्रेयश्चेत् प्राप्तुमिच्छसि ॥ ९ ॥ हितार्थं धार्त्तराष्ट्रस्य ब्रवीमि त्वां न हिंसया। श्रद्धत्स्वैवं मया प्रोक्तं यदि तेऽस्ति जिजीविषा ॥ १० ॥

कर्ण उवाच। स्वबाहुवीर्य्यमाश्रित्य प्रार्थयाम्यर्ज्जुनं रणे। त्वन्तु मित्रमुखः शत्रुर्मांभीषयितुमिच्छसि ॥ ११ ॥ न मामस्मा-दभिप्रायात् कश्चिदद्य निवर्त्तयेत्। अपीन्द्रो वज्रमुद्यम्य किमु मर्त्त्यः कथञ्चन ॥ १२ ॥

सञ्जय उवाच। इति कर्णस्य वाक्यान्ते शल्यः प्राहोत्तरं वचः। चुकोपयिषुरत्यर्थं कर्णं मद्रेश्वरः पुनः ॥ १३ ॥ यदा वै फाल्गुन-वेगमुक्ता ज्याचोदिता हस्तवता विसृष्टाः। अन्वेतारः कङ्कपत्राः शिताग्रास्तदा तप्स्यस्यर्ज्जुनस्यानुयोगात् ॥ १४ ॥ यदा दिव्यं धनु-रादाय पार्थः प्रतापयन् पृतनां सव्यसाची। त्वामर्द्दयिष्यन्निशितैः पृषत्कैस्तदा पश्चात्तप्स्यसे सूतपुत्र ॥ १५ ॥ बालश्चन्द्रं मातुरङ्के शयानो यथा कश्चित् प्रार्थयतेऽपहर्त्तुम्। तद्वन्मोहात् द्योतमानं रथस्थं त्वं प्रार्थयस्यर्ज्जुनं जेतुमद्य ॥१६॥ त्रिशूलमाश्रित्य सुतीक्ष्ण धारं सर्व्वाणि गात्राणि निघर्षसि त्वम्। सुतीक्ष्णधारोपमकर्मणा त्वं युयुत्ससे योऽर्ज्जुनेनाद्य कर्ण ॥ १७ ॥ क्रुद्धं सिंहं केशरिणं बृहन्तं बालो मूढ़ः क्षुद्रमृगोऽतरस्वी। समाह्वयेत्तद्वदेतत्तवाद्य समाह्वानं सूतपुत्रार्ज्जुनस्य ॥ १८ ॥ मा सूतपुत्राह्वय राजपुत्रं महावीर्य्यं केशरिणं यथैव। वने शृगालः पिशितस्य तृप्तो मा पार्थमासाद्य विनङ्क्ष्यसि त्वम् ॥ १९ ॥ ईषादन्तं महानागं प्रभिन्न-

करटामुखम् । शशकाह्वयसे युद्धे कर्ण पार्थं धनञ्जयम् ॥ २० ॥ बिलस्थं कृष्णसर्पं त्वं बाल्यात् काष्ठेन विध्यसि । महाविषं पूर्णकोपं यत् पार्थं योद्धुमिच्छसि ॥ २१ ॥ सिंहं केशरिणं क्रुद्धमतिक्रम्याभिनर्द्दसि । शृगाल इव मूढ़स्त्वं नृसिंहं कर्ण पाण्डवम् ॥ २२ ॥ सुपर्णं पतगश्रेष्ठं वैनतेयं तरस्विनम् । भोगीवाह्वयसे पाते कर्ण पार्थं धनञ्जयम् ॥ २३ ॥ सर्व्वाम्भसां निधिं भीमसूर्म्मिमन्तं झषान्वितम् । चन्द्रोदये विवर्द्धन्तमप्लवः सन्तितीर्षसि ॥ २४ ॥ ऋषभं दुन्दुभिग्रीवं तीक्ष्णशृङ्गं प्रहारिणम् । वत्स आह्वयसे युद्धे कर्ण पार्थं धनञ्जयम् ॥ २५ ॥ महामेघं महाघोरं दर्दुरः प्रतिनर्द्दसि । कामतोयप्रदं लोके नरपर्ज्जन्यमर्ज्जुनम् ॥ २६ ॥ यथा च स्वगृहस्थः श्वा व्याघ्रं वनगतं भवेत् । तथा त्वं भषसे कर्ण नरव्याघ्रं धनञ्जयम् ॥ २७ ॥ शृगालोऽपि वने कर्ण शशैः परिवृतो वसन् । मन्यते सिंहमात्मानं यावत् सिंहं न पश्यति ॥ २८ ॥ तथा त्वमपि राधेय सिंहमात्मानमिच्छसि । अपश्यन् शत्रुदमनं नरव्याघ्रं धनञ्जयम् ॥ २९ ॥ व्याघ्रं त्वं मन्यसेऽऽत्मानं यावत् कृष्णौ न पश्यसि । समास्थितावेकरथे सूर्य्याचन्द्रमसाविव ॥ ३० ॥ यावद्गाण्डीवनिर्घोषं न शृणोषि महाहवे । तावदेव त्वया कर्ण शक्यं वक्तुं यथेच्छसि ॥ ३१ ॥ रथशब्दधनुःशब्दैर्नादयन्तं दिशो दश । नर्द्दन्तमिव शार्दूलं दृष्ट्वा क्रोष्टा भविष्यसि ॥ ३२ ॥ नित्यमेव शृगालस्त्वं नित्यं सिंहो धनञ्जयः । वीरप्रद्वेषणान्मूढ़ तस्मात् क्रोष्टेव लक्ष्यसे ॥ ३३ ॥ यथाखुः स्याद्बिड़ालश्च श्वा व्याघ्रश्च बलाबले । यथा शृगालः सिंहश्च यथा च शशकुञ्जरौ ॥ ३४ ॥ यथानृतञ्च सत्यञ्च यथा चापि विषामृते । तथा त्वमपि पार्थश्च प्रख्यातावात्मकर्म्मभिः ॥ ३५ ॥

इति कर्णपर्व्वणि कर्णाधिक्षेपे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

---

सञ्जय उवाच। अधिक्षिप्तस्तु राधेयः शल्येनामिततेजसा।
शल्यमाह सुसंक्रुद्धो वाक्यशल्यमवधारयन्॥ १॥

कर्ण उवाच। गुणान् गुणवतां शल्य गुणवान् वेत्ति नागुणः। त्वन्तु सर्वैर्गुणैर्हीनः किं ज्ञास्यसि गुणागुणम्॥ २॥ अर्जुनस्य महास्त्राणि क्रोधं वीर्य्यं धनुः शरान्। अहं शल्य विजानामि विक्रमञ्च महात्मनः॥ ३॥ तथा कृष्णस्य माहात्म्यमृषभस्य महीक्षिताम्। यथाहं शल्य जानामि न त्वं जानासि तत्तथा॥ ४॥ एवमेवात्मनो वीर्य्यमहं वीर्य्यञ्च पाण्डवे। जानन्नेवाह्वये युद्धे शल्य नाग्निं पतङ्गवत्॥ ५॥ अस्ति चायमिषुः शल्य सुमुखो रक्तभोजनः। एकतूणीशयः पत्री सुधौतः समलंकृतः॥ ६॥ शेते चन्दनचूर्णेन पूजितो बहुलाः समाः। आहेयो विषवानुग्रो नराश्वद्विपसङ्घहा॥ ७॥ घोररूपो महारौद्रस्तनुत्राण्स्थिविदारणः। निर्भिन्द्यां येन रुष्टोऽहमपि मेरुं महागिरिम्॥ ८॥ तमहं जातु नास्येयमन्यस्मिन् फाल्गुनादृते। कृष्णाद्वा देवकीपुत्रात् सत्यञ्चात्र शृणुष्व मे॥ ९॥ तेनाहमिषुणा शल्य वासुदेवधनञ्जयौ। योत्स्ये परमसंक्रुद्धस्तत् कर्म सदृशं मम॥ १०॥ सर्वेषां वृष्णिवीराणां कृष्णे लक्ष्मीः प्रतिष्ठिता। सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः। उभयं तत् समासाद्य कोऽतिवर्त्तितुमर्हति॥ ११॥ तावुभौ पुरुषव्याघ्रौ समेतौ स्यन्दने स्थितौ। मामेकमभिसंयातौ सुजातं पश्य शल्य मे॥ १२॥ पितृष्वसामातुलजौ भ्रातरावपराजितौ। मणी सूत्र इव प्रोतौ द्रष्टासि निहतौ मया॥ १३॥ अर्ज्जुने गाण्डिवं कृष्णे चक्रं तार्क्ष्यकपीध्वजौ। भीरूणां त्रासजननं शल्य हर्षकरं मम॥ १४॥ त्वन्तु दुष्प्रकृतिर्मूढ़ो महायुद्धेष्व कोविदः। भयावदीर्णः संत्रासादबद्धं बहु भाषसे॥ १५॥ संस्तौषि तौ तु केनापि हेतुना त्वं कुदेशज। तौ हत्वा समरे हन्ता त्वामद्य सहबान्धवम्॥ १६॥ पापदेशज दुर्बुद्धे क्षुद्र

क्षत्रियपांसन। सुहृद्भूत्वा रिपुः किं मां कृष्णाभ्यां भीषयस्यलम् ॥ १७ ॥ तौ वा ममाद्य हन्तारौ हनिष्ये वापि तावहम्। नाहं बिभेमि कृष्णाभ्यां विजानन्नात्मनो बलम् ॥ १८ ॥ वासुदेवसहस्रं वा फाल्गुनानां शतानि वा। अहमेको हनिष्यामि जोषमास्व कुदेशज ॥ १९ ॥ स्त्रियो बालाश्च वृद्धाश्च प्रायः क्रीड़ागता जनाः। यागाथाः संप्रगायन्ति कुर्व्वन्तोऽध्ययनं यथा ॥ २० ॥ ता गाथाः शृणु मे शल्य मद्रकेषु दुरात्मसु। ब्राह्मणैः कथिताः पूर्व्वं यथावद्राजसन्निधौ। श्रुत्वा चैकमना मूढ़ क्षम वा ब्रूहि वोत्तरम् ॥२१॥ मित्रध्रुङ्मद्रको नित्यं यो नो द्वेष्टि स मद्रकः। मद्रके सङ्गतं नास्ति क्षुद्रवाक्ये नराधमे ॥ २२ ॥ दुरात्मा मद्रको नित्यं नित्यमानृतिकोऽनृजुः। यावदन्तं हि दौरात्म्यं मद्रकेष्विति नः श्रुतम् ॥२३॥ पिता पुत्रश्च माता च श्वश्रूश्वशुरमातुलाः। जामाता दुहिता भ्राता नप्ता ते ते च बान्धवाः ॥ २४ ॥ वयस्याभ्यागताश्चान्ये दासीदासञ्च सङ्गतम्। पुंभिर्विमिश्रा नार्य्यश्च ज्ञाताज्ञाताः स्वयेच्छया ॥ २५ ॥ येषां गृहेष्वशिष्टानां सक्तुमत्स्याशिनां तथा। पीत्वा सीधु सगोमांसं क्रन्दन्ति च हसन्ति च ॥ २६ ॥ गायन्ति चाप्यबद्धानि प्रवर्त्तन्ते च कामतः। कामप्रलापिनोऽन्योऽन्यं तेषु धर्म्मः कथं भवेत्। मद्रकेष्ववलिप्तेषु प्रख्याताशुभकर्म्मसु ॥ २७ ॥ नापि वैरं न सौहार्द्दं मद्रकेण समाचरेत्। मद्रके सङ्गतं नास्ति मद्रको हि सदामलः ॥ २८ ॥ मद्रकेषु च संसृष्टं शौचं गान्धारकेषु च। राजयाजकयाज्ये च नष्टं दत्तं हविर्भवेत् ॥ २९ ॥ शूद्रसंस्कारको विप्रो यथा याति पराभवम्। यथा ब्रह्मद्विषो नित्यं गच्छन्तीह पराभवम्। तथैव सङ्गतं कृत्वा नरः पतति मद्रकैः ॥ ३० ॥ मद्रके सङ्गतं नास्ति हतं वृश्चिक ते विषम्। आथर्व्वणेन मन्त्रेण यथा शान्तिः कृता मया ॥ ३१ ॥ इति वृश्चिकदष्टस्य विषवेगहतस्य च। कुर्व्वन्ति भेषजं प्राज्ञाः सत्यं तच्चापि

दृश्यते ॥ ३२ ॥ एवं विद्वन् जोषमास्व शृणु चात्रोत्तरं वचः ॥३३॥
वासांस्युत्सृज्य नृत्यन्ति स्त्रियो या मद्यमोहिताः। मैथुनेऽसंयता-
श्चापि यथाकामचराश्च ताः ॥ ३४ ॥ तासां पुत्रः कथं धर्मं मद्रको
वक्तुमर्हति। यास्तिष्ठन्त्यः प्रमेहन्ति यथैवोष्ट्रदशेरकाः ॥ ३५ ॥
तासां विभ्रष्टधर्माणां निर्लज्जानां ततस्ततः। त्वं पुत्रस्तादृशीनां
हि धर्मं वक्तुमिहेच्छसि ॥ ३६ ॥ सुवीरकं याच्यमाना मद्रिका
कर्षति स्फिचौ। अदातुकामा वचनमिदं वदति दारुणम् ॥३७॥
मा मां सुवीरकं कश्चित् याचतां दयितं मम। पुत्रं दद्यां प्रतिं
दद्यां न तु दद्यां सुवीरकम् ॥ ३८ ॥ गौर्य्योऽबृहत्यो निर्ह्रीकाः
मद्रिकाः कम्बलावृताः। घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम।
॥ ३९ ॥ एवमादि मयान्यैर्वा शक्यं वक्तुं भवेद्बहु। आकेशाग्रा-
न्नखाग्राच्च वक्तव्येषु कुकर्मसु ॥ ४० ॥ मद्रकाः सिन्धुसौवीरा धर्मं
विद्युः कथन्त्विह। पापदेशोद्भवा म्लेच्छा धर्माणामविचक्षणाः ॥४१॥
एष मुख्यतमो धर्मः क्षत्रियस्येति नः श्रुतम्। यदाजौ निहतः
शेते सद्भिः समभिपूजितः ॥ ४२ ॥ आयुधानां साम्पराये यन्मुच्येय-
महं ततः। ममैष प्रथमः कल्पो निधने स्वर्गमिच्छतः ॥ ४३ ॥
सोऽहं प्रियः सखा चास्मि धार्त्तराष्ट्रस्य धीमतः। तदर्थे हि मम
प्राणा यच्च मे विद्यते वसु ॥ ४४ ॥ व्यक्तं त्वमप्युपहितः पाण्डवैः
पापदेशज। यथाचामित्रवत् सर्वं त्वमस्मासु प्रवर्त्तसे ॥ ४५ ॥ कामं
न खलु शक्योऽहं त्वद्विधानां शतैरपि। संग्रामाद्विमुखः कर्त्तुं
धर्मज्ञ इव नास्तिकैः ॥ ४६ ॥ सारङ्ग इव धर्मार्त्तः कामं विलप
शुष्य च। न हि भीषयितुं शक्यः क्षत्रवृत्ते व्यवस्थितः ॥ ४७ ॥
तनुत्यजां नृसिंहानामाहवेष्वनिवर्त्तिताम्। या गतिर्गुरुणा प्रोक्ता
पुरा रामेण तां स्मरे ॥ ४८ ॥ तेषां त्राणार्थमुद्युक्तं वधार्थं द्विषता-
मपि। विद्धि मामास्थितं वृत्तं पौरुरवसमुत्तमम् ॥ ४९ ॥ न
तद्भूतं प्रपश्यामि त्रिषु लोकेषु मद्रप। यो मामस्मादभिप्रायाद्वारये-

दिति मे मतिः ॥ ५० ॥ एवं विद्वान् जोषमास्व त्रासात् किं बहु भाषसे । मा त्वां हत्वा प्रदास्यामि क्रव्याद्भ्यो मद्रकाधम ॥५१॥ मित्रप्रतीक्षया शल्य धार्त्तराष्ट्रस्य चोभयोः । अपवादतितिक्षाभिस्त्रिभिरेतैर्हि जीवसि ॥ ५२ ॥ पुनश्चेदीदृशं वाक्यं मद्रराज वदिष्यसि । शिरस्ते पातयिष्यामि गदया वज्रकल्पया ॥ ५३ ॥ श्रोतारस्त्विदमद्येह द्रष्टारो वा कुरुध्वज । कर्णं वा जघ्नतुः कृष्णौ कर्णो वा निजघान तौ ॥ ५४ ॥ एवमुक्त्वा तु राधेयः पुनरेव विशाम्पते । अब्रवीन्मद्रराजानं याहि याहीत्यसम्भ्रमम् ॥ ५५ ॥

इति कर्णपर्वणि कर्णशल्यसंवादे चत्वारिंशोऽध्यायः ॥ ४० ॥

---

सञ्जय उवाच । मारिषाधिरथेः श्रुत्वा वाचो युद्धाभिनन्दिनः । शल्योऽब्रवीत् पुनः कर्णं निदर्शनमुदाहरन् ॥ १ ॥ जातोऽहं यज्वनां वंशे संग्रामेष्वनिवर्त्तिनाम् । राज्ञां मूर्द्धाभिषिक्तानां स्वयं धर्मपरायणः ॥ २ ॥ यथैव मत्तो मद्येन त्वं तथा लक्ष्यसे वृष । तथापि त्वां प्रमाद्यन्तं चिकित्सेयं सुहृत्तया ॥ ३ ॥ इमां काकोपमां कर्ण प्रोच्यमानां निबोध मे । श्रुत्वा यथेष्टं कुर्य्यास्त्वं निहीन-कुलपांसन ॥ ४ ॥ नाहमात्मनि किञ्चिद्वै किल्बिषं कर्ण संस्मरे । येन मां त्वं महाबाहो हन्तुमिच्छस्यनागसम् ॥ ५ ॥ अवश्यन्तु मया वाच्यं बुध्यता त्वद्धिताहितम् । विशेषतो रथस्थेन राज्ञश्चैव हितैषिणा ॥ ६ ॥ समञ्च विषमञ्चैव रथिनश्च बलाबलम् । श्रमः खेदश्च सततं हयानां रथिना सह ॥ ७ ॥ आयुधस्य परिज्ञानं रुतञ्च मृगपक्षिणाम् । भारश्चाप्यतिभारश्च शल्यानाञ्च प्रतिक्रिया ॥ ८ ॥ अस्त्रयोगश्च युद्धञ्च निमित्तानि तथैव च । सर्व्वमेतन्मया ज्ञेयं रथस्यास्य कुटुम्बिना । अतस्त्वां कथये कर्ण निदर्शनमिदं पुनः ॥ ९ ॥ वैश्यः किलसमुद्रान्ते प्रभूतधनधान्यवान् । यज्वा

दानपतिः चान्तः स्वकर्मस्थोऽभवच्छुचिः ॥ १० ॥ वज्रपुत्रः प्रियापत्यः सर्वभूतानुकम्पकः। राज्ञो धर्मप्रधानस्य राष्ट्रे वसति निर्भयः ॥ ११ ॥ पुत्राणां तस्य बालानां कुमाराणां यशस्विनाम्। काको बहूनामभवदुच्छिष्टकृतभोजनः ॥ १२ ॥ तस्मै सदा प्रयच्छन्ति वैश्यपुत्राः कुमारकाः। मांसौदनं दधि चीरं पायसं मधुसर्पिषी ॥१३॥ स चोच्छिष्टभृतः काको वैश्यपुत्रैः कुमारकैः। सदृशान् पक्षिणो दृप्तः श्रेयसश्चावमन्यते ॥ १४ ॥ अथ हंसाः समुद्रान्ते कदाचिदतिपातिनः। गरुड़स्य गतौ तुल्याश्चक्राङ्गा हृष्टचेतसः ॥ १५ ॥ कुमारकास्ततो हंसान् दृष्ट्वा काकमथाब्रुवन्। भवानेव विशिष्टो हि पतत्रिभ्यो विहङ्गम ॥ १६ ॥ प्रतार्य्यमानस्तैः सर्वैरल्पबुद्धिभिरण्डजः। तद्वचः सत्यमित्येव मौर्ख्याद्दर्पाच्च मन्यते ॥ १७ ॥ तान् सोऽभिपत्य जिज्ञासुः क एषां श्रेष्ठभागिति। उच्छिष्टदर्पितः काको बहूनां दूरपातिनाम् ॥ १८ ॥ तेषां यं प्रवरं मेने हंसानां दूरपातिनाम्। तमाह्वयत दुर्बुद्धिः पताव इति पक्षिणम् ॥ १९ ॥ तच्छ्रुत्वा प्राहसन् हंसा ये तत्रासन् समागता। भाषतो बहु काकस्य बलिनः पततां वराः ॥ २० ॥ इदमूचुः स्म चक्राङ्गा वचः काकं विहङ्गमाः ॥ २१ ॥

हंसा ऊचुः। वयं हंसाश्चरामेमां पृथिवीं मानसौकसः। पक्षिणाञ्च वयं नित्यं दूरपातेन पूजिताः ॥ २२ ॥ कथं नु हंसं बलिनं चक्राङ्गं दूरपातिनम्। काको भूत्वा निपतने समाह्वयसि दुर्मते। कथं त्वं पतिता काक सहास्माभिर्ब्रवीहि तत् ॥ २३ ॥ अथ हंसवचो मूढ़ः कुत्सयित्वा पुनः पुनः। प्रजगादोत्तरं काकः कत्थनो जातिलाघवात् ॥ २४ ॥

काक उवाच। शतमेकञ्च पातानां पतितास्मि न संशयः। शतयोजनमेकैकं विचित्रं विविधं तथा ॥ २५ ॥ उड्डीनमवडीनञ्च प्रडीनं डीनमेव च। निडीनमथ संडीनं तिर्य्यग्डीनगतानि

च ॥ २६ ॥ विडीनं परिडीनञ्च पराडीनं सुडीनकम् । अतिडीनं महाडीनं स्वडीनं परिडीनकम् ॥ २७ ॥ अवडीनं प्रडीनञ्च संडीनं डीन डीनकम् । संडीनोड्डीनडीनञ्च पुनर्डीनावडीनकम् ॥ २८ ॥ सन्तातं समुदीर्णञ्च ततोऽन्यद्व्यतिरिक्तकम् । गतागतं प्रतिगतं बह्वीश्च निकुलीनिकाः । कर्त्तास्मि मिषतां वोऽद्य ततो द्रक्ष्यथ मे बलम् ॥ २९ ॥ तेषामन्यतमेनाहं पतिष्यामि विहायसम् । प्रदिशध्वं यथान्यायं केन हंसाः पतास्म्यहम् ॥ ३० ॥ ते वै ध्रुवं विनिश्चित्य पतध्वं तु मया सह । पातैरेभिः खलु खगाः पतता खे निराश्रये ॥ ३१ ॥ एवमुक्ते तु काकेन प्रहस्यैको विहङ्गमः उवाच काकं राधेय वचनं तन्निबोध मे ॥ ३२ ॥

हंस उवाच । शतमेकञ्च पातानां त्वं काक पतिता ध्रुवम् । एकमेव तु यं पातं विदुः सर्व्वे विहङ्गमाः ॥ ३३ ॥ तमहं पतिता काक नान्यं जानामि कञ्चन । पत त्वमपि रक्ताक्ष येन पातेन मन्यसे ॥ ३४ ॥ अथ काकाः प्रजहसुर्ये तत्रासन् समागताः । कथमेकेन पातेन हंसः पातशतं जयेत् ॥ ३५ ॥ एकेनैव समस्यैकं पातेताभिपतिष्यति । हंसस्य पतितं काको बलवानाशुविक्रमः ॥ ३६ प्रपेततुः स्पर्द्धया च ततस्तौ हंसवायसौ । एकपाती च चक्राङ्गः काकः पातशतेन च ॥ ३७ ॥ पेतिवानथ चक्राङ्गः पेतिवांश्चापि वायसः । विसिस्मापयिषुःपातैराचचाणः स्वकां क्रियाम् ॥ ३८ ॥ अथ काकस्य चित्राणि पतितानि मुहुर्मुहुः । दृष्ट्वा प्रमुदिताः काका विनेदुरधिकैः स्वरैः ॥ ३९ ॥ हंसांश्चावहसन्ति स्म प्रावदन्नप्रियानि च । उत्पत्योत्पत्य च मुहुर्मुहूर्त्तमिति चेति च ॥ ४० ॥ वृक्षाग्रेभ्यः स्थलेभ्यश्च निपतन्त्युत्पतन्ति च । कुर्व्वाणा विविधान्रावानाशंसन्तस्तथा जयम् ॥ ४१ ॥ हंसस्तु मृदुनैकेन विक्रान्तुमुपचक्रमे । पर्य्यहीयत काकाच्च मुहूर्त्तमिव मारिष ॥ ४२ ॥ मन्य च हंसांस्तानिदं वचनमब्रुवन् । योऽसावुत्पतितो हंस

सोऽसावेवं प्रहीयते ॥ ४३ ॥ अथ हंसः स तत्श्रुत्वा प्रापतत् पश्चिमां दिशम् । उपर्य्युपरि वेगेन सागरं मकरालयम् ॥ ४४ ॥ ततो भीः प्राविशत् काकं तदा तत्र विचेतसम् । द्वीपद्रुमानपश्यन्तं निपातार्थी श्रमान्वितम् । निपतेयं क्व नु श्रान्त इति तस्मिन् जलार्णवे ॥ ४५ ॥ अविषह्यः समुद्रो हि बहुसत्त्वगणालयः । महाभूतशतोद्भासी नभसोऽपि विशिष्यते ॥ ४६ ॥ गाम्भीर्य्याद्धि समुद्रस्य न विशेषं कुलाधम । दिगम्बराम्भसां कर्ण समुद्रस्था विदुर्जनाः । विदूरपातात्तोयस्य किं पुनः कर्ण वायसः ॥ ४७ ॥ अथ हंसोऽप्यतिक्रम्य मुहूर्त्तमिति चेति च । अवेक्षमाणस्तं काकं नाशक्नोदपसर्पितुम् ॥ ४८ ॥ अतिक्रम्य तु चक्राङ्गः काकं तं समुदैक्षत । यावन्नत्वा पतत्येष काको मामिति चिन्तयन् ॥ ४९ ॥ ततः काको भृशं श्रान्तो हंसमभ्यागमत्तदा ॥ ५० ॥ तं तथा हीयमानन्तु हंसो दृष्ट्वाब्रवीदिदम् । उज्जिहीर्षुर्निमज्जन्तं स्मरन् सत्पुरुषव्रतम् ॥ ५१ ॥

हंस उवाच । बहूनि पतितानि त्वमाचक्षाणो मुहुर्मुहुः । पातस्य व्याहरंश्चेदं न नो गुह्यं प्रभाषसे ॥ ५२ ॥ किं नाम पतितं काक यत्त्वं पतसि साम्प्रतम् । जलं स्पृशसि पक्षाभ्यां तुण्डेन च पुनः पुनः ॥ ५३ ॥ प्रब्रूहि कतमो यत्र पाते वर्त्तसि वायस । एह्येहि काक शीघ्रं त्वमेष त्वां प्रतिपालये ॥ ५४ ॥

शल्य उवाच । स पक्षाभ्यां स्पृशन्नार्त्तस्तुण्डेन च जलं तदा दृष्टो हंसेन दुष्टात्मन्निदं हंसं ततोऽब्रवीत् ॥ ५५ ॥ अपश्यन्नम्भसः पारं निपतंश्च श्रमान्वितः । पातवेगप्रमथितो हंसं काकोऽब्रवीदिदम् ॥ ५६ ॥ वयं काकाः कृता नाम चरामः काकरासिकाः । हंस प्राणैः प्रपद्ये त्वामुदकान्तं नयस्व माम् ॥ ५७ ॥ स पक्षाभ्यां स्पृशन्नार्त्तस्तुण्डेन च महार्णवम् । काको दृढ़परिश्रान्तः सहसा निपपात ह ॥ ५८ ॥ सागराम्भसि तं दृष्ट्वा पतितं दीनचेतसम् ।

म्रियमाणमिदं काकं हंसो वाक्यमुवाच ह ॥ ५९ ॥ शतमेकञ्च पातानां पतांस्यहमनुत्तमः । श्लाघमानस्त्वमात्मानं काक भाषितवानसि ॥ ६० ॥ स त्वमेकशतं पातं पतन्नभ्यधिको मया । कथमेवं परिश्रान्तः पतितोऽसि महार्णवे ॥ ६१ ॥ प्रत्युवाच ततः काकः सीदमान इदं वचः । उपरिष्टात्तदा हंसमभिवीक्ष्य प्रसादयन् ॥ ६२

काक उवाच । उच्छिष्टदर्पितो हंस मन्येऽऽत्मानं सुपर्णवत् । अवमन्ये बहूंश्चाहं काकानन्यांश्च पक्षिणः ॥ ६३ ॥ प्राणैर्हंस प्रपद्ये त्वां द्वीपान्तं प्रापयस्व माम् ॥६४॥ यद्यहं स्वस्तिमान् हंस स्वदेशं प्राप्नुयां विभो । न कश्चिदवमन्येयमापदो मां समुद्धर ॥६५॥ तमेवं वादिनं दीनं विलपन्तमचेतनम् । काककाकेति राशन्तं निमज्जन्तं महार्णवे ॥ ६६ ॥ अनुक्त्वा वायसं हंसो जलक्लिन्नं सुदुर्द्दशम् । पद्भ्यामुत्क्षिप्य वेपन्तं पृष्ठमारोपयच्छनैः ॥ ६७ ॥ आरोप्य पृष्ठं हंसस्तं काकं तूर्णं विचेतसम् । आजगाम पुनर्द्वीपं स्पर्द्धयोत्पेततुर्यतः ॥ ६८ ॥ संस्थाप्य तञ्चापि पुनः समाश्वास्य च खेचरम् । गतो यथेप्सितं देशं हंसो मन इवाशुगः ॥ ६९ ॥ एवमुच्छिष्टपुष्टः स काको हंसपराजित । बलवीर्य्यमदं कर्ण त्यक्त्वा शान्तिमुपागतः ॥ ७० ॥ उच्छिष्टभोजनः काको यथा वैश्यकुले तु सः । एवं त्वमुच्छिष्टभृतो धार्त्तराष्ट्रैर्न संशयः । सदृशान् श्रेयसश्चापि सर्वान् कर्णावमन्यसे ॥ ७१ ॥ द्रोणद्रौणिकृपैर्गुप्तो भीष्मेणान्यैश्च कौरवैः । विराटनगरे पार्थमेकं किं नावधीस्तदा ॥ ७२ ॥ यत्र व्यस्ताः समस्ताश्च निर्ज्जिताः स्थ किरीटिना । शृगाला इव सिंहेन क्व ते वीर्य्यमभूत्तदा ॥ ७३ ॥ भ्रातरञ्च हतं दृष्ट्वा समरे सव्यसाचिना । पश्यतां कुरुवीराणां प्रथमं त्वं पलायितः ॥ ७४ ॥ तथा द्वैतवने कर्ण गन्धर्वैः समभिद्रुतः । कुरून् समग्रानुत्सृज्य प्रथमं त्वं पलायितः ॥ ७५ ॥ हत्वा जित्वा च गन्धर्वांश्चित्रसेनमुखान्रणे । कर्ण दुर्य्योधनं पार्थः

सभार्यं सममोचयत् ॥ ७६ ॥ पुनः प्रभावः पार्थस्य पौराणः केशवस्य च। कथितः कर्ण रामेण सभायां राजसंसदि ॥ ७७ ॥ सततञ्च त्वमश्रौषीर्वचनं द्रोणभीष्मयोः। अवध्यौ वदतोः कृष्णौ सन्निधौ च महीक्षिताम् ॥ ७८ ॥ कियत्तु तत् प्रवक्ष्यामि येन येन धनञ्जयः। त्वत्तोऽतिरिक्तः सर्वेभ्यो भूतेभ्यो ब्राह्मणो यथा ॥ ७९ ॥ इदानीमेव द्रष्टासि प्रधाने स्यन्दने स्थितौ। पुत्रञ्च वसुदेवस्य कुन्तीपुत्रञ्च पाण्डवम् ॥ ८० ॥ यथाश्रयत चक्राङ्गं वायसो बुद्धिमाश्रितः। तथाश्रयस्व वार्ष्णेयं पाण्डवञ्च धनञ्जयम् ॥ ८१ ॥ यदा त्वं युधि विक्रान्तौ वासुदेवधनञ्जयौ। द्रष्टास्येकरथे कर्ण तदा नैवं वदिष्यसि ॥ ८२ ॥ यदा शरशतैः पार्थो दर्पं ते वारयिष्यति। तदा त्वमन्तरं द्रष्टा आत्मनश्चार्जुनस्य च ॥८७॥ देवासुरमनुष्येषु प्रख्यातौ यौ नरोत्तमौ। तौ मावमंस्था मौर्ख्यात्त्वं खद्योत इव रोचनौ ॥ ८४ ॥ सूर्य्याचन्द्रमसौ यद्वत्तद्वदर्जुनकेशवौ। प्रकाशेनातिविख्यातौ त्वन्तु खद्योतवन्नृषु ॥ ८५ ॥ एवं विद्वान्मावमंस्थाः सूतपुत्राच्युतार्जुनौ। नृसिंहौ तौ महात्मानौ जोषमास्स्व विकत्थने ॥ ८६ ॥

इति कर्णपर्वणि हंसकाकीयोपाख्याने एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

---

सञ्जय उवाच। मद्राधिपस्याधिरथिर्महात्मा वचो निशम्याप्रियमप्रतीतः। उवाच शल्यं विदितं ममैतत् यथाविधावर्जुनवासुदेवौ ॥ १ ॥ शौरे रथं वाहयतोऽर्जुनस्य बलं महास्त्राणि च पाण्डवस्य। अहं विजानामि यथावदद्य परोक्षभूतं तव तत्तु शल्य ॥ २ ॥ तौ चाप्यहं शस्त्रभृतां वरिष्ठौ व्यपेतभीर्योधयिष्यामि कृष्णौ। सन्तापयत्यभ्यधिकन्तु रामाच्छापोऽद्य मां ब्राह्मणसत्-

माच ॥ ३ ॥ अवसं वै ब्राह्मणच्छद्मनाहं रामे पुरा दिव्यमस्त्रं चिकीर्षुः। तत्रापि मे देवराजेन विघ्नो हितार्थिना फाल्गुनस्यैव शल्य। कृतो विभेदेन ममोरुमेत्य प्रविश्य कीटस्य तनुं विरूपाम् ॥ ४ ॥ ममोरुमेत्य प्रविभेद कीटः सुप्ते गुरौ तत्र शिरो निधाय। उरुप्रभेदाच्च महान् बभूव शरीरतो मे घनशोणितौघः ॥ ५ ॥ गुरोर्भयाच्चापि न चेलिवानहं तच्चावबुद्धो ददृशेऽथ विप्रः। स धैर्य्ययुक्तं प्रसमीक्ष्य मां वै न त्वं विप्रः कोऽसि सत्यं वदेति ॥ ६ ॥ तस्मै तदात्मानमहं यथावदाख्यातवान् सूतवदित्य शल्य। स मां निशम्याथ महातपस्वी संशप्तवान् रोषपरीतचेताः ॥ ७ ॥ सूतोपधावाप्तमिदं तवास्त्रं न कर्मकाले प्रतिभास्यति त्वाम्। अन्यत्र तस्मात्तव मृत्युकालादब्राह्मणे ब्रह्म न हि ध्रुवं स्यात् ॥ ८ ॥ तदद्य पर्य्याप्तमतीव चास्त्रमस्मिन् संग्रामे तुमुलेऽतीव भीमे ॥ ९ ॥ योऽयं शल्य भरतेष्वूपपन्नः प्रकर्षणः सर्व्वहरोऽतिभीमः। सोऽभिमन्ये क्षत्रियाणां प्रवीरान् प्रतापिता बलवान् वै विमर्द्दः ॥१०॥ शल्योग्रधन्वानमहं वरिष्ठं तरस्विनं भीममसह्यवीर्य्यम्। सत्यप्रतिज्ञं युधि पाण्डवेयं धनञ्जयं मृत्युमुखं नयिष्ये ॥ ११ ॥ अस्त्रं हि मे तत् प्रतिपन्नमद्य येन क्षेप्स्ये समरे शत्रुपूगान्। प्रतापिनं बलवन्तं कृतास्त्रं तमुग्रधन्वानममितौजसञ्च। क्रूरं शूरं रौद्रममित्रसाहं धनञ्जयं संयुगेऽहं हनिष्ये ॥ १२ ॥ अपाम्पतिर्व्वेगवानप्रमेयो निमज्जयिष्यन् बहुलाः प्रजाश्च। महावेगं सङ्कुरुते समुद्रो वेला चैनं धारयत्यप्रमेयम् ॥ १३ ॥ प्रमुञ्चन्तं बाणसङ्घानमोघान् मर्म्मच्छिदो वीरहनः सुपत्रान्। कुन्तीपुत्रं प्रतियोत्स्यामि युद्धे ज्याः कर्षतामुत्तममद्य लोके ॥ १४ ॥ एवं बलेनातिबलं महास्त्रं समुद्रकल्पं सुदुरापमुग्रम्। शरौघिणं पार्थिवान्मज्जयन्तं वेलेव पार्थमिषुभिः संसहिष्ये ॥ १५ ॥ अद्याहवे यस्य न तुल्यमन्यं मन्ये मनुष्यं धनुराददानम्। सुरासुरान् वो युधि वै जयेत तेनाद्य

मे पश्य युद्धं सुघोरम् ॥ १६ ॥ अतीव मानी पाण्डवो युद्धकामो ह्यमानुषैरेष्यति मे महास्त्रैः। अस्त्रास्त्रमस्त्रैः प्रतिहत्य सङ्ख्ये शरोत्तमैः पातयिष्यामि पार्थम् ॥१७॥ दिवाकरेणाभिसमं तपन्तं समाप्तरश्मिं यशसा ज्वलन्तम्। तमोनुदं मेघ इवातिमात्रं धनञ्जयं छादयिष्यामि बाणैः ॥ १८ ॥ वैश्वानरं धूमशिखं ज्वलन्तं तेजस्विनं लोकमिमं दहन्तम्। मेघो यथा शरवर्षैस्तथाहं कुन्तीपुत्रं शमयिष्यामि युद्धे ॥ १९ ॥ आशीविषं दुर्द्धरं वै सुघोरं सुतीक्ष्णदंष्ट्रं ज्वलनप्रभावम्। क्रोधप्रदीप्तमहितं दहन्तं कुन्तीपुत्रं शमयिष्यामि भल्लैः ॥ २० ॥ प्रमाथिनं बलवन्तं प्रहारिणं प्रभञ्जनं मातरिश्वानमुत्तम्। युद्धे सहिष्ये हिमवानिवाचलो धनञ्जयं क्रुद्धममृष्यमाणम् ॥ २१ ॥ विशारदं रथमार्गेषु शक्तं धुर्य्यं नित्यं समरेषु प्रवीरम्। लोके वरं सर्वधनुर्द्धराणां धनञ्जयं संयुगे संसहिष्ये ॥ २२ ॥ अद्याहवे यस्य न तुल्यमन्यं मन्ये मनुष्यं धनुरादरानम्। सर्वामिमां यः पृथिवीं विजिग्ये तथा विद्वान् योत्स्यमानोऽस्मि तेन ॥ २३ ॥ यः सर्वभूतानि सदेवकानि प्रस्थेऽजयत् खाण्डवे सव्यसाची। को जीवितं रक्षमाणो हि तेन युयुत्सेहि मामृते मानुषोऽन्यः ॥ २४ ॥ मानी दृढ़ास्त्रः कृतहस्तयोगो दिव्यास्त्रवित् श्वेतहयः प्रमाथी। तस्याहमद्यातिरथस्य कायात् शिरो हरिष्यामि शितैः पृषत्कैः ॥ २५ ॥ योत्स्याम्यहं शल्य धनञ्जयेन मृत्युं पुरस्कृत्य रणे जयं वा। अन्यो हि नास्त्येकरथेन मर्त्यो युध्येत यः पाण्डवं मृत्युकल्पम् ॥ २६ ॥ तस्याहवे पौरुषं पाण्डवस्य ब्रूयां हृष्टः समितौ क्षत्रियाणाम्। किं त्वं मूर्खः प्रसभं मूढ़चेताः समावोचः पौरुषं फाल्गुनस्य ॥ २७ ॥ अप्रियो यः पुरुषो निष्ठुरो हि क्षुद्रः क्षेप्ता क्षमिणश्चाक्षमावान्। हन्यामहं तादृशानां शतानि क्षमाम्यहं क्षमया कालयोगात् ॥ २८ ॥ अवोचस्त्वं पाण्डवार्थेऽप्रियाणि प्रधर्षयन्मां मूढ़वत पापकर्मा।

मय्यार्जवे जिह्ममतिर्हतस्त्वं मित्रद्रोही साप्तपदं हि मैत्रम् ॥ २९ ॥
कालस्त्वयं प्रत्युपयाति दारुणो दुर्य्योधनो युद्धमुपागमद्‌यत् ।
तस्यार्थसिद्धिं त्वभिकाङ्क्षमाणस्तन्मन्यसे यत्र नैकान्त्यमस्ति ॥ ३० ॥
मित्रं मिदेर्नन्दतेः प्रीयतेर्वा संत्रायतेर्मिनुतेर्मोदतेर्वा । ब्रवीमि ते
सर्वमिदं ममास्ति तच्चापि सर्वं समवेत्ति राजा ॥ ३१ ॥ शत्रुः शदेः
शासतेर्वा श्यतेर्वा शृणोतेर्वा श्वसतेः सीदतेर्वा । उपसर्गाद्बहुधा
सूदतेश्च प्रायेण सर्वं त्वयि तच्च मह्यम् ॥ ३२ ॥ दुर्य्योधनार्थं तव च
प्रियार्थं यशोऽर्थमात्मार्थमपीश्वरार्थम् । तस्मादहं पाण्डववासुदेवौ
योत्स्ये यत्नात् कर्म्म तत् पश्य मेऽद्य ॥३३॥ अस्त्राणि पश्याद्य ममो
त्तमानि ब्राह्मग्राणि दिव्यान्यथ मानुषाणि । आसादयिष्याम्यह-
मुग्रवीर्य्यं द्विपो द्विपं मत्तमिवातिमत्तः ॥ ३४ ॥ अस्त्रं ब्राह्मंश्च
मनसा तद्धराजय्यं चेप्स्ये पार्थायाप्रमेयं जयाय । तेनापि मे नैव
मुच्येत युद्धे न चेत् पतेद्विषमे मेऽद्य चक्रम् ॥ ३५ ॥ वैवस्वताद्दण्ड-
हस्ताद्वरुणाद्वापि पाशिनः । सगदाद्वा धनपतेः सवज्राद्वापि वास-
वात् ॥ ३६ ॥ अन्यस्मादपि कस्माच्चिदमित्रादाततायिनः । इति
शल्य विजानीहि यथा नाहं बिभेम्यतः ॥ ३७ ॥ तस्मान्न मे भयं
पार्थान्नापि चैव जनार्द्दनात् । सह युद्धं हि मे ताभ्यां साम्पराये
भविष्यति ॥ ३८ ॥ कदाचिद्विजयस्याहमस्त्रहेतोरटन्नृप । अज्ञाना-
द्विक्षिपन् वाणान् घोररूपान् भयानकान् ॥ ३९ ॥ होमधेन्वा
वत्समस्य प्रमत्त इषुणाहनम् । चरन्तं विजने शल्य ततोऽनु-
व्याजहार माम् ॥ ४० ॥ यस्मात्त्वया प्रमत्तेन होमधेन्वा हतः
सुतः । श्वभ्रे ते पततां चक्रमिति मां ब्राह्मणोऽब्रवीत् । युध्य-
मानस्य संग्रामे प्राप्तस्यैकायनं भयम् ॥ ४१ ॥ तस्माद्बिभेमि बल-
वद्ब्राह्मणव्याहृतादहम् । एते हि सोमराजान ईश्वराः सुख-
दुःखयोः ॥ ४२ ॥ अदां तस्मै गोसहस्रं बलीवर्द्दांश्च षट्शतान् ।
प्रसादं न लभे शल्य ब्राह्मणान्मद्रकेश्वर ॥ ४३ ॥ ईषादन्तान्

सप्तशतान् दासीदासशतानि च । ददतो द्विजमुख्यो मे प्रसादं न चकार सः ॥ ४४ ॥ कृष्णानां श्वेतवत्सानां सहस्राणि चतुर्दश । आहरन्न लभे तस्मात् प्रसादं द्विजसत्तमात् ॥ ४५ ॥ ऋद्धं गृहं सर्वकामैर्यच्च मे वसु किञ्चन । तत् सर्वमस्मै सत्कृत्य प्रयच्छामि न चेच्छति ॥ ४६ ॥ ततोऽब्रवीन्मां याचन्तमपराद्धं प्रयत्नतः । व्याहृतं यन्मया सूत तत्तथा न तदन्यथा ॥ ४७ ॥ अनृतोक्तं प्रजां हन्यात्ततः पापमवाप्नुयाम् । तस्माद्धर्माभिरक्षार्थं नानृतं वक्तुमुत्सहे ॥ ४८ ॥ मा त्वं ब्रह्मगतिं हिंस्याः प्रायश्चित्तं कृतं त्वया । मद्वाक्यं नानृतं लोके कश्चित् कुर्य्यात् समाप्नुहि ॥ ४९ ॥ इत्येतत्ते मया प्रोक्तं क्षिप्तेनापि सुहृत्तया । जानामि त्वां विक्षिपन्तं जोषमास्स्वोत्तरं शृणु ॥ ५० ॥

इति कर्णपर्वणि कर्णशल्यसंवादे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

---

सञ्जय उवाच । ततः पुनर्महाराज मद्रराजमरिन्दमः । अभ्यभाषत राधेयः सन्निवार्य्योत्तरं वचः ॥ १ ॥ यत्त्वं निदर्शनार्थं मां शल्य जल्पितवानसि । नाहं शक्यस्त्वया वाचा विभीषयितुमाहवे ॥ २ ॥ यदि मां देवताः सर्वा योधयेयुः सवासवाः । तथापि मे भयं न स्यात् किमु पार्थात् सकेशवात् ॥ ३ ॥ नाहं भीषयितुं शक्यो वाङ्मात्रेण कथञ्चन । अन्यं जानीहि यः शक्यस्त्वया भीषयितुं रणे ॥ ४ ॥ नीचस्य बलमेतावत् पारुष्यं यत् त्वमात्थ माम् । अशक्तो मद्गुणान् वक्तुं वल्गसे बहु दुर्मते ॥ ५ ॥ न हि कर्णः समुद्भूतो भयार्थमिह मद्रक । विक्रमार्थमहं जातो यशोऽर्थञ्च तथात्मनः ॥ ६ ॥ सखिभावेन सौहार्द्दान्मित्रभावेन चैव हि । कारणैस्त्रिभिरेतैस्त्वं शल्य जीवसि साम्प्रतम् ॥ ७ ॥ राज्ञश्च धृतराष्ट्रस्य कार्य्यं सुमहदुद्यतम् । मयि तच्चाहितं शल्य तेन

जीवसि मे चणम् ॥ ८ ॥ कृतश्च समयः पूर्वं चन्तव्यं विप्रियं वचः । समयः परिपाल्यो वै तेन जीवसि मद्रक ॥ ९ ॥ ऋते मल्यसहस्रेण विजयेयं परानहम् । मित्रद्रोहस्तु पापीयानिति जीवसि साम्प्रतम् ॥ १० ॥

इति कर्णपर्वणि कर्णशल्यसंवादे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

---

शल्य उवाच । ननु प्रलापाः कर्णैते यान् ब्रवीषि परान् प्रति । ऋते कर्णसहस्रेण शक्यं जेतुं परान् युधि ॥ १ ॥

सञ्जय उवाच । तथा ब्रुवन्तं परुषं कर्णो मद्राधिपं तदा । परुषं द्विगुणं भूयः प्रोवाचाप्रियदर्शनः ॥ २ ॥

कर्ण उवाच । इदन्तु मे त्वमेकाग्रः शृणु मद्रजनाधिप । सन्निधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतम् ॥ ३ ॥ देशांश्च विविधांश्चित्रान् पूर्ववृत्तांश्च पार्थिवान् । ब्राह्मणाः कथयन्तः स्म धृतराष्ट्रमुपासते ॥ ४ ॥ तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः । वाह्लीकदेशान् मद्रांश्च कुत्सयन् वाक्यमब्रवीत् ॥ ५ ॥ वहिष्कृता हिमवता गङ्गया च वहिष्कृताः । सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये ॥ ६ ॥ पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः । तान् धर्मवाह्यानशुचीन् वाहीकान् परिवर्ज्जयेत् ॥ ७ ॥ गोवर्द्धनो नाट वटः सुभाण्डं नाम चत्वरम् । एतद्राजकुलद्वारमाकुमारात् स्मराम्यहम् ॥ ८ ॥ कार्य्येणात्यर्थगूढ़ेन वाहकेषूषितं मया । ततस्तेषां समाचारः संवासाद्विदितो मया ॥ ९ ॥ शाकलं नाम नगरमापगा नाम निम्नगा । जर्त्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दितम् ॥ १० ॥ धानागौड़ासवं पीत्वा गोमांसं लसुनैः सह । अपूपमांसवाटऽानामाशिनः शीलवर्ज्जिताः ॥ ११ ॥ हसन्त्यथ च नृत्यन्ति स्त्रियो मत्ता विवाससः । नगरागारवप्रेषु वहिर्माल्यानु-

लेपनाः ॥ १२ ॥ मत्तावगीतैर्विविधैः खरोष्ट्रनिनदोपमैः। अनावृता मैथुने ताः कामचाराश्च सर्वशः। आहुरन्योऽन्यसूक्तानि प्रब्रुवाना मदोत्कटाः॥ १३ ॥ हे हते हे हतेत्येवं स्वामिभर्त्तृहतेति च। आक्रोशन्त्यः प्रनृत्यन्ति व्रात्याः पर्वस्वसंयताः॥ १४ ॥ तासां किलावलिप्तानां निवसन् कुरुजाङ्गले। कश्चिद्वाहीकदुष्टानां नातिहृष्टमना जगौ॥ १५ ॥ सा नूनं बृहती गौरी सूक्ष्मकम्बलवासिनी। मामनुस्मरती शेते वाहीकं कुरुवासिनम्॥ १६ ॥ शतद्रुकां नदीं तीर्त्वा ताञ्च रम्यामिरावतीम्। गत्वा स्वदेशं द्रक्ष्यामि स्थूलशङ्खाः शुभाः स्त्रियः॥ १७ ॥ मनःशिलोज्ज्वलापाङ्गा गौर्य्यस्त्रिककुदञ्जनाः। कम्बलाजिनसम्वीताः कुर्वन्त्यः प्रियदर्शनाः ॥ १८ ॥ मृदङ्गानकशङ्खानां मर्द्दलानाञ्च निस्वनैः। खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम्॥ १९ ॥ शमीपीलुकरीराणां वनेषु सुखवर्त्मसु। अपूपान् शक्तुपिण्डांश्च प्राश्नन्तो मथितान्वितान्॥२०॥ पथिषु प्रबला भूत्वा कदा सम्पततोऽध्वगान्। चेलापहारं कुर्वाणास्ताड़यिष्याम भूयसः॥ २१ ॥ एवं शीलेषु व्रात्येषु वाहीकेषु दुरात्मसु। कश्चेतयानो निवसेन्मुहूर्त्तमपि मानवः ॥ २२ ॥ ईदृशा ब्राह्मणेनोक्ता वाहीका मोघचारिणः। येषां षड्भागहर्त्ता त्वमुभयोः शुभपापयोः॥ २३ ॥ इत्युक्त्वा ब्राह्मणः साधुरुत्तरं पुनरुक्तवान्। वाहीकेष्वविनीतेषु प्रोच्यमानं निबोधत ॥ २४ ॥ तत्र स्म राक्षसी गाति सदा कृष्णचतुर्द्दशीम्। नगरे शाकले स्फीते आहत्य निशि दुन्दुभिम्॥ २५ ॥ कदा वाहेयिका गाथाः पुनर्गास्यामि शाकले। गव्यस्य तृप्ता मांसस्य पीत्वा गौड़ं सुरासवम्॥ २६ ॥ गौरीभिः सह नारीभिर्बृहतीभिरलङ्कृता। पलाण्डुगण्डूषयुतान् खादन्ती चैड़कान् बहून्॥२७॥ वाराहं कौक्कुटं मांसं गव्यं गार्द्दभमौष्ट्रिकम्। ऐड़ञ्च ये न खादन्ति तेषां जन्म निरर्थकम्॥ २८ ॥ इति गायन्ति ये मत्ताः शीधुना

शाकलाश्च ये। सबालवृद्धाः क्रन्दन्तस्तेषु धर्मः कथं भवेत् ॥ २९ ॥
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते। यदन्योऽप्युक्तवानस्मान् ब्राह्मणः कुरुसंसदि ॥ ३० ॥ पञ्च नद्यो वहन्त्येता यत्र पीलुवनान्युत। शतद्रुश्च विपाशा च तृतीयैरावती तथा ॥ ३१ ॥ चन्द्रभागा वितस्ता च सिन्धुषष्ठा वहिर्गिरेः। आरट्टा नाम ते देशा नष्टधर्मा न तान् व्रजेत् ॥ ३२ ॥ व्रात्यानां दासमीयानां वैदेहानामयज्वनाम्। न देवाः प्रतिगृह्णन्ति पितरो ब्राह्मणास्तथा ॥ ३३ ॥ तेषां प्रनष्टधर्माणां वाहीकानामिति श्रुतिः। ब्राह्मणेन तथा प्रोक्तं विदुषा साधुसंसदि ॥ ३४ ॥ काष्ठकुण्डेषु वाहीका मृण्मयेषु च भुञ्जते। सक्तुवाट्यावलिप्तेषु श्वावलीढेषु निर्घृणाः ॥ ३५ ॥ आविकञ्चौष्ट्रिकञ्चैव चीरं गार्द्दभमेव च। तद्विकारांश्च वाहीकाः खादन्ति च पिवन्ति च ॥ ३६ ॥ पुत्रसङ्करिणो जाल्माः सर्वान्नचीरभोजनाः। आरट्टा नाम वाहीका वर्ज्जनीया विपश्चिता ॥ ३७ ॥ हन्त शल्य विजानीहि हन्त भूयो ब्रवीमि ते। यदन्योऽप्युक्तवान् मह्यं ब्राह्मणः कुरुसंसदि ॥ ३८ ॥ युगन्धरे पयः पीत्वा प्रोष्य चाप्यच्युतस्थले। तद्वद्भूतिलये स्नात्वा कथं स्वर्गं गमिष्यति ॥ ३९ ॥ पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्वतात्। आरट्टा नाम वाहीका न तेष्वार्य्यो द्व्यहं वसेत् ॥ ४० ॥ वहिश्च नाम हीकश्च विपाशायां पिशाचकौ। तयोरपत्यं वाहीका नैषा सृष्टिः प्रजापतेः। ते कथं विहितान् धर्मान् ज्ञास्यन्ते हीनयोनयः ॥ ४१ ॥ कारस्करान्माहिषकान् कालिङ्गान् केरलांस्तथा। कर्कोटकान् वीरकांश्च दुर्धर्मांश्च विवर्ज्जयेत् ॥ ४२ ॥ इति तीर्थानुसर्त्तारं राक्षसी काचिदब्रवीत्। एकरात्रशयी गेहे महोलूखलमेखला ॥ ४३ ॥ आरट्टा नाम ते देशा वाहीका नाम ते जनाः। ब्राह्मणापसदा यत्र तुल्यकालाः प्रजापतेः ॥ ४४ ॥ वेदा न तेषां वेद्यञ्च यज्ञं यजनमेव च। व्रात्यानां दासमीयानामन्नं देवा न

भुञ्जते ॥ ४५ ॥ प्रस्थला मद्रगान्धारा आरट्टा नामतः खशाः ।
वसातिसिन्धुसौवीरा इति प्रायो विकुत्सिताः ॥ ४६ ॥

इति कर्णपर्वणि कर्णशल्यसंवादे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

---

कर्ण उवाच । हन्त शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
उच्यमानं मया सम्यक् त्वमेकाग्रमनाः शृणु ॥ १ ॥ ब्राह्मणः किल
नो गेहमभ्यागच्छत् पुरातिथिः । आचारं तत्र संप्रेक्ष्य प्रीतो
वचनमब्रवीत् ॥ २ ॥ मया हिमवतः शृङ्गमेकेनाध्युषितं चिरम् ।
दृष्टाश्च बहवो देशा नानाधर्मसमावृताः ॥ ३ ॥ न च केन च
धर्मेण विरुध्यन्ते प्रजा इमाः । सर्वे हि तेऽब्रुवन् धर्मं यदुक्तं
वेदपारगैः ॥ ४ ॥ अटता तु ततो देशान् नानाधर्मसमाकुलान् ।
आगच्छता महाराज वाह्लीकेषु निशामितम् ॥ ५ ॥ तत्र वै
ब्राह्मणो भूत्वा ततो भवति क्षत्रियः । वैश्यः शूद्रश्च वाह्लीकस्ततो
भवति नापितः ॥ ६ ॥ नापितश्च पुनर्भूत्वा ततो भवति ब्राह्मणः ।
द्विजो भूत्वा तु तत्रैव पुनर्दासोऽभिजायते ॥ ७ ॥ भवन्त्येककुले
विप्राः प्रहृष्टाः कामचारिणः । गान्धारा मद्रकाश्चैव वाह्लीका-
श्चाल्पचेतसः ॥८॥ एतन्मया श्रुतं तत्र धर्मसङ्करकारकम् । कृत्स्ना-
मटित्वा पृथिवीं वाह्लिकेषु विपर्ययः ॥ ९ ॥ हन्त शल्य विजा-
नीहि हन्त भूयो ब्रवीमि ते । यदप्यन्योऽब्रवीद्वाक्यं वाह्लीका-
नाञ्च कुत्सितम् ॥ १० ॥ सती पुरा हृता काचिदारट्टात् किल
दस्युभिः । अधर्मतश्चोपयाता सा तानभ्यशपत्ततः ॥ ११ ॥ बालां
बन्धुमतीं यन्मामधर्मेणोपगच्छथ । तस्मान्नार्यो भविष्यन्ति बन्धक्यो
वै कुलस्य वः ॥ १२ ॥ न चैवांस्मान् प्रमोक्षध्वं घोरात् पापा-
न्नराधमाः । तस्मात्तेषां भागहरा भागिनेया न सूनवः ॥ १३ ॥
कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः । कोशलाः काश-

षोऽङ्गाश्च कालिङ्गा मागधास्तथा ॥ १४ ॥ चेदयश्च महाभागा धर्मं जानन्ति शाश्वतम्। नानादेशेषु सन्तश्च प्रायो वाह्लीकया-हृते ॥ १५ ॥ आमत्स्येभ्यः कुरुपाञ्चालदेश्या आनैमिषाच्चेश्यो ये विशिष्टाः। धर्मं पुराणमुपजीवन्ति सन्तो मद्रादृते पाञ्चनदांश्च जिह्मान् ॥ १६ ॥ एवं विद्वान् धर्मकथासु राजंस्तूष्णीम्भूतो जड़-वच्छल्य भूयाः। त्वं तस्य गोप्ता च जनस्य राजा षड्भागहर्त्ता शुभदुष्कृतस्य ॥ १७ ॥ अथ वा दुष्कृतस्य त्वं हर्त्ता तेषामरक्षिता। रक्षिता पुण्यभाग्राजा प्रजानां त्वं ह्यपुण्यभाक् ॥ १८ ॥ पूज्यमाने पुरा धर्मे सर्वदेशेषु शाश्वते। धर्मं पाञ्चनदं दृष्ट्वा धिगित्याह पितामहः ॥ १९ ॥ व्रात्यानां दासमीयानां कृतेऽप्यशुभकर्मणाम्। ब्रह्मणा निर्मिते धर्मे कस्तान् धिक्कर्त्तुमर्हति ॥ २० ॥ इति पाञ्च-नदं धर्ममवमेने पितामहः। स्वधर्मस्थेषु वर्णेषु सोऽप्येतान्नाभ्य-पूजयत् ॥ २१ ॥ हन्त शल्य विजानीहि हन्त भूयो ब्रवीमि ते। कल्माषपादः सरसि निमज्जन्राक्षसोऽब्रवीत् ॥ २२ ॥ क्षत्रियस्य मलं भैक्ष्यं ब्राह्मणस्याव्रतं मलम्। मलं पृथिव्या वाह्लीकाः स्त्रीणां मद्रस्त्रियो मलम् ॥ २३ ॥ निमज्जमानमुद्धृत्य कश्चिद्राजा निशा-चरम्। अपृच्छत्तेन चाख्यातं प्रोक्तवांस्तन्निबोध मे ॥ २४ ॥ मानुषाणां मलं म्लेच्छा म्लेच्छानामौष्ट्रिका मलम्। औष्ट्रिकाणां मलं षण्ढाः षण्ढानां राजयाजकाः ॥ २५ ॥ राजयाजकयाज्यानां मद्रकाणाञ्च यन्मलम्। तद्भवेद्वै तव मलं यद्यस्मांस्त्वं न मुञ्चसि ॥ २६ ॥ इति रक्षोपसृष्टेषु विषवीर्य्यहतेषु च। राक्षसं भेषजं प्रोक्तं संसिद्धवचनोत्तरम् ॥ २७ ॥ ब्राह्मं पाञ्चालाः कौरवेयास्तु धर्मं सत्यं मत्स्याः शूरसेनाश्च यज्ञम्। प्राच्या दासा वृषला दाक्षिणात्याः स्तेना वाह्लीकाः सङ्करा वै सुराष्ट्राः ॥ २८ ॥ कृत-घ्नता परवित्तापहारो मद्यपानं गुरुदारावमर्दः। वाक्पारुष्यं गोवधो रात्रिचर्य्या बहिर्गेहं परवस्त्रोपभोगः। येषां धर्मस्तान्

प्रति नास्त्यधर्मो ह्यारट्टकान् पाञ्चनदान् धिगस्तु ॥ २९ ॥ आपाञ्चालेभ्यः कुरवो नैमिषाश्च मत्स्याश्चैतेऽप्यथ जानन्ति धर्मम् । अथोदीच्याश्चाङ्गका मागधाश्च शिष्टान् धर्मानुपजीवन्ति वृद्धाः॥३०॥ प्राचीं दिशं श्रिता देवा जातवेदःपुरोगमाः । दक्षिणां पितरो गुप्तां यमेन शुभकर्मणा ॥ ३१ ॥ प्रतीचीं वरुणः पाति पालयानः सुरान् बली । उदीचीं भगवान् सोमो ब्राह्मणैः सह रक्षति ॥३२॥ तथा रक्षःपिशाचाश्च हिमवन्तं नगोत्तमम् । गुह्यकाश्च महाराज पर्वतं गन्धमादनम् । ध्रुवः सर्वाणि भूतानि विष्णुः पाति जनार्द्दनः ॥३३॥ इङ्गितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोशलाः । अर्द्धोक्ताः कुरुपाञ्चालाः शाल्वाः कृत्स्नानुशासनाः ॥ ३४ ॥ पार्वतीयाश्च विषमा यथैव शिवयस्तथा । सर्वज्ञा यवना राजन् शूराश्चैव विशेषतः ॥ ३५ ॥ म्लेच्छाः स्वसंज्ञानियता नानुक्ता इतरैजनाः । प्रतिवद्धास्तु वाह्लीका न च केचन मद्रकाः । स त्वमेतादृशः शल्य नोत्तरं वक्तुमर्हसि ॥ ३६ ॥ पृथिव्यां सर्वदेशानां मद्रको मलमुच्यते । तथा स्त्रीणाञ्च सर्वासां मद्रिका मलमुच्यते ॥ ३७ ॥ सीधोः पानं गुरुतल्पावमर्द्दो भ्रूणहत्या परवित्तापहारः । येषां धर्मस्तान् प्रति नास्त्यधर्म आरट्टकान् पाञ्चनदान् धिगस्तु ॥ ३८ ॥ एतज्ज्ञात्वा जोषमास्स्व प्रतीपं मा स्म वै कृथाः । मा त्वां पूर्वमहं हत्वा हनिष्ये केशवार्जुनौ ॥ ३९ ॥

शल्य उवाच । आतुराणां परित्यागः सदारसुतविक्रयः । अङ्गेषु वर्त्तते कर्ण येषामधिपतिर्भवान् ॥४०॥ रथातिरथसङ्ख्यायां यत्त्वां भीष्मस्तदाब्रवीत् । तान् विदित्वात्मनो दोषान्निर्मन्युर्भव मा क्रुधः ॥ ४१ ॥ सर्वत्र ब्राह्मणाः सन्ति क्षत्रियाः सन्ति सर्वतः । वैश्याः शूद्रास्तथा कर्ण स्त्रियः साध्व्यश्च सुव्रताः ॥ ४२ ॥ रमन्ते चोपहासेन पुरुषाः पुरुषैः सह । अन्योऽन्यमतितक्षन्तो देशे देशे समैथुनाः ॥ ४३ ॥ परवाच्येषु निपुणः सर्वो भवति सर्वदा ।

आत्मवाच्यं न जानीते जानन्नपि च मुह्यति ॥ ४४ ॥ सर्वत्र सन्ति राजानः स्वं स्वं धर्ममनुव्रताः । दुर्मनुष्यान्निगृह्णन्ति सन्ति सर्वत्र धार्मिकाः ॥ ४५ ॥ न कर्ण देशसामान्यात् सर्वः पापं निषेवते । यादृशाः स्वस्वभावेन देवा अपि न तादृशाः ॥ ४६ ॥

सञ्जय उवाच । ततो दुर्य्योधनो राजा कर्णशल्याववारयत् । सखिभावेन राधेयं शल्यं स्वाजन्यकेन च ॥ ४७ ॥ ततो निवारितः कर्णो धार्त्तराष्ट्रेण मारिष । कर्णोऽपि नोत्तरं प्राह शल्योऽप्यभिमुखः परान् ॥४८॥ ततः प्रहस्य राधेयः पुनर्याहीत्यचोदयत् ॥४९॥

इति कर्णपर्वणि कर्णशल्यसंवादे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

---

सञ्जय उवाच । ततः परानीकसहं व्यूहमप्रतिमं कृतम् । समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम् ॥ १ ॥ प्रययौ रथघोषेण सिंहनादरवेण च । वादित्राणाञ्च निनदैः कम्पयन्निव मेदिनीम् ॥ २ ॥ वेपमान इव क्रोधाद्युद्धशौण्डः परन्तपः । प्रतिव्यूह्य महातेजा यथावद्भरतर्षभ ॥ ३ ॥ व्यधमत् पाण्डवीं सेनामासुरीं मघवानिव । युधिष्ठिरञ्चाभ्यहनदपसव्यञ्चकार ह ॥ ४ ॥

धृतराष्ट्र उवाच । कथं सञ्जय राधेयः प्रत्यव्यूहत पाण्डवान् । धृष्टद्युम्नमुखान् सर्वान् भीमसेनाभिरक्षितान् । सर्वानेव महेष्वासानजय्यानमरैरपि ॥ ५ ॥ के च पक्षौ प्रपक्षौ वा मम सैन्यस्य सञ्जय । प्रविभज्य यथान्यायं कथं वा समवस्थिताः ॥ ६ ॥ कथं पाण्डुसुताश्चापि प्रत्यव्यूहन्त मामकान् । कथञ्चैव महद्युद्धं प्रावर्त्तत सुदारुणम् ॥ ७ ॥ क्व च वीभत्सुरभवत् यत् कर्णोऽयाद्युधिष्ठिरम् । को ह्यर्जुनस्य सान्निध्ये शक्तोऽभ्येतुं युधिष्ठिरम् ॥८॥ सर्वभूतानि यो ह्येकः खाण्डवे जितवान् पुरा । कस्तमन्यस्तु राधेयात् प्रतियुध्येज्जिजीविषुः ॥ ९ ॥

सञ्जय उवाच। शृणु व्यूहस्य रचनामर्जुनश्च यथागतः।
परिवार्य्य नृपं स्वं स्वं संग्रामश्चाभवद्यथा॥ १०॥ कृपः शारद्वतो
राजन्मागधाश्च तरस्विनः। सात्वतः कृतवर्मा च दक्षिणं पक्ष-
माश्रिताः॥ ११॥ तेषां प्रपक्षौ शकुनिरुलूकश्च महारथः।
सादिभिर्विमलप्रासैस्तवानीकमरक्षताम्॥ १२॥ गान्धारिभिरसं-
भ्रान्तैः पार्वतीयैश्च दुर्ज्जयैः। शलभानामिव व्रातैः पिशाचैरिव
दुर्दृशैः॥ १३॥ चतुस्त्रिंशत्सहस्राणि रथानामनिवर्त्तिनाम्।
संशप्तका युद्धशौण्डा वामं पार्श्वमपालयन्। समन्वितास्तव सुतैः
कृष्णार्ज्जुनजिघांसवः॥ १४॥ तेषां प्रपक्षाः काम्बोजाः शकाश्च
यवनैः सह। निदेशात् सूतपुत्रस्य सरथाः शाश्वपत्तयः। आह्व-
यन्तोऽर्ज्जुनं तस्थुः केशवञ्च महाबलम्॥ १५॥ मध्ये सेनामुखे
कर्णो व्यवातिष्ठत दंशितः। चित्रवर्माङ्गदः स्रग्वी पालयन् वाहिनी-
मुखम्॥ १६॥ रक्ष्यमाणः सुसंरब्धैः पुत्रैः शस्त्रभृतां वरः।
वाहिनीप्रमुखे वीरः संप्रकर्षन्नशोभत॥ १७॥ अभ्यवर्त्तन्महाबाहु-
स्सूर्य्यवैश्वानरप्रभः। महाद्विपस्कन्धगतः पिङ्गाक्षः प्रियदर्शनः॥ १८॥
दुःशासनो वृतः सैन्यैः स्थितो व्यूहस्य पृष्ठतः। तमन्वयान्महा-
राज स्वयं दुर्य्योधनो नृपः। चित्राश्वैश्चित्रसन्नाहैः सोदर्य्यैरभि-
रक्षितः॥ १९॥ रक्ष्यमाणो महावीर्य्यैः सहितैर्मद्रकेकयैः।
अशोभत महाराज देवैरिव शतक्रतुः॥ २०॥ अश्वत्थामा कुरू-
णाञ्च ये प्रवीरा महारथाः। नित्यमत्ताश्च मातङ्गाः शूरैर्म्लेच्छैः
समन्विताः। अन्वयुस्तद्रथानीकं क्षरन्त इव तोयदाः॥ २१॥ ते
ध्वजैर्वैजयन्तीभिर्ज्ज्वलद्भिः परमायुधैः। सादिभिश्चास्थिता रेजु-
र्द्रुमवन्त इवाचलाः॥ २२॥ तेषां पदातिनागानां पादरक्षाः
सहस्रशः। पट्टिशासिधराः शूरा बभूवुरनिवर्त्तिनः॥ २३॥
सादिभिस्यन्दनैर्नागैरधिकं समलंकृतैः। स व्यूहराजो विबभौ
देवासुरचमूपमः॥ २४॥ बार्हस्पत्यः सुविहितो नायकेन विप-

स्थिता। नृत्यतीव महाव्यूहः परेषां भयमादधत् ॥ २५ ॥ तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः। पत्त्यश्वरथमातङ्गाः प्रावृषीव बलाहकाः ॥ २६ ॥ ततः सेनामुखे कर्णं दृष्ट्वा राजा युधिष्ठिरः। धनञ्जयममित्रघ्नमेकवीरमुवाच ह ॥ २७ ॥ पश्यार्जुन महाव्यूहं कर्णेन विहितं रणे। युक्तं पक्षैः प्रपक्षैश्च परानीकं प्रकाशते ॥ २८ ॥ तदेतद्वै समालोक्य प्रत्यमित्रं महाबलम्। यथा नाभिभवत्यस्मांस्तथा नीतिर्विधीयताम् ॥ २९ ॥ एवमुक्तोऽर्जुनो राज्ञा प्राञ्जलिर्नृपमब्रवीत्। यथा भवानाह तथा तत् सर्वं न तदन्यथा ॥ ३० ॥ यस्त्वस्य विहितो घातस्तं करिष्यामि भारत। प्रधानवध एवास्य विनाशस्तं करोम्यहम् ॥ ३१ ॥

युधिष्ठिर उवाच। तस्मात्त्वमेव राधेयं भीमसेनः सुयोधनम्। वृषसेनञ्च नकुलः सहदेवोऽपि सौबलम् ॥ ३२ ॥ दुःशासनं शतानीको हार्द्दिक्यं शिनिपुङ्गवः। पाण्ड्यो द्रोणसुतं यातु स्वयं योत्स्याम्यहं कृपम् ॥ ३३ ॥ द्रौपदेया धार्त्तराष्ट्रान् शिष्टान् सह शिखण्डिना। ते ते च तांस्तान् सहितानस्माकं घ्नन्तु मामकाः ॥३४॥

सञ्जय उवाच। इत्युक्तो धर्मराजेन तथेत्युक्त्वा धनञ्जयः। व्यादिदेश स्वसैन्यानि स्वयञ्चागाच्चमूमुखम् ॥ ३५ ॥ अग्निर्वैश्वानरः पूर्वो ब्रह्मेद्धः सप्तितां गतः। तस्माद्यः प्रथमो जातस्तं देवा ब्राह्मणं विदुः ॥३६॥ ब्रह्मेशानेन्द्रवरुणान् क्रमशो योऽवहत् पुरा। तमाद्यं रथमास्थाय प्रयातौ केशवार्जुनौ ॥ ३७ ॥ अथ तं रथमायान्तं दृष्ट्वा चाद्भुतदर्शनम्। उवाचाधिरथिं शल्यः पुनस्तं युद्धदुर्मदम् ॥ ३८ ॥ अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः। दुर्वारः सर्वसैन्यानां विपाकः कर्मणामिव। निघ्नन्नमित्रान् कौन्तेयो यं कर्ण परिपृच्छसि ॥ ३९ ॥ श्रूयते तुमुलः शब्दो यथा मेघस्वनो महान्। ध्रुवमेतौ महात्मानौ वासुदेवधनञ्जयौ ॥ ४० ॥ एष रेणुः समुद्भूतो दिवमावृत्य तिष्ठति। चक्रनेमिप्रणुन्नेव कम्पते

कर्ण मेदिनी ॥ ४१ ॥ प्रवात्येष महावायुरभितस्तव वाहिनीम् ।
क्रव्यादा व्याहरन्त्येते मृगाः क्रन्दन्ति भैरवम् ॥ ४२ ॥ पश्य कर्ण
महाघोरं भयदं लोमहर्षणम् । कबन्धं मेघसङ्काशं भानुमावृत्य
संस्थितम् ॥ ४३ ॥ पश्य यूथैर्बहुविधैर्मृगाणां सर्वतो दिशम् ।
बलिभिः कर्ण शार्दूलैरादित्योऽभिनिरीक्ष्यते ॥ ४४ ॥ पश्य कङ्कांश्च
गृध्रांश्च समवेतान् सहस्रशः । स्थितानभिमुखान् घोरानन्योऽन्य-
मभिभाषतः ॥ ४५ ॥ रञ्जितास्चामरा युक्तास्तव कर्ण महारथे ।
प्रदराः प्रचलन्त्येते ध्वजश्चैव प्रकम्पते ॥ ४६ ॥ सवेपथून् हयान्
पश्य महाकायान्महाजवान् । प्लवमानान् दर्शनीयानाकाशे गरु-
ड़ानिव ॥ ४७ ॥ ध्रुवमेषु निमित्तेषु भूमिमाश्रित्य पार्थिवाः ।
स्वप्स्यन्ति निहताः कर्ण शतशोऽथ सहस्रशः ॥ ४८ ॥ शङ्खानां
तुमुलः शब्दः श्रूयते लोमहर्षणः । आनकानाञ्च राधेय मृदङ्गा-
नाञ्च सर्वशः ॥ ४९ ॥ बाणशब्दान् बहुविधान् नराश्वरथनिस्व-
नान् । ज्यातलत्रेषु शब्दांश्च शृणु कर्ण महात्मनाम् ॥ ५० ॥ हेम-
रूप्यप्रसृष्टानां वाससां शिल्पनिर्मिताः । नानावर्णा रथे भान्ति
श्वसनेन प्रकम्पिताः ॥५१॥ सहेमचन्द्रताराकाः पताकाः किङ्किणी-
युताः । पश्य कर्णार्जुनस्यैताः सौदामिन्य इवाम्बुदे ॥ ५२ ॥
ध्वजाः कणकणायन्ते वातेनाभिसमीरिताः । विभ्राजन्ति रणे कर्ण
विमाने देवता यथा । सपताका रथाश्चैते पाञ्चालानां महात्मनाम्
॥ ५३ ॥ पश्य कुन्तीसुतं वीरं बीभत्सुमपराजितम् । प्रधर्षयितु-
मायान्तं कपिप्रवरकेतनम् ॥ ५४ ॥ एष ध्वजाग्रे पार्थस्य प्रेक्ष-
णीयः समन्ततः । दृश्यते वानरो भीमो द्विषतां मन्युवर्द्धन ॥ ५५ ॥
एतच्चक्रं गदा शार्ङ्गं शङ्खं कृष्णस्य धीमतः । अत्यर्थं भ्राजते कृष्णे
कौस्तुभस्तु मणिस्ततः ॥ ५६ ॥ एष शार्ङ्गगदापाणिर्वासुदेवोऽति-
वीर्य्यवान् । वाहयन्नेति तुरगान् पाण्डरान् वातरंहसः ॥ ५७ ॥
एतत् कूजति गाण्डीवं विकृष्टं सव्यसाचिना । एते हस्तवता मुक्ता

घ्नन्त्यमित्रान् शिताः शराः ॥ ५८ ॥ विशालायतताम्राक्षैः पूर्णचन्द्रनिभाननैः । एषा भूः कीर्य्यते राज्ञां शिरोभिरपलायिनाम् ॥ ५९ ॥ एते परिघसङ्काशाः पुण्यगन्धानुलेपनाः । उद्यतायुधशौण्डानां पात्यन्ते सायुधा भुजाः ॥ ६० ॥ निरस्तनेत्रजिह्वान्ता वाजिनः सह सादिभिः । पतिताः पात्यमानाश्च क्षितौ क्षीणाश्च शेरते ॥ ६१ ॥ एते पर्वतशृङ्गाणां तुल्यरूपा हता द्विपाः । संछिन्नभिन्नाः पार्थेन प्रपतन्त्यद्रयो यथा ॥ ६२ ॥ गन्धर्वनगराकारा रथा हतनरेश्वराः । विमानानीव पुण्यान्ते स्वर्गिणां निपतन्त्यमी ॥ ६३ ॥ व्याकुलीकृतमत्यर्थं पश्य सैन्यं किरीटिना । नानामृगसहस्राणां यूथं केशरिणा यथा ॥ ६४ ॥ घ्नन्त्येते पार्थिवान् वीराः पाण्डवाः समभिद्रुताः । नागाश्वरथपत्त्योघांस्तावकान् समभिघ्नतः ॥ ६५ ॥ एष सूर्य्य इवाम्भोदैश्छन्नः पार्थो न दृश्यते । ध्वजाग्रं दृश्यते तस्य ज्याशब्दश्चापि श्रूयते ॥ ६६ ॥ अद्य द्रष्टासि तं वीरं श्वेताश्वं कृष्णसारथिम् । निघ्नन्तं शात्रवान् सङ्ख्ये यं कर्ण परिपृच्छसि ॥ ६७ ॥ अद्य तौ पुरुषव्याघ्रौ लोहिताक्षौ परन्तपौ । वासुदेवार्जुनौ कर्ण द्रष्टास्येकरथे स्थितौ ॥ ६८ ॥ सारथिर्यस्य वार्ष्णेयो गाण्डीवं यस्य कार्मुकम् । तञ्चेद्धन्तासि राधेय त्वन्नो राजा भविष्यसि ॥ ६९ ॥ एष संशप्तकाहूतस्तानेवाभिमुखो गतः । करोति कदनञ्चैषां संग्रामे द्विषतां बली ॥ ७० ॥ इति ब्रुवाणं मद्रेशं कर्णः प्राहातिमन्युवान् । पश्य संशप्तकैः क्रुद्धैः सर्वतः समभिद्रुतः ॥ ७१ ॥ एष सूर्य्य इवाम्भोदैश्छन्नः पार्थो न दृश्यते । एतदन्तोऽर्जुनः शल्य निमग्नो योधसागरे ॥ ७२ ॥

शल्य उवाच । वरुणं कोऽम्भसा हन्यादिन्धनेन च पावकम् । कोऽनिलं वा निगृह्णीयात् पिबेद्वा को महार्णवम् ॥ ७३ ॥ ईदृग्रूपमहं मन्ये पार्थस्य युधि निग्रहम् । न हि शक्योऽर्जुनो जेतुं युधि सेन्द्रैः सुरासुरैः ॥ ७४ ॥ अथ वा परितोषस्ते वाचोक्त्वा सुमना

भव। न स शक्यो युधा जेतुमन्यं कुरु मनोरथम् ॥ ७५ ॥ बाहुभ्यामुद्धरेद्भूमिं दहेत क्रुद्ध इमाः प्रजाः। पातयेत्त्रिदिवाद्देवान् योऽर्जुनं समरे जयेत् ॥ ७६ ॥ पश्य कुन्तीसुतं वीरं भीममक्लिष्टकारिणम्। प्रभासन्तं महाबाहुं स्थितं मेरुमिवापरम् ॥ ७७ ॥ अमर्षी नित्यसंरब्धश्चिरवैरमनुस्मरन्। एष भीमो जयप्रेप्सुर्युधि तिष्ठति वीर्य्यवान् ॥ ७८ ॥ एष धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः। तिष्ठत्यसुकरः संख्ये परैः परपुरञ्जयः ॥ ७९ ॥ एतौ च पुरुषव्याघ्रावश्विनाविव सोदरौ। नकुलः सहदेवश्च तिष्ठतो युधि दुर्ज्जयौ ॥ ८० ॥ दृश्यन्त एते कार्ष्णेयाः पञ्च पञ्चाचला इव। व्यवस्थिता योद्धुकामाः सर्वेऽर्जुनसमा युधि ॥ ८१ ॥ एते द्रुपदपुत्राश्च धृष्टद्युम्नपुरोगमाः। स्फीताः सत्यजितो वीरास्तिष्ठन्ति परमौजसः ॥ ८२ ॥ असाविन्द्र इवासह्यः सात्यकिः सात्वतां वरः। युयुत्सुरुपयात्यस्मान् क्रुद्धान्तकसमः पुरः ॥ ८३ ॥ इति संवदतो रेव तयोः पुरुषसिंहयोः। ते सेने समसज्जेतां गङ्गायमुनवद्भृशम् ॥ ८४ ॥

इति कर्णपर्वणि कर्णशल्यसंवादे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

---

धृतराष्ट्र उवाच। तथा व्यूढेष्वनीकेषु संसक्तेषु च सञ्जय। संशप्तकान् कथं पार्थो गतः कर्णश्च पाण्डवान् ॥ १ ॥ एतद्विस्तरशो युद्धं प्रब्रूहि कुशलो ह्यसि। न हि तृप्यामि वीराणां शृखानो विक्रमान्रणे ॥ २ ॥

सञ्जय उवाच। तथास्थितमवज्ञाय प्रत्यमित्रबलं महत्। अव्यूहतार्ज्जुनो व्यूहं पुत्रस्य तव दुर्नये ॥ ३ ॥ तत् सादिनागकलिलं पदातिपथसंकुलम्। धृष्टद्युम्नमुखं व्यूढमशोभत महद्बलम् ॥ ४ ॥ पारावतसवर्णाश्वश्चन्द्रादित्यसमद्युतिः। पार्षतः

प्रवभौ धन्वी कालो विग्रहवानिव ॥ ५ ॥ पार्श्वतन्त्वभितस्तस्थु-
र्द्रौपदेया युयुत्सवः । दिव्यवर्मायुधधराः शार्दूलसमविक्रमाः ।
सानुगा दीप्तवपुषश्चन्द्रं तारागणा इव ॥ ६ ॥ अथ व्यूढ़ेष्वनीकेषु
प्रेक्ष्य संशप्तकान्रणे । क्रुद्धोर्ज्जुनोऽभिदुद्राव व्याक्षिपन् गाण्डिवं
धनुः ॥ ७ ॥ अथ संशप्तकाः पार्थमभ्यधावन् वधैषिणः । विजये
धृतसङ्कल्पा मृत्युं कृत्वा निवर्त्तनम् ॥ ८ ॥ तन्नराश्वौघबहुलं मत्त-
नागरथाकुलम् । पत्तिमच्छूरवीरौघं द्रुतमर्ज्जुनमार्द्दयत् ॥ ९ ॥
स संप्रहारस्तुमुलस्तेषामासीत् किरीटिना । तस्यैव नः श्रुतो
यादृङ्निवातकवचैः सह ॥ १० ॥ रथानश्वान् ध्वजान्नागान् पत्ती-
न्रणगतानपि । इषून् धनूंषि खड्गांश्च चक्राणि च परश्वधान्
॥ ११ ॥ सायुधानुद्यतान् बाहून् विविधान्यायुधानि च । चिच्छेद
द्विषतां पार्थः शिरांसि च सहस्रशः ॥ १२ ॥ तस्मिन् सैन्यमहावर्त्ते
पातालतलसन्निभे । निमग्नं तं रथं मत्वा नेदुः संशप्तकास्तदा
॥ १३ ॥ स पुरस्तादरीन् हत्वा पुनरुत्तरतोऽवधीत् । दक्षिणेन
च पश्चाच्च क्रुद्धो रुद्रः पशूनिव ॥ १४ ॥ अथ पाञ्चालचेदीनां सृञ्ज-
यानाञ्च मारिष । त्वदीयैः सह संग्राम आसीत् परमदारुणः
॥ १५ ॥ कृपश्च कृतवर्मा च शकुनिश्चापि सौबलः हृष्टसेनाः
सुसंरब्धा रथानीकप्रहारिणः ॥ १६ ॥ कोशलैः काशिमत्स्यैश्च
कारुषैः कैकयैरपि । शूरसेनैः शूरवरैर्युयुधुर्युद्धदुर्मदाः ॥ १७ ॥
तेषामन्तकरं युद्धं देहपाप्मासुनाशनम् । क्षत्रविट्शूद्रवीराणां
धर्म्यं स्वर्ग्यं यशस्करम् ॥ १८ ॥ दुर्य्योधनोथ सहितो भ्रातृभि-
र्भरतर्षभ । गुप्तः कुरुप्रवीरैश्च मद्राणाञ्च महारथैः ॥ १९ ॥
पाण्डवैः सह पाञ्चालैश्चेदिभिः सात्यकेन च । युध्यमानं रणे कर्णं
कुरुवीरोऽभ्यपालयत् ॥ २० ॥ कर्णोऽपि निशितैर्वाणैर्विनिहत्य
महाचमूम् । प्रमृद्य च रथश्रेष्ठान् युधिष्ठिरमपीड़यत् ॥ २१ ॥
विवर्मायुधदेहासून् कृत्वा शत्रून् सहस्रशः । युक्त्वा स्वर्गयशोभ्याञ्च

खेभ्यो मुदमुदावहत् ॥ २२ ॥ एवं मारिष संग्रामो नरवाजिरथक्षयः। कुरूणां सृञ्जयानाञ्च देवासुरसमोऽभवत् ॥ २३ ॥

इति कर्णपर्वणि संकुलयुद्धे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

---

धृतराष्ट्र उवाच। यत्तत् प्रविश्य पार्थानां सैन्यं कुर्वत् जनक्षयम्। कर्णो राजानमभ्यर्च्छत्तमाचक्ष्व सञ्जय ॥ १ ॥ के च प्रवीराः पार्थानां युधि कर्णमवारयन्। कांश्च प्रमथ्याधिरथिर्युधिष्ठिरमपीड़यत् ॥ २ ॥

सञ्जय उवाच। धृष्टद्युम्नमुखान् पार्थान् दृष्ट्वा कर्णो व्यवस्थितान्। समभ्यधावत्त्वरितः पाञ्चालान् शत्रुकर्षणः ॥ ३ ॥ तं तूर्णमभिधावन्तं पाञ्चाला जितकाशिनः। प्रत्युद्ययुर्महात्मानं हंसा इव महार्णवम् ॥ ४ ॥ ततः शङ्खसहस्राणां निस्वनो हृदयङ्गमः। प्रादुरासीदुभयतो भेरीशब्दश्च दारुणः ॥ ५ ॥ नानावादित्रनादश्च द्विपाश्वरथनिस्वनः। सिंहनादश्च वीराणामभवद्दारुणस्तदा ॥ ६ ॥ साद्रिद्रुमार्णवा भूमिः सवाताम्बुदमम्बरम्। सार्केन्दुग्रहनक्षत्रा द्यौश्च व्यक्तं विघूर्णिता ॥ ७ ॥ इति भूतानि तं शब्दं मेनिरे ते च विव्यथुः। यानि चाप्यल्पसत्त्वानि प्रायस्तानि मृतानि च ॥ ८ ॥ अथ कर्णो भृशं क्रुद्धः शीघ्रमस्त्रमुदीरयन्। जघान पाण्डवीं सेनामासुरीं मघवानिव ॥ ९ ॥ स पाण्डवबलं कर्णः प्रविश्य विसृजन् शरान्। प्रभद्रकाणां प्रवरानहनत् सप्तसप्ततिम् ॥ १० ॥ ततः सुपुङ्खैर्निशितै रथश्रेष्ठो रथेषुभिः। अवधीत् पञ्चविंशत्या पाञ्चालान् पञ्चविंशतिम् ॥ ११ ॥ सुवर्णपुङ्खैर्नाराचैः परकायविदारणैः। चेदिकानवधीद्वीरः शतशोऽथ सहस्रशः ॥ १२ ॥ तं तथा समरे कर्म कुर्वाणमतिमानुषम्। परिवव्रुर्महाराज पाञ्चालानां रथव्रजाः ॥ १३ ॥ ततः सन्धाय विशिखान् पञ्च भारत दुःसहान्।

पाञ्चालानवधीत् पञ्च कर्णो वैकर्त्तनो वृषः ॥ १४ ॥ भानुदेवं चित्र-
सेनं सेनाविन्दुञ्च भारत। तपनं शूरसेनञ्च पाञ्चालानहनद्रणे
॥ १५ ॥ पाञ्चालेषु च शूरेषु वध्यमानेषु सायकैः। हाहाकारो
महानासीत् पाञ्चालानां महाहवे ॥ १६ ॥ परिवव्रुर्महाराज
पाञ्चालानां रथा दश। पुनरेव च तान् कर्णो जघानाशु पत-
त्रिभिः ॥ १७ ॥ चक्ररक्षौ तु कर्णस्य पुत्रौ मारिष दुर्ज्जयौ।
सुषेणः सत्यसेनश्च त्यक्त्वा प्राणानयुध्यताम् ॥ १८ ॥ पृष्ठगोप्ता तु
कर्णस्य ज्येष्ठः पुत्रो महारथः। वृषसेनः स्वयं कर्णं पृष्ठतः पर्य्य-
पालयत् ॥ १९ ॥ धृष्टद्युम्नः सात्यकिश्च द्रौपदेया वृकोदराः।
जनमेजयः शिखण्डी च प्रवीराश्च प्रभद्रकाः ॥ २० ॥ चेदिकैकय-
पाञ्चाला यमौ मत्स्याश्च दंशिताः। समभ्यधावन्राधेयं जिघांसन्तः
प्रहारिणम् ॥ २१ ॥ त एनं विविधैः शस्त्रैः शरधाराभिरेव च।
अभ्यवर्षन् विमर्द्दन्तं प्रावृषीवाम्बुदा गिरिम् ॥ २२ ॥ पितरन्तु
परीप्सन्तः कर्णपुत्राः प्रहारिणः। त्वदीयाश्चापरे राजन् वीरा
वीरानवारयन् ॥ २३ ॥ सुषेणो भीमसेनस्य छित्त्वा भल्लेन कार्मु-
कम्। नाराचैः सप्तभिर्विद्ध्वा हृदि भीमं ननाद ह ॥ २४ ॥
अथान्यद्धनुरादाय सुदृढं भीमविक्रमः। सज्यं वृकोदरः कृत्वा
सुषेणस्याच्छिनद्धनुः ॥ २५ ॥ विव्याध चैनं दशभिः क्रुद्धो नृत्य-
न्निवेषुभिः। कर्णञ्च तूर्णं विव्याध सप्तत्या निशितैः शरैः ॥ २६ ॥
भानुसेनञ्च दशभिः साश्वसूतायुधध्वजम्। पश्यतां सुहृदां मध्ये
कर्णपुत्रमपातयत् ॥ २७ ॥ क्षुरप्रणुन्नं तत्तस्य शिरश्चन्द्रनिभा-
ननम्। शुभदर्शनमेवासीन्नालभ्रष्टमिवाम्बुजम् ॥ २८ ॥ हत्वा
कर्णसुतं भीमस्तावकान् पुनरार्द्दयत्। कृपहार्द्दिक्ययोश्छित्त्वा
चापौ तावप्यथार्द्दयत् ॥ २९ ॥ दुःशासनं त्रिभिर्विद्ध्वा शकुनिं
षड्भिरायसैः। उलूकञ्च पतत्रिञ्च चकार विरथावुभौ ॥ ३० ॥
हा सुषेण हतोऽसीति ब्रुवन्नादत्त शायकम्। यमस्य कर्णश्चिच्छेद

त्रिभिश्चैनमताड़यत्॥ ३१॥ अथान्यं परिजग्राह सुपर्वाणं सुतेजनम्। सुषेणायाहजङ्घीमस्तमप्यस्याच्छिनद्वृषः॥ ३२॥ पुनः कर्णस्त्रिसप्तत्या भीमसेनमथेषुभिः। पुत्रं परीप्सन् विव्याध क्रूरं क्रूरैर्जिघांसया॥ ३३॥ सुषेणस्तु धनुर्गृह्य भारसाधनमुत्तमम्। नकुलं पञ्चभिर्बाणैर्बाह्वोरुरसि चार्पयत्॥ ३४॥ नकुलस्तन्तु विंशत्या विद्ध्वा भारसहैर्दृढैः। ननाद बलवन्नादं कर्णस्य भयमादधत्॥ ३५॥ तं सुषेणो महाराज विद्ध्वा दशभिराशुगैः। चिच्छेद च धनुः शीघ्रं क्षुरप्रेण महारथ॥ ३६॥ अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः। सुषेणं नवभिर्बाणैर्वारयामास संयुगे॥ ३७॥ स तु वाणैर्दिशो राजन्नाच्छाद्य परवीरहा। आजघ्ने सारथिञ्चास्य सुषेणञ्च ततस्त्रिभिः। चिच्छेद चास्य सुदृढं धनुर्भल्लैस्त्रिभिस्त्रिधा॥ ३८॥ अथान्यद्धनुरादाय सुषेणः क्रोधमूर्च्छितः। अविध्यन्नकुलं षष्ट्या सहदेवञ्च सप्तभिः॥ ३९॥ तद्युद्धं सुमहद्घोरमासीद्देवासुरोपमम्। निघ्नतां सायकैस्तूर्णमन्योऽन्यस्य वधं प्रति॥ ४०॥ सात्यकिर्वृषसेनस्य सूतं हत्वा त्रिभिः शरैः। धनुश्चिच्छेद भल्लेन जघानाश्वांश्च सप्तभिः॥ ४१॥ ध्वजमेकेषुणोन्मथ्य त्रिभिस्तं हृद्यताड़यत्। अथावसन्नः स रथे मुहूर्त्तात् पुनरुत्थितः॥ ४२॥ स रणे युयुधानेन विसूताश्वरथध्वजः। कृतो जिघांसुः शैनेयं खड्गचर्मधृगभ्ययात्॥४३॥ तस्य चाप्लवतः शीघ्रं वृषसेनस्य सात्यकिः। वराहकर्णैर्दशभिरविध्यदसिचर्मणी॥ ४४॥ दुःशासनस्तु तं दृष्ट्वा विरथं व्यायुधं कृतम्। आरोप्य स्वरथं तूर्णमपोवाह रथान्तरम्॥ ४५॥ अथान्यं रथमास्थाय वृषसेनो महारथः। द्रौपदेयांस्त्रिसप्तत्या युयुधानञ्च पञ्चभिः॥४६ भीमसेनं चतुःषष्ट्या सहदेवञ्च पञ्चभिः। नकुलं त्रिंशता वाणैः शतानीकञ्च सप्तभिः॥ ४७॥ शिखण्डिनञ्च दशभिर्धर्म्मराजं शतेन च एतांश्चान्यांश्च राजेन्द्र प्रवीरान् जयगृद्धिनः॥ ४८॥ अभ्य-

ईयन्महेष्वासः कर्णपुत्रो विशाम्पते। कर्णस्य युधि दुर्द्धर्षस्ततः पृष्ठमपालयत् ॥ ४९ ॥ दुःशासनञ्च शैनेयो नवैर्नवभिरायसैः। विसूताश्वरथं कृत्वा ललाटे त्रिभिरार्पयत् ॥ ५० ॥ स त्वन्यं रथमास्थाय विधिवत् कल्पितं पुनः। युयुधे पाण्डवैः सार्द्धं कर्णस्याप्याययन् बलम् ॥ ५१ ॥ धृष्टद्युम्नस्ततः कर्णमविध्यद्दशभिः शरैः। द्रौपदेयास्त्रिसप्तत्या युयुधानस्तु सप्तभिः ॥ ५२ ॥ भीमसेनश्चतुःषष्ट्या सहदेवश्च सप्तभिः। नकुलस्त्रिंशता वाणैः शतानीकश्च सप्तभिः। शिखण्डी दशभिर्वीरो धर्मराजः शतेन च ॥५३॥ एते चान्ये च राजेन्द्र प्रवीरा जयगृद्धिनः। अभ्यर्द्दयन्महेष्वासं सूतपुत्रं महामृधे ॥ ५४ ॥ तान् सूतपुत्रो विशिखैर्द्दशभिर्द्दशभिः शरैः। रथेनानुचरन् वीरः प्रत्यविध्यदरिन्दमः ॥ ५५ ॥ तत्रास्त्रवीर्य्यं कर्णस्य लाघवञ्च महात्मनः। अपश्याम महाराज तदद्भुतमिवाभवत् ॥ ५६ ॥ न ह्याददानं ददृशुः सन्दधानञ्च सायकान्। विमुञ्चन्तञ्च संरम्भाद्ददृशुस्ते हतानरीन् ॥ ५७॥ द्यौर्वियद्भूर्द्दिशश्चैव प्रपूर्णा निशितैः शरैः। अरुणाभ्रावृताकारं तस्मिन्देशे बभौ वियत् ॥ ५८॥ नृत्यन्निव हि राधेयश्चापहस्तः प्रतापवान्। यैर्विद्धः प्रत्यविध्यत्तानेकैकं त्रिगुणैः शरैः ॥ ५९ ॥ दशभिर्द्दशभिश्चैनान् पुनर्विद्ध्वा ननाद च। साश्वसूतरथच्छत्रा स्ततस्ते विवरं ददुः ॥ ६० ॥ तान् प्रमृद्य महेष्वासान्राधेयः शरवृष्टिभिः। राजानीकमसंबाधं प्राविशच्छत्रुकर्षणः ॥ ६१ ॥ स रथांस्त्रिंशतं हत्वा चेदीनामनिवर्त्तिनाम्। राधेयो निशितैर्वाणैस्ततोऽभ्यर्च्छद्युधिष्ठिरम् ॥ ६२ ॥ ततस्ते पाण्डवा राजन् शिखण्डी च ससात्यकिः। राधेयात् परिरक्षन्तो राजानं पर्य्यवारयन् ॥६३॥ तथैव तावकाः सर्व्वे कर्णं दुर्व्वारणं रणे। यत्ताः शूरा महेष्वासाः पर्य्यरक्षन्त सर्व्वशः ॥ ६४ ॥ नानावादित्रघोषाश्च प्रादुरासन् विशाम्पते। सिंहनादश्च सञ्जज्ञे शूराणामभिगर्ज्जताम् ॥ ६५ ॥ ततः

पुनः समाजग्मुरभीताः कुरुपाण्डवाः । युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वयम् ॥ ६६ ॥

इति कर्णपर्वणि संकुलयुद्धे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

---

सञ्जय उवाच । विद्राव्य कर्णस्तां सेनां धर्मराजमुपाद्रवत् । रथहस्त्यश्वपत्तीनां सहस्रैः परिवारितः ॥ १ ॥ नानायुधसहस्राणि प्रेषितान्यरिभिर्वृषः । छित्त्वा बाणशतैरुग्रैस्तानविध्यदसंभ्रमात् ॥ २ ॥ निचकर्त्त शिरांस्येषां बाहूनूरूंश्च सूतजः । ते हता वसुधां पेतुर्भग्नाश्चान्ये विदुद्रुवुः ॥ ३ ॥ द्रविडान्ध्रनिषादाश्च पुनः सात्यकिचोदिताः । अभ्यद्रवन् जिघांसन्तः पत्तयः कर्णमाहवे ॥ ४ ॥ ते विबाहुशिरस्त्राणाः प्रहताः कर्णसायकैः । पेतुः पृथिव्यां युगपच्छिन्नं शालवनं यथा ॥ ५ ॥ एवं योधशतान्याजौ सहस्राण्ययुतानि च । हतानीयुर्महीं देहैर्यशसापूर्य्य रोदसी ॥ ६ ॥ अथ वैकर्त्तनं कर्णं रणे क्रुद्धमिवान्तकम् । रुरुधुः पाण्डुपाञ्चाला व्याधिं मन्त्रौषधैरिव ॥ ७ ॥ स तान् प्रमृद्याभ्यपतत् पुनरेव युधिष्ठिरम् । मन्त्रौषधिक्रियातीतो व्याधिरत्युल्बणो यथा ॥ ८ ॥ स राजगृद्धिभी रुद्धः पाण्डुपाञ्चालकेकयैः । नाशकत्तानतिक्रान्तुं मृत्युर्ब्रह्मविदो यथा ॥ ९ ॥ ततो युधिष्ठिरः कर्णमदूरस्थं निवारितम् । अब्रवीत् परवीरघ्नं क्रोधसंरक्तलोचनः ॥ १० ॥ कर्ण कर्ण वृथादृष्टे सूतपुत्र वचः शृणु । सदा स्पर्द्धसि संग्रामे फाल्गुनेन तरस्विना ॥ ११ ॥ तथास्मान् बाधसे नित्यं धार्त्तराष्ट्रमते स्थितः । यद्बलं यच्च ते वीर्य्यं प्रद्वेषो यश्च पाण्डुषु ॥ १२ ॥ तत् सर्वं दर्शयाद्य पौरुषं महदास्थितः । युद्धश्रद्धाञ्च तेऽद्याहं विनेष्यामि महाहवे ॥ १३ ॥ एवमुक्त्वा महाराज कर्णं पाण्डुसुतस्त्वरा । सुवर्णपुङ्खैर्दशभिर्विव्याधायस्मयैः शरैः ॥ १४ ॥ तं सूत-

पुत्रो इषुभिः प्रत्यविध्यदरिन्दमः । वत्पदन्तैर्महेष्वासः प्रहसन्निव
भारत ॥ १५ ॥ सोऽवज्ञाया तु निर्विद्धः सूतपुत्रेण मारिष ।
प्रजज्वाल महाबाहुर्हविषेव हुताशनः ॥ १६ ॥ ततो विस्फार्य
सुमहच्चापं हेमपरिष्कृतम् । समाधत्त शितं बाणं गिरीणामपि
दारणम् ॥ १७ ॥ ततः पूर्णायतोत्कृष्टं यमदण्डनिभं शरम् ।
मुमोच त्वरितो राजा सूतपुत्रजिघांसया ॥ १८ ॥ स तु वेगवता
मुक्तो बाणो वज्राशनिस्वनः । बिभेद सहसा कर्णं सव्यपार्श्वे
महारथम् ॥ १९ ॥ स तु तेन प्रहारेण पीड़ितः प्रमुमोह वै ।
स्रस्तगात्रो महाबाहुर्धनुरुत्सृज्य स्यन्दने ॥ २० ॥ ततो हाहा-
कृतं सर्वं धार्त्तराष्ट्रबलं महत् । विवर्णमुखभूयिष्ठं दृष्ट्वा कर्णं
तथागतम् ॥ २१ ॥ सिंहनादश्च सञ्जज्ञे क्ष्वेड़ाः किलकिलास्तथा ।
पाण्डवानां महाराज दृष्ट्वा राज्ञः पराक्रमम् ॥ २२ ॥ प्रतिलभ्य
तु राधेयः संज्ञां नातिचिरादिव । दध्रे राजन् विनाशाय मनः
क्रूरपराक्रमः ॥ २३ ॥ स हेमविकृतं चापं विस्फार्य विजयं
महत् । अवारयदमेयात्मा पाण्डवं निशितैः शरैः ॥ २४ ॥ ततः
क्षुराभ्यां पाञ्चाल्यौ चक्ररक्षौ महात्मनः । जघान चन्द्रदेवञ्च
दण्डधारञ्च संयुगे ॥ २५ ॥ तावुभौ धर्मराजस्य प्रवीरौ परि-
पार्श्वतः । रथाभ्याशे चकाशेते चन्द्रस्येव पुनर्वसू ॥ २६ ॥ युधि-
ष्ठिरः पुनः कर्णमविध्यत्त्रिंशता शरैः । सुषेणं सत्यसेनञ्च त्रिभि-
स्त्रिभिरताड़यत् ॥ २७ ॥ शल्यं नवत्या विव्याध त्रिसप्तत्याथ
सूतजम् । तांश्चास्य गोप्तॄन् विव्याध त्रिभिस्त्रिभिरजिह्मगैः ॥ २८ ॥
ततः प्रहस्याधिरथिर्विधुन्वानः स्वकार्मुकम् । छित्त्वा भल्लेन राजानं
विद्ध्वा षष्ट्यानदत्तदा ॥ २९ ॥ ततः प्रवीराः पाण्डूनामभ्यधाव-
न्नमर्षिताः । युधिष्ठिरं परीप्सन्तः कर्णमभ्यर्दयञ्छरैः ॥ ३० ॥
सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च । धृष्टद्युम्नः शिखण्डी
च द्रौपदेयाः प्रभद्रकाः ॥ ३१ ॥ यमौ च भीमसेनश्च शिशुपालस्य

चात्मजः। कारूषा मत्सशूराश्च कैकयाः काशिकोशलाः ॥ ३२ ॥ एते च त्वरिता वीरा वसुषेनमताडयन्॥ जनमेजयश्च पाञ्चाल्यः कर्णं विव्याध सायकैः ॥ ३३ ॥ वराहकर्णैर्नाराचैर्नालीकैर्निशितैः शरैः। वत्सदन्तैर्विपाठैश्च क्षुरप्रैश्चटकामुखैः ॥ ३४ ॥ नानाप्रहरणैश्चोग्रै रथहस्त्यश्वसादिभिः। सर्वतोऽभ्यद्रवन् कर्णं परिवार्य्य जिघांसया ॥ ३५ ॥ स पाण्डवानां प्रवरैः सर्वतः समभिद्रुतः। उदीरयन् ब्राह्ममस्त्रं शरैरापूरयद्दिशः ॥ ३६ ॥ ततः शरमहाज्वालो वीर्य्योष्मा कर्णपावकः। निर्द्दहन् पाण्डववनं वीर पर्य्यचरद्रणे ॥ ३७ ॥ स सन्धाय महास्त्राणि महेष्वासो महामनाः। प्रहस्य पुरुषेन्द्रस्य शरैश्चिच्छेद कार्मुकम् ॥ ३८ ॥ ततः सन्धाय नवतिं निमेषान्नतपर्वणः। बिभेद कवचं राज्ञो रणे कर्णः शितैः शरैः ॥ ३९ ॥ तद्वर्म हेमविकृतं रत्नचित्रं बभौ पतत्। सविद्युदभ्रं सवितुः श्लिष्टं वातहतं यथा ॥ ४० ॥ तदङ्गात् पुरुषेन्द्रस्य भ्रष्टं वर्म व्यरोचत। रत्नैरलंकृतं मुख्यैर्व्यभ्रं निशि यथाम्बरम् ॥ ४१ ॥ छिन्नवर्मा शरैः पार्थो रुधिरेण समुक्षितः। क्रुद्धः सर्वायसीं शक्तिं चिक्षेपाधिरथिं प्रति ॥ ४२ ॥ तां ज्वलन्तीमिवाकाशे शरैश्चिच्छेद सप्तभिः। सा छिन्ना भूमिमगमन्महेष्वासस्य सायकैः ॥ ४३ ॥ ततो बाह्वोर्ललाटे च हृदि चैव युधिष्ठिरः। चतुर्भिस्तोमरैः कर्णं ताड़यित्वानदन्मुदा ॥ ४४ ॥ उद्भिन्नरुधिरः कर्णः क्रुद्धः सर्प इव श्वसन्। ध्वजं चिच्छेद भल्लेन त्रिभिर्विव्याध पाण्डवम्। इषुधी चास्य चिच्छेद रथञ्च तिलशोऽच्छिनत् ॥ ४५ ॥ कालवालास्तु ये पार्थं दन्तवर्णावहन् हयाः। तैर्युक्तं रथमास्थाय प्रायाद्राजा पराङ्मुखः ॥ ४६ ॥ एवं पार्थोऽभ्यपायात् स निहतः पार्ष्णिसारथिः। अशक्नुवन् प्रमुखतः स्थातुं कर्णस्य दुर्मनाः ॥ ४७ ॥ अभिद्रुत्य तु राधेयः स्कन्धे संस्पृश्य पाणिना। अब्रवीत् प्रहसन्राजन् कुत्सयन्निव पाण्डवम् ॥ ४८ ॥

कथं नाम कुले जातः क्षत्रधर्मे व्यवस्थितः। प्रजह्यात् समरं भीतः प्राणान्रक्षन्महाहवे ॥ ४९ ॥ न भवान् क्षत्रधर्मेषु कुशलो ह्यीति मे मतिः। ब्राह्मे बले भवान् युक्तः स्वाध्याये यज्ञकर्मणि ॥ ५० ॥ मास्म युध्यस्व कौन्तेय मास्म वीरान् समासदः। मा चैनानप्रियं ब्रूहि मा वै ब्रज महारणम् ॥ ५१ ॥ एवमुक्त्वा ततः पार्थं विसृज्य च महाबलः। न्यहनत् पाण्डवीं सेनां वज्रहस्त इवासुरीम् ॥ ५२ ॥ ततोऽपायाद्द्रुतं राजन् व्रीडन्निव जनेश्वरः ॥ ५३ ॥ अथापयातं राजानं मत्वान्वीयुस्तमच्युतम्। चेदि-पाण्डवपाञ्चालाः सात्यकिश्च महारथः। द्रौपदेयास्तथा शूरा माद्रीपुत्रौ च पाण्डवौ ॥ ५४ ॥ ततो युधिष्ठिरानीकं दृष्ट्वा कर्णः पराङ्मुखम्। कुरुभिः सहितो वीरः प्रहृष्टः पृष्ठतोऽन्वगात् ॥५५॥ भेरीशङ्खमृदङ्गानां कार्मुकाणाञ्च निस्वनैः। बभूव धार्त्तराष्ट्राणां सिंहनादरवस्तथा ॥ ५६ ॥ युधिष्ठिरस्तु कौरव्य रथमारुह्य सत्वरः। श्रुतकीर्त्तेर्महाराज दृष्टवान् कर्णविक्रमम् ॥ ५७ ॥ काल्यमानं बलं दृष्ट्वा धर्मराजो युधिष्ठिरः। स्वान् योधानब्रवीत् क्रुद्धो निहतैनान् किमासत ॥ ५८ ॥ ततो राज्ञाभ्यनुज्ञाताः पाण्डवानां महारथाः। भीमसेनमुखाः सर्वे पुत्रांस्ते प्रत्युपाद्रवन् ॥५९॥ अभवत्तुमुलः शब्दो योधानां तत्र भारत। रथहस्त्यश्वपत्तीनां शस्त्राणाञ्च ततस्ततः ॥ ६० ॥ उत्तिष्ठत प्रहरत प्रैतातिपततेति च। इति ब्रुवाणा ह्यन्योन्यं जघ्नुर्योधा महारणे ॥ ६१ ॥ अभ्रच्छायेव तत्रासीच्छरवृष्टिभिरम्बरे। समावृतैर्नरवरैर्निघ्नद्भिरितरेतरम् ॥ ६२ ॥ विपताकध्वजच्छत्रा व्यश्वसूतायुधा रणे। व्यङ्गाङ्गावयवाः पेतुः क्षितौ क्षीणाः क्षितीश्वराः ॥ ६३ ॥ प्रवणादिव शैलानां शिखराणि द्विपोत्तमाः। सारोहा निहताः पेतुर्वज्रभिन्ना इवाद्रयः ॥ ६४ ॥ छिन्नभिन्नविपर्य्यस्तैर्वर्मालङ्कारभूषणैः। सारोहास्तुरगाः पेतुर्हतवीराः सहस्रशः ॥ ६५ ॥ विप्रविद्धायुधा

ङ्गाश्च द्विरदाश्वरथैर्हताः। प्रतिवीरैश्च संमर्द्दे पत्तिसङ्घाः सहस्रशः ॥६६॥ विशालायतताम्राक्षैः पद्मेन्दुसदृशाननैः। शिरोभिर्युद्धशौण्डानां सर्वतः संवृता मही ॥ ६७ ॥ यथा भुवि तथा व्योम्नि निस्वनं शुश्रुवुर्जनाः। विमानैरप्सरःसङ्घैर्गीतवादित्रनिस्वनैः॥ ६८॥ हतानभिमुखान् वीरान् वीरैः शतसहस्रशः। आरोप्यारोप्यगच्छन्ति विमानेष्वप्सरोगणाः ॥ ६९ ॥ तद्दृष्ट्वा महदाश्चर्य्यं प्रत्यक्षं स्वर्गलिप्सया। प्रहृष्टमनसः शूराः क्षिप्रं जघ्नुः परस्परम् ॥ ७० ॥ रथिनो रथिभिः सार्द्धं चित्रं युयुधुराहवे। पत्तयः पत्तिभिर्नागाः सह नागैर्हयैर्हयाः ॥ ७१ ॥ एवं प्रवृत्ते संग्रामे गजवाजिनरक्षये। सैन्येन रजसा व्याप्ते स्वे स्वान् जघ्नुः परे परान् ॥ ७२ ॥ कचाकचि युद्धमासीद्दन्तादन्ति नखानखि। मुष्टियुद्धं नियुद्धञ्च देहपाप्मासुनाशनम् ॥ ७३ ॥ तथावर्त्तति संग्रामे गजवाजिरनरक्षये। नराश्वगजदेहेभ्यः प्रसृता लोहितापगा ॥ ७४ ॥ नराश्वगजदेहान् सा व्यवाह पतितान् बहून् ॥ ७५ ॥ रथ्याभश्वगजसम्बाधे नराश्वरथसादिनाम्। लोहितोदा महाघोरा मांसशोणितकर्द्दमा। नराश्वगजदेहान् सा वहन्ती भीरुभीषणा ॥ ७६ ॥ तस्याः पारमपारञ्च व्रजन्ति विजयैषिणः। गाधेन चाप्लवन्ति स्म निमज्योन्मज्य चापरे ॥ ७७॥ ते तु लोहितदिग्धाङ्गा रक्तवर्मायुधाम्बराः। सस्नुस्तस्यां पपुस्तस्यां मम्लुश्च भरतर्षभ ॥ ७८॥ रथानश्वान्नरान्नागानायुधाभरणानि च। वसनान्यथ वर्माणि वध्यमानान् हतानपि। खं द्यां भूमिं दिशश्चैव प्रायः पश्याम लोहिताः ॥ ७९ ॥ लोहितस्य तु गन्धेन स्पर्शेन च रसेन च। रूपेण चातिरिक्तेन शब्देन च विसर्पता। विषादः सुमहानासीत् प्रायः सैन्यस्य मारिष ॥ ८० ॥ तत्तु विप्रहतं सैन्यं भीमसेनमुखास्तदा। भूयः समाद्रवन् वीराः सात्यकिप्रमुखास्तदा ॥ ८१ ॥ तेषामापततां वेगमविषह्यं निरीक्ष्य च।

पुत्राणां ते महत् सैन्यमासीद्राजन् पराङ्मुखम् ॥ ८२ ॥ तत् प्रकीर्णरथाश्वेभं नरवाजिसमाकुलम् । विध्वस्तचर्मकवचं प्रविद्धायुधकार्मुकम् ॥ ८३ ॥ व्यद्रवत्तावकं सैन्यं लोड्यमानं समन्ततः । सिंहार्द्दितमिवारण्ये यथा गजकुलं तथा ॥ ८४ ॥

इति कर्णपर्व्वणि संकुलयुद्धे एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥

---

सञ्जय उवाच । तानभिद्रवतो दृष्ट्वा पाण्डवांस्तावकं बलम् । दुर्य्योधन महाराज वारयामास सर्व्वशः ॥ १ ॥ योधांश्च स्वबलश्चैव समन्ताद्भरतर्षभ । क्रोशतस्तव पुत्रस्य न स्म राजन्न्यवर्त्तत ॥ २ ॥ ततः पक्षः प्रपक्षश्च शकुनिश्चापि सौबलः । तदा सशस्त्राः कुरवो भीममभ्यद्रवन्रणे ॥ ३ ॥ कर्णोऽपि दृष्ट्वा द्रवतो धार्त्तराष्ट्रान् सराजकान् । मद्रराजमुवाचेदं याहि भीमरथं प्रति ॥ ४ ॥ एवमुक्तस्तु कर्णेन शल्यो मद्राधिपस्तदा । हंसवर्णान् हयानग्र्यान् प्रैषीद्यत्र वृकोदरः ॥ ५ ॥ ते प्रेषिता महाराज शल्येनाहवशोभिना । भीमसेनरथं प्राप्य समसज्जन्त वाजिनः ॥ ६ ॥ दृष्ट्वा कर्णं समायान्तं भीमः क्रोधसमन्वितः । मतिं चक्रे विनाशाय कर्णस्य भरतर्षभ ॥ ७ ॥ सोऽब्रवीत् सात्यकिं वीरं धृष्टद्युम्नञ्च पार्षतम् । यूयं रक्षत राजानं धर्म्मात्मानं युधिष्ठिरम् । संशयान्महतो मुक्तं कथञ्चित् प्रेक्षतो मम ॥ ८ ॥ अग्रतो मे कृतो राजा छिन्नसर्व्वपरिच्छदः । दुर्य्योधनस्य प्रीत्यर्थं राधेयेन दुरात्मना ॥ ९ ॥ अन्तमद्य गमिष्यामि तस्य दुःखस्य पार्षत । हन्तास्म्यद्य रणे कर्णं स वा मां निहनिष्यति । संग्रामेण सुघोरेण सत्यमेतद्ब्रवीमि ते ॥ १० ॥ राजानमद्य भवतां न्यासभूतं ददामि वै । तस्य संरक्षणे सर्व्वे यतध्वं विगतज्वराः ॥ ११ ॥ एवमुक्त्वा महाबाहुः प्रायाद्राधेयिं प्रति । सिंहनादेन महता सर्व्वाः सन्ना-

दयन्दिग्रः ॥ १२ ॥ दृष्ट्वा त्वरितमायान्तं भीमं युद्धाभिनन्दिनम्। सूतपुत्रमथोवाच मद्राणामीश्वरो विभुः ॥ १३ ॥

शल्य उवाच। पश्य कर्ण महाबाहुं संक्रुद्धं पाण्डुनन्दनम्। दीर्घकालार्ज्जितं क्रोधं मोक्तुकामं त्वयि ध्रुवम् ॥ १४ ॥ ईदृशं नास्य रूपं मे दृष्टपूर्वं कदाचन। अभिमन्यौ हते कर्ण राक्षसे च घटोत्कचे ॥ १५ ॥ त्रैलोक्यस्य समस्तस्य शक्तः क्रुद्धो निवारणे। बिभर्त्ति यादृशं रूपं युगान्ताग्निसमप्रभम् ॥ १६ ॥

सञ्जय उवाच। इति ब्रुवति राधेयं मद्राणामीश्वरे नृप। अभ्यवर्त्तत वै कर्णं क्रोधदीप्तो वृकोदरः ॥ १७ ॥ तथागतन्तु संप्रेक्ष्य भीमं युद्धाभिनन्दिनम्। अब्रवीद्वचनं शल्यं राधेयः प्रहसन्निव ॥ १८ ॥ यदुक्तं वचनं मेऽद्य त्वया मद्रजनेश्वर। भीमसेनं प्रति विभो तत् सर्व्वं नात्र संशयः ॥ १९ ॥ एष शूरश्च वीरश्च क्रोधनश्च वृकोदरः। निरपेक्षः शरीरे च प्राणतश्च बलाधिकः ॥ २० ॥ अज्ञातवासं वसता विराटनगरे तदा। द्रौपद्याः प्रियकामेन केवलं बाहुसंश्रयात्। गूढ़भावं समाश्रित्य कीचकः सगणो हतः ॥ २१ ॥ सोऽद्य संग्रामशिरसि सन्नद्धः क्रोधमूर्च्छितः। किङ्करोद्यतदण्डेन मृत्युनापि व्रजेद्रणे ॥ २२ ॥ चिरकालाभिलषितो ममायन्तु मनोरथः। अर्ज्जुनं समरे हन्यां मां वा हन्याद्धनञ्जयः ॥ २३ ॥ स मे कदाचिदद्यैव भवेद्भीमसमागमात् ॥ २४ ॥ निहते भीमसेने तु यदि वा विरथीकृते। अभियास्यति मां पार्थस्तन्मे साधु भविष्यति। अत्र यन्मन्यसे प्राप्तं तच्छीघ्रं संप्रधारय ॥ २५ ॥ एतच्छ्रुत्वा तु वचनं राधेयस्यामितौजसः। उवाच वचनं शल्यः सूतपुत्रं तथागतम् ॥ २६ ॥ अभियाहि महाबाहो भीमसेनं महाबलम्। निरस्य भीमसेनन्तु ततः प्राप्स्यसि फाल्गुनम् ॥ २७ ॥ यस्ते कामोऽभिलषितश्चिरात्प्रभृति हृद्गतः। स वै संपत्स्यते कर्ण सत्यमेतद्ब्रवीमि ते ॥ २८ ॥ एवमुक्ते ततः कर्णं शल्यं

पुनरभाषत। हन्तार्जुनमहं शल्य मां वा हन्याद्धनञ्जयः। युद्धे मनः समाधाय याहि यत्र वृकोदरः॥ २९॥

सञ्जय उवाच। ततः प्रायाद्रथेनाशु शल्यस्तत्र विशाम्पते। यत्र भीमो महेष्वासो व्यद्रावयत वाहिनीम्॥ ३०॥ ततस्तूर्य्यनिनादश्च भेरीणाञ्च महास्वनः। उदतिष्ठच्च राजेन्द्र कर्णभीमसमागमे॥ ३१॥ भीमसेनोऽथ संक्रुद्धस्तव सैन्यं दुरासदम्। नाराचैर्विमलैस्तीक्ष्णैर्दिशः प्राद्रावयद्बली॥ ३२॥ स सन्निपातस्तुमुलो घोररूपो विशाम्पते। आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे। ततो मुहूर्त्ताद्राजेन्द्र पाण्डवः कर्णमाद्रवत्॥३३॥ तमापतन्तं संप्रेक्ष्य कर्णो वैकर्त्तनो वृषः। आजघान सुसंक्रुद्धो नाराचेन स्तनान्तरे॥ ३४॥ पुनश्चैनममेयात्मा शरवर्षैरवाकिरत्। स विद्धः सूतपुत्रेण छादयामास पत्त्रिभिः॥ ३५॥ विव्याध निशितैः कर्णं नवभिर्नतपर्वभिः। तस्य कर्णो धनुर्मध्ये द्विधा चिच्छेद पत्त्रिभिः॥ ३६॥ अथैनं छिन्नधन्वानं प्रत्यविध्यत् स्तनान्तरे। नाराचेन सुतीक्ष्णेन सर्व्वावरणभेदिना॥ ३७॥ सोऽन्यत् कार्मुकमादाय सूतपुत्रं वृकोदरः। राजन्मर्मसु मर्मज्ञो विव्याध निशितैः शरैः। ननाद बलवन्नादं कम्पयन्निव मेदिनीम्॥ ३८॥ तं कर्णः पञ्चविंशत्या नाराचानां समार्पयत्। मदोत्कटं वने दृप्तमुल्काभिरिव कुञ्जरम्॥ ३९॥ ततः सायकभिन्नाङ्गः पाण्डवः क्रोधमूर्च्छितः। संरम्भामर्षताम्राक्षः सूतपुत्रवधेप्सया॥ ४०॥ स कार्मुके महावेगं भारसाधनमुत्तमम्। गिरीणामपि भेत्तारं सायकं समयोजयत्॥ ४१॥ विकृष्य बलवच्चापमाकर्णादतिमारुतिः। तं मुमोच महेष्वासः क्रुद्धः कर्णजिघांसया॥ ४२॥ स विसृष्टो बलवता बाणो वज्राशनिस्वनः। अदारयद्रणे कर्णं वज्रवेगो यथाचलम्॥ ४२॥ स भीमसेनाभिहतः सूतपुत्रः कुरूद्वह। निषसाद रथोपस्थे विसंज्ञः पृतनापतिः॥ ४४॥ ततो

मद्राधिपो दृष्ट्वा विसंज्ञं सूतनन्दनम। अपोवाह रथेनाजौ कर्ण-माहवशोभिनम् ॥ ४५ ॥ ततः पराजिते कर्णे धार्त्तराष्ट्रीं महा-चमूम्। व्यद्रावयद्भीमसेनो यथेन्द्रो दानवान् पुरा ॥ ४६ ॥

इति कर्णपर्वणि कर्णापयाने पञ्चाशोऽध्यायः ॥ ५० ॥

---

धृतराष्ट्र उवाच। सुदुष्करमिदं कर्म कृतं भीमेन सञ्जय। येन कर्णो महाबाहुरथोपस्थे निपातितः ॥ १ ॥ कर्णो ह्येको रणे हन्ता पाण्डवान् सृञ्जयैः सह। इति दुर्य्योधनः सूत प्राब्रवीन्मां मुहुर्मुहुः ॥ २ ॥ पराजितन्तु राधेयं दृष्ट्वा भीमेन संयुगे। ततः परं किमकरोत् पुत्रो दुर्य्योधनो मम ॥ ३ ॥

सञ्जय उवाच। विमुखं प्रेक्ष्य राधेयं सूतपुत्रं महाहवे। पुत्रस्तव महाराज सोदर्य्यान् समभाषत ॥ ४ ॥ शीघ्रं गच्छत भद्रं वो राधेयं परिरक्षत। भीमसेनभयागाधे मज्जन्तं व्यसना-र्णवे ॥ ५ ॥ ते तु राज्ञा समादिष्टा भीमसेनं जिघांसवः। अभ्य-वर्त्तन्त संक्रुद्धाः पतङ्गाः पावकं यथा ॥ ६ ॥ श्रुतर्वा दुर्द्धरः क्राथो विवित्सुर्विकटः समः। निषङ्गी कवची पाशी तथा नन्दोप-नन्दकौ ॥ ७ ॥ दुष्प्रधर्षः सुबाहुश्च वातवेगसुवर्च्चसौ। धनुर्ग्राहो दुर्मदश्च जलसन्धः शलः सहः ॥ ८ ॥ एते रथैः परिवृता वीर्य्य-वन्तो महाबलाः। भीमसेनं समासाद्य समन्तात् पर्य्यवारयन् ॥ ९ ॥ ते व्यमुञ्चन् शरव्रातान् नानालिङ्गान् समन्ततः ॥ १० ॥ स तैरभ्यर्द्द्यमानस्तु भीमसेनो महाबलः। तेषामापततां क्षिप्रं पुत्राणां ते जनाधिप। रथैः पञ्चशतैः सार्द्धं पञ्चाशदहनद्रथान् ॥ ११ ॥ विवित्सोस्तु ततः क्रुद्धो भल्लेनापहरच्छिरः। भीमसेनो महाराज तत् पपात ततो भुवि। सकुण्डलशिरस्त्राणं पूर्णचन्द्रो-पमं तदा। तं दृष्ट्वा निहतं शूरं भ्रातरः सर्वतः प्रभो। अभ्य-

द्रवन्त समरे भीमं भीमपराक्रमम् ॥ १३ ॥ ततोऽपराभ्यां भल्लाभ्यां
पुत्रयोस्ते महाहवे। जहार समरे प्राणान् भीमो भीमपराक्रमः
॥ १४ ॥ तौ धरामन्वपद्येतां वातरुग्णाविव द्रुमौ। विकटश्च
सहश्चोभौ देवपुत्रोपमौ नृप ॥ १५ ॥ ततस्तु त्वरितो भीमः क्राथं
निन्ये यमक्षयम्। नाराचेन सुतीक्ष्णेन स हतो न्यपतद्भुवि ॥१६॥
हाहाकारस्ततस्तीव्रः सम्बभूव जनेश्वर। वध्यमानेषु वीरेषु तव
पुत्रेषु धन्विषु ॥ १७ ॥ तेषां संलुलिते सैन्ये पुनर्भीमो महा-
बलः। नन्दोपनन्दौ समरे प्रैषयद्यमसादनम् ॥ १८ ॥ ततस्ते
प्राद्रवन् भीताः पुत्रास्ते विह्वलीकृताः। भीमसेनं रणे दृष्ट्वा
कालान्तकयमोपमम् ॥ १९ ॥ पुत्रांस्ते निहतान् दृष्ट्वा सूतपुत्रः
सुदुर्मनाः। हंसवर्णान् हयान् भूयः प्राहिणोद्यत्र पाण्डवः ॥२०॥
ते प्रेषिता महाराज मद्रराजेन वाजिनः। भीमसेनरथं प्राप्य
समसज्जन्त वेगिताः ॥ २१ ॥ स सन्निपातस्तुमुलो घोररूपो
विशाम्पते। आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ॥ २२ ॥
दृष्ट्वा मम महाराज तौ समेतौ महारथौ। आसीद्बुद्धिः कथं
युद्धमेतदद्य भविष्यति ॥ २३ ॥ ततो भीमो रणश्लाघी छादयामास
पत्रिभिः। कर्णं रणे महाराज पुत्राणां तव पश्यताम् ॥ २४ ॥
ततः कर्णो भृशं क्रुद्धो भीमं नवभिरायसैः। विव्याध परमास्त्रज्ञो
भल्लैः सन्नतपर्व्वभिः ॥ २५ ॥ आहतः स महाबाहुर्भीमो भीम·
पराक्रमः। आकर्णपूर्णैर्विशिखैः कर्णं विव्याध सप्तभिः ॥ २६ ॥
ततः कर्णो महाराज आशीविष इव श्वसन्। शरवर्षेण महता
छादयामास पाण्डवम् ॥ २७ ॥ भीमोऽपि तं शरव्रातैश्छादयित्वा
महारथम्। पश्यतां कौरवेयाणां विननाद महाबलः ॥ २८ ॥
ततः कर्णो भृशं क्रुद्धो दृढ़मादाय कार्म्मुकम्। भीमं विव्याध
दशभिः कङ्कपत्रैः शिलाशितैः। कार्म्मुकञ्चास्य चिच्छेद भल्लेन
निशितेन च ॥ २९ ॥ ततो भीमो महाबाहुर्हेमपट्टपरिष्कृतम्।

परिघं घोरमादाय मृत्युदण्डमिवापरम्। कर्णस्य निधनाकाङ्क्षी चिक्षेपातिबलोनदन् ॥ ३० ॥ तमापतन्तं परिघं वज्राशनिसमस्वनम्। चिच्छेद बहुधा कर्णः शरैराशीविषोपमैः ॥ ३१ ॥ ततः कार्मुकमादाय भीमो दृढ़तरं तदा। छादयामास विशिखैः कर्णं परबलार्द्दनः ॥ ३२ ॥ ततो युद्धमभूद्घोरं कर्णपाण्डवयोर्मृधे। हरीन्द्रयोरिव मुहुः परस्परवधैषिणोः ॥ ३३ ॥ ततः कर्णो महाराज भीमसेनं त्रिभिः शरैः। आकर्णमूलं विव्याध दृढ़मायम्य कार्मुकम् ॥ ३४ ॥ सोऽतिविद्धो महेष्वासः कर्णेन बलिनाम्बरः। घोरमादत्त विशिखं कर्णकायविदारणम् ॥ ३५ ॥ तस्य छित्त्वा तनुत्राणं भित्त्वा कायञ्च सायकः। प्राविशद्धरणीं राजन् वल्मीकमिव पन्नगः ॥ ३६ ॥ स तेनातिप्रहारेण व्यथितो विह्वलन्निव। सञ्चचाल रथे कर्णः क्षितिकम्पे यथाचलः ॥ ३७ ॥ ततः कर्णो महाराज रोषामर्षसमन्वितः। भीमं तं पञ्चविंशत्या नाराचानां समार्पयत् ॥ ३८ ॥ आजघ्ने बहुभिर्बाणैर्ध्वजमेकेषुणाहनत्। सारथिञ्चास्य भल्लेन प्रेषयामास मृत्यवे ॥ ३९ ॥ छित्त्वा च कार्मुकं तूर्णं पाण्डवस्याशु पत्रिणा। विरथं भीमकर्माणं भीमं कर्णश्चकार ह ॥ ४० ॥ विरथो भरतश्रेष्ठ प्रहसन्ननिलोपमः। गदां गृह्य महाबाहुरपतत् स्यन्दनोत्तमात् ॥ ४१ ॥ अवप्लुत्य तु वेगेन तव सैन्यं विशाम्पते। व्यधमद्गदया भीमः शरन्मेघानिवानिलः ॥ ४२ ॥ नागान् सप्तशतान्राजन्नीषादन्तान् प्रहारिणः। व्यधमत् सहसा भीमः क्रुद्धरूपः परन्तपः ॥ ४३ ॥ दन्तवेष्टेषु नेत्रेषु कुम्भेषु च कटेषु च। मर्म्मस्वपि च मर्मज्ञस्तान्नागानहनद्बली ॥ ४४ ॥ ततस्ते प्राद्रवन् भीताः प्रतीपं प्रहिताः पुनः। महामात्रैस्तमावव्रुर्मेघा इव दिवाकरम् ॥ ४५ ॥ तान् स सप्तशतान् नागान् सारोहायुधकेतनान्। भूमिष्ठो गदया जघ्ने वज्रेणेन्द्र इवाचलान् ॥ ४६ ॥ ततः सुबलपुत्रस्य नागानतिबलान्

पुनः। पोथयामास कौन्तेयो द्वापञ्चाशदरिन्दमः॥ ४७॥ तथा रथशतं साग्रं पत्तींश्च शतशोऽपरान्। न्यहनत् पाण्डवो युद्धे तापयंस्तव वाहिनीम्॥ ४८॥ प्रताप्यमानं सूर्य्येण भीमेन च महात्मना। तव सैन्यं सञ्चुकोच चर्म्माग्नावहितं यथा॥ ४९॥ ते भीमभयसन्त्रस्तास्तावका भरतर्षभ। विहाय समरे भीमं दुद्रुवुर्वै दिशो दश॥ ५०॥ रथाः पञ्चशताश्चान्ये ह्रादिनश्च सुवर्म्मिणः। भीममभ्यद्रवन् घ्नन्तः शरपूगैः समन्ततः॥ ५१॥ तान् ससूतरथान् वीरान् सपताकाध्वजायुधान्। पोथयामास गदया भीमो विष्णुरिवासुरान्॥ ५२॥ ततः शकुनिनिर्द्दिष्टाः सादिनः शूरसम्मताः। त्रिसहस्राभ्ययुर्भीमं शक्त्यृष्टिप्रासपाणयः॥ ५३॥ प्रत्युद्गम्य जवेनाशु सादिनोऽश्वारोहांस्तदारिहा। विविधान् विचरन्मार्गान् गदया समपोथयत्॥ ५४॥ तेषामासीन्महाशब्दस्ताड़ितानाञ्च सर्व्वशः। अश्मभिर्वध्यमानानां नागानामिव भारत॥ ५५॥ एवं सुवलपुत्रस्य त्रिसाहस्रान् हयोत्तमान्। हत्वान्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात्॥ ५६॥ कर्णोऽपि समरे राजन् धर्म्मपुत्रमरिन्दमम्। स शरैश्छादयामास सारथिञ्चाप्यपातयत्॥ ५७॥ ततः स प्रद्रुतं संख्ये रथं दृष्ट्वा महारथः। अन्वधावत किरन् बाणैः कङ्कपत्रैरजिह्मगैः॥ ५८॥ राजानमभिधावन्तं शरैरावृत्य रोदसी। क्रुद्धः प्राच्छादयामास शरजालेन मारुतिः॥ ५९॥ संनिवृत्तस्ततस्तूर्णं राधेयः शत्रुकर्षणः। भीमं प्रच्छादयामास समन्तान्निशितैः शरैः॥ ६०॥ भीमसेनरथव्यग्रं कर्णं भारत सात्यकिः। अभ्यर्द्दयदमेयात्मा पार्ष्णिग्रहणकारणात्॥ ६१॥ अभ्यवर्त्तत कर्णस्तमर्द्दितोऽपि शरैर्भृशम्॥ ६२॥ तावन्योऽन्यं समासाद्य वृषभौ सर्व्वधन्विनाम्। विसृजन्तौ शरांश्चित्रान् विभ्राजेतां मनस्विनौ॥ ६३॥ ताभ्यां वियति राजेन्द्र विततं भीमदर्शनम्। क्रौञ्चपृष्ठारुणं रौद्रं बाणजालं व्यदृश्यत॥ ६४॥ नैव

सूर्य्यप्रभां राजन् न दिशः प्रदिशस्तथा। प्राच्छादिष्म वयं ते वा शरैर्मुक्तैः सहस्रशः ॥ ६५ ॥ मध्याह्ने तपतो राजन् भास्करस्य महाप्रभाः। हृताः सर्वाः शरौघैस्तैः कर्णपाण्डवयोस्तदा ॥ ६६ ॥ सौवलं कृतवर्माणं द्रौणिमाधिरथिं कृपम्। संसक्तान् पाण्डवै दृष्ट्वा निवृत्ताः कुरवः पुनः ॥ ६७ ॥ तेषामापततां शब्दस्तीव्र आसीद्विशाम्पते। उद्वृत्तानां यथा वृष्ट्या सागराणां भयावहः ॥ ६८ ॥ ते सेने भृशसंसक्ते दृष्ट्वान्योऽन्यं महाहवे। हर्षेण महता युक्ते परिगृह्य परस्परम् ॥ ३९ ॥ ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे। यादृशं न कदाचिद्धि दृष्टपूर्वं न च श्रुतम् ॥७०॥ बलौघस्तु समासाद्य बलौघं सहसा रणे। उपासर्पत वेगेन वार्य्यौघ इव सागरम् ॥ ७१ ॥ आसीन्निनादः सुमहान् बलौघानां परस्परम्। गर्ज्जतां सागरौघानां यथा स्यान्निस्वनो महान् ॥७२॥ ते तु सेने समासाद्य वेगवत्यौ परस्परम्। एकीभावमनुप्राप्ते नद्याविव समागते ॥ ७२ ॥ ततः प्रववृते युद्धं घोररूपं भयानकम्। कुरूणां पाण्डवानाञ्च लिप्सतां सुमहद्यशः ॥ ७४ ॥ शूराणां गर्ज्जतां तत्र ह्यविच्छेदकृता गिरः। श्रूयन्ते विविधा राजन्नामान्यद्दिश्य भारत ॥ ७५ ॥ यस्य यद्धि रणे व्यङ्गं पितृतो मातृतोऽपि वा। कर्मतः शीलतो वापि स तत् श्रावयते युधि ॥७६॥ तान् दृष्ट्वा समरे शूरांस्तर्ज्जमानान् परस्परम्। अभवन्मे मती राजन्नैषामस्तीति जीवितम् ॥ ७७ ॥ तेषां दृष्ट्वा तु क्रुद्धानां वपूंष्यमिततेजसाम्। अभवन्मे भयं तीव्रं कथमेतद्भविष्यति ॥७८॥ ततस्ते पाण्डवा राजन् कौरवाश्च महारथाः। ततक्षुः सायकैस्तीक्ष्णैर्निघ्नन्तो हि परस्परम् ॥ ७९ ॥

इति कर्णपर्वणि संकुलयुद्धे एकपञ्चाशोऽध्यायः ॥ ५१ ॥

सञ्जय उवाच। क्षत्रियास्ते महाराज परस्परवधैषिणः। अन्योऽन्यं समरे जघ्नु कृतवैराः परस्परम् ॥ १ ॥ रथौघाश्च हयौघाश्च नरौघाश्च समन्ततः। गजौघाश्च महाराज संसक्ताश्च परस्परम् ॥ २ ॥ गदानां परिघानाञ्च कुणपानाञ्च क्षिप्यताम्। प्रासानां भिन्दिपालानां भुशुण्डीनाञ्च सर्व्वशः। सम्पातं चानुपश्याम संग्रामे भृशदारुणे ॥ ३ ॥ शलभा इव सम्पेतुः शरवृष्टयः सुदारुणाः ॥ ४ ॥ नागा नागान् समासाद्य व्यधमन्त परस्परम्। हया हयांश्च समरे रथिनो रथिनस्तथा ॥ ५ ॥ पत्तयः पत्तिसङ्घांश्च हयसङ्घांश्च पत्तयः। पत्तयो रथमातङ्गान् रथा हस्त्यश्वमेव च। नागाश्च समरे त्र्यङ्गं ममृदुः शीघ्रगा नृप ॥ ६ ॥ वध्यतां तत्र शूराणां क्रोशताञ्च परस्परम्। घोरमायोधनं जज्ञे पशूनां वैशसं यथा ॥ ७ ॥ रुधिरेण समास्तीर्णा भाति भारत मेदिनी। शक्रगोपगणाकीर्णा प्रावृषीव यथा धरा ॥ ८ ॥ यथा वा वाससी शुक्ले महारजनरञ्जिते। बिभृयाद्युवती श्यामा तद्वदासीद्वसुन्धरा। मांसशोणितचित्रेव शातकुम्भमयीव च ॥ ९ ॥ छिन्नानां चोत्तमाङ्गानां बाहूनाञ्चोरुभिः सह। कुण्डलानां प्रवृद्धानां भूषणानाञ्च भारत ॥ १० ॥ निष्काणामथ शूराणां शरीराणाञ्च धन्विनाम्। वर्म्मणां सपताकानां सङ्घास्तत्रापतन् भुवि ॥ ११ ॥ गजा गजान् समासाद्य विषाणैरार्द्दयन्नृप। विषाणाभिहतास्तत्र भ्राजन्ते द्विरदास्तथा ॥ १२ ॥ रुधिरेणावसिक्ताङ्गा गैरिकाप्रस्रवा इव। यथा भ्राजन्ति स्यन्दन्तः पर्व्वता धातुमण्डिताः ॥ १३ ॥ तोमरान् भुजनिर्मुक्तान् प्रतीपानास्थितान् बहून्। हस्तैर्विचेरुस्ते नागा बभञ्जुश्चापरे तथा ॥ १४ ॥ नाराचैश्छिन्नवर्म्माणो भ्राजन्ति स्म गजोत्तमाः। हिमागमे महाराज व्यभ्रा इव महीधराः ॥ १५ ॥ शरैः कनकपुङ्खैश्च चिता रेजुर्गजोत्तमाः। उल्काभिः संप्रदीप्ताग्राः पर्व्वता इव मारिष ॥ १६ ॥

केचिदभ्याहता नागैर्नागा नग निभोपमाः। विनेदुः समरे तस्मिन् पक्षवन्त इवाद्रय ॥ १७ ॥ अपरे प्राद्रवन्नागाः शल्यार्त्ता व्रण-तापिताः। प्रतिमानैश्च कुम्भैश्च पेतुरुर्व्यां महाहवे ॥ १८ ॥ विनेदुः सिंहवच्चान्ये नदन्तो भैरवान्रवान्। बभ्रमुर्बहवो राजंश्चुक्रुशु-श्चापरे गजाः ॥ १९ ॥ हयाश्च निहता वाणैः स्वर्णभाण्डपरि-च्छदाः। निषेदुश्चैव मम्लुश्च बभ्रमुश्च दिशो दश ॥ २० ॥ अपरे कृष्यमाणाश्च विचेष्टन्तो महीतले। भावान् बहुविधांश्चक्रुस्ताड़िताः शरतोमरैः ॥ २१ ॥ नरास्तु निहता भूमौ कूजन्तस्तत्र मारिष। दृष्ट्वा च बान्धवानन्ये पितॄनन्ये पितामहान् ॥ २२ ॥ धावमानान् परांश्चान्यान् दृष्ट्वान्ये तत्र भारत। ख्यातानि गोत्रनामानि शशंसु-रितरेतरम् ॥ २३ ॥ तेषां छिन्ना महाराज भुजाः कनकभूषणाः। उद्वेष्टन्ते विचेष्टन्ते पतन्ति चोत्पतन्ति च ॥ २४ ॥ निपतन्ति तथै-वान्ये स्फुरन्ति च सहस्रशः। वेगांश्चान्ये रणे चक्रुः पञ्चास्या इव पन्नगाः ॥ २५ ॥ ते भुजा भोगिभोगाभाश्चन्दनाक्ता विशा-म्पते। लोहितार्द्रा भृशं रेजुस्तपनीयध्वजा इव ॥ २६ ॥ वर्त्त-माने तथा घोरे सङ्कुले सर्वतो दिशम्। अविज्ञाताः स्म युध्यन्ते विनिघ्नन्तः परस्परम् ॥ २७ ॥ भौमेन रजसाकीर्णे शस्त्रसम्पात-संकुले। नैव स्वे न परे राजन् व्यज्ञायन्त तमोवृताः ॥ २८ ॥ तथा तदभवद्युद्धं घोररूपं भयानकम्। शोणितोदा महानद्यः प्रसस्रुस्तत्र चासकृत् ॥ २९ ॥ शीर्षपाषाणसंछन्नाः केशशैवल-शाद्वलाः। अस्थिमीनसमाकीर्णा धनुःशरगदोडुपाः ॥ ३० ॥ मांस-शोणितपङ्किन्यो घोररूपाः सुदारुणाः। नदीः प्रावर्त्तयामासुः शोणितौघप्रवर्त्तिनीः ॥ ३१ ॥ भीरुवित्रासकारिण्यः शूराणां हर्ष-वर्द्धनाः। ता नद्यो घोररूपास्तु नयन्त्यो यमसादनम्। अव-गाढ़ान्मज्जयन्तः क्षत्रस्याजनयन् भयम् ॥ ३२ ॥ क्रव्यादानां नर-व्याघ्र नर्दतां तत्र तत्र ह। घोरमायोधनं जज्ञे प्रेतराजपुरो-

षमम् ॥ ३३ ॥ उत्थितान्यगणेयानि कबन्धानि समन्ततः ॥ ३४ ॥ नृत्यन्ति वै भूतगणाः सुतृप्ता मांसशोणितैः । पीत्वा च शोणितं तत्र वसां पीत्वा च भारत ॥३५ ॥ मेदोमज्जावसामत्तास्तृप्ता मांसस्य चैव हि । धावमानाः स्म दृश्यन्ते काकगृध्रबकास्तथा ॥ ३६ ॥ शूरास्तु समरे राजन् भयं त्यक्त्वा सुदुस्त्यजम् । योधव्रतं समास्थाय चक्रुः कर्म्माण्यभीतवत् ॥ ३७ ॥ शरशक्तिसमाकीर्णे क्रव्यादगणसंकुले । व्यचरन्त रणे शूराः ख्यापयन्तः स्वपौरुषम् ॥ ३८ ॥ अन्योऽन्यं श्रावयन्ति स्म नामगोत्राणि भारत । पितृनामानि च रणे गोत्रनामानि वा विभो ॥ ३९ ॥ श्रावयाणाश्च बहवस्तत्र योधा विशाम्पते । अन्योऽन्यमवमृद्नन्तः शक्तितोमरपट्टिशैः ॥ ४० ॥ वर्त्तमाने तथा युद्धे घोररूपे सुदारुणे । व्यषीदत् कौरवी सेना भिन्ना नौरिव सागरे ॥ ४१ ॥

इति कर्णपर्व्वणि संकुलयुद्धे द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

---

सञ्जय उवाच । वर्त्तमाने तथा युद्धे क्षत्रियाणां निमज्जने । गाण्डीवस्य महाघोषः श्रूयते युधि मारिष ॥ १ ॥ संसप्तकानां कदनमकरोद्यत्र पाण्डवः । कोशलानां तथा राजन्नारायणबलस्य च ॥ २ ॥ संशप्तकास्तु समरे शरवृष्टीः समन्ततः । अपातयन् पार्थमूर्द्ध्नि जयगृद्धाः प्रमन्यवः ॥ ३ ॥ ता वृष्टीः सहसा राजंस्तरसा वारयन् प्रभुः । व्यगाहत रणे पार्थो विनिघ्नन्रथिनां वरान् ॥ ४ ॥ विगाह्य तु रथानीकं कङ्कपत्रैः शिलाशितैः । आससाद ततः पार्थः सुशर्म्माणं महारथम् ॥ ५ ॥ स तस्य शरवर्षाणि ववर्ष रथिनां वरः । तथा संशप्तकाश्चैव पार्थं बाणैः समार्पयन् ॥ ६ ॥ सुशर्म्मा तु ततः पार्थं विद्ध्वा दशभिराशुगैः । जनार्द्दनं

त्रिभिर्बाणै रहनद्दक्षिणे भुजे। ततोऽपरेण भल्लेन केतुं विव्याध मारिष ॥ ७॥ स वानरवरो राजन् विश्वकर्मकृतो महान्। ननाद सुमहानादं भीषयाणो जगर्ज्ज च ॥ ८॥ कपेस्तु निनदं श्रुत्वा सन्त्रस्ता तव वाहिनी। भयं विपुलमाधाय निश्चेष्टा समपद्यत ॥ ९॥ ततः सा शुशुभे सेना निश्चेष्टावस्थिता नृप। नानापुष्पसमाकीर्णं यथा चैत्ररथं वनम् ॥ १०॥ प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम। अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ॥ ११॥ परिवव्रुस्ततः सर्वे पाण्डवस्य महारथम्। निगृह्य तं प्रचक्रुशुर्वध्यमानाः शितैः शरैः ॥ १२॥ ते हयान्रथचक्रे च रथेषाश्चापि मारिष। निगृह्य बलवत सर्वे सिंहनादमथोऽनदन् ॥ १३॥ अपरे जगृहुश्चैव केशवस्य महाभुजौ। पार्थमन्ये महाराज रथस्थं जगृहुर्मुदा ॥ १४॥ केशवस्तु ततो बाहू विधुन्वन् रणमूर्द्धनि। पातयामास तान् सर्वान् दुष्टहस्तीव हस्तिपान् ॥१५॥ ततः क्रुद्धो रणे पार्थः संवृतस्तैर्महारथैः। निगृहीतं रथं दृष्ट्वा केशवञ्चाप्यभिद्रुतम्। रथारूढांश्च सुबहून् पदातींश्चाप्यपातयत् ॥ १६॥ आसन्नांश्च तथा योधान् शरैरासन्नयोधिभिः। छादयामास समरे केशवञ्चेदमब्रवीत् ॥ १७॥ पश्य कृष्ण महाबाहो संशप्तकगणान् बहून्। कुर्वाणान् दारुणं कर्म वध्यमानान् सहस्रशः ॥ १८॥ रथबन्धमिमं घोरं पृथिव्यां नास्ति कश्चन। यः सहेत पुमांल्लोके मदन्यो यदुपुङ्गव ॥ १९॥ इत्येवमुक्त्वा वीभत्सुर्देवदत्तमथाधमत्। पाञ्चजन्यञ्च कृष्णोऽपि पूरयन्निव रोदसी ॥२०॥ तन्तु शङ्खस्वनं श्रुत्वा संशप्तकवरूथिनी। सञ्चचाल महाराज वित्रस्ता चाभवद्भृशम् ॥ २१॥ पादबन्धं ततश्चक्रे पाण्डवः परवीरहा। नागमस्त्रं महाराज संप्रोदीर्य्य मुहुर्मुहुः ॥ २२॥ ते बद्धाः पादबन्धेन पाण्डवेन महात्मना। निश्चेष्टाश्चाभवन्राजन् अश्मसारमया इव ॥ २३॥ निश्चेष्टांस्तु ततो योधानवधीत् पाण्डु-

नन्दनः। यथेन्द्र समरे दैत्यांस्तारकस्य वधे पुरा ॥ २४ ॥ ते वध्यमानाः समरे मुमुचुस्तं रथोत्तमम्। आयुधानि च सर्व्वाणि विसृष्टुमुपचक्रमुः ॥ २५ ॥ ते बद्धाः पादबन्धेन न शेकुश्चेष्टितुं नृप। ततस्तानवधीत् पार्थः शरैः सन्नतपर्व्वभिः ॥ २६ ॥ सर्व्वे योधा हि समरे भुजगैर्वेष्टिताभवन्। यानुद्दिश्य रणे पार्थः पादबन्धं चकार ह ॥ २७ ॥ ततः सुशर्म्मा राजेन्द्र गृहीतां वीक्ष्य वाहिनीम्। सौपर्णमस्त्रं त्वरितः प्रादुश्चक्रे महारथाः ॥ २८ ॥ ततः सुपर्णाः संपेतुर्भक्षयन्तो भुजङ्गमान्। ते वै विदुद्रुवुर्नागा दृष्ट्वा तान् खचरान्नृप ॥ २९ ॥ बभौ बलं तद्विमुक्तं पादबन्धाद्विशाम्पते। मेघवृन्दाद्यथा मुक्तो भास्करस्तापयन् प्रजाः ॥ ३० ॥ विप्रमुक्तास्तु ते योधाः फाल्गुनस्य रथं प्रति। ससृजुर्बाणसङ्घांश्च शस्त्रसङ्घांश्च मारिष। विविधानि च शस्त्राणि प्रत्यविध्यन्त सर्व्वशः ॥ ३१ ॥ तां महास्त्रमयीं वृष्टिं संछिद्य शरवृष्टिभिः। न्यवधीच्च ततो योधान् वासविः परवीरहा ॥ ३२ ॥ सुशर्म्मा तु ततो राजन् बाणेनानतपर्व्वणा। अर्जुनं हृदये विद्धा विव्याधान्यैस्त्रिभिः शरैः ॥ ३३ ॥ स गाढ़विद्धो व्यथितो रथोपस्थ उपाविशत्। तत उच्चुक्रुशुः सर्व्वे हतः पार्थ इति स्म ह ॥ ३४ ॥ ततः शङ्खनिनादाश्च भेरीशब्दाश्च पुष्कलाः। नानावादित्रनिनादाः सिंहनादाश्च जज्ञिरे ॥ ३५ ॥ प्रतिलभ्य ततः संज्ञां श्वेताश्वः कृष्णसारथिः। ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे त्वरान्वितः ॥ ३६ ॥ ततो बाणसहस्राणि समुत्पन्नानि मारिष। सर्व्वदिक्षु व्यदृश्यन्त सूदयन्ति नृपद्विपान्। हयान्रथांश्च समरे शस्त्रैः शतसहस्रशः ॥ ३७ ॥ वध्यमाने ततः सैन्ये भयं सुमहदाविशत् ॥ ३८ ॥ संशप्तकगणानाञ्च गोपालानाञ्च भारत। न हि तत्र पुमान् कश्चिद्योऽर्जुनं प्रत्ययुध्यत ॥ ३९ ॥ पश्यतां तत्र वीराणामहन्यत बलं तव। हन्यमानमपश्यंश्च निश्चेष्टाः स्म पराक्रमे ॥ ४० ॥ अयुतं तत्र योधानां हत्वा पाण्डुसुतो रणे।

व्यभ्राजत महाराज विधूमोऽग्निरिव ज्वलन् ॥ ४१ ॥ षट्ईषासहस्राणि यानि दृष्टानि भारत। रथानामयुतञ्चैव त्रिशाहस्राश्च दन्तिनः ॥ ४२ ॥ ततः संप्रसक्ता भूयः परिवव्रुर्धनञ्जयम्। मर्त्तव्यमिति निश्चित्य जयं वापि निवर्त्तनम् ॥ ४३ ॥ तत्र युद्धं महच्चासीत्तावकानां विशाम्पते। शूरेण बलिना सार्द्धं पाण्डवेन किरीटिना ॥ ४४ ॥

इति कर्णपर्वणि संकुलयुद्धे त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

---

सञ्जय उवाच। कृतवर्मा कृपो द्रौणिः सूतपुत्रश्च मारिष। उलूकः सौवलश्चैव राजा च सह सोदरैः ॥ १ ॥ सीदमानां चमूं दृष्ट्वा पाण्डुपुत्रभयार्द्दितम्। समुज्जहार वेगेन भिन्नां नावमिवार्णवे ॥ २ ॥ ततो युद्धमतीवासीन्मुहूर्त्तमिव भारत। भीरूणां त्रासजननं शूराणां हर्षवर्द्धनम् ॥ ३ ॥ कृपेण शरवर्षाणि प्रविमुक्तानि संयुगे। सृञ्जयांश्छादयामासुः शलभानां व्रजा इव ॥४॥ शिखण्डीच ततः क्रुद्धो गौतमं त्वरितो ययौ। ववर्ष शरवर्षाणि समन्ताद्द्विजपुङ्गवम् ॥ ५ ॥ कृपस्तु शरवर्षन्तद्विनिहत्य महास्त्रवित्। शिखण्डिनं रणे क्रुद्धो विव्याध दशभिः शरैः ॥ ६ ॥ ततः शिखण्डी कुपितः शरैः सप्तभिराहवे। कृपं विव्याध सुभृशं कङ्कपत्रैरजिह्मगैः ॥ ७ ॥ ततः कृपः शरैस्तीक्ष्णैः सोऽतिविद्धो महारथः। व्यश्वसूतरथं चक्रे शिखण्डिनमथो द्विजः ॥ ८ ॥ हताश्वात्तु ततो यानादवप्लुत्य महारथः। खड्गञ्चर्म तथा गृह्य सत्वरं ब्राह्मणं ययौ ॥ ९ ॥ तमापतन्तं सहसा शरैः सन्नतपर्वभिः। छादयामास समरे तदद्भुतमिवाभवत् ॥ १० ॥ तत्राद्भुतमपश्याम शिलानां प्लवनं यथा। निश्चेष्टो यद्रणे राजन् शिखण्डी समतिष्ठत ॥ ११ ॥ कृपेण छादितं दृष्ट्वा नृपोत्तम शिखण्डिनम्।

प्रत्युद्ययौ कृपं तूर्णं धृष्टद्युम्नो महारथः ॥ १२ ॥ धृष्टद्युम्नं ततो यान्तं शारद्वतरथं प्रति। प्रतिजग्राह वेगेन कृतवर्मा महारथः ॥ १३ ॥ युधिष्ठिरमथायान्तं शारद्वतरथं प्रति। सपुत्रं सह-सैन्यञ्च द्रोणपुत्रो न्यवारयत् ॥ १४ ॥ नकुलं सहदेवञ्च त्वरमाणौ महारथौ। प्रतिजग्राह ते पुत्रः शरवर्षेण वारयन् ॥ १५ ॥ भीम-सेनं करूषांश्च कैकयान् सह सृञ्जयैः। कर्णो वैकर्त्तनो युद्धे वारयामास भारत ॥ १६ ॥ शिखण्डिनस्ततो वाणान् कृपः शार-द्वतो युधि। प्राहिणोत्त्वरया युक्तो दिधक्षुरिव मारिष ॥ १७ ॥ तान् शरान् प्रेषितांस्तेन समन्तात् स्वर्णभूषितान्। चिच्छेद खड्गमाविध्य भ्रामयंश्च पुनः पुनः ॥ १८ ॥ शतचन्द्रं ततश्चर्म गौतमः पार्षतस्य ह। व्यधमत् सायकैस्तूर्णं तत उच्चुक्रुशुर्जनाः ॥ १९ ॥ स विचर्मा महाराज खड्गपाणिरुपाद्रवत्। कृपस्य वशमापन्नो मृत्योरास्यमिवातुरः ॥ २० ॥ शारद्वतशरैर्ग्रस्तं क्लिश्य-मानं महाबलम्। चित्रकेतुसुतो राजन् सुकेतुस्त्वरितो ययौ ॥२१॥ विकिरन् ब्राह्मणं युद्धे बहुभिर्निशितैः शरैः। अभ्यापतदमेयात्मा गौतमस्य रथं प्रति ॥ २२ ॥ दृष्ट्वा विषक्तं तद्युद्धे ब्राह्मणं चरित-व्रतम्। अपयातस्ततस्तूर्णं शिखण्डी राजसत्तम ॥ २३ ॥ सुके-तुस्तु ततो राजन् गौतमं नवभिः शरैः। विद्ध्वा विव्याध सप्तत्या पुनश्चैनं त्रिभिः शरैः ॥ २४ ॥ अथास्य सशरञ्चापं पुनश्चिच्छेद मारिष। सारथिञ्च शरेणास्य भृशं मर्म्मस्वताड़यत् ॥ २५ ॥ गौतमस्तु ततः क्रुद्धो धनुर्गृह्य नवं दृढ़म्। सुकेतुं त्रिंशता वाणैः सर्वमर्मस्वताड़यत् ॥ २६ ॥ स विह्वलितसर्वाङ्गः प्रचचाल रथोत्तमे। भूमिकम्पे यथा वृक्षश्चचाल कम्पितो भृशम् ॥ २७ ॥ चलतस्तस्य कायात्तु शिरो ज्वलितकुण्डलम्। सोष्णीषं सशिर-स्त्राणं क्षुरप्रेण न्यपातयत् ॥ २८ ॥ तच्छिरः प्रापतद्भूमौ श्येना-हृतमिवामिषम्। ततोऽस्य कायो वसुधां पश्चात् प्रापतदच्युत ॥२९॥

तस्मिन् हते महाराज वसास्तस्य पुरोगमाः। गौतमं समरे त्यक्त्वा दुद्रुवुस्ते दिशो दश॥ ३०॥ धृष्टद्युम्नन्तु समरे परिवार्य्य महावलम्। कृतवर्मा नदन् हृष्टस्तिष्ठ तिष्ठेति चाब्रवीत्॥ ३१॥ तदभूत्तुमुलं युद्धं वृष्णिपार्षतयो रणे। आमिषार्थे यथा युद्धं श्येनयोः क्रुद्धयोर्नृप॥ ३२॥ धृष्टद्युम्नस्तु समरे हार्द्दिक्यं नवभिः शरैः। आजघानोरसि क्रुद्धः पीड़यन् हृदिकात्मजम्॥ ३३॥ कृतवर्मा तु समरे पार्षतेन दृढ़ाहतः। पार्षतं सरथं साश्वं छादयामास सायकैः॥ ३४॥ सरथश्छादितो राजन् धृष्टद्युम्नो न दृश्यते। मेघैरिव परिच्छन्नो भास्करो जलधारिभिः॥ ३५॥ विधूय तं वाणगणं शरैः कनकभूषणैः। व्यरोचत रणे राजन् धृष्टद्युम्नः कृतव्रणः॥ ३६॥ ततस्तु पार्षतः क्रुद्धः शरवृष्टिं सुदारुणाम्। कृतवर्माणमासाद्य व्यसृजत् पृतनापतिः॥ ३७॥ तामापतन्तीं सहसा शरवृष्टिं सुदारुणाम्। शरैरनेकसाहस्रै-र्हार्द्दिक्यो व्यधमद्युधि॥ ३८॥ दृष्ट्वा तु वारितां युद्धे शरवृष्टिं दुरासदम्। कृतवर्माणमभ्येत्य वारयामास पार्षतः॥ ३९॥ सारथिञ्चास्य तरसा प्राहिणोद्यमसादनम्। भल्लेन शितधारेण स हतः प्रापतद्रथात्॥ ४०॥ धृष्टद्युम्नस्तु वलवान् जित्वा शत्रुं महावलम्। कौरवान् समरे तूर्णं वारयामास सायकैः॥ ४१॥ ततस्ते तावका योधा धृष्टद्युम्नमुपाद्रवन्। सिंहनादरवं कृत्वा ततो युद्धमवर्त्तत॥ ४२॥

इति कर्णपर्वणि संशप्तकसंग्रामे चतुःपञ्चाशोऽध्यायः॥ ५४॥

---

सञ्जय उवाच। द्रौणिर्युधिष्ठिरं दृष्ट्वा शैनेयेनाभिरक्षितम्। द्रौपदेयैस्तथा शूरैरभ्यवर्त्तत हृष्टवत्॥ १॥ किरन्निषुगणान् घोरान् स्वर्णपुङ्खाञ्छिलाशितान्। दर्शयन् विविधान् मार्गान्

शिचाश्च लघुहस्तवत् ॥ २ ॥ ततः खं पूरयामास शरैर्दिव्यास्त्र-
मन्त्रितैः । युधिष्ठिरन्तु समरे पर्य्यवारयदस्त्रवित् ॥ ३ ॥ द्रौणा-
यनिशरच्छन्नं न प्राज्ञायत किञ्चन । बाणभूतमभूत् सर्वमायो-
धनशिरो महत् ॥ ४ ॥ बाणजालं दिविच्छन्नं स्वर्णजालविभू-
षितम् । शुशुभे भरतश्रेष्ठ वितानमिव विष्टितम् ॥ ५ ॥ तेन
छन्नं नभो राजन् बाणजालेन भास्वता । अभ्रच्छायेव सञ्जज्ञे
बाणरुद्धे नभस्तले ॥ ६ ॥ तत्राश्चर्य्यमपश्याम बाणभूते तथाविधे ।
न स्म सम्पतते भूतं किञ्चिदेवान्तरीक्षगम् ॥ ७ ॥ सात्यकिर्यत-
मानस्तु धर्मराजश्च पाण्डवः । तथेतराणि सैन्यानि न स्म चक्रुः
पराक्रमम् ॥ ८ ॥ लाघवं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः ।
व्यस्मयन्त महाराज न चैनं प्रत्युदीक्षितुम् । शेकुस्ते सर्वराजान-
स्तपन्तमिव भास्करम् ॥ ९ ॥ बध्यमाने ततः सैन्ये द्रौपदेया महा
रथाः । सात्यकिर्द्धर्मराजश्च पाञ्चालाश्चापि सङ्गताः । त्यक्त्वा मृत्यु-
भयं घोरं द्रौणायनिमुपाद्रवन् ॥ १० ॥ सात्यकिः सप्तविंशत्या
द्रौणिं विद्वा शिलीमुखैः । पुनर्विव्याध नाराचैः सप्तभिः स्वर्ण-
भूषितैः ॥ ११ ॥ युधिष्ठिरस्त्रिसप्तत्या प्रतिविन्ध्यश्च सप्तभिः ।
श्रुतकर्मा त्रिभिर्बाणैः श्रुतकीर्त्तिश्च पञ्चभिः ॥ १२ ॥ सुतसोमस्तु
नवभिः शतानीकश्च सप्तभिः । अन्ये च बहवः शूरा विविधुस्तं
समन्ततः ॥ १३ ॥ स तु क्रुद्धस्ततो राजन्नाशीविष इव श्वसन् ।
सात्यकिं पञ्चविंशत्या प्राविध्यत शिलाशितैः ॥ १४ ॥ श्रुतकीर्त्तिञ्च
नवभिः सुतसोमञ्च पञ्चभिः । अष्टाभिः श्रुतकर्माणं प्रतिविन्ध्यं त्र
त्रिभिः शरैः ॥ १५ ॥ शतानीकञ्च नवभिर्द्धर्मपुत्रञ्च पञ्चभिः ।
अथेतरांस्ततः शूरान् द्वाभ्यां द्वाभ्यामताड़यत् । श्रुतकीर्त्तेस्तथा
चापं चिच्छेद निशितैः शरैः ॥ १६ ॥ अथान्यद्धनुरादाय श्रुत-
कीर्त्तिर्महारथः । द्रौणायनिं त्रिभिर्विद्धा विव्याधान्यैः शितैः
शरैः ॥ १७ ॥ ततो द्रौणिर्महाराज शरवर्षेण मारिष । छादया-

मास तत् सैन्यं समन्ताद्भरतर्षभ ॥ १८ ॥ ततः पुनरमेयात्मा धर्मराजस्य कार्मुकम्। द्रौणिश्चिच्छेद विहसन् विव्याध च शरैस्त्रिभिः ॥ १९ ॥ ततो धर्मसुतो राजन् प्रगृह्यान्यन्महद्धनुः। द्रौणिं विव्याध सप्तत्या बाह्वोरुरसि चैव ह ॥ २० ॥ सात्यकिस्तु ततः क्रुद्धो द्रौणेः प्रहरतो रणे। अर्द्धचन्द्रेण तीक्ष्णेन धनुश्छित्त्वानदद्भृशम् ॥ २१ ॥ छिन्नधन्वा ततो द्रौणिः शक्त्या शक्तिमतां वरः। सारथिं पातयामास शैनेयस्य रथाद्द्रुतम् ॥ २२ ॥ अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान्। शैनेयं शरवर्षेण छादयामास भारत ॥ २३ ॥ तस्याश्वाः प्रद्रुताः संख्ये पातिते रथसारथौ। तत्र तत्रैव धावन्तः समदृश्यन्त भारत ॥ २४ ॥ युधिष्ठिरपुरोगास्तु द्रौणिं शस्त्रभृतां वरम्। अभ्यवर्त्तन्त वेगेन विसृजन्तः शितान् शरान् ॥ २५ ॥ आगच्छमानांस्तान् दृष्ट्वा क्रुद्धरूपान् परन्तपः। प्रहसन् प्रतिजग्राह द्रोणपुत्रो महारणे ॥२६॥ ततः शरशतज्वालः सेनाकक्षं महारथः। द्रौणिर्ददाह समरे कक्षमग्निर्यथा वने ॥ २७ ॥ तद्बलं पाण्डुपुत्रस्य द्रोणपुत्रप्रतापितम्। चुक्षुभे भरतश्रेष्ठ तिमिनेव नदीमुखम् ॥ २८ ॥ दृष्ट्वा ते च महाराज द्रोणपुत्रपराक्रमम्। निहतान्मेनिरे सर्वान् पाण्डून् द्रोणसुतेन वै ॥ २९ ॥ युधिष्ठिरस्तु त्वरितो द्रौणिं शिष्य महारथम्। अब्रवीद्द्रोणपुत्रं स रोषामर्षसमन्वितः ॥ ३० ॥ नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता। यतस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ॥ ३१ ॥ ब्राह्मणेन तपः कार्य्यं दानमध्ययनं तथा। क्षत्रियेण धनुर्नाम्यं स भवान् ब्राह्मणब्रुवः ॥ ३२ ॥ मिषतस्ते महाबाहो जेष्यामि युधि कौरवान्। कुरुष्व समरे कर्म ब्रह्मबन्धुरसि ध्रुवम् ॥ ३३ ॥ एवमुक्तो महाराज द्रोणपुत्रः स्मयन्निव। युक्तं तत्त्वञ्च सञ्चिन्त्य नोत्तरं किञ्चिदब्रवीत् ॥ ३४ ॥ अनुक्त्वा च ततः किञ्चित् शरवर्षेण पाण्डवम्। छादयामास समरे

क्रुद्धोऽन्तक इव प्रजाः ॥ ३६ ॥ संछाद्यमानस्तु तदा द्रोणपुत्रेण मारिष । पार्थोऽपयातः शीघ्रं वै विहाय महतीं चमूम् ॥ ३६ ॥ अपयाते ततस्तस्मिन् धर्मपुत्रे युधिष्ठिरे । द्रोणपुत्रस्ततो राजन् प्रत्यगात् स महामनाः ॥ ३७ ॥ ततो युधिष्ठिरो राजंस्त्यक्त्वा द्रौणिं महाहवे । प्रययौ तावकं सैन्यं युक्तः क्रूराय कर्मणे ॥३८॥

इति कर्णपर्वणि युधिष्ठिरापयाने पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

---

सञ्जय उवाच । भीमसेन सपाञ्चालं चेदिकैकेयसंवृतम् । वैकर्त्तनः स्वयं रुद्ध्वा छादयामास सायकैः ॥ १ ॥ ततस्तु चेदिकारूषान् सृञ्जयांश्च महारथान् । कर्णो जघान समरे भीमसेनस्य पश्यतः ॥ २ ॥ भीमसेनस्ततः कर्णं विहाय रथसत्तमम् । प्रययौ कौरवं सैन्यं कक्षमग्निरिव ज्वलन् ॥ ३ ॥ सूतपुत्रोऽपि समरे पाञ्चालान् केकयांस्तथा । सृञ्जयांश्च महेष्वासान् निजघान सहस्रशः ॥ ४ ॥ संशप्तकेषु पार्थश्च कौरवेषु वृकोदरः । पाञ्चालेषु ततः कर्णः क्षयं चक्रुर्महारथाः ॥ ५ ॥ ते क्षत्रिया दह्यमानास्त्रिभिस्तैः पावकोत्तमैः । जग्मुर्विनाशं समरे राजन् दुर्मन्त्रिते तव ॥ ६ ॥ ततो दुर्य्योधनः क्रुद्धो नवभिर्नकुलं शरैः । विव्याध भरतश्रेष्ठ चतुरश्चास्य वाजिनः ॥ ७ ॥ ततः पुनरमेयात्मा तव पुत्रो जनाधिप । क्षुरेण सहदेवस्य ध्वजं चिच्छेद काञ्चनम् ॥ ८ ॥ नकुलस्तु ततः क्रुद्धस्तव पुत्रं त्रिसप्तभिः । जघान समरे राजन् सहदेवश्च पञ्चभिः ॥ ९ ॥ तावुभौ भरतश्रेष्ठौ श्रेष्ठौ सर्वधनुष्मताम् । विव्याधोरसि संक्रुद्धः पञ्चभिः पञ्चभिः शरैः ॥ १० ॥ ततोऽपराभ्यां भल्लाभ्यां धनुषी समकृन्तत । यमयोः सहसा राजन् विव्याध च त्रिसप्तभिः ॥ ११ ॥ तावन्ये धनुषी श्रेष्ठे शक्रचापनिभे शुभे । प्रगृह्य रेजतुः शूरौ देवपुत्रोपमौ युधि ॥ १२ ॥

ततस्तौ रभसौ युद्धे भ्रातरौ भ्रातरं नृप। शरैर्वृषतुषैरैर्महा-मेघौ यथाचलम् ॥ १३ ॥ ततः क्रुद्धो महाराज तव पुत्रो महा-रथः। पाण्डुपुत्रौ महेष्वासौ वारयामास पत्रिभिः ॥ १४ ॥ धनु-र्मण्डलमेवास्य दृश्यते युधि भारत। सायकाश्चैव दृश्यन्ते निश्चरन्तः समन्ततः ॥ १५ ॥ तस्य सायकसंछन्नौ चकाशाते न पाण्डवौ। मेघच्छन्नौ यथा व्योम्नि चन्द्रसूर्यौ हतप्रभौ ॥ १६ ॥ ते तु बाणा महाराज हेमपुङ्खाः शिलाशिताः। आच्छादयन् दिशः सर्वाः सूर्य्यस्येवांशवस्तदा ॥ १७ ॥ बाणभूते ततस्तस्मिन् संछन्ने च नभस्तले। यमयोर्ददृशे रूपं कालान्तकयमोपमम् ॥ १८ ॥ परा-क्रमन्तु तं दृष्ट्वा तव सूनोर्महारथाः। मृत्योरुपान्तिकं प्राप्तौ माद्रीपुत्रौ स्म मेनिरे ॥ १९ ॥ ततः सेनापती राजन् पाण्डवस्य महारथः। पार्षतः प्रययौ तत्र यत्र राजा सुयोधनः ॥ २० ॥ माद्रीपुत्रौ ततः शूरौ व्यतिक्रम्य महारथौ। धृष्टद्युम्नस्तव सुतं वारयामास सायकैः ॥ २१ ॥ तमविध्यदमेयात्मा तव पुत्रोऽत्य-मर्षणः। पाञ्चाल्यं पञ्चविंशत्या प्रहस्य पुरुषर्षभः ॥ २२ ॥ ततः पुनरमेयात्मा तव पुत्रोऽप्यमर्षणः। विद्ध्वा ननाद पाञ्चाल्यं षष्ट्या पञ्चभिरेव च ॥ २३ ॥ अथास्य सशरञ्चापं हस्तावापञ्च मारिष। क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे ॥ २४ ॥ तदपास्य धनुश्छिन्नं पाञ्चाल्यः शत्रुकर्षणः। अन्यदादत्त वेगेन धनुर्भार-सहं नवम् ॥ २५ ॥ प्रज्वलन्निव वेगेन संरम्भाद्रुधिरेक्षणः। अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः ॥ २६ ॥ स पञ्चदश नाराचान् श्वसतः पन्नगानिव। जिघांसुर्भरतश्रेष्ठ धृष्टद्युम्नो व्यवासृजत् ॥ २७ ॥ ते वर्म हेमविकृतं छित्त्वा राज्ञः शिला-शिताः। विविशुर्वसुधां वेगात् कङ्कबर्हिणवाससः ॥ २८ ॥ सोऽति-विद्धो महाराज पुत्रस्तेऽतिव्यराजत। वसन्तकाले सुमहान् सपुष्प इव किंशुकः ॥ २९ ॥ स भिन्नवर्मा नाराचैः प्रहारैर्जर्जरीकृतः।

धृष्टद्युम्नस्य भल्लेन क्रुद्धश्चिच्छेद कार्मुकम् ॥ ३० ॥ अथैनं छिन्न-धन्वानं त्वरमाणो महीपतिः। सायकैर्द्दशभी राजन् भ्रुवोर्मध्ये समार्पयत् ॥ ३१ ॥ तस्य ते शोभयन् वक्त्रं कर्मारपरिमार्ज्जिताः। प्रफुल्लं पङ्कजं यद्वद्भ्रमरा मधुलिप्सवः ॥ ३२ ॥ तदपास्य धनु-श्छिन्नं धृष्टद्युम्नो महामनाः। अन्यदादत्त वेगेन धनुर्भल्लांश्च षोड़श ॥ ३३ ॥ ततो दुर्य्योधनस्याश्वान् हत्वा सूतञ्च पञ्चभिः। धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम् ॥ ३४ ॥ रथं सोपस्करं छत्रं शक्तिं खड़्गं गदां ध्वजम्। भल्लैश्चिच्छेद दशभिः पुत्रस्य तव पार्षतः ॥ ३५ ॥ तपनीयाङ्गदं चित्रं नागं मणिमयं शुभम्। ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः ॥ ३६ ॥ दुर्य्योधनस्तु विरथं छिन्नसर्वायुधं रणे। भ्रातरः पर्य्यरक्षन्त सोदरा भरत-र्षभ ॥ ३७ ॥ तमारोप्य रथे राजन् दण्डधारो नराधिपम्। अपोवाह रणाद्राशु धृष्टद्युम्नस्य पश्यतः ॥ ३८ ॥ कर्णस्तु सात्यकिं जित्वा राज्यगृद्धी महाबलः। द्रोणहन्तारमुग्रेषुं ससाराभिमुखो रणे ॥ ३९ ॥ तं पृष्ठतोऽभ्ययात्तूर्णं शैनेयो वितुदन्शरैः। वारणं जघनोपान्ते विषाणाभ्यामिव द्विपाः ॥ ४० ॥ स भारत महानासीत् योधानां सुमहात्मनाम्। कर्णपार्षतयोर्मध्ये त्वदीयानां महा-रणः ॥ ४१ ॥ न पाण्डवानां नास्माकं योधः कश्चित् पराङ्मुखः। प्रत्यदृश्यत यत् कर्णः पाञ्चालांस्त्वरितो ययौ ॥ ४२ ॥ तस्मिन् क्षणे नरश्रेष्ठ गजवाजिजनक्षयः। प्रादुरासीदुभयतो राजन्मध्य-गतेऽहनि ॥ ४३ ॥ पाञ्चालास्तु महाराज त्वरिता विजिगीषवः। ते सर्व्वेऽभ्यद्रवन् कर्णं पतत्रिण इव द्रुमम् ॥ ४४ ॥ तांस्तथाधि-रथिः क्रुद्धो यतमानान्मनस्विनः। विचिन्वन्निव बाणाग्रैः समा-साद्दयदग्रतः ॥ ४५ ॥ व्याघ्रकेतुं सुशर्माणं चित्रञ्चोग्रायुधं जयम्। शुक्लञ्च रोचमानञ्च सिंहसेनञ्च दुर्ज्जयम् ॥ ४६ ॥ ते वीरा रथ-वेगेन परिवव्रुर्नरोत्तमम्। सृजन्तं सायकान् क्रुद्धं कर्णमाहव-

शोभिनम् ॥ ४७ ॥ युध्यमानांस्तु तान् शूरान् मनुजेन्द्रः प्रतापवान्। अष्टाभिरष्टौ राधेयोऽवधीर्यान्निशितैः शरैः ॥ ४८ ॥ अथापरान् महाराज सूतपुत्रः प्रतापवान्। जघान बहुसाहस्रान् योधान् युद्धविशारदान् ॥ ४९ ॥ जिष्णुञ्च जिष्णुकर्माणं देवापिं भद्रमेव च। दण्डञ्च राजन् समरे चित्रं चित्रायुधं हरिम् ॥ ५० ॥ सिंहकेतुं रोचमानं शलभञ्च महारथम्। निजघान सुसंक्रुद्धश्चेदीनाञ्च महारथान् ॥ ५१ ॥ तेषामाददतः प्राणानासीद्राधेरथेर्वपुः। शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवोर्जितं महत् ॥ ५२ ॥ तत्र भारत कर्णेन मातङ्गास्ताड़िताः शरैः। सर्वतोऽभ्यद्रवन् भीताः कुर्वन्तो महदाकुलम् ॥ ५३ ॥ निपेतुरुर्व्यामपरे कर्णसायकताड़िताः। कुर्वन्तो विविधान्नादान् वज्रनुन्ना इवाचलाः ॥ ५४ ॥ गजवाजिमनुष्यैश्च निपतद्भिः समन्ततः। रथैश्चाधिरथेर्मार्गे समास्तीर्य्यत मेदिनी ॥ ५५ ॥ नैव भीष्मो न च द्रोणो नाप्यन्ये युधि तावकाः। चक्रुः स तादृशं कर्म यादृशं वै कृतं रणे ॥ ५६ ॥ सूतपुत्रेण नागेषु हयेषु च रथेषु च। नरेषु च नरव्याघ्र कृतं स्म कदनं महत् ॥ ५७ ॥ मृगमध्ये यथा सिंहो दृश्यते निर्भयश्चरन्। पाञ्चालानां तथा मध्ये कर्णोऽचरदभीतवत् ॥ ५८ ॥ यथा मृगगणांस्त्रस्तान् सिंहो द्रावयते दिशः। पाञ्चालानां रथव्रातान् कर्णो व्यद्रावयत्तथा ॥ ५९ ॥ सिंहास्यञ्च यथा प्राप्य न जीवन्ति मृगाः क्वचित्। तथा कर्णमनुप्राप्य न जीवन्ति महारथाः ॥ ६० ॥ वैश्वानरं यथा दीप्तं प्राप्य दह्यन्ति वै जनाः। कर्णाग्निना रणे तद्वद्दग्धा भारत सृञ्जयाः ॥ ६१ ॥ कर्णेन चेदिष्वेकेन पाञ्चालेषु च भारत। विश्राव्य नाम निहता बहवः शूरसम्मताः ॥ ६२ ॥ मम चासीन्मती राजन् दृष्ट्वा कर्णस्य विक्रमम्। नैकोऽप्याधिरथेर्जीवन् पाञ्चाल्यो मोक्ष्यते युधि ॥ ६३ ॥ पाञ्चालान् व्यधमत् सङ्ख्ये सूतपुत्रः पुनः पुनः ॥ ६४ ॥ पाञ्चालानथ

भिन्नं कर्णं दृष्ट्वा महारणे । अभ्यधावत संक्रुद्धो धर्मराजो युधिष्ठिरः ॥ ६५ ॥ धृष्टद्युम्नस्तु राधेयं द्रौपदेयाश्च मारिष । परिवव्रुरमित्रघ्नं शतशश्चापरे जनाः ॥ ६६ ॥ शिखण्डी सहदेवश्च नकुलो नाकुलिस्तथा । जनमेजयः शिनेर्नप्ता बहवश्च प्रभद्रकाः ॥ ६७ ॥ एते पुरोगमा भूत्वा धृष्टद्युम्नस्य संयुगे । कर्णमस्यन्त इष्वस्त्रैर्विरेजुरमितौजसः ॥ ६८ ॥ तांस्तत्राधिरथिः सङ्ख्ये चेदिपाञ्चालपाण्डवान् । एको बहूनभ्यपतद्गरुत्मान् पन्नगानिव ॥ ६९ ॥ तैः कर्णस्याभवद्युद्धं घोररूपं विशाम्पते । तादृक् यादृक् पुरा वृत्तं देवानां दानवैः सह ॥ ७० ॥ तान् समेतान् महेष्वासान् शरवर्षौघवर्षिणः । एकोऽभ्यहनदव्यग्रस्तमांसीव दिवाकरः ॥ ७१॥ भीमसेनस्तु संसक्ते राधेये पाण्डवैः सह । कुरूनभ्यहनत् क्रुद्धो यमदण्डनिभैः शरैः ॥ ७२ ॥ वाह्लीकान् कैकयान् मत्स्यान् वाशात्यान्मद्रसैन्धवान् । एकः संख्ये महेष्वासो योधयन् वह्वशोभत ॥ ७३ ॥ तत्र मर्मसु भीमेन नाराचैस्ताड़िता गजाः । प्रपतन्तो हतारोहाः कम्पयन्ति स्म मेदिनीम् ॥ ७४ ॥ वाजिनश्च हतारोहाः पत्तयश्च गतासवः । शेरते युधि निर्भिन्ना वमन्तो रुधिरं वहु ॥ ७५ ॥ सहस्रशश्च रथिनः पतिता पतितायुधाः । ते क्षत्ताः समदृश्यन्त भीमाद्भीता गतासवः ॥ ७६ ॥ रथिभिः सादिभिः सूतैः पादातैर्वाजिभिर्गजैः । भीमसेनशरच्छिन्नैराच्छन्ना वसुधाभवत् ॥ ७७ ॥ तत् स्तम्भितमिवातिष्ठद्भीमसेनभयार्दितम् । दुर्य्योधनबलं राजन् निरुत्साहं कृतव्रणम् ॥ ७८ ॥ निश्चेष्टं तद्बलं दीनं वभौ तस्मिन् महारणे ॥ ७९ ॥ प्रसन्नसलिले काले यथा स्यात् सागरो नृप । तद्वत्तव वलं तद्वै निश्चलं समवास्थितम् ॥ ८० ॥ मन्युवीर्य्यवलोपेतं दर्पात् प्रत्यवरोपितम् । अभवत्तव पुत्रस्य तत् सैन्यं निष्प्रभं तदा ॥ ८१ ॥ तद्बलं भरतश्रेष्ठ युध्यमानं परस्परम् । रुधिरौघपरिक्लिन्नं रुधिरार्द्रं वभूव तु । जगाम भरत-

श्रेष्ठ वध्यमानं परस्परम् ॥ ८२ ॥ सूतपुत्रो रणे क्रुद्धः पाण्डवानामनीकिनीम्। भीमसेनः कुरुंश्चापि द्रावयन् बह्वशोभत ॥ ८७ ॥ वर्त्तमाने तथा रौद्रे संग्रामेऽद्भुतदर्शने। निहत्य पृतनामध्ये संशप्तकगणांन् बहून्। अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत् ॥ ८४ ॥ प्रभग्नं बलमेतद्धि योत्स्यमानं जनार्द्दन ॥ ५८ ॥ एते द्रवन्ति सगणाः संशप्तकमहारथाः। अपारयन्तो मद्बाणान् सिंहशब्दं मृगा इव ॥ ८६ ॥ दीर्य्यते च महत् सैन्यं सृञ्जयानां महारणे ॥ ८७ ॥ हस्तिकच्चो ह्यसौ कृष्ण केतुः कर्णस्य धीमतः। दृश्यते राजसैन्यस्य मध्ये विचरतो मुहुः। न च कर्णं रणे शक्ता जेतुमन्ये महारथाः ॥ ८८ ॥ जानीते हि भवान् कर्णं वीर्य्यवन्तं पराक्रमे। तत्र याहि यतः कर्णो द्रावयत्येष नो बलम् ॥ ८९ ॥ वर्ज्जयित्वा रणे याहि सूतपुत्रं महारथम्। एष मे रोचते कृष्ण यथा वा तव रोचते ॥ ९० ॥ एतच्छ्रुत्वा वचस्तस्य गोविन्दः प्रहसन्निव। अब्रवीदर्जुनं तूर्णं कौरवान् जहि पाण्डव ॥ ९१ ॥ ततस्तव महासैन्यं गोविन्दप्रेषिता हयाः। हंसवर्णाः प्रविविशुर्वहन्तः कृष्णपाण्डवौ ॥ ९२ ॥ केशवप्रेषितैरश्वैः श्वेतैः काञ्चनभूषणैः। प्रविशद्भिस्तव बलं चतुर्दिशमभिद्यत ॥ ९३ ॥ मेघस्तनितनिर्ह्रादः स रथो वानरध्वजः। चलत्पताकस्तां सेनां विमानं द्यामिवाविशत् ॥ ९४ ॥ तौ विदार्य्य महासेनां प्रविष्टौ केशवार्जुनौ। क्रुद्धौ संरम्भरक्ताक्षौ व्यभ्राजेतां महाद्युती ॥ ९५ ॥ युद्धशौण्डौ समाहूतावागतौ तौ रणाध्वरम्। यज्वभिर्विधिनाहूतौ मखे देवाविवाश्विनौ ॥ ९६ ॥ क्रुद्धौ तौ तु नरव्याघ्रौ वेगवन्तौ बभूवतुः। तलशब्देन रुषितौ यथा नागौ महावने ॥ ९७ ॥ विगाह्य तु रथानीकमश्वसङ्घांश्च फाल्गुनः। व्यचरत् पृतनामध्ये पाशहस्त इवान्तकः ॥ ९८ ॥ तं दृष्ट्वा युधि विक्रान्तं सेनायां तव भारत। संशप्तकगणान् भूयः पुत्रस्ते समचूचुदत् ॥ ९९ ॥

ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः। चतुर्द्दशसहस्रैस्तु तुरगाणां महाहवे॥ १००॥ द्वाभ्यां शतसहस्राभ्यां पदातीनाञ्च धन्विनाम्। शूराणां लब्धलक्षाणां विदितानां समन्ततः॥ १०१॥ अभ्यवर्त्तन्त कौन्तेयं छादयन्तो महारथाः। शरवर्षैर्महाराज सर्वतः पाण्डुनन्दनम्॥ १०२॥ संछाद्यमानः समरे शरैः परबलार्द्दनः। दर्शयन्रौद्रमात्मानं पाशहस्त इवान्तकः। निघ्नन् संशप्तकान् पार्थः प्रेक्षणीयतरोऽभवत्॥ १०३॥ ततो विद्युत्प्रभैर्बाणैः कार्त्तस्वरविभूषितैः। निरन्तरमिवाकाशमासीच्छन्नं किरीटिना॥ १०४॥ किरीटिभुजनिर्मुक्तैः सम्पतद्भिर्महाशरैः। समाच्छन्नं बभौ सर्वं काद्रवेयैरिव प्रभो॥ १०५॥ रुक्मपुङ्खान् प्रसन्नाग्रान् शरान् सन्नतपर्वणः। अवासृजदमेयात्मा दिक्षु सर्वासु पाण्डवः॥ १०६॥ मही वियद्दिशः सर्वाः समुद्रा गिरयोऽपि वा। स्फुटन्तीति जना जज्ञुः पार्थस्य तलनिस्वनात्॥ १०७॥ हत्वा दश सहस्राणि पार्थिवानां महारथः। संशप्तकानां कौन्तेयः प्रपक्षं त्वरितोऽभ्ययात्॥ १०८॥ प्रपक्षञ्च समासाद्य पार्थः काम्बोजरक्षितम्। प्रममाथ बलाद्बाणैर्द्दानवानिव वासवः॥ १०९॥ प्रचिच्छेदाशु भल्लेन द्विषतामाततायिनाम्। शस्त्रपाणींस्तथा बाहूंस्तथा जङ्घाः शिरांसि च॥ ११०॥ अङ्गाङ्गावयवैश्छिन्नैर्व्यायुधास्तेऽपतन् भुवि। विष्वग्वाताभिसंभग्ना बहुशाखा इव द्रुमाः॥ १११॥ हस्त्यश्वरथपत्तीनां व्रातान्निघ्नन्तमर्जुनम्। सुदक्षिणादवरजः शरवृष्ट्याभ्यवीवृषत्॥ ११२॥ तस्यास्यतोऽर्द्धचन्द्राभ्यां बाहू परिघसन्निभौ। पूर्णचन्द्राभवक्त्रञ्च क्षुरेणाभ्यहरच्छिरः॥ ११३॥ स पपात हतो वाहात् सुलोहितपरिस्रवः। मनःशिलागिरेः शृङ्गं वज्रेणेव विदारितम्॥ ११४॥ सुदक्षिणादवरजं काम्बोजं ददृशुर्हतम्। प्रांशुं कमलपत्राक्षमत्यर्थं प्रियदर्शनम्। काञ्चनस्तम्भसदृशं भिन्नं हेमगिरिं यथा॥ ११५॥

ततोऽभवत् पुनर्युद्धं घोरमत्यर्थमद्भुतम्। नानावस्थाश्च योधानां बभूवुस्तत्र युध्यताम्॥ ११६॥ एकेषुनिहतैरश्वैः काम्बोजैर्यवनैः शकैः। शोणिताक्तैस्तदा रक्तं सर्वमासीद्विशाम्पते॥ ११७॥ रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः। द्विरदैश्च हतारोहैर्महामात्रैर्हतद्विपैः। अन्योऽन्येन महाराज कृतो घोरो जनक्षयः॥ ११८॥ तस्मिन् प्रपक्षे पक्षे च निहते सव्यसाचिना। अर्जुनं जयतां श्रेष्ठं त्वरितो द्रौणिरभ्ययात्॥ ११९॥ विधुन्वानो महच्चापं कार्त्तस्वरविभूषितम्। आददानः शरान् घोरान् स्वरश्मीनिव भास्करः॥ १२०॥ क्रोधामर्षाद्विवृत्तास्यो लोहिताक्षो बभौ बली। अन्तकाले यथा क्रुद्धो मृत्युः किङ्करदण्डभृत॥ १२१॥ ततः प्रासृजदुग्राणि शरवर्षाणि सङ्घशः। तैर्विसृष्टैर्महाराज व्यद्रवत् पाण्डवी चमूः॥ १२२॥ स दृष्ट्वैव तु दाशार्हं स्यन्दनस्थं विशाम्पते। पुनः प्रासृजदुग्राणि शरवर्षाणि मारिष॥ १२३॥ तैः पतद्भिर्महाराज द्रौणिमुक्तैः समन्ततः। संछादितौ रथस्थौ तावुभौ कृष्णधनञ्जयौ॥ १२४॥ ततः शरशतैस्तीक्ष्णैरश्वत्थामा प्रतापवान्। निश्चेष्टौ तावुभौ चक्रे युद्धे माधवपाण्डवौ॥ १२५॥ हाहाकृतमभूत् सर्वं जङ्गमं स्थावरं तथा। चराचरस्य गोप्तारौ दृष्ट्वा संछादितौ शरैः॥ १२६॥ सिद्धचारणसङ्घाश्च संपेतुस्ते समन्ततः। चिन्तयन्तो भवेदद्य लोकानां स्वस्त्यपीति च॥ १२७॥ न मया तादृशो राजन् दृष्टपूर्वः पराक्रमः। संग्रामे यादृशो द्रौणेः कृष्णौ संछादयिष्यतः॥ १२८॥ द्रौणेस्तु धनुषः शब्दमहितत्रासनं रणे। अश्रौषं बहुशो राजन् सिंहस्य नदतो यथा॥ १२९॥ ज्या चास्य चरतो युद्धे सव्यदक्षिणमस्यतः। विद्युदम्बुदमध्यस्था भ्राजमानेव साभवत्॥ १३०॥ स तथा क्षिप्रकारी च दृढहस्तश्च पाण्डवः। प्रमोहं परमं गत्वा प्रैक्षत तं द्रोणजं ततः॥ १३१॥ स विक्रमं हतं मेने आत्मनः सुमहात्मना। तथास्य समरे राजन्

वपुरासीत् सुदुर्द्दृशम् ॥ १३२ ॥ द्रौणिपाण्डवयोरेवं वर्त्तमाने महारणे। वर्द्धमाने च राजेन्द्र द्रोणपुत्रे महाबले। हीयमाने च कौन्तेये कृष्णो रोषः समाविशत् ॥ १३३ ॥ स रोषान्निश्वसन् राजन् निर्द्दहन्निव चक्षुषा। द्रौणिं ह्यपश्यत् संग्रामे फल्गुनञ्च मुहुर्मुहुः ॥ १३४ ॥ ततः क्रुद्धोऽब्रवीत् कृष्णः पार्थं सप्रणयं तदा ॥ १३५ ॥ अत्यद्भुतमिदं पार्थ तव पश्यामि संयुगे। अतिशेते हि यत्र त्वां द्रोणपुत्रोऽद्य भारत ॥ १३६ ॥ कच्चिद्वीर्य्यं यथापूर्वं भुजयोर्वा बलं तव। कच्चित्ते गाण्डिवं हस्ते रथे तिष्ठसि चार्जुन ॥ १३७ ॥ कच्चित् कुशलिनौ बाहू मुष्टिर्वा न व्यशीर्य्यत। उदीर्य्यमाणं हि रणे पश्यामि द्रौणिमाहवे ॥ १३८ ॥ गुरुपुत्र इति ह्येनं मानयन् भरतर्षभ। उपेक्षां कुरु मा पार्थ नायं काल उपेक्षितुम् ॥ १३९ ॥ एवमुक्तस्तु कृष्णेन गृह्य भल्लांश्चतुर्द्दश। त्वरमाणस्त्वराकाले द्रौणेर्धनुरथाच्छिनत्। ध्वजं छत्रं पताकाञ्च रथं शक्तिं गदां तथा ॥ १४० ॥ जत्रुदेशे च सुभृशं वत्सदन्तैरताड़यत्। स मूर्च्छां परमां गत्वा ध्वजयष्टिं समाश्रितः ॥ १४१ ॥ तं विसंज्ञं महाराज शत्रुणा भृशपीड़ितम्। अपोवाह रणात् सूतो रक्षमाणो धनञ्जयात् ॥ १४२ ॥ एतस्मिन्नेव काले तु विजयः शत्रुतापनः। न्यहनत्तावकं सैन्यं शतशोऽथ सहस्रशः। पश्यतस्तस्य वीरस्य तव पुत्रस्य मारिष ॥ १४३ ॥ एवमेष क्षयो वृत्तस्तावकानां परैः सह। क्रूरो विशसनो घोरो राजन् दुर्मन्त्रिते तव ॥ १४४ ॥ संशप्तकांश्च वीभत्सुः कुरूंश्चापि वृकोदरः। वसुषेणश्च पाञ्चालान् क्षणेन व्यधमद्रणे ॥ १४५ ॥ वर्त्तमाने तथा रौद्रे राजन् वीरवरक्षये। उत्थितान्यगणेयानि कबन्धानि समन्ततः ॥ १४६ ॥ युधिष्ठिरोऽपि संग्रामात् प्रहारैर्गाढ़वेदनः। क्रोशमात्रमपक्रम्य तस्थौ भरतसत्तम ॥ १४७ ॥

इति कर्णपर्व्वणि संकुलयुद्धे षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

सञ्जय उवाच। दुर्य्योधनस्ततः कर्णमुपेत्य भरतर्षभ। अब्रवीन्मद्रराजञ्च तथैवान्यांश्च पार्थिवान् ॥ १ ॥ यदृच्छयैतत् संप्राप्तं स्वर्गद्वारमपावृतम्। सुखिनः क्षत्रियाः कर्ण लभन्ते युद्धमीदृशम् ॥ २ ॥ सदृशैः क्षत्रियैः शूरैः शूराणां युद्धतां युधि। इष्टं भवति राधेय तदिदं समुपस्थितम् ॥ ३ ॥ हत्वा वा पाण्डवान् युद्धे स्फीतामुर्वीमवाप्स्यथ। निहता वा परैर्युद्धे वीरलोकमवाप्स्यथ ॥ ४ ॥ दुर्य्योधनस्य तच्छ्रुत्वा वचनं क्षत्रियर्षभाः। हृष्टा नादानुदक्रोशन् वादित्राणि च सर्वशः ॥ ५ ॥ ततः प्रमुदिते तस्मिन् दुर्य्योधनबले तदा। हर्षयंस्तावकान् योधान् द्रौणिर्वचनमब्रवीत् ॥ ६ ॥ प्रत्यक्षं सर्वसैन्यानां भवताञ्चापि पश्यताम्। न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ७ ॥ स तेनाहममर्षेण मित्रार्थे चापि पार्थिवाः। सत्यं वः प्रतिजानामि तद्वाक्यं मे निबोधत ॥ ८ ॥ धृष्टद्युम्नमहत्वाहं न विमोक्ष्यामि दंशनम्। अनृतायां प्रतिज्ञायां न हि स्वर्गमवाप्नुयाम् ॥ ९ ॥ अर्जुनो भीमसेनश्च यश्च मां प्रत्युदिष्यति। सर्वांस्तान् प्रमथिष्येऽहमिति मे नात्र संशयः ॥ १० ॥ एवमुक्ते ततः सर्वा सहिता भारती चमूः। अभ्यद्रवत कौन्तेयांस्तथा ते चापि पाण्डवाः ॥ ११ ॥ स सन्निपातो रथयूथपानां महात्मनां भारत मोहनीयः। जनक्षये कालयुगान्तकल्पः प्रावर्त्तताग्रे कुरुसृञ्जयानाम् ॥ १२ ॥ ततः प्रवृत्ते युधि संप्रहारे भूतानि सर्वाणि सदैवतानि। आसन् समेतानि सहाप्सरोभिर्दिदृक्षमाणानि नरप्रवीरान् ॥ १३ ॥ दिव्यैश्च माल्यैर्विविधैश्च गन्धैर्दिव्यैश्च रत्नैर्विविधैर्नराग्र्यान्। रणे स्वकर्मोद्वहतः प्रवीरानवाकिरन्नप्सरसः प्रहृष्टाः ॥ १४ ॥ समीरणस्तांश्च निषिव्यगन्धान् सिषेव सर्वानपि योधमुख्यान्। निषिव्यमाणास्त्वनिलेन योधाः परस्परघ्ना धरणीं निपेतुः ॥ १५ ॥ सा दिव्यपुष्पैरवकीर्य्यमाणा सुवर्णपुङ्खैश्च शरैर्विचित्रैः। नक्षत्रसङ्घैरिव चित्रिता

यौः चितिर्वभौ योधवरैर्विचित्रा ॥ १६ ॥ ततोऽन्तरीचादपि साधुवादैर्वादित्रघोषैः समुदीर्य्यमाणः । ज्याघोषनेमिस्वननादमिश्रः समाकुलः सोऽभवत् संप्रहारः ॥ १७ ॥

इति कर्णपर्वणि अश्वत्थामप्रतिज्ञायां सप्तपञ्चाशोऽध्यायः ॥५७॥

---

सञ्जय उवाच । एवमेष महानासीत् संग्रामः पृथिवीचिताम् । क्रुद्धेऽर्जुने तथा कर्णे भीमसेने च पाण्डवे ॥ १ ॥ द्रोणपुत्रं पराजित्य जित्वा चान्यान् महारथान् । अब्रवीदर्जुनो राजन् वासुदेवमिदं वचः ॥ २ ॥ पश्य कृष्ण महावाहो द्रवन्तीं पाण्डवीं चमूम् । कर्णञ्च पश्य संग्रामे कालयन्तं महारथान् ॥ ३ ॥ न च पश्यामि दाशार्ह धर्मराजं युधिष्ठिरम् । नापि केतुर्युधां श्रेष्ठ-धर्मपुत्रस्य दृश्यते ॥ ४ ॥ त्रिभागश्चावशिष्टोऽयं दिवसस्य जनार्द्दन । न च मां धार्त्तराष्ट्रेषु कश्चिद्युध्यति संयुगे । तस्मात्त्वं मत्प्रियं कुर्वन् याहि यत्र युधिष्ठिरः ॥ ५ ॥ दृष्ट्वा कुशलिनं युद्धे धर्मपुत्रं सहानुजम् । पुनर्योद्धास्मि वार्ष्णेय शत्रुभिः सह संयुगे ॥ ६ ॥ ततः प्रायाद्रथेनाशु वीभत्सोर्वचनाद्धरिः । यतो युधिष्ठिरो राजा सृञ्जयाश्च महारथाः । अयुध्यन्त महासत्त्वा मृत्युं कृत्वा निवर्त्तनम् ॥ ७ ॥ ततः संग्रामभूमिं तां वर्त्तमाने जनक्षये । अवेक्षमाणो गोविन्दः सव्यसाचिनमब्रवीत् ॥ ८ ॥ पश्य पार्थ महारौद्रो वर्त्तते भरतक्षयः । पृथिव्यां क्षत्रियाणां वै दुर्य्योधनकृते महान् ॥ ९ ॥ पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम् । मृतानामपविद्धानि कलापांश्च महाधनान् ॥ १० ॥ जातरूपमयैः पुङ्खैः शरांश्चानतपर्व्वणः । तैलधौतांश्च नाराचान् निर्मुक्तान् पन्नगानिव ॥ ११ ॥ हस्तिदन्तत्सरून् खड्गान् जातरूपपरिष्कृतान् । चर्म्माणि चापविद्धानि रुक्मगर्भाणि भारत ॥ १२ ॥

सुवर्णविकृतान् प्रासान् शक्तीः कनकभूषणाः। जाम्बूनदमयैः पट्टै-र्बद्धाश्च विपुला गदाः॥ १३॥ जातरूपमयीश्चर्ष्टीः पट्टिशान् हेम-भूषितान्। दण्डैः कनकचित्रैश्च विप्रविद्धान् परश्वधान्॥ १४॥ अयःकुन्तांश्च पतितान् मुषलानि गुरूणि च। शतघ्नीः पश्य चित्राश्च विपुलान् परिघांस्तथा। चक्राणि चापविद्धानि तोम-रांश्च महारणे॥ १५॥ नानाविधानि शस्त्राणि प्रगृह्य जय-गृद्धिनः। जीवन्त इव दृश्यन्ते गतसत्त्वास्तरस्विनः॥ १६॥ गदा-विमथितैर्गात्रैर्मुषलैर्भिन्नमस्तकान्। गजवाजिरथक्षुण्णान् पश्य योधान् सहस्रशः॥ १७॥ मनुष्यहयनागानां शरशक्त्यृष्टिपट्टिशैः। निस्त्रिंशैः परिघैः प्रासैरयःकुन्तैः परश्वधैः॥ १८॥ शरीरै-र्बहुभिश्छिन्नैः शोणितौघपरिप्लुतैः। गतासुभिरमित्रघ्न संवृता रणभूमयः॥ १९॥ बाहुभिश्चन्दनादिग्धैः साङ्गदैर्हेमभूषितैः। सतलत्रैः सकेयूरैर्भाति भारत मेदिनी॥ २०॥ साङ्गुलित्रै-र्भुजाग्रैश्च विप्रविद्धैरलंकृतैः। हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम्॥ २१॥ बद्धचूड़ामणिवरैः शिरोभिश्च सकुण्डलैः। पतितैर्वृषभाक्षाणां विराजति वसुन्धरा॥ २२॥ कबन्धैः शोणिता-दिग्धैश्छिन्नगात्रशिरोधरैः। भूर्भाति भरतश्रेष्ठ शान्तार्चिभि-रिवाग्निभिः॥ २३॥ रथांश्च बहुधा भग्नान् हेमकिङ्किणिनः शुभान्। वाजिनश्च हतान् पश्य विनिकीर्णान् शराहतान्॥ २४॥ अनुकर्षानुपासङ्गान् पताका विविधध्वजान्। रथिनाञ्च महा-शङ्खान् पाण्डरांश्च प्रकीर्णकान्॥ २५॥ निरस्तजिह्वान् मात-ङ्गान् शयानान् पर्वतोपमान्। वैजयन्तीर्विचित्राश्च हतांश्च गज-वाजिनः॥ २६॥ वारणानां परिस्तोमांस्तथैवाजिनकम्बलान्। विपाटितविचित्रांश्च चित्ररूपाः कुथास्तथा॥ २७॥ छिन्नाश्च बहुधा घण्टा महद्भिः पतितैर्गजैः। वैदूर्यदण्डांश्च शुभान् पतिता-नङ्कुशान् भुवि॥२८॥ बद्धाः सादिभुजाग्रेषु सुवर्णविकृताः कशाः।

विचित्रमणिचित्रांश्च जातरूपपरिष्कृतान् । अश्वास्तरपरिस्तोमान्
राङ्कवान् पतितान् भुवि ॥ २९ ॥ चूड़ामणीन्नरेन्द्राणां विचित्राः
काञ्चनस्रजः । छत्राणि चापविद्धानि चामरव्यजनानि च ॥ ३० ॥
चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः । क्लृप्तश्मश्रुभिरत्यर्थं वीराणां
समलंकृतैः । वदनैः पश्य संछन्नां मही शोणितकर्द्दमाम् ॥ ३१ ॥
सजीवांश्चापरान् पश्य कूजमानान् समन्ततः । उपास्यमानान्
बहुशो न्यस्तशस्त्रैर्विशाम्पते । ज्ञातिभिः सहितांस्तत्र रोदमानैः
पुनः पुनः ॥ ३२ ॥ व्युत्क्रान्तानपरान् योधांश्छादयित्वा तरस्विनः ।
पुनर्युद्धाय गच्छन्ति जयगृद्धाः प्रमन्यवः ॥ ३३ ॥ अपरे तत्र तत्रैव
परिधावन्ति मानवाः । ज्ञातिभिः पतितैः शूरैर्याच्यमानास्तथो-
दकम् ॥ ३४ ॥ जलार्थञ्च गताः केचिन्निष्प्राणा बहवोऽर्जुन ।
सन्निवृत्ताश्च ते शूरास्तान् वै दृष्ट्वा विचेतसः ॥ ३५ ॥ जलं त्यक्त्वा
प्रधावन्ति क्रोशमानाः परस्परम् । जलं पीत्वा मृतान् पश्य
पिबतोऽन्यांश्च भारत ॥ ३६ ॥ परित्यज्य प्रियानन्ये बान्धवान्
बान्धवप्रियाः । व्युत्क्रान्ताः समदृश्यन्त तत्र तत्र महारणे ॥ ३७ ॥
तथापरान्नरश्रेष्ठ सन्दष्टौष्ठपुटान् पुनः । भ्रुकुटीकुटिलैर्वक्त्रैः
प्रेक्षमाणान् समन्ततः ॥ ३८ ॥ एवं ब्रुवंस्तदा कृष्णो ययौ तत्र
युधिष्ठिरः । अर्जुनश्चापि नृपतेर्द्दर्शनार्थं महारणे । याहि याहीति
गोविन्दं पुनः पुनरचोदयत् ॥ ३९ ॥ तां युद्धभूमिं पार्थस्य दर्श-
यित्वा च माधवः । त्वरमाणस्ततः कृष्णः पार्थमाह शनैरिदम्
॥ ४० ॥ पश्य कौरवराजानमुपयातांश्च पार्थिवान् । कर्णं पश्य
महारङ्गे ज्वलन्तमिव पावकम् ॥ ४१ ॥ असौ भीमो महेष्वासः
सन्निवृत्तो रणं प्रति । तमेते विनिवर्त्तन्ते धृष्टद्युम्नपुरोगमाः ।
पाञ्चालसृञ्जयानाञ्च पाण्डवानाञ्च ये मुखम् ॥ ४२ ॥ निवृत्तैश्च
पुनः पार्थैर्भग्नं शत्रुबलं महत् । कौरवान् द्रवतो ह्येष कर्णो
कारयतेऽर्जुन ॥ ४३ ॥ अन्तकप्रतिमो वेगी शक्रतुल्यपराक्रमः । असौ

गच्छति कौरव्य द्रौणिः शस्त्रभृतांवर ॥ ४४ ॥ त्वमेव प्रद्रुतं संख्ये धृष्टद्युम्नो महारथः। अनुप्रयाति संग्रामे हतान् पश्य च सृञ्जयान् ॥ ४५ ॥ सर्वमाह सुदुर्द्धर्षो वासुदेवः किरीटिने। ततो राजन् प्रादुरासीन्महाघोरो महारणः ॥ ४६ ॥ सिंहनादरवाश्चैव प्रादुरासन् समागमे। उभयोः सेनयो राजन् मृत्युं कृत्वा निवर्त्तनम् ॥ ४७ ॥ एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते। तावकानां परेषाञ्च राजन् दुर्मन्त्रिते तव ॥ ४८ ॥

इति कर्णपर्वणि कृष्णवाक्ये अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥

---

सञ्जय उवाच। ततः पुनः समाजग्मुरभीताः कुरुसृञ्जयाः। युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वयम् ॥ १ ॥ ततः प्रववृते भीमः संग्रामो लोमहर्षणः। कर्णस्य पाण्डवानाञ्च यमराष्ट्रविवर्द्धनः ॥ २ ॥ तस्मिन् प्रवृत्ते संग्रामे तुमुले शोणितोदके। संशप्तकेषु शूरेषु किञ्चिच्छिष्टेषु भारत ॥ ३ ॥ धृष्टद्युम्नो महाराज सहितः सर्वराजभिः। कर्णमेवाभिदुद्राव पाण्डवाश्च महारथाः ॥ ४ ॥ आगच्छमानांस्तान् संख्ये प्रहृष्टान् विजयैषिणः। दधारैको रणे कर्णो जलौघानिव पर्वतः ॥ ५ ॥ समासाद्य तु ते कर्णं व्यशीर्य्यन्त महारथाः। यथाचलं समासाद्य वार्य्योघाः सर्वतोदिशम् ॥ ६ ॥ तयोरासीन्महाराज संग्रामो लोमहर्षणः। धृष्टद्युम्नस्तु राधेयं शरेणानतपर्वणा। ताड़यामास समरे तिष्ठ तिष्ठेति चाब्रवीत् ॥ ७ ॥ विजयञ्च धनुः श्रेष्ठं विधुन्वानो महारथः। पार्षतस्य धनुश्छित्वा शरांश्चाशीविषोपमान्। ताड़यामास संक्रुद्धः पार्षतं नवभिः शरैः ॥ ८ ॥ ते वर्म हेमविकृतं भित्त्वा तस्य महात्मनः। शोणिताक्ता व्यराजन्त शक्रगोपा इवानघ ॥ ९ ॥तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महारथः। अन्यद्धनु-

समादाय शरांश्चाशीविषोपमान्। कर्णं विव्याध सप्तत्या शरैः सन्नतपर्व्वभिः ॥ १० ॥ तथैव राजन् कर्णोऽपि पार्षतं शत्रुतापनम्। छादयामास समरे शरैराशीविषोपमैः ॥ ११ ॥ द्रोणशत्रुर्महेष्वासो विव्याध निशितैः शरैः ॥ १२ ॥ तस्य कर्णो महाराज शरं कनकभूषणम्। प्रेषयामास संक्रुद्धो मृत्युदण्डमिवापरम् ॥ १३ ॥ तमापतन्तं सहसा घोररूपं विशाम्पते। चिच्छेद सप्तधा राजन् शैनेयः कृतहस्तवत् ॥ १४ ॥ दृष्ट्वा विनिहतं वाणं शरैः कर्णो विशाम्पते। सात्यकिं शरवर्षेण समन्तात् पर्य्यवारयत् ॥ १५ ॥ विव्याध चैनं समरे नाराचैस्तत्र सप्तभिः। तं प्रत्यविध्यच्छैनेयः शरैर्हेमविभूषितैः ॥ १६ ॥ ततो युद्धं महाराज चक्षुःश्रोत्रभयावहम्। आसीद्घोरञ्च चित्रञ्च प्रेक्षणीयं समन्ततः ॥ १७ ॥ सर्व्वेषां तत्र भूतानां रोमहर्षोऽभ्यजायत। तद्दृष्ट्वा समरे कर्म्म कर्णशैनेययोर्नृप ॥ १८ ॥ एतस्मिन्नन्तरे द्रौणिरभ्ययात् सुमहाबलः। पार्षतं शत्रुदमनं शत्रुवीर्य्यासुनाशनम् ॥ १९ ॥ अभ्यभाषत संक्रुद्धो द्रौणिः परपुरञ्जयः। तिष्ठ तिष्ठाद्य ब्रह्मघ्न न मे जीवन् विमोक्ष्यसे ॥ २० ॥ इत्युक्त्वा सुभृशं वीरं शीघ्रकृन्निशितैः शरैः। पार्षतं छादयामास घोररूपैः सुतेजनैः। यतमानं परं शक्त्या यतमानो महारथः ॥ २१ ॥ यथा हि समरे द्रोणः पार्षतं वीक्ष्य मारिष। तथा द्रौणिं रणे दृष्ट्वा पार्षतः परवीरहा। नातिहृष्टमना भूत्वा ज्ञातवान् मृत्युमात्मनः ॥ २२ ॥ स ज्ञात्वा समरेऽऽत्मानं शस्त्रेणावध्यमेव तु। जवेनाभ्यद्रवद्द्रौणिं कालः कालमिव क्षये ॥ २३ ॥ द्रौणिस्तु दृष्ट्वा राजेन्द्र धृष्टद्युम्नमवस्थितम्। क्रोधेन निश्वसन् वीरः पार्षतं समुपाद्रवत् ॥ २४ ॥ तावन्योऽन्यस्तु दृष्ट्वैव संरम्भं जग्मतुः परम् ॥ २५ ॥ अथाब्रवीन्महाराज द्रोणपुत्रः प्रतापवान्। धृष्टद्युम्नं समीपस्थं त्वरमाणो विशाम्पते ॥ २६ ॥ पाञ्चालापसदाद्य त्वां प्रेषयिष्यामि मृत्यवे ॥२७॥

पापं हि यत्त्वया कर्म घ्नता द्रोणं पुरा कृतम्। अद्य त्वां तप्स्यते तद्वै यथा न कुशलं तथा ॥ २८ ॥ अरक्ष्यमाणः पार्थेन यदि तिष्ठति संयुगे। नापक्रामसि वा मूढ़ सत्यमेतद्ब्रवीमि ते ॥ २९ ॥ एवमुक्तः प्रत्युवाच धृष्टद्युम्नः प्रतापवान् ॥ ३० ॥ प्रतिवाक्यं स एवासिर्मामको दास्यते तव। येनैव ते पितुर्दत्तं यतमानस्य संयुगे ॥ ३१ ॥ यदि तावन्मया द्रोणो निहतो ब्राह्मणब्रुवः। त्वामिदानीं कथं युद्धे न हनिष्यामि विक्रमात् ॥ ३२ ॥ एवमुक्त्वा महाराज सेनापतिरमर्षणः। निशितेनाथ वाणेन द्रौणिं विव्याध पार्षतः ॥ ३३ ॥ ततो द्रौणिः सुसंक्रुद्धः शरैः सन्नतपर्वभिः। आच्छादयद्दिशो राजन् धृष्टद्युम्नस्य संयुगे ॥ ३४ ॥ नैवान्तरीक्षं न दिशो नापि योधाः समन्ततः। दृश्यन्त वै महाराज शरैश्छन्नाः सहस्रशः ॥ ३५ ॥ तथैव पार्षतो राजन् द्रौणिमाहवशोभिनम्। शरैः संछादयामास सूतपुत्रस्य पश्यतः ॥ ३६ ॥ राधेयोऽपि महाराज पाञ्चालान् सह पाण्डवैः। द्रौपदेयान् युधामन्युं सात्यकिञ्च महारथम्। एकः संवारयामास प्रेक्षणीयः समन्ततः ॥ ३७ ॥ धृष्टद्युम्नस्तु समरे द्रौणेश्चिच्छेद कार्मुकम्। वेगवत् समरे घोरं शरांश्चाशीविषोपमान् ॥ ३८ ॥ स पार्षतस्य राजेन्द्र धनुः शक्तिं गदां ध्वजम्। हयान् सूतं रथञ्चैव निमेषाद्द्रथमच्छरैः ॥ ३९ ॥ स छिन्नधन्वा विरथो हताश्वो हतसारथिः। खड्गमादत्त विपुलं शतचन्द्रञ्च भानुमत् ॥ ४० ॥ द्रौणिस्तदपि राजेन्द्र भल्लैः क्षिप्रं महारथः। चिच्छेद समरे वीरः क्षिप्रहस्तो दृढ़ायुधः। रथादनवरूढ़स्य तदद्भुतमिवाभवत् ॥ ४१ ॥ धृष्टद्युम्नन्तु विरथं हताश्वं छिन्नकार्मुकम्। शरैश्च वहुधा विद्धमस्त्रैश्च शकलीकृतम्। नाशकद्भरतश्रेष्ठ यतमानो महारथः ॥ ४२ ॥ तस्यान्तमिषुभी राजन् यदा द्रौणिर्न जग्मिवान्। अथ त्यक्त्वा धनुर्वीरः पार्षतं त्वरितोऽन्वगात् ॥ ४३ ॥

आसीद्दाप्लवतो वेगस्तस्य राजन्महात्मनः। गरुड़स्येव पततो जिघृक्षोः पन्नगोत्तमम् ॥ ४४ ॥ एतस्मिन्नेव काले तु माधवोऽर्जुनमब्रवीत्। पश्य पार्थ यथा द्रौणिः पार्षतस्य रथं प्रति। यत्नं करोति विपुलं हन्याच्चैनं न संशयः ॥ ४५ ॥ तं मोचय महाबाहो पार्षतं शत्रुकर्षण। द्रौणेरास्यमनुप्राप्तं मृत्योरास्यगतं यथा ॥ ४६ ॥ एवमुक्त्वा महाराज वासुदेवः प्रतापवान्। प्रैषयत्तुरगांस्तत्र यत्र द्रौणिर्व्यवस्थितः ॥ ४७ ॥ ते हयाश्चन्द्रसङ्काशाः केशवेन प्रचोदिताः। आपिबन्त इव व्योम जग्मुर्द्रौणिरथं प्रति ॥ ४८ ॥ दृष्ट्वायान्तौ महावीर्य्यावुभौ कृष्णधनञ्जयौ। धृष्टद्युम्नवधे यत्नमकरोत् स महाबलः ॥ ४९ ॥ विकृष्यमाणं दृष्ट्वैव धृष्टद्युम्नं जनेश्वर। शरांश्चिक्षेप वै पार्थो द्रौणिं प्रति महाबलः ॥ ५० ॥ ते शरा हेमविकृता गाण्डीवप्रेषिता भृशम्। द्रौणिमासाद्य विविशुर्वल्मीकमिव पन्नगाः ॥ ५१ ॥ स विद्धस्तैः शरैर्घोरैर्द्रौणपुत्रः प्रतापवान्। उत्सृज्य समरे राजन् पाञ्चाल्यममितौजसम् ॥ ५२ ॥ रथमारुरुहे वीरो धनञ्जयशरार्द्दितः। प्रगृह्य च धनुः श्रेष्ठं पार्थं विव्याध सायकैः ॥ ५३ ॥ एतस्मिन्नन्तरे वीरः सहदेवो जनाधिप। अपोवाह रथेनाजौ पार्षतं शत्रुतापनम् ॥ ५४ ॥ अर्जुनोऽपि महाराज द्रौणिं विव्याध पत्रिभिः। तं द्रोणपुत्रः संक्रुद्धो बाह्वोरुरसि चार्पयत् ॥ ५५ ॥ क्रोधितस्तु रणे पार्थो नाराचं कालसम्मितम्। द्रोणपुत्राय चिक्षेप कालदण्डमिवापरम्। ब्राह्मणस्यांसदेशे स निपपात महाद्युतिः ॥५६॥ स विह्वलो महाराज शरवेगेन संयुगे। निषसाद रथोपस्थे वैक्लव्यञ्च परं ययौ ॥ ५७ ॥ ततः कर्णो महाराज व्याक्षिपद्विजयं धनुः। अर्जुनं समरे क्रुद्धः प्रेक्षमाणो मुहुर्मुहुः। द्वैरथञ्चापि पार्थेन कामयानो महारणे ॥ ५८ ॥ विह्वलं तन्तु वीक्ष्याथ द्रोणपुत्रञ्च सारथिः। अपोवाह रथेनाजौ त्वरमाणो रणाजिरात् ॥५९॥

अथोत्क्रुष्टं महाराज पाञ्चालैर्जितकाशिभिः। मोचितं पार्षतं दृष्ट्वा द्रोणपुत्रञ्च पीड़ितम् ॥ ६० ॥ वादित्राणि च दिव्यानि प्रावाद्यन्त सहस्रशः। सिंहनादांश्च चक्रुस्ते दृष्ट्वा संख्ये तदद्भुतम् ॥ ६१ ॥ एवं कृत्वाब्रवीत् पार्थो वासुदेवं धनञ्जयः। याहि संशप्तकान् कृष्ण कार्य्यमेतत् परं मम ॥ ६२ ॥ ततः प्रयातो दाशार्हः श्रुत्वा पाण्डवभाषितम्। रथेनातिपताकेन मनोमारुतरंहसा ॥ ६३॥

इति कर्णपर्वणि द्रौणिपयाने एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

---

सञ्जय उवाच। एतस्मिन्नन्तरे कृष्णः पार्थं वचनमब्रवीत्। दर्शयन्निव कौन्तेयं धर्मराजं युधिष्ठिरम् ॥ १ ॥ एष पाण्डव ते भ्राता धार्त्तराष्ट्रैर्महाबलैः। जिघांसुभिर्महेष्वासैर्द्रुतं पार्थोऽनुसार्य्यते ॥ २ ॥ तञ्चानुयान्ति संरब्धाः पाञ्चाला युद्धदुर्मदाः। युधिष्ठिरं महात्मानं परीप्सन्तो महाबलाः ॥ ३ ॥ एष दुर्य्योधनः पार्थ रथानीकेन दंशितः। राजा सर्वस्य लोकस्य राजानमनुधावति ॥ ४ ॥ जिघांसुः पुरुषव्याघ्र भ्रातृभिः सहितो बली। आशीविषसमस्पर्शैः सर्वयुद्धविशारदैः ॥ ५ ॥ एते जिघृक्षवो यान्ति द्विपाश्वरथपत्तयः। युधिष्ठिरं धार्त्तराष्ट्रा रत्नोत्तममिवार्थिनः ॥ ६ ॥ पश्य सात्वतभीमाभ्यां निरुद्धा विष्ठिताः पुनः। जिहीर्षवोऽमृतं दैत्याः शक्राग्निभ्यामिवावशाः ॥ ७ ॥ एते बहुत्वात्त्वरिताः पुनर्गच्छन्ति पाण्डवम्। समुद्रमिव वार्य्योघाः प्रावृट्काले महारथाः ॥ ८ ॥ नदन्तः सिंहनादांश्च धमन्तश्चापि वारिजान्। बलवन्तो महेष्वासा विधुन्वन्तो धनूंषि च ॥ ९ ॥ मृत्योर्मुखगतं मन्ये कुन्तीपुत्रं युधिष्ठिरम्। हुतमग्नौ च कौन्तेयं दुर्य्योधनवशंगतम् ॥ १० ॥ यथाविधमनीकन्तु धार्त्तराष्ट्रस्य पाण्डव। नास्य शक्रोऽपि मुच्येत संप्राप्तो बाणगोचरम् ॥ ११ ॥ दुर्य्योधनस्य वीरस्य

शरौघान् शीघ्रमस्यतः। सक्रुद्धस्यान्तकस्येव को वेगं संसहेद्रणे
॥ १२ ॥ दुर्य्योधनस्य वीरस्य द्रौणेः शारद्वतस्य च। कर्णस्य
चेषुवेगो वै पर्वतानपि शातयेत् ॥ १३ ॥ कर्णेन च कृतो राजा
विमुखः शत्रुतापनः। बलवांल्लघुहस्तश्च कृती युद्धविशारदः ॥१४॥
राधेयः पाण्डवश्रेष्ठं शक्तः पीड़यितुं रणे। सहितो धृतराष्ट्रस्य
पुत्रैः शूरैर्महाबलैः ॥ १५ ॥ तस्यैभिर्युध्यमानस्य संग्रामे संशिता-
त्मनः। अन्यैरपि च पार्थस्य कृतं कर्म महारथैः ॥ १६ ॥ उप-
वासकृशो राजा भृशं भरतसत्तम। ब्राह्मे बले स्थितो ह्येष न
क्षात्रे हि बले विभुः ॥ १७ ॥ कर्णेन चाभियुक्तोऽयं भूपतिः शत्रु-
तापनः। संशयं समनुप्राप्तः पाण्डवो वै युधिष्ठिरः ॥ १८ ॥ न
जीवति महाराजो मन्ये पार्थ युधिष्ठिरः। यद्भीमसेनः सहते
सिंहनादममर्षणः ॥ १९ ॥ नर्द्दतां धार्त्तराष्ट्राणां पुनः पुनररिं-
दमः। धमताञ्च महाशङ्खान् संग्रामे जितकाशिनाम् ॥ २० ॥
युधिष्ठिरं पाण्डवेयं हतेति पुरुषर्षभ। सञ्चोदयत्यसौ कर्णो
धार्त्तराष्ट्रान् महारथान् ॥ २१ ॥ स्थूणाकर्णेन्द्रजालेन पार्थ पाशु-
पतेन च। प्रच्छादयन्ति राजानं शस्त्रजालैर्महारथाः ॥ २२ ॥
आतुरो हि कृतो राजा सन्निषसास भारत। यथैनमनुवर्त्तन्ते
पाञ्चालाः सह पाण्डवैः ॥ २३ ॥ त्वरमाणास्त्वराकाले सर्वशस्त्र-
भृतांवराः। मज्जन्तमिव पाताले बलिनोऽप्युज्जिहीर्षवः ॥ २४ ॥
न केतुर्दृश्यते राज्ञः कर्णेन निहतः शरैः। पश्यतोर्यमयोः पार्थ
सात्यकेश्च शिखण्डिनः ॥ २५ ॥ धृष्टद्युम्नस्य भीमस्य शतानीकस्य
वा विभो। पाञ्चालानाञ्च सर्वेषां चेदीनाञ्चैव भारत ॥ २६ ॥ एष
कर्णो रणे पार्थ पाण्डवानामनीकिनीम्। शरैर्विध्वंसयति वै
नलिनीमिव कुञ्जरः ॥ २७ ॥ एते द्रवन्ति रथिनस्त्वदीयाः पाण्डु-
नन्दन। पश्य पश्य यथा पार्थ गच्छन्त्येते महारथाः ॥ ३८ ॥
एते भारत मातङ्गाः कर्णेनाभिहता रणे। आर्त्तनादान् विकुर्वाणा

विद्रवन्ति दिशो दश ॥ २९ ॥ रथानां द्रवते वृन्दमेतच्चैव समन्ततः। द्राव्यमाणं रणे पार्थ कर्णेनामित्रकर्षिणा ॥ ३० ॥ हस्तिकक्षां रणे पश्य चरन्तीं तत्र तत्र ह। रथस्थं सूतपुत्रस्य केतुं केतुमतां वर ॥ ३१ ॥ असौ धावति राधेयो भीमसेनरथं प्रति। किरन् शरशतान्येव विनिघ्नंस्तव वाहिनीम् ॥ ३२ ॥ एतांश्च पश्य पाञ्चालान् द्राव्यमानान् महारथान्। शक्रेणेव यथा दैत्यान् हन्यमानान्महाहवे ॥ ३३ ॥ एष कर्णो रणे जित्वा पाञ्चालान् पाण्डुसृञ्जयान्। दिशो वै प्रेक्षते सर्वास्त्वदर्थमिति मे मतिः ॥ ३४ ॥ पश्य पार्थ धनुःश्रेष्ठं विकर्षन् साधु शोभते। शत्रुं जित्वा यथा शक्रो देवसङ्घैः समावृतः ॥ ३५ ॥ एते नर्दन्ति कौरव्या दृष्ट्वा कर्णस्य विक्रमम्। त्रासयन्तो रणे पाण्डून् सृञ्जयांश्च समन्ततः ॥ ३६ ॥ एष सर्वात्मना पाण्डूंस्त्रासयित्वा महारणे। अभिभाषति राधेयः सर्वसैन्यानि मानद ॥ ३७ ॥ अभिद्रवत भद्रं वो द्रुतं द्रवत कौरवाः। यथा जीवन्न वः कश्चिन्मुच्येत युधि सृञ्जयः ॥३८॥ तथा कुरुत संयत्ता वयं यास्याम पृष्ठतः। एवमुक्त्वा गतो ह्येष पृष्ठतो विकिरञ्छरान् ॥ ३९ ॥ पश्य कर्णं रणे पार्थ श्वेतच्छत्रविराजितम्। उदयं पर्वतं यद्वत् शशाङ्केनोपशोभितम् ॥ ४० ॥ पूर्णचन्द्रनिकाशेन मूर्ध्नि छत्रेण भारत। ध्रियमाणेन समरे श्रीमच्छतशलाकिना ॥ ४१ ॥ एष त्वां प्रेक्षते कर्णः सकटाक्षं विशाम्पते। उत्तमं जवमास्थाय ध्रुवमेष्यति संयुगे ॥ ४२ ॥ पश्य ह्येनं महाबाहो विधुन्वानं महद्धनुः। शरांश्चाशीविषाकारान् विसृजन्तं महारणे ॥ ४३ ॥ असौ निवृत्तो राधेयो दृष्ट्वा ते वानरध्वजम्। प्रार्थयन् समरं पार्थ त्वया सह परन्तप। वधाय चात्मनोऽभ्येति दीप्तास्यं शलभो यथा ॥ ४४ ॥ एष ह्यमर्षी शूरश्च धार्त्तराष्ट्रहिते रतः। न त्वां मर्षयते पार्थ नित्यमेव च मन्दधीः ॥ ४५ ॥ कर्णमेकाकिनं दृष्ट्वा रथानीकेन भारत। रिरक्षिषुः

सुसंयत्तो धार्त्तराष्ट्रो निवर्त्तते ॥ ४६ ॥ स वः सर्व्वैर्भिर्दुष्टात्मा बध्यताञ्च प्रयत्नतः । त्वया यशश्च राज्यञ्च सुखञ्चोत्तममिच्छता ॥ ४७ ॥ अहीनयोर्विश्रुतयोर्योत्स्यमानयोः । देवासुरे पार्थ मृधे देवदानवयोरिव ॥ ४८ ॥ त्वाञ्च दृष्ट्वातिसंरब्धं कर्णञ्च भरतर्षभ । असौ दुर्य्योधनः क्रुद्धो नोत्तरं प्रतिपद्यते ॥ ४९ ॥ आत्मनश्च कृतात्मानं समीक्ष्य भरतर्षभ । कृतागसञ्च राधेयं धर्मात्मनि युधिष्ठिरे ॥ ५० ॥ प्रतिपद्यस्व कौन्तेय प्राप्तकालमनन्तरम् । आर्य्यां युद्धे मतिं कृत्वा प्रत्येहि रथयूथपम् ॥ ५१ ॥ पञ्च ह्येतानि मुख्यानां रथानां रथसत्तम । शतान्यायान्ति समरे वलिनां तिग्मतेजसाम् ॥ ५२ ॥ पञ्च नागसहस्राणि द्विगुणा वाजिनस्तथा । अभिसंहत्य कौन्तेय पदातिप्रयुतानि षट् ॥ ५३ ॥ अन्योऽन्यरक्षितं वीर वलं त्वामभिवर्त्तते । सूतपुत्रं महेष्वासं दर्शयात्मानमात्मना । उत्तमं जवमास्थाय प्रत्येहि भरतर्षभ ॥ ५४ ॥ असौ कर्णः सुसंरब्धः पाञ्चालानभिधावति । केतुमस्य हि पश्यामि धृष्टद्युम्नरथं प्रति । समुच्छेत्स्यति पाञ्चालानिति मे धीयते मतिः ॥ ५५ ॥ आचक्षे च प्रियं पार्थ तवेदं भरतर्षभ । राजा जीवति कौरव्यो धर्मराजो युधिष्ठिरः ॥ ५६ ॥ असौ भीमो महावाहुः सन्निवृत्तश्चमूमुखे । वृतः सृञ्जयसैन्येन सात्यकेन च भारत ॥ ५७ ॥ वध्यन्त एते समरे कौरवा निशितैः शरैः । भीमसेनेन कौन्तेय पाञ्चालैश्च महात्मभिः ॥ ५८ ॥ सेना हि धार्त्तराष्ट्रस्य विमुखा विस्रवद्व्रणा । विप्रधावति वेगेन भीमस्य निहता शरैः ॥ ५९ ॥ विपन्नसस्येव मही रुधिरेण समुक्षिता । भारती भरतश्रेष्ठ सेना कृपणदर्शना ॥ ६० ॥ निवृत्तं पश्य कौन्तेय भीमसेनं युधाम्पतिम् । आशीविषमिव क्रुद्धं द्रावयन्तं वरूथिनीम् ॥ ६१ ॥ पीतरक्तासितसिताश्ताराचन्द्रार्कमण्डिताः । पताका विप्रकीर्य्यन्ते छत्राण्येतानि चार्जुन ॥ ६२ ॥ सौवर्णा राजताश्चैव तैजसाश्च पृथग्-

विधाः। कैतवोऽभिनिपात्यन्ते हस्त्यश्वञ्च प्रकीर्यते ॥ ६३ ॥ रथेभ्यः प्रपतन्त्येते रथिनो विगतासवः। नानावर्णैर्हता बाणैः पाञ्चालैरपलायिभिः ॥ ६४॥ निर्मनुष्यान् गजानश्वान्रथांश्चैव धनञ्जय। समाद्रवन्ति पाञ्चाला धार्त्तराष्ट्रांस्तरस्विनः ॥ ६५ ॥ विमृद्नन्ति नरव्याघ्रो भीमसेनबलाश्रयात्। बलं परेषां दुर्द्धर्षास्त्यक्त्वा प्राणानरिन्दम ॥ ६६ ॥ एते नर्दन्ति पाञ्चाला ध्मापयन्ति च वारिजान्। अभिद्रवन्ति च रणे मृद्नन्तः सायकैः परान् ॥ ६७॥ पश्यस्वैषाञ्च माहात्म्यं पाञ्चाला हि पराक्रमात्। धार्त्तराष्ट्रान् विनिघ्नन्ति क्रुद्धाः सिंहा इव द्विपान् ॥ ६८ ॥ अस्त्रमाच्छिद्य शत्रूणां सायुधानां निरायुधाः। तेनैवैतानमोघास्त्रान्निघ्नन्ति च नर्दन्ति च ॥ ६९ ॥ शिरांस्येतानि पात्यन्ते शत्रूणां बाहवोऽपि च। रथनागहया वीरा यशस्याः सर्व एव च ॥ ७० ॥ सर्वतश्चाभिपन्नैषा धार्त्तराष्ट्री महाचमूः। पाञ्चालैर्मानसादेत्य हंसैर्गङ्गेव वेगितैः ॥ ७१ ॥ सुभृशञ्च पराक्रान्ताः पाञ्चालानां निवारणे। कृपकर्णादयो वीरा ऋषभाणामिवर्षभाः ॥ ७२ ॥ सुनिमग्नांश्च भीमास्त्रे धार्त्तराष्ट्रान् महारथान्। धृष्टद्युम्नमुखा वीरा घ्नन्ति शत्रून् सहस्रश ॥ ७३ ॥ पाञ्चालेष्वभिभूतेषु द्विषद्भिरपभीर्नदन्। शत्रुपक्षमवस्कन्द्य शरानस्यति मारुतिः ॥ ७४ ॥ विषण्णभूयिष्ठतरा धार्त्तराष्ट्री महाचमूः। रथाश्वेभाः सुवित्रस्ता भीमसेनभयार्द्दिताः ॥ ७५ ॥ पश्य भीमेन नाराचैर्भिन्ना नागाः पतन्त्यमी। वज्रिवज्रहतानीव शिखराणि धराभृताम् ॥ ७६ ॥ भीमसेनस्य निर्विद्धा बाणैः सन्नतपर्वभिः। स्वान्यनीकानि मृद्नन्तो द्रवन्त्येते महागजाः ॥ ७७ ॥ नाभिजानासि भीमस्य सिंहनादं सुदुःसहम्। नदतोऽर्ज्जुन संग्रामे भैरवं जितकाशिनः ॥ ७८ ॥ एष नैषादिरभ्येति द्विपमुख्येन पाण्डवम्। जिघांसुस्तोमरैः क्रुद्धो दण्डपाणिरिवान्तकः ॥ ७९ ॥ सतोमरावस्य भुजौ छिन्नौ भीमेन

गर्ज्जतः। तीक्ष्णैरग्निरविप्रख्यैर्नाराचैर्द्दशभिर्हतः। हत्वैनं पुनरायाति नागानन्यान् प्रहारिणः ॥ ८० ॥ पश्य नीलाम्बुदनिभान् महामात्रैरधिष्ठितान्। शक्तितोमरसङ्घातैर्विनिघ्नन्तं वृकोदरम्। सप्तसप्त च नागांस्तान् वैजयन्तीश्च सध्वजाः ॥ ८१ ॥ निहत्य निशितैर्वाणैश्छिन्नाः पार्थाग्रजेन ते। दशभिर्द्दशभिश्चैको नाराचैर्निहतो गजः ॥ ८२ ॥ न चासौ धार्त्तराष्ट्राणां श्रूयते निनदस्तथा। पुरन्दरसमे युद्धे निवृत्ते भरतर्षभ ॥ ८३ ॥ अक्षौहिण्यस्तथा तिस्रो धार्त्तराष्ट्रस्य संहताः। क्रुद्धेन नरसिंहेन भीमसेनेन वारिताः ॥ ८४ ॥

सञ्जय उवाच। भीमसेनेन तत् कर्म कृतं दृष्ट्वा सुदुष्करम्। अर्जुनो व्यधमच्छिष्टानहितान्निशितैः शरैः ॥ ८५ ॥ ते बध्यमानाः समरे संशप्तकगणाः प्रभो। प्रभग्नाः समरे भीता दिशो दश महाबलाः। शक्रस्यातिथितां गत्वा विशोका ह्यभवंस्तदा ॥ ८६ ॥ पार्थश्च पुरुषव्याघ्र शरैः सन्नतपर्वभिः। जघान धार्त्तराष्ट्रस्य चतुर्विधबलाञ्चमूम् ॥ ८७ ॥

इति कर्णपर्व्वणि संकुलयुद्धे षष्टितमोऽध्यायः ॥ ६० ॥

---

धृतराष्ट्र उवाच। निवृत्ते भीमसेने तु पाण्डवे च युधिष्ठिरे। बध्यमाने बले चापि मामके पाण्डसृञ्जयैः ॥ १ ॥ द्रवमाने बलौघे च निरानन्दे मुहुर्मुहुः। किमकुर्वन्त कुरवस्तन्ममाचक्ष्व सञ्जय ॥२॥

सञ्जय उवाच। दृष्ट्वा भीमं महाबाहुं सूतपुत्रः प्रतापवान्। क्रोधरक्तेक्षणो राजन् भीमसेनमुपाद्रवत् ॥ ३ ॥ तावकन्तु बलं दृष्ट्वा भीमसेनात् पराङ्मुखम्। यत्नेन महता राजन् पर्य्यवस्थापयद्बली ॥ ४ ॥ व्यवस्थाप्य महाबाहुस्तव पुत्रस्य वाहिनीम्। प्रत्युद्ययौ तदा कर्णः पाण्डवान् युद्धदुर्मदान् ॥ ५ ॥ प्रत्युद्ययुस्तु

राधेयं पाण्डवानां महारथाः। धुन्वानाः कार्मुकाण्याजौ विक्षि-
पन्तश्च सायकान् ॥ ६ ॥ भीमसेनः शिनेर्नप्ता शिखण्डी जनमेजयः।
धृष्टद्युम्नश्च बलवान् सर्वे चापि प्रभद्रकाः ॥ ७ ॥ पाञ्चालाश्च
नरव्याघ्राः समन्तात्तव वाहिनीम्। अभ्यद्रवन्त संक्रुद्धाः समरे
जितकाशिनः ॥ ८ ॥ तथैव तावका राजन् पाण्डवानामनीकिनीम्।
अभ्यद्रवन्त त्वरिता जिघांसन्तो महारथाः ॥ ९ ॥ रथनागाश्व-
कलिलं पत्तिध्वजसमाकुलम्। बभूव पुरुषव्याघ्र सैन्यमद्भुत-
दर्शनम् ॥ १० ॥ शिखण्डी तु ययौ कर्णं धृष्टद्युम्नः सुतं तव।
दुःशासनं महाराज महत्या सेनया वृतः ॥ ११ ॥ नकुलो वृष-
सेनन्तु चित्रसेनं युधिष्ठिरः। उलूकं समरे राजन् सहदेव सम-
भ्ययात् ॥ १२ ॥ सात्यकि शकुनिञ्चापि द्रौपदेयाश्च कौरवान्।
अर्जुनञ्च रणे यत्तो द्रोणपुत्रो महारथः ॥ १३ ॥ युधामन्युं महे-
ष्वासं गौतमोऽभ्यपतद्रणे। कृतवर्मा च बलवानुत्तमौजसमाद्रवत्
॥ १४ ॥ भीमसेनः कुरून् सर्वान् पुत्रांश्च तव मारिष। सहा-
नीकान्महाबाहुरेक एव न्यवारयत् ॥ १५ ॥ शिखण्डी तु ततः
कर्णं विचरन्तमभीतवत्। भीष्महन्ता महाराज वारयामास
पत्रिभिः ॥ १६ ॥ प्रतिरुद्धस्ततः कर्णो रोषात् प्रस्फुरिताधरः।
शिखण्डिनं त्रिभिर्बाणैर्भ्रुवोर्मध्येऽभ्यताड़यत् ॥ १७ ॥ धार-
यंस्तु स तान् बाणान् शिखण्डी बह्वशोभत। राजतः पर्वतो
यद्वत्त्रिभिः शृङ्गैरिवोच्छ्रितैः ॥ १८ ॥ सोऽतिविद्धो महेष्वासः सूत-
पुत्रेण संयुगे। कर्णं विव्याध समरे नवत्या निशितैः शरैः ॥ १९ ॥
तस्य कर्णं हयान् हत्वा सारथिञ्च त्रिभिः शरैः। उन्ममाथ
ध्वजञ्चास्य क्षुरप्रेण महारथः ॥ २० ॥ हताश्वात्तु ततो यानादव-
प्लुत्य महारथः। शक्तिं चिक्षेप कर्णाय संक्रुद्धः शत्रुतापनः ॥ २१ ॥
तां छित्त्वा समरे कर्णस्त्रिभिर्भारत सायकैः। शिखण्डिनमथा-
विध्यन्नवभिर्निशितैः शरैः ॥ २२ ॥ कर्णचापच्युतान् बाणान्

वर्ज्जयस्तु नरोत्तमः । अपयातस्ततस्तूर्णं शिखण्डी भृशविक्षतः
॥ २३ ॥ ततः कर्णो महाराज पाण्डुसैन्यान्यपातत् । तूलराशिं
समासाद्य यथा वायुर्महाबलः ॥ २४ ॥ धृष्टद्युम्नो महाराज तव
पुत्त्रेण पीड़ितः । दुःशासनं त्रिभिर्वाणैः प्रत्यविध्यत् स्तनान्तरे
॥ २५ ॥ तस्य दुःशासनो वाहुं सव्यं विव्याध मारिष । शितेन
रुक्मपुङ्खेण भल्लेनानतपर्व्वणा ॥ २६ ॥ धृष्टद्युम्नस्तु निर्व्विद्धः शरं
घोरममर्षणः । दुःशासनाय संक्रुद्धः प्रेषयामास भारत ॥ २७ ॥
आपतन्तं महावेगं धृष्टद्युम्नसमीरितम् । शरैश्चिच्छेद पुत्त्रस्ते
त्रिभिरेव विशाम्पते ॥ २८ ॥ अथापरैः सप्तदशैर्भल्लैः कनकभूषणैः ।
धृष्टद्युम्नं समासाद्य वाह्वोरुरसि चार्पयत् ॥ २९ ॥ ततः स
पार्षतः क्रुद्धो धनुश्चिच्छेद मारिष । क्षुरप्रेण सुतीक्ष्णेन तत
उच्चुक्रुशुर्ज्जनाः ॥ ३० ॥ अथान्यद्धनुरादाय पुत्त्रस्ते प्रहसन्निव ।
धृष्टद्युम्नं शरव्रातैः समन्तात् पर्य्यवारयत् ॥ ३१ ॥ तव पुत्त्रस्य ते
दृष्ट्वा विक्रमं सुमहात्मनः । व्यस्मयन्त रणे योधाः सिद्धाश्चाप्सरस-
स्तथा ॥ ३२ ॥ धृष्टद्युम्नमपश्याम घटमानं महावलम् । दुःशा-
सनेन संरुद्धं सिंहेनेव महाद्विपम् ॥ ३३ ॥ ततः सरथनागाश्वाः
पाञ्चालाः पाण्डुपूर्व्वज । सेनापतिं परीप्सन्तो रुरुधुस्तनयं तव
॥ ३४ ॥ ततः प्रववृते युद्धं तावकानां परैः सह । घोरं प्राण-
भृतां काले भीमरूपं परन्तप ॥ ३५ ॥ नकुलं वृषसेनस्तु भित्त्वा
पञ्चभिरायसैः । पितुः समीपे तिष्ठन् वै त्रिभिरन्यैरविध्यत ॥ ३६ ॥
नकुलस्तु ततः शूरो वृषसेनं हसन्निव । नाराचेन सुतीक्ष्णेन
विव्याध हृदये भृशम् ॥ ३७ ॥ सोऽतिविद्धो वलवता शत्रुणा शत्रु-
मर्षणः । शत्रुं विव्याध विंशत्या स च तं पञ्चभिः शरैः ॥ ३८ ॥
ततः शरसहस्रेण तावुभौ पुरुषर्षभौ । आच्छादयेतामन्योऽन्य-
मथाभज्यत वाहिनी ॥ ३९ ॥ दृष्ट्वा तु प्रद्रुतां सेनां धार्त्तराष्ट्रस्य
सूतजः । निवारयामास वलादनुसृत्य विशाम्पते ॥ ४० ॥ निवृत्ते

तु ततः कर्णं नकुलः कौरवान् ययौ। कर्णपुत्रस्तु समरे हित्वा नकुलमेव तु। जुगोप चक्रं त्वरितो राधेयस्यैव मारिष ॥ ४१ ॥ उलूकस्तु रणे क्रुद्धः सहदेवेन वारितः ॥ ४२ ॥ तस्याश्वांश्चतुरो हत्वा सहदेवः प्रतापवान्। सारथिं प्रेषयामास यमस्य सदनं प्रति ॥ ४३ ॥ उलूकस्तु ततो यानादवप्लुत्य विशाम्पते। त्रिगर्त्तानां बलं तूर्णं जगाम पितृनन्दनः ॥ ४४ ॥ सात्यकिः शकुनिं विद्धा विंशत्या निशितैः शरैः। ध्वजं चिच्छेद भल्लेन सौबलस्य हसन्निव ॥ ४५ ॥ सौबलस्तस्य समरे क्रुद्धो राजन् प्रतापवान्। विदार्य्य कवचं भूयो ध्वजं चिच्छेद काञ्चनम् ॥ ४६ ॥ अथैनं निशितैर्बाणैः सात्यकिः प्रत्यविध्यत। सारथिञ्च महाराज त्रिभिरेव समार्पयत। अथास्य वाहांस्त्वरितः शरैर्निन्ये यमक्षयम् ॥ ४७ ॥ ततोऽवप्लुत्य सहसा शकुनिर्भरतर्षभ। आरुरोह रथं तूर्णमुलूकस्य महारथः। अपोवाहाथ शीघ्रं स शैनेयाद्युद्धशालिनः ॥ ४८ ॥ सात्यकिस्तु रणे राजंस्तावकानामनीकिनीम्। अभिदुद्राव वेगेन ततोऽनीकमभज्यत ॥ ४९ ॥ शैनेयशरसंछन्नं तव सैन्यं विशाम्पते। भेजे दश दिशस्तूर्णं न्यपतच्च गतासुवत् ॥ ५० ॥ भीमसेनं तव सुतो वारयामास संयुगे। तन्तु भीमो मुहूर्त्तेन व्यश्वसूतरथध्वजम् ॥ ५१ ॥ चक्रे लोकेश्वरं तत्र तेनातुष्यन्त वै जनाः। ततोऽपायान्नृपस्तत्र भीमसेनस्य गोचरात् ॥५२॥ कुरुसैन्यं ततः सर्वं भीमसेनमुपाद्रवत्। तत्र नादो महानासीद्भीमसेनं जिघांसताम् ॥ ५३ ॥ युधामन्युः कृपं विद्धा धनुरस्याशु चिच्छिदे। अान्यद्धनुरादाय कृपः शस्त्रभृतांवरः ॥ ५४ ॥ युधामन्योर्ध्वजं सूतं छत्रञ्चापातयत् क्षितौ। ततोऽपायाद्रथेनैव युधामन्युर्महारथः ॥ ५५ ॥ उत्तमौजाश्च हार्द्दिक्यं भीमं भीमपराक्रमम्। छादयामास सहसा वृष्ट्या मेघ इवाचलम् ॥ ५६ ॥ तद्युद्धं सुमहच्चासीद्घोररूपं परन्तप। यादृशं न मया युद्धं

दृष्टपूर्वं विशाम्पते ॥ ५७ ॥ कृतवर्म्मा ततो राजन्नमितौजसमा-हवे। हृदि विव्याध सहसा स रथोपस्थ आविशत् ॥ ५८ ॥ सारथिस्तमपोवाह रथेन रथिनां वरम्। कुरुसैन्यं ततः सर्वं भीमसेनमुपाद्रवत् ॥ ५९ ॥ दुःशासनः सौबलश्च गजानीकेन पाण्डवम्। महता परिवार्य्यैव क्षुद्रकैरभ्यताड़यत् ॥ ६० ॥ ततो भीमः शरशतैर्दुर्य्योधनममर्षणम्। विमुखीकृत्य तरसा गजा-नीकमुपाद्रवत् ॥ ६१ ॥ तमापतन्तं सहसा गजानीकं वृकोदरः। दृष्ट्वैव सुभृशं क्रुद्धो दिव्यमस्त्रमुदैरयत्। गजैर्गजानभ्यहनद्वज्रे-षेन्द्र इवासुरान् ॥ ६२ ॥ ततोऽन्तरीक्षं बाणौघैः शलभैरिव पावकम्। छादयामास समरे गजान्निघ्नन् वृकोदरः ॥ ६३ ॥ ततः कुञ्जरयूथानि समेतानि सहस्रशः। व्यधमत्तरसा भीमो मेघसङ्घानिवानिलः ॥ ६४ ॥ सुवर्णजालपिहिता मणिजालैश्च कुञ्जराः। रेजुरभ्यधिकं सङ्ख्ये विद्युत्वन्त इवाम्बुदाः ॥ ६५ ॥ ते वध्यमाना भीमेन गजा राजन् विदुद्रुवुः। केचिद्विभिन्नहृदयाः कुञ्जरा न्यपतन् भुवि ॥ ६६ ॥ पतितैर्निपतद्भिश्च गजैर्हेमविभू-षितैः। अशोभत मही तत्र विशीर्णैरिव पर्वतैः ॥ ६७ ॥ दीप्तांशैं रत्नवद्भिश्च पतितैर्गजयोधिभिः। रराज भूमिः पतितैः क्षीण-पुण्यैरिव ग्रहैः ॥ ६८ ॥ तत्र भिन्नकटा नागा भिन्नकुम्भकरा-स्तथा। दुद्रुवुः शतशः सङ्ख्ये भीमसेनशराहताः ॥ ६९ ॥ केचि-द्वमन्तो रुधिरं भयार्त्ताः सर्वतोपमाः। व्यद्रवन् शरविद्धाङ्गा धातुचित्रा इवाचलाः ॥ ७० ॥ महाभुजगसङ्काशौ चन्दनागुरु-रूषितौ। अपश्यन् भीमसेनस्य धनुर्विक्षिपतो भुजौ ॥ ७१ ॥ तस्य ज्यातलनिर्घोषं श्रुत्वाशनिसमस्वनम्। विमुञ्चन्तः शकृन्मूत्रं गजाः प्राद्रवुर्भृशम् ॥ ७२ ॥ भीमसेनस्य तत् कर्म राजन्नेकस्य धीमतः। निघ्नतः सर्वभूतानि रुद्रस्येव च निर्बभौ ॥ ७३ ॥

इति कर्णपर्वणि संकुलयुद्धे एकषष्टोऽध्यायः ॥ ६१ ॥

सञ्जय उवाच। ततः श्वेताश्वसंयुक्ते नारायणसमाहिते। तिष्ठन्रथवरे श्रीमानर्जुनः समपद्यत ॥ १ ॥ तद्बलं नृपतिश्रेष्ठ तावकं विजयो रणे। व्यक्षोभयदुदीर्णाश्वं महोदधिमिवानिलः ॥ २ ॥ दुर्योधनस्तव सुतः प्रमत्ते श्वेतवाहने। अभ्येत्य सहसा क्रुद्धः सैन्यार्द्धेनाभिसंवृतः। पर्य्यवारयदायान्तं युधिष्ठिरममर्षणम् ॥ ३ ॥ क्षुरप्राणां त्रिसप्तत्या ततोऽविध्यत पाण्डवम्। अक्रुध्यत भृशं तत्र कुन्तीपुत्रो युधिष्ठिरः ॥ ४ ॥ स भल्लांस्त्रिंशतस्तूर्णं तव पुत्रे न्यवेशयत्। ततोऽधावन्त कौरव्या जिघृक्षन्तो युधिष्ठिरम् ॥ ५ ॥ दुष्टभावान् परान् ज्ञात्वा समवेता महारथाः। आजग्मुस्तं परीप्सन्तः कुन्तीपुत्रं युधिष्ठिरम् ॥ ६ ॥ नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः। अक्षौहिण्या परिवृतास्तेऽभ्यधावन् युधिष्ठिरम् ॥ ७ ॥ भीमसेनश्च समरे मृद्नंस्तव महारथान्। अभ्यधावदभिप्रेप्सू राजानं शत्रुनिर्ज्जितम् ॥ ८ ॥ तांस्तु सर्वान्महेष्वासान् कर्णो वैकर्त्तनो नृपः। शरवर्षेण महता प्रत्यवारयदागतान् ॥ ९ ॥ शरौघान् विसृजन्तस्ते प्रेरयन्तश्च तोमरान्। न शेकुर्यत्नवन्तोऽपि राधेयं प्रतिवीक्षितुम् ॥ १० ॥ तांश्च सर्वान्महेष्वासान् सर्वशस्त्रास्त्रपारगः। महता शरवर्षेण राधेयः प्रत्यवारयत् ॥ ११ ॥ दुर्य्योधनन्तु विंशत्या शीघ्रमस्त्रमुदीरयन्। अविध्यत्तूर्णमभ्येत्य सहदेवो महामनाः ॥ १२ ॥ स विद्धः सहदेवेन रराजाचलसन्निभः। प्रभिन्न इव मातङ्गो रुधिरेण परिप्लुतः ॥ १३ ॥ दृष्ट्वा तव सुतं तत्र गाढ़विद्धं सुतेजनैः। अभ्यधावत संक्रुद्धो राधेयो रथिनां वरः ॥ १४ ॥ दुर्य्योधनं तथा दृष्ट्वा शीघ्रमस्त्रमुदीर्य्य सः। तेन यौधिष्ठिरं सैन्यमवधीत् पार्षतं तथा ॥ १५ ॥ ततो यौधिष्ठिरं सैन्यं वध्यमानं महात्मना। सहसा प्राद्रवद्राजन् सूतपुत्रशरार्द्दितम् ॥ १६ ॥ विविधा विशिखास्तत्र संपतन्तः परस्परम्। फलैः पुङ्खान् समाजघ्नुः सूतपुत्रधनुश्च्युताः

॥ १७ ॥ अन्तरीक्षे शरौघाणां पततां परस्परम्। सङ्घर्षाच्च महाराज पावकः समजायत ॥ १८ ॥ ततो दश दिशः कर्णः शलभैरिव यायिभिः। अभ्यघ्नंस्तरसा राजन् शरैः परशरीरगैः ॥ १९ ॥ रक्तचन्दनसन्दिग्धौ मणिहेमविभूषितौ। बाहू व्यत्यक्षिपत् कर्णः परमास्त्रं विदर्शयन् ॥ २० ॥ ततः सर्वा दिशो राजन् सायकैर्विप्रमोहयन्। अपीड़यद्भृशं कर्णो धर्मराजं युधिष्ठिरम् ॥ २१ ॥ ततः क्रुद्धो महाराज धर्मपुत्रो युधिष्ठिरः। निशितैरिषुभिः कर्णं पञ्चाशद्भिः समार्पयत् ॥ २२ ॥ वाणान्धकारमभवत्तद्युद्धः घोरदर्शनम्। हाहाकारो महानासीत्तावकानां विशाम्पते ॥ २३ ॥ वध्यमाने यथा सैन्ये धर्मपुत्रेण मारिष। सायकैर्विविधैस्तीक्ष्णैः कङ्कपत्रैः शिलाशितैः। भल्लैरनेकैर्विविधैः शक्त्यृष्टिमुषलैरपि ॥ २४ ॥ यत्र यत्र स धर्मात्मा दुष्टां दृष्टिं व्यसर्ज्जयत्। तत्र तत्र व्यशीर्य्यन्त तावका भरतर्षभ ॥ २५ ॥ कर्णोऽपि भृशसंक्रुद्धो धर्मराजं युधिष्ठिरम्। नाराचैरर्द्धचन्द्रैश्च वत्सदन्तैश्च संयुगे ॥ २६ ॥ अमर्षी क्रोधनश्चैव रोषप्रस्फुरिताननः। सायकैरप्रमेयात्मा युधिष्ठिरमुपाद्रवत्। युधिष्ठिरश्चापि स तं स्वर्णपुङ्खैः शिलाशितैः ॥ २७ ॥ प्रहसन्निव तं कर्णः कङ्कपत्रैः शिलाशितैः। उरस्यविध्यद्राजानं त्रिभिर्भल्लैश्च पाण्डवम् ॥ २८ ॥ स पीड़ितो भृशं तेन धर्मराजो युधिष्ठिरः। उपविश्य रथोपस्थे सूतं याहीत्यचोदयत् ॥ २९ ॥ प्राक्रोशन्त ततः सर्वे धार्त्तराष्ट्राः सराजकाः। गृह्णीध्वमिति राजानमभ्यधावन्त सर्व्वशः ॥ ३० ॥ ततः शताः सप्तदश कैकेयानां प्रहारिणाम्। पाञ्चालैः सहिता राजन् धार्त्तराष्ट्रानवारयन् ॥ ३१ ॥ तस्मिंस्तु तुमुले युद्धे वर्त्तमाने महाभये। दुर्य्योधनश्च भीमश्च समेयातां महाबलौ ॥ ३२ ॥

इति कर्णपर्वणि संकुलयुद्धे द्विषष्टोऽध्यायः ॥ ६२ ॥

सञ्जय उवाच। कर्णोऽपि शरजालेन कैकेयानां महारथान्।
व्यधमत् परमेष्वासानग्रतः पर्य्यवस्थितान् ॥ १ ॥ स तेषां यत-
मानानां राधेयस्य निवारणे। रथान् पञ्चशतान् कर्णः प्राहिणो-
द्यमसादनम् ॥ २ ॥ अविषह्यं ततो दृष्ट्वा राधेयं युधि योधिनः।
भीमसेनमुपागच्छन् कर्णबाणप्रपीड़िताः ॥ ३ ॥ रथानीकं विदा-
र्य्यैव शरजालैरनेकधा। कर्ण एकरथेनैव युधिष्ठिरमुपाद्रवत् ॥४॥
सेनानिवेशमार्च्छन्तं मार्गणैः क्षतविक्षतम्। यमयोर्मध्यगं वीरं
शनैर्यान्तं विचेतसम् ॥ ५ ॥ समासाद्य तु राजानं दुर्य्योधन-
हितेप्सया। सूतपुत्रस्त्रिभिस्तीक्ष्णैर्विव्याध परमेषुभिः ॥ ६ ॥
तथैव राजा राधेयं प्रत्यविध्यत् स्तनान्तरे। शरैस्त्रिभिश्च यन्तारं
चतुर्भिश्चतुरो हयान् ॥ ७ ॥ चक्ररक्षौ तु पार्थस्य माद्रीपुत्रौ
परन्तपौ। तावप्यधावतां कर्णं राजानं मा वधीदिति ॥ ८ ॥ तौ
पृथक् शरवर्षाभ्यां राधेयमभ्यवर्षताम्। नकुलः सहदेवश्च परमं
यत्नमास्थितौ ॥ ९ ॥ तथैव तौ प्रत्यविध्यत् सूतपुत्रः प्रतापवान्।
भल्लाभ्यां शितधाराभ्यां महात्मानावरिन्दमौ ॥ १० ॥ दन्तवर्णांस्तु
राधेयो निजघान मनोजवान्। युधिष्ठिरस्य संग्रामे कालवालान्
हयोत्तमान् ॥ ११ ॥ ततोऽपरेण भल्लेन शिरस्त्राणमपातयत्।
कौन्तेयस्य महेष्वासः प्रहसन्निव सूतजः ॥ १२ ॥ तथैव नकुल-
स्यापि हयान् हत्वा प्रतापवान्। ईषां धनुश्च चिच्छेद माद्री-
पुत्रस्य धीमतः ॥ १३ ॥ तौ हताश्वौ हतरथौ पाण्डवौ भृश-
विक्षतौ। भ्रातरावारुरुहतुः सहदेवरथं तदा ॥ १४ ॥ तौ दृष्ट्वा
मातुलस्तत्र विरथौ परवीरहा। अभ्यभाषत राधेयं मद्रराजो-
ऽनुकम्पया ॥ १५ ॥ योद्धव्यमद्य पार्थेन फाल्गुनेन त्वया सह।
किमर्थं धर्मराजेन युध्यसे भृशरोषितः ॥ १६ ॥ क्षीणशस्त्रास्त्र-
कवचः क्षीणबाणो विबाणधिः। श्रान्तसारथिवाहश्च छन्नोऽस्त्रै-
ररिभिस्तथा। पार्थमासाद्य राधेय उपहास्यो भविष्यसि ॥ १७ ॥

एवमुक्तोऽपि कर्णस्तु मद्रराजेन संयुगे। तथैव कर्णः संरब्धो युधिष्ठिरमताड़यत् ॥ १८ ॥ शरैस्तीक्ष्णैः पराविध्यन्माद्रीपुत्रौ च पाण्डवौ। प्रहस्य समरे कर्णश्चकार विमुखं शरैः ॥ १९ ॥ ततः शल्यः प्रहस्येदं कर्णं पुनरुवाच ह। रथस्थमतिसंरब्धं युधिष्ठिर-वधे धृतम् ॥ २० ॥ यदर्थं धार्त्तराष्ट्रेण सततं मानितो भवान् ॥ तं पार्थं जहि राधेय किन्ते हत्वा युधिष्ठिरम् ॥ २१ ॥ शङ्खयो-र्ध्मातयोः शब्दः सुमहानेष कृष्णयोः। श्रूयते चापघोषोऽयं प्रावृ-षीवाम्बुदस्य ह ॥ २२ ॥ असौ निघ्नन्रथोदारानर्जुनः शरवृष्टिभिः। सर्वां ग्रसति नः सेनां कर्ण पश्यैनमाहवे ॥ २३ ॥ पृष्ठरक्षौ च शूरस्य युधामन्यूत्तमौजसौ। उत्तरञ्चास्य वै शूरश्चक्रं रक्षति सात्यकिः ॥ २४ ॥ धृष्टद्युम्नस्तथा चास्य चक्रं रक्षति दक्षिणम्। भीमसेनस्तु वै राज्ञा धार्त्तराष्ट्रेण युध्यते ॥ २५ ॥ यथा न हन्यात्तं भीमः सर्वेषां नोऽद्य पश्यताम्। तथा राधेय क्रियतां राजा मुच्येत नो यथा ॥ २६ ॥ पश्यैनं भीमसेनेन ग्रस्तमाहव-शोभिना। यदि त्वासाद्य मुच्येत विस्मयः सुमहान् भवेत् ॥ २७ ॥ परित्रास्वैनमभ्येत्य संशयं परमं गतम्। किन्नु माद्रीसुतौ हत्वा राजानं वा युधिष्ठिरम् ॥ २८ ॥ इति शल्यवचः श्रुत्वा राधेयः पृथिवीपते। दृष्ट्वा दुर्य्योधनञ्चैव भीमग्रस्तं महाहवे ॥ २९ ॥ राजगृद्धी भृशञ्चैव शल्यवाक्यप्रचोदितः। अजातशत्रुमुत्सृज्य माद्री-पुत्रौ च पाण्डवौ ॥ ३० ॥ तव पुत्रं परित्रातुमभ्यधावत वीर्य्य-वान्। मद्रराजप्रणुदितैरश्वैराकाशगैरिव ॥ ३१ ॥ गते कर्णे तु कौन्तेयः पाण्डुपुत्रो युधिष्ठिरः। अपायाज्जवनैरश्वैः सहदेवस्य मारिष ॥ ३२ ॥ ताभ्यां स सहितस्तूर्णं व्रीड़न्निव नरेश्वरः। प्राप्य सेनानिवेशञ्च मार्गणैः क्षतविक्षतः ॥ ३३ ॥ अवतीर्य्य रथा-त्तूर्णमाविशच्छयनं शुभम्। अपनीतशल्यः सुभृशं हृच्छल्याभि-निपीड़ितः ॥ ३४ ॥ सोऽब्रवीद्भ्रातरौ राजा माद्रीपुत्रौ महारथौ

अनीकं भीमसेनस्य पाञ्चालाश्च गच्छताम् ॥ ३५ ॥ जीमूत इव नर्दंस्तु युध्यते स वृकोदरः ॥ ३६ ॥ ततोऽन्यं रथमास्थाय नकुलो रथपुङ्गवः। सहदेवश्च तेजस्वी भ्रातरौ शत्रुकर्षणौ ॥ ३७ ॥ तुरगैरग्र्यरंहोभिर्यात्वा भीमस्य शुष्मिणौ। अनीकं सहितौ तत्र भ्रातरौ पर्य्यवस्थितौ ॥ ३८ ॥

इति कर्णपर्वणि युधिष्ठिरापयाने त्रिषष्टोऽध्यायः ॥ ६३ ॥

---

सञ्जय उवाच। द्रौणिस्तु रथवंशेन महता परिवारितः। आपतत् सहसा राजन् यत्र पार्थो व्यवस्थितः ॥ १ ॥ तमापतन्तं सहसा शूरः शौरिसहायवान्। दधार सहसा पार्थो वेलेव मकरालयम् ॥ २ ॥ ततः क्रुद्धो महाराज द्रोणपुत्रः प्रतापवान्। अर्जुनं वासुदेवञ्च छादयामास सायकैः ॥ ३ ॥ अवच्छन्नौ ततः कृष्णौ दृष्ट्वा तत्र महारथाः विस्मयं परमं गत्वा प्रैक्षन्त कुरवस्तथा ॥ ४ ॥ अर्जुनस्तु ततो दिव्यमस्त्रं चक्रे हसन्निव। तदस्त्रं ब्राह्मणो युद्धे वारयामास भारत ॥ ५ ॥ यद्यद्धि व्याक्षिपद्युद्धे पाण्डवोऽस्त्रं जिघांसया। तत्तदस्त्रं महेष्वासो द्रोणपुत्रो व्यशातयत् ॥ ६ ॥ अस्त्रयुद्धे ततो राजन् वर्त्तमाने भयावहे। अपश्याम रणे द्रौणिं व्यात्ताननमिवान्तकम् ॥ ७ ॥ स दिशः प्रदिशश्चैव छादयित्वा त्वजिह्मगैः। वासुदेवं त्रिभिर्बाणैरविध्यद्दक्षिणे भुजे ॥ ८ ॥ ततोऽर्जुनो हयान् हत्वा सर्वांस्तस्य महात्मनः। चकार समरे भूमिं शोणितौघतरङ्गिणीम्। सर्वप्राणिवहां रौद्रां परलोकवहां नदीम् ॥ ९ ॥ सरथान्रथिनः सर्वान् पार्थचापच्युतैः शरैः। द्रौणेरपहतान् सर्वे ददृशुः स च तांस्तथा। प्रावर्त्तयन्महाघोरां नदीं परवहां तदा ॥१०॥ तयोस्तु व्याकुले युद्धे द्रौणेः पार्थस्य दारुणे। अमर्य्यादं योधयन्तः पर्य्यधावन्नितस्ततः ॥ ११॥

रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः। द्विरदैश्च हतारोहै-र्महामात्रैर्हतद्विपैः। पार्थेन समरे राजन् कृतो घोरो जनक्षयः ॥ १२ ॥ निहता रथिनः पेतुः पार्थचापच्युतैः शरैः। हयाश्च पर्य्यधावन्त मुक्तयोक्त्रास्ततस्ततः ॥ १३ ॥ तद्दृष्ट्वा कर्म पार्थस्य द्रौणिराहवशोभिनः। अर्जुनं जयतां श्रेष्ठं त्वरितोऽभ्येत्य वीर्य्य-वान् ॥ १४ ॥ विधुन्वानो महच्चापं कार्त्तस्वरविभूषितम्। अवा-किरत्ततो द्रौणिः समन्तान्निशितैः शरैः ॥ १५ ॥ भूयोऽर्जुनं महाराज द्रौणिरायस्य पत्रिणा। वक्षोदेशे पृषत्केन ताड़या-मास निर्द्दयम् ॥ १६ ॥ सोऽतिविद्धो रणे तेन द्रोणपुत्रेण भारत। गाण्डीवधन्वा प्रसभं शरवर्षैरुदारधीः। संछाद्य समरे द्रौणिं चिच्छेदास्य च कार्मुकम् ॥ १७ ॥ स छिन्नधन्वा परिघं वज्रस्पर्श-समं युधि। आदाय चिक्षेप तदा द्रोणपुत्रः किरीटिने ॥ ॥ १८ ॥ तमापतन्तं परिघं जाम्बूनदपरिष्कृतम्। चिच्छेद सहसा राजन् प्रहसन्निव पाण्डवः ॥ १९ ॥ स पपात तदा भूमौ निकृत्तः पार्थ-सायकैः। विकीर्णः पर्वतो राजन् यथा वज्रेण ताड़ितः ॥ २० ॥ ततः क्रुद्धो महाराज द्रोणपुत्रो महारथः। ऐन्द्रेण चास्त्रवेगेन वीभत्सुं समवाकिरत् ॥ २१ ॥ तस्येन्द्रजालावततं समीक्ष्य पार्थो राजन् गाण्डिवमाददानः। ऐन्द्रं जालं प्रत्यहनत्तरस्वी वरास्त्र-मादाय महेन्द्रसृष्टम् ॥ २२ ॥ विदार्य्य तज्जालमहेन्द्रयुक्तं पार्थ-स्ततो द्रौणिरथं क्षणेन। प्राच्छादयामास तथाभ्युपेत्य द्रौणि-स्तथा पार्थशराभिभूतः ॥ २३ ॥ विगाह्य तां पाण्डववाणवृष्टिं शरैः परं नाम ततः प्रकाश्य। शतेन कृष्णं सहसाभ्यविध्यत्त्रिभिः शतैरर्जुनं क्षुद्रकाणाम् ॥ २४ ॥ ततोऽर्जुनः सायकानां शतेन गुरोः सुतं मर्मसु निर्विभेद। अश्वांश्च सूतञ्च तथा धनुर्ज्यामवाकिरत् पश्यतां तावकानाम् ॥ २५ ॥ स विद्ध्वा मर्मसु द्रौणिं पाण्डवः पर-वीरहा। सारथिञ्चास्य भल्लेन रथनीड़ादपातयत् ॥ २६ ॥ स

संगृह्य स्वयं वाहान् कृष्णो प्राच्छादयच्छरैः। तत्राद्भुतमपश्याम द्रौणेराशुपराक्रमम् ॥ २७ ॥ प्रायच्छत्तुरगान् यच्च फल्गुनश्चाप्ययोधयत्। तदस्य समरे राजन् सर्वे योधा न्यपूजयन् ॥२८॥ ततः प्रहस्य बीभत्सुर्द्रौणपुत्रस्य संयुगे। क्षिप्रं रश्मीनथाश्वानां क्षुरप्रैश्चिच्छिदे जयः ॥ २९ ॥ प्राद्रवंस्तुरगास्ते तु शरवेगप्रपीड़िताः। ततोऽभून्निनदो घोरस्तव सैन्यस्य भारत ॥ ३० ॥ पाण्डवास्तु जयं लब्धा तव सैन्यं समाद्रवन्। समन्तान्निशितान् वाणान् विमुञ्चन्तो जयैषिणः ॥ ३१ ॥ पाण्डवैस्तु महाराज धार्त्तराष्ट्री महाचमूः। पुनः पुनरथो वीरैरभज्यि जितकाशिभिः ॥ ३२ ॥ पश्यतां ते महाराज पुत्राणां चित्रयोधिनाम्। शकुनेः सौवलेयस्य कर्णस्य च विशाम्पते ॥ ३३ ॥ वार्य्यमाणा महासेना पुत्रैस्तव जनेश्वर। नावातिष्टत संग्रामे पीड्यमाना समन्ततः ॥ ३४ ॥ ततो योधैर्महाराज पलायद्भिः समन्ततः। अभवद्व्याकुलं भीतं पुत्राणां ते महद्बलम् ॥ ३५ ॥ तिष्ठ तिष्ठेति च ततः सूतपुत्रस्य जल्पतः। नावातिष्ठत सा सेना वध्यमाना महात्मभिः ॥ ३६ ॥ तथोत्क्रुष्टं महाराज पाण्डवैर्जितकाशिभिः। धार्त्तराष्ट्रवलं दृष्ट्वा विद्रुतं वै समन्ततः ॥ ३७॥ ततो दुर्य्योधनः कर्णमब्रवीत् प्रणयादिव। पश्य कर्ण यथा सेना पाण्डवैरर्दिता भृशम् ॥ ३८ ॥ त्वयि तिष्ठति संग्रामात् पलायनपरायणा। एतज्ज्ञात्वा महावाहो कुरु प्राप्तमरिन्दम ॥ ३९ ॥ सहस्राणि च योधानां त्वामेव पुरुषोत्तम। क्रोशन्ति समरे वीर द्राव्यमाणानि पाण्डवैः ॥ ४० ॥ एतच्छ्रुत्वा तु राधेयो दुर्य्योधनवचो महत्। मद्रराजमिदं वाक्यमब्रवीत् प्रहसन्निव ॥ ४१ ॥ पश्य मे भुजयोर्वीर्य्यमस्त्राणाञ्च जनेश्वर। अद्य हन्मि रणे सर्वान् पाञ्चालान् पाण्डुभिः सह। वाहयाश्वान्नरव्याघ्र भद्रेणैव न संशयः ॥ ४२ ॥ एवमुक्त्वा महाराज सूतपुत्रः प्रतापवान्। प्रगृह्य विजयं वीरो धनुःश्रेष्ठं पुरा-

तनम् ॥ ४३ ॥ सञ्यं कृत्वा महाराज संमृज्य च पुनः पुनः ।
संनिवार्य्य च योधान् स सत्येन शपथेन च । प्रायोजयदमेयात्मा
भार्गवास्त्रं महाबलः ॥ ४४ ॥ ततो राजन् सहस्राणि प्रयुता-
न्यर्बुदानि च । कोटिशश्च शरास्तीक्ष्णा निरगच्छन्महामृधे ॥ ४५ ॥
ज्वलितैस्तैः शरैर्घोरैः कङ्कबर्हिणवाजितैः । संछन्ना पाण्डवी
सेना न प्राज्ञायत किञ्चन ॥ ४६ ॥ हाहाकारो महानासीत् पाञ्चा-
लानां विशाम्पते । पीड़ितानां बलवता भार्गवास्त्रेण संयुगे ॥४७॥
निपतद्भिर्गजै राजन्नश्वैश्चापि सहस्रशः । रथैश्चापि महाराज
नरैश्चापि समन्ततः ॥ ४८ ॥ प्राकम्पत मही राजन्निहतैस्तैस्तत-
स्ततः । व्याकुलं सर्वमभवत् पाण्डवानां महद्बलम् ॥ ४९ ॥ कर्ण-
स्त्वेको युधां श्रेष्ठो विधूम इव पावकः । दहन् शत्रून् नरव्याघ्रः
शुशुभे स परन्तपः ॥ ५० ॥ ते वध्यमानाः कर्णेन पाञ्चालाश्चेदिभिः
सह । तत्र तत्र व्यमुह्यन्त वनदाहे यथा द्विपाः । चुक्रुशुश्च नर-
व्याघ्र यथा व्याघ्रा नरोत्तमाः ॥ ५१ ॥ तेषान्तु क्रोशतामासी-
द्भीतानां रणमूर्द्धनि । धावताञ्च दिशो राजंस्त्रस्तानाञ्च समन्ततः ।
आर्त्तनादो महांस्तत्र भूतानामिव संप्लवे ॥ ५२ ॥ वध्यमानांस्तु
तान् दृष्ट्वा सूतपुत्रेण मारिष । वित्रेसुः सर्वभूतानि तिर्य्यग्योनि-
गतान्यपि ॥ ५३ ॥ ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः ।
अर्जुनं वासुदेवञ्च क्रोशन्ति स्म मुहुर्मुहुः । प्रेतराजपुरे यद्वत्
प्रेतराजं विचेतसः ॥ ५४ ॥ श्रुत्वा तु निनदं तेषां वध्यतां कर्ण-
सायकैः । अथाब्रवीद्वासुदेवं कुन्तीपुत्रो धनञ्जयः । भार्गवास्त्रं
महाघोरं दृष्ट्वा तत्र समीरितम् ॥ ५५ ॥ पश्य कृष्ण महाबाहो
भार्गवास्त्रस्य विक्रमम् । नैतदस्त्रं हि समरे शक्यं हन्तुं कथ-
ञ्चन ॥ ५६ ॥ सूतपुत्रञ्च संरब्धं पश्य कृष्ण महारणे । अन्तक-
प्रतिमं वीर्य्यं कुर्वाणं कर्म दारुणम् ॥ ५७ ॥ अभीक्ष्णं चोदय-
न्नश्वान् प्रेक्षते मां मुहुर्मुहुः । न च पश्यामि समरे कर्णस्य

प्रपलायितुम् ॥ ५८ ॥ जीवन् प्राप्नोति पुरुषः सङ्ख्ये जयपराजयौ । मृतस्य तु हृषीकेश वध एव कुतोऽजयः ॥ ५९ ॥ एवमुक्तस्तु पार्थेन कृष्णो मतिमतांवरम् । धनञ्जयमुवाचेदं प्राप्तकालमरिन्दमः ॥ ६० ॥ कर्णेन हि दृढ़ं राजा कुन्तीपुत्रः परिक्षतः । तं दृष्ट्वाश्वास्य च पुनः कर्णं पार्थ वधिष्यसि ॥ ६१ ॥ ततो जनार्द्दनः प्रायात् द्रष्टुमिच्छन् युधिष्ठिरम् । श्रमेन ग्राहयिष्यंश्च कर्णं युद्धे विशाम्पते ॥ ६२ ॥ ततो धनञ्जयो द्रष्टुं राजानं वाणपीड़ितम् । रथेन प्रययौ क्षिप्रं संग्रामात् केशवाज्ञया ॥ ६३ ॥ गच्छन्नेव तु कौन्तेयो धर्मराजदिदृक्षया । सैन्यमालोकयामास नापश्यत्तत्र चाग्रजम् ॥ ६४ ॥ युद्धं कृत्वा तु कौन्तेयो द्रोणपुत्रेण भारत । दुःसहं वज्रिणा सङ्ख्ये पराजित्य गुरोः सुतम् ॥ ६५ ॥

इति कर्णपर्व्वणि संकुलयुद्धे चतुःषष्टोऽध्यायः ॥ ६४ ॥

---

सञ्जय उवाच । द्रौणिं पराजित्य ततोऽग्रधन्वा कृत्वा महद्दुष्करं शूरकर्म । आलोकयामास ततः स्वसैन्यं धनञ्जयः शत्रुभिरप्रधृष्यः ॥ १ ॥ स युध्यमानान् पृतनामुखस्थान् योधान् शूरो हर्षयन् सव्यसाची । पूर्व्वावदानैः प्रथितैः प्रशस्य स्थिरांश्चकारात्मरथाननीके ॥ २ ॥ अपश्यमानन्तु किरीटमाली युधिष्ठिरं भ्रातरमाजमीढ़म् । उवाच भीमं तरसाभ्युपेत्य राज्ञः प्रवृत्तिं वद कुत्र राजा ॥ ३ ॥

भीम उवाच । अपयात इतो राजा धर्मराजो युधिष्ठिरः । कर्णवाणाभितप्ताङ्गो यदि जीवेत् कथञ्चन ॥ ४ ॥

अर्जुन उवाच । तस्माद्भवान् शीघ्रमितः प्रयातु राज्ञः प्रवृत्त्यै कुरुसत्तमस्य । नूनं स विद्धोऽतिभृशं पृषत्कैः कर्णेन राजा शिविरं गतोऽसौ ॥ ५ ॥ यः संप्रहारे निशितैः पृषत्कैर्द्रौणेन विद्धोऽति-

भृशं तरस्वी। तस्थौ स तत्रापि जयप्रतीक्षो द्रोणोऽपि यावन्न हतः किलासीत् ॥ ६ ॥ स संशयं गमितः पाण्डवाग्र्यः कर्णेन सङ्ख्ये महानुभावः। ज्ञातुं प्रयातश्चाशु तमद्य भीम स्थास्याम्यहंशत्रुगणान्निरुध्य ॥ ७ ॥

भीम उवाच। त्वमेव जानीहि महानुभाव राज्ञः प्रवृत्तिं भरतर्षभस्य। अहं हि यद्यर्जुन यामि तत्र वक्ष्यन्ति मां भीत इति प्रवीरा ॥ ८ ॥ ततोऽब्रवीदर्जुनो भीमसेनं संशप्तकाः प्रत्यनीकस्थिता मे। एतानहत्वा तु मया न शक्यमितोऽपयातुं रिपुसङ्घगोष्ठात् ॥ ९ ॥ अथाब्रवीदर्जुनं भीमसेनः स्ववीर्य्यमास्थाय कुरुप्रवीर। संशप्तकान् प्रतियोत्स्यामि संख्ये सर्वानहं याहि धनञ्जय त्वम् ॥ १० ॥

सञ्जय उवाच॥ तद्भीमसेनस्य वचो निशम्य सुदुर्वचं भ्रातुरमित्रमध्ये। द्रष्टुं कुरुश्रेष्ठमभिप्रयास्यन् प्रोवाच वृष्णिप्रवरं तदानीम् ॥ ११ ॥

अर्जुन उवाच। चोदयाश्वान् हृषीकेश विहायैतद्बलार्णवम्। अजातशत्रुं राजानं द्रष्टुमिच्छामि केशव ॥ १२ ॥

सञ्जय उवाच। ततो हयान् सर्वदाशार्हमुख्यः प्रचोदयन् भीममुवाच चेदम्। नैतच्चित्रं तव कर्माद्य भीम यास्याम्यहं जहि पार्थारिसङ्घान्॥ १३ ॥ ततो ययौ हृषीकेश यत्र यत्र राजा युधिष्ठिरः। शीघ्राच्छीघ्रतरं राजन वाजिभिर्गरुड़ोपमैः ॥ १४ ॥ प्रत्यनीके व्यवस्थाप्य भीमसेनमरिन्दमम। सन्दिश्य चैनं राजेन्द्र युद्धं प्रति वृकोदरम् ॥ १५ ॥ ततस्तु गत्वा पुरुषप्रवीरौ राजानमासाद्य शयानमेकम्। रथादुभौ प्रत्यवरुह्य तस्मादवन्दतुर्धर्मराजस्य पादौ ॥ १६ ॥ तं दृष्ट्वा पुरुषव्याघ्रं क्षेमिणं पुरुषर्षभम्। मुदाभ्युपगतौ कृष्णावश्विनाविव वासरम् ॥ १७ ॥ तावभ्यनन्दद्राजापि विवस्वानश्विनाविव। हते महासुरे जम्भे शक्रविष्णू

यथा गुरुः॥ १८॥ मन्यमानो हतं कर्णं धर्मराजो युधिष्ठिरः।
हर्षगद्गदया वाचा प्रीतः प्राह परन्तपः॥ १९॥

इति कर्णपर्वणि अर्जुनस्य युधिष्ठिरसमीपगमने
पञ्चषष्टोऽध्यायः॥ ६५॥

---

युधिष्ठिर उवाच। स्वागतं देवकीमातः स्वागतं ते धनञ्जय। प्रियं मे दर्शनं गाढ़ं युवयोरच्युतार्जुनौ॥ १॥ अक्षताभ्यामरिष्टाभ्यां हतः कर्णो महारथः॥ २॥ आशीविषसमं युद्धे सर्वशस्त्रविशारदम्। अग्रगं धार्त्तराष्ट्राणां सर्वेषां शर्म वर्म च॥ ३॥ रक्षितं वृषसेनेन सुषेणेन च धन्विना। अनुज्ञातं महावीर्य्यं रामेणास्त्रे सुदुर्ज्जयम्॥ ४॥ मुख्यं सर्वस्य लोकस्य रथिनं लोकविश्रुतम्। त्रातारं धार्त्तराष्ट्राणां गन्तारं वाहिनीमुखे॥ ५॥ हन्तारं परसैन्यानाममित्रगणमर्द्दनम्। दुर्य्योधनहिते युक्तमस्मद्दुःखाय चोद्यतम्॥ ६॥ अप्रधृष्यं महायुद्धे देवैरपि सवासवैः। अनलानिलयोस्तुल्यं तेजसा च बलेन च॥ ७॥ पातालमिव गम्भीरं सुहृदां नन्दिवर्द्धनम्। अन्तकाभममित्राणां हत्वा कर्णं महाहवे। दिष्ट्या युवामनुप्राप्तौ जित्वासुरमिवामरौ॥ ८॥ घोरं युद्धमदीनेन मया ह्यद्याच्युतार्जुनौ। कृतं तेनान्तकेनेव प्रजाः सर्वा जिघांसता॥ ९॥ तेन केतुश्च मे छिन्नो निहतौ पार्ष्णिसारथी। हतवाहस्ततश्चास्मि युयुधानस्य पश्यतः॥ १०॥ धृष्टद्युम्नस्य यमयोर्वीरस्य च शिखण्डिनः। पश्यतां द्रौपदेयानां पाञ्चालानाञ्च सर्वशः॥ ११॥ एतान् जित्वा महावीर्य्यः कर्णः शत्रुगणान् बहून्। जितवान् मां महावाहो यतमानं महारणे॥ १२॥ अभिसृत्य च मां युद्धे परुषाण्युक्तवान् बहु। तत्र तत्र युधां श्रेष्ठः परिभूय न संशयः॥ १३॥ भीमसेनप्रभावात्तु यज्जा-

वामि धनञ्जय । बहुनात्र किमुक्तेन नाहं तत् सोढ़ुमुत्सहे ॥ १४ ॥
त्रयोदशाहं वर्षाणि यस्माद्भीतो धनञ्जय । न स्म निद्रां लभे
रात्रौ न चाहनि सुखं क्वचित् ॥ १५ ॥ तस्य द्वेषेण संयुक्तः परि-
दह्ये धनञ्जय । आत्मनो मरणे यातो वार्ध्रीणस इव द्विजः ॥१६ ॥
तस्यायमगमत् कालश्चिन्तयानस्य मे चिरम् । कथं कर्णो मया
शक्यो युद्धे क्षययितुं भवेत् ॥ १७ ॥ जाग्रत् स्वपंश्च कौन्तेय
कर्णमेव सदा ह्यहम् । पश्यामि तत्र तत्रैव कर्णभूतमिदं जगत्
॥ १८ ॥ यत्र यत्र हि गच्छामि कर्णाद्भीतो धनञ्जय । तत्र तत्र
हि पश्यामि कर्णमेवाग्रतः स्थितम् ॥ १९ ॥ सोऽहं तेनैव वीरेण
सनरेष्वपलायिना । सहयः सरथः पार्थ जित्वा जीवन् विस-
र्जितः ॥ २० ॥ को नु मे जीवितेनार्थो राज्येनार्थो भवेत् पुनः ।
ममैवं धिक्कृतस्याद्य कर्णनाहवशोभिना ॥ २१ ॥ न प्राप्तपूर्वं
यद्भीष्मात् कृपाद्द्रोणाच्च संयुगे । तत् प्राप्तमद्य मे युद्धे सूतपुत्रा-
न्महारथात् ॥ २२ ॥ स त्वां पृच्छामि कौन्तेय यथाद्य कुशल-
न्तथा । तन्ममाचक्ष्व कार्त्स्न्येन यथा कर्णो हतस्त्वया ॥ २३ ॥
शक्रतुल्यबलो युद्धे यमतुल्यः पराक्रमे । रामतुल्यस्तथास्त्रेण स
कथं वै निसूदितः ॥ २४ ॥ महारथः समाख्यातः सर्वयुद्धविशा-
रदः । धनुर्द्धराणांप्रवरः सर्वेषामेकपूरुषः ॥ २५ ॥ पूजितो
धृतराष्ट्रेण सपुत्रेण विशाम्पते । त्वदर्थमेव राधेयः स कथं निहत-
स्त्वया ॥ २६ ॥ धार्त्तराष्ट्रो हि युद्धेषु सर्वेष्वेव सदार्जुन । तव
मृत्युं रणे कर्णं मन्यते पुरुषर्षभ ॥ २७ ॥ स त्वया पुरुषव्याघ्र कथं
युद्धे निसूदितः । तन्ममाचक्ष्व कौन्तेय यथा कर्णो हतस्त्वया
॥ २८ ॥ युध्यमानस्य च शिरः पश्यतां सुहृदां हृतम् । त्वया
पुरुषशार्दूल शार्दूलेन यथा रुरुः ॥ २९ ॥ यः पर्य्युपासीत्
प्रदिशो दिशश्च त्वां सूतपुत्रः समरे परीप्सन् । दित्सुः कर्णः
समरे हस्तिषड्गवं स इदानीं कङ्कपत्रैः सुतीक्ष्णैः । त्वया-

रणे निहतः सूतपुत्रः कच्चिच्छेते भूमितले दुरात्मा ॥ ३० ॥ प्रियन्न
मे परमो वै कृतोऽयं त्वया रणे सूतपुत्रं निहत्य ॥ ३१ ॥ यः
सर्वतः पर्य्यपतत्त्वदर्थे मदान्वितो गर्वितः सूतपुत्रः । स शूरमानी
समरे समेत्य कच्चित्त्वया निहतः संयुगेऽसौ ॥ ३२ ॥ रौक्मं वरं
हस्तिगवाश्वयुक्तं रथं प्रदित्सुर्यः परेभ्यस्त्वदर्थे । सदा रणे स्पर्द्धते
यः स पापः कच्चित्त्वया निहतस्तात युद्धे ॥ ३३ ॥ योऽसौ सदा
शूरमदेन मत्तो विकत्थते संसदि कौरवाणाम् । प्रियोऽत्यर्थं तस्य
सुयोधनस्य कच्चित् स पापो निहतस्त्वयाद्य ॥३४॥ कच्चित् समागम्य
धनुःप्रयुक्तैस्त्वत्प्रेरितैर्लोहिताङ्गैर्विहङ्गैः । शेते स पापः सुविभिन्न-
गात्रः कच्चिद्भग्नौ धार्त्तराष्ट्रस्य बाहू ॥ ३५ ॥ योऽसौ सदा श्लाघते
राजमध्ये दुर्य्योधनं हर्षयन् दर्पपूर्णः । अहं हन्ता फाल्गुनस्येति
मोहात् कच्चिद्वचस्तस्य न वै तथा तत् ॥ ३६ ॥ नाहं पादौ धाव-
यिष्ये कदाचित् यावत् स्थितः पार्थ इत्यल्पबुद्धेः । व्रतं यस्यैतत्
सर्वदा शक्रसूनो कच्चित्त्वया निहतः सोऽद्य कर्णः ॥ ३७ ॥ योऽसौ
कृष्णामब्रवीद्दुष्टबुद्धिः कर्णः सभायां कुरुवीरमध्ये । किं पाण्ड-
वांस्त्वं न जहासि कृष्णे सुदुर्बलान् पतितान् हीनसत्त्वान् ॥ ३८ ॥
योऽसौ कर्णः प्रत्यजानात्त्वदर्थे नाहत्वाहं सह कृष्णेन पार्थम् ।
इहोपयातेति स पापबुद्धिः कच्चिच्छेते शरसंभिन्नगात्रः ॥ ३९ ॥
कच्चित् संग्रामो विहितो वै तवायं समागमे सृञ्जयकौरवाणाम् ।
यत्रावस्थामीदृशीं प्रापितोऽहं कच्चित्त्वया सोऽद्य हतः समेत्य ॥४०॥
कच्चित्त्वया तस्य सुमन्दबुद्धेर्गाण्डीवमुक्तैर्विशिखैर्ज्वलद्भिः । स-
कुण्डलं भानुमदुत्तमाङ्गं कायात् प्रकृत्तं युधि सव्यसाचिन् ॥ ४१ ॥
यत्तन्मया बाणसमर्पितेन ध्यातोऽसि कर्णस्य वधाय वीर । तन्मे
त्वया कच्चिदमोघमद्य ध्यानं कृतं कर्णनिपातनेन ॥ ४२ ॥ यद्दर्प-
पूर्णः स सुयोधनोऽस्मानुदीक्षते कर्णसमाश्रयेण । कच्चित्त्वया
सोऽद्य समाश्रयोऽस्य भग्नः पराक्रम्य सुयोधनस्य ॥ ४३ ॥ यो

नः पुरा षण्ढतिलानवोचत् सभामध्ये कौरवाणां समक्षम्। स दुर्मतिः कच्चिदुपेत्य संख्ये त्वया हतः सूतपुत्रोऽत्यमर्षी॥ ४४॥ यः सूतपुत्रः प्रहसन् दुरात्मा पुराब्रवीत् निर्ज्जितां सौवलेन। स्वयं प्रसह्यानय याज्ञसेनीमपीह कच्चित् स हतस्त्वयाद्य॥ ४५॥ यः शस्त्रभृच्छ्रेष्ठतमं पृथिव्यां पितामहं व्याक्षिपदल्पचेताः। संख्यायमानोऽर्द्धरथः स कच्चित्त्वया हतो ह्याधिरथिर्महात्मन्॥ ४६॥ अमर्षजं निकृतिसमीरणेरितं हृदि स्थितं ज्वलनमिमं सदा मम। हतो मया सोऽद्य समेत्य कर्ण इति ब्रुवन् प्रशमय मेऽद्य फाल्गुन॥ ४७॥ ब्रवीहि मे दुर्लभमेतदद्य कथं त्वया निहतः सूतपुत्रः। अनुध्यायी त्वां सततं प्रवीरं वृत्रे हतेऽसौ भगवानिवेन्द्रम्॥ ४८॥

इति कर्णपर्व्वणि युधिष्ठिरवाक्ये षट्षष्टोऽध्यायः॥ ६६॥

---

सञ्जय उवाच। तद्धर्मशीलस्य वचो निशम्य राज्ञः क्रुद्धस्यातिरथो महात्मा। उवाच दुर्द्धर्षमदीनसत्त्वं युधिष्ठिरं जिष्णुरनन्तवीर्य्यः॥ १॥

अर्जुन उवाच। संशप्तकैर्युध्यमानस्य मेऽद्य सेनाग्रयायी कुरुसैन्यराज्ञः। आशीविषाभान् खगमान् प्रमुञ्चन् द्रौणिः पुरस्तात् सहसाभ्यतिष्ठत्॥ २॥ दृष्ट्वा रथं मेघरवं ममैव समस्तसेना च रणेऽभ्यतिष्ठत्। तेषामहं पञ्च शतानि हत्वा ततो द्रौणिमगमं पार्थिवाग्र्य॥ ३॥ स मां समासाद्य नरेन्द्र यत्तः समभ्ययात् सिंहमिव द्विपेन्द्रः। अकार्षीच्च रथिनामुज्जिहीर्षां महाराज वध्यतां कौरवाणाम॥ ४॥ ततो रणे भारत दुष्प्रकम्प आचार्य्यपुत्रः प्रवरः कुरूणाम्। मामर्द्दयामास शितैः पृषत्कैर्ज्जनार्द्दनञ्चैव विषाग्निकल्पैः॥ ५॥ अष्टौ गवामष्टशतानि बाणान् मया प्रयुद्धस्य वहन्ति तस्य। तांस्तेन मुक्तानहमस्य बाणैर्व्यधमं सद्यं

वायुरिवाभ्रजालम् ॥ ६ ॥ ततोऽपरान् वाणसङ्घाननेकानाकर्ण-
पूर्णायतविप्रमुक्तान्। ससर्ज शिक्षास्त्रबलप्रयत्नैस्तथा यथा प्रावृषि
कालमेघः ॥ ७ ॥ नैवाददानं न च संदधानं जानीमहे कतरे-
णास्यतीति। वामेन वा यदि वा दक्षिणेन स द्रोणपुत्रः समरे
पर्य्यवर्त्तत् ॥ ८ ॥ तस्याततं मण्डलमेव सव्यं प्रदृश्यते कार्मुकं द्रोण-
सूनोः। सोऽविध्यन्मां पञ्चभिर्द्रोणपुत्रः शितैः शरैः पञ्चभिर्वासु-
देवम् ॥ ९ ॥ अहन्तु तं त्रिंशता वज्रकल्पैः समार्द्दयं निमिष-
स्यान्तरेण। क्षणात् स्राविच्छ्वसनरूपो बभूव समार्द्दितो मद्विसृष्टैः
पृषत्कैः ॥ १० ॥ स विक्षरन् रुधिरं सर्वगात्रै रथानीकं सूतसूनो-
र्विवेश। मयाभिभूतान् सैनिकानां प्रवर्हानसौ प्रपश्यन् रुधिर-
प्रदिग्धान् ॥ ११ ॥ ततोऽभिभूतं युधि वीक्ष्य सैन्यं वित्रस्तयोधं
द्रुतवाजिनागम्। पञ्चाशता रथमुख्यैः समेत्य कर्णस्त्वरन्मामु-
पायात् प्रमाथी। तान् सूदयित्वाहमपास्य कर्णं द्रष्टुं भवन्तं
त्वरयाभिजातः ॥ १२ ॥ सर्वे पाञ्चाला ह्युद्विजन्ते स्म कर्णाद्गन्धा-
द्गावः केशरिणो यथैव। मृत्योरास्यं व्यात्तमिवाभ्यपद्यन् प्रभ-
द्रकाः कर्णमासाद्य राजन् ॥ १३ ॥ रथांस्तु तान् सप्तशतान्निमग्नां-
स्तदा कर्णः प्राहिणोन्मृत्युसद्म। न चाप्यभूत् क्लान्तमनाः स राजन्
यावन्नास्मान् दृष्टवान् सूतपुत्रः ॥ १४ ॥ श्रुत्वा तु त्वां तेन दृष्टं
समेतमश्वत्थाम्ना पूर्वतरं क्षतञ्च। मन्ये कालमपयानस्य राजन्
क्रूरात् कर्णात्तेऽहमचिन्त्यकर्मन् ॥ १५ ॥ मया कर्णस्यास्त्रमिदं
पुरस्ताद्युद्धे दृष्टं पाण्डव चित्ररूपम्। न ह्यन्ययोद्धा विद्यते
सृञ्जयानां महारथं योऽद्य सहेत् कर्णम् ॥ १६ ॥ शैनेयो मे
सात्यकिश्चक्ररक्षौ धृष्टद्युम्नश्चापि तथैव राजन्। युधामन्युश्चोत्त-
मौजाश्च शूरौ पृष्ठतो मां रक्षतां राजपुत्रौ ॥ १७ ॥ रथप्रवीरेण
महानुभाव द्विषत्सैन्ये वर्त्तता दुस्तरेण। समेत्याहं सूतपुत्रेण
संख्ये वृत्रेण वज्रीव नरेन्द्रमुख्य ॥ १८ ॥ योत्स्याम्यहं भारत

सूतपुत्रमस्मिन् संग्रामे यदि वै द्रक्ष्यसेऽद्य। आयाहि पश्चाद्य युयुत्समानं मां सूतपुत्रञ्च रणे जयाय॥ १९॥ महर्षभस्येव मुखं प्रपन्ना प्रभद्रकाः कर्णमभिद्रवन्ति। षट्साहस्रा भारत राजपुत्राः स्वर्गाय लोकाय रणे निमग्नाः॥ २०॥ कर्णं न चेदद्य निहन्मि राजन् सबान्धवं युध्यमानं प्रसह्य। प्रतिश्रुत्याकुर्वतो वै गतिर्या कष्टां याता तामहं राजसिंह॥ २१॥ आमन्त्रये त्वां ब्रूहि रणे जयं मे पुरा हि भीमं धार्त्तराष्ट्रा ग्रसन्ते। सौतिं हनिष्यामि नरेन्द्रसिंह सैन्यं तथा शत्रुगणांश्च सर्वान्॥ २२॥

इति कर्णपर्वणि अर्जुनप्रतिज्ञायां सप्तषष्टोऽध्यायः॥ ६७॥

---

सञ्जय उवाच। श्रुत्वा कर्णं कल्यमुदारवीर्य्यं क्रुद्धः पार्थः फाल्गुनस्यामितौजाः। धनञ्जयं वाक्यमुवाच चेदं युधिष्ठिरः कर्णशराभितप्तः॥ १॥ विप्रद्रुता तात चमूस्त्वदीया तिरस्कृता चाद्य यथा न साधु। भीतो भीमं त्यज्य चायास्तथा त्वं यन्नाशक्तः कर्णमथो निहन्तुम्॥ २॥ स्नेहस्त्वया पार्थ कृतः पृथाया गर्भः समाविश्य यथा न साधु। त्यक्त्वा रणे यदपायाः स भीमं यन्नाशक्तः सूतपुत्रं निहन्तुम्॥ ३॥ यत्तद्वाक्यं द्वैतवने त्वयोक्तं कर्णं हन्तास्म्येकरथेन पार्थ। तं त्यक्त्वा त्वं कथमद्यापयातः कर्णाद्भीतो भीमसेनं विहाय॥ ४॥ इदं यदि द्वैतवनेऽप्यवक्ष्यः कर्णं योद्धुं न प्रशक्ष्ये नृपेति। वयं ततः प्राप्तकालञ्च सर्वे कृत्यान्युपैष्याम तथैव पार्थ॥ ५॥ मयि प्रतिश्रुत्य वधं हि तस्य न वै कृतं तच्च तथैव वीर। आनीय नः शत्रुमध्यं स कस्मात् समुत्क्षिप्य स्थण्डिले प्रत्यपिंष्ठाः॥ ६॥ अन्वाशिष्म वयमर्जुन त्वयि वियासवो बहु कल्याणमिष्टम्। तन्नः सर्वं विफलं राजपुत्र फलार्थिनो विटुल इवातिपुष्पः॥ ७॥ प्रच्छादितं बडिशमिवामिषेण संच्छादितं

गरलमिवाश्नेन। अनर्थकं दर्शितवानसि त्वं राज्यार्थिनो राज्य-
रूपं विनाशम् ॥ ८ ॥ त्रयोदशैमा हि समाः सदा वयं त्वामन्व-
जीविम धनञ्जयाशया। काले वर्षं दैवमिवोप्तबीजं तन्नः सर्वान्
नरके त्वं न्यमज्जः ॥ ९ ॥ यदात् पृथां वागुवाचान्तरीक्षे सप्ताह-
जाते त्वयि मन्दबुद्धे। जातः पुत्रो वासवविक्रमोऽयं सर्वान् शूरान्
शात्रवान् जेष्यतीति ॥ १० ॥ अयं जेता खाण्डवे देवसङ्घान् सर्वाणि
भूतान्यपि चोत्तमौजाः। अयं जेता मद्रकलिङ्गकेकयानयं कुरू-
श्चाजमध्ये निहन्ता ॥ ११ ॥ अस्मात् परो न भविता धनुर्धरो नैनं
भूतं किञ्चन जातु जेता। इच्छन्नयं सर्वभूतानि कुर्य्याद्वशे वशी
सर्वसमाप्तविद्यः ॥ १२ ॥ कान्त्या शशाङ्कस्य जवेन वायोः स्थैर्य्येण
मेरोः क्षमया पृथिव्याः। सूर्य्यस्य भासा धनदस्य लक्ष्म्या शौर्य्येण
शक्रस्य बलेन विष्णोः ॥ १३ ॥ तुल्यो महात्मा तव कुन्ति पुत्रो
जातोऽदितेर्विष्णुरिवारिहन्ता। स्वेषां जयाय द्विषतां वधाय
ख्यातोऽमितौजाः कुलतन्तुकर्त्ता ॥ १४ ॥ इत्यन्तरीक्षे शतशृङ्ग-
मूर्द्ध्नि तपस्विनां शृण्वतां वागुवाच। एवंविधं तच्च नाभूत्तथा ते
देवापि नूनमनृतं वदन्ति ॥ १५ ॥ तथापरेषामृषिसत्तमानां श्रुत्वा
गिरः पूजयतां सदा त्वाम्। न सन्नतिं प्रैमि सुयोधनस्य न त्वां
जानाम्याधिरथेर्भयार्त्तम ॥ १६ ॥ त्वष्ट्रा कृतं वाहमकूजनाक्षं शुभं
समास्थाय कपिध्वजं त्वम्। खड्गं गृहीत्वा हेमपट्टावनद्धं धनु-
श्चेदं गाण्डिवं तालमात्रम्। स केशवेनोह्यमानः कथं त्वं कर्णा-
द्भीतो व्यपयातोऽसि पार्थ ॥ १७ ॥ धनुश्चैतत् केशवाय प्रदाय
यन्ताभविष्यस्त्वं रणे चेद्दुरात्मन्। ततोऽहनिष्यत् केशवः कर्ण-
मुग्रं मरुत्पतिर्वृत्रमिवात्तवज्रः ॥ १८ ॥ राधेयमेवं यदि नाद्य
शक्तश्चरन्तमुग्रं प्रतिबाधनाय। देह्यन्यस्मै गाण्डिवमेतदद्य त्वत्तो
योऽस्त्रेष्वभ्यधिको नरेन्द्रः ॥ १९ ॥ अस्मान्नैवं पुत्रदारैर्विहीनान्
सुखाद्भ्रष्टान्राज्यनाशाच्च भूयः। द्रष्टा लोकः पतितानप्यगाधे पापे-

जुष्टे नरके पाण्डवेय ॥ २० ॥ मासेऽपतिष्यः पञ्चमे त्वं सुकृच्छ्रे न वा गर्भेऽप्यभविष्यः पृथायाः। तत्ते श्रेयो राजपुत्राभविष्यन्न चेत् संग्रामादपयातं दुरात्मन् ॥ २१ ॥ धिक् गाण्डीवं धिक् च ते बाहुवीर्य्यमसङ्ख्येयान् बाणगणांश्च धिक् ते। धिक् ते केतुं केशरिणः सुतस्य कृष्णानुदत्तञ्च रथञ्च धिक् ते ॥ २२ ॥

इति कर्णपर्वणि युधिष्ठिरवाक्ये अष्टषष्टोऽध्यायः ॥ ६८ ॥

---

सञ्जय उवाच। युधिष्ठिरेणैवमुक्तः कौन्तेयः श्वेतवाहनः। असिं जग्राह संक्रुद्धो जिघांसुर्भरतर्षभम् ॥ १ ॥ तस्य कोपं समुद्वीक्ष्य चित्तज्ञः केशवस्तदा। उवाच किमिदं पार्थ गृहीतः खड्ग इत्युत ॥ २ ॥ न हि पश्यामि योद्धव्यं त्वया किञ्चिद्धनञ्जय। ते ग्रस्ता धार्त्तराष्ट्रा हि भीमसेनेन धीमता ॥ ३ ॥ अपयातोऽसि कौन्तेय राजा द्रष्टव्य इत्यपि। स राजा भवता दृष्टः कुशली च युधिष्ठिरः ॥ ४ ॥ स दृष्ट्वा नृपशार्दूलं शार्दूलसमविक्रमम्। हर्षकाले च संप्राप्ते किमिदं मोहकारितम् ॥ ५ ॥ न तं पश्यामि कौन्तेय यस्ते वध्यो भविष्यति। प्रहर्त्तुमिच्छसे कस्मात् किं वा ते चित्तविभ्रमः ॥ ६ ॥ कस्माद्भवान् महाखड्गं परिगृह्णाति सत्वरः। तत्त्वां पृच्छामि कौन्तेय किमिदं ते चिकीर्षितम्। परामृशसि यत् क्रुद्धः खड्गमद्भुतविक्रम ॥ ७ ॥ एवमुक्तस्तु कृष्णेन प्रेक्षमाणो युधिष्ठिरम्। अर्जुनः प्राह गोविन्दं क्रुद्धः सर्प इव श्वसन् ॥ ८ ॥ अन्यस्मै देहि गाण्डीवमिति मां योऽभिचोदयेत्। छिन्द्यामहं तस्य शिर इत्युपांशुव्रतं मम ॥ ९ ॥ तदुक्तं मम चानेन राज्ञामितपराक्रम। समक्षं तव गोविन्द न तत् क्षन्तुमिहोत्सहे ॥ १० ॥ तस्मादेनं वधिष्यामि राजानं धर्मभीरुकम्। प्रतिज्ञां पालयिष्यामि हत्वैनं नरसत्तमम् ॥ ११ ॥ एतदर्थं मया खड्गो

गृहीतो यदुनन्दन। सोऽहं युधिष्ठिरं हत्वा सत्यस्यानृण्यतां गतः ॥ १२ ॥ विशोको विज्वरश्चापि भविष्यामि जनार्द्दन। किं वा त्वं मन्यसे प्राप्तमस्मिन् काले समुत्थिते ॥ १३ ॥ त्वमस्य जगतस्तात वेत्थ सर्वं गतागतम्। तत्तथा प्रकरिष्यामि यथा मां वक्ष्यते भवान् ॥ १४ ॥

सञ्जय उवाच। धिग्धिगित्येव गोविन्दः पार्थमुक्त्वाब्रवीत् पुनः ॥ १५ ॥

कृष्ण उवाच। इदानीं पार्थ जानामि न वृद्धाः सेवितास्त्वया। अकाले पुरुषव्याघ्र संरम्भं यद्भवानगात् ॥ १६ ॥ न हि धर्मविभागज्ञः कुर्य्यादेवं धनञ्जय। यथा त्वं पाण्डवाद्येह धर्मभीरुरपण्डितः ॥ १७ ॥ अकार्य्याणां क्रियाणाञ्च संयोगं यः करोति वै। कार्य्याणामक्रियाणाञ्च स पार्थ पुरुषाधमः ॥ १८ ॥ अनुसृत्य तु ये धर्मं कथयेयुरुपस्थिताः। समासविस्तरविदां न तेषां वेत्थनिश्चयम् ॥ १९ ॥ अनिश्चयज्ञो हि नरः कार्य्याकार्य्यविनिश्चये। अवशो मुह्यते पार्थ यथा त्वं मूढ़ एव तु ॥ २० ॥ न हि कार्य्यमकार्य्यं वा सुखं ज्ञातुं कथञ्चन। श्रुतेन ज्ञायते सर्वं तच्च त्वं नावबुध्यसे ॥ २१ ॥ अविज्ञानाद्भवान् यच्च धर्मं रक्षति धर्मवित्। प्राणिनां त्वं वधं पार्थ धार्मिको नावबुध्यसे ॥ २२ ॥ प्राणिनामवधस्तात सर्वज्यायान्मतो मम। अनृतां वा वदेद्वाचं न तु हिंस्यात् कथञ्चन ॥ २३ ॥ स कथं भ्रातरं ज्येष्ठं राजानं धर्मकोविदम्। हन्याद्भवान्नरश्रेष्ठ प्राकृतोऽन्यः पुमानिव ॥ २४ ॥ अयुध्यमानस्य वधस्तथा शत्रोश्च भारत। पराङ्मुखस्य द्रवतः शरणञ्चाभिगच्छतः ॥ २५ ॥ कृताञ्जलेः प्रपन्नस्य प्रमत्तस्य तथैव च। न वधः पूज्यते सद्भिस्तच्च सर्वं गुरौ तव ॥ २६ ॥ त्वया चैव व्रतं पार्थ वालेनैव कृतं पुरा। तस्मादधर्मसंयुक्तं मौढ़्यात् कर्म व्यवस्यसि ॥ २७ ॥ स गुरुं पार्थ कस्मात्त्वं हन्तुकामोऽभि-

धावसि। असंप्रधार्य्य धर्माणां गतिं सूक्ष्मां दुरत्ययाम् ॥ २८ ॥ इदं धर्मरहस्यञ्च तव वक्ष्यामि पाण्डव। यद्ब्रूयात्तव भीष्मो हि धर्मज्ञो वा युधिष्ठिर ॥ २९ ॥ विदुरो वा तथा क्षत्ता कुन्ती वापि यशस्विनी। तत्ते वक्ष्यामि तत्त्वेन निबोधेदं धनञ्जय ॥ ३० ॥ सत्यस्य वचनं साधु न सत्याद्विद्यते परम्। तत्त्वेनैव सुदुर्ज्ञेयं यस्य सत्यमनुष्ठितम् ॥ ३१ ॥ भवेत् सत्यमवक्तव्यं वक्तव्यमनृतं भवेत्। यत्रानृतं भवेत् सत्यं सत्यञ्चाप्यनृतं भवेत् ॥ ३२ ॥ प्राणात्यये विवाहे च वक्तव्यमनृतं भवेत्। सर्वस्वस्यापहारे च वक्तव्यमनृतं भवेत् ॥ ३३ ॥ विवाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे। विप्रस्य चार्थे ह्यनृतं वदेत पञ्चानृतान्याहुरपातकानि ॥ ३४ ॥ तत्रानृतं भवेत् सत्यं सत्यञ्चाप्यनृतं भवेत् ॥ ३५ ॥ तादृशं मन्यते बालो यस्य सत्यमनुष्ठितम्। सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ॥ ३६ ॥ किमाश्चर्य्यं कृतप्रज्ञः पुरुषोऽपि सुदारुणः। सुमहत् प्राप्नुयात् पुण्यं बलाकोऽन्धवधादिव ॥ ३७ ॥ किमाश्चर्य्यं पुनर्मूढो धर्मकामो ह्यपण्डितः। सुमहत् प्राप्नुयात् पापमापगास्विव कौशिकः ॥ ३८ ॥

अर्जुन उवाच। आचक्ष्व भगवन्नेतत् यथा विन्द्याम्यहं तथा। बलाकस्याभिसम्बन्धं नदीनां कौशिकस्य च ॥ ३९ ॥

वासुदेव उवाच। मृगव्याधोऽभवत् कश्चित् बलाको नाम भारत। यात्रार्थं पुत्रदारस्य मृगान् हन्ति न कामतः ॥ ४० ॥ वृद्धौ च मातापितरौ बिभर्त्त्यन्यांश्च संश्रितान्। स्वधर्मनिरतो नित्यं सत्यवागनसूयकः ॥४१॥ स कदाचिन्मृगं लिप्सुर्नाभ्यविन्दत् प्रयत्नवान्। अपः पिबन्तं ददृशे श्वापदं घ्राणचक्षुषम् ॥ ४२ ॥ अदृष्टपूर्वमपि तत् सत्त्वं तेन हतं तदा। अन्धे हते ततो व्योम्नः पुष्पवर्षं पपात च ॥ ४३ ॥ अप्सरोगीतवादित्रैर्नादितञ्च मनोरमम्। विमानमागमत् स्वर्गात् मृगव्याधनिनीषया ॥ ४४ ॥ तद्भूतं सर्वभूतानामभावाय

किलार्जुन। तपस्तप्त्वा वरं प्राप्तं कृतमन्धं स्वयम्भुवा ॥ ४५ ॥ तद्दृत्वा सर्वभूतानामभावकृतनिश्चयम्। ततो वलाकः स्वरगादेवं धर्मः सुदुर्विदः ॥ ४६ ॥ कौशिकोऽप्यभवद्विप्रस्तपस्वी नवहुश्रुतः। नदीनां सङ्गमे ग्रामाद्दूरात् स किलावसत् ॥ ४७ ॥ सत्यं मया सदा वाच्यमिति तस्याभवद्व्रतम्। सत्यवादीति विख्यातः स तदासीद्धनञ्जय ॥ ४८ ॥ अथ दस्युभयात् केचित्तदा तद्वनमाविशन्। तत्रापि दस्यवः क्रुद्धास्तानमार्गन्त यत्नतः ॥ ४९ ॥ अथ कौशिकमभ्येत्य प्राहुस्ते सत्यवादिनम्। कतमेन पथा याता भगवन् बहवो जनाः। सत्येन पृष्टः प्रब्रूहि यदि तान् वेत्थ शंस नः ॥ ५० ॥ स पृष्टः कौशिकः सत्यं वचनं तानुवाच ह। बहुवृक्षलतागुल्ममेतद्वनमुपाश्रिताः ॥ ५१ ॥ इति तान् ख्यापयामास तेभ्यः पार्थ स कौशिकः। ततस्ते तान् समासाद्य क्रूरा जघ्नुरिति श्रुतिः ॥ ५२ ॥ तेनाधर्म्मेण महता वाग्दुरुक्तेन कौशिकः। गतः स कष्टं नरकं सूक्ष्मधर्मेष्वकोविदः ॥ ५३ ॥ यथा चाल्पश्रुतो मूढो धर्माणामविभागवित्। वृद्धानपृष्ट्वा सन्देहं महच्छ्वभ्रमितोऽर्हति ॥ ५४ ॥ तत्र ते लक्षणोद्देशः कश्चिदेवं भविष्यति। दुष्करं परमं ज्ञानं तर्केणानुव्यवस्यति ॥ ५५ ॥ श्रुतेर्धर्म इति ह्येके वदन्ति बहवो जनाः। तत्ते न प्रत्यसूयामि न च सर्वं विधीयते ॥ ५६ ॥ प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ॥ ५७ ॥ यत् स्यादहिंसासंयुक्तं स धर्म इति निश्चयः। अहिंसार्थाय भूतानां धर्मप्रवचनं कृतम् ॥ ५८ ॥ धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः। यत् स्याद्धारणसंयुक्तं स धर्म इति निश्चयः ॥ ५९ ॥ ये न्यायेन जिहीर्षन्तो धर्ममिच्छन्ति कर्हिचित्। अकूजनेन वा मोक्षो नानुकूजेत् कथञ्चन ॥ ६० ॥ अवश्यं कूजितव्ये वा शङ्केरन् वाप्यकूजतः। श्रेयस्तत्रानृतं वक्तुं तत् सत्यमविचारितम् ॥ ६१ ॥ यः कार्य्येभ्यो व्रतं कृत्वा कर्मणा नोपपादयेत्। न तत् फलमवाप्नोति एवमाह-

मनीषिणः ॥ ६२ ॥ प्राणात्यये विवाहे वा सर्व्वज्ञातिवधात्यये। कर्मण्यभिप्रवृत्ते वा न च प्रोक्तं मृषा भवेत् ॥ ६२ ॥ अधर्मं नात्र पश्यन्ति धर्मतत्त्वार्थदर्शिनः । यत् स्तेनैः सह सम्बन्धान्मुच्यते शपथैरपि ॥ ६४ ॥ श्रेयस्तत्रानृतं वक्तुं तत् सत्यमविचारितम् । न च तेभ्यो धनं देयं शक्ये सति कथञ्चन ॥ ६५ ॥ पापेभ्यो हि धनं दत्तं दातारमपि पीड़येत् । तस्माद्धर्मार्थमनृतमुक्त्वा नानृतवाग्भवेत् ॥ ६६ ॥ एष ते लक्षणोद्देशो मयोद्दिष्टो यथाविधि। एतच्छ्रुत्वा ब्रूहि पार्थ यदि वध्यो युधिष्ठिरः ॥ ६७ ॥

अर्ज्जुन उवाच। यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महामतिः। हितञ्चैव यथास्माकं तथैव वचनं तव ॥ ६८ ॥ भवान्मातृसमोऽस्माकं तथा पितृसमोऽपि च। गतिश्च परमा कृष्ण तेन ते वाक्यमुत्तमम् ॥ ६९ ॥ न हि ते त्रिषु लोकेषु विद्यतेऽविदितं क्वचित्। तस्माद्भवान् परं धर्मं वेद सर्व्वं यथातथम् ॥ ७० ॥ अवध्यं पाण्डवं मन्ये धर्मराजं युधिष्ठिरम्। अस्मिंस्तु मम सङ्कल्पे ब्रूहि कञ्चिदनुग्रहम्। इदञ्चापरमत्रैव शृणु हृत्स्थं विवक्षितम् ॥ ७१ ॥ जानासि दाशार्ह मम व्रतं त्वं यो मां ब्रूयात् कश्चन मानुषेषु। अन्यस्मै त्वं गाण्डिवं देहि पार्थ यस्त्वत्तोऽस्त्राद्वीर्य्यतो वा वरिष्ठः ॥ ७२ ॥ हन्यामहं केशव तं प्रसह्य भीमो हन्यात्तूवरकेति चोक्तः। तन्मे राजा प्रोक्तवांस्ते समक्षं धनुर्देहीत्यसकृद्वृष्णिवीर ॥ ७३ ॥ तं हन्याञ्चेत् केशव जीवलोके स्थाता नाहं कालमप्यल्पमात्रम्। ध्यात्वा नूनं चेतसा चापि युक्तो वधं राज्ञो भ्रष्टवीर्य्यो विचेता ॥ ७४ ॥ यथा प्रतिज्ञा मम लोकसिद्धा भवेत् सत्या धर्मभृतां वरिष्ठ। यथा जीवेत् पाण्डवोऽहञ्च कृष्ण तथा बुद्धिं दातुमद्यार्हसि त्वम् ॥ ७५ ॥

वासुदेव उवाच। राजा श्रान्तो दुःखितो विक्षतश्च कर्णेन सङ्ख्ये निशितैर्वाणसङ्घैः। पश्चाच्चायं सूतपुत्रेण वीर शरैर्भृशं ताड़ितोऽयुध्यमानः ॥ ७६ ॥ अतस्त्वमेतेन सरोषमुक्तो दुःखा-

न्वितेनेदमयुक्तरूपम्। आकोपितो ह्येष यदि स्म संख्ये कर्ण निहन्यादिति चाब्रवीत्त्वाम् ॥ ७७॥ जानाति तं पाण्डव एष चापि पापं लोके कर्णमसह्यमन्यैः। ततस्त्वमुक्तो भृशरोषितेन राज्ञा समक्षं परुषाणि पार्थ॥ ७८॥ नित्योद्युक्ते सततञ्चाप्रसह्ये कर्णे द्यूतं ह्यद्य रणे निबद्धम्। तस्मिन् हते कुरवो निर्ज्जिताः स्युरेवं बुद्धिः पार्थिवे धर्मपुत्रे ॥ ७९॥ ततो बधं नार्हति धर्मपुत्रस्त्वया प्रतिज्ञार्जुन पालनीया। जीवन्नयं येन मृतो भवेद्धि तन्मे निबोधेह तवानुरूपम् ॥ ८०॥ यदा मानं लभते माननार्हस्तदा स वै जीवति जीवलोके। यदावमानं लभते महान्तं तदा जीवन्मृत उच्यते सः॥ ८१॥ सम्मानितः पार्थिवोऽयं सदैव त्वया च भीमेन तथा यमाभ्याम्। वृद्धैश्च लोके पुरुषैश्च शूरैस्तस्यापमानं कलया प्रयुङ्क्ष्व ॥ ८२॥ त्वमित्यत्रभवन्तं हि ब्रूहि पार्थ युधिष्ठिरम्। त्वमित्युक्तो हि निहतोगुरुर्भवति भारत ॥८३॥ एवमाचर कौन्तेय धर्मराजे युधिष्ठिरे। अधर्मयुक्तं संयोगं कुरुष्वैवं कुरूद्वह ॥ ८४॥ अथर्वाङ्गिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः। अविचार्य्यैव कार्य्यैषा श्रेयस्कामैर्नरैः सदा ॥ ८५॥ अबधेन वधः प्रोक्तो यद्गुरुस्त्वमिति प्रभुः। तद्ब्रूहि त्वं यन्मयोक्तं धर्मराजस्य धर्मवित् ॥ ८६॥ बधं ह्ययं पाण्डव धर्मराजस्त्वत्तो युक्तं वेत्स्यते चैवमेषः। ततोऽस्य पादावभिवाद्य पश्चात् समं ब्रूयाः सान्त्वयित्वा च पार्थम् ॥ ८७॥ भ्राता प्राज्ञस्तव कोपं न जातु कुर्य्याद्राजा कञ्चन पाण्डवेय। मुक्तोऽनृतात् भ्रातृवधाच्च पार्थ हृष्टः कर्णं त्वं जहि सूतपुत्रम् ॥ ८८॥

इति कर्णपर्व्वणि कृष्णार्जुनसम्वादे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सञ्जय उवाच। इत्येवमुक्तस्तु जनार्द्दनेन पार्थः प्रशस्याथ सुहृद्वचस्तत्। ततोऽब्रवीदर्ज्जुनो धर्म्मराजमनुक्तपूर्व्वं परुषं प्रसह्य ॥१॥ अर्ज्जुन उवाच। मा त्वं राजन् व्याहर व्याहरस्व यस्तिष्ठसे क्रोशमात्रे रणाद्वै। भीमस्तु मामर्हति गर्हणाय यो युध्यते सर्व्वलोकप्रवीरैः ॥ २ ॥ काले हि शत्रून् परिपीड्य सङ्ख्ये हत्वा च शूरान् पृथिवीपतींस्तान्। रथप्रधानोत्तमनागमुख्यान् सादिप्रवेकानमितांश्च वीरान् ॥ ३ ॥ यः कुञ्जराणामधिकं सहस्रं हत्वानदत्तुमुलं सिंहनादम्। काम्बोजानामयुतं पार्व्वतीयान् मृगान् सिंहो विनिहत्येव चाजौ ॥ ४ ॥ सुदुष्करं कर्म्म करोति वीरः कर्त्तुं यथा नार्हसि त्वं कदाचित्। रथादवप्लुत्य गदां परामृषंस्तया निहत्याश्वरथद्विपान्रणे ॥ ५ ॥ वरासिना वाजिरथाश्वकुञ्जरांस्तथा रथाङ्गैर्धनुषा दहत्यरीन्। प्रमृद्य पद्भ्यामहितान्निहन्ति पुनस्तु दोर्भ्यां शतमन्युविक्रमः ॥ ६ ॥ महाबलो वैश्रवणान्तकोपमः प्रसह्य हन्ता द्विषतामनीकिनीम्। स भीमसेनोऽर्हति गर्हणां मे न त्वं नित्यं रक्ष्यसे यः सुहृद्भिः ॥ ७ ॥ महारथान्नागवरान् हयांश्च पदातिमुख्यानपि च प्रमथ्य। एको भीमो धार्त्तराष्ट्रेषु मग्नः स मामुपालब्धुमरिन्दमोऽर्हति ॥ ८ ॥ कलिङ्गवङ्गाङ्गनिषादमागधान् सदाममान्नीलबलाहकोपमान्। निहन्ति यः शत्रुगजाननेकान् स मामुपालब्धुमरिन्दमोऽर्हति ॥ ९ ॥ स युक्तमास्थाय रथं हि काले धनुर्व्विधुन्वन् शरपूर्णमुष्टिः। सृजत्यसौ शरवर्षाणि वीरो महाहवे मेघ इवाम्बुधाराः ॥ १० ॥ शतान्यष्टौ वारणानामपश्यं विशातितैः कुम्भकराग्रहस्तैः। भीमेनाजौ निहतान्यद्य वाणैः स मां क्रूरं वक्तुमर्हत्यरिघ्नः ॥ ११ ॥ बलन्तु वापि द्विजसत्तमानां वाच्यं बुधा बाहुबलं वदन्ति। त्वं वाग्बलो भारत निष्ठुरश्च त्वमेव मां वेत्सि यथाविधोऽहम् ॥ १२ ॥ यते हि नित्यं तव कर्त्तुमिष्टं दारैः सुतैर्जीवितेनात्मना च। एवं यन्मां

वाञ्छिमिच्छिन ह्यपि त्वत्तः सुखं न वयं विद्म किञ्चित् ॥ १३ ॥ मा नावमंस्थो द्रौपदीतल्पसंस्थो महारथान् प्रतिहन्मि त्वदर्थे। तेनाविषक्तो भारत निष्ठुरोऽपि त्वत्तः सुखं नाभिजानामि किञ्चित् ॥१४॥ प्रोक्तः स्वयं सत्यसन्धेन मृत्युस्तव प्रियार्थं नरदेव युद्धे। वीरः शिखण्डी द्रौपदोऽसौ महात्मा मयाभिगुप्तेन हतश्च तेन ॥ १५ ॥ न चाभिनन्दामि तवाधिराज्यं यतस्त्वमद्येष्वहिताय सक्तः। स्वयं कृत्वा पापमनार्य्यजुष्टमस्माभिर्वै तर्त्तुमिच्छस्यरींस्त्वम् ॥ १६ ॥ अक्षेषु दोषा बहवो विधर्माः श्रुतास्त्वया सहदेवोऽब्रवीद्यान्। तान्नैषि त्वं त्यक्तुमसाधुजुष्टांस्तेन स्म सर्वे निरयं प्रपन्नाः ॥ १७ ॥ सुखं त्वत्तो नाभिजानीम किञ्चिद्यतस्त्वमक्षैर्देवितुं संप्रवृत्तः। स्वयं कृत्वा व्यसनं पाण्डव त्वं भूयस्तीक्ष्णाः श्रावयस्यद्य वाचः ॥ १८ ॥ शेतेऽस्माभिर्निहता शत्रुसेना छिन्नैर्गात्रैर्भूमितले नदन्ती। त्वया हि तत् कर्म कृतं नृशंसं यस्माद्दोषः कौरवाणां वधश्च ॥ १९ ॥ हता उदीच्या निहताः प्रतीच्या नष्टाः प्राच्या दाक्षिणात्या विशस्ताः। कृतं कर्माप्रतिरूपं महद्भिस्तेषां योधैरस्मदीयैश्च युद्धे ॥ २० ॥ त्वं देविता त्वत्कृते राज्यनाशस्त्वत्सम्भवं नो व्यसनं नरेन्द्र। मास्मान् क्रूरैर्वाक्प्रतोदैस्तुदंस्त्वं भूयो राजन् कोपयेस्त्वल्पभाग्यः ॥ २१ ॥

सञ्जय उवाच। एता वाचः परुषाः सव्यसाची स्थिरप्रज्ञः श्रावयित्वातिरुक्षा। बभूवासौ विमना धर्म्मभीरुः कृत्वा प्राज्ञः पातकं किञ्चिदेवम् ॥ २२ ॥ ततोऽनुतेपे सुरराजपुत्रो विनिश्वसंश्चाप्यसिमुद्बवर्ह। तमाह कृष्णः किमिदं पुनर्भवान् विकोषमाकाशनिभं करोत्यसिम् ॥ २३ ॥ ब्रवीहि मां त्वं पुनरुत्तरं वचस्तथा प्रवक्ष्याम्यहमर्थसिद्धये। इत्येवमुक्तः पुरुषोत्तमेन सुदुःखितः केशवमर्जुनोऽब्रवीत् ॥ २४ ॥ अहं हनिष्ये स्वशरीरमेव प्रसह्य येनाहितमाचरं वै। निशाम्य तत् पार्थवचोऽब्रवीदिदं धनञ्जयं धर्म्मभृतां वरिष्ठः ॥ २५ ॥ राजानमेनं त्वमितीदमुक्त्वा किं कश्मलं

प्राविशः पार्थं घोरम् । त्वञ्चात्मानं हन्तुमिच्छसि वीर नेदं सद्भिः सेवितं वै किरीटिन् ॥ २६ ॥ धर्मात्मानं भ्रातरं ज्येष्ठमद्य खड्गेन चैनं यदि हन्या नृवीर । धर्माद्भीतस्तत् कथं नाम ते स्यात् किञ्चोत्तरं वाकरिष्यस्त्वमेव ॥ २७ ॥ सूक्ष्मो धर्मो दुर्विदश्चापि पार्थ विशेषतोऽज्ञैः प्रोच्यमानं निबोध । हत्वात्मानमात्मना प्राप्नुयास्त्वं वधाद्भ्रातुर्नरकञ्चातिघोरम् ॥ २८ ॥ ब्रवीहि वाचाद्य गुणानिहात्मनस्तथा हतात्मा भवितासि पार्थ ॥ २९ ॥ यथास्तु कृष्णेत्यभिनन्द्य तद्वचो धनञ्जयः प्राह धनुर्विनाम्य । युधिष्ठिरं धर्मभृतां वरिष्ठं शृणुष्व राजन्निति शक्रसूनुः ॥ ३० ॥ न मादृशोऽन्यो नरदेव विद्यते धनुर्द्धरो देवमृते पिनाकिनम् । अहं हि तेनानुमतो महात्मना क्षणेन हन्यां सचराचरं जगत् ॥ ३१ ॥ मया हि राजन् सदिगीश्वरा दिशो विजित्य सर्वा भवतः कृता वशे । स राजसूयश्च समाप्तदक्षिणः सभा च दिव्या भवतो ममौजसा ॥ ३२ ॥ पाणौ पृषत्का निशिता ममैव धनुश्च सज्यं विहितं सबाणम् । पादौ च मे सरथौ सध्वजौ च न मादृशं युद्धगतं जयन्ति ॥ ३३ ॥ हता उदीच्या निहताः प्रतीच्याः प्राच्या निरस्ता दाक्षिणात्या विशस्ताः । संशप्तकानां किञ्चिदेवावशिष्टं सर्वस्य सैन्यस्य हतं मयार्द्धम् ॥ ३४ ॥ शेते मया निहता भारतीया चमू राजन् देवचमूप्रकाशा । ये चास्त्रज्ञास्तानहं हन्मि चास्त्रैस्तस्माल्लोकान्नेह करोमि भस्मसात् ॥ ३५ ॥ जैत्रं रथं भीममास्थाय कृष्ण यावः शीघ्रं सूतपुत्रं निहन्तुम् । राजा भवत्वद्य सुनिर्वृतोऽयं कर्णं रणे नाशयितास्मि वाणैः ॥ ३६ ॥ अद्यापुत्रा सूतमाता भवित्री कुन्ती वाथो मया वा तेन वापि । सत्यं वदाम्यद्य न कर्णमाजौ शरैरहत्वा कवचं विमोक्ष्ये ॥ ३७ ॥

सञ्जय उवाच । इत्येवमुक्त्वा पुनरेव पार्थो युधिष्ठिरं धर्मभृतां वरिष्ठम् । विमुच्य शस्त्राणि धनुर्विसृज्य कोषे च खड्गं

विनिधाय तूर्णम् ॥ ३८ ॥ स व्रीड़या नम्रगिराः किरीटी युधिष्ठिरं प्राञ्जलिरभ्युवाच। प्रसीद राजन् क्षमयन् मयोक्तं काले भवान् वेत्स्यति तन्नमस्ते ॥ ३९ ॥ प्रसाद्य राजानमभित्रसाहं स्थितोऽब्रवीच्चैव पुनः प्रवीरः। नेदं चिरात् क्षिप्रमिदं भविष्यत्यावर्त्ततेऽसावभियामि चैनम् ॥ ४० ॥ याम्येव भीमं समरात् प्रमोक्तुं सर्वात्मना सूतपुत्रञ्च हन्तुम्। तव प्रियार्थं मम जीवितं हि ब्रवीमि सत्यं तदवेहि राजन् ॥ ४१ ॥ इति प्रयास्यन्नुपसङ्गृह्य पादौ समुत्थितो दीप्ततेजाः किरीटी ॥ ४२ ॥ एतच्छ्रुत्वा पाण्डवो धर्मराजो भ्रातुर्वाक्यं परुषं फाल्गुनस्य। उत्थाय तस्माच्छयनादुवाच पार्थं ततो दुःखपरीतचेताः ॥ ४३ ॥ कृतं मया पार्थ यथा न साधु येन प्राप्तं व्यसनं वः सुघोरम्। तस्माच्छिरश्छिन्धि ममेदमद्य कुलान्तकस्याधमपूरुषस्य ॥ ४४ ॥ पापस्य पापव्यसनान्वितस्य विमूढ़बुद्धेरलसस्य भीरोः। वृद्धावमन्तुः परुषस्य चैव किन्ते चिरं मे ह्यनुसृत्य रूक्षम् ॥ ४५ ॥ गच्छाम्यहं वनमेवाद्य पापः सुखं भवान् वर्त्ततां मद्विहीनः। योग्यो राजा भीमसेनो महात्मा क्लीवस्य वा मम किं राज्यकृत्यम् ॥ ४६ ॥ न चास्मि शक्तः परुषाणि सोढुं पुनस्तवेमानि रुषान्वितस्य। भीमोऽस्तु राजा मम जीवितेन न कार्य्यमद्यावमतस्य वीरः ॥ ४७ ॥ इतेऽवमुक्त्वा सहसोत्पपात राजा ततस्तच्छयनं विहाय। इयेष निर्गन्तुमथो वनाय तं वासुदेवः प्रणतोऽभ्युवाच ॥ ४८ ॥ राजन् विदितमेतत्ते यथा गाण्डीवधन्वनः। प्रतिज्ञा सत्यसन्धस्य गाण्डीवं प्रति विश्रुता ॥ ४९ ॥ ब्रूयाद्य एनं गाण्डीवं देह्यन्यस्मै त्वमित्युत। वध्योऽस्य स पुमांल्लोके त्वया चोक्तोऽयमीदृशम् ॥ ५० ॥ ततः सत्यां प्रतिज्ञां तां पार्थेन प्रतिरक्षता। मच्छन्दादवमानोऽयं कृतस्तव महीपते। गुरूणामवमानो हि वध इत्यभिधीयते ॥ ५१ ॥ तस्मात्त्वं वै महाबाहो मम पार्थस्य चोभयोः। व्यतिक्रममिमं राजन् स

संरब्धार्जुनं प्रति ॥ ५२ ॥ शरणं त्वां महाराज प्रपन्नौ स्व उभावपि। क्षन्तुमर्हसि मे राजन् प्रणतस्याभियाचतः ॥ ५३ ॥ राधेयस्याद्य पापस्य भूमिः पास्यति शोणितम्। सत्यं ते प्रतिजानामि हतं विद्धय्य सूतजम। यस्येच्छसि वधं तस्य गतमप्यद्य जीवितम् ॥ ५४ ॥ इति कृष्णवचः श्रुत्वा धर्मराजो युधिष्ठिरः। ससम्भ्रमं हृषीकेशमुत्थाप्य प्रणतं तदा ॥ ५५ ॥ कृताञ्जलिस्ततो वाक्यमुवाचानन्तरं वचः। एवमेव यथात्थत्वमस्त्वेषोऽतिक्रमो मम ॥ ५६ ॥ अनुनीतोऽस्मि गोविन्द तारितश्चास्मि माधव। मोक्षिता व्यसनाद्घोरादहमद्य त्वयाच्युत ॥ ५७ ॥ भवन्तं नाथमासाद्य ह्यावां व्यसनसागरात्। घोरादद्य समुत्तीर्णावुभावज्ञानमोहितौ ॥ ५८ ॥ त्वद्बुद्धिप्लवमासाद्य दुःखशोकार्णवादयम्। समुत्तीर्णाः सहामात्याः सनाथाः स्म त्वयाच्युत ॥ ५९ ॥

इति कर्णपर्वणि युधिष्ठिरप्रबोधने सप्ततितमोऽध्यायः ॥ ७० ॥

---

सञ्जय उवाच। इति स्म कृष्णवचनात् प्रत्युच्चार्य्य युधिष्ठिरम्। बभूव विमनाः पार्थः किञ्चित् कृत्वेव पातकम् ॥ १ ॥ ततोऽब्रवीद्वासुदेवः प्रहसन्निव पाण्डवम् ॥ २ ॥ कथं नाम भवेदेतद्यदि त्वं पार्थ धर्मजम्। असिना तीक्ष्णधारेण हन्या धर्मे व्यवस्थितम् ॥ ३ ॥ त्वमितुक्त्वाथ राजानमेवं कश्मलमाविशः। हत्वा तु नृपतिं पार्थ अकरिष्यः किमुत्तरम्। एवं हि दुर्विदो धर्मो मन्दप्रज्ञैर्विशेषतः ॥ ४ ॥ स भवान् धर्मभीरुत्वात् ध्रुवमेष्यन्महत्तमः। नरकं घोररूपञ्च भ्रातुर्ज्येष्ठस्य वै वधात् ॥ ५ ॥ स त्वं धर्मभृतां श्रेष्ठं राजानं धर्मसंहितम्। प्रसादय कुरुश्रेष्ठमेतदत्र मतं मम ॥ ६ ॥ प्रसाद्य भक्त्या राजानं प्रीते चैव युधिष्ठिरे।

प्रयावस्त्वरितो योद्धुं सूतपुत्ररथं प्रति ॥ ७ ॥ हत्वा तु समरे कर्णं त्वमद्य निशितैः शरैः । विपुलां प्रीतिमाधत्स्व धर्मपुत्रस्य मानद ॥ ८ ॥ एतदद्य महाबाहो प्राप्तकालं मतं मम । एवंकृते कृतञ्चैव तव कार्य्यं भविष्यति ॥ ९ ॥ ततोऽर्जुनो महाराज लज्जया वै समन्वितः । धर्मराजस्य चरणौ प्रपद्य शिरसा नतः ॥ १० ॥ उवाच भरतश्रेष्ठं प्रसीदेति पुनः पुनः । क्षमस्व राजन् यत् प्रोक्तं धर्मकामेण भीरुणा ॥ ११ ॥

सञ्जय उवाच । दृष्ट्वा तु पतितं पद्भ्यां धर्मराजो युधिष्ठिरः । धनञ्जयममित्रघ्नं रुदन्तं भरतर्षभ ॥ १२ ॥ उत्थाप्य भ्रातरं राजा धर्मराजो धनञ्जयम् । समाश्लिष्य च सस्नेहं प्ररुरोद महीपतिः ॥ १३ ॥ रुदित्वा सुचिरं कालं भ्रातरौ सुमहाद्युती । कृतशौचौ महाराज प्रीतिमन्तौ बभूवतुः ॥ १४ ॥ तत आश्लिष्य तं प्रेम्णा मूर्द्ध्नि चाघ्राय पाण्डवः । प्रीत्या परमया युक्तः प्रस्मयंश्चाब्रवीज्जयम् ॥ १८ ॥ कर्णेन मे महाबाहो सर्वसैन्यस्य पश्यतः । कवचञ्च ध्वजञ्चैव धनुः शक्तिर्हयाः शराः । शरैः कृत्ता महेष्वास यतमानस्य संयुगे ॥ १६ ॥ सोऽहं ज्ञात्वा रणे तस्य कर्म दृष्ट्वा च फाल्गुन । व्यवसीदामि दुःखेन न च मे जीवितं प्रियम् ॥ १७ ॥ न चेदद्य हि तं वीरं निहनिष्यसि संयुगे । प्राणानेव परित्यक्ष्ये जीवितार्थो हि को मम ॥ १८ ॥ एवमुक्तः प्रत्युवाच विजयो भरतर्षभ ॥ १९ ॥ सत्येन ते शपे राजन् प्रसादेन तथैव च । भीमेन च नरश्रेष्ठ यमाभ्याञ्च महीपते ॥ २० ॥ यथाद्य समरे कर्णं हनिष्यामि हतोऽपि वा । महीतले पतिष्यामि सत्येनायुधमालभे ॥ २१ ॥ एवमाभाष्य राजानमब्रवीन्माधवं वचः । अद्य कर्णं रणे कृष्ण सूदयिष्ये न संशयः । तव बुद्ध्या हि भद्रं ते वधस्तस्य दुरात्मनः ॥ २२ ॥ एवमुक्तोऽब्रवीत् पार्थं केशवो राजसत्तम । शक्तोऽसि भरतश्रेष्ठ हन्तुं कर्णं महाबलम् ॥ २३ ॥

एष चापि हि मे कामो नित्यमेव महारथ। कथं भवान्रणे कर्णं निहन्यादिति सत्तम ॥ २४ ॥ भूयस्त्वोवाच मतिमान् माधवो धर्मनन्दनम्। युधिष्ठिरेमं वीभत्सुं त्वं सान्त्वयितुमर्हसि ॥२५॥ अनुज्ञातुञ्च कर्णस्य वधायाद्य दुरात्मनः। श्रुत्वा ह्यहमयञ्चैव त्वां कर्णशरपीड़ितम्। प्रवृत्तिं ज्ञातुमायाताविहावां पाण्डुनन्दन ॥ २६ ॥ दिष्ट्यासि राजन्न हतो दिष्ट्या न ग्रहणं गतः। परिसान्त्वय वीभत्सुं जयमाशाधि चानघ ॥ २७ ॥

युधिष्ठिर उवाच। एह्येहि पार्थ वीभत्सो मां परिष्वज पाण्डव। वक्तव्यमुक्तोऽस्मि हितं त्वया क्षान्तञ्च तन्मया ॥ २८ ॥ अहं त्वामनुजानामि जहि कर्णं धनञ्जय। मन्युञ्च मा कृथाः पार्थ यन्मयोक्तोऽसि दारुणम् ॥ २९ ॥

सञ्जय उवाच। ततो धनञ्जयो राजन् शिरसा प्रणतस्तदा। पादौ जग्राह पाणिभ्यां भ्रातुर्ज्येष्ठस्य मारिष ॥ ३० ॥ तमुत्थाप्य ततो राजा परिष्वज्य च पीड़ितम्। मूर्द्ध्न्युपाघ्राय चैवैनमिदं पुनरुवाच ह ॥ ३१ ॥ धनञ्जय महाबाहो मानितोऽस्मि दृढ़ं त्वया। माहात्म्यं विजयञ्चैव भूयः प्राप्नुहि शाश्वतम् ॥ ३२ ॥

अर्जुन उवाच। अद्य तं पापकर्म्माणं सानुबन्धं रणे शरैः। नयाम्यन्तं समासाद्य राधेयं बलगर्वितम् ॥ ३३ ॥ येन त्वं पीड़ितो बाणैर्दृढ़मायम्य कार्मुकम्। तस्याद्य कर्म्मणः कर्णः फलं प्राप्स्यति दारुणम् ॥ ३४ ॥ अद्य त्वामनुयास्यामि कर्णं हत्वा महीपते। सभाजयितुमाक्रन्दादिति सत्यं ब्रवीमि ते ॥ ३५ ॥ नाहत्वा विनिवर्त्तिष्ये कर्णमद्य महारणात्। इति सत्येन ते पादौ स्पृशामि जगतीपते ॥ ३६ ॥

सञ्जय उवाच। इति ब्रुवाणं सुमनाः किरीटिनं युधिष्ठिरः प्राह वचो बृहत्तरम् ॥ ३७ ॥ यशोऽक्षय जीवितमीप्सितं ते जयं सदा वीर्य्यमरिक्षयं तथा। प्रयाहि वृद्धिञ्च दिशन्तु देवता

यथाहमिच्छामि तवास्तु तत्तथा। प्रयाहि तूर्णं जहि कर्ण-
माहवे पुरन्दरो वृत्रमिवात्मनुद्धये ॥ ३८ ॥

इति कर्णपर्व्वणि युधिष्ठिरार्जुनसंवादे एकसप्ततोऽध्यायः ॥ ७१ ॥

---

सञ्जय उवाच। प्रसाद्य धर्म्मराजानं प्रहृष्टेनान्तरात्मना।
पार्थः प्रोवाच गोविन्दं सूतपुत्रवधोद्यतः ॥ १ ॥ कल्पतां मे रथो
भूयो युज्यन्ताञ्च हयोत्तमाः। आयुधानि च सर्व्वाणि सज्यन्तां वै
महारथे ॥ २ ॥ उपावृत्ताश्च तुरगाः शिक्षिताश्चाश्वसादिभिः।
रथोपकरणैः सज्जा उपायान्तु त्वरान्विताः। प्रयाहि शीघ्रं
गोविन्द सूतपुत्रजिघांसया ॥ ३ ॥ एवमुक्तो महाराज फाल्गुनेन
महात्मना। उवाच दारुकं कृष्णः कुरु सर्व्वं यथाब्रवीत्। अर्जुनो
भरतश्रेष्ठः श्रेष्ठः सर्व्वधनुष्मताम् ॥ ४ ॥ आज्ञप्तस्त्वथ कृष्णेन
दारुको राजसत्तम। योजयामास स रथं वैयाघ्रं शत्रुतापनम्।
सज्जं निवेदयामास पाण्डवस्य महात्मनः ॥ ५ ॥ युक्तन्तु तं रथं
दृष्ट्वा दारुकेन महात्मना। आपृच्छ्य धर्म्मराजानं ब्राह्मणान्
स्वस्तिवाच्य च। सुमङ्गलं स्वस्त्ययनमारुरोह रथोत्तमम् ॥ ६ ॥
तस्य राजा महाप्राज्ञो धर्म्मराजो युधिष्ठिरः। आशिषोऽयुङ्क्त
स ततः प्रायात् कर्णरथं प्रति ॥ ७ ॥ तं प्रयान्तं महेष्वासं दृष्ट्वा
भूतानि भारत। निहतं मेनिरे कर्णं पाण्डवेन महात्मना ॥ ८ ॥
वभूवुर्विमनाः सर्व्वा दिशो राजन् समन्ततः। चाषाश्च शतपत्राश्च
क्रौञ्चाश्चैव जनेश्वर। प्रदक्षिणमकुर्व्वन्त तदा वै पाण्डुनन्दनम् ।९॥
बहवः पक्षिणो राजन् पुन्नामानः शुभाः शिवाः। त्वरयन्तोऽर्ज्जुनं
युद्धे हृष्टरूपा ववाशिरे ॥ १० ॥ कङ्का गृध्रा बकाः श्येनाः वाय-
साश्च विशाम्पते। अग्रतस्तस्य गच्छन्ति भक्ष्यहेतोर्भयानकाः ॥११॥
निमित्तानि च धन्यानि पाण्डवस्य शशंसिरे। विनाशमरिसैन्यानां

कर्णस्य च वधं प्रति ॥ १२ ॥ प्रयातस्याथ पार्थस्य महान् खेदो व्यजायत । चिन्ता च विपुला जज्ञे कथञ्चेदं भविष्यति ॥ १३ ॥ ततो गाण्डीवधन्वानमब्रवीन्मधुसूदनः । दृष्ट्वा पार्थं तथा यान्तं चिन्तापरिगतं तदा ॥ १४ ॥

वासुदेव उवाच । गाण्डीवधन्वन् संग्रामे ये त्वया धनुषा जिताः । न तेषां मानुषो जेता त्वदन्य इह विद्यते ॥ १५ ॥ दृष्टा हि बहवः शूराः शक्रतुल्यपराक्रमाः । त्वां प्राप्य समरे शूरं ये गताः परमां गतिम् ॥ १६ ॥ को हि द्रोणञ्च भीष्मञ्च भगदत्तञ्च मारिष । विन्दानुविन्दावावन्तौ काम्बोजञ्च सुदक्षिणम् ॥ १७ ॥ श्रुतायुधं महावीर्य्यमयुतायुधमेव च । प्रत्युद्गम्य भवेत् क्षेमी यो न स्यात् त्वमिव प्रभो ॥ १८ ॥ तव ह्यस्त्राणि दिव्यानि लाघवं बलमेव च । असम्मोहश्च युद्धेषु विज्ञानस्य च सन्ततिः । वेधः पातश्च लक्ष्येषु योगश्चैव तवार्जुन ॥ १९ ॥ भवान् देवान् सगन्धर्व्वान् निहन्यात् सचराचरान् । पृथिव्यां हि रणे पार्थ न योद्धा त्वत्समः पुमान् ॥ २० ॥ धनुर्ग्रहा हि ये केचित् क्षत्रिया युद्धदुर्मदाः । आदेवात् त्वत्समं तेषां न पश्यामि शृणोमि वा ॥ २१ ॥ ब्रह्मणा च प्रजाः सृष्टा गाण्डीवञ्च महद्धनुः । येन त्वं युध्यसे पार्थ तस्मान्नास्ति त्वया समः ॥ २२ ॥ अवश्यन्तु मया वाच्यं यत् पथ्यं तव पाण्डव । मावमंस्था महाबाहो कर्णमाहवशोभिनम् ॥ २३ ॥ कर्णो हि बलवान् दृप्तः कृतास्त्रश्च महारथः । कृती च चित्रयोधी च देशकालस्य कोविदः ॥ २४ ॥ बहुनात्र किमुक्तेन संक्षेपाच्छृणु पाण्डव । त्वत्समं त्वद्विशिष्टं वा मन्ये कर्णं महारथम् । परमं यत्नमास्थाय त्वया वध्यो महाहवे ॥ २५ ॥ तेजसा वह्निसदृशो वायुवेगसमो जवे । अन्तकप्रतिमः कोपे सिंहसंहननो बली ॥२६॥ अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्ज्जयः । अभिमानी च शूरश्च प्रवीरः प्रियदर्शनः ॥ २७ ॥ सर्व्वैर्योधगुणैर्युक्तो मित्राणामभय-

क्रूरः । सततं पाण्डवद्वेषी धार्त्तराष्ट्रहिते रतः ॥ २८ ॥ सर्वै-रवध्यो राधेयो देवैरपि सवासवैः । ऋते त्वामिति मे बुद्धिस्तदद्य जहि सूतजम् ॥ २९ ॥ देवैरपि हि संयत्तैर्बिभ्रद्भिर्मांसशोणि-तम् । अशक्यः स रथो जेतुं सर्वैरपि युयुत्सुभिः ॥ ३० ॥ दुरा-त्मानं पापवृत्तं नृशंसं दुष्टप्रज्ञं पाण्डवेयेषु नित्यम् । हीनस्वार्थं पाण्डवेयैर्विरोधे हत्वा कर्णं निश्चितार्थो भवाद्य ॥ ३१ ॥ तं सूत-पुत्रं रथिनां वरिष्ठं निष्कालिकं कालवशं नयाद्य । सदावजानाति हि पाण्डुपुत्रानसौ दर्पात् सूतपुत्रो दुरात्मा ॥ ३२ ॥ आत्मानं मन्यते वीरं येन पापः सुयोधनः । तमद्य मूलं पापानां जहि सौतिं धनञ्जय ॥ ३३ ॥ खड्गजिह्वं धनुरास्यं शरदंष्ट्रं तर-स्विनम् । दृप्तं पुरुषशार्दूलं जहि कर्णं धनञ्जय ॥ ३४ ॥ अह-न्त्वामनुजानामि वीर्य्येण च बलेन च । जहि कर्णं रणे शूरं मातङ्गमिव केशरी ॥ ३५ ॥ यस्य वीर्य्येण वीर्य्यं ते धार्त्तराष्ट्रो-ऽवमन्यते । तमद्य पार्थ संग्रामे कर्णं वैकर्त्तनं जहि ॥ ३६ ॥

इति कर्णपर्वणि कृष्णार्जुनसंवादे द्विसप्ततोऽध्यायः ॥ ७२ ॥

---

सञ्जय उवाच । ततः पुनरमेयात्मा केशवोऽर्जुनमब्रवीत् । कृतसङ्कल्पमायान्तं वधे कर्णस्य भारत ॥ १ ॥ अद्य सप्तदशाहानि वर्त्तमानस्य भारत । विनाशस्यातिघोरस्य नरवारणवाजिनाम् ॥ २ ॥ भूत्वा हि विपुला सेना तावकानां परैः सह । अन्योऽन्यं समरं प्राप्य किञ्चिच्छेषा विशाम्पते ॥ ३ ॥ भूत्वा हि कौरवाः पार्थ प्रभूतगजवाजिनः । त्वां वै शत्रुं समासाद्य विनष्टा रण-मूर्द्धनि ॥ ४ ॥ एते तु पृथिवीपालाः सृञ्जयाश्च समागताः । त्वां समासाद्य दुर्द्धर्षं पाण्डवाश्च व्यवस्थिताः ॥ ५ ॥ पाञ्चालैः पाण्डवै-र्मत्स्यैः कारूषैश्चेदिभिः सह । त्वया गुप्तैरमित्रघ्न कृतः शत्रुगण-

त्त्वयः ॥ ६ ॥ को हि शक्तो रणे जेतुं कौरवांस्तात सङ्गतान्।
अन्यत्र पाण्डवान् युद्धे त्वया गुप्तान् महारथान् ॥ ७ ॥ शक्तस्त्वं
हि रणे जेतुं ससुरासुरमानुषान्। त्रीलोकान् समरे युक्तान्
किं पुनः कौरवं वलम् ॥ ८॥ भगदत्तञ्च राजानं कोऽन्यः शक्त-
स्त्वया विना। जेतुं पुरुषशार्दूल योऽपि स्याद्वासवोपमः ॥ ९ ॥
तथेमां विपुलां सेनां गुप्तां पार्थ त्वयानघ। न शेकुः पार्थिवाः
सर्वे चक्षुर्भिरपि वीक्षितुम् ॥ १० ॥ तथैव सततं पार्थ रक्षिताभ्यां
त्वया रणे। धृष्टद्युम्नशिखण्डिभ्यां भीष्मद्रोणौ निपातितौ ॥ ११ ॥
को हि शक्तो रणे पार्थ भारतानां महारथौ। भीष्मद्रोणौ युधा
जेतुं शक्रतुल्यपराक्रमौ ॥ १२ ॥ को हि शान्तनवं भीष्मं द्रोणं
वैकर्त्तनं कृपम्। द्रौणिञ्च सौमदत्तिञ्च कृतवर्माणमेव च ॥ १३ ॥
सैन्धवं मद्रराजानं राजानञ्च सुयोधनम्। वीरान् कृतास्त्रान्
समरे सर्वानेवानिवर्त्तिनः ॥ १४ ॥ अक्षौहिणीपतीनुग्रान् संह-
तान् युद्धदुर्मदान्। त्वामृते पुरुषव्याघ्र जेतुं शक्तः पुमानिह ॥१५॥
श्रेण्यश्च वहुलाः क्षीणाः प्रदीर्णाश्वरथद्विपाः। नानाजनपदा-
श्चोग्राः क्षत्रियाणाममर्षिणाम् ॥ १६ ॥ गोवासदासमीयानां वसा-
तीनाञ्च भारत। प्राच्यानां वाटधानानां भोजानाञ्चाभिमानिनाम्
॥ १७ ॥ उदीर्णाश्वगजा सेना ब्रह्मक्षत्रस्य भारत। त्वां समा-
साद्य निधनं गता भीमञ्च भारत ॥ १८ ॥ उग्राश्च भीमकर्माण-
स्तुखारा यवनाः खशाः। दार्वाभिसारा दरदाः शका रमठ-
तङ्गनाः ॥ १९ ॥ अन्ध्रकाश्च पुलिन्दाश्च किरातास्चोग्रविक्रमाः।
म्लेच्छाश्च पार्वतीयाश्च सागरानूपवासिनः ॥ २० ॥ संरम्भिणो
युद्धशौण्डा वलिनो दण्डपाणयः। एते सुयोधनस्यार्थे संरब्धाः
कुरुभिः सह। न शक्या युधि निर्जेतुं त्वदन्येन परन्तप ॥ २१ ॥
धार्त्तराष्ट्रमुदग्रं हि व्यूढं दृष्ट्वा महद्वलम्। यदि त्वं न भवेस्त्राता
प्रतीयात् को नु मानवः ॥ २२ ॥ तत् सागरमिवोद्धूतं रजसा

संवृतं बलम्। विदार्थ्य पाण्डवैः क्रुद्धस्त्वया गुप्तैर्हतं विभो॥ २३॥ मागधानामधिपतिर्जयत्सेनो महाबलः। अद्य सप्तैव चाहानि हतः संख्येऽभिमन्युना॥ २४॥ ततो दशसहस्राणि गजानां भीमकर्मणाम्। जघान गदया भीमस्तस्य राज्ञः परिच्छदम्॥२५॥ ततोऽन्येऽभिहता नागा रथाश्च शतशो बलात्॥ २६॥ तदेवं समरे पार्थ वर्त्तमाने महाभये। भीमसेनं समासाद्य त्वाञ्च पाण्डव कौरवाः। सवाजिरथमातङ्गा मृत्युलोकमितो गताः॥ २७॥ तथा सेनामुखे तत्र निहते पार्थ पाण्डवः। भीष्मः प्रासृजदुग्राणि शरजालानि मारिष॥ २८॥ स चेदिकाशिपाञ्चालान् करूषा-न्मत्स्यकेकयान्। शरैः प्रच्छाद्य निधनमनयत् परमास्त्रवित्॥२९॥ तस्य चापच्युतैर्बाणैः परदेहविदारणैः। पूर्णमाकाशमभवत् रुक्म-पुङ्खैरजिह्मगैः॥ ३०॥ हन्याद्दशसहस्राणि एकैकेन तु मुष्टिना। लक्षं नरद्विपान् हत्वा सनेतान् स महाबलान्॥ ३१॥ गत्या दशस्या ते गत्वा जघ्नर्वाजिरथद्विपान्। हित्वा नवगतीर्दुष्टाः स बाणानाहवेऽत्यजत्॥ ३२॥ दिनानि दश भीष्मेण निघ्नता तावकं बलम्। शून्याः कृता रथोपस्था हताश्च गजवाजिनः॥ ३३॥ दर्शयित्वात्मनो रूपं रुद्रोपेन्द्रसमं युधि। पाण्डवानामनीकानि निगृह्यासौ व्यशातयत्॥ ३४॥ विनिघ्नन् पृथिवीपालांश्चेदिपाञ्चाल-केकयान्। अदहत् पाण्डवीं सेनां रथाश्वगजसंकुलाम्। मज्जन्त-मप्लवे मन्दमुज्जिहीर्षुः सुयोधनम्॥ ३५॥ तथा चरन्तं समरे तपन्तमिव भास्करम्। पदातिकोटिसाहस्राः प्रवरायुधपाणयः। न शेकुः सृञ्जया द्रष्टुं तथैवान्ये महीक्षितः॥ ३६॥ विचरन्तं तथा तन्तु संग्रामे जितकाशिनम्। सर्वोद्योगेन महता पाण्डवाः सम-भिद्रवन्॥ ३७॥ स तु विद्राव्य समरे पाण्डवान् सृञ्जयानपि। एक एव रणे भीष्म एकवीरत्वमागतः॥ ३८॥ तं शिखण्डी समासाद्य त्वया गुप्तो महाव्रतम्। जघान पुरुषव्याघ्रं शरैः

सन्नतपर्वभिः ॥ ३९ ॥ स एष पतितः शेते शरतल्पे पितामहः। त्वां प्राप्य पुरुषव्याघ्रं वृत्रः प्राप्येव वासवम् ॥ ४० ॥ द्रोणः पञ्च दिनान्युग्रो विधम्य रिपुवाहिनीम्। कृत्वा व्यूहमभेद्यञ्च पातयित्वा महारथान् ॥ ४१ ॥ जयद्रथस्य समरे कृत्वा रक्षां महारथः। अन्तकप्रतिमश्चोग्रो रात्रियुद्धेऽदहत् प्रजाः ॥ ४२ ॥ दग्ध्वा योधाञ्छरैर्वीरो भारद्वाजः प्रतापवान्। धृष्टद्युम्नं समासाद्य स गतः परमां गतिम् ॥ ४३ ॥ यदि चाद्य भवान् युद्धे सूतपुत्रमुखाग्रथान्। नावारयिष्यत् संग्रामे न स्म द्रोणो व्यनङ्क्षत ॥ ४४ ॥ भवता तु बलं सर्वं धार्त्तराष्ट्रस्य वारितम्। ततो द्रोणो हतो युद्धे पार्षतेन धनञ्जय ॥ ४५ ॥ क एवान्यो रणे कुर्य्यात्त्वदन्यः क्षत्रियो युधि। यादृशं ते कृतं पार्थ जयद्रथवधं प्रति ॥ ४६ ॥ निवार्य्य सेनां महतीं हत्वा शूरांश्च पार्थिवान्। निहतः सैन्धवो राजा त्वयास्त्रबलतेजसा ॥ ४७ ॥ आश्चर्य्यं सिन्धुराजस्य वधं जानन्ति पार्थिवाः। अनाश्चर्य्यं हि तत्त्वत्तस्त्वं हि पार्थ महारथः ॥ ४८ ॥ त्वां हि प्राप्य रणे क्षत्रमेकाहादिति भारत। नश्यमानमहं युक्तं मन्ये यमिति मे मतिः ॥ ४९ ॥ सेयं पार्थ चमूर्घोरा धार्त्तराष्ट्रस्य संयुगे। हतसर्व्वस्ववीरा हि भीष्मद्रोणौ यदा हतौ ॥ ५० ॥ शीर्णप्रवरयोधाद्य हतवाजिरथद्विपा। हीना सूर्य्येन्दुनक्षत्रैर्द्यौरिवाभाति भारती ॥ ५१ ॥ विध्वस्ता हि रणे पार्थ सेनेयं भीमविक्रमा। आसुरीव पुरा सेना शक्रस्येव पराक्रमैः ॥ ५२ ॥ तेषां हतावशिष्टास्तु सन्ति पञ्च महारथाः। अश्वत्थामा कृतवर्मा कर्णो मद्राधिपः कृपः ॥ ५३ ॥ तांस्त्वमद्य नरव्याघ्र हत्वा पञ्च महारथान्। हतामित्रः प्रयच्छोर्वीं राज्ञे सद्वीपपत्तनाम् ॥ ५४ ॥ साकाशजलपातालां सपर्वतमहावनाम्। प्राप्नोत्वमितवीर्य्यश्रीरद्य पार्थो वसुन्धराम् ॥ ५५ ॥ एतां पुरा विष्णुरिव हत्वा दैतेयदानवान्। प्रयच्छ मेदिनीं राज्ञे शक्रायेव

यथा हरिः ॥ ५६ ॥ अद्य मोदन्तु पाञ्चाला निहतेष्वरिषु त्वया। विष्णुना निहतेष्वाजौ दानवेष्विव देवताः ॥ ५७ ॥ यदि वा द्विपदां श्रेष्ठं द्रोणं मानयतो गुरुम्। अश्वत्थाम्नि कृपा तेऽस्ति कृपे चाचार्य्यगौरवात् ॥ ५८ ॥ अत्यन्तापचितान् वन्धून् मानयन् मातृवान्धवान्। कृतवर्म्माणमासाद्य न नेष्यसि यमक्षयम् ॥ ५९ ॥ भ्रातरं मातुरासाद्य शल्यं मद्रजनाधिपम्। यदि त्वमरविन्दाक्ष दयावान्न जिघांससि ॥ ६० ॥ इमं पापमतिं क्षुद्रमत्यन्तं पाण्डवान् प्रति। कर्णमद्य नरश्रेष्ठ जह्याशु निशितैः शरैः ॥ ६१ ॥ एतत्ते सुकृतं कर्म नात्र किञ्चन युज्यते। वयमप्यनुजानीमो नात्र दोषोऽस्ति कश्चन ॥ ६२ ॥ दहने यत् सपुत्राया निशि मातुस्तवानघ। द्यूतार्थे यच्च युष्मासु प्रावर्त्तत सुयोधनः। तस्य सर्व्वस्य दुष्टात्मा कर्णो वै मूलमित्युत ॥ ६३ ॥ कर्णाद्धि मन्यते त्राणं नित्यमेव सुयोधनः। ततो मामपि संरब्धो निग्रहीतुं प्रचक्रमे ॥ ६४ ॥ स्थिरा बुद्धिर्नरेन्द्रस्य धार्त्तराष्ट्रस्य मानद। कर्णः पार्थान्रणे सर्वान् विजेष्यति न संशयः ॥ ६५ ॥ कर्णमाश्रित्य कौन्तेय धार्त्तराष्ट्रेण विग्रहः। रोचितो भवता सार्द्धं जानतापि वलं तव ॥ ६६ ॥ कर्णोऽपि भाषते नित्यमहं पार्थान् समागतान्। वासुदेवञ्च दाशार्हं विजेष्यामि महारथम् ॥ ६७ ॥ प्रोत्साहयन् दुरात्मानं धार्त्तराष्ट्रं सुदुर्मतिः। समितौ गर्ज्जते कर्णस्तमद्य जहि भारत ॥ ६८ ॥ यच्च युष्मासु पापं वै धार्त्तराष्ट्रः प्रयुक्तवान्। तत्र सर्व्वत्र दुष्टात्मा कर्णः पापमतिर्मुखम् ॥ ६९ ॥ यच्च तद्धार्त्तराष्ट्रस्य क्रूरैः षड्भिर्महारथैः। अपश्यं निहतं वीरं सौभद्रमृषभेक्षणम् ॥ ७० ॥ द्रोणद्रौणिकृपान् वीरान् कर्षयन्तं नरर्षभान्। निर्मनुष्यांश्च मातङ्गान् विरथांश्च महारथान् ॥ ७१ ॥ व्यश्वारोहांश्च तुरगान् पत्तीन् व्यायुधजीवितान्। कुर्वन्तमृषभस्कन्धं कुरुवृष्णियशस्करम् ॥ ७२ ॥ विधमन्तमनीकानि व्यथयन्तं

महारथान् मनुष्यवाजिमातङ्गान् प्रहिणुन्तं यमक्षयम् ॥ ७३ ॥ शरैः सौभद्रमायान्तं दहन्तमरिवाहिनीम् । तन्मे दहति गात्राणि सखि सत्येन ते शपे ॥ ७४ ॥ यस्तत्रापि च दुष्टात्मा कर्णोऽभ्यद्रुह्यत प्रभो । अशक्नुवंश्चाभिमन्योः पार्थं स्थातुं रणेऽग्रतः ॥ ७५ ॥ सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः । निश्वसन् क्रोधसंदीप्तो विमुखः सायकार्द्दितः ॥ ७६ ॥ अपयानकृतोत्साहो निरुत्साहश्च जीविते । स्थितः स विह्वलः सङ्ख्ये प्रहारजनितश्रमः ॥७७॥ अथ द्रोणस्य समरे तत्कालसदृशं तदा । श्रुत्वा कर्णो वचः क्रूरं ततश्चिच्छेद कार्मुकम् ॥ ७८ ॥ ततश्छिन्नायुधं तेन रणे पञ्च महारथाः । तञ्चैव निकृतिप्रज्ञाः प्राहनञ्छरवृष्टिभिः ॥ ७९ ॥ तस्मिन् विनिहते वीरे सर्व्वेषां दुःखमाविशत् । प्राहसत् स तु दुष्टात्मा कर्णः स च सुयोधनः ॥ ८० ॥ यच्च कर्णोऽब्रवीत् कृष्णां सभायां परुषं वचः । प्रमुखे पाण्डवेयानां कुरूणाञ्च नृशंसवत् ॥ ८१ ॥ विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः । पतिमन्यं पृथुश्रोणि वृणीष्व मृदुभाषिणि ॥ ८२ ॥ एषा त्वं धृतराष्ट्रस्य दासीभूता निवेशनम् । प्रविशारालपक्ष्माक्षि न सन्ति पतयस्तव ॥ ८३ ॥ पाण्डवाः प्रभवन्त्यद्य न ते कृष्णे कथञ्चन । दासभार्य्यासि पाञ्चालि स्वयं दासीति शोभने ॥ ८४ ॥ अद्य दुर्य्योधनो ह्येकः पृथिव्यां नृपतिः स्मृतः । सर्व्वे तस्य महीपाला योगक्षेममुपासते ॥ ८५ ॥ पश्येदानीं यथा भद्रे विनष्टान् पाण्डवान् समम् । अन्योऽन्यं समुदीक्षन्ते धार्त्तराष्ट्रस्य तेजसा ॥ ८६ ॥ व्यक्तं षण्ढतिला ह्येते निरये च निमज्जिताः । प्रेष्यत्वमपि राजेन्द्रमुपयास्यन्ति कौरवम् ॥ ८७ ॥ इत्युक्तवानधर्मज्ञस्तदा परमदुर्मतिः । पापः पापं वचः कर्णः शृण्वतस्तव भारत ॥ ८८ ॥ अद्य पापस्य तद्वाक्यं सुवर्णविकृताः शराः । शमयन्तु शिलाधौतास्त्वयास्ता जीवितच्छिदः ॥ ८९ ॥ यानि चान्यानि दुष्टात्मा पापानि

कृतवांस्त्वयि। तान्यद्य जीवितश्चास्य शमयन्तु शरास्तव॥ ८०॥ गाण्डीवप्रहितान् घोरानद्य गात्रैः स्पृशञ्छरान्। कर्णः स्मरतु दुष्टात्मा वचनं द्रोणभीष्मयोः॥ ९०॥ सुवर्णपुङ्खा नाराचाः शत्रुघ्ना वैद्युतप्रभाः। त्वयास्तास्तस्य मर्माणि भित्त्वा पास्यन्ति शोणितम्॥ ९२॥ उग्रास्त्वद्भुजनिर्मुक्ता मर्म भित्त्वा महाशराः। अद्य कर्णं महावेगाः प्रेषयन्तु यमक्षयम्॥ ९३॥ अद्य हाहाकृतो दीना विषण्णास्त्वच्छरार्द्दितम्। प्रपतन्तं रथात् कर्णं पश्यन्तु वसुधाधिपाः॥ ९४॥ अद्य शोणितसंमग्नं शयानं पतितं भुवि। अपविद्धायुधं कर्णं दीनाः पश्यन्तु वान्धवाः॥ ९५॥ हस्तिकक्षो महानस्य भल्लेनोन्मथितस्त्वया। प्रकम्पमानः पततु भूमावाधिरथेर्ध्वजः॥ ९६॥ त्वया शरशतैश्छिन्नं रथं हेमविभूषितम्। हतयोधाश्वमुत्सृज्य भीतः शल्यः पलायताम्॥ ९७॥ ततः सुयोधनो दृष्ट्वा हतमाधिरथिं त्वया। निराशो जीविते त्वद्य राज्ये चैव भवत्वरिः॥ ९८॥ एष वै तावकान् पार्थ कर्णो हन्ति स्म सायकैः। शतक्रतुसमो वीर्य्ये शङ्करप्रतिमोऽपि वा॥ ९९॥ एते द्रवन्ति पाञ्चाला वध्यमानाः शितैः शरैः। कर्णेन भरतश्रेष्ठ पाण्डवानुज्जिहीर्षवः॥ १००॥ पाञ्चालान् द्रौपदेयांश्च धृष्टद्युम्नशिखण्डिनौ। धृष्टद्युम्नतनूजांश्च शतानीकञ्च नाकुलिम्॥ १०१॥ नकुलं सहदेवञ्च दुर्मुखं जनमेजयम्। सुधर्माणं सात्यकिञ्च विद्धि कर्णवशं गतान्॥ १०२॥ अभ्याहतानां कर्णेन पाञ्चालानां महारणे। श्रूयते निनदो घोरस्त्वद्बन्धूनां परन्तप॥ १०३॥ न त्वेव भीताः पाञ्चालाः कथञ्चित् स्युः पराङ्मुखाः। न हि मृत्युं महेष्वासा गणयन्ति महारणे॥ १०४॥ य एकः पाण्डवीं सेनां शरौघैः समवेष्टयत्। तं समासाद्य पाञ्चाला भीष्मं नासन् पराङ्मुखाः॥ १०५॥ तथा ज्वलन्तमस्त्राग्निं गुरुं सर्वधनुष्मताम्। निर्द्दहन्तञ्च समरे दुर्द्धर्षं द्रोणमञ्जसा॥ १०६॥ ते नित्यमुदिता जेतुं मृधे शत्रुमरिन्दम।

न जात्वाधिरथेर्भीताः पाञ्चालाः स्युः पराङ्मुखाः ॥ १०७ ॥ तेषा-
मापततां शूरः पाञ्चालानां तरस्विनाम् । आदत्तेऽसून् शरैः कर्णः
पतङ्गानामिवानलः ॥ १०८ ॥ तांस्तथाभिमुखान् वीरान् मित्रार्थे
त्यक्तजीवितान् । क्षयं नयति राधेयः पाञ्चालाञ्छतशो रणे
॥ १०९ ॥ तद्भारत महेष्वासानगाधे मज्जतोऽप्लवे । कर्णार्णवे
प्लवो भूत्वा पाञ्चालांस्त्रातुमर्हसि ॥ ११० ॥ अस्त्रं हि रामात् कर्णेन
भार्गवादृषिसत्तमात् । यदुपात्तं महाघोरं तस्य रूपमुदीर्य्यते
॥ १११ ॥ तापनं सर्वसैन्यानां घोररूपं सुदारुणम् । समावृत्य
महासेनां ज्वलितं स्वेन तेजसा ॥ ११२ ॥ एते चरन्ति संग्रामे
कर्णचापच्युताः शराः । भ्रमराणामिव व्राताास्तापयन्तः स्म ताव-
कान् ॥ ११३ ॥ एते द्रवन्ति पाञ्चाला दिक्षु सर्वासु भारत ।
कर्णास्त्रं समरे प्राप्य दुर्निवार्य्यमनात्मभिः ॥ ११४ ॥ एष भीमो
दृढ़क्रोधो वृतः पार्थ समन्ततः । सृञ्जयैर्योधयन् कर्णं पीड्यते
निशितैः शरैः ॥ ११५ ॥ पाण्डवान् सृञ्जयांश्चैव पाञ्चालांश्चैव
भारत । हन्यादुपेक्षितः कर्णो रोगो देहमिवागतः ॥ ११६ ॥
नान्यं त्वत्तो हि पश्यामि योधं यौधिष्ठिरे वले । यः समासाद्य
राधेयं स्वस्तिमानाव्रजेद्गृहान् ॥ ११७ ॥ तमद्य निशितैर्वाणै-
र्विनिहत्य नरर्षभ । यथाप्रतिज्ञं पार्थ त्वं कृत्वा कीर्त्तिमवाप्नुहि
॥ ११८ ॥ त्वं हि शक्तो रणे जेतुं सकर्णानपि कौरवान् । नान्यो
युधि युधां श्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥ ११९ ॥ एतत् कृत्वा महत्
कर्म हत्वा कर्णं महारथम् । कृतार्थः सफलः पार्थ सुखी भव
नरोत्तम ॥ १२० ॥

इति कर्णपर्वणि अर्जुनं प्रति श्रीकृष्णोपदेशे
त्रिसप्ततोऽध्यायः ॥ ७३ ॥

---

सञ्जय उवाच । स केशवस्य बीभत्सुः श्रुत्वा भारत भाषितम् । विशोकः संप्रहृष्टश्च क्षणेन समपद्यत ॥ १ ॥ ततो ज्यामभिमृज्याशु व्याक्षिपन् गाण्डिवं धनुः । दध्रे कर्णविनाशाय केशवञ्चाभ्यभाषत ॥ २ ॥ त्वया नाथेन गोविन्द ध्रुव एव जयो मम । प्रसन्नो यस्य मेऽद्य त्वं लोके भूतभविष्यवित् ॥ ३ ॥ त्वत्सहायो ह्यहं कृष्ण त्रींल्लोकान् वै समागतान् । प्रापयेयं परं लोकं किमु कर्णं महाहवे ॥ ४ ॥ पश्यामि द्रवतीं सेनां पाञ्चालानां जनार्द्दन । पश्यामि कर्णं समरे विचरन्तमभीतवत् ॥ ५ ॥ भार्गवास्त्रञ्च पश्यामि विचरन्तं समन्ततः । सृष्टं कर्णेन वार्ष्णेय शक्रेणेव महाशनिम् ॥ ६ ॥ अयं खलु स संग्रामो यत्र कर्णं मया हतम् । कथयिष्यन्ति भूतानि यावद्भूमिर्द्धरिष्यति ॥ ७ ॥ अद्य कृष्ण विकर्णा मे कर्णं नेष्यन्ति मृत्यवे । गाण्डीवमुक्ताः क्षिण्वन्तो मम हस्तप्रचोदिताः ॥ ८ ॥ अद्य राजा धृतराष्ट्रः स्वां बुद्धिमवमंस्यते । दुर्य्योधनमराज्यार्हं यया राज्येऽभ्यषिचयत् ॥ ९ ॥ अद्य राज्यात् सुखाच्चैव श्रियो राष्ट्रात् तथा पुरात् । पुत्रेभ्यश्च महाबाहो धृतराष्ट्रो विमोक्ष्यते ॥ १० ॥ अद्य दुर्य्योधनो राज्यात् जीविताच्च निराशवान् । भविष्यति हते कर्णे कृष्ण सत्यं ब्रवीमि ते ॥ ११ ॥ अद्य दृष्ट्वा मया कर्णं शरैर्विशकलीकृतम् । पुरा देवासुरे युद्धे वृत्रं वलभिदा यथा । स्मरतां तव वाक्यानि शमं प्रति जनेश्वरः ॥ १२ ॥ अद्याशौ सौवलः कृष्ण ग्लहान् जानातु वै शरान् । दुरोदरञ्च गाण्डीवं मण्डलञ्च रथं मम ॥ १३ ॥ अद्य कुन्तीसुतस्याहं दृढ़ं राज्ञः प्रजागरम् । व्यपनेष्यामि गोविन्द हत्वा कर्णं शितैः शरैः ॥ १४ ॥ अद्य कुन्तीसुतो राजा हते सूतसुते मया । सुप्रहृष्टमनाः प्रीतिश्चिरं सुखमवाप्स्यति ॥ १५ ॥ अद्य चाहमनाधृष्यं केशवाप्रतिमं शरम् । उत्स्रक्ष्यामीह यः कर्णं जीविताद्भ्रंशयिष्यति ॥ १६ ॥ यस्यैतदै व्रतं मह्यं वधे किल

दुरात्मनः । पादौ न धावये तावत् यावद्धन्यां न फाल्गुनम् ॥१७॥
मृषा कृत्वा व्रतं तस्य पापस्य मधुसूदन । पातयिष्ये रथात् कायं
शरैः सन्नतपर्वभिः ॥ १८ ॥ योऽसौ रणे नरं नान्यं पृथिव्या-
मभिमन्यते । तस्याद्य सूतपुत्रस्य भूमिः पास्यति शोणितम् ॥ १९॥
अपतिस्त्वंसि कृष्णेति सूतपुत्रो यदब्रवीत् । धृतराष्ट्रमते कर्णः
श्लाघमानः स्वकान् गुणान् ॥ २० ॥ अनृतं तत् करिष्यन्ति मामका-
निशिताः शराः । आशीविषा इव क्रुद्धास्तस्य पास्यन्ति शोणितम्
॥ २१ ॥ मया हस्तवता मुक्ता नाराचा वैद्युतत्विषः । गाण्डीव-
सृष्टा दास्यन्ति कर्णस्य परमां गतिम् ॥ २२ ॥ अद्य तप्स्यति
राधेयः पाञ्चालीं यत्तदाब्रवीत् । सभामध्ये वचः क्रूरं कुत्सयन्
पाण्डवान् प्रति ॥ २३ ॥ ये वै षण्ढतिलास्तत्र भवितारोऽद्य ते
तिलाः । हते वैकर्त्तने कर्णे सूतपुत्रे दुरात्मनि ॥ २४ ॥ अहं
वः पाण्डुपुत्रेभ्यस्त्रास्यामीति यदब्रवीत् । धृतराष्ट्रसुतान् कर्णः
श्लाघमानोत्मनो गुणान् । अनृतं तत् करिष्यन्ति मामका निशिताः
शराः ॥ २५ ॥ हन्ताहं पाण्डवान् सर्वान् सपुत्रानिति योऽब्रवीत् ।
तमद्य कर्णं हन्तास्मि मिषतां सर्वधन्विनाम् ॥ २६ ॥ तस्य वीर्य्ये
समाश्वस्य धार्त्तराष्ट्रो महामनाः । अवामन्यत दुर्बुद्धिर्नित्यमस्मान्
दुरात्मवान् । तमद्य कर्णं राधेयं हन्तास्मि मधुसूदन ॥ २७ ॥
अद्य कर्णे हते कृष्ण धार्त्तराष्ट्राः सराजकाः । विद्रवन्तु दिशो
भीताः सिंहत्रस्ता मृगा इव ॥ २८ ॥ अद्य दुर्य्योधनो राजा
आत्मानञ्चानुशोच्यताम् । हते कर्णे मया सङ्ख्ये सपुत्रे ससुहृज्जने
॥ २९ ॥ अद्य कर्णं हतं दृष्ट्वा धार्त्तराष्ट्रोऽत्यमर्षणः । जानातु
मां रणे कृष्ण प्रवरं सर्वधन्विनाम् ॥ ३० ॥ सपुत्रपौत्रं सामात्यं
सभृत्यञ्च निराश्रयम् । अद्य राज्ये करिष्यामि धृतराष्ट्रं जने-
श्वरम् ॥ ३१ ॥ अद्य कर्णस्य चक्राङ्गाः क्रव्यादाश्च पृथग्विधाः ।
शरैश्छिन्नानि गात्राणि विहरिष्यन्ति केशव ॥ ३२ ॥ अद्य राधा-

सुतस्याहं संग्रामे मधुसूदन। शिरश्छेत्स्यामि कर्णस्य मिषतां सर्वधन्विनाम् ॥ ३३ ॥ अद्य तीक्ष्णैर्विपाठैश्च क्षुरैश्च मधुसूदन। रणे छेत्स्यामि गात्राणि राधेयस्य दुरात्मनः ॥ ३४ ॥ अद्य राजा महत् कृच्छ्रं सन्त्यक्ष्यति युधिष्ठिरः। सन्तापं मानसं वीरश्चिरं संभृतमात्मनः ॥ ३५ ॥ अद्य केशव राधेयमहं हत्वा सवान्धवम्। नन्दयिष्यामि राजानं धर्मपुत्रं युधिष्ठिरम् ॥ ३६ ॥ अद्याहमनुगान् कृष्ण कर्णस्य कृपणान् युधि। हन्ता ज्वलनसङ्काशैः शरैः सर्पविषोपमैः ॥ ३७ ॥ अद्याहं हेमकवचैर्गार्द्धपत्रैरजिह्मगैः। संस्तरिष्यामि गोविन्द वसुधां वसुधाधिपैः ॥ ३८ ॥ अद्याभिमन्योः शत्रूणां सर्वेषां मधुसूदन। प्रमथिष्यामि गात्राणि शिरांसि च शितैः शरैः ॥ ३९ ॥ अद्य निर्धार्त्तराष्ट्रांश्च भ्रात्रे दास्यमि मेदिनीम्। निरर्जुनां वा पृथिवीं केशवानुचरिष्यसि ॥ ४० ॥ अद्याहमनृणः कृष्ण भविष्यामि धनुर्भृताम्। क्रोधस्य च कुरूणाञ्च शराणां गाण्डिवस्य च ॥ ४१ ॥ अद्य दुःखमहं मोक्ष्ये वयोदशसमार्ज्जितम्। हत्वा कर्णं रणे कृष्ण शम्बरं मघवानिव ॥ ४२ ॥ अद्य कर्णे हते युद्धे सोमकानां महारथाः। कृतं कार्य्यञ्च मन्यन्तां मित्रकार्य्येप्सवो युधि ॥ ४३ ॥ न जाने च कथं प्रीतिः शैनेयस्याद्य माधव। भविष्यति हते कर्णे मयि चापि जयाधिके ॥ ४४ ॥ अहं हन्ता रणे कर्णं पुत्रञ्चास्य महारथम्। प्रीतिं दास्यामि भीमस्य यमयोः सात्यकस्य च ॥ ४५ ॥ धृष्टद्युम्न-शिखण्डिभ्यां पाञ्चालानाञ्च माधव। अद्यानृण्यं गमिष्यामि हत्वा कर्णं महाहवे ॥ ४३ ॥ अद्य पश्यन्तु संग्रामे धनञ्जयममर्षणम्। युध्यन्तं कौरवान् सङ्ख्ये पातयन्तञ्च सूतजम् ॥ ४७ ॥ भवत्सकाशे वच्मि च पुनरेवात्मसंस्तवम् ॥ ४८ ॥ धनुर्वेदे मत्समो नास्ति लोके पराक्रमे वा मम कोऽस्ति तुल्यः। को वाप्यन्यो मत्समोऽस्ति क्षमावांस्तथा क्रोधे सदृशोन्यो न मेऽस्ति ॥ ४९ ॥ अहं धनुषा-

नसुरान् सुरांश्च सर्व्वाणि भूतानि च सङ्गतानि। स्ववाहुवीर्य्या-
द्गमयै पराभवं मत्पौरुषं विद्धि परं परेभ्यः॥ ५०॥ शरार्च्चिषा-
गाण्डिवेनाहमेकः सर्व्वान् कुरुन् वाह्लिकांश्चाभिहत्य। हिमात्यये
कक्षगतो यथाग्निस्तथा दहेयं समणान् प्रसह्य॥ ५१॥ पाणौ
पृषत्का लिखिता ममैते धनुश्च दिव्यं विततं सवाणम्। पादौ च
मे सरथौ सध्वजौ च न मादृशं युद्धगतं जयन्ति॥ ५२॥ इत्येव-
मुक्त्वाच्युतमेकवीरः क्षिप्रं रिपुघ्नः क्षतजोपमाक्षः। भीमं मुमुक्षुः
समरे प्रयातः कर्णस्य कायाच्च शिरो जिहीर्षुः॥ ५३॥

इति कर्णपर्व्वणि अर्जुनात्मश्लाघायां चतुःसप्ततोऽध्यायः॥ ७४॥

---

धृतराष्ट्र उवाच। समागमे पाण्डवसृञ्जयानां महाभये मामकानामगाधे। धनञ्जये तात रणाय याते वभूव तद्युद्धमयो नु कीदृक्॥ १॥

सञ्जय उवाच। तेषामनीकानि वृहद्ध्वजानि रणे समृद्धानि समागतानि। गर्ज्जन्ति भेरीनिनदोन्मुखानि नादैर्यथा मेघगणास्तपान्ते॥ २॥ महागजाभ्राकुलमस्त्रतोयं वादित्रनेमीतलशब्द-वच्च। हिरण्यचित्रायुधविद्युतञ्च शराग्निनाराचमहास्त्रधारम्॥ ३॥ तद्भीमवेगं रुधिरौघवाहि खड्गाकुलं क्षत्रिय जीवघाति। अनार्त्तवं क्रूरमनिष्टवर्षं वभूव तत् संहरणं प्रजानाम्॥ ४॥ एकं रथं संपरिवार्य्य मृत्युं नयन्त्यनेके च रथाः समेताः। एकस्तथैकं रथिनं रथाग्र्यस्तथा रथश्चापि रथाननेकान्॥ ५॥ तथाससूतं सहयञ्च कञ्चित् कश्चिद्रथी मृत्युवशं निनाय। निनाय चाप्येकगजेन कश्चिद्रथान् वहून् मृत्युवशं तथाश्वान्॥ ६॥ रथान् ससूतान् सहयान् गजांश्च सर्व्वानरीन्मृत्युवशं शरौघैः। निन्ये हयांश्चैव तथा ससादीन् पदातिसङ्घांश्च तथैव पार्थः॥ ७॥ कृपः शिखण्डी च रणे

समेतौ दुर्य्योधनं सात्यकिरभ्यगच्छत् । श्रुतश्रवा द्रोणसुतेन सार्द्धं युधामन्युश्चित्रसेनेन सार्द्धम् ॥ ८ ॥ कर्णस्य पुत्रन्तु रथी सुषेणं समागतं सृञ्जयश्चोत्तमौजाः । गान्धारराजं सहदेवः क्षुधार्त्तो महर्षभं सिंह इवाभ्यधावत् ॥ ९ ॥ शतानीको नाकुलिः कर्णपुत्रं युयुधानो वृषसेनं शरौघैः । समार्पयत् कर्णपुत्रश्च शूरः पाञ्चालेयं शरवर्षैरनेकैः ॥ १० ॥ रथर्षभः कृतवर्म्माणमार्च्छन्माद्रीपुत्रो नकुलश्चित्रयोधी । पाञ्चालानामधिपो याज्ञसेनिः सेनापतिं कर्णमार्च्छत् ससैन्यम् ॥ ११ ॥ दुःशासनो भारत भारती च संशप्तकानां पृतना समृद्धा । भीमं रणे शस्त्रभृतां वरिष्ठं भीमं समार्च्छत्तमसह्यवेगम् ॥ १२ ॥ कर्णात्मजं तत्र जघान शूरस्तथाच्छिनच्चोत्तमौजाः प्रसह्य । तस्योत्तमाङ्गं निपपात भूमौ निनादयद्गां निनदेन खञ्च ॥ १३ ॥ सुषेणशीर्षं पतितं पृथिव्यां विलोक्य कर्णोऽथ तदार्त्तरूपः । क्रोधाद्धयांस्तस्य रथं ध्वजञ्च बाणैः सुधारैर्निशितैरकृन्तत् ॥ १४ ॥ स तूत्तमौजा निशितैः पृषत्कैर्विव्याध खड्गेन च भास्वरेण । पार्ष्णिं हयांश्चैव कृपस्य हत्वा शिखण्डिवाहं स ततोऽध्यरोहत् ॥ १५ ॥ कृपन्तु दृष्ट्वा विरथं रथस्थो नैच्छच्छरैस्ताड़यितुं शिखण्डी । तं द्रौणिरावार्य्य रथं कृपस्य समुज्जह्रे पङ्कगतां यथा गाम् ॥ १६ ॥ हिरण्यवर्म्मा निशितैः पृषत्कैस्तवात्मजानामनिलात्मजो वै । अतापयत् सैन्यमतीव भीमः काले शुचौ मध्यगतो यथार्कः ॥ १७ ॥

इति कर्णपर्व्वणि संकुलयुद्धे पञ्चसप्ततोऽध्यायः ॥ ७५ ॥

---

सञ्जय उवाच । अथ त्विदानीं तुमुले विमर्द्दे द्विषद्भिरेको बहुभिः समावृतः । महारणे सारथिमित्युवाच भीमश्चमूं वाहय धार्त्तराष्ट्रीम् । त्वं सारथे याहि जवेन वाहैर्नयाम्येतान् धार्त्त-

राष्ट्रान् यमाय ॥ १ ॥ सञ्चोदितो भीमसेनेन चैवं स सारथिः पुत्रबलं त्वदीयम्। प्रायात्ततः सत्वरमुग्रवेगो यतो भीमस्तद्बलं हन्तुमैच्छत् ॥ २ ॥ ततोऽपरे नागरथाश्वपत्तिभिः प्रत्युद्ययुस्तं कुरवः समन्तात्। भीमस्य वाहाग्र्यमुदारवेगं समन्ततो बाणगणैर्निजघ्नुः ॥ ३ ॥ ततः शरानापततो महात्मा चिच्छेद बाणैस्तपनीयपुङ्खैः। ते वै निपेतुस्तपनीयपुङ्खा द्विधा त्रिधा भीमशरैर्निकृत्ताः ॥ ४ ॥ ततो राजन्नागरथाश्वयूनां भीमाहतानां वरराजमध्ये। घोरो निनादः प्रबभौ नरेन्द्र वज्राहतानामिव पर्वतानाम् ॥ ५ ॥ ते बध्यमानाश्च नरेन्द्रमुख्या निर्भिद्यन्तो भीमशरप्रवेकैः। भीमं समन्तात् समरेऽभ्यरोहन् वृक्षं शकुन्ता इव जातपक्षाः ॥ ६ ॥ ततोऽभियाते तव सैन्ये स भीमः प्रादुश्चक्रे वेगमनन्तवेगः। यथान्तकाले क्षपयन् दिधक्षुर्भूतान्तकृत् काल इवात्तदण्डः ॥ ७ ॥ तस्यातिवेगस्य रणेऽतिवेगं नाशक्नुवन् वारयितुं त्वदीयाः। व्यात्ताननस्यापततो यथैव कालस्य काले हरतः प्रजा वै ॥ ८ ॥ ततो बलं भारत भारतानां प्रदह्यमानं समरे महात्मना। भीतं दिशोऽकीर्य्यत भीमनुन्नं महानिलेनाभ्रगणो यथैव ॥ ९ ॥ ततो धीमान् सारथिमब्रवीद्बली स भीमसेनः पुनरेव हृष्टः। सूताभिजानीहि स्वकान् परान् वा रथान् ध्वजांश्चापततः समेतान् ॥ १० ॥ युध्यन् ह्यहं नाभिजानामि किञ्चिन्मा सैन्यं स्वं छादयिष्ये पृषत्कैः। अरीन् विशोकाभिनिरीक्ष्य सर्वतो रथान् ध्वजाग्राणि दुनोमि वै भृशम् ॥ ११ ॥ राजातुरो नागमद्यत् किरीटी बहूनि दुःखान्यभियातोऽस्मि सूत। एतद्दुःखं सारथे धर्मराजो यन्मां हित्वा यातवान् शत्रुमध्ये। नैनं जीवं नापि जानाम्यजीवं बीभत्सुं वा तन्ममाद्यातिदुःखम् ॥ १२ ॥ सोऽहं द्विषत्सैन्यमुदग्रकल्पं विनाशयिष्ये परमप्रतीतः। एवं निहत्याजिमध्ये समेतं प्रीतो भविष्यामि सह त्वयाद्य ॥ १३ ॥ सर्वां-

स्तूणान् सायकानामबेच्य किं शिष्टं स्यात् सायकानां रथे मे। का वा जातिः किं प्रमाणञ्च तेषां ज्ञात्वा व्यक्तं तन्ममाचच्व सूत ॥ १४ ॥

विशोक उवाच। षण्मार्गणानामयुतानि वीर चुराश्च भल्लाश्च तथायुताख्याः। नाराचानां द्वे सहस्रे च वीर त्रोख्येव च प्रदराणां स्म पार्थ। अस्त्यायुधं पाण्डवेयावशिष्टं न यद्वहेच्छकटं षड्गवीयम् ॥ १५ ॥ एतद्विद्वन् मुञ्च सहस्रशोऽपि गदासिवाहुद्रविणञ्च तेऽस्ति। प्रासाश्च खड्गाः शक्तयस्तोमराश्च मा भैषोस्त्वं संचयादायुधानाम् ॥ १६ ॥

भीम उवाच। सूताद्येमं पश्य भीमप्रमुक्तैः संछिन्दद्भिः पार्थिवानाशुवेगैः। छन्नं बाणैराहवं घोररूपं नष्टादित्यं मृत्युलोकेन तुल्यम् ॥ १७ ॥ अद्यैतद्वै विदितं पार्थिवानां भविष्यति ह्याकुमारञ्च सूत। निमग्नो वा समरे भीमसेनो ह्येकः कुरून् वा समरे व्यजैषीत् ॥ १८ ॥ सर्वे संख्ये कुरवो निष्पतन्तु मां वा लोकाः कीर्त्तयन्त्वाकुमारम्। सर्वानेकस्तानहं पातयिष्ये ते वा सर्वे भीमसेनं तुदन्तु ॥ १९ ॥ आशास्तारः कर्म चाप्युत्तमं ये तन्मे देवाः केवलं साधयन्तु। आयात्विहाद्यार्जुनः शत्रुघाती शक्रस्तूर्णं यज्ञ इवोपहूतः ॥ २० ॥ ईचस्वैतां भारतीं दीर्य्यमाणामेते कस्माद्विद्रवन्ते नरेन्द्राः। व्यक्तं धीमान् सव्यसाची नराग्र्यः सैन्यं ह्येतच्छादयत्याशु बाणैः ॥ २१ ॥ पश्य ध्वजांश्च द्रवतो विशोक नागान् हयान् पत्तिसङ्घांश्च संख्ये। रथान् विकीर्णान् शरशक्तिताड़ितान् पश्यस्वैतान्रथिनश्चैव सूत ॥ २२ ॥ आपूर्य्यते कौरवी चाप्यभीक्ष्णं सेना ह्यसौ सुभृशं हन्यमाना। धनञ्जयस्याशनितुल्यवेगैर्ग्रस्ता शरैः काञ्चनबर्हिवाजैः ॥ २३ ॥ एते द्रवन्ति स्म रथाश्वनागाः पदातिसङ्घानमर्द्दयन्तः। संमुह्यमानाः कौरवाः सर्व एव द्रवन्ति नागा इव दावभीताः। हाहाकृताश्चैव रणे विशोक मुञ्चन्ति नादान् विपुलान् गजेन्द्राः ॥ २४ ॥

विशोक उवाच । किं भीमं नैनं त्वमिहाश्रृणोषि विस्फार्य्यतो गाण्डीवस्यातिघोषम् । क्रुद्धेन पार्थेन विकृष्यतोऽद्य कच्चिन्नेमौ तव कर्णौ विनष्टौ ॥ २५ ॥ सर्वे कामाः पाण्डव ते समृद्धाः कपिर्ह्यसौ दृश्यते हस्तिसैन्ये । नीलाद्घनाद्विद्युतमुच्चरन्तीं तथा पश्य विस्फुरन्तीं धनुर्ज्याम् ॥ २६ ॥ कपिर्ह्यसौ दृश्यते सर्वतो वै ध्वजाग्रमारुह्य धनञ्जयस्य । वित्रासयन् द्विषत्सङ्घान् विमर्द्दे बिभेम्यस्मादात्मनैवाभिवीक्ष्य ॥ २७ ॥ विभ्राजते चातिमात्रं किरीटं विचित्रमेतच्च धनञ्जयस्य । दिवाकराभो मणिरेष दिव्यो विभ्राजते चैव किरीटसंस्थः ॥ २८ ॥ पार्श्वे भीमं पाण्डराभ्रप्रकाशं पश्यस्व शङ्खं देवदत्तं सुघोषम् । अभीषुहस्तस्य जनार्द्दनस्य विगाहमानस्य चमूं परेषाम् ॥ २९ ॥ रविप्रभं वज्रनाभं क्षुराभं पार्श्वे स्थितं पश्य जनार्द्दनस्य । चक्रं यशोवर्द्धनं केशवस्य सदार्च्चितं यदुभिः पश्य वीरः ॥ ३० ॥ महाद्विपानां सरलद्रुमोपमाः करा निकृत्ताः प्रपतन्त्यमी क्षुरैः । किरीटिना ते च पुनः सशादिनः शरैः प्रभिन्नाः कुलिशैरिवाद्रयः ॥ ३१ ॥ तथैव कृष्णस्य च पाञ्चजन्यं महार्हमेतद्द्विजराजवर्णम् । कौन्तेय पश्योरसि कौस्तुभञ्च जाज्वल्यमानं विजयां स्रजञ्च ॥ ३२ ॥ ध्रुवं रथाग्र्यः समुपैति पार्थो विद्रावयन् सैन्यमिदं परेषाम् । सिताभ्रवर्णैरसितप्रयुक्तैर्हयैर्महार्हैं रथिनां वरिष्ठः ॥ ३३ ॥ रथान् हयान् पत्तिगणांश्च सायकैर्विदारितान् पश्य पतन्त्यमी यथा । तवानुजेनामरराजतेजसा महावनानीव सुपर्णवायुना ॥ ३४ ॥ चतुःशतान् पश्य रथानिमान् हतान् सवाजिसूतान् समरे किरीटिना । महेषुभिः सप्तशतानि दन्तिनां पदातिसादींश्च हताननेकशः ॥ ३५ ॥ अयं समभ्येति तवान्तिकं बली निघ्नन् कुरूंश्चित्र इव ग्रहोऽर्जुनः । समृद्धकामोऽसि हतास्तवाहिता बलं तवायुश्च चिराय वर्द्धताम् ॥३६॥

भीम उवाच । ददानि ते ग्रामवरांश्चतुर्द्दश प्रियाख्याने सारथे

सुप्रसन्नः । दाशीशतञ्चापि रथांश्च विंशतिं यदर्जुनं वेदयसे विशोक ॥ ३७ ॥

इति कर्णपर्वणि भीमविशोकसंवादे षट्सप्ततोऽध्यायः ॥ ७६ ॥

---

सञ्जय उवाच । श्रुत्वा च रथनिर्घोषं सिंहनादञ्च संयुगे ।
अर्जुनः प्राह गोविन्दं शीघ्रं चोदय वाजिनः ॥ १ ॥ अर्जुनस्य
वचः श्रुत्वा गोविन्दोऽर्जुनमब्रवीत् । एष गच्छामि सुक्षिप्रं यत्र
भीमो व्यवस्थितः ॥ २ ॥ तं यान्तमश्वैर्हिमशङ्खवर्णैः सुवर्णमुक्ता-
मणिजालनद्धैः । जम्भं जिघांसुं प्रगृहीतवज्रं जयाय देवेन्द्र-
मिवोग्रमन्युम् ॥ ३ ॥ रथाश्वमातङ्गपदातिसङ्घा वाणस्वनैर्नेमि-
खुरस्वनैश्च । संनादयन्तो वसुधां दिशश्च क्रुद्धा नृसिंहा जय-
मभ्युदीयुः ॥ ४ ॥ तेषाञ्च पार्थस्य च मारिषासीद्देहासुपापक्षपणं
सुयुद्धम् । त्रैलोक्यहेतोर्ह्यसुरैर्यथासीद्देवस्य विष्णोर्ज्जयतां वरस्य
क्षुरार्द्धचन्द्रैर्निशितैश्च भल्लैः शिरांसि तेषां बहुधा च बाहून् ॥ ६ ॥
क्षुरार्द्धचन्द्रैर्निशितैश्च भल्लैः शिरांसि तेषां बहुधा च बाहून् ॥ ६ ॥
छत्राणि वालव्यजनानि केतूनश्वान्रथान् पत्तिगणान् द्विपांश्च । ते
पेतुरुर्व्यां बहुधा विरूपा वातप्रभग्नानि यथा वनानि ॥ ७ ॥
सुवर्णजालावतता महागजाः सवैजयन्तीध्वजयोधकल्पिताः ।
सुवर्णपुङ्खैरिषुभिः समाचिताश्चकाशिरे प्रज्वलिता यथाचलाः ॥८॥
विदार्य्य नागाश्वरथान् धनञ्जयः शरोत्तमैर्वासववज्रसन्निभैः । द्रुतं
ययौ कर्णजिघांसया तथा यथा मरुत्वान् बलभेदने पुरा ॥ ९ ॥
ततः स पुरुषव्याघ्रस्तव सैन्यमरिन्दमः । प्रविवेश महाबाहुर्मकरः
सागरं यथा ॥ १० ॥ तं दृष्ट्वा तावका राजन्रथपत्तिसमन्विताः ।
गजाश्वसादिबहुलाः पाण्डवं समुपाद्रवन् ॥ ११ ॥ तेषामापततां
पार्थमारावः सुमहानभूत् । सागरस्येव क्षुब्धस्य यथा स्यात्

सलिलस्वनः ॥ १२ ॥ ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः । अभ्यद्रवन्त संग्रामे त्यक्त्वा प्राणकृतं भयम् ॥ १३ ॥ तेषामापततां तत्र शरवर्षाणि मुञ्चताम् । अर्जुनो व्यधमत् सैन्यं महावातो घनानिव ॥ १४ ॥ तेऽर्जुनं सहिता भूत्वा रथवंशैः प्रहारिणः । अभियाय महेष्वासा विव्यधुर्निशितैः शरैः ॥ १५ ॥ ततोऽर्जुनः सहस्राणि रथवारणवाजिनाम् । प्रेषयामास विशिखैर्यमस्य सदनं प्रति ॥ १६ ॥ ते वध्यमानाः समरे पार्थचापच्युतैः शरैः । तत्र तत्र स्म लीयन्ते भये जाते महारथाः ॥ १७ ॥ तेषाञ्चतुःशतान् वीरान् यतमानान् महारथान् । अर्जुनो निशितैर्वाणैरनयद्यमसादनम् ॥ १८ ॥ ते वध्यमानाः समरे नानालिङ्गैः शितैः शरैः । अर्जुनं समभित्यज्य दुद्रुवुर्वै दिशो दश ॥ १९ ॥ तेषां शब्दो महानासीत् द्रवतां वाहिनीमुखे । महौघस्येव जलधेर्गिरिमासाद्य दीर्य्यतः ॥ २० ॥ तान्तु सेनां भृशं त्रस्तां द्रावयित्वार्जुनः शरैः । प्रायादभिमुखः पार्थः सूतानीकाय मारिष ॥ २१ ॥ तस्य शब्दो महानासीत् परानभिमुखस्य वै । गरुड़स्येव पततः पन्नगार्थे यथा पुरा ॥ २२ ॥ तन्तु शब्दमभिश्रुत्य भीमसेनो महावलः । वभूव परमप्रीतः पार्थदर्शनलालसः ॥ २३ ॥ श्रुत्वैव पार्थमायान्तं भीमसेनः प्रतापवान् । त्यक्त्वा प्राणान् महाराज सेनां तव ममर्द्द ह ॥ २४ ॥ स वायुवीर्य्यप्रतिमो वायुवेगसमो जवे । वायुवद्व्यचरद्भीमो वायुपुत्रः प्रतापवान् ॥ २५ ॥ तेनार्द्द्यमाना राजेन्द्र सेना तव विशाम्पते । व्यभ्राम्यत महाराज भिन्ना नौरिव सागरे ॥२६॥ तान्तु सेनां तदा भीमो दर्शयन् पाणिलाघवम् । शरैरवचकर्त्तोग्रैः प्रेषयिष्यन् यमक्षयम् ॥ २७ ॥ तत्र भारत भीमस्य वलं दृष्टातिमानुषम् । व्यत्रस्यन्त रणे योधाः कालस्येव युगक्षये ॥ २८ ॥ तथार्द्दितान् भीमवलान् भीमसेनेन भारत । दृष्ट्वा दुर्य्योधनो राजा इदं वचनमब्रवीत् ॥ २९ ॥ सैनिकांश्च महेष्वासान् योधांश्च

भरतर्षभ। समादिशद्रणे सर्वान् हत भीममिति स्म ह। तस्मिन् हते हतं मन्ये पाण्डुसैन्यमशेषतः॥ ३०॥ प्रतिगृह्य च तामाज्ञां तव पुत्रस्य पार्थिवाः। भीमं प्रच्छादयामासुः शरवर्षैः समन्ततः॥ ३१॥ गजाश्च बहुला राजन् नराश्च जयगृद्धिनः। रथा हयाश्च राजेन्द्र परिवव्रुर्वृकोदरम्॥ ३२॥ स तैः परिवृतः शूरैः शूरो राजन् समन्ततः। शुशुभे भरतश्रेष्ठो नक्षत्रैरिव चन्द्रमाः॥ ३३॥ परिवेषी यथा सोमः परिपूर्णो विराजते। स रराज तथा सङ्ख्ये दर्शनीयो नरोत्तमः। निर्विशेषं महाराज यथा हि विजयस्तथा॥ ३४॥ तस्य ते पार्थिवाः सर्वे शरवृष्टीः समासृजन्। क्रोधरक्तेक्षणाः क्रूरा हन्तुकामा वृकोदरम्॥ ३५॥ तां विदार्य्य महासेनां शरैः सन्नतपर्वभिः। निश्चक्राम रणाद्भीमो मत्स्यो जालादिवाम्भसि॥ ३६॥ हत्वा दशसहस्राणि गजानामनिवर्त्तिनाम्। नृणां शतसहस्रे द्वे द्वे शते चैव भारत॥ ३७॥ पञ्च चाश्वसहस्राणि रथानां शतमेव च। हत्वा प्रास्यन्दयद्भीमो नदीं शोणितवाहिनीम्॥ ३८॥ शोणितोदां रथावर्त्तां हस्तिग्राहसमाकुलाम्। नरमीनाश्वनक्रान्तां केशशैवलशाद्वलाम्॥ ३९॥ संछिन्नभुजनागेन्द्रां बहुरत्नापहारिणीम्। ऊरुग्राहां मज्जपङ्कां शीर्षोपलसमावृताम्॥ ४०॥ शरचापप्लवां भीमां गदापरिघपन्नगाम्। हंसच्छत्रध्वजोपेतामुष्णीषवरफेनिलाम्॥ ४१॥ हारपद्माकराञ्चैव भूमिरेणूर्मिमालिनीम्। आर्य्यवृत्तवतां संख्ये सुतरां भीरुदुस्तराम्॥ ४२॥ योधग्राहवतीं संख्ये वहन्तीं पितृसादनम्। क्षणेन पुरुषव्याघ्रः प्रावर्त्तयत निम्नगाम्॥ ४३॥ यथा वैतरणीमुग्रां दुस्तरामकृतात्मभिः। तथा दुस्तरणीं घोरां भीरूणां भयवर्द्धनीम्॥ ४४॥ यतो यतः पाण्डवेयः प्रविष्टो रथसत्तमः। ततस्ततोऽपातयत योधान् शतसहस्रशः॥ ४५॥ एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे। दुर्य्योधनो महाराज शकुनिं वाक्यमब्र-

वीत् ॥ ४६ ॥ जय मातुल संग्रामे भीमसेनं महाबलम् । तस्मिन् जिते जितं मन्ये पाण्डवेयं महाबलम् ॥ ४७ ॥ ततः प्रायान्महाराज सौबलेयः प्रतापवान् । रणाय महते युक्तो भ्रातृभिः परिवारितः ॥ ४८ ॥ स समासाद्य संग्रामे भीमं भीमपराक्रमम् । वारयामास तं वीरो वेलेव मकरालयम् ॥ ४९ ॥ अभ्यवर्त्तत तं भीमो वार्य्यमाणः शितैः शरैः ॥ ५० ॥ शकुनिस्तस्य राजेन्द्र वामपार्श्वे स्तनान्तरे । प्रेषयामास नाराचान् रुक्मपुङ्खान् शिलाशितान् ॥ ५१ ॥ वर्म भित्त्वा तु ते घोराः पाण्डवस्य महात्मनः । न्यमज्जन्त महाराज कङ्कबर्हिणवाससः ॥ ५२ ॥ सोऽतिविद्धो रणे भीमः शरं रुक्मविभूषितम् । प्रेषयामास सहसा सौबलं प्रति भारत ॥ ५३ ॥ तमायान्तं शरं घोरं शकुनिः शत्रुतापनः । चिच्छेद सप्तधा राजन् कृतहस्तो महाबलः ॥ ५४ ॥ तस्मिन्निपतिते भूमौ भीमः क्रुद्धो विशाम्पते । धनुश्चिच्छेद भल्लेन सौबलस्य हसन्निव ॥ ५५ ॥ तदपास्य धनुश्छिन्नं सौबलेयः प्रतापवान् । अन्यदादाय वेगेन धनुर्भल्लांश्च षोड़श ॥ ५६ ॥ तैस्तस्य तु महाराज भल्लैः सन्नतपर्वभिः । द्वाभ्यां स सारथिं ह्यार्च्छत् भीमं सप्तभिरेव च ॥ ५७ ॥ ध्वजमेकेन चिच्छेद छत्रं द्वाभ्यां विशाम्पते । चतुर्भिश्चतुरो वाहान् विव्याध सुबलात्मजः ॥ ५८ ॥ ततः क्रुद्धो महाराज भीमसेनः प्रतापवान् । शक्तिञ्चिक्षेप समरे रुक्मदण्डामयस्मयीम् ॥ ५९ ॥ सा भीमभुजनिर्मुक्ता नागजिह्वेव चञ्चला । निपपात रथे तूर्णं सौबलस्य महात्मनः ॥ ६० ॥ ततस्तामेव संगृह्य शक्तिं कनकभूषणाम् । भीमसेनाय चिक्षेप क्रुद्धरूपो विशाम्पते ॥ ६१ ॥ सा निर्भिद्य भुजं सव्यं पाण्डवस्य महात्मनः । निपपात तदा भूमौ यथा विद्युन्नभश्च्युता ॥ ६२ ॥ अथोत्क्रुष्टं महाराज धार्त्तराष्ट्रैः समन्ततः । न तु तं ममृषे भीमः सिंहनादं तरस्विनाम् ॥ ६३ ॥ अन्यद्गृह्य धनुः सज्यं त्वरमाणो महाबलः । मुहू-

त्तांदिव राजेन्द्र छादयामास सायकैः। सौबलस्य बलं संख्ये त्यक्त्वात्मानं महाबलः॥ ६४॥ तस्याश्वांश्चतुरो हत्वा सूतं चैव विशाम्पते। ध्वजं चिच्छेद भल्लेन त्वरमाणः पराक्रमी॥ ६५॥ हताश्वं रथमुत्सृज्य त्वरमाणो नरोत्तमः। तस्थौ विस्फारयंश्चापं क्रोधरक्तेक्षणः श्वसन्। शरैश्च बहुधा राजन् भीममार्च्छत् समन्ततः॥ ६६॥ प्रतिहत्य तु वेगेन भीमसेनः प्रतापवान्। धनुश्चिच्छेद संक्रुद्धो विव्याध च शितैः शरैः॥ ६७॥ सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्षणः। निपपात ततो भूमौ किञ्चित्प्राणो नराधिप॥ ६८॥ ततस्तं विह्वलं ज्ञात्वा पुत्रस्तव विशाम्पते। अपोवाह रथेनाजौ भीमसेनस्य पश्यतः॥ ६९॥ रथस्थे तु नरव्याघ्रे धार्त्तराष्ट्राः पराङ्मुखाः। प्रदुद्रुवुर्दिशो भीता भीमाज्जाते महाभये॥ ७०॥ सौबले निर्ज्जिते राजन् भीमसेनेन धन्विना। भयेन महताविष्टः पुत्रो दुर्य्योधनस्तव। अपायाज्जवनैरश्वैः सापेक्षो मातुलं प्रति॥ ७१॥ पराङ्मुखन्तु राजानं दृष्ट्वा सैन्यानि भारत। विप्रजग्मुः समुत्सृज्य द्वैरथानि समन्ततः॥ ७२॥ तान् दृष्ट्वा विद्रुतान् सर्वान् धार्त्तराष्ट्रान् पराङ्मुखान्। जवेनाभ्यपतद्भीमः किरन् शरशतान् बहून्॥ ७३॥ ते वध्यमाना भीमेन धार्त्तराष्ट्राः पराङ्मुखाः। कर्णमासाद्य समरे स्थिता राजन् समन्ततः। स हि तेषां महावीर्य्यो द्वीपोऽभूत् सुमहाबलः॥ ७४॥ भिन्ननौका यथा राजन् द्वीपमासाद्य निर्वृताः। भवन्ति पुरुषव्याघ्र नाविकाः कालपर्य्यये॥ ७५॥ तथा कर्णं समासाद्य तावका भरतर्षभ। समाश्वस्ताः स्थिता राजन् संप्रहृष्टाः परस्परम्। समाजग्मुश्च युद्धाय मृत्युं कृत्वा निवर्त्तनम्॥ ७६॥

इति कर्णपर्व्वणि सौबलेयापयाने सप्तसप्ततोऽध्यायः॥ ७७॥

---

धृतराष्ट्र उवाच। ततो भग्नेषु सैन्येषु भीमसेनेन संयुगे। दुर्य्योधनोऽब्रवीत् किन्नु सौबलो वापि सञ्जय ॥ १ ॥ कर्णो वा जयतां श्रेष्ठो योधा वा मामका युधि। कृपो वा कृतवर्म्मा वा द्रौणिर्दुःशासनोऽपि वा ॥ २॥ अत्यद्भुतमहं मन्ये पाण्डवेयस्य विक्रमम्। यदेकः समरे सर्व्वान् योधयामास मामकान् ॥ ३ ॥ यथाप्रतिज्ञं योधानां राधेयः कृतवानपि। कुरूणामथ सर्व्वेषां कर्णः शत्रुनिसूदनः। शर्म्म वर्म्म प्रतिष्ठा च जीविताशाच सञ्जय ॥ ४ ॥ तत् प्रभग्नं बलं दृष्ट्वा कौन्तेयेनामितौजसा। राधेयो वाप्याधिरथिः कर्णः किमकरोद्युधि ॥ ५ ॥ पुत्रा वा मम दुर्द्धर्षा राजानो वा महारथाः। एतन्मे सर्व्वमाचक्ष्व कुशलो ह्यसि सञ्जय ॥ ६ ॥

सञ्जय उवाच। अपराह्णे महाराज सूतपुत्रः प्रतापवान्। जघान सोमकान् सर्व्वान् भीमसेनस्य पश्यतः ॥ ७॥ भीमोऽप्यतिबलः सैन्यं धार्त्तराष्ट्रं व्यपोथयत्। अथ कर्णोऽब्रवीच्छल्यं पाञ्चालान् प्रापयस्व माम् ॥ ८ ॥ द्राव्यमाणं बलं दृष्ट्वा भीमसेनेन धीमता। यन्तारमब्रवीत् कर्णः पाञ्चालानेव मां वह ॥ ९ ॥ मद्रराजस्ततः शल्यः श्वेतानश्वान् मनोजवान्। प्राहिणोच्चेदिपाञ्चालान् कारूषांश्च महाबलः ॥ १० ॥ प्रविश्य च महत् सैन्यं शल्यः परबलार्द्दनः। न्ययच्छत्तुरगान् हृष्टो यत्र यत्रैच्छदग्रणीः ॥ ११ ॥ तं रथं मेघसङ्काशं वैयाघ्रपरिवारणम्। संदृश्य पाण्डुपाञ्चालास्त्रस्ता ह्यासन् विशाम्पते ॥ १२ ॥ ततो रथस्य निनदः प्रादुरासीन्महारणे। पर्ज्जन्यसमनिर्घोषः पर्व्वतस्येव दीर्य्यतः ॥१३॥ ततः शरशतैस्तीक्ष्णैः कर्ण आकर्णनिःसृतैः। जघान पाण्डवबलं शतशोऽथ सहस्रशः ॥ १४ ॥ तं तथा समरे कर्म्म कुर्व्वाणमपराजितम्। परिवव्रुर्महेष्वासाः पाण्डवानां महारथाः ॥ १५ ॥ तं शिखण्डी च भीमश्च धृष्टद्युम्नश्च पार्षतः। नकुलः सहदेवश्च

द्रौपदेयाश्च सात्यकिः। परिवव्रुर्जिघांसन्तो राधेयं शरवृष्टिभिः ॥ १६ ॥ सात्यकिस्तु तदा कर्णं विंशत्या निशितैः शरैः। अताड़यद्रणे शूरो जत्रुदेशे नरोत्तमः ॥ १७ ॥ शिखण्डी पञ्चविंशत्या धृष्टद्युम्नस्तु सप्तभिः। द्रौपदेयाश्चतुःषष्ट्या सहदेवश्च सप्तभिः। नकुलश्च शतेनाजौ कर्णं विव्याध सायकैः ॥ १८ ॥ भीमसेनस्तु राधेयं नवत्या नतपर्वणाम्। विव्याध समरे क्रुद्धो जत्रुदेशे महाबलः ॥ १९ ॥ अथ प्रहस्याधिरथिर्विक्षिपन् धनुरुत्तमम्। मुमोच निशितान् वाणान् पीड़यन् सुमहाबलः। तान् प्रत्यविध्यद्राधेयः पञ्चभिः पञ्चभिः शरैः ॥ २० ॥ सात्यकेस्तु धनुश्छित्त्वा ध्वजञ्च भरतर्षभ। तथैव नवभिर्बाणैराजघान स्तनान्तरे ॥ २१ ॥ भीमसेनं ततः क्रुद्धो विव्याध त्रिंशता शरैः। सहदेवस्य भल्लेन ध्वजं चिच्छेद मारिष। सारथिञ्च त्रिभिर्बाणैराजघान परन्तपः ॥ २२ ॥ विरथान् द्रौपदेयांश्च चकार भरतर्षभ। अक्ष्णोर्निमेषमात्रेण तदद्भुतमिवाभवत् ॥ २३ ॥ विमुखीकृत्य तान् शूरान् शरैः सन्नतपर्वभिः। पाञ्चालानहनत् शूरश्चेदीनाञ्च महारथान् ॥ २४ ॥ ते वध्यमानाः समरे चेदिमत्स्या विशाम्पते। कर्णमेकमभिद्रुत्य शरसङ्घैः समार्पयन्। तान् जघान शितैर्बाणैः सूतपुत्रो महारथः ॥ २५ ॥ एतदत्यद्भुतं कर्म दृष्टवानस्मि भारत। यदेकः समरे शूरान् सूतपुत्रः प्रतापवान् ॥ २६ ॥ यतमानान् परंशक्त्या योधयंस्तांश्च धन्विनः। पाण्डवेयान् महाराज शरैर्वारितवान्रणे ॥ २७ ॥ तत्र भारत कर्णस्य लाघवेन महात्मनः। तुतुषुर्देवताः सर्वाः सिद्धाश्च सह चारणैः ॥ २८ ॥ अपूजयन्महेष्वासा धार्त्तराष्ट्रा नरोत्तम। कर्णं रथवरश्रेष्ठं श्रेष्ठं सर्वधनुष्मताम् ॥ २९ ॥ ततः कर्णो महाराज ददाह रिपुवाहिनीम्। कक्षमिद्धो यथा वह्निर्निदाघे ज्वलितो महान् ॥ ३० ॥ ते वध्यमानाः कर्णेन पाण्डवेयास्ततस्ततः। प्राद्रवन्त रणे भीताः कर्णं

दृष्ट्वा महारथम् ॥ ३१ ॥ तत्राक्रन्दो महानासीत् पाञ्चालानां महारणे। वध्यतां सायकैस्तीक्ष्णैः कर्णचापवरच्युतैः ॥ ३२ ॥ तेन शब्देन वित्रस्ता पाण्डवानां महाचमूः। कर्णमेकं रणे योधं मेनिरे तत्र शात्रवाः ॥ ३३ ॥ तत्राद्भुतं पुनश्चक्रे राधेयः शत्रु-कर्षणः। यदेनं पाण्डवाः सर्वे न शेकुरभिवीक्षितुम् ॥ ३४ ॥ यथौघः पर्वतश्रेष्ठमासाद्याभिप्रदीर्य्यते। तथा तत् पाण्डवं सैन्यं कर्णमासाद्य दीर्य्यते ॥ ३५ ॥ कर्णोऽपि समरे राजन् विधूमोऽग्नि-रिव ज्वलन्। दहंस्तस्थौ महाबाहुः पाण्डवानां महाचमूम् ॥३६॥ शिरांसि च महाराज कर्णांश्चैव सकुण्डलान्। बाहूंश्च वीरो वीराणां चिच्छेद लघु चेषुभिः ॥ ३७ ॥ हस्तिदन्तत्सरून् खड्गान् ध्वजान् शक्तीर्हयान् गजान्। रथांश्च विविधान्राजन् पताका व्यजनानि च ॥ ३८ ॥ अक्षञ्च युगयोक्त्राणि चक्राणि विविधानि च। चिच्छेद बहुधा कर्णो योधव्रतमनुष्ठितः ॥ ३९ ॥ तत्र भारत कर्णेन निहतैर्गजवाजिभिः। अगम्यरूपा पृथिवी मांसशोणितकर्द्दमा ॥ ४० ॥ विषमञ्च समञ्चैव हतैरश्वपदातिभिः। रथैश्च कुञ्जरैश्चैव न प्राज्ञायत किञ्चन ॥ ४१ ॥ नापि स्वेन परे योधाः प्राज्ञायन्त परस्परम्। घोरे शरान्धकारे तु कर्णास्त्रे च विजृम्भिते ॥ ४२ ॥ राधेयचापनिर्मुक्तैः शरैः काञ्चनभूषणैः। संछादिता महाराज पाण्डवानां महारथाः ॥ ४३ ॥ ते पाण्ड-वेयाः समरे राधेयेन पुनः पुनः। अभज्यन्त तदा राजन् यत-माना महारथाः ॥ ४४ ॥ मृगसङ्घान् यथा क्रुद्धः सिंहो द्रावयते वने। पाञ्चालानां रथश्रेष्ठान् द्रावयंश्छात्रवांस्तथा ॥ ४५ ॥ कर्णस्तु समरे योधांस्तत्र तत्र महायशाः। कालयामास पाण्डूनां यथा पशुगणान् वृकः ॥ ४६ ॥ दृष्ट्वा तु पाण्डवीं सेनां धार्त्तराष्ट्राः पराङ्मुखीम्। अभिजग्मुर्महेष्वासा रुवन्तो भैरवान्रवान् ॥ ४७ ॥ दुर्य्योधनो हि राजेन्द्र मुदा परमया युतः। वादयामास संहृष्टो

नानावाद्यानि सर्वशः ॥ ४८ ॥ पाञ्चालाश्चापि महेष्वासा भग्नास्तत्र नरोत्तमाः । न्यवर्त्तन्त यथाशूरं मृत्युं कृत्वा निवर्त्तनम् ॥ ४९ ॥ तान्निवृत्तान्रणे शूरान् राधेयः शत्रुतापनः । अनेकशो महाराज बभञ्ज पुरुषर्षभः ॥ ५० ॥ तत्र भारत कर्णेन पाञ्चाला विंशती रथाः । निहताः सायकैर्योधाश्चेदयश्च परःशताः ॥ ५१ ॥ कृत्वा शून्यान् रथोपस्थान् वाजिपृष्ठांश्च भारत । निर्मनुष्यान् गजस्कन्धान् पादातांश्चैव विद्रुतान् ॥ ५२ ॥ आदित्य इव मध्याह्ने दुर्निरीक्ष्यः परन्तपः । कालान्तकवपुः शूरः सूतपुत्रो व्यराजत ॥ ५३ ॥ एवमेतन्महाराज नरवाजिरथद्विपान् । हत्वा तस्थौ महेष्वासः कर्णोऽरिगणसूदनः ॥ ५४ ॥ यथा भूतगणान् हत्वा कालस्तिष्ठेन्महाबलः । तथा स सोमकान् हत्वा तस्थावेको महारथः ॥ ५५ ॥ तत्राद्भुतमपश्याम पाञ्चालानां पराक्रमम् । वध्यमानापि यत् कर्णं नाजह्रु रणमूर्द्धनि ॥ ५६ ॥ राजा दुःशासनश्चैव कृपः शारद्वतस्तथा । अश्वत्थामा कृतवर्मा शकुनिश्च महाबलः । न्यहनन् पाण्डवीं सेनां शतशोऽथ सहस्रशः ॥ ५७ ॥ कर्णपुत्रौ तु राजेन्द्र भ्रातरौ सत्यविक्रमौ । निजघ्नाते बलं क्रुद्धौ पाण्डवानामितस्ततः ॥ ५८ ॥ तत्र युद्धं महच्चासीत् क्रूरं विशसनं महत् ॥ ५९ ॥ तथैव पाण्डवाः शूरा धृष्टद्युम्नशिखण्डिनौ । द्रौपदेयांश्च संक्रुद्धा अभ्यघ्नंस्तावकं बलम् ॥ ६० ॥ एवमेष क्षयो वृत्तः पाण्डवानामितस्ततः । तावकानामपि रणे भीमं प्राप्य महाबलम् ।

इति कर्णपर्वणि संकुलयुद्धे अष्टसप्ततोऽध्यायः ॥ ७८ ॥

---

सञ्जय उवाच । अर्जुनस्तु महाराज हत्वा सैन्यं चतुर्विधम् । सूतपुत्रञ्च संरब्धं दृष्ट्वा चैव महारणे ॥ १ ॥ शोणितोदां नदीं

कृत्वा मांसमज्जास्थिपङ्किलाम्। मनुष्यशीर्षपाषाणां हस्तच्छन्नकृत-रोधसम् ॥ २ ॥ शूरास्थिचयसंकीर्णां काककृध्रानुनादिताम्। छत्रहंसप्लवोपेतां वीरवृक्षापहारिणीम् ॥ ३ ॥ हारपद्माकरवती-मुष्णीषवरफेनिलाम्। धनुःशरझषोपेतां नरक्षुद्रकपालिनीम् ॥४॥ चर्मवर्मभ्रमोपेतां रथोडुपसमाकुलाम्। जयैषिणान्तु सुतरां भीरूणाञ्च सुदुस्तराम् ॥ ५ ॥ तां नदीं प्रापयित्वा तु वीभत्सुः पर-वीरहा। वासुदेवमिदं वाक्यमब्रवीत् पुरुषर्षभः ॥ ६ ॥

अर्जुन उवाच। एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते। भीमसेनादयश्चैते योधयन्ति महारथान्। एते द्रवन्ति पाञ्चालाः कर्णस्त्रस्ता जनार्द्दन ॥ ७ ॥ एष दुर्य्योधनो राजा श्वेतछत्रेण धार्य्यता। कर्णेन भग्नान् पाञ्चालान् द्रावयन् बहुशोभत ॥ ८ ॥ कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः। एते रक्षन्ति राजानं सूतपुत्रेण रक्षिताः। अवध्यमानास्तेऽस्माभिः पातयिष्यन्ति सोम-कान् ॥ ९ ॥ एष शल्यो रथोपस्थे रश्मिसञ्चारकोविदः। सूत-पुत्ररथं कृष्ण वाहयन् बहु शोभते ॥ १० ॥ तत्र मे बुद्धिरुत्पन्ना वाहयात्र महारथम्। नाहत्वा समरे कर्णं निवर्त्तिष्ये कथञ्चन ॥ ११ ॥ राधेयोऽप्यन्यथा पार्थान् सृञ्जयांश्च महारथान्। निः-शेषान् समरे कुर्य्यात् पश्यतां नो जनार्द्दन ॥ १२ ॥ ततः प्राया-द्रथेनाशु केशवस्तव वाहिनीम्। कर्णं प्रति महेष्वासं द्वैरथे सव्य-साचिना ॥ १३ ॥ प्रयातश्च महाबाहुः पाण्डवानुज्ञया हरिः। आश्वासयन्रथेनैव पाण्डुसैन्यानि सर्व्वशः ॥ १४ ॥ रथघोषः स संग्रामे पाण्डवेयस्य संबभौ। वासवाशनितुल्यस्य महौघस्येव मारिष ॥ १५ ॥ महता रथघोषेण पाण्डवः सत्यविक्रमः। अभ्यया-दप्रमेयात्मा निर्ज्जयंस्तववाहिनीम् ॥ १६ ॥ तमायान्तं समीक्ष्यैव श्वेताश्वं कृष्णसारथिम्। मद्रराजोऽब्रवीत् कर्णं केतुं दृष्ट्वा महा-त्मनः ॥ १७ ॥ अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः।

निघ्नन्नमित्रान् समरे यं कर्ण परिपृच्छसि ॥ १८ ॥ एष तिष्ठति कौन्तेयः संस्पृशन् गाण्डिवं धनुः । तं हनिष्यसि चेदद्य तन्नः श्रेयो भविष्यसि ॥ १९ ॥ त्वामभिप्रेप्सुरायाति कर्ण निघ्नन् वरान् वरान् । असह्यमानो राधेय तं याहि प्रति भारतम् ॥ २० ॥ एषा विदीर्य्यते सेना धार्त्तराष्ट्रः समन्ततः । अर्जुनस्य भयात्तूर्णं निघ्नतः पार्थिवान् बहून् ॥ २१ ॥ वर्जयन् सर्वसैन्यानि त्वरते हि धनञ्जयः । त्वदर्थमिति मन्येऽहं यथास्योदीर्य्यते वपुः ॥ २२ ॥ न ह्यवस्थास्यते पार्थो युयुत्सुः केनचित् सह । त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे ॥ २३ ॥ विरथं धर्मराजञ्च दृष्ट्वा सुदृढ़-विक्षतम् । शिखण्डिनं सात्यकिञ्च धृष्टद्युम्नञ्च पार्षतम् ॥ २४ ॥ द्रौपदेयान् युधामन्युमुत्तमौजसमेवच । नकुलं सहदेवञ्च भ्रातरौ द्वौ समीक्ष्य च ॥ २५ ॥ सहसैकरथः पार्थस्त्वामभ्येति परन्तपः । क्रोधरक्तेक्षणः क्रुद्धो जिघांसुः सर्वपार्थिवान् ॥ २६ ॥ त्वरितोऽभिपतत्यस्मांस्त्यक्त्वा सैन्यान्यसंशयम् । तं कर्ण प्रतियाह्येनं नास्त्यन्यो हि धनुर्द्धरः ॥ २७ ॥ न तं पश्यामि लोकेऽस्मिंस्त्वत्तो ह्यन्यं धनुर्द्धरम् । अर्जुनं समरे क्रुद्धं यो वेलामिव धारयेत् ॥ २८ ॥ न चास्य रक्षां पश्यामि पार्श्वतो न च पृष्ठतः । एक एवाभियाति त्वां पश्य साफल्यमात्मनः ॥ २९ ॥ त्वं हि कृष्णौ रणे शक्तः संसाधयितुमाहवे । तवैष भारो राधेय प्रत्युद्याहि धनञ्जयम् ॥ ३० ॥ समानो ह्यसि भीष्मेण द्रोणद्रौणिकृपैरपि । सव्यसाचिन-मायान्तं निवारय महारणे ॥ ३१ ॥ लेलिहानं यथा सर्पं गर्ज्जन्त-मृषभं यथा । वनस्थितं यथा व्याघ्रं जहि कर्ण धनञ्जयम् ॥ ३२ ॥ एते द्रवन्ति समरे धार्त्तराष्ट्रा महारथाः । अर्जुनस्य भयात्तूर्णं निरपेक्षा नराधिपाः ॥ ३३ ॥ द्रवतामथ तेषान्तु नान्योऽस्ति युधि मानवः । भयहा यो भवेद्वीरस्त्वामृते सूतनन्दन ॥ ३४ ॥ एते त्वां कुरव सर्वे द्वीपमासाद्य संयुगे । धिष्ठिताः पुरुषव्याघ्र त्वत्तः

शरणकाङ्क्षिणः ॥ ३५ ॥ वैदेहाम्वष्ठकाम्वोजास्तथा नग्नजितस्त्वया। गान्धाराश्च यथा धृत्या जिताः संख्ये सुदुर्ज्जयाः। तां धृतिं कुरु राधेय ततः प्रत्येहि पाण्डवम् ॥ ३६ ॥ वासुदेवञ्च वार्ष्णेयं प्रीयमाणं किरीटिना। प्रत्युद्याहि महावाहो पौरुषे महति स्थितः ॥ ३७ ॥

कर्ण उवाच। प्रकृतिस्थोऽसि मे शल्य इदानीं सम्मतस्त्वया। प्रतिभासि महावाहो विभीश्चैव धनञ्जयात् ॥ ३८ ॥ पश्य वाह्वोर्बलं मेऽद्य शिक्षितस्य च पश्य मे। एकोऽद्य निहनिष्यामि पाण्डवानां महाचमूम्। कृष्णौ च पुरुषव्याघ्रौ तत् सत्यं प्रब्रवीमि ते ॥ ३९ ॥ नाहत्वा युधि तौ वीरौ व्यपयास्ये कथञ्चन। शयिष्ये वा निहतस्ताभ्यामनित्यो हि रणे जयः ॥ ४० ॥ कृतार्थोऽद्य भविष्यामि हत्वा वाप्यथवा हतः ॥ ४१ ॥

शल्य उवाच। अजय्यमेनं प्रवदन्ति युद्धे महारथाः कर्ण रथप्रवीरम्। एकाकिनं किमु कृष्णाभिगुप्तं विजेतुमेनं क इहोत्सहेत ॥ ४२ ॥

कर्ण उवाच। नैतादृशो जातु वभूव लोके रथोत्तमो यावदुपश्रुतन्नः। तमीदृशं प्रतियोत्स्यामि पार्थं महाहवे पश्य च पौरुषं मे ॥ ४३ ॥ रणे चरत्येष रथप्रवीरः सितैर्हयैः कौरवराजपुत्रः। स वाद्य मां नेष्यति कृच्छ्रमेतत् कर्णस्यान्तादितरन्ताः स्थ सर्व्वे ॥ ४४ ॥ अस्वेदिनौ राजपुत्रस्य हस्ताववेपमानौ जातकिणौ वृहन्तौ। दृढायुधः कृतिमान् चिप्रहस्तो न पाण्डवेयेन समोऽस्ति योधः ॥ ४५ ॥ गृह्णात्यनेकानपि कङ्कपत्रानेकं यथा तान् प्रतियोज्य चाशु। ते क्रोशमात्रे निपतन्त्यमोघाः कस्तेन योधोऽस्ति समः पृथिव्याम् ॥ ४६ ॥ अतोषयत् खाण्डवे यो हुताशं कृष्णाद्दितीयोऽतिरथस्तरस्वी। लेभे चक्रं यत्र कृष्णो महात्मा धनुर्गाण्डीवं पाण्डवः सव्यसाची ॥ ४७ ॥ श्वेताश्वयुक्तञ्च सुघोषमुग्रं रथं महावाहुरदीनसत्त्वः। महेषुधी चाक्षये दिव्यरूपे

अस्त्राणि दिव्यानि च हव्यवाहात् ॥ ४८ ॥ तथेन्द्रलोके निजघान दैत्यनसङ्ख्येयान् कालकेयांश्च सर्वान्। लेभे शङ्खं देवदत्तं स्म तत्र को नाम तेनाभ्यधिकः पृथिव्याम् ॥ ४९ ॥ महादेवं तोषयामास यो वै साक्षात् सुयुद्धेन महानुभावः। लेभे ततः पाशुपतं सुघोरं त्रैलोक्यसंहारकरं महास्त्रम् ॥ ५० ॥ पृथक् पृथक् लोकपालाः समेता ददुर्ह्यस्त्राण्यप्रमेयाणि यस्मै। यैस्तान् जघानाशु रणे नृसिंहः स कालकञ्जानसुरान् समेतान् ॥ ५१ ॥ तथा विराटस्य पुरे समेतान् सर्वानस्मानेकरथेन जित्वा। जहार तद्‌गोधनमाजिमध्ये वस्त्राणि चादत्त महारथेभ्यः ॥ ५२ ॥ तमीदृशं वीर्य्यगुणोपपन्नं कृष्णद्वितीयं परमं नृपाणाम्। समाह्वयन् साहसमुत्तमं वै जाने स्वयं सर्वलोकस्य शल्य ॥ ५३ ॥ अनन्तवीर्य्येण च केशवेन नारायणेनाप्रतिमेन गुप्तः। वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वलोकैः ॥ ५४ ॥ महात्मनः शङ्खचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य। भयञ्च मे जायतेऽसाध्वसञ्च दृष्ट्वा कृष्णावेकरथे समेतौ ॥ ५५ ॥ अतीव पार्थो युधि कार्मुकिभ्यो नारायणश्चाप्रति चक्रयुद्धे। एवंविधौ पाण्डववासुदेवौ चलेत् स्वदेशाद्धिमवान्न कृष्णौ ॥ ५६ ॥ उभौ हि शूरौ कृतिनौ दृढ़ास्त्रौ महारथौ संहननोपपन्नौ। एतादृशौ फाल्गुनवासुदेवौ कोऽन्यः प्रतीयान्मदृते तु शल्य ॥ ५७ ॥ मनोरथो यस्तु ममाद्य तस्य मद्रेश युद्धं प्रति पाण्डवस्य। नैवं चिरादाशु भविष्यतीदमत्यद्भुतं चित्रमतुल्यरूपम्। एतावहं वा युधि पातयिष्ये मां वापि कृष्णौ निहनिष्यतोऽद्य ॥ ५८ ॥ इति ब्रुवन् शल्यममित्रहन्ता कर्णो रणे मेघ इवोन्ननाद। अभ्येत्य पुत्रेण तवाभिनन्दितः समेत्य चोवाच कुरुप्रवीरम् ॥ ५९ ॥ कृपञ्च भोजञ्च महाभुजावुभौ तथैव गान्धारपतिं सहात्मजम्। गुरोः सुतञ्चावरजन्तथात्मनः पदातिनोऽथ द्विपसादिनश्च तान् ॥ ६० ॥ निरुन्धताभिद्रवताच्युतार्जुनौ

अमेण संयोजतामु सर्वशः । यथा भवद्भिर्भृशविक्षताबुभौ सुखेन हन्यामहमद्य भूमिपाः ॥ ६१ ॥ तथेति चोक्त्वा त्वरिताः स्म तेऽर्जुनं जिघांसवो वीरतमाः समाह्वयुः । शरैश्च जघ्नुर्युधि तं महारथा धनञ्जयं कर्णनिदेशकारिणः ॥ ६२ ॥ नदीनदं भूरिजलो महार्णवो यथा तथा तान् समरेऽर्जुनोऽग्रसत् ॥ ६२ ॥ न सन्दधानो न तथा शरोत्तमान् प्रमुञ्चमानो रिपुभिः प्रदृश्यते । धनञ्जयास्तैस्तु शरैर्विदारिता हता निपेतुर्नरवाजिकुञ्जराः ॥ ३४ ॥ शरार्चिषं गाण्डिवचारुमण्डलं युगान्तसूर्य्यप्रतिमानतेजसम् । न कौरवाः शेकुरुदीक्षितुं जयं यथा रविं व्याधितचक्षुषो जनाः ॥ ६४ ॥ शरोत्तमान् स प्रहितान् महारथैश्चिच्छेद पार्थः प्रहसञ्छरौघैः । भूयश्च तानहनद्बाणसङ्घान् गाण्डीवधन्वायतपूर्णमण्डलः ॥ ६६ ॥ यथोग्ररश्मिः शुचिशुक्रमध्यगो सुखं विवस्वान् हरते जलौघान् । तथार्जुनो बाणगणान्निरस्य ददाह सेनां तव पार्थिवेन्द्र ॥ ६७ ॥ तमभ्यधावद्विसृजन् कृपः शरान् तथैव भोजस्तव चात्मज स्वयम् । महारथो द्रोणसुतश्च सायकैरवाकिरंस्तोयधरा यथाचलम् ॥ ६६ ॥ जिघांसुभिस्तान् कुशलैः शरोत्तमान् महाहवे संप्रहितान् प्रयत्नतः । शरैः प्रचिच्छेद स पाण्डवस्त्वरन् पराभिनद्वक्षसि चेषुभिस्त्रिभिः ॥ ६९ ॥ स गाण्डिवव्यायतपूर्णमण्डलस्तपन्रिपूनर्ज्जुनभास्करो बभौ । शरोग्ररश्मिः शुचिशुक्रमध्यगो यथैव सूर्य्यः परिवेशवांस्तथा ॥ ७० ॥ अथाग्रबाणैर्दशभिर्धनञ्जयं पराभिनद्द्रोणसुतोऽच्युतं त्रिभिः । चतुर्भिरश्वांश्चतुरः कपिन्ततः शरैश्च नाराचवरैरवाकिरत् ॥ ७१ ॥ तथापि तं प्रस्फुरदात्तकार्मुकं त्रिभिः शरैर्यन्तृशिरः क्षुरेण ह । हयांश्चतुर्भिश्चतुरस्त्रिभिर्ध्वजं धनञ्जयो द्रौणिरथादपातयत् ॥ ७२ ॥ स रोषपूर्णो मणिवज्रहाटकैरलङ्कृतं तक्षकभोगवर्च्चसम् । महाधनं कार्मुकमन्यदाददे यथा महाहिप्रवरं गिरेस्तटात् ॥ ७३ ॥ स्व-

मायुधञ्चोपनिकीर्य्य भूतले धनुश्च कृत्वा सगुणं गुणाधिकः। समा-
हृयत्तावजितौ नरोत्तमौ शरोत्तमैर्द्रौणिरविध्यदन्तिकात्॥ ७४॥
कृपस्य भोजस्य तवात्मजस्य ते शरैरनेकैर्युधि पाण्डवर्षभम्। महा-
रथाः संयुगमूर्द्धनि स्थितास्तमोनुदं वारिधारा इवापतन्॥ ७५॥
कृपस्य पार्थः सशरं शरासनं हयान् ध्वजान् सारथिमेव पत्रिभिः।
समार्पयद्बाहुसहस्रविक्रमस्तथा यथा वज्रधरः पुरा बलेः॥ ७६॥
स पार्थबाणैर्विनिपातितायुधो ध्वजावमर्द्दे च कृते महाहवे। कृतः
कृपो बाणसहस्रयन्त्रितो यथापगेयः प्रथमं किरीटिना॥ ७७॥
शरैः प्रचिच्छेद तवात्मजस्य च ध्वजं धनुश्च प्रचकर्त्त नर्द्दतः।
जघान चाश्वान् कृतवर्म्मणः शुभान् ध्वजञ्च चिच्छेद ततः प्रतापवान्
॥ ७८॥ सवाजिसूतेष्वसनान् सकेतनान् जघान नागांश्च रथांस्त्वरंश्च
सः। ततः प्रकीर्णं सुमहद्बलं तव प्रदारितः सेतुरिवाम्भसा यथा
॥ ७९॥ ततोऽर्जुनस्याशु रथेन केशवश्चकार शत्रूनपसव्यमातुरान्
॥ ८०॥ ततः प्रयातं त्वरितं धनञ्जयं शतक्रतुं वृत्रनिजघ्नुषं
यथा। समभ्यधावन् पुनरुच्छ्रितैर्ध्वजै रथैः प्रयुक्तैरपरे युयुत्सवः
॥ ८१॥ अथाभिसृत्य प्रतिवार्य्य तानरीन् धनञ्जयस्याभिमुखं
महारथाः। शिखण्डिशैनेययमाः शितैः शरैर्विदारयन्तो व्यनदन्
सुभैरवम्॥ ८२॥ ततोऽभिजघ्नुः कुपिताः परस्परं शरैस्तदाञ्जो-
गतिभिः सुतेजनैः। कुरुप्रवीराः सह सृञ्जयैर्यथासुराः पुरा
देवगणैस्तथाहवे॥ ८३॥ जयेप्सवः स्वर्गमनाय चोत्सुकाः पतन्ति
नागाश्वरथाः परन्तपाः। जगर्ज्जुरुच्चैर्बलवच्च विव्यधुः शरैः
सुमुक्तैरितरेतरं पृथक्॥ ८४॥ शरान्धकारे तु महात्मभिः कृते
महामृधे योधवरैः परस्परम्। चतुर्द्दिशो वै विदिशश्च पार्थिव
प्रभा च सूर्य्यस्य तमोवृताभवत्॥ ८५॥

इति कर्णपर्वणि एकोनाशीतितमोऽध्यायः॥ ७९॥

सञ्जय उवाच। राजन् कुरूणां प्रवरैर्बलैर्भीममर्मभिर्हतम्। मज्जन्तमिव कौन्तेयमुज्जिहीर्षुर्धनञ्जयः ॥ १ ॥ विसृज्य सूतपुत्रस्य सेनां भारत सायकैः। प्राहिणोन्मृत्युलोकाय परवीरान् धनञ्जयः ॥ २ ॥ ततोऽस्याम्बरमाश्रित्य शरजालानि भागशः। अदृश्यन्त तथान्ये च निघ्नन्तस्तव वाहिनीम् ॥ ३ ॥ स पक्षिसङ्घाचरितमाकाशं पूरयञ्छरैः। धनञ्जयो महाराज कुरूणामन्तकोऽभवत् ॥ ४ ॥ ततो भल्लैः क्षुरप्रैश्च नाराचैर्विमलैरपि। गात्राणि प्राच्छिणोत् पार्थः शिरांसि च चकर्त्त ह ॥ ५ ॥ छिन्नगात्रैर्विकवचैर्विशिरस्कैः समन्ततः। पतितैश्च पतद्भिश्च योधैरासीत् समावृता ॥ ६ ॥ धनञ्जयशराभ्यस्तैः स्यन्दनाश्वरथद्विपैः। संछिन्नभिन्नविध्वस्तैर्व्यङ्गाङ्गावयवैः स्तृता ॥ ७ ॥ सुदुर्गमा सुविषमा घोरात्यर्थं सुदुर्दृशा। रणभूमिरभूद्राजन् महावैतरणी यथा ॥ ८ ॥ ईषाचक्राक्षभग्नैश्च व्यश्वैः साश्वैश्च युध्यताम्। ससूतैर्हतसूतैश्च रथैः स्तीर्णाभवन्मही ॥ ९ ॥ सुवर्णवर्मसन्नाहैर्योधैः कनकभूषणैः। आस्थिताः कृप्तवर्माणो भद्रा नित्यमदा द्विपाः ॥ १० ॥ क्रुद्धाः क्रूरैर्महामात्रैः पार्ष्णाङ्गुष्ठप्रचोदिताः। चतुःशताः शरवरैर्हताः पेतुः किरीटिना। पर्य्यस्तानीव शृङ्गाणि ससत्त्वानि महागिरेः ॥ ११ ॥ धनञ्जयशराभ्यस्तैस्तीर्णा भूर्वरवारणैः ॥ १२ ॥ समन्ताज्जलदप्रख्यान् वारणान्मदवर्षिणः। अभिपेदेऽर्जुनरथो घनान् भिन्दन्निवांशुमान् ॥ १३ ॥ हतैर्गजमनुष्याश्वैर्भिन्नैश्च बहुधा रथैः। विशस्त्रयन्त्रकवचैर्युद्धशौण्डैर्गतासुभिः। अपविद्धायुधैर्मार्गः स्तीर्णोऽभूत् फाल्गुनेन वै ॥ १४ ॥ व्यस्फूर्ज्जयच्च गाण्डीवं सुमहद्भैरवं वरम्। घोरवज्रविनिष्पेषः स्तनयित्नोरिवाम्बरे ॥ १५ ॥ ततः प्रादीर्य्यत चमूर्धनञ्जयशराहता। महावातसमाविद्धा महानौरिव सागरे ॥ १६ ॥ नानारूपाः प्राणहराः शरा गाण्डीवचोदिताः। अलातोल्काशनिप्रख्यास्तव सैन्यं

विनिर्द्दहन्॥ १७॥ महागिरौ वेणुवनं निशि प्रज्वलितं यथा। तथा तव महासैन्यं प्रास्फुटच्छरपीड़ितम्॥ १८॥ संपिष्टदग्धविध्वस्तं तव सैन्यं किरीटिना। हतं प्रविहतं बाणैः सर्वतः प्रद्रुतं दिशः॥ १९॥ महावने मृगगणा दावाग्नित्रासिता यथा। कुरवः पर्य्यवर्त्तन्त निर्द्दग्धा सव्यसाचिना॥ २०॥ उत्सृज्य हि महाबाहुं भीमसेनं तथा रणे। बलं कुरूणामुद्विग्नं सर्वमासीत् पराङ्मुखम्॥ २१॥ ततः कुरुषु भग्नेषु वीभत्सुरपराजितः। भीमसेनं समासाद्य मुहूर्त्तं सोऽभ्यवर्त्तत॥ २२॥ समागम्य च भीमेन मन्त्रयित्वा च फाल्गुनः। विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरम्॥ २३॥ भीमसेनाभ्यनुज्ञातस्ततः प्रायाद्धनञ्जयः। नादयन्नथघोषेण पृथिवीं द्याञ्च भारत॥ २४॥ ततः परिवृतो वीरैर्द्दशभिर्योधपुङ्गवैः। दुःशासनादवरजैस्तव पुत्रैर्धनञ्जयः॥ २५॥ ते तमभ्यर्द्दयन् बाणैरुल्काभिरिव कुञ्जरम्। आततेष्वसनाः शूरा नृत्यन्त इव भारत॥ २६॥ अपसव्यांस्तु तांश्चक्रे रथेन मधुसूदनः। नियुक्तान् हि स तान्मेने यमायाशु किरीटिना॥ २७॥ ततस्ते प्राद्रवच्छूराः पराङ्मुखरथेऽर्जुने॥ २८॥ तेषामापततां केतूनश्वांश्चापानि सायकान्। नाराचैरर्द्धचन्द्रैश्च क्षिप्रं पार्थो न्यपातयत्। अथान्यैर्द्दशभिर्भल्लैः शिरांस्येषां न्यपातयत्॥ २९॥ रोषसंरक्तनेत्राणि सन्दष्टौष्ठानि भूतले। तानि वक्त्राणि विबभुः कमलानीव भूरिशः॥ ३०॥ तांस्तु भल्लैर्महावेगैर्द्दशभिर्द्दश कौरवान्। रुक्माङ्गदान् रुक्मपुङ्खैर्हत्वा प्रायादमित्रहा॥ ३१॥

इति कर्णपर्वणि संकुलयुद्धे अशीतितमोऽध्यायः॥ ८०॥

---

सञ्जय उवाच। तं प्रयान्तं महावेगैरश्वैः कपिवरध्वजम्। युद्धायाभ्याद्रवन् वीराः कुरूणां नवती रथाः॥ १॥ कृत्वा

संशप्तका घोरं शपथं पारलौकिकम् । परिवव्रुर्नरव्याघ्रा नर-
व्याघ्रं रणेऽर्ज्जुनम् ॥ २ ॥ कृष्णा श्वेतान् महावेगानश्वान् काञ्चन-
भूषणान् । मुक्ताजालप्रतिच्छन्नान् प्रैषीत् कर्णरथं प्रति ॥ ३ ॥
ततः कर्णरथं यान्तमरिघ्नन्तं धनञ्जयम् । बाणवर्षैरभिघ्नन्तः
संशप्तकरथा ययुः ॥ ४ ॥ त्वरमाणांस्तु तान् सर्वान् ससूतेष्वसन-
ध्वजान् । जघान नवतिं वीरानर्ज्जुनो निशितैः शरैः ॥ ५ ॥
तेऽपतन्त हता बाणैर्नानारूपैः किरीटिना । सविमाना यथा
सिद्धाः स्वर्गात् पुण्यक्षये तथा ॥ ६ ॥ ततः सरथनागाश्वाः कुरवः
कुरुसत्तमम् । निर्भया भरतश्रेष्ठमभ्यवर्त्तन्त फाल्गुनम् ॥ ७ ॥
तदायस्तमनुष्याश्वमुदीर्णवरवारणम् । पुत्राणान्ते महासैन्यं
समरौत्सीद्धनञ्जयम् ॥ ८ ॥ शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंश-
सायकैः । प्राच्छादयन्महेष्वासाः कुरवः कुरुनन्दनम् ॥ ९ ॥ ताम-
न्तरीक्षे विततां शस्त्रवृष्टिं समन्ततः । व्यधमत् पाण्डवो बाणै-
स्तमः सूर्य्य इवांशुभिः ॥ १० ॥ ततो म्लेच्छाः स्थितैर्मत्तैस्त्रयोदश-
शतैर्गजैः । पार्श्वतो व्यहनन् पार्थं तव पुत्रस्य शासनात् ॥ ११ ॥
कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः । कम्पनैर्भिन्दिपालैश्च
रथस्थं पार्थमार्द्दयन् ॥ १२ ॥ तां शस्त्रवृष्टिमतुलां द्विपहस्तैः
प्रवेरिताम् । चिच्छेद निशितैर्भल्लैरर्द्धचन्द्रैश्च फाल्गुनः ॥ १३ ॥
अथ तान् द्विरदान् सर्वान्नानालिङ्गैः शरोत्तमैः । सपताकध्वजा-
रोहान् गिरीन् वज्रैरिवाहनत् ॥ १४ ॥ ते हेमपुङ्खैरिषुभिरर्द्दिता
हेममालिनः । हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः ॥१५॥
ततो गाण्डीवनिर्घोषो महानासीद्विशाम्पते । स्तनतां कूजताञ्चैव
मनुष्यगजवाजिनाम् ॥ १६ ॥ कुञ्जराश्च हता राजन् दुद्रुवुस्ते
समन्ततः । अश्वाश्च पर्य्यधावन्त हतारोहा दिशो दश ॥ १७ ॥
रथा हीना महाराज रथिभिर्वाजिभिस्तथा । गन्धर्व्वनगराकारा
दृश्यन्ते स्म सहस्रशः ॥ १८ ॥ अश्वारोहा महाराज धावमाना-

स्ततस्ततः। तत्र तत्रैव दृश्यन्ते निहताः पार्थसायकैः ॥ १९ ॥ तस्मिन् क्षणे पाण्डवस्य बाह्वोर्बलमदृश्यत। यत् सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि ॥ २० ॥ ततस्त्वरङ्गेण महता बलेन भरतर्षभ। दृष्ट्वा परिवृतं राजन् भीमसेनः किरीटिनम् ॥ २१ ॥ हतावशेषानुत्सृज्य त्वदीयान् कतिचिद्रथान्। जवेनाभ्यद्रवद्राजन् धनञ्जयरथं प्रति ॥ २२ ॥ ततस्तत् प्राद्रवत् सैन्यं हतभूयिष्ठमातुरम्। दृष्ट्वार्जुनं तदा भीमो जगाम भ्रातरं प्रति ॥ २३ ॥ हतावशिष्टांस्तुरगानर्जुनेन महाबलान्। भीमो व्यधमदश्रान्तो गदापाणिर्महाहवे ॥ २४ ॥ कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम्। प्राकाराट्टपुरद्वारदारणीमतिदारुणाम्। ततो गदां नृनागाश्वेष्वाशु भीमो व्यवासृजत् ॥ २५ ॥ सा जघान बहूनश्वानश्वारोहांश्च मारिष ॥ २६ ॥ कार्ष्णायसतनुत्राणान्नरानश्वांश्च पाण्डवः। पोथयामास गदया सशब्दं तेऽपतन् हता ॥ २७ ॥ दन्तैर्दशन्तो वसुधां शेरते क्षतजोक्षिताः। भग्नमूर्द्धास्थिचरणाः क्रव्यादगणभोजनाः ॥ २८ ॥ असृङ्मांसवसाभिश्च तृप्तिमभ्यागता गदा। अस्थीन्यप्यश्नती तस्थौ कालरात्रीव दुर्दृशा ॥ २९ ॥ सहस्राणि दशाश्वानां हत्वा पत्तींश्च भूयसः। भीमोऽभ्यधावत् संक्रुद्धो गदापाणिरितस्ततः ॥ ३० ॥ गदापाणिं ततो भीमं दृष्ट्वा भारत तावकाः। मेनिरे समनुप्राप्तं कालदण्डोद्यतं यमम् ॥ ३१ ॥ स मत्त इव मातङ्गः संक्रुद्धः पाण्डुनन्दनः। प्रविवेश गजानीकं मकरः सागरं यथा ॥ ३२ ॥ विगाह्य च गजानीकं प्रगृह्य महतीं गदाम्। क्षणेन भीमः संक्रुद्धस्तन्निन्ये यमसादनम् ॥ ३३ ॥ गजान् सकङ्कटान् मत्तान् सारोहान् सपताकिनः। पततः समपश्याम सपक्षानिव पर्वतान् ॥ ३४ ॥ हत्वा तु स गजानीकं भीमसेनो महाबलः। पुनः स रथमास्थाय पृष्ठतोऽर्जुनमभ्ययात् ॥ ३५ ॥ निहतं प्राङ्मुखप्रायं निरुत्साहं परं बलम्। व्यालम्बत महाराज

प्रायशः शस्त्रवेष्टितम् ॥ ३६ ॥ विलम्बमानं तत् सैन्यमप्रगल्भमवस्थितम् । दृष्ट्वा प्राच्छादयद्वाणैरर्जुनः प्राणतापनैः ॥ ३७ ॥ नराश्वरथमातङ्गा युधि गाण्डीवधन्वना । शरव्रातैश्चिता रेजु कदम्बा इव केशरैः ॥ ३८ ॥ ततः कुरूणामभवदार्त्तनादो महान्नृपः । नराश्वनागासुहरैर्वध्यतामर्जुनेषुभिः ॥ ३९ ॥ हाहाकृतं भृशं वस्तं लीयमानं परस्परम् । अलातचक्रवत् सैन्यं तदाभ्रमत तावकम् ॥ ४० ॥ ततस्तद्युद्धमभवत् कुरूणां सुमहद्बलैः । न ह्यत्रासीदनिर्भिन्नो रथः सादी हयो गजः ॥ ४१ ॥ आदीप्तमिव तत् सैन्यं शरैश्छिन्नतनुच्छदम् । आसीत् स्वशोणितक्लिन्नं फुल्लाशोकवनं यथा ॥ ४२ ॥ तं दृष्ट्वा कुरवस्तत्र विक्रान्तं सव्यसाचिनम् । निराशाः समपद्यन्त सर्वे कर्णस्य जीविते ॥ ४३ ॥ अविषह्यन्तु पार्थस्य शरसम्पातमाहवे । मत्वा न्यवर्त्तन् कुरवो जिता गाण्डीवधन्वना ॥ ४४ ॥ ते हित्वा समरे कर्णं वध्यमानाश्च सायकैः । प्रदुद्रुवुर्दिशो भीतायुक्रुशुश्चापि सूतजम् ॥ ४५ ॥ अभ्यद्रवत तान् पार्थः किरञ्छरशतान् बहून् । हर्षयन् पाण्डवान् योधान् भीमसेनपुरोगमान् ॥ ४६ ॥ पुत्रास्तु मे महाराज जग्मुः कर्णरथं प्रति । अगाधे मज्जतां तेषां द्वीपः कर्णोऽभवत्तदा ॥ ४७ ॥ कुरवो हि महाराज निर्विषा पन्नगा इव । कर्णमेवोपलीयन्त भयाद्गाण्डीवधन्वनः ॥ ४८ ॥ यथा सर्वाणि भूतानि मृत्योर्भीतानि मारिष । धर्ममेवोपलीयन्ते कर्मवन्ति हि यानि च ॥ ४९ ॥ तथा कर्णं महेष्वासं पुत्रास्तव नराधिप । उपालीयन्त संत्रासात् पाण्डवस्य महात्मनः ॥ ५० ॥ ताञ्छोणितपरिक्लिन्नान् विषमस्थाञ्छरातुरान् । मा भैष्टेत्यब्रवीत् कर्णो ह्यभितो मामितेति च ॥ ५१ ॥ प्रभग्नं हि बलं दृष्ट्वा बलात् पार्थेन तावकम् । धनुर्विस्फारयन् कर्णस्तस्थौ शत्रुजिघांसया ॥ ५२ ॥ तान् विद्रुतान् कुरून् दृष्ट्वा कर्णः शस्त्रभृताम्वरः । सञ्चिन्तयित्वा पार्थस्य वधे दध्रे मनः

श्वसन् ॥ ५३ ॥ विस्फार्य्य सुमहच्चापं तत आधिरथिर्वृषः।
पाञ्चालान् पुनराधावत् पश्यतः सव्यसाचिनः ॥ ५४ ॥ ततः क्षणेन क्षितिपाः क्षतजप्रतिमेक्षणाः। कर्णं ववर्षुर्बाणौघैर्यथा मेघा महीधरम् ॥ ५५ ॥ ततः शरसहस्राणि कर्णमुक्तानि मारिष। व्ययोजयत पाञ्चालान् प्राणैः प्राणभृताम्बर ॥ ५६ ॥ तत्र शब्दो महानासीत् पाञ्चालानां महामते। वध्यतां सूतपुत्रेण मित्रार्थे मित्रगृद्धिना ॥ ५७ ॥

इति कर्णपर्वणि संकुलयुद्धे एकाशीतोऽध्यायः ॥ ८१ ॥

---

सञ्जय उवाच। ततः कर्णः कुरुषु प्रद्रुतेषु वरूथिना श्वेतहयेन राजन्। पाञ्चालपुत्रान् व्यधमत् सूतपुत्रो महेषुभिर्वात इवाभ्रसङ्घान् ॥ १ ॥ सूतं रथादञ्जलिकैर्निपात्य जघान चाश्वान् जनमेजयस्य। शतानीकं सुतसोमञ्च भल्लैरवाकिरद्धनुषी चाप्यकृन्तत् ॥ २ ॥ धृष्टद्युम्नं निर्विभेदाथ षड्भिर्जघान चाश्वांस्तरसा तस्य सङ्ख्ये। हत्वा चाश्वान् सात्यकेः सूतपुत्रः कैकेयपुत्रं न्यवधीद्विशोकम् ॥ ३ ॥ तमभ्यधावन्निहते कुमारे कैकेयसेनापतिरुग्रकर्मा। शरैर्विधुन्वन् भृशमुग्रवेगैः कर्णात्मजं चाभ्यहनत् प्रसेनम् ॥ ४ ॥ तस्यार्द्धचन्द्रैस्त्रिभिरुच्चकर्त्त प्रसह्य बाहू च शिरश्च कर्णः। स स्यन्दनाद्गामगमद्गतासुः परश्वधैः शाल इवावरुग्णः ॥ ५ ॥ हताश्वमञ्जोगतिभिः प्रसेनः शिनिप्रवीरं निशितैः पृषत्कैः। प्रच्छाद्य नृत्यन्निव कर्णपुत्रः शैनेयबाणाभिहतः पपात ॥ ६ ॥ पुत्रे हते क्रोधपरीतचेताः कर्णः शिनीनामृषभं जिघांसुः। हतोऽसि शैनेय इति ब्रुवन् स व्यवासृजद्बाणममित्रसाहम् ॥ ७ ॥ तमस्य चिच्छेद शरं शिखण्डी त्रिभिस्त्रिभिश्च प्रतुतोद कर्णम्। शिखण्डिनः कार्मुकं स ध्वजञ्च छित्त्वा क्षुराभ्यां व्यधमत् सूतजातः ॥ ८ ॥

शिखण्डिनं षड्भिराविध्यदुग्रो धार्ष्टद्युम्नेः स शिरश्चोच्चकर्त्त।
अथाभिनत् सुतसोमं शरेण सुसंशितेनाधिरथिर्महात्मा ॥ ९ ॥
अथाक्रन्दे तुमुले वर्त्तमाने धार्ष्टद्युम्नौ निहते तत्र कृष्णः। अपा-
ञ्चाल्यं क्रियते याहि पार्थ कर्णं जहीत्यब्रवीद्राजसिंह ॥ १० ॥ ततः
प्रहस्याशु नरप्रवीरो रथं रथेनाधिरथेर्जगाम। भये तेषां त्राण-
मिच्छन् सुबाहुरभ्याहतानां रथयूथपेन ॥ ११ ॥ विस्फार्य्य
गाण्डीवमथोग्रघोषं ज्यया समाहत्य तले भृशञ्च। बाणान्धकारं
सहसैव कृत्वा जघान नागाश्वरथध्वजांश्च ॥ १२ ॥ प्रतिश्रुतः प्राच-
रन्नन्तरीक्षे गुहा गिरीणामपतन् वयांसि। यन्मण्डलज्येन
विजृम्भमाणो रौद्रे मुहूर्त्तेऽभ्यपतत् किरीटी ॥ १३ ॥ तं भीम-
सेनोऽनुययौ रथेन पृष्ठे रक्षन् पाण्डवमेकवीरः। तौ राजपुत्रौ
त्वरितौ रथाभ्यां कर्णाय यातावरिभिर्विमुक्तौ ॥ १४ ॥ तत्रान्तरे
सुमहत् सूतपुत्रश्चक्रे युद्धं सोमकान् संप्रमृद्नन्। रथाश्वमातङ्ग-
गणान् जघान प्रच्छादयामास शरैर्दिशश्च ॥ १५ ॥ तमुत्तमौजा
जनमेजयश्च क्रुद्धौ युधामन्युशिखण्डिनौ च। कर्णं बिभेदुः सहिताः
पृषत्कैः संनर्दमानाः सह पार्षतेन ॥ १६ ॥ ते पञ्च पञ्चालरथ
प्रवीरा वैकर्त्तनं कर्णमभिद्रवन्तः। तस्माद्रथाच्च्यावयितुं न शेकु-
र्धैर्य्यात् कृतात्मानमिवेन्द्रियार्थाः ॥ १७ ॥ तेषां धनूंषि ध्वजवाजि-
सूतांस्तूणं पताकाश्च निकृत्य बाणैः। तान् पञ्चभिः स्वभ्यहनत्
पृषत्कैः कर्णस्ततः सिंह इवोन्ननाद ॥ १८ ॥ तस्यास्यतस्तानभि-
निघ्नतश्च ज्याबाणहस्तस्य धनुःस्वनेन। साद्रिद्रुमा स्यात् पृथिवी
विशीर्णेत्यतीव मत्वा जनता व्यसीदत् ॥ १९ ॥ स शक्रचापप्रतिमेन
धन्वना भृशायतेनाधिरथिः शरान् सृजन्। बभौ रणे दीप्त-
मरीचिमण्डलो यथांशुमाली परिवेशवांस्तथा ॥ २० ॥ शिखण्डिनं
द्वादशभिः पराभिनच्छितैः शरैः षड्भिरथोत्तमौजसम्। त्रिभि-
र्युधामन्युमविध्यदाशुगैस्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ ॥ २१ ॥

पराजिताः पञ्च महारथास्तु ते महाहवे सूतसुतेन मारिष।
निरुद्यमास्तस्य(ः) शरभिन्नदेहा यथेन्द्रियार्थात्मवता पराजिता ॥२२॥
निमज्जतस्तानथ कर्णसागरे विपन्ननावो वणिजो यथार्णवे।
उद्दध्रिरे नौभिरिवार्णवाद्रथैः सुकल्पितैर्द्रौपदिजाः स्वमातुलान्
॥ २३ ॥ ततः शिनीनामृषभः शितैः शरैर्निकृत्य कर्णप्रहितानिषून्
बहून्। विदार्य कर्णं निशितैरयस्मयैस्तवात्मजं ज्येष्ठमविध्यदष्टभिः
॥ २४ ॥ कृपोऽथ भोजश्च तवात्मजस्तथा स्वयञ्च कर्णो निशितैरताड़यत्।
स तैश्चतुर्भिर्युयुधे यदूत्तमो दिगीश्वरैर्दैत्यपतिर्यथा तथा ॥ २५ ॥
समाततेनेष्वसनेन कूजता भृशायतेनामितवाणवर्षिणा। बभूव दुर्द्धर्षतरः स सात्यकिः
शरन्नभोमध्यगतो यथा रविः ॥ २६ ॥ पुनः समास्थाय रथान् सुदंशिताः
शिनिप्रवीरं जुगुपुः परन्तपाः। समेत्य पाञ्चालमहारथा रणे
मरुद्गणाः शक्रमिवारिनिग्रहे ॥ २७ ॥ ततोऽभवद्युद्धमतीव दारुणं
तवाहितानां तव सैनिकैः सह। नराश्वमातङ्गविनाशनं तथा
यथा सुराणामसुरैः पुराभवत् ॥ २८ ॥ रथद्विपा वाजिपदातयस्तथा भ्रमन्ति
नानाविधशस्त्रवेष्टिताः। परस्परेणाभिहताश्च चस्खलुर्विनेदुरार्त्ता
व्यसवोऽपतंस्तथा ॥ २९ ॥ तथागते भीममभीस्तवात्मजः ससार राजावरजः
किरञ्छरैः। तमभ्यधावत्त्वरितो वृकोदरो महारुरुं सिंह इवाभिपेदिवान् ॥ ३० ॥
ततस्तयोर्युद्धमतीवदारुणं प्रदीव्यतोः प्राणदुरोदरं द्वयोः। परस्परेणाभिनिविष्टरोषयोर्यथा
पुरा शम्बरशक्रयोरभूत् ॥ ३१ ॥ शरैः शरीरार्त्तिकरैः सुतेजनैर्निजघ्नतुस्तावितरेतरं
भृशम्। सकृत् प्रभिन्नाविव वासितान्तरे महागजौ मन्मथसक्तचेतसौ ॥ ३२ ॥
तवात्मजस्याथ वृकोदरस्त्वरन् धनुः क्षुराभ्यां ध्वजमेव चाच्छिनत्।
ललाटमप्यस्य बिभेद पत्रिणा शिरश्च कायात् प्रजहार सारथेः
॥ ३३ ॥ स राजपुत्रोऽन्यदवाप्य कार्मुकं वृकोदरं द्वादशभिः परा-

भिनत् । स्वयं नियच्छंस्तुरगानजिह्मगैः शरैश्च भीमं पुनरप्यवीवृषत् ॥ ३४ ॥ ततः शरं सूर्य्यमरीचिसप्रभं सुवर्णवज्रोत्तमरत्नभूषितम । महेन्द्रवज्राशनिपातदुःसहं मुमोच भीमाङ्गविदारणाक्षमम् ॥ ३५ ॥ स तेन निर्विद्धतनुर्वृकोदरो निपातितः स्रस्ततनुर्गतासुवत् । प्रसार्य्य बाहू रथवर्य्यमाश्रितः पुनः स संज्ञामुपलभ्य चानदत् ॥ ३६ ॥

---

इति कर्णपर्व्वणि भीमदुःशासनयुद्धे द्व्यशीतोध्यायः ॥ ८२ ॥

सञ्जय उवाच । तत्राकरोद्दुष्करं राजपुत्रो दुःशासनस्तुमुलं युध्यमानः । चिच्छेद भीमस्य धनुः शरेण षड्भिः शरैः सारथिमप्यविध्यत् ॥ १ ॥ स तत् कृत्वा राजपुत्रस्तरस्वी विव्याध भीमं नवभिः पृषत्कैः । ततोऽभिनद्बहुभिः क्षिप्रमेव वरेषुभिर्भीमसेनं महात्मा ॥ २ ॥ ततः क्रुद्धो भीमसेनस्तरस्वी शक्तिञ्चोग्रां प्राहिणोत्ते सुताय । तामापतन्तीं सहसातिघोरां दृष्ट्वा सुतस्ते ज्वलितामिवोल्काम् । आकर्णपूर्णैरिषुभिर्महात्मा चिच्छेद पुत्रो दशभिः पृषत्कैः ॥ ३ ॥ दृष्ट्वा तु तत् कर्म कृतं सुदुष्करं प्रापूजयन् सर्वयोधाः प्रहृष्टाः । अथाशु भीमञ्च शरेण भूयो गाढ़ं स विव्याध सुतस्त्वदीयः ॥ ४ ॥ चुक्रोध भीमः पुनराशु तस्मै भृशं प्रजज्वाल रुषाभिवीक्ष्य । विद्धोऽस्मि वीराशु भृशं त्वयाद्य सहस्व भूयोऽपि गदाप्रहारम् ॥ ५ ॥ उक्त्वैवमुच्चैः कुपितोऽथ भीमो जग्राह तां भीमगदां वधाय । उवाच चाद्याहमहं दुरात्मन् पास्यामि ते शोणितमाजिमध्ये ॥ ६ ॥ अथैवमुक्तस्तनयस्तवोग्रां शक्तिं वेगात् प्राहिणोन्मृत्युरूपाम् । आविध्य भीमोऽपि गदां सुघोरां विचिक्षिपे रोषपरीतमूर्त्तिः ॥ ७ ॥ सा तस्य शक्तिं सहसा विरुज्य पुत्रं तवाजौ ताड़यामास मूर्द्ध्नि । स विस्फुरन्नाग इव प्रभिन्नो

महानभूत् तुमुले प्राणिघोरे ॥ ८ ॥ तयाहरद्दशधन्वन्तराणि दुःशासनं भीमसेनः प्रसह्य। तया हतः पतितो वेपमानो दुःशासनो गदया वेगवत्या ॥ ९ ॥ हयाः समग्रा निहता नरेन्द्र चूर्णीकृतश्चास्य रथः पतन्त्या। विध्वस्तवर्माभरणाम्बरस्रग्विचेष्टमानो भृशवेदनातुरः ॥ १० ॥ ततः स्मृत्वा भीमसेनस्तरस्वी सापत्नकं यत् प्रयुक्तं सुतैस्ते। तस्मिन् घोरे तुमुले वर्त्तमाने प्रधानभूयिष्ठतरैः समन्तात् ॥ ११ ॥ दुःशासनं तत्र समीक्ष्य राजन् भीमो महाबाहुरचिन्त्यकर्म्मा। स्मृत्वा च केशग्रहणञ्च देव्या वस्त्रापहारञ्च रजस्वलायाः ॥ १२ ॥ अनागसो भर्त्तृपराङ्मुखाया दुःखानि दत्तान्यपि विप्रचिन्त्य। जज्वाल कोपादथ भीमसेन आज्यप्रसिक्तो हि यथा हुताशः ॥ १३ ॥ तत्राह कर्णञ्च सुयोधनञ्च कृपं द्रौणिं कृतवर्म्माणमेव। निहन्मि दुःशासनमद्य पापं संरक्षतामद्य समस्तयोधाः ॥ १४ ॥ इत्येवमुक्त्वा सहसाभ्यधावन्निहन्तुकामोऽतिबलस्तरस्वी ॥ १५ ॥ तथा तु विक्रम्य रणे वृकोदरो महागजं केशरीवोग्रवेगः। निगृह्य दुःशासनमेकवीरः सुयोधनस्याधिरथेः समक्षम् ॥ १६ ॥ रथादवप्लुत्य गतः स भूमौ यत्नेन तस्मिन् प्रणिधाय चक्षुः। असिं समुद्गृह्य शितं सुधारं कण्ठे पदाक्रम्य च वेपमानम् उत्कृत्य वक्षः पतितस्य भूमावथापिबच्छोणितमस्य कोष्णम् ॥ १७ ॥ ततो निपात्यास्य शिरोऽपकृत्य तेनासिना तव पुत्रस्य राजन्। सत्यां चिकीर्षुर्मतिमान् प्रतिज्ञां भीमोऽपिबच्छोणितमस्य कोष्णम् ॥ १८ ॥ आस्वाद्य चास्वाद्य च वीक्षमाणः क्रुद्धो हि चैनं निजगाद वाक्यम् ॥ १९ ॥ स्तन्यस्य मातुर्मधुसर्पिषोर्वा माध्वीकपानस्य च सत्कृतस्य। दिव्यस्य वा तोयरसस्य पानात् पयोदधिभ्यां मथिताच्च मुख्यात् ॥ २० ॥ अन्यानि पानानि च यानि लोके सुधामृतस्वादुरसानि तेभ्यः। सर्वेभ्य एवाभ्यधिको रसोऽयं मतो ममाद्याहितलोहितस्य ॥ २१ ॥ अथाह भीमः पुनरुग्रकर्मा दुःशासनं क्रोध-

परीतचेताः । गतासुमालोक्य विहस्य सुस्वरं किं वा कुर्य्यां मृत्युना वञ्चितोऽसि ॥ २२ ॥ एवं ब्रुवाणं पुनराद्रवन्तमास्वाद्य रक्तं तमतिप्रहृष्टम् । ये भीमसेनं ददृशुस्तदानीं भयेन तेऽपि व्यथिता निपेतुः ॥ २३ ॥ ये चापि तत्रापतिता मनुष्यास्तेषां करेभ्यः पतितं हि शस्त्रम् । भयाच्च सञ्चुक्रुशुरस्वरैस्ते निमीलिताक्षा ददृशुश्च तं ततः ॥ २४ ॥ ये तत्र भीमं ददृशुः समन्ताद्दौःशासनं तद्रुधिरं पिबन्तम् । सर्व्वेऽपलायन्त भयाभिपन्ना नायं मनुष्य इति भाषमाणाः ॥ २५ ॥ तस्मिन् कृते भीमसेनेन रूपे दृष्ट्वा च तच्छोणितं पीयमानम् । संप्राद्रवंश्चित्रसेनेन सार्द्धं भीमं रक्षो भाषमाणा भयार्त्ताः ॥ २६ ॥ युधामन्युः प्रद्रुतं चित्रसेनं सहानीकस्त्वभ्ययाद्राजपुत्रः । विव्याध चैनं निशितैः पृषत्कैर्व्यपेतभीः सप्तभिराशुमुक्तैः ॥ २७ ॥ संक्रान्तभोग इव लेलिहानो महोरगः क्रोधविषं सिसृक्षुः । निवृत्य पाञ्चालजमभ्यविध्यत्त्रिभिः शरैः सारथिमस्य षड्भिः ॥ २८ ॥ ततः सुपुङ्खेन सुपर्व्वितेन सुसंशिताग्रेण शरेण शूरः । आकर्णमुक्तेन समाहितेन युधामन्युस्तस्य शिरो जहार ॥ २९ ॥ तस्मिन् हते भ्रातरि चित्रसेने क्रुद्धः कर्णः पौरुषं दर्शयानः । व्यद्रावयत् पाण्डवानामनीकं प्रत्युद्यातो नकुलेनामितौजाः ॥ ३० ॥ भीमोऽपि हत्वा तत्रैव दुःशासनममर्षणम् । पूरयित्वाञ्जलिं भूयो रुधिरस्योग्रनिस्वनः । शृण्वतां लोकवीराणामिदं वचनमब्रवीत् ॥ ३१ ॥ एष ते रुधिरं कण्ठात् पिबामि पुरुषाधम । ब्रूहीदानीं सुसंहृष्टः पुनर्गौरिति गौरिति ॥ ३२ ॥ ये तदास्मान् प्रनृत्यन्ति पुनर्गौरिति गौरिति । तान् वयं प्रति नृत्यामः पुनर्गौरिति गौरित ॥ ३३ ॥ प्रमाणकोट्यां शयनं कालकूटस्य भोजनम् । दंशनञ्चाहिभिः कृष्णैर्दाहश्च जतुवेश्मनि ॥ ३४ ॥ द्यूतेन राज्यहरणमरण्ये वसतिश्च या । द्रौपद्याः केशपक्षस्य ग्रहणञ्च सुदारुणम् ॥ ३५ ॥ इष्वस्त्राणि च संग्रामेष्वसुखानि च

वेश्मनि। विराटभवने यश्च क्लेशोऽस्माकं पृथग्विधः ॥ ३६ ॥ शकुने-र्धार्त्तराष्ट्रस्य राधेयस्य च मन्त्रिते। अनुभूतानि दुःखानि तेषां हेतुस्त्वमेव हि ॥ ३७ ॥ दुःखान्येतानि जानीमो न सुखानि कदाचन। धृतराष्ट्रस्य दौरात्म्यात् सपुत्रस्य सदा वयम् ॥ ३८ ॥ इत्युक्त्वा वचनं राजन् जयं प्राप्य वृकोदरः। पुनराह महाराज स्मयंस्तौ केशवार्जुनौ ॥ ३९ ॥ असृग्दिग्धो विस्रवल्लोहितास्यः क्रुद्धोऽत्यर्थं भीमसेनस्तरस्वी। दुःशासने यद्रणे संश्रुतं मे तद्वै सत्यं कृतमद्येह वीरौ ॥ ४० ॥ अत्रैव दास्याम्यपरं द्वितीयं दुर्य्योधनं यज्ञपशुं विशस्य। शिरो मृदित्वा च पदा दुरात्मनः शान्तिं लप्स्ये कौरवाणां समक्षम् ॥ ४१ ॥ एतावदुक्त्वा वचनं प्रहृष्टो ननाद चोच्चैः रुधिरार्द्रगात्रः। ननर्द्द चैवातिबलो महात्मा वृत्रं निहत्येव सहस्रनेत्रः ॥ ४१ ॥

इति कर्णपर्वणि दुःशासनवधे त्र्यशीतोऽध्यायः ॥ ८३ ॥

---

सञ्जय उवाच। दुःशासने तु निहते पुत्रास्तव महारथाः। महाक्रोधविषा वीराः समरेष्वपलायिनः। दश राजन् महावीर्य्या भीमं प्राच्छादयञ्छरैः ॥ १ ॥ निषङ्गी कवची पाशी दण्डधारो धनुर्ग्रहः। अलोलुपः सहः षण्डो वातवेगसुवर्च्चसौ ॥ २ ॥ एते समेत्य सहिता भ्रातृव्यसनकर्षिताः। भीमसेनं महाबाहुं मार्गणैः समवारयन्॥ ३ ॥ स वार्य्यमाणो विशिखैः समन्तात्तैर्महारथैः। भीमः क्रोधाग्निरक्ताक्षः क्रुद्धः काल इवाबभौ ॥ ४ ॥ तांस्तु भल्लैर्महावेगैर्द्दशभिर्द्दश भारतान्। रुक्माङ्गदान् रुक्मपुङ्खैः पार्थो निन्ये यमक्षयम् ॥ ५ ॥ हतेषु तेषु वीरेषु प्रदुद्राव बलं तव। पश्यत सूतपुत्रस्य पाण्डवस्य भयार्द्दितम् ॥ ६ ॥ ततः कर्णो

महाराज प्रविवेश महद्भयम्। दृष्ट्वा भीमस्य विक्रान्तमन्तकस्य प्रजास्विव ॥ ७ ॥ तस्य त्वाकारभावज्ञः शल्यः समितिशोभनः। उवाच वचनं कर्णं प्राप्तकालमरिन्दमम् ॥ ८ ॥ मा व्यथां कुरु राधेय नैतत्त्वय्युपपद्यते। एते द्रवन्ति राजानो भीमसेनभयार्द्दिताः ॥ ९ ॥ दुर्य्योधनश्च संमूढ़ो भ्रातृव्यसनकर्षितः। दुःशासनस्य रुधिरे पीयमाने महात्मना ॥ १० ॥ व्यापन्नचेतसश्चैव शोकोपहतमन्यवः। दुर्य्योधनमुपासन्ते परिवार्य्य समन्ततः। कृपप्रभृतयः कर्ण हतशेषाश्च सोदराः ॥ ११ ॥ पाण्डवा लब्धलक्ष्याश्च धनञ्जयपुरोगमाः। त्वामेवाभिमुखाः शूरा युद्धाय समुपस्थिताः ॥ १२ ॥ स त्वं पुरुषशार्दूल पौरुषे महति स्थितः। क्षत्रधर्मं पुरस्कृत्य प्रत्युद्याहि धनञ्जयम् ॥ १३ ॥ भारो हि धार्त्तराष्ट्रेण त्वयि सर्व्वः समर्पितः। तमुद्वह महाबाहो यथाशक्ति यथाबलम् ॥ १४ ॥ जये स्याद्विपुला कीर्त्तिर्ध्रुवः स्वर्गः पराजये ॥ १५ ॥ वृषसेनश्च राधेय संक्रुद्धस्तनयस्तव। त्वयि मोहं समापन्ने पाण्डवानभिधावति ॥ १६ ॥ एतच्छ्रुत्वा तु वचनं शल्यस्यामिततेजसः। हृदि चावश्यकं भावं चक्रे युद्धाय सुस्थिरम् ॥ १७ ॥ ततः क्रुद्धो वृषसेनोऽभ्यधावदवस्थितः स्वरथे पाण्डवं तम्। वृकोदरं कालमिवात्तदण्डं गदाहस्तं पोथयन्तं त्वदीयान् ॥ १८ ॥ अथाभ्यधावन्नकुलः प्रवीरो रोषादमित्रं प्रतुदन् पृषत्कैः। कर्णस्य पुत्रं समरे प्रहृष्टो जिष्णुर्जिघांसुर्मघवेव जम्भम् ॥ १९ ॥ ततो ध्वजं स्फाटिकबिन्दुचित्रं चिच्छेद वीरो नकुलः क्षुरेण। कर्णात्मजस्येष्वसनञ्च चित्रं भल्लेन जाम्बूनदपट्टनद्धम् ॥ २० ॥ अथान्यदादाय धनुः सुशीघ्रं कर्णात्मजः पाण्डवमभ्यविध्यत्। दिव्यैर्महास्त्रैर्नकुलं महास्त्रो दुःशासनस्यापचितिं यियासुः ॥ २१ ॥ ततः स क्रुद्धो नकुलो महात्मा शरैर्महोल्काप्रतिमैरविध्यत्। दिव्यैरस्त्रैरभ्यवर्षच्च सोऽपि कर्णस्य पुत्रो नकुलं कृतास्त्रः ॥ २२ ॥ शराभि-

घाताच्च तथा राजन् त्वया च भाषास्तथमीरणाच्च। जज्वाल
कर्णस्य सुतोऽतिमात्रमिद्धो यथाज्याहुतिभिर्हुताशः ॥ २३ ॥ कर्णस्य
पुत्रो नकुलस्य राजन् सर्वानश्वानक्षिणोदुत्तमास्त्रैः। वनायुजान्
सुकुमारस्य शुभ्रानभङ्कृतान् जातरूपेण चित्रान् ॥ २४ ॥ ततो
हताश्वादवरुह्य यानादादाय चर्मामलरुक्मचन्द्रम्। आकाश-
सङ्काशमसिं गृहीत्वा पोप्लूयमानः खगवच्चचार ॥ २५ ॥ ततो-
ऽन्तरीक्षे नृवराश्वनागांश्चिच्छेद मार्गान्विचरन्विचित्रान्। ते
प्रापतन्नसिना गां विशस्ता यथाश्वमेधे पशवः शमित्रा ॥ २६ ॥
द्विसाहस्रा विदिता युद्धशौण्डा नानादेश्याः सुभृताः सत्यसन्धाः।
एकेन शीघ्रं नकुलेन कृत्ताः सारेप्सुनेवोत्तमचन्दनास्ते ॥ २७ ॥
तमापतन्तं नकुलं जवेन कर्णस्य पुत्रः सहसाभिपत्य। रणे
जिघांसन्निशितैरनेकैः समन्ततः सायकैः प्रत्यविध्यत् ॥ २८ ॥ स
तुद्यमानो नकुलः पृषत्कैर्विव्याध वीरं स चुकोप विद्धः। महाभये
रक्ष्यमाणो महात्मा भ्रात्रा भीमेनाकरोत्तत्र भीमम् ॥ २९ ॥ तं
कर्णपुत्रो विचरन्तमेकं नराश्वमातङ्गरथप्रवेकान्। क्रीड़न्तमष्टा-
दशभिः पृषत्कैर्विव्याध वीरं नकुलं सरोषः ॥ ३० ॥ स तेन
विद्धोऽतिभृशं तरस्वी महाहवे वृषसेनेन राजन्। क्रुद्धोऽभ्यधावत्
समरे जिघांसुः कर्णात्मजं पाण्डुसुतो नृवीरः ॥ ३१ ॥ वितत्य
पक्षौ सहसापतन्तं श्येनं यथैवामिषलुब्धमाजौ। अवाकिरद्वृष-
सेनस्ततस्तं शितैः शरैर्नकुलमुदारवीर्य्यम् ॥ ३२ ॥ स तान् मोघां-
स्तस्य कुर्वञ्छरौघान् चचार मार्गान्नकुलश्चित्ररूपान्। अथास्य
तूर्णं चरतो नरेन्द्र खड्गेन चित्रं नकुलस्य तस्य। महेषुभि-
र्व्यधमत् कर्णपुत्रो महारणे चर्म सहस्रतारम् ॥ ३३ ॥ तस्यायसं
निशितं तीक्ष्णधारमसिं विकोषं गुरुभारसाहम्। द्विषच्छरीरा-
पहरं सुघोरमाधुन्वतः सर्पमिवोग्ररूपम् ॥ ३४ ॥ क्षिप्रं शरैः
षड्भिरमित्रसाहश्चकर्त्त खड्गं निशितैः क्षुरप्रैः। पुनश्च पीतै

निशितैः पृषत्कैः स्तनान्तरे गाढ़मथाभ्यविध्यत् ॥ ३५ ॥ कृत्वा च तद्दुष्करमार्य्यजुष्टं नरैरन्यैः कर्म रणे महात्मा। ययौ रथं भीमसेनस्य राजन् शराभितप्तो नकुलस्त्वरावान् ॥ ३६ ॥ स भीमसेनस्य रथं हताश्वो माद्रीसुतः कर्णसुताभितप्तः। आपुप्लुवे सिंह इवाचलाग्रं संप्रेक्षमाणस्य धनञ्जयस्य ॥ ३७ ॥ ततः क्रुद्धो वृषसेनो महात्मा ववर्ष ताविषुजालेन वीरः। महारथावेकरथे समेतौ शरैः प्रभिन्दन्निव पाण्डवेयौ ॥ ३८ ॥ तस्मिन्रथे विहते पाण्डवस्य क्षिप्रञ्च खड्गे विशिखैर्निकृत्ते। अथाब्रवीन्मारुतिः फाल्गुनन्तु पश्यस्वैनं नकुलं पीड्यमानम्। अयञ्च नो धावति कर्णपुत्रस्तस्माद्भवान् प्रत्युपयातु कार्ष्णिम् ॥ ३९ ॥ स तन्निशम्यैव वचः किरीटी रथं समासाद्य वृकोदरस्य। कपिध्वजं केशवसंगृहीतं प्रैषीदुग्रो वृषसेनाय वाहम् ॥ ४० ॥

इति कर्णपर्व्वणि नकुलपराजये चतुरशीतोऽध्यायः ॥ ८४ ॥

---

सञ्जय उवाच। नकुलमथ विदित्वा छिन्नबाणासनासिं विरथमतिशरार्त्तं कर्णपुत्रास्त्रभग्नम्। पवनधूतपताका ह्रादिनो वल्गिताश्वा वरपुरुषनियुक्तास्ते रथाः शीघ्रमीयुः ॥ १ ॥ द्रुपदसुतवरिष्ठाः पञ्च शैनेयषष्ठा द्रुपददुहितृपुत्राः पञ्च चामित्रसाहाः। द्विरदरथनराश्वान् सूदयन्तस्त्वदीयान् भुजगपतिनिकाशैर्मार्गणैरात्तशस्त्राः ॥ २ ॥ अथ तव रथमुख्यास्तान् प्रतीयुस्त्वरन्तो हृदिकसुतकृपौ च द्रौणिदुर्य्योधनौ च। शकुनिसुतवृकौ च क्राथदेवावृधौ च द्विरदजलदघोषैः स्यन्दनैः कार्मुकैश्च ॥ ३ ॥ नरवररथवर्य्यांस्तान् दशैकञ्च वीरान् नृवर शरवराग्रैस्ताड़यन्तोऽभ्यरुन्धन्। नवजलदसवर्णैर्हस्तिभिस्तानुदीयुर्गिरिशिखरनिकाशैर्भीमवेगैः कुलिन्दाः ॥ ४ ॥ सुकल्पिता हैमवता मदोत्कटा रणाभिकामैः

कृतिभिः समास्थिताः । सुवर्णजालावतता बभुर्गजास्तथा यथा खे जलदाः सविद्युतः ॥ ५ ॥ विशर्द्धिपुत्रो दशभिर्महायसैः कृपं ससूताश्वमपीड़दृशम् । ततः शरद्वत्सुतसायकैर्हतः सहैव नागेन पपात भूतले ॥ ६ ॥ विशर्द्धिपुत्रावरजश्च तोमरैर्दिवाकरांशुप्रतिमैरयस्मयैः । रथञ्च विक्षोभ्य ननाद नर्दतस्ततोऽस्य गान्धारपतिः शिरोऽहरत् ॥ ७ ॥ ततः कुलिन्देषु हतेषु तेष्वथ प्रहृष्टरूपास्तव ते महारथाः । भृशं प्रदध्मुर्लवणाम्बुसम्भवान् परांश्च बाणासनपाणयोऽभ्ययुः ॥ ८ ॥ अथाभवद्युद्धमतीव दारुणं पुनः कुरूणां सह पाण्डुसृञ्जयैः । शरासिशक्त्यृष्टिगदापरश्वधैर्नराश्वनागासुहरं भयाकुलम् ॥ ९ ॥ रथाश्वमातङ्गपदातिभिस्ततः परस्परं विप्रहताः पतन् क्षितौ । यथा सविद्युत्स्तनिता वलाहकाः समाहता दिग्भ्य इवोग्रमारुतैः ॥ १० ॥ ततः शतानीकमतान्महागजांस्तथा रथान् पत्तिगणांश्च तान् बहून् । जघान भोजस्तु हयानथापतन् क्षणाद्विशस्ताः कृतवर्मणः शरैः ॥ ११ । अथापरे द्रौणिशराहता द्विपास्त्रयः ससर्वायुधयोधकेतनाः । निपेतुरुर्व्यां व्यसवः प्रपातितास्तथा यथा वज्रहता महाचलाः ॥ १२ ॥ कुलिन्दराजावरजादनन्तरः स्तनान्तरे पत्रिवरैरताड़यत् । तवात्मजं तस्य तवात्मजः शरैः शितैः शरीरं विभिदे द्विपञ्च तम् ॥ १३ ॥ स नागराजः सह राजसूनुना पपात रक्तं बहु सर्वतः क्षरन् । शचीशवज्रप्रहतोऽम्बुदागमे यथा जलं गैरिकपर्वतस्तथा ॥ १४ ॥ कुलिन्दपुत्रप्रहितोऽपरो द्विपः शकं ससूताश्वरथं व्यपोथयत् । ततोऽपतत् क्राथशराभिदारितः सहेश्वरो वज्रहतो यथा गिरिः ॥ १५ ॥ रथी द्विपस्थेन हतोऽपतच्छरैः क्राथाधिपः पर्वतजेन दुर्जयः । सवाजिसूतेष्वसनध्वजस्तथा यथा महावातहतो महाद्रुमः ॥ १६ ॥ वृको द्विपस्थं गिरिराजवासिनं भृशं शरैर्द्वादशभिः पराभिनत् । ततो वृकं साश्वरथं महाद्विपो द्रुतं चतुर्भिश्चरणै-

र्व्यशोषयत् ॥ १७ ॥ स नागराजः सनियन्तृकोऽपतत् पराहतो बभ्रुसुतेषुभिर्भृशम् । स चाङ्गदो मागधसूनुरार्हितः पपात बाणैः सहदेवसूनुना ॥ १८ ॥ विषाणपुच्छावरगात्रघातिना गजेन वाहाः शकुनेः कुलिन्दजाः । सुवर्णवातप्रहता यथा नगास्तथा गता शातवशा विचूर्णिताः ॥ १९ ॥ ततोऽभ्यविध्यद्बहुभिः शितैः शरैः कुलिन्दपुत्रो नकुलात्मजं स्मयन् । ततोऽस्य कायाद्विचकर्त्त नाकुलिः शिरः क्षुरेणाम्बुजसन्निभाननम् ॥ २० ॥ ततः शतानीकमविध्यदायसैस्त्रिभिः शरैः कर्णसुतोऽर्जुनं त्रिभिः । त्रिभिश्च भीमं नकुलञ्च सप्तभिर्जनार्द्दनं द्वादशभिश्च सायकैः ॥ २१ ॥ तदस्य कर्मातिमनुष्यकर्म्मणः समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन् । पराक्रमज्ञास्तु धनञ्जयस्य ये हुतोऽयमग्नाविति ते तु मेनिरे ॥ २२ ॥ ततः किरीटी परवीरघाती हताश्वमालोक्य नरप्रवीरम् । माद्रीसुतं नकुलं लोकमध्ये समीक्ष्य कृष्णं भृशविक्षतञ्च । तमभ्यधावद्वृषसेनमाहवे स सूतजस्य प्रमुखे स्थितं तदा ॥ २३ ॥ तमापतन्तं नरवीरमुग्रं महाहवे बाणसहस्रधारिणम् । अभ्यापतत् कर्णसुतो महारथो यथैव चेन्द्रं नमुचिस्तथैव तम् ॥ २४ ॥ ततो द्रुतं चैकशरेन पार्थं शरेण विद्ध्वा युधि कर्णपुत्रः । ननाद नादं सुमहानुभावो विद्ध्वेव शक्रं नमुचिः पुरा वै ॥ २५ ॥ पुनः स पार्थं वृषसेन उग्रैर्बाणैरविध्यद्भुजमूले तु सव्ये । तथैव कृष्णं नवभिः समार्पयन् पुनश्च पार्थं दशभिः पृषत्कैः ॥ २६ ॥ पूर्वं तथा वृषसेनेन विद्धो महाजवैः श्वेतहयः शरैस्तैः । संरम्भमीषद्गमितो वधाय कर्णात्मजस्याथ मनः प्रदध्रे ॥ २७ ॥ ततः किरीटी रणमूर्द्ध्नि कोपात् कृत्वा त्रिशाखां भ्रुकुटिं ललाटे । ससर्ज तूर्णं विशिखान्महात्मा वधाय राजन् कर्णसुतस्य सङ्ख्ये ॥ २८ ॥ विव्याध चैनं दशभिः पृषत्कैर्मर्म्मस्वशङ्कं प्रसभं किरीटी । चिच्छेद चास्येष्वसनं भुजौ च क्षुरैश्चतुर्भिः शिर एव चोग्रैः ॥ २९ ॥ स

पार्थबाणाभिहतः पपातः रथाद्विवाहुर्विशिरा धरायाम्। समु-
च्छ्रितो वृक्षवरोऽतिकायो वातेरितः शाल इवाद्रिशृङ्गात् ॥ ३० ॥
तं प्रेक्ष्य बाणाभिहतं पतन्तं रथात् सूतजः क्षिप्रकारी। रथं
रथेनाशु जगाम रोषात् किरीटिनः पुत्रवधाभितप्तः ॥ ३१ ॥

इति कर्णपर्वणि वृषसेनवधे पञ्चाशीतोऽध्यायः ॥ ८५ ॥

---

सञ्जय उवाच। तमायान्तमभिप्रेक्ष्य वेलोद्वृत्तमिवार्णवम्।
गर्ज्जन्तं सुमहाकायं दुर्निवारं सुरैरपि। अर्जुनं प्राह दाशार्हः
प्रहस्य पुरुषर्षभः ॥ १ ॥ अयं स रथ आयाति श्वेताश्वः शल्य-
सारथिः। येन ते सह योद्धव्यं स्थिरो भव धनञ्जय ॥ २ ॥
पश्य चैनं समायुक्तं रथं कर्णस्य पाण्डव। श्वेतवाजिसमायुक्तं
युक्तं राधासुतेन च ॥ ३ ॥ नानापताकाकलिलं किङ्किणीजाल-
मालिनम्। उह्यमानमिवाकाशे विमानं पाण्डरैर्हयैः ॥ ४ ॥
ध्वजञ्च पश्य कर्णस्य नागकक्षं महात्मनः। आखण्डलधनुःप्रख्य-
मुल्लिखन्तमिवाम्बरम् ॥ ५ ॥ पश्य कर्णं समायान्तं धार्त्तराष्ट्रप्रिये-
षिणम्। शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् ॥ ६ ॥ एष
मद्रेश्वरो राजा रथाग्रे पर्य्यवस्थितः। नियच्छति हयानस्य
राधेयस्यामितौजसः ॥ ७ ॥ शृणु दुन्दुभिनिर्घोषं शङ्खशब्दञ्च
दारुणम्। सिंहनादांश्च विविधान् शृणु पाण्डव सर्वशः ॥ ८ ॥
अन्तर्द्धाय महाशब्दान् कर्णेनामिततेजसा। दोधूयमानस्य भृशं
धनुषः शृणु निस्वनम् ॥ ९ ॥ एते दीर्य्यन्ति सगणाः पाञ्चालानां
महारथाः। दृष्ट्वा केशरिणं क्रुद्धं मृगा इव महावने ॥ १० ॥
सर्वयत्नेन कौन्तेय हन्तुमर्हसि सूतजम्। न हि कर्णशरानन्यः
सोढ़ुमुत्सहते नरः ॥ ११ ॥ सदेवान् सगन्धर्वांस्त्रींल्लोकान् सचरा-
चरान्। त्वं हि जेतुं रणे शक्तस्तथैव विदितं मम ॥ १२ ॥

भीमसुग्रं महादेवं वरदं सर्वं कपर्दिनम् । न शक्ता द्रष्टुमीशानं किं पुनर्योधितुं प्रभुम् ॥ १३ ॥ त्वया साक्षान्महादेवः सर्वभूतशिवः शिवः । युद्धेनाराधितः स्थाणुर्देवाश्च वरदास्तव ॥ १४ ॥ तस्य पार्थ प्रसादेन देवदेवस्य शूलिनः । जहि कर्णं महाबाहो नमुचिं वृत्रहा यथा । श्रेयस्तेऽस्तु सदा पार्थ युद्धे जयमवाप्नुहि ॥ १५ ॥

अर्जुन उवाच । ध्रुव एव जयः कृष्ण मम नास्त्यत्र संशयः । सर्वलोकगुरुर्यस्त्वं तुष्टोऽसि मधुसूदन ॥ १६ ॥ चोदयाश्वान् हृषीकेश रथं मम महारथ । नाहत्वा समरे कर्णं निवर्त्तिष्यति फाल्गुनः ॥ १७ ॥ अद्य कर्णं हतं पश्य मच्छरैः शकलीकृतम् । मां वा द्रक्ष्यसि गोविन्द कर्णेन निहतं शरैः ॥ १८ ॥ उपस्थितमिदं घोरं युद्धं त्रैलोक्यमोहनम् । यज्जनाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ॥ १९ ॥ एवं ब्रुवंस्तदा पार्थं कृष्णमक्लिष्टकारिणम् । प्रत्युद्ययौ रथेनाशु गजं प्रतिगजो तथा ॥ २० ॥ पुनश्चाह महातेजाः पार्थः कृष्णमरिन्दमम् । चोदयाश्वान् हृषीकेश कालोऽयमतिवर्त्तते । एवमुक्तस्तदा तेन पाण्डवेन महात्मना ॥२१॥ जयेन सम्पूज्य स पाण्डवं तदा प्रचोदयामास हयान्मनोजवान् । स पाण्डुपुत्रस्य रथो महाजवः क्षणेन कर्णस्यरथाग्रतोऽभवत् ॥२२॥

इति कर्णपर्वणि श्रीकृष्णवाक्ये षड़शीतोऽध्यायः ॥ ८६ ॥

---

सञ्जय उवाच । वृषसेनं हतं दृष्ट्वा शोकामर्षसमन्वितः । पुत्रशोकोद्भवं वारि नेत्राभ्यां समवासृजत् ॥ १ ॥ रथेन कर्णस्तेजस्वी जगामाभिमुखो रिपुम् । युद्धायामर्षताम्राक्षः समाहूयः धनञ्जयम् ॥ २ ॥ तौ रथौ सूर्य्यसङ्काशौ वैयाघ्रपरिवारणौ । समेतौ ददृशुस्तत्र द्वाविवार्कौ समागतौ ॥ ३ ॥ श्वेताश्वौ पुरुषा-

दित्यावास्थितावरिमर्द्दनौ । शुशुभाते महेष्वासौ चन्द्रादित्यौ यथा दिवि ॥ ४ ॥ तौ दृष्ट्वा विस्मयं जग्मुः सर्वभूतानि मारिष। त्रैलोक्यविजयी यत्ताविन्द्रवैरोचनाविव ॥ ५ ॥ रथज्यातलनिर्घोषैर्बाणशङ्खरवैरपि। तौ रथावभिधावन्तौ समालोक्य महीक्षिताम् ॥ ६ ॥ ध्वजौ च दृष्ट्वा संयुक्तौ विस्मयः समपद्यत। हस्तिकक्ष्याश्च कर्णस्य वानरश्च किरीटिनः ॥ ७ ॥ तौ रथौ संप्रयुक्तौ तु दृष्ट्वा भारत पार्थिवाः। सिंहनादरवांश्चक्रुः साधुवादांश्च पुष्कलान् ॥ ८ ॥ दृष्ट्वा च द्वैरथं ताभ्यां तत्र योधाः सहस्रशः। चक्रुर्बाहुस्वनांश्चैव तथा चेलावधूननम् ॥ ९ ॥ आजघ्नुः कुरवस्तत्र वादित्राणि समन्ततः। कर्णं प्रहर्षयिष्यन्तः शङ्खान् दध्मुश्च पुष्कलान् ॥ १० ॥ तथैव पाण्डवाः सर्वे हर्षयन्तो धनञ्जयम्। तूर्य्यशङ्खनिनादेन दिशः सर्वा व्यनादयन् ॥ ११ ॥ क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलं सर्वतोऽभवत्। बाहुशब्दैश्च शूराणां कर्णार्जुनसमागमे ॥ १२ ॥ तौ दृष्ट्वा पुरुषव्याघ्रौ रथस्थौ रथिनां वरौ। प्रगृहीतमहाचापौ शरशक्तिध्वजावुभौ ॥ १३ ॥ वर्म्मिणौ बद्धनिस्त्रिंशौ श्वेताश्वौ शङ्खशोभितौ। कृष्णशल्यरथोपेतौ तुल्यरूपौ महारथौ ॥ १४ ॥ सिंहस्कन्धौ दीर्घभुजौ रक्ताक्षौ हेममालिनौ। चापविद्युद्ध्वजोपेतौ शस्त्रसम्पत्तिशोभितौ ॥ १५ ॥ चामरव्यजनोपेतौ श्वेतच्छत्रोपशोभितौ। तूणीरवरसम्पन्नौ द्वावप्येतौ सुदर्शनौ ॥ १६ ॥ रक्तचन्दनदिग्धाङ्गौ समदौ गोवृषाविव। सिंहस्कन्धप्रतीकाशौ व्यूढोरस्कौ महाबलौ ॥ १७ ॥ अन्योऽन्यस्पर्द्धिनौ राजन्नन्योऽन्यस्य वधैषिणौ। अन्योऽन्यमभिधावन्तौ गोष्ठेष्विव महर्षभौ ॥ १८ ॥ प्रभिन्नाविव मातङ्गौ सुसंरब्धाविवाचलौ। आशीविषशिशुप्रख्यौ यमकालान्तकोपमौ ॥ १९ ॥ इन्द्रवृत्राविव क्रुद्धौ सूर्य्यचन्द्रसमप्रभौ। महाग्रहाविव क्रुद्धौ युगान्ताय समुत्थितौ ॥ २० ॥ देवगर्भौ देवसमौ देवतुल्यौ च रूपतः। यदृच्छया समायातौ सूर्य्या-

चन्द्रमसाविव ॥ २१ ॥ बलिनौ समरे दृप्तौ नानाशस्त्रधरौ युधि ।
तौ दृष्ट्वा पुरुषव्याघ्रौ शार्दूलाविव वेगितौ । बभूव परमो हर्ष-
स्तावकानां विशाम्पते ॥ २२ ॥ संशयः सर्वभूतानां विजये सम-
पद्यत । समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनञ्जयौ ॥ २३ ॥ उभौ
वरायुधधरावुभौ रणकृतश्रमौ । उभौ च बाहुशब्देन नादयन्तौ
नभस्तलम् ॥ २४ ॥ उभौ विश्रुतकर्माणौ पौरुषेण बलेन च ।
उभौ च सदृशौ युद्धे शम्बरामरराजयोः ॥ २५ ॥ कार्त्तवीर्य्यसमौ
युद्धे तथा दाशरथेः समौ । विष्णुवीर्य्यसमौ चोभौ तथा भवसमौ
युधि ॥ २६ ॥ उभौ श्वेतहयौ राजन् रथप्रवरवाहिनौ । सारथि-
प्रवरौ चापि तयोरास्तां महारणे ॥ २७ ॥ तौ तु दृष्ट्वा महा-
राज राजमानौ महारथौ सिद्धचारणसङ्घानां विस्मयः सम-
पद्यत ॥ २८ ॥ धार्त्तराष्ट्रास्ततः कर्णं सबला भरतर्षभ । परि-
वव्रुर्महात्मानं क्षिप्रमाहवशोभिनम ॥ २९ ॥ तथैव पाण्डवा हृष्टा
धृष्टद्युम्नपुरोगमाः । परिवव्रुर्महात्मानं पार्थमप्रतिमं युधि ॥ ३० ॥
तावकानां रणे कर्णो ग्लहो ह्यासीद्विशाम्पते । तथैव पाण्डवे-
यानां ग्लहः पार्थोऽभवत्तदा ॥ ३१ ॥ त एव सभ्यास्तत्रासन्
प्रेक्षकाश्चाभवन् स्म ते । तत्रैषां ग्लहमानानां ध्रुवौ जयपराजयौ
॥ ३२ ॥ ताभ्यां द्यूतं समासक्तं विजयायेतराय वा । अस्माकं
पाण्डवानाञ्च स्थितानां रणमूर्द्धनि ॥ ३३ ॥ तौ तु स्थितौ महा-
राज समरे युद्धशालिनौ । अन्योन्यं प्रतिसंरब्धावन्योऽन्यस्य
वधैषिणौ ॥ ३४ ॥ तावुभौ प्रजिहीर्षन्ताविन्द्रवृत्राविव प्रभो ।
भीमरूपधरावास्तां महाधूमाविव ग्रहौ ॥ ३५ ॥ ततोऽन्तरीक्षे
साक्षेपा विवाद भरतर्षभ । मिथो भेदाश्च भूतानामासन् कर्णा-
र्जुनान्तरे । व्यश्रूयन्त मिथो भिन्नाः सर्वलोकास्तु मारिष ॥ ३६ ॥
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः । प्रतिपक्षग्रहञ्चक्रुः कर्णा-
र्जुनसमागमे ॥ ३७ ॥ द्यौरासीत् कर्णतो व्यग्रा सनक्षत्रा विशा-

स्मते। भूमिर्विशाला पार्थस्य माता पुत्रस्य वै यथा ॥ ३८ ॥ सरितः सागराश्चैव गिरयश्च नरोत्तम। वृक्षाश्चौषधयश्चैव ह्याश्रयन्त किरीटिनम् ॥ ३९ ॥ असुरा यातुधानाश्च गुह्यकाश्च परन्तप। कर्णतः समपद्यन्त खेचराश्च वयांसि च ॥ ४० ॥ रत्नानि निधयः सर्वे वेदाश्चाख्यानपञ्चमाः। सोपवेदोपनिषदः सरहस्याः ससंग्रहाः ॥ ४१ ॥ वासुकिश्चित्रसेनश्च तक्षकोऽथोपतक्षकः। पर्वताश्च तथा सर्वे काद्रवेयाश्च सान्वयाः। विषवन्तो महारोषा नागाश्चार्जुनतोऽभवन् ॥ ४२ ॥ ऐरावताः सौरभेया वैशालेयाश्च भोगिनः। एतेऽभवन्नर्जुनतः क्षुद्रसर्पास्तु कर्णतः ॥ ४३ ॥ ईहामृगा व्याड्मृगा माङ्गल्याश्च मृगद्विजाः। पार्थस्य विजये राजन् सर्वे एवाभिसंश्रिताः ॥ ४४ ॥ वसवो मरुतः साध्या रुद्रा विश्वेऽश्विनौ तथा। अग्निरिन्द्रश्च सोमश्च पवनोऽथ दिशो दश। धनञ्जयस्य ते पक्षे आदित्याः कर्णतोऽभवन् ॥ ४५ ॥ विशः शूद्राश्च सूताश्च ये च सङ्करजातयः। सर्वशस्ते महाराज राधेयमभजंस्तथा ॥ ४६ ॥ देवास्तु पितृभिः सार्द्धं सगणाः सपदानुगाः। यमो वैश्रवणश्चैव वरुणश्च यतोऽर्जुनः। ब्रह्म क्षत्रञ्च यज्ञाश्च दक्षिणाश्चार्जुनश्रिताः ॥ ४७ ॥ प्रेताश्चैव पिशाचाश्च क्रव्यादाश्च मृगाण्डजाः। राक्षसाः सह यादोभिः श्वशृगालाश्च कर्णतः ॥४८॥ देवब्रह्मनृपर्षीणां गणाः पाण्डवतोऽभवन्। तुम्बुरुप्रमुखा राजन् गन्धर्वाश्च यतोऽर्जुनः ॥ ४९ ॥ प्राधेयाः सह मौनेयैर्गन्धर्वाप्सरसां गणैः। ईहामृगा व्याड्मृगैर्द्विपाश्च रथपत्तिभिः ॥ ५० ॥ उह्यमानास्तथा मेघैर्वायुना च मनीषिणः। दिदृक्षवः समाजग्मुः कर्णार्जुनसमागमम् ॥ ५१ ॥ देवदानवगन्धर्वा नागयक्षाः पतत्रिणः। महर्षयो वेदविदः पितरश्च स्वधाभुजः ॥ ५२ ॥ तपोनिष्ठास्तथौषध्यो नानारूपाम्बरस्रजः। अन्तरीक्षे महाराज विनदन्तोऽवतस्थिरे ॥ ५३ ॥ ब्रह्मा ब्रह्मर्षिभिः सार्द्धं प्रजापतिभि-

देव च। भवेनावस्थितो यानं दिव्यं तं देशमागमत् ॥ ५४ ॥
समेतौ तौ महात्मानौ दृष्ट्वा कर्णधनञ्जयौ। अर्जुनो जयतां कर्ण-
मिति शक्रोऽब्रवीत् स्वयम्। जयतामर्जुनं कर्ण इति सूर्य्योऽभ्य-
भाषत ॥ ५५ ॥ हत्वार्जुनं मम सुतः कर्णो जयतु संयुगे। हत्वा
कर्णं जयत्वद्य मम पुत्रो धनञ्जयः ॥ ५६ ॥ इति सूर्य्यस्य चैवासी-
द्विवादो वासवस्य च। पक्षतः स्थितयोस्तत्र तयोः पुरुषसिंहयोः
॥ ५७ ॥ द्वैपक्ष्यमासीद्देवानामसुराणान्तथैव च। समेतौ तौ
महात्मानौ दृष्ट्वा कर्णधनञ्जयौ ॥ ५८ ॥ अकम्पन्त त्रयो लोकाः
सह देवर्षिचारणाः। सर्व्वे देवगणाश्चैव सर्व्वभूतानि यानि च ॥ ५९ ॥
यतः पार्थस्ततो देवा यतः कर्णस्ततोऽसुराः। रथयूथपयो पक्षौ
कुरुपाण्डववीरयो ॥ ६० ॥ दृष्ट्वा प्रजापतिं देवाः स्वयम्भुवमचो-
दयन्। समोऽस्तु देव विजय एतयोर्नरसिंहयोः ॥ ६१ ॥ कर्णा-
र्जुनविवादेन मा नश्यत्वाखिलं जगत्। स्वयम्भो ब्रूहि तद्वाक्यं
समोऽस्तु विजयोऽनयोः ॥ ६२ ॥ तदुपश्रुत्य मघवा प्रणिपत्य
पितामहम्। व्यज्ञापयत देवेशमिदं मतिमतां वर ॥ ६३ ॥ पूर्व्वं
भगवता प्रोक्तं कृष्णयोर्विजयो ध्रुवः। तत्तथास्तु नमस्तेऽस्तु प्रसीद
भगवन्मम ॥ ६४ ॥ ब्रह्मेशानावथो वाक्यमूचतुस्त्रिदशेश्वरम्।
विजयो ध्रुव एवास्तु विजयस्य महात्मनः ॥ ६५ ॥ खाण्डवे येन
हुतभुक् तोषितः सव्यसाचिना। स्वर्गञ्च समनुप्राप्य साहाय्यं शक्र
ते कृतम् ॥ ६६ ॥ कर्णश्च दानवः पक्ष अतः कार्य्यः पराजयः।
एवं कृते भवेत् कार्य्यं देवानामेव निश्चितम् ॥ ६७ ॥ आत्मकार्य्यञ्च
सर्व्वेषां गरीयस्त्रिदशेश्वर। महात्मा फाल्गुनश्चापि सत्यधर्मरतः
सदा। विजयस्तस्य नियतं जायते नात्र संशयः ॥ ६८ ॥ तोषितो
भगवान् येन महात्मा वृषभध्वजः। कथं वा तस्य न जयो जायते
शतलोचन ॥ ३९ ॥ यस्य चक्रे स्वयं विष्णुः सारथ्यं जगतः
प्रभुः। मनस्वी बलवान् शूरः कृतास्त्रश्च तपोधनः ॥ ७० ॥ बिभर्त्ति

च महातेजा धनुर्वेदमशेषतः। पार्थः सर्वगुणोपेतो देवकार्य्यमिदं यतः ॥ ७१ ॥ अतिक्रमेच्च माहात्म्याद्दिष्टमप्यस्य पर्य्ययम्। अतिक्रान्ते लोकानामभावो नियतं भवेत् ॥ ७२ ॥ न विद्यते व्यवस्थानं क्रुद्धयोः कृष्णयोः क्वचित्। स्रष्टारौ ह्यसतश्चैतौ सतश्च पुरुषर्षभौ ॥ ७३ ॥ नरनारायणावेतौ पुराणावृषिसत्तमौ। अनियम्यौ नियन्तारावभीतौ स्म परन्तपौ ॥ ७४ ॥ नैतयोस्तु समः कश्चिद्दिवि वा मानुषेषु वा। अनुगम्य त्रयो लोकाः सह देवर्षिचारणैः ॥ ७५ ॥ सर्वे देवगणाश्चापि सर्वभूतानि यानि च। अनयोस्तु प्रभावेण वर्त्तते निखिलं जगत् ॥ ७६ ॥ कर्णो लोकानयं मुख्यान् प्राप्नोतु पुरुषर्षभः। वसूनाञ्च सलोकत्वं मरुतां वा समाप्नुयात् ॥ ७७ ॥ सहितो द्रोणभीष्माभ्यां नाकलोके महीयताम्। वीरो वैकर्त्तनः शूरो विजयस्त्वस्तु कृष्णयोः ॥ ७८ ॥ इत्युक्तो देवदेवाभ्यां सहस्राक्षोऽब्रवीद्वचः। आमन्त्र्य सर्वभूतानि ब्रह्मणानानुशासनम् ॥ ७९ ॥ श्रुतं भवद्भिर्यत् प्रोक्तं भगवद्भ्यां जगद्धितम्। तत्तथा नान्यथा तद्धि तिष्ठध्वं गतमन्यवः ॥ ८० ॥ इति श्रुत्वेन्द्रवचनं सर्वभूतानि मारिष। विस्मितान्यभवन्राजन पूजयाञ्चक्रिरे च तम् ॥ ८१ ॥ व्यसृजंश्च सुगन्धीनि नानारूपाणि खात्तदा। पुष्पवर्षाणि विबुधा देवतूर्य्याण्यवादयन् ॥ ८२ ॥ दिदृक्षवश्चाप्रतिमं द्वैरथं नरसिंहयोः। देवदानवगन्धर्वाः सर्व एवावतस्थिरे ॥ ८३ ॥ रथौ तयोः श्वेतहयौ युक्तकेतू महार्जुनौ। यौ तौ कर्णार्जुनौ राजन् प्रहृष्टावभ्यतिष्ठताम् ॥ ८४ ॥ समागता लोकवीराः शङ्खान् दध्मुः पृथक् पृथक्। वासुदेवार्जुनौ वीरौ शल्यकर्णौ च भारत ॥ ८५ ॥ तद्भीरुत्रासनकरं युद्धं समभवत्तदा। अन्योऽन्यस्पर्द्धिनोरुग्रं शक्रशम्बरयोरिव ॥ ८६ ॥ तयोर्ध्वजौ वीतमलौ शुशुभाते रथे स्थितौ। राहुकेतू यथाकाशे उदितौ जगतः क्षये ॥ ८७ ॥ कर्णस्याशीविषनिभा रत्नसारमयी दृढा। पुर-

न्दरथतुःप्रख्या हस्तिकच्चा व्यराजत ॥ ८८ ॥ कपिश्रेष्ठस्तु पार्थस्य व्यादितास्यो भयङ्करः। भीषयन्नेव दंष्ट्राभिर्दुर्निरीच्यो रविर्यथा ॥ ८९ ॥ युद्धाभिलाषुको भूत्वा ध्वजो गाण्डीवधन्वनः। कर्णध्वजमुपातिष्ठत् स्वस्थानाद्वेगवान् कपिः ॥ ९० ॥ उत्पत्य तु महावेगः कच्चामभ्यहनत् कपिः। नखैश्च दशनैश्चैव गरुड़ः पन्नगं यथा ॥ ९१ ॥ सकिङ्किणीकाभरणा कालपाशोपमायसी। अभ्यद्रवत् सुसंक्रुद्धा नागकच्चाथ तं कपिम् ॥ ९२ ॥ तयोर्वीरतमे युद्धे द्वैरथे द्यूत आहिते। प्रकुर्वाते ध्वजौ युद्धं प्रत्यहेषन् हयान् हयाः ॥ ९३ ॥ अविध्यत् पुण्डरीकाचः शल्यं नयनसायकैः। स चापि पुण्डरीकाचं तथैवाभिसमैचत ॥ ९४ ॥ तत्राजयद्वासुदेवः शल्यं नयनसायकैः। कर्णञ्चाप्यजयद्दृष्ट्या कुन्तीपुत्रो धनञ्जयः ॥ ९५ ॥ अथाब्रवीत् सूतपुत्रः शल्यमाभाष्य सस्मितम्। यदि पार्थो रणे हन्यादद्य मामिह कर्हिचित् ॥ ९६ ॥ किमुत्तरं तदा ते स्यात् सखे सत्यं ब्रवीहि मे। हते त्वयि त्वहं हन्यामुभौ कृष्णधनञ्जयौ ॥ ९७ ॥

शल्य उवाच। यदि कर्ण रणे हन्यादद्य त्वां श्वेतवाहनः। उभावेकरथेनाहं हन्यां माधवफाल्गुनौ ॥ ९८ ॥

सञ्जय उवा। एवमेव तु गोविन्दमर्जुनः प्रत्यभाषत। तं प्रहस्याब्रवीत् कृष्णः पार्थं परमिदं वचः ॥ ९९ ॥ पतेद्दिवाकरः स्थानात् शीर्य्यतानेकधा चितिः। शैत्यमग्निरियान्न त्वां कर्णो हन्याद्धनञ्जय ॥ १०० ॥ यदि त्वेवं कथञ्चित् स्यात् लोकपर्य्यासनं तथा। हन्यां कर्णं तथा शल्यं बाहुभ्यामेव संयुगे ॥ १०१ ॥ इति कृष्णवचः श्रुत्वा प्रहसन् कपिकेतनः। अर्जुनः प्रत्युवाचेदं कृष्णमक्लिष्टकारिणम् ॥ १०२ ॥ ममैव तावत् पर्य्याप्तौ शल्यकर्णौ जनार्द्दन। सपताकध्वजं कर्णं सशल्यरथवाजिनम् ॥ १०३ ॥ सच्छत्रकवचञ्चैव सशक्तिशरकार्मुकम्। द्रष्टास्यद्य रणे कृष्ण शरैश्छिन्न-

मनेकधा ॥ १०४ ॥ अद्यैनं सरथं साश्वं सशक्तिकवचायुधम्।
सञ्चूर्णितमिवारण्ये पादपं दन्तिना यथा ॥ १०५ ॥ अद्य राधेय-
भार्य्याणां वैधव्यं समुपस्थितम्। ध्रुवं स्वप्ने ह्यनिष्टानि ताभि-
र्दृष्टानि माधव ॥ १०६ ॥ ध्रुवमद्यैव द्रष्टासि विधवाः कर्ण-
योषितः। न ह्याम्यते हि मे मन्युर्यदनेन कृतं पुरा ॥ १०७ ॥
कृष्णां सभागतां दृष्ट्वा मूढेनादीर्घदर्शिना। अस्मांस्तदोपहसता
चिपता च पुनः पुनः ॥ १०८ ॥ अद्य द्रष्टासि गोविन्द कर्णमुन्म-
थितं मया। वारणेनेव मत्तेन पुष्पितं जगतीरुहम् ॥ १०९ ॥
अद्य ता मधुरा वाचः श्रोतासि मधुसूदन। दिष्ट्या जयसि
वार्ष्णेय इति कर्णे निपातिते ॥ ११० ॥ अद्याभिमन्युजननीमनृणः
सान्त्वयिष्यसि। कुन्तीं पितृष्वसारञ्च संप्रहृष्टो जनार्द्दन ॥ १११ ॥
अद्य वास्पमुखीं कृष्णां सान्त्वयिष्यसि माधव। वाग्भिश्चामृत-
कल्पाभिर्धर्मराजं युधिष्ठिरम् ॥ ११२ ॥

इति कर्णपर्व्वणि कर्णार्ज्जुनद्वैरथे सप्ताशीतोऽध्यायः ॥ ८७ ॥

---

सञ्जय उवाच। तद्देवनागासुरसिद्धयक्षैर्गन्धर्व्वरक्षोऽप्सरसाञ्च
सङ्घैः। ब्रह्मर्षिराजर्षिसुपर्णजुष्टं बभौ वियद्विस्मयनीयरूपम्
॥ १ ॥ नानद्यमानं निनदैर्मनोज्ञैर्वादित्रगीतस्तुतिहासनृत्यैः।
सर्व्वेऽन्तरीक्षं ददृशुर्मनुष्याः खस्थांश्च तान्विस्मयनीयरूपान् ॥ २ ॥
ततः प्रहृष्टाः कुरुपाण्डुयोधा वादित्रशङ्खस्वनसिंहनादैः। निना-
दयन्तो वसुधां दिशश्च स्वनेन सर्व्वे द्विषतो निजघ्नुः ॥ ३ ॥ नराश्व-
मातङ्गरथायुधाकुलं गदासिशक्त्यृष्टिनिपातदुःसहम्। अभीरुजुष्टं
हततेहसंकुलं रणाजिरं लोहितमाबभौ तदा। बभूव युद्धं कुरु-
पाण्डवानां यथा सुराणामसुरैः सहाभवत् ॥ ४ ॥ तथा प्रवृत्ते-
ऽस्त्रभृतां पराभवे धनञ्जयस्याधिरथेश्च सायकैः। दिशश्च सैन्यञ्च

शितैरजिह्मगैः परस्परं प्राव्रणुतां सुदंशितौ ॥ ५ ॥ ततस्त्वदीयाश्च
परे च सायकैः कृतेऽन्धकारे विविदुर्न किञ्चन । भयात्तु तावेक-
रथौ समाश्रयंस्तमोनुदौ खे प्रसृता इवांशवः ॥ ६ ॥ ततोऽस्त्र-
मस्त्रेण परस्परस्य तौ विधूय वाताविव पूर्व्वपश्चिमौ । घनान्धकारे
वितते तमोनुदौ यथोदितौ तद्वदतीव रेजतुः ॥ ७ ॥ न चाभि-
सर्त्तव्यमिति प्रचोदिताः परे त्वदीयाश्च तदावतस्थिरे । महारथौ
तौ परिवार्य्य सर्व्वतः सुरासुराः शम्बरवासवाविव ॥ ८ ॥ मृदङ्ग-
भेरीपणवानकस्वनैर्निनादितौ भारत शङ्खनिस्वनैः । तौ सिंह-
नादं नदतुर्नरोत्तमौ शशाङ्कसूर्य्याविव मेघसंप्लवे ॥ ९ ॥ महा-
धनुर्म्मण्डलमध्यगावुभौ सुवर्च्चसौ बाणसहस्ररश्मिनौ । दिधक्ष-
माणौ सचराचरं जगत् युगान्तसूर्य्याविव दुःसहौ रणे ॥ १० ॥
उभावजेयावहितान्तकावुभावुभौ जिघांसू कृतिनौ परस्परम् ।
महाहवे वीरतरौ समीयतुर्म्महेन्द्रजम्भाविव कर्णपाण्डवौ ॥ ११ ॥
ततो महास्त्राणि महाधनुर्द्धरौ विमुञ्चमानाविषुभिर्भयानकैः ।
नराश्वनागानमितान्निजघ्नतुः परस्परञ्चापि महारथौ नृप ॥ १२ ॥
ततो विसस्रुः पुनरर्द्दिता नरा नरोत्तमाभ्यां कुरुपाण्डवाश्रयाः ।
सनागपत्त्यश्वरथा दिशो दशस्तथा यथा सिंहहता वनौकसः॥१२॥
ततस्तु दुर्य्योधनभोजसौबलाः कृपश्च शारद्वतसूनुना सह । महा-
रथाः पञ्च धनञ्जयाच्युतौ शरैः शरीरान्तकरैरताडयन् ॥ १४ ॥
धनूंषि तेषामिषुधीन् हयान् गजान्रथान् ससूतांश्च धनञ्जयः शरैः ।
समं प्रचिच्छेदपराभिनच्च ताञ्छरोत्तमैर्द्वादशभिश्च सूतजम् ॥ १५ ॥
अथाभ्यधावंस्त्वरितं शतं रथाः शतं गजाश्चार्ज्जुनमाततायिनः ।
शकास्तुखारा यवनाश्च सादिनः सहैव काम्बोजवरैर्जिघांसवः ॥१६॥
वरायुधान् पाणिगतैः शरैः सह क्षुरैर्न्निकृन्तंस्त्वरितः शिरांसि च ।
हयांश्च नागांश्च रथांश्च युध्यतो धनञ्जयः शत्रुगतान् क्षितौ क्षिणोत्
॥ १७ ॥ ततोऽन्तरीक्षे सुरतूर्य्यनिस्वनाः ससाधुवादा हृषितैः

समीरिताः। न पेतुरप्युत्तमपुष्पवृष्टयः सुगन्धिगन्धाः पवनेरिताः शिवा ॥ १८ ॥ तदद्भुतं देवमनुष्यसाक्षिकं समीक्ष्य भूतानि विसिस्मियुर्नृप। तवात्मजः सूतसुतश्च न व्यथां न विस्मयं जग्मतुरेकनिश्चयौ ॥ १९ ॥ अथाब्रवीद्द्रोणसुतस्तवात्मजं करं करेण प्रतिपीड्य सान्त्वयन् ॥ २० ॥ प्रसीद दुर्य्योधन शाम्य पाण्डवैरलं विरोधेन धिगस्तु विग्रहम्। हतो गुरुर्ब्रह्मसमो महास्त्रवित् अथैव भीष्मप्रमुखा नरर्षभाः ॥ २१ ॥ अहं त्ववध्यो मम चापि मातुलः प्रशाधि राज्यं सह पाण्डवैश्चिरम्। धनञ्जयः शाम्यति वारितो मया जनार्द्दनो नैव विरोधमिच्छति ॥ २२ ॥ युधिष्ठिरो भूतहिते सदा रतो वृकोदरस्तद्वशगस्तथा यमौ। त्वया तु पार्थैव कृते च संविदि प्रजाः शिवं प्राप्नुयुरिच्छया तव ॥ २३ ॥ व्रजन्तु शेषाः स्वपुराणि पार्थिवा निवृत्तवैरास्तु भवन्तु सैनिकाः। न चेद्वचः श्रोष्यसि मे नराधिप ध्रुवं प्रतप्तासि हतोऽरिभिर्युधि ॥ २४ ॥ इदञ्च दृष्टं जगता सह त्वया कृतं यदेकेन किरीटमालिना। यथा न कुर्य्याद्बलभिन्न चान्तको न च प्रचेता भगवान्न यक्षराट् ॥ २५ ॥ अतोऽपि भूयांश्च गुणैर्धनञ्जयो न चातिवर्त्तिष्यति मे वचोऽखिलम्। तवानुयात्रञ्च सदा करिष्यति प्रसीद राजन् जगतः शिवाय वै ॥ २६ ॥ ममापि मानः परमः सदा त्वयि ब्रवीम्यतस्त्वां परमाच्च सौहृदात्। निवारयिष्याम्यथ कर्णमप्यहं यदा भवान् सप्रणयो भविष्यति ॥ २७ ॥ वदन्ति मित्रं सहजं विचक्षणास्तथैव साम्ना च धनेन चार्ज्जितम्। प्रतापतश्चोपनतञ्चतुर्विधं तदस्ति सर्वं तव पाण्डवेषु च ॥ २८ ॥ निसर्गतस्ते तव वीर बान्धवाः पुनश्च साम्ना समवाप्नुहि स्थिरम्। त्वयि प्रसन्ने यदि मित्रतामियुर्ध्रुवं नरेन्द्रेन्द्र तथा त्वमाचर ॥ २९ ॥ स एवमुक्तः सुहृदा वचो हितं विचिन्त्य निश्वस्य च दुर्मनाब्रवीत्। यथा भवानाह सखे तथैव तन्ममापि विज्ञापयतो वचः शृणु ॥ ३० ॥ निहत्य दुःशासनमुक्तवान् वचः

प्रसह्य शार्दूलइवैष दुर्म्मतिः। वृकोदरस्तद्दृदयौ मम स्थितं न तत् परोक्षं भवतः कुतः शमः ॥ ३१ ॥ न चापि कर्णं प्रसहेद्रणेऽर्ज्जुनो महागिरिं मेरुमिवोग्रमारुतः। न चाश्वसिष्यन्ति पृथात्मजा मयि प्रसह्य वैरं वहुशो विचिन्त्य ॥ ३२ ॥ न चापि कर्णं गुरुपुत्र संयुगादुपारमेत्यर्हसि वक्तुमच्युत। श्रमेण युक्तो महताद्य फाल्गुनस्तमेष कर्णः प्रसभं हनिष्यति ॥ ३३ ॥ तमेवमुक्त्वाप्यनुनीय चासकृत् तवात्मजः स्वाननुशास्ति सैनिकान्। विनिघ्नताभिद्रवताहितानिमान् सवाणहस्ताः किमु जोषमास्त ॥ ३४ ॥

इति कर्णपर्व्वणि अश्वत्थामवाक्ये अष्टाशीतोऽध्यायः ॥ ८८ ॥

---

सञ्जय उवाच। ततो शङ्खभेरीनिनदे समृद्धे समीयतुः श्वेतहयौ नराग्र्यौ। वैकर्त्तनः सूतपुत्रोऽर्ज्जुनश्च दुर्मन्त्रिते तव पुत्रस्य राजन् ॥ १ ॥ यथा गजौ हैमवतौ प्रभिन्नौ प्रवृद्धदन्ताविव वासितार्थे। तथा समाजग्मतुरुग्रवेगौ धनञ्जयश्चाधिरथिश्च वीरौ ॥ २ ॥ वलाहकेनेव यथा वलाहको यदृच्छया वा गिरिणा गिरिर्यथा। तथा धनुर्ज्यातलनेमिस्वनैः समीयतुस्ताविषुवर्षवर्षिणौ ॥ ३ ॥ प्रवृद्धशृङ्गद्रुमवीरुधौषधी प्रवृद्धनानाविधपर्वतौकसौ। यथाचलावाचलितौ महावलौ तथा महास्त्रैरितरेतरं घ्नतुः ॥ ४ ॥ स सन्निपातस्तु तयोर्महानभूत् सुरेशवैरोचनयोर्यथा पुरा। शरैर्विभिन्नाङ्गनियन्तृवाहयोः सुदुःसहोऽन्यैः कटुशोणितोदकः ॥ ५ ॥ प्रभूतपद्मोत्पलमत्स्यकच्छपौ महाह्रदौ पक्षिगणानुनादितौ। सुसन्निकृष्टावनिलोद्धतौ यथा तथा रथौ तौ ध्वजिनौ समीयतुः ॥ ६ ॥ उभौ महेन्द्रस्य समानविक्रमावुभौ महेन्द्रप्रतिमौ महारथौ। महेन्द्रवज्रप्रतिमैश्च सायकैर्महेन्द्रवृत्राविव संप्रजह्नतुः ॥ ७ ॥ सनागपत्त्यश्वरथे उभे वले विचित्रवर्माभरणाम्बरायुधे। चकम्पतु-

श्चोन्नमतुश्च विस्मयाद्वियद्गताश्चार्जुनकर्णसंयुगे ॥ ८ ॥ भुजाः स-
वस्त्राङ्गुलयः समुच्छ्रिताः ससिंहनादैर्हृषितैर्दिदृक्षुभिः । यदर्जुनं
मत्तमिव द्विपो द्विपं समभ्ययादाधिरथिर्जिघांसया ॥ ९ ॥ उद-
क्रोशन् सोमकास्तत्र पार्थं त्वरस्व याह्यर्जुन भिन्धि कर्णम् ।
छिन्ध्यस्य मूर्द्धानमलञ्चिरेण श्रद्धाञ्च राज्याद्धृतराष्ट्रसूनोः ॥ १० ॥
तथास्माकं बहवस्तत्र योधाः कर्णं तदा याहि याहीत्यवोचन् ।
जह्यर्जुनं कर्ण शरैः सुतीक्ष्णैः पुनर्वनं यान्तु चिराय पार्थाः ॥ ११ ॥
ततः कर्णः प्रथमं तत्र पार्थं महेषुभिर्दशभिः प्रत्यविध्यत् । तमर्जुनः
प्रत्यविध्यच्छिताग्रैः कक्षान्तरे दशभिः संप्रहस्य ॥ १२ ॥ परस्परं
तौ विशिखैः सुपुङ्खैस्ततक्षतुः सूतपुत्रोऽर्जुनश्च । परस्परस्यान्त-
रेप्सू विमर्द्दे सुभीममभ्यापततुश्च हृष्टौ ॥ १३ ॥ ततोऽर्जुनः
प्रामृजदुग्रधन्वा भुजावुभौ गाण्डिवञ्चाप्युमृज्य । नाराचनालीक-
वराहकर्णान् क्षुरांस्तथा साञ्जलिकार्द्धचन्द्रान् ॥ १४ ॥ ते सर्वतः
समकीर्य्यन्त राजन् पार्थेषवः कर्णरथं विशन्तः । अवाङ्मुखाः
पक्षिगणा दिनान्ते विशन्ति केतार्थमिवाशु वृक्षम् ॥ १५ ॥ या-
नर्जुनः सभ्रूकुटीकटाक्षः कर्णाय राजन्नसृजज्जितारिः । तान्
सायकैर्ग्रसते सूतपुत्रः क्षिप्तान् क्षिप्तान् पाण्डवस्येषुसङ्घान् ॥ १६ ॥
ततोऽस्त्रमाग्नेयममित्रसाधनं मुमोच कर्णाय महेन्द्रसूनुः । भूम्य-
न्तरीक्षे च दिशोऽर्कमार्गं प्रावृत्य देहोऽस्य बभूव दीप्तः ॥ १७ ॥
योधाश्च सर्व्वे ज्वलिताम्बरा भृशं प्रदुद्रुवुस्तत्र विदग्धवस्त्राः । शब्दश्च
घोरोऽतिबभूव तत्र यथा वने वेणुवनस्य दह्यतः ॥ १८ ॥ तद्वीक्ष्य
कर्णो ज्वलनास्त्रमुद्यतं स वारुणं तत्प्रशमार्थमाहवे । समुत्सृजन्
सूतसुतः प्रतापवान् स तेन वह्निं शमयाम्बभूव ॥ १९ ॥ बला-
हकौघश्च दिशस्तरस्वी चकार सर्व्वास्तिमिरेण संवृताः । ततो
धरित्रीधरतुल्यरोधसः समन्ततो वै परिवार्य्य वारिणा ॥ २० ॥
तैश्चापि वेगात् स तथाविधोऽपि नीतः शमं वह्निरतिप्रचण्डः ।

बलाहकैश्चैव दिगन्तराणि व्याप्तानि सर्व्वाणि तथा नभश्च ॥ २१ ॥
तथा च सर्व्वास्तिमिरेण वै दिशो मेघैर्वृता न प्रदृश्येत किञ्चित्।
अथापोवाहास्त्रसङ्घांस्ततस्तान् वायव्यास्त्रेण ततः स कर्णात् ॥२२ ॥
ततोऽप्यस्त्रं दयितं देवराजः प्रादुश्चक्रे वज्रप्रतिमप्रभावम्। गाण्डीवं
ज्यां विशिखांश्चानुमन्त्र्य धनञ्जयः शत्रुभिरप्रधृष्यः ॥ २३ ॥ ततः
चुरप्राञ्जलिकार्द्धचन्द्रा नालीकनाराचवराहकर्णाः। गाण्डीवतः
प्रादुरासन् सुतीक्ष्णाः सहस्रशो वज्रसमानवेगाः ॥ २४ ॥ ते
कर्णमासाद्य महाप्रभावाः सुतेजना गार्द्धपत्राः सुवेगाः। गात्रेषु
सर्व्वेषु हयेषु चापि शरासने युगचक्रे ध्वजे च ॥ २५ ॥ निर्भिद्य
तूर्णं विविशुः सुतीक्ष्णास्तार्च्यत्रस्ता भूमिमिवोरगास्ते शराचिताङ्गो
रुधिरार्द्रगात्रः कर्णस्तदा रोषविवृत्तनेत्रः ॥ २६ ॥ दृढ़ज्यमानाम्य
समुद्रघोषं प्रादुश्चक्रे भार्गवास्त्रं महात्मा। महेन्द्रशस्त्राभिमुखान्
विमुक्तान् छित्त्वा कर्णः पाण्डवस्येषुसङ्घान् ॥ २७ ॥ तस्यास्त्र-
मस्त्रेण निहत्य सोऽथ जघान सङ्ख्ये रथनागपत्तीन्। अमृष्य-
माणस्तु महाविमर्द्दे महारथो भार्गवास्त्रप्रभावात् ॥ २८ ॥ पाञ्चा-
लानां प्रवरांश्चापि योधान् क्रोधाविष्टः सूतपुत्रस्तरस्वी। वाणै-
र्विव्याधाहवे सुप्रयुक्तैः प्रहस्य कृष्णौ तु नरप्रवीरः ॥ २९ ॥ ततः
पाञ्चालाः सोमकाश्चापि राजन् कर्णेनाजौ पीड्यमानाः शरौघैः।
क्रोधाविष्टा विविधुस्ते समन्तात् तीक्ष्णैर्वाणैः सूतपुत्रं समेताः
॥ ३० ॥ तांस्तांस्तैस्तैः सन्निकृत्याशु वाणान् पाञ्चालानां रथ-
नागाश्वसङ्घान्। अभ्यर्द्दयद्बाणगणैः प्रसह्य विक्षोभयन् समरे
सूतपुत्रः ॥ ३१ ॥ ते भिन्नदेहा व्यसवो निपेतुः कर्णेषुभिर्भूमितले
स्वनन्तः। क्रुद्धेन सिंहेन यथैव नागा महाबला भीमबलेन तद्वत्
॥ ३२ ॥ पाञ्चालानां प्रवरान् सन्निहत्य संस्पर्द्धमानान् बलिनो
योधमुख्यान्। ततः स राजन् विरराज कर्णः शरान् सृजन्मेघ
इवाम्बुधाराः ॥ ३३ ॥ कर्णस्य मत्वा तु जयं त्वदीयास्तलान्निजघ्नुः

सिंहनादांश्च चक्रुः। सर्वे ह्यमन्यन्त वशे कृतौ तौ कर्णेन कृष्णाविति कौरवेन्द्र ॥ ३४ ॥ तत्तादृशं प्रेक्ष्य महारथस्य कर्णस्य वीर्यन्तु परैरसह्यम्। दृष्ट्वा च कर्णेन धनञ्जयस्य संग्राममध्ये विहतं तदस्त्रम् ॥ ३५ ॥ ततस्त्वमर्षी क्रोधसंदीप्तनेत्रो वातात्मजः पाणिना पाणिमाच्छृत्। भीमोऽब्रवीदर्जुनं सत्यसन्धममर्षितो निश्वसन् जातमन्युः ॥ ३६ ॥ कथन्नु पापोऽयपेतधर्मः सूतात्मजः समरेऽद्य प्रसह्य। पाञ्चालानां योधमुख्याननेकान्निजघ्निवांस्तव जिष्णो समक्षम् ॥ ३७ ॥ पूर्वं देवैरजितं कालकेयैः साक्षात् स्थाणोर्बाहुसंस्पर्शमेत्य। कथं नु त्वां सूतपुत्रः किरीटिन्नष्टेषुभिर्दशभिः प्रागविध्यत्। त्वया क्षिप्तानग्रसहाणसङ्घानाश्चर्यमेतत् प्रतिभाति मेऽद्य ॥ ३८ ॥ कृष्णापरिक्लेशमनुस्मर त्वं यच्चाब्रवीत् षण्डतिलानिति स्म। वाचः सुतीक्ष्णास्थिभिदोऽसमीक्ष्याः सूतात्मजोऽयं गतभीर्दुरात्मा ॥ ३९ ॥ संस्मृत्य तत् सर्वमिहाद्य पापं जह्याशु कर्णं युधि सव्यसाचिन्। कस्मादुपेक्षां कुरुषे किरीटिन्नुपेक्षितुं नायमिहाद्य कालः ॥ ४० ॥ यया धृत्या सर्वभूतान्यजैषीर्ग्रासं ददद्वह्नये खाण्डवे त्वम्। तया धृत्या सूतपुत्रं जहि त्वमहञ्चैनं गदया पोथयिष्ये ॥ ४१ ॥ अथाब्रवीद्वासुदेवोऽपि पार्थं दृष्ट्वा रथेषून् प्रतिहन्यमानान् ॥ ४२ ॥ अमीमृदत् सर्वथा तेऽद्य कर्णो ह्यस्त्रैरस्त्रं किमिदं भोः किरीटिन्। स वीर किं मुह्यसि नावधत्से नदन्त्यते कुरवः संप्रहृष्टाः। कर्णं पुरस्कृत्य विदुर्हि सर्वे तवास्त्रमस्त्रैर्विनिपात्यमानम् ॥ ४३ ॥ यया धृत्या निहतं तामसास्त्रं युगे युगे राक्षसाश्चापि घोराः। दम्भोद्भवाश्चासुराश्चाहवेषु तया धृत्या जहि कर्णं त्वमद्य ॥ ४४ ॥ अनेन चास्य क्षुरनेमिनाद्य संछिन्धि मूर्द्धानमरेः प्रसह्य। मया विसृष्टेन सुदर्शनेन वज्रेण शक्रो नमुचेरिवारेः ॥ ४५ ॥ किरातरूपी भगवान् यया च त्वया महात्मा परितोषितोऽभूत्। तां त्वं धृतिं वीर पुनर्गृहीत्वा

सहानुबन्धं जहि सूतपुत्रम् ॥ ४६ ॥ ततो महीं सागरमेखलां त्वं सपत्तनां ग्रामवतीं समृद्धाम्। प्रयच्छ राज्ञे निहतारिसङ्घा यशश्च पार्थातुलमाप्नुहि त्वम् ॥ ४७ ॥ स एवमुक्तोऽतिबलो महात्मा चकार बुद्धिं हि वधाय सौतेः। स चोदितो भीमजनार्द्दनाभ्यां स्मृत्वा तथात्मानमवेक्ष्य सर्वम्। इहात्मनश्चागमने विदित्वा प्रयोजनं केशवमित्युवाच ॥ ४८ ॥ प्रादुष्करोम्येष महास्त्रमुग्रं शिवाय लोकस्य वधाय सौतेः। तन्मेऽनुजानातु भवान् सुराश्च ब्रह्मा भवो ब्रह्मविदश्च सर्व्वे ॥ ४९ ॥ इत्युच्य देवं स तु सव्यसाची नमस्कृत्वा ब्रह्मणे सोऽमितात्मा। तदुत्तमं ब्राह्ममसह्यमस्त्रं प्रादुश्चक्रे मनसा यद्विधेयम् ॥ ५० ॥ तदस्य हत्वा विरराज कर्णो मुक्त्वा शरान्मेघ इवाम्बुधाराः ॥ ५१ ॥ समीक्ष्य कर्णेन किरीटिनस्तु तथाजिमध्ये विहितं तदस्त्रम्। ततोऽमर्षी बलवान् क्रोधदीप्तो भीमोऽब्रवीदर्जुनं सत्यसन्धम् ॥ ५२ ॥ ननुत्वाहुर्व्विदितारं महास्त्रं ब्राह्मं विधेयं परमं जनास्त्वत्। तस्मादन्यद्योजय सव्यसाचिन्निति स्मोक्तोऽयोजयत् सव्यसाची ॥ ५३ ॥ ततो दिशश्च प्रदिशश्च सर्व्वाः समावृणोत् सायकैर्भूरितेजाः। गाण्डीवमुक्तैर्भुजगैरिवोग्रैर्द्दिवाकरांशुप्रतिमैर्ज्वलद्भिः ॥ ५४ ॥ सृष्टास्तु बाणा भरतर्षभेण शतं शतानीव सुवर्णपुङ्खाः। प्राच्छादयत् कर्णरथं क्षणेन युगान्तवह्न्यर्ककरप्रकाशाः ॥ ५५ ॥ ततश्च शूलानि परश्वधानि चक्राणि नाराचशतानि चैव। निश्चक्रमुर्घोरतराणि योधास्ततो ह्यहन्यन्त समन्ततोऽपि ॥ ५६ ॥ छिन्नं शिरः कस्यचिदाजिमध्ये पपात योधस्य परस्य कायात्। भयेन सोऽप्याशु पपात भूमावन्यः प्रनष्टः पतितं विलोक्य ॥ ५७ ॥ अन्यस्य सासिर्निपपात कृत्तो योधस्य बाहुः करिहस्ततुल्यः। अन्यस्य सव्यः सह चर्म्मणा च क्षुरप्रकृत्त पतितो धरण्याम् ॥ ५८ ॥ एवं समस्तानपि योधमुख्यान् विध्वंसयामास किरीटमाली। शरैः शरीरान्तकरैः सुघोरैर्दौर्य्योधनं सैन्यमशेष-

मेव ॥ ५९ ॥ वैकर्त्तनेनापि तथाजिमध्ये सहस्रशो बाणगणा विसृष्टाः। ते घोषिणः पाण्डवमभ्युपेयुः पर्ज्जन्यमुक्ता इव वारिधाराः ॥ ६० ॥ स भीमसेनञ्च जनार्द्दनञ्च किरीटिनञ्चाप्यमनुष्यकर्मा। त्रिभिस्त्रिभिर्भीमबलोऽभिहत्य ननाद घोरं महता स्वरेण ॥ ६१ ॥ स कर्णबाणाभिहतः किरीटी भीमं तदा प्रेच्य जनार्द्दनञ्च। अमृष्यमाणः पुनरेव पार्थः शरान् दशाष्टौ च समुद्ववर्ह ॥ ६२ ॥ सुषेणमेकेण शरेण विद्धा शल्यञ्चतुर्भिस्त्रिभिरेव कर्णम्। ततः सुमुक्तैर्द्दशभिर्ज्जघान सभापतिं काञ्चनवर्मनद्धम् ॥ ६३ ॥ स राजपुत्रो विशिरा विबाहुर्विबाजिसूतो विधनुर्विकेतुः। हतो रथाग्रादपतत् स रुग्नः परश्वधैः शाल इवावकृत्तः ॥ ६४ ॥ पुनश्च कर्णं त्रिभिरष्टभिश्च द्वाभ्याञ्चतुर्भिर्द्दशभिश्च विद्धा। चतुःशतान् द्विरदान् सायुधीयान् हत्वा रथानष्टशतं जघान ॥ ६५ ॥ सहस्रमश्वांश्च पुनः ससादीनष्टौ सहस्राणि च पत्तिवीरान्। कर्णंससूतं सरथाश्वकेतुमदृश्यमञ्जोगतिभिश्च चक्रे ॥ ६६ ॥ ततोऽक्रोशन् कुरवो वध्यमाना धनञ्जयेनाधिरथिं समन्तात्। विमुञ्च बाणान् जहि पाण्डुपुत्रं बाणैः पुरा हन्ति कुरून् समग्रान् ॥ ६७ ॥ स चोदितः सर्वयत्नेन कर्णो मुमोच बाणान् सुबहूनभीक्ष्णम्। ते पाण्डुपाञ्चालगणान्निजघ्नुर्मर्मच्छिदः शोणितपाः सुमुक्ताः ॥ ६८ ॥ तावुत्तमौ सर्वधनुर्द्धराणां महाबलौ सर्वसपत्नसाहौ। निजघ्नतुश्चाहितसैन्यमुग्रावन्योऽन्यमप्यस्त्रविदौ महास्त्रैः ॥ ६९ ॥ अथोपयातस्त्वरितो दिदृक्षुर्मन्त्रौषधिभ्यां विरुजो विशल्यः। कृतः सुहृद्भिर्भिषजांवरिष्ठैर्युधिष्ठिरस्तत्र सुवर्णवर्मा ॥ ७० ॥ तत्रोपयातं युधि धर्मराजं दृष्ट्वा मुदा सर्वभूतान्यनन्दन्। राहोर्विमुक्तं विमलं समग्रं चन्द्रं यथैवाभ्युदितं तथैव ॥ ७१ ॥ दृष्ट्वा तु मुख्यावथ युध्यमानौ दिदृक्षवः शूरवरावरिघ्नौ। कर्णञ्च पार्थञ्च नियस्य वाहान् खस्था महीस्थाश्च जना वितस्थुः ॥ ७२ ॥ स कार्मुक-

ज्यातलसन्निपातः सुमुक्तबाणस्तुमुलो बभूव। प्रतीस्तथान्योन्य-मिषुप्रवेकैर्धनञ्जयस्याधिरथेश्च राजन् ॥ ७३॥ ततो धनुर्ज्या सहसातिकृष्टा सुघोषमच्छिद्यत पाण्डवस्य। तस्मिन् क्षणे सूत-पुत्रस्तु पार्थं समाचिनोत् क्षुद्रकाणां शतेन ॥ ७४ ॥ निर्मुक्तसर्प-प्रतिमैश्च तीक्ष्णैस्तैलप्रधौतैः खगपत्रवाजैः। षष्ट्या नाराचैर्वासु-देवं बिभेद तदन्तरं प्राद्रवन् सोमकाश्च ॥ ७५ ॥ प्राच्छादयंस्ते निशितैः पृषत्कैर्जीमूतसङ्घा नभसीव सूर्य्यम्। आगच्छतस्तान् विशिखैरनेकैर्व्यष्टम्भयत् सूतपुत्रः कृतास्त्रः ॥ ७६ ॥ तैरस्त्रमस्त्रै-र्विनिहत्य सर्वं जघान तेषां रथवाजिनागान्। तथा तु सैन्य-प्रवरांश्च राजन्नभ्यर्द्दयन्मार्गणैः सूतपुत्रः ॥ ७७॥ ते भिन्नदेहा व्यसवो निपेतुः कर्णेषुभिर्भूमितले स्वनन्तः। क्रुद्धेन सिंहेन यथा श्वयूथा महाबला भीमबलेन तद्वत् ॥ ७८ ॥ पुनश्च पाञ्चालवरा-स्तथान्ये तदन्तरे कर्णधनञ्जयाभ्याम्। प्रस्कन्दतो बलिनः साधु-मुक्तैः कर्णेन बाणैर्निहता प्रसह्य ॥ ७९ ॥ जयन्तु मत्वा विपुलं त्वदीयास्तलान्निजघ्नुः सिंहनादांश्च नेदुः। सर्व्वे ह्यमन्यन्त वशे कृतौ तौ कर्णेन कृष्णाविति ते विमर्द्दे ॥ ८० ॥ ततो धनुर्ज्यामव-नाम्य शीघ्रं शरानस्तानाधिरथेर्विधम्य। सुसंरब्धः कर्णशर-क्षताङ्गो रणे पार्थः कौरवान् प्रत्यगृह्णात् ॥ ८१ ॥ ज्याश्चानुमृज्या-भ्यहनत्तलत्रे बाणान्धकारानकरोत् क्षणेन। शल्यञ्च कर्णञ्च कुरूंश्च सर्वान् बाणैरविध्यद्युगपत् किरीटी ॥ ८२ ॥ न पक्षिणो व्यपतन्नन्तरीक्षे क्षेपीयसास्त्रेण कृतान्धकारे। वायुर्वियत्स्थै-रीरितो भूतसङ्घैरुवाह दिव्यः सुरभिस्तदानीम् ॥ ८३ ॥ शल्यन्तु पार्थो दशभिः पृषत्कैर्भृशं तनुत्रे प्रहसन्नविध्यत्। ततः कर्णं द्वादशभिः सुमुक्तैर्विद्ध्वा पुनः सप्तभिरभ्यविध्यत् ॥ ८४ ॥ स पार्थ-बाणासनवेगमुक्तैर्दृढाहतः पत्रिभिरुग्रवेगैः। विभिन्नगात्रः क्षत-जोक्षिताङ्गः कर्णो बभौ रुद्र इवाततेषुः। प्रक्रीड़मानश्च श्मशान-

मध्ये रौद्रे मुहूर्त्ते रुधिरार्द्रगात्रः ॥ ८५ ॥ ततस्त्रिभिस्तं त्रिदशाधिपोपमं शरैर्विभेदाधिरथिर्द्धनञ्जयम् । शरांश्च पञ्च ज्वलितानिवोरगान् प्रवेशयामास जिघांसुरच्युतम् ॥ ८६ ॥ ते वर्म्म भित्त्वा पुरुषोत्तमस्य सुवर्णचित्रा न्यपतन् सुमुक्ताः । वेगेन गामाविविशुः सुवेगाः स्नात्वा च कर्णाभिमुखाः प्रतीयुः ॥ ८७ ॥ तान् पञ्च भल्लैर्दशभिः सुमुक्तैस्त्रिधा त्रिधैकैकमथो चकर्त्त । धनञ्जयस्ते न्यपतन् पृथिव्यां महाहयस्तक्षकपुत्रपक्षाः ॥ ८८ ॥ ततः प्रजज्वाल किरीटमाली क्रोधेन कक्षं प्रदहन्निवाग्निः । तथा वितुन्नाङ्गमवेक्ष्य कृष्णं सर्पैर्षभिः कर्णभुजप्रसृष्टैः ॥ ८९ ॥ स कर्णमाकर्णविकृष्टसृष्टैः शरैः शरीरान्तकरैर्ज्वलद्भिः । मर्मस्वविध्यत् स चचाल दुःखाद्धैर्य्यात्तु तस्थावतिमात्रधैर्य्यः ॥ ९० ॥ ततः शरौघैः प्रदिशो दिशश्च रविप्रभाः कर्णरथश्च राजन् । अदृश्य आसीत् कुपिते धनञ्जये तुषारनीहारवृतं यथा नभः ॥ ९१ ॥ स चक्ररक्षानथ पादरक्षान् पुरःसरान् पृष्ठगोपांश्च सर्वान् । दुर्य्योधनस्यानुमतान् वरिष्ठान् समुच्छ्रितान्रथिनः सारभूतान् ॥ ९२ ॥ द्विसाहस्रान् समरे सव्यसाची कुरुप्रवीरानृषभः कुरूणाम् । क्षणेन सर्वान् सरथाश्वसूतान् निनाय राजन् क्षयमेकवीरः ॥ ९३ ॥ अथो पलायन्त विहाय कर्णं तवात्मजाः कुरवश्चावशिष्टाः । हतानवाकीर्य्य शरक्षतांश्च लालप्यमानांस्तनयान् पितॄंश्च ॥ ९४ ॥ स सर्वतः प्रेक्ष्य दिशो विशून्या भयावदीर्णैः कुरुभिर्विहीनः । न विव्यथे भारत तदा कर्णः प्रतीपमेवार्जुनमभ्यधावत् ॥ ९५ ॥

इति कर्णपर्वणि कर्णार्जुनसंग्रामे एकोननवतोऽध्यायः ॥ ८९ ॥

---

सञ्जय उवाच । ततोऽपयाताः शरपातमात्रमवस्थिताः कुरवो भिन्नसेनाः । विद्युत्प्रकाशं ददृशुः समन्ताद्धनञ्जयास्त्रं समुदीर्य्य-

भागम् ॥ १ ॥ तदर्जुनास्त्रं ग्रसति स्म कर्णो वियद्गतं घोरतरैः शरौघैः क्रुद्धेन पार्थेन भृशाभिसृष्टं वधाय कर्णस्य महाविमर्द्दे ॥ २ ॥ उदीर्य्यमाणं स कुरून् दहन्तं सुवर्णपुङ्खैर्विशिखैर्विमर्द्दे । कर्णः सुघोषिप्रसनं दृढ़ज्यं विस्फारयित्वा व्यसृजच्छरौघान् ॥ ३ ॥ रामादुपात्तेन महामहिम्ना ह्याथर्वणेनारिविघातनेन । तदर्जुनास्त्रं व्यधमद्दहन्तं पार्थञ्च वाणैर्निशितैर्निजघ्ने ॥ ४ ॥ ततो विमर्द्दः सुमहान् बभूव तत्रार्जुनस्याधिरथेश्च राजन् । अन्योऽन्यमासादयतोः पृषत्कैर्विषाणघातैर्द्विपयोरिवोग्रैः ॥ ५ ॥ ततोऽस्त्रसङ्घातसमावृतं तदा बभूव दिक्चक्रमदृश्यभास्करम् । यत् कर्णपार्थौ शरजालवृष्ट्या निरन्तरं चक्रतुरन्तरीक्षम् ॥ ६ ॥ ततो जालं वाणमयं महान्तं सर्व्वेऽद्राक्षुः कुरवः सोमकाश्च । नान्यत् किञ्चिद्ददृशुः सम्पतद्दै वाणान्धकारे तुमुले च तस्मिन् ॥ ७ ॥ तौ सन्दधानावनिशं स्म राजन् समस्यन्तौ चापि शराननेकान् । सन्दर्शयन्तौ युद्धमार्गान्विचित्रान् धनुर्द्धराणां प्रवरौ कृतास्त्रौ ॥ ८ ॥ तयोरेवं युध्यतोराजिमध्ये सूतात्मजोऽभूदधिकः कदाचित् । पार्थः कदाचित्त्वधिकः किरीटी वीर्य्यास्त्रसम्पद्लाघवैस्तु ॥ ९ ॥ दृष्ट्वा तयोस्तं युधि संप्रहारं परस्परस्यान्तरप्रेक्षिणोस्तु । घोरं तदा दुर्विषहं रणेऽन्ये योधाः सर्व्वे विस्मयमभ्यगच्छन् ॥ १० ॥ ततो भूतान्यन्तरीक्षस्थितानि कर्णार्जुनौ तौ प्रशशंसुर्नरेन्द्र । भोः कर्ण साध्वर्जुन साधु चेति हृष्टाः प्रोचुः सङ्घशः प्रीतिमन्तः ॥ ११ ॥ तस्मिन् विमर्द्दे रथवाजिनागैस्तदाभिघातैर्द्दलिते भूतले च । ततस्तु पातालतले शयानो नागोऽश्वसेनः कृतवैरोऽर्जुनेन ॥ १२ ॥ राजंस्तदा खाण्डवदाहमुक्तो विवेश कोपादसुधातलं यः । स नागवीरोऽथ समुत्थितोऽग्रतो मातुर्वधं संस्मरंश्च स्म वैरम् । अथोर्द्धयातोर्द्धगतिर्ज्जवेन संदृश्य कर्णार्जुनयोर्विमर्द्दम् ॥ १३ ॥ अयं हि कालोऽस्य दुरात्मनो वै पार्थस्य वैरप्रतिघातनार्थम् । सञ्चिन्त्य

चैवं प्रविवेश तूर्णं कर्णस्य राजन् शररूपधारी ॥ १४ ॥ ततो-
ऽस्त्रसङ्घातसमाकुलं तदा बभूव जालं विततांशुजालम्। तौ
कर्णपार्थौ शरसङ्घवृष्टिभिर्निरन्तरं चक्रतुरम्बरं तदा ॥ १५ ॥
तद्बाणजालैकमयं महान्तं सर्वेऽवसन् कुरवः सोमकाश्च। नान्यत्
किञ्चिद्ददृशुः सम्पतद्वै बाणान्धकारे तुमुलेऽतिमात्रम् ॥१६॥ ततस्तौ
पुरुषव्याघ्रौ सर्वलोकधनुर्द्धरौ। प्रेक्ष्यमाणौ रणे वीरौ युद्धश्रम-
मुपागतौ ॥ १७ ॥ समुत्क्षेपैर्वीज्यमानौ सिक्तौ चन्दनवारिणा।
सवालव्यजनैर्दिव्यैर्दिविस्थैरप्सरोगणैः। शक्रसूर्य्यकराब्जाभ्यां
प्रमार्ज्जितमुखावुभौ ॥ १८ ॥ कर्णोऽथ पार्थं न विशेषयेद्यदा भृशञ्च
पार्थेन पराभितप्तः। ततस्तु वीरः शरविक्षताङ्गो दध्रे मनो
ह्येकशयस्य तस्य ॥ १९ ॥ ततो रिपुघ्नं समधत्त कर्णः सुसंशितं
सर्पमुखं ज्वलन्तम्। रौद्रं शरं संयतिसुप्रधौतं पार्थार्थमत्यर्थ-
चिराभिगुप्तम् ॥ २० ॥ सदार्च्चितं चन्दनचूर्णशायितं सुवर्णतूणीर
शयं महार्च्चिषम्। आकर्णपूर्णं प्रविकृष्य कर्णः पार्थोन्मुखं सन्दधे
तिग्ममन्युम् ॥ २१ ॥ प्रदीप्तमैरावतवंशसम्भवं शिरोजिहीर्षु-
र्युधि फाल्गुनस्य। ततः प्रजज्वाल दिशो नभश्च उल्काश्च घोरा
ह्यशनिर्निपेतुः ॥ २२ ॥ तस्मिंस्तु नागे धनुषि प्रयुक्ते हाहाकृता
लोकपालाः सशक्राः। न चापि तं बुबुधे सूतपुत्रो बाणे प्रविष्टं
योगबलेन नागम् ॥ २३ ॥ ततोऽब्रवीन्मद्रराजो महात्मा वैकर्-
त्तनं प्रेक्ष्य हि सन्धितेषुम्। न कर्ण ग्रीवामिषुरेष लप्स्यति
समीक्ष्य सन्धत्स्व शरं शिरोघ्नम् ॥ २४ ॥ अथाब्रवीत् क्रोधसंदीप्त-
नेत्रो मद्राधिपं सूतपुत्रस्तरस्वी। न सन्धत्ते द्विः शरं शल्य कर्णो
न मादृशा जिह्मयुद्धा भवन्ति ॥ २५ ॥ इतीदमुक्त्वा विससर्ज्ज तं
शरं प्रयत्नतो वर्षगणाभिपूजितम्। हतोऽसि वै फाल्गुन इत्ये-
वोच्चरन् स राजन् विजयार्थमुद्यतः ॥ २६ ॥ स सायकः कर्ण-
भुजाभिसृष्टो हुताशनार्कप्रतिमः सुघोषः। गुणाच्युतः प्राज्वल-

दन्तरीक्षे कुर्वन् सीमन्तं नभसोभीमरूपः ॥ २७॥ तं वीक्ष्य दीप्तं युधि माधवस्तु त्वरान्वितः कंसरिपुः सलीलम्। पद्भ्यां विनिष्पिष्य रथोत्तमं तं प्रावेशयज्जगतीं किञ्चिदात्रम्। क्षितिं गता जानुभिस्तेऽथ वाहा हेमच्छन्ना चन्द्रमरीचिवर्णाः॥ २८॥ सन्धीयमानं भुजगं दृष्ट्वा कर्णेन माधवः। आक्रामत् स्यन्दनं पद्भ्यां बलेन बलिनां वरः। अवगाढ़े रथे भूमौ जानुभ्यामगमन् हयाः ॥ २९॥ ततोन्तरीक्षे सुमहान्निनादः संपूजनार्थं मधुसूदनस्य। दिव्याश्च वाचः सहसा बभूवुर्दिव्यानि पुष्पाख्यथ सिंहनादाः। तस्मिंस्तथा वै धरणीं निमग्ने रथे प्रयत्नान्मधुसूदनस्य॥ ३०॥ अथार्जुनस्योत्तमगात्रभूषणं धराबियद्द्योसलिलेषु विश्रुतम्। व्यालास्त्रसर्गोत्तमयत्नमन्युभिः शरेण मूर्द्धः प्रजहार सूतजः ॥ ३१॥ दिवाकरेन्दुज्वलनग्रहत्विषं सुवर्णमुक्तामणिवज्रभूषितम्। पुरन्दरार्थं तपसा प्रयत्नतः स्वयं कृतं यद्विभुना स्वयम्भुवा ॥ ३२ ॥ महार्हरूपं द्विषतां भयङ्करं बिभर्त्तुरत्यर्थसुखं सुगन्धिनम्। जिघांसते देवरिपून् सुरेश्वरः स्वयं ददौ यत् सुमनाः किरीटिने॥ ३३॥ हराम्बुपाखण्डलवित्तगोप्तृभिः पिनाकपाशाशनिसायकोत्तमैः। सुरोत्तमैरप्यविषह्यमर्द्दितुं प्रसह्य नागेन जहार यद्वृतः ॥ ३४॥ स दुष्टभावो वितथप्रतिज्ञः किरीटमासाद्य तमुग्ररूपः। विशुद्धजाम्बूनदरत्नचित्रं पार्थोत्तमाङ्गादहरत्तरस्वी ॥ ३५ ॥ तद्रत्नमालावततं सुचारु जाज्वल्यमानं वपुषा श्रिया च। दिव्यं प्रमथ्याशु नरेन्द्र सङ्ख्ये जहार नागोऽर्जुनमूर्द्धतो बलात। गिरेः सुजातोत्तमपुष्पितद्रुमं यथैव शृङ्गं खलु वज्रदारितम् ॥ ३६॥ तदुत्तमेषुन्मथितं विषाग्निना प्रदीप्तमार्च्चिष्मदभिक्षितौ प्रियम्। पपात पार्थस्य किरीटमुत्तमं दिवाकरोऽस्तादिव पर्वताज्ज्वलन् ॥ ३७॥ स वै किरीटं बहुरत्नभूषितं जहार नागोऽर्जुनमूर्द्धतो बलात्। गिरेः सुजाताङ्कुरपुष्पितद्रुमं महेन्द्रवज्रः शिखरोत्तमं यथा ॥ ३८॥

महौविवद्दीसलिलानि वायुना यथा विरुग्णानि नदन्ति भारत।
तथैव शब्दं भुवनेषु तं तदा जना व्यवस्यन् व्यथिताश्च चस्खलुः
॥ ३९ ॥ विना किरीटं शुशुभे न पार्थः श्यामो युवा शैल इवात्त-
शृङ्गः। ततः स उद्ग्रथ्य सितेन वाससा स्वमूर्द्धजानव्यथित स्थितो-
ऽर्जुनः ॥ ४० ॥ गोकर्णा सुमुखीकृतेन इषुणा गोपुत्रसंप्रेषिता
गोशब्दात्मजभूषणं सुविहितं सुव्यक्तगोसुप्रभम्। दृष्ट्वा गोगतकं
जहार मुकुटं गोशब्दगोपूरि वै गोकर्णासनमर्द्दनश्च न ययावप्राप्य
मृत्योर्वशम् ॥ ४१ ॥ स सायकः कर्णभुजप्रसृष्टो हुताशनार्कप्रतिमो
महार्हः। महोरगः कृतवैरोऽर्जुनेन किरीटमाहत्य ततो व्यती-
यात् ॥ ४२ ॥ तञ्चापि दग्ध्वा तपनीयचित्रं किरीटमाविष्कृतमर्जु-
नस्य। इयेष गन्तुं पुनरेव तूर्णं पृष्ठश्च कर्णेन ततोऽब्रवीदिदम्
॥ ४३॥ मुक्तस्त्वयाहं न समीक्ष्य कर्ण शिरो हृतं यन्न मयार्जुनस्य।
समीक्ष्य मां मुञ्च रणे त्वमाशु हन्तास्मि शत्रुं तव चात्मनश्च ॥ ४४ ॥
स एवमुक्तो युधि सूतपुत्रस्तमब्रवीत् कोभवानुग्ररूपः। नागो-
ऽब्रवीद्विद्धि कृतागसं मां पार्थेन मातुर्वधजातवैरम् ॥ ४५ ॥ यदि
स्वयं वज्रधरोऽस्य गोप्ता तथापि याता पितृराजवेश्म। त्वं माव-
मंस्थाः कुरु मे वचोऽद्य निहन्मि शत्रुं तव मुञ्च मां द्रुतम् ॥ ४६ ॥
कर्ण उवाच। न नाग कर्णोऽद्य रणाय वान्यबलं समास्थाय
जयं बुभूषित। न सन्दध्यां द्विः शरं चैव नाग यद्यर्जुनानां शतमेव
हन्याम ॥ ४७ ॥ तमाह कर्णः पुनरेव नागं तदाजिमध्ये रविसूनु-
सत्तमः। व्यालास्त्रसर्गोत्तमयत्नमन्युभिर्हन्तास्मि पार्थं सुमुखो व्रज
त्वम् ॥ ४८ ॥ इत्येवमुक्तो युधि नागराजः कर्णेन रोषादसहंस्तु
वाक्यम्। स्वयं प्रायात् पार्थबधाय राजन् कृत्वेषुरूपं विजिघांसुरुग्रः
॥४९॥ कृष्णस्ततः पार्थमुवाच सङ्ख्ये महोरगं कृतवैरं जहि त्वम्।
स एवमुक्तो मधुसूदनेन गाण्डीवधन्वा रिपूषूग्रधन्वा। उवाच
कोन्वेष ममाद्य नागः स्वयं य आयात् गरुड़स्य वक्त्रम् ॥ ५० ॥

कृष्ण उवाच । योऽसौ त्वया खाण्डवे चित्रभानुं सन्तर्पयाणेन धनुर्द्धरेण । वियद्गतो जननीगुप्तदेहो मत्वैकरूपं निहतास्य माता ॥ ५१ ॥ स एष ते वैरमनुस्मरन् वै त्वामद्य चायाति वधाय पार्थ । नभश्च्युतां प्रज्वलितामिवोल्कां पश्यैनमायान्तममित्रसाह ॥ ५२ ॥

सञ्जय उवाच । ततः स जिष्णुः परिवृत्य रोषाच्चिच्छेद षड्भिर्निशितैः पृषत्कैः । नागं वियत्तिर्य्यगिवापतन्तं स छिन्नगात्रो निपपात भूमौ ॥ ५३ ॥ हते तु तस्मिन् भुजगे किरीटिना स्वयं विभुः पार्थिव भूतलादथ । समुज्जहाराशु महाभुजः स तं रथं भुजाभ्यां पुरुषोत्तमः पुनः ॥ ५४ ॥ तस्मिन्मुहूर्त्ते दशभिः पृषत्कैः शिलाशितैर्वर्हिणवर्हवाजितैः । विव्याध कर्णः पुरुषप्रवीरं धनञ्जयं तिर्य्यगवेक्षमाणः ॥ ५५ ॥ ततोऽर्जुनो द्वादशभिः सुमुक्तैर्वराहकर्णैर्निशितैः समर्प्य । नाराचमाशीविषतुल्यवेगमाकर्णपूर्णायतमुत्ससर्ज्ज ॥ ५६ ॥ स चित्रवर्म्मेषुवरो विदार्य्य प्राणान्निरस्यन्निव साधुमुक्तः । कर्णस्य पीत्वा रुधिरं विवेश वसुन्धरां शोणितदिग्धवाजः ॥ ५७ ॥ ततो वृषो वाणनिपातकोपितो महोरगो दण्डविघट्टितो यथा । तथाशुकारी व्यसृजच्छरोत्तमान् महाविषः सर्पं इवोद्वमन् विषम् ॥ ५८ ॥ जनार्द्दनं द्वादशभिः पराभिनन्नवैर्नवत्या च शरैस्तथार्जुनम् । शरेण घोरेण पुनश्च पाण्डवं विभिद्य कर्णो व्यनदज्जहास च ॥ ५९ ॥ स तस्य हर्षं ममृषे न पाण्डवो बिभेद मर्म्माणि ततोऽस्य मर्म्मवित् । परःशतैः पत्रिभिरिन्द्रविक्रमस्तथा यथेन्द्रो वलमोजसाहनत् ॥ ६० ॥ ततः शराणां नवतीर्नवार्जुनः ससर्ज्ज कर्णेऽन्तकदण्डसन्निभाः । स तैर्भृशाविद्धतनुः प्रविव्यथे तथा यथा वज्रविदारितोऽचलः ॥ ६१ ॥ मणिप्रवेकोत्तमवज्रहाटकैरलंकृतं चास्य वराङ्गभूषणम् । प्रकृत्तमुर्व्यां निपपात पत्रिभिर्धनञ्जयेनोत्तमकुण्डलेऽपि च ॥ ६२ ॥ महा-

घनं शिल्पिवरैः प्रयत्नतः कृतं तदस्योत्तमवर्म भास्वरम्। सुदीर्घ-
कालेन ततोऽस्य पाण्डवः क्षणेन बाणैर्बहुधा व्यशातयत् ॥ ६३ ॥
स तं विवर्माणमथोत्तमेषुभिः शितैश्चतुर्भिः कुपितः पराभिनत्।
स विव्यथेऽत्यर्थमरिप्रताडितो यथातुरः पित्तकफानिलज्वरैः ॥ ६४ ॥
महाधनुर्मण्डलनिःसृतैः शितैः क्रियाप्रयत्नप्रहितैर्बलेन च। ततश्च
कर्णं बहुभिः शरोत्तमैर्बिभेद मर्मस्वपि चार्जुनस्त्वरन् ॥ ६५ ॥
दृढाहतः पत्रिभिरुग्रवेगैः पार्थेन कर्णो विविधैः शिताग्रैः। बभौ
गिरिर्गैरिकधातुरक्तः क्षरन् प्रपातैरिव रक्तमम्भः ॥ ६६ ॥ ततो-
ऽर्जुनः कर्णमवक्रगैर्नवैः सुवर्णपुङ्खैः सुदृढैरयस्मयैः। यमाग्नि-
दण्डप्रतिमैः स्तनान्तरे पराभिनत् क्रौञ्चमिवाद्रिमग्निजः ॥ ६७ ॥
ततः शरावापमपास्य सूतजो धनुश्च तच्छक्रशरासनोपमम्। ततश्च
तस्थौ च मुमोह चस्खले प्रशीर्णमुष्टिः सुभृशातुरस्तदा ॥ ६८ ॥
न चार्जुनस्तं व्यसनेतदैषिवान् विहन्तुमार्य्यः पुरुषव्रते स्थितः। तत-
स्तमिन्द्रावरजोऽपि सम्भ्रमादुवाच किं पाण्डव हे प्रमाद्यसि ॥ ६९ ॥
नैवाहितानां सततं विपश्चितः क्षणं प्रतीक्षन्त्यपि दुर्बलीयसाम्।
विशेषतोऽरीन् व्यसनेषु पण्डितो निहत्य धर्मञ्च यशश्च विन्दति
॥ ७० ॥ तमेकवीरं तव चाहितं सदा त्वरस्व कर्णं सहसाभि-
मर्द्दितुम्। पुरा समर्थः समुपैति सूतजो जहि त्वमेनं नमुचिं
यथा हरिः ॥ ७१ ॥ तथास्तु कृष्णेत्यभिपूज्य सत्वरं जनार्द्दनं
कर्णमविध्यदर्जुनः। शरोत्तमैः सर्वकुरूत्तमस्त्वरन् यथा तथा
शम्बरमम्बराधिपः ॥ ७२ ॥ साश्वन्तु कर्णं सरथं किरीटी समा-
चिनोत् भारत वत्सदन्तैः। प्रच्छादयामास दिशश्च बाणैः सर्व-
प्रयत्नात्तपनीयपुङ्खैः ॥ ७३ ॥ स वत्सदन्तैः पृथुपीनवक्षाः समा-
चितः सोऽधिरथिर्विभाति। सुपुष्पिताशोकपलाशशाल्मलिर्यथा-
चलश्चन्दनकाननायुतः ॥ ७४ ॥ शरैः शरीरे बहुभिः समर्पितो
विभाति कर्णः समरे विशाम्पते। महीरुहैराचितसानुकन्दरो

यथा गिरीन्द्रः स्फुटकर्णिकारवान् ॥ ७५ ॥ स बाणसङ्घान्
बहुशो व्यवासृजन् विभाति कर्णः शरजालरश्मिवान्। सलोहितो
रक्तगभस्तिमण्डलो दिवाकरोऽस्ताभिमुखो यथा तथा ॥ ७६ ॥
बाह्वन्तरादाधिरथेर्विमुक्तान् बाणान्महाहीनिव दीप्यमानान्।
व्यध्वंसयन्नर्ज्जुनबाहुमुक्ताः शराः समासाद्य दिशः शिताग्राः ॥७७॥
ततः स कर्णः समवाप्य धैर्य्यं बाणान् विमुञ्चन् कुपिताहिकल्पान्।
विव्याध पार्थं दशभिः पृषत्कैः कृष्णञ्च षड्भिः कुपिताहिकल्पैः
॥ ७८ ॥ ततो महेन्द्राशनितुल्यनिस्वनं महाशरं सर्पविषानलो-
पमम्। अयस्मयं रौद्रमहास्त्रसम्मितं महाहवे क्षेप्तुमना धन-
ञ्जयः ॥ ७९ ॥ कालो ह्यदृश्यस्त्वथ विप्रशापं निदर्शयन् कर्णवधं
ब्रुवाणम्। भूमिस्त्वचक्रं ग्रसतीत्यवोचत् कर्णस्य तस्मिन् वधकाले-
ऽप्युपान्ते ॥ ८० ॥ ब्राह्मं महास्त्रं मनसि प्रनष्टं यद्भार्गवोऽस्मै
प्रददौ महात्मा। वामञ्चक्रं ग्रसते मेदिनी स्म प्राप्ते तस्मिन्
वधकाले नृवीर ॥८१॥ ततो रथो घूर्णितवान्नरेन्द्र शापात्तदा
ब्राह्मणसत्तमस्य। सवेदिकश्चैत्य इवातिमात्रं सुपुष्पितो भूमितले
निमग्नः ॥ ८२ ॥ घूर्णे रथे ब्राह्मणस्याभिशापाद्रामादुपात्तेऽप्रति-
भाति चास्त्रे। छिन्ने शरे सर्पमुखे च घोरे पार्थेन तस्मिन् विष-
साद कर्णः ॥ ८३ ॥ अमृष्यमाणो व्यसनानि तानि हस्तौ विधु-
न्वन् स विगर्हमाणः। धर्मप्रधानानभिपाति धर्म इत्यब्रुवन् धर्म-
विदः सदैव ॥ ८४ ॥ वयञ्च नित्यं प्रयताम धर्मं चर्त्तुं यथाशक्ति
यथाश्रुतञ्च। स चापि निह्नाति न पाति भक्तान्मन्ये न नित्यं
परिपाति धर्मः ॥ ८५ ॥ एवं ब्रुवन् प्रस्खलिताश्वसूतो विचाल्य-
मानोऽर्ज्जुनबाणपातैः। मर्म्माभिघाताच्छिथिलः क्रियासु पुनः
पुनर्धर्म्ममगर्हदाजौ ॥ ८६ ॥ ततः शरैर्भीमतरैरविध्यत्त्रिभिराहवे।
हस्ते कृष्णं तदा पार्थमभ्यविध्यच्च सप्तभिः ॥ ८७ ॥ ततोऽर्ज्जुनः
सप्तदश तिग्मवेगानजिह्मगान्। इन्द्राशनिसमान् घोरानसृजत्

पावकोपमान् ॥ ८८ ॥ निर्भिद्य ते भीमवेगा ह्यपतन् पृथिवीतले।
कम्पितात्मा ततः कर्णः शक्त्या चेष्टामदर्शयत् ॥ ८९ ॥ बलेनाथ
स संस्तभ्य ब्रह्मास्त्रं समुदीरयत्। ऐन्द्रं ततोऽर्जुनश्चापि तद्दृष्ट्वा-
भ्युपमन्त्रयत् ॥ ९० ॥ गाण्डीवं ज्याञ्च वाणांश्च सोऽनुमन्त्र्य पर-
न्तपः। असृजच्छरवर्षाणि वर्षाणीव पुरन्दरः ॥ ९१ ॥ तत-
स्तेजोमया वाणा रथात् पार्थस्य निःसृताः। प्रादुरासन्महावीर्य्याः
कर्णस्य रथमन्तिकात्। तान् कर्णस्त्वग्रतो न्यस्तान्मोघांश्चक्रे महा-
रथः ॥ ९२ ॥ ततोऽब्रवीद्वृष्णिवीरस्तस्मिन्नस्त्रे विनाशिते। विसृ-
जास्त्रं परं पार्थ राधेयो ग्रसते शरान् ॥ ९३ ॥ ततो ब्रह्मास्त्र-
मव्यग्रः संमन्त्र्य समयोजयत्। छादयित्वा दिशो वाणैः कर्णं
प्रत्यस्यदर्जुनः ॥ ९४ ॥ ततः कर्णः शितैर्वाणैश्चिच्छेद ज्यां सुते-
जनैः। द्वितीयाञ्च तृतीयाञ्च चतुर्थीं पञ्चमीं तथा ॥ ९५ ॥ षष्ठी-
मथास्य चिच्छेद सप्तमीञ्च तथाष्टमीम्। नवमीं दशमीञ्चैव तथा-
चैकादशीं वृषः। ज्याशतं शतसन्धानः स कर्णो नावबुध्यते ॥ ९६ ॥
ततो ज्यामवधायान्यामनुसृज्य च पाण्डवः। शरैरवाकिरत् कर्णं
दीप्तास्यैरुरगैरिव ॥ ९७ ॥ तस्य ज्याच्छेदनं कर्णो ज्यावधानञ्च
संयुगे। नान्वबुध्यत शीघ्रत्वात्तदद्भुतमिवाभवत् ॥ ९८ ॥ अस्त्रै-
रस्त्राणि राधेयः प्राहनत् सव्यसाचिनः। चक्रेऽभ्यधिकमात्मानं
स्ववीर्य्यं प्रतिदर्शयन् ॥ ९९ ॥ ततः कृष्णोऽर्जुनं दृष्ट्वा कर्णास्त्रे-
णाभिपीड़ितम्। अभ्यस्येत्यब्रवीत् पार्थमातिष्ठास्त्रमनुत्तमम् ॥ १०० ॥
ततोऽन्यमग्निसदृशं क्रुद्धः सर्पविषोपमम्। अश्मसारमयं दिव्य-
मनुमन्त्र्य धनञ्जयः ॥ १०१ ॥ रौद्रमस्त्रं समाधाय क्षेप्तुकामः
किरीटवान्। ततोऽग्रसन्मही चक्रं राधेयस्य तदा नृप ॥ १०२ ॥
ग्रस्तचक्रस्तु राधेयः कोपादश्रूण्यवर्त्तयत्। अर्जुनञ्चाब्रवीत् कर्णो
मुहूर्त्तं क्षम पाण्डव ॥ १०३ ॥ सव्यं चक्रं महीग्रस्तं दृष्ट्वा दैवा-
दिदं मम। पार्थ कापुरुषाचीर्णमभिसन्धिं विसर्जय ॥ १०४ ॥

प्रक्षीणं क्लेशे विमुखे ब्राह्मवादिकृताञ्जलौ । शरणागते याचमाने न्यस्तशस्त्रे तथैव च ॥ १०५ ॥ अबाणे भ्रष्टकवचे भ्रष्टभग्नायुधे तथा । न विमुञ्चन्ति शस्त्राणि शूराः साधुव्रते स्थिताः ॥ १०६ ॥ त्वञ्च शूरतमो लोके साधुवृत्तश्च पाण्डव । अभिज्ञो युद्धधर्म्माणां तस्मात् क्षम मम क्षणम् ॥ १०७ ॥ यावच्चक्रमिदं भूमेरुद्धरामि धनञ्जय । न मां रथस्थो भूमिष्ठमसज्जं हन्तुमर्हसि ॥ १०८ ॥ न वासुदेवात्त्वत्तो वा पाण्डवेय बिभेम्यहम् । त्वं हि क्षत्रियदायादो महाकुलविवर्द्धनः । स्मृत्वा धर्म्मोपदेशं त्वं मुहूर्त्तं क्षम पाण्डव ॥ १०९ ॥

इति कर्णपर्व्वणि कर्णरथचक्रग्रासे नवतितमोऽध्यायः ॥ ९० ॥

---

सञ्जय उवाच । तमब्रवीद्वासुदेवो रथस्थो राधेय दिष्ट्या स्मरसीह धर्म्मम् । प्रायेण नीचा व्यसने निमग्ना निन्दन्ति दैवं कुकृतं न तु स्वम् ॥ १ ॥ यद्द्रौपदीमेकवस्त्रां सभायामानायेस्त्वञ्च सुयोधनश्च । दुःशासनः शकुनिः सौबलश्च न ते कर्ण प्रत्यभात्तत्र धर्म्मः ॥ २२ ॥ यदा सभायां कौन्तेयमनक्षज्ञं युधिष्ठिरम् । अक्षज्ञः शकुनिर्जेता क्व ते धर्म्मस्तदा गतः ॥ ३ ॥ यद्भीमसेनं सर्पैश्च विषयुक्तैश्च भोजनैः । आचरस्त्वन्मते राजा क्व ते धर्म्मस्तदा गतः ॥ ४ ॥ वनवासे व्यतीते च वर्षे कर्ण त्रयोदशे । न प्रयच्छसि यद्राज्यं क्व ते धर्म्मस्तदा गतः ॥ ५ ॥ यद्वारणावते पार्थान् सुप्तान् जतुगृहे तदा । आदीपयस्त्वं राधेय क्व ते धर्म्मस्तदा गतः ॥ ६ ॥ यदा रजस्वलां कृष्णां दुःशासनवशे स्थिताम् । सभायां प्राहसः कर्ण क्व ते धर्म्मस्तदा गतः ॥ ७ ॥ यदा नारीपुरे कृष्णां कृष्यमाणामनागसम् । उपप्रेक्षसि राधेय क्व ते धर्म्मस्तदा गतः ॥ ८ ॥ विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।

पतिमन्यं वृणीष्वेति वदंस्त्वं गजगामिनीम् । उपप्रेक्षितवांस्त्वं हि क्व ते धर्मस्तदा गतः ॥ ९ ॥ राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवान् । गान्धारराजमाश्रित्य क्व ते धर्मस्तदा गतः ॥ १० ॥ यदाभिमन्युं बहवो युद्धे जघ्नुर्महारथाः । परिवार्य्य रणे बालं क्व ते धर्मस्तदा गतः ॥ ११ ॥ यद्येष धर्मस्तत्र न विद्यते हि किं सर्वथा तालविशोषणेन । अद्येह धर्म्याणि विधत्स्व सूत तथापि जीवन्न विमोक्ष्यसे हि ॥ १२ ॥ नलो ह्यक्षैर्निर्जितः पुष्करेण पुनर्यथा राज्यमवाप वीर्य्यात् । प्राप्तास्तथा पाण्डवा बाहुवीर्य्यात् सर्वे समस्ताः परिवृत्तलोभाः ॥ १३ ॥ निहत्य शत्रून् समरे प्रवृद्धान् ससोमका राज्यमवाप्नुयुस्ते । तथा गता धार्त्तराष्ट्रा विनाशं धर्माभिगुप्तैः सततं नृसिंहैः ॥ १४ ॥

सञ्जय उवाच । एवमुक्तस्तदा कर्णो वासुदेवेन भारत । लज्जयावनतो भूत्वा नोत्तरं किञ्चिदुक्तवान् ॥ १५ ॥ क्रोधात् प्रस्फुरमाणोष्ठो धनुरुद्यम्य भारत । योधयामास वै पार्थं महावेगपराक्रमः ॥ १६ ॥ ततोऽब्रवीद्वासुदेवः फाल्गुनं पुरुषर्षभम् । दिव्यास्त्रेणैव निर्भिद्य पातयस्व महाबल ॥ १७ ॥ एवमुक्तस्तु देवेन क्रोधमागात्तदार्जुनः । मन्युमभ्यविशद्घोरं स्मृत्वा तत्तु धनञ्जयः ॥ १८ ॥ तस्य क्रुद्धस्य सर्वेभ्यः स्रोतोभ्यस्तेजसोऽर्चिषः । प्रादुरासंस्तदा राजंस्तदद्भुतमिवाभवत् ॥ १९ ॥ तत् समीक्ष्य ततः कर्णो ब्रह्मास्त्रेण धनञ्जयम् । अभ्यवर्षन् पुनर्यत्नमकरोद्रथसज्जने ॥ २० ॥ ब्रह्मास्त्रेणैव तं पार्थो ववर्ष शरवृष्टिभिः । अस्त्रमस्त्रेण संवार्य्य प्रजहार च पाण्डवः ॥ २१ ॥ ततोऽन्यदस्त्रं कौन्तेयो दयितं जातवेदसः । मुमोच कर्णमुद्दिश्य तत् प्रजज्वाल तेजसा ॥ २२ ॥ वारुणेन ततः कर्णः शमयामास पावकम् । जीमूतैश्च दिशः सर्वाश्चक्रे तिमिरदुर्द्दिनाः ॥ २३ ॥ पाण्डवेयस्त्वसंभ्रान्तो वायव्यास्त्रेण वीर्य्यवान् । अपोवाह तदभ्राणि राधेयस्य

प्रपश्यतः ॥ २४ ॥ ततः शरं महाघोरं ज्वलन्तमिव पावकम् ।
आददे पाण्डुपुत्रस्य सूतपुत्रो जिघांसया ॥ २५ ॥ योज्यमाने
ततस्तस्मिन् बाणे धनुषि पूजिते । चचाल पृथिवी राजन् सशैल-
वनकानना ॥ २६ ॥ ववौ सशर्करो वायुर्दिशश्च रजसा वृताः ।
हाहाकारश्च सञ्जज्ञे सुराणां दिवि भारत ॥ २७ ॥ तमिषुं
सन्धितं दृष्ट्वा सूतपुत्रेण मारिष । विषादं परमं जग्मुः पाण्डवा
दीनचेतसः ॥ २८ ॥ स सायकः कर्णभुजप्रसृष्टः शक्राशनिप्रख्य-
रुचिः शिताग्रः भुजान्तरं प्राप्य धनञ्जयस्य विवेश वल्मीकमिवो-
रगोत्तमः ॥ २९ ॥ स गाढ़विद्धः समरे महात्मा विघूर्णमानः
श्लथहस्तगाण्डिवः । चचाल बीभत्सुरमित्रमर्द्दनः क्षिते प्रकम्पे
च यथाचलोत्तमः ॥ ३० ॥ तदन्तरं प्राप्य वृषो महारथो रथाङ्ग-
मुर्व्वीगतमुज्जिहीर्षुः । रथादवप्लुत्य निगृह्य दोर्भ्यां शशाक दैवान्न
महाबलोऽपि ॥ ३१ ॥ ततः किरीटी प्रतिलभ्य संज्ञां जग्राह बाणं
यमदण्डकल्पम् । दीप्तोऽर्जुनः प्राञ्जलिकं महात्मा ततोऽब्रवी-
द्वासुदेवोऽपि पार्थम् । छिन्ध्यस्य मूर्द्धानमरेः शरेण न यावदा-
रोहति वै रथं वृषः ॥ ३२ ॥ तथैव सम्पूज्य स तद्वचः प्रभोस्ततः
क्षुरं प्रज्वलितं प्रगृह्य । जघान कक्षामनलार्कवर्णां महारथो
रथचक्रे निमग्ने ॥ ३३ ॥ तं हस्तिकक्षाप्रवरञ्च केतुं सुवर्णमुक्ता-
मणिवज्रपृष्ठम् । ज्ञानप्रकर्षोत्तमशिल्पयत्नैः कृतं सुरूपं तपनीय-
चित्रम् ॥ ३४ ॥ ऊर्ज्जस्करं तव सैन्यस्य नित्यममित्रवित्रासनमीड्य-
रूपम् । विख्यातमादित्यसमस्य लोके समत्विषं पावकभानुचन्द्रैः
॥ ३५ ॥ ततः क्षुरप्रेण सुसंशितेन सुवर्णपुङ्खेन हुताग्निवर्च्चसा ।
श्रिया ज्वलन्तं ध्वजमुन्ममाथ महारथस्याधिरथेः किरीटी ॥ ३६ ॥
यशश्च दर्पश्च तथा जयोऽपि प्रियाणि सर्व्वाणि च तेन केतुना ।
साकं कुरूणां हृदयाणि चापतन् बभूव हाहेति च निस्वनो महान्
॥ ३७ ॥ दृष्ट्वा ध्वजं पातितमाशुकारिणा कुरुप्रवीरेण निकृत्त-

माहवे। नाशंसिरे सूतपुत्रस्य सर्वे जयं तदा भारत ये त्वदीयाः ॥ ३८ ॥ अथ त्वरन् कर्णवधाय पार्थो महेन्द्रवज्रामलदण्डसन्निभम्। आदत्त पार्थोऽञ्जलिकं निषङ्गात् सहस्ररश्मेरिव रश्मिमुत्तमम् ॥ ३९ ॥ मर्म्मच्छिदं शोणितमांसदिग्धं वैश्वानरार्कप्रतिमं महार्हम्। नराश्वनागासुहरं त्र्यरत्निं षड्वाजमञ्जोगतिमुग्रवेगम् ॥ ४० ॥ सहस्रनेत्राशनितुल्यतेजसं निशासु क्रव्यादमिवातिदुःसहम्। पिनाकनारायणचक्रसन्निभं भयङ्करं प्राणभृतां विनाशनम् ॥ ४१ ॥ जग्राह पार्थः स्वशरं प्रहृष्टो यो देवसङ्घैरपि दुर्निवार्य्यः। संपूजितो यः सततं महात्मा देवासुरान् यो विजयेन्महेषुः ॥ ४२ ॥ तं वै प्रमृष्टं प्रसमीक्ष्य युद्धे चचाल सर्वं सचराचरं जगत्। स्वस्ति जगत् स्यादृषयः प्रचक्रुस्तमुद्यतं प्रेक्ष्य महाहवेषु ॥ ४३ ॥ ततस्तु तं वै शरमप्रमेयं गाण्डीवधन्वा धनुषि व्ययोजयत्। युक्त्वा महास्त्रेण परेण चापं विकृष्य गाण्डीवमुवाच सत्वरम् ॥ ४४ ॥ अयं महास्त्रप्रतिमोऽस्तु मे शरः शरीरहृच्चासुहरश्च दुर्हृदः। तपोऽस्ति तप्तं गुरवश्च तोषिता मया यदीष्टं सुहृदां तथा श्रुतम् ॥ ४५ ॥ अनेन सत्येन निहन्त्वयं शरः सुसंशितः कर्णमरिं मयार्च्चितः। इत्यूचिवांस्तं प्रमुमोच वाणं धनञ्जयः कर्णवधाय घोरम् ॥ ४६ ॥ कृत्यामथर्वाङ्गिरसीमिवोग्रां दीप्तामसह्यां युधि मृत्युनापि। ब्रुवन् किरीटीत्यतिसंप्रहृष्टो ह्ययं शरो मे विजयावहोऽस्तु। जिघांसुरर्कैन्दुसमप्रभावः कर्णं मयास्तो नयतां यमाय ॥ ४७ ॥ तेनेषुवर्य्येण किरीटमाली प्रहृष्टरूपो विजयावहेन। जिघांसुरर्कैन्दुसमप्रभेण चक्रे विषक्तं रिपुमाततायी ॥ ४८ ॥ तथा विमुक्तो बलिनार्कतेजाः प्रज्वालयामास दिशो नभश्च ॥ ४९ ॥ ततोऽर्जुनस्तस्य शिरो जहार वज्रेण वृत्रस्य यथा महेन्द्रः। शरोत्तमेनाञ्जलिकेन राजंस्तदा महास्त्रप्रतिमन्त्रितेन ॥ ५० ॥ पार्थो पराह्ने शिर उच्चकर्त्त वैकर्त्तनस्याथ

महेन्द्रसूनुः । तत् प्राञ्जलिकेन छिन्नमथास्य कायो निपपात
पश्चात् ॥ ५१ ॥ तदुद्यतादित्यसमानवर्चसं शरन्नभोमध्यगभास्क-
रोपमम् । वराङ्गमुर्व्यामपतच्चमूपतेर्द्दिवाकरोऽस्तादिव रक्तमण्डलः
॥ ५२ ॥ तमस्य देहं सततं सुखोचितं सुरूपमत्यर्थमुदारकर्मणः ।
परेण कृच्छ्रेण शिरः समत्यजद्गृहं महर्द्धीव सुसङ्गमीश्वरः ॥ ५३ ॥
शरैर्वितुन्नं व्यसु तत् सुवर्च्चसः पपात कर्णस्य शरीरमुच्छ्रितम् ।
स्रवद्व्रणं गैरिकतोयविस्रवं गिरेर्यथा वज्रहतं शिरस्तथा ॥ ५४ ॥
देहात्तु कर्णस्य निपातितस्य तेजः सूर्य्यं खं वितत्याविवेश ।
तदद्भुतं सर्वमनुष्ययोधाः पश्यन्ति राजन्निहते स्म कर्णे ॥ ५५ ॥
ततः शङ्खान् पाण्डवा दध्मुरुच्चैर्दृष्ट्वा कर्णं पातितं फाल्गुनेन ।
तथैव कृष्णश्च धनञ्जयश्च हृष्टौ तदा दध्मतुराशु शङ्खौ ॥ ५६ ॥ तं
सोमकाः प्रेक्ष्य हतं शयानं प्रीता नादान् सह सैन्यैरकुर्वन् ।
तूर्य्याणि चाजघ्नुरतीव हृष्टा वासांसि चैवादुधुवुर्भुजांश्च । सं-
वर्द्धयन्तश्च नरेन्द्रयोधाः पार्थं समाजग्मुरतीव हृष्टाः ॥ ५७ ॥
बलान्वितास्त्वप्यपरे ह्यनृत्यन्नन्योऽन्यमाश्लिष्य नदन्त ऊचुः । दृष्ट्वा
तु कर्णं भुवि निष्टनन्तं कृतं तथा शायकेनातिभिन्नम् ॥ ५८ ॥
महानिलेनाद्रिमिवापविद्धं यज्ञावसानेऽग्निमिव प्रशान्तम् । रराज
कर्णस्य शिरो निकृत्तमस्तङ्गते भास्करस्येव बिम्बम् ॥ ५९ ॥ प्रताप्य
सेनामामित्रीं दीप्तैः शरगभस्तिभिः । बलिनार्जुनकालेन नीतो-
ऽस्तं कर्णभास्करः ॥ ६० ॥ अस्तं गच्छन् यथादित्यः प्रभामादाय
गच्छति । एवं जीवितमादाय कर्णस्येषुर्जगाम ह ॥ ६१ ॥ अप-
राह्णे पराह्णस्य सूतपुत्रस्य मारिष । छिन्नमञ्जलिकेनाजौ सोत्-
सेधमपतच्छिरः ॥ ६२ ॥ उपर्य्युपरि सैन्यानां तस्य शत्रोस्तद-
ञ्जसा । शिरः कर्णस्य सोत्सेधमिषुः सोऽपाहरद्द्रुतम् ॥ ६३ ॥
कर्णन्तु शूरं पतितं पृथिव्यां शराचितं शोणितदिग्धगात्रम् । दृष्ट्वा
शयानं भुवि मद्रराजश्छिन्नध्वजेनापययौ रथेन ॥ ६४ ॥ हते

कर्णे कुरवः प्राद्रवन्त भयार्दिता गाढ़विद्धाश्च संख्ये । अवेक्षमाणा मुहुरर्जुनस्य ध्वजं महान्तं वपुषा ज्वलन्तम् ॥ ६५ ॥ सहस्रनेत्रप्रतिमानकर्मणः सहस्रनेत्रप्रतिमाननं शुभम् । सहस्ररश्मिर्दिनसङ्क्षये तथा तथापतत् कर्णशिरो वसुन्धराम् ॥ ६६ ॥

इति कर्णपर्वणि कर्णवधे एकनवतोध्यायः ॥ ९१ ॥

---

सञ्जय उवाच । शल्यस्तु कर्णार्जुनयोर्विमर्दे बलानि दृष्ट्वा मृदितानि बाणैः । ययौ परीतो भृशमन्युनाशो रथेन संछिन्नपरिच्छदेन ॥ १ ॥ निपातितस्यन्दनवाजिनागं बलञ्च दृष्ट्वा हतसूतपुत्रम् । दुर्य्योधनोऽश्रुपरिपूर्णनेत्रो मुहुर्मुहुर्न्यश्वसदार्त्तरूपः ॥ २ ॥ कर्णन्तु शूरं पतितं पृथिव्यां शराचितं शोणितदिग्धगात्रम् । यदृच्छया सूर्य्यमिवावनिस्थं दिदृक्षवः संपरिवार्य्य तस्थुः ॥ ३ ॥ प्रहृष्टवित्रस्तविषण्णविस्मितास्तथापरे शोकपरायणाश्चवन् । परे त्वदीयाश्च परस्परं जना यथायथैषां प्रकृतिस्तथाभवन् ॥ ४ ॥ प्रविद्धवर्माभरणाम्बरायुधं धनञ्जयेनाभिहता महौजसम् । निशम्य कर्णं कुरवः प्रदुद्रुवुर्हतर्षभा गाव इवाकुलाकुलाः ॥ ५ ॥ भीमश्च भीमेन महास्वनेन नादं कृत्वा रोदसी कम्पयानः । आस्फोटयन् वल्गते नृत्यते च हते कर्णे त्रासयन् धार्त्तराष्ट्रान् ॥ ६ ॥ तथैव राजन् सोमकाः सृञ्जयाश्च शङ्खान् दध्मुः सस्वजुश्चापि सर्व्वे । परस्परं क्षत्रिया हृष्टरूपाः सूतात्मजे वै निहते तदानीम् ॥ ७ ॥ कृत्वा विमर्दं भृशमर्जुनेन कर्णो हतः केशरिणेव नागः । तीर्णा प्रतिज्ञा पुरुषर्षभेण वैरस्यान्तं गतवांश्चैव पार्थः ॥ ८ ॥ मद्राधिपश्चैव विमूढ़चेतास्तूर्णं रथेनापहृतध्वजेन । दुर्य्योधनस्यान्तिकमेत्य राजन् संभाष्य दुःखार्त्त उवाच वाक्यम् ॥ ९ ॥ विशीर्णनागाश्वरथप्रवीरं बलं त्वदीयं यमराष्ट्र-

कल्पम् । अन्योन्यमासाद्य हतैर्महद्भिर्नराश्वनागैर्गिरिकूटकल्पैः ॥ १० ॥ नैतादृशं भारत युद्धमासीद्यथाद्य कर्णार्जुनयोर्बभूव । ग्रस्तौ हि कर्णेन समेत्य कृष्णावन्ये च सर्वे तव शत्रवो ये ॥ ११ ॥ दैवन्तु यत्नात् स्ववशं प्रवृत्तं तत् पाण्डवान् पाति हिनस्ति चास्मान्। तवार्थसिद्ध्यर्थकरास्तु सर्वे प्रसह्य वीरा निहता द्विषद्भिः ॥ १२ ॥ कुवेरवैवस्वतवासवानां तुल्यप्रभावास्त्वपतेश्च वीराः । वीर्य्येण शौर्य्येण बलेन चैव तैस्तैश्च युक्ता विविधैर्गुणौघैः ॥ १३ ॥ अवध्यकल्पा निहता नरेन्द्रास्तवार्थकामा युधि पाण्डवेयैः। तन्माशुचो भारत दिष्टमेतत् पर्य्यायसिद्धिर्न सदास्ति सिद्धिः ॥ १४ ॥ एतद्वचो मद्रपतेर्निशम्य स्वं चापनीतं मनसा निरीक्ष्य। दुर्य्योधनो दीनमना विसंज्ञः पुनः पुनर्न्यश्वसदार्त्तरूपः ॥ १५ ॥

इति कर्णपर्व्वणि शल्यवाक्ये द्विनवतोऽध्याय ॥ ९२ ॥

---

धृतराष्ट्र उवाच । तस्मिंस्तु कर्णार्जुनयोर्विमर्द्दे दग्धस्य रौद्रेऽहनि विद्रुतस्य। बभूव रूपं कुरुसृञ्जयानां बलस्य बाणोन्मथितस्य कीदृक् ॥ १ ॥

सञ्जय उवाच। शृणु राजन्नवहितो यथा वृत्तो महाक्षयः। घोरो मनुष्यदेहानामाजौ नरवरक्षयः ॥ २ ॥ यत्तत् कर्णे हते पार्थः सिंहनादमथाकरोत्। तदा तव सुतान्राजन्नाविवेश महद्भयम् ॥ ३ ॥ न सन्धातुमनीकानि न च वाथ पराक्रमे। आसीद्बुद्धिर्हते कर्णे तव योधस्य कस्यचित् ॥ ४ ॥ वणिजो नावि भिन्नायामगाधे ह्यप्लवा यथा। अपारे पारमिच्छन्तो हते द्वीपे किरीटिना ॥ ५ ॥ सूतपुत्रे हते राजन् वित्रस्ताः शरविक्षताः। अनाथा नाथमिच्छन्तो नागाः सिंहैरिवार्द्दिताः ॥ ६ ॥ भग्नशृङ्गा इव वृषा भग्नदंष्ट्रा इवोरगाः। प्रत्यपायाम सायाह्ने निर्ज्जिताः

सव्यसाचिना ॥ ७ ॥ हतप्रवीरा विध्वस्ता निकृत्ता निशितैः शरैः। सूतपुत्रे हते राजन् पुत्रास्ते प्राद्रवन् भयात् ॥ ८ ॥ विशस्त्रकवचाः सर्वे कान्दिशीका विचेतसः। अन्योऽन्यमवमृद्नन्तो वीक्ष्यमाणा भयार्दिताः ॥ ९ ॥ मामेव नूनं बीभत्सुर्मामेव च वृकोदरः। अभियातीति मन्वानाः पेतुर्मम्लुश्च सम्भ्रमात् ॥ १० ॥ हयानन्ये रथानन्ये गजानन्ये महारथाः। आरुह्य जवसम्पन्नाः पादाता प्राद्रवन् भयात् ॥ ११ ॥ कुञ्जरैः स्यन्दनाः क्षुण्णाः सादिनश्च महारथैः। पदातिसङ्घाश्चाश्वौघैः पलायद्भिर्भयार्दिताः ॥१२॥ व्यालतस्करसङ्कीर्णे सार्थहीना यथा वने। तथा त्वदीया निहते सूतपुत्रे तदाभवन् ॥ १३ ॥ हतारोहास्तदा नागाश्छिन्नहस्तास्तथा नराः। सर्वं पार्थमयं लोकं संपश्यन्तो भयातुराः ॥ १४ ॥ तान् प्रेक्ष्य द्रवतः सर्वान् भीमसेनभयार्दितान्। तान् दृष्ट्वा विद्रुतान् सर्वान् योधांस्तव सहस्रशः। दुर्योधनोऽथ स्वं सूतं वाहेत्युक्त्वेदमब्रवीत् ॥ १५ ॥

दुर्योधन उवाच। नातिक्रमिष्यते पार्थो धनुष्पाणिर्व्यवस्थितः। जघने सर्वसैन्यानां शनैरश्वान् प्रचोदय ॥ १६ ॥ जघने युध्यमानं हि कौन्तेयो मां न संशयः। नोत्सहेत व्यतिक्रान्तुं वेलामिव महोदधिः ॥ १७ ॥ अद्यार्जुनं सगोविन्दं मानिनञ्च वृकोदरम्। निहत्य शिष्टान् शत्रूंश्च कर्णस्यानृण्यमाप्नुयाम् ॥ १८ ॥ तत् श्रुत्वा कुरुराजस्य शूरार्य्यसदृशं वचः। सूतो हेमपरिच्छन्नान् शनैरश्वानचोदयत् ॥ १९ ॥ रथाश्वगजहीनास्तु पादातास्तव मारिष। पञ्चविंशतिसाहस्रा युद्धायैव व्यवस्थिताः ॥ २० ॥ तान् भीमसेनः संक्रुद्धो धृष्टद्युम्नश्च पार्षतः। बलेन चतुरङ्गेन संवृत्याजघ्नतुः शरैः ॥ २१ ॥ प्रत्ययुध्यन्त ते सर्वे भीमसेनं सपार्षतम्। पार्थपार्षतयोश्चान्ये जगृहुस्तत्र नामनी ॥ २२ ॥ अक्रुध्यत तदा भीमस्तै रणे प्रत्युपस्थितैः। सोऽवतीर्य्य रथात्तूर्णं गदापाणिरयुध्यत ॥२३॥

न तान्रथस्थो भूमिष्ठान् धर्मापेक्षी वृकोदरः। योधयामास कौन्तेयो भुजवीर्य्यसमाश्रितः ॥ २४ ॥ जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम्। अवधीत्तावकान् सर्वान् दण्डपाणिरिवान्तकः ॥ २५ ॥ पदातिनोऽपि संरब्धास्त्यक्त्वा जीवितमात्मनः। भीममभ्यद्रवन् सङ्ख्ये पतङ्गा इव पावकम् ॥ २६ ॥ आसाद्य भीमसेनन्तु संरब्धा युद्धदुर्मदाः। विनेशुः सहसा दृष्ट्वा भूतग्रामा इवान्तकम् ॥ २७ ॥ श्येनवद्विचरन् भीमो गदाहस्तो महाबलः। पञ्चविंशतिसाहस्रांस्तावकानामपोथयत् ॥ २८ ॥ हत्वा तत् पुरुषानीकं भीमः सत्यपराक्रमः। धृष्टद्युम्नं पुरस्कृत्य पुनस्तस्थौ महाबलः ॥ २९ ॥ धनञ्जयो रथानीकमभ्यवर्त्तत वीर्य्यवान् ॥ ३० ॥ माद्रीपुत्रौ तु शकुनिं सात्यकिश्च महारथः। जवेनाभ्यपतन् हृष्टा निघ्नन्तः सौबलं बलम् ॥ ३१ ॥ तस्याश्वांश्च गतानाजौ विनिहत्य शितैः शरैः। तमभ्यधावंस्त्वरितास्ततो युद्धमभूत्तदा ॥ ३२ ॥ धनञ्जयोऽपि चाभ्येत्य रथानीकं तव प्रभो। विश्रुतं त्रिषु लोकेषु व्याक्षिपत् गाण्डिवं धनुः ॥ ३३ ॥ कृष्णसारथिमायान्तं दृष्ट्वा श्वेतहयं रथम्। अर्जुनञ्चापि योद्धारं त्वदीयाः प्राद्रवन् भयात् ॥ ३४ ॥ विप्रहीणरथाश्चैव शरैश्च परिकर्षिताः। पञ्चविंशतिसाहस्राः कालमार्च्छन् पदातयः ॥ ३५ ॥ हत्वा तान् पुरुषव्याघ्रः पाञ्चालानां महारथः। पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महामनाः ॥ ३६ ॥ भीमसेनं पुरस्कृत्य नचिरात् प्रत्यदृश्यत। महाधनुर्द्धरः श्रीमानमित्रगणसूदनः ॥ ३७ ॥ पारावतसवर्णाश्वं कोविदारमहाध्वजम्। धृष्टद्युम्नरथं दृष्ट्वा प्राद्रवन्त भयाद्भृशम् ॥ ३८ ॥ गान्धारराजं शीघ्रास्त्रमनुसृत्य यशस्विनौ। नचिरात् प्रत्यदृश्येतां माद्रीपुत्रौससात्यकी ॥ ३९ ॥ चेकितानः शिखण्डी च द्रौपदेयाश्च मारिष। हत्वा त्वदीयं सुमहत् सैन्यं शङ्खानथाधमन् ॥ ४० ॥ ते सर्व्वे तावकान् प्रेक्ष्य द्रुततोऽपि पराङ्मुखान्।

अभ्यवर्त्तन्त संरब्धान् वृषान् जित्वा यथा वृषाः ॥ ४१ ॥ सेनाव-
शेषं तं दृष्ट्वा सैन्यस्य पाण्डवः। व्यवस्थितं सव्यसाची चुक्रोध
बलवान्नृप ॥ ४२ ॥ धनञ्जयो रथानीकमभ्यवर्त्तत वीर्य्यवान्।
विश्रुतं त्रिषु लोकेषु व्याक्षिपन् गाण्डिवं धनुः ॥ ४३ ॥ तत एनं
शरव्रातैः सहसा समवाकिरत्। रजसा चोद्धृतेनाथ न स्म किञ्चि-
दप्रदृश्यत ॥ ४४ ॥ अन्धकारीकृते लोके रजोभूते महीतले। दिशः
सर्वा महाराज तावकाः प्राद्रवन् भयात् ॥ ४५ ॥ भज्यमानेषु
सैन्येषु कुरुराजे विशाम्पते। परानभिमुखांश्चैव सूतस्ते समुपा-
द्रवत्॥ ४६ ॥ ततो दुर्य्योधन सर्वानाजुहावाथ पाण्डवान्। युद्धाय
भरतश्रेष्ठ देवानिव पुरा बलिः ॥ ४७ ॥ त एनमभिवर्त्तन्त सहिताः
समुपाद्रवन्। नानाशस्त्रसृजः सर्वे भर्त्सयन्तो मुहुर्मुहुः ॥ ४८ ॥
दुर्य्योधनस्त्वसंभ्रान्तस्तानरीन्निशितैः शरैः। तत्रावधीत्ततः क्रुद्धः
शतशोऽथ सहस्रशः ॥ ४९ ॥ तत्राद्भुतमपश्याम तव पुत्रस्य पौरु-
षम्। यदेकः सहितान् सर्वान् रणेऽयुद्धत पाण्डवान् ॥ ५० ॥
नातिदूरापयातन्तु कृतबुद्धिं पलायने। दुर्य्योधनः स्वकं सैन्य-
मपश्यच्छरविक्षतम् ॥ ५१ ॥ ततोऽवस्थाप्य राजेन्द्र कृतबुद्धिस्तवा-
त्मजः। हर्षयन्निव तान् योधानिदं वचनमब्रवीत् ॥ ५२ ॥ न
तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च। यत्र यातान् न वो हन्युः
पाण्डवाः किं सृतेन वः ॥ ५३ ॥ अल्पञ्च बलमेतेषां कृष्णौ च
भृशविक्षतौ। यदि सर्वेऽवतिष्ठामो ध्रुवं नो विजयो भवेत् ॥ ५४ ॥
विप्रयातांस्तु नो भिन्नान् पाण्डवाः कृतकिल्विषान्। अनुसृत्य
वधिष्यन्ति श्रेयान्नः समरे वधः ॥ ५५ ॥ सुखः सांग्रामिको मृत्युः
क्षत्रधर्मेण युध्यताम्। मृतो दुःखं न जानीते प्रेत्य चानन्त्यमश्नुते
॥ ५६ ॥ शृणुध्वं क्षत्रियाः सर्वे यावन्तः स्थ समागताः। यदा
शूरञ्च भीरुञ्च मारयत्यन्तको यमः। को तु मूढ़ो न युध्येत मादृशः
क्षत्रियव्रतः ॥ ५७ ॥ द्विषतो भीमसेनस्य क्रुद्धस्य वशमेष्यथ।

पितामहैराचरितं न धर्मं हातुमर्हथ ॥ ५८ ॥ न हि धर्मोऽस्ति पापीयान् क्षत्रियस्य पलायने । न युद्धधर्माच्छ्रेयोऽन्यः पन्थाः स्वर्गस्य कौरवाः । अचिरेण हता लोकं सर्वे योधाः समश्नुतः ॥५९॥

सञ्जय उवाच । एवं ब्रुवति ते पुत्रे सैनिका भृशविक्षताः । अनवेक्ष्यैव तद्वाक्यं प्राद्रवन् सर्वतोमुखम् ॥ ६० ॥

इति कर्णपर्वणि कौरवसैन्यपलायने त्रिनवतोऽध्यायः ॥ ९३ ॥

---

सञ्जय उवाच । दृष्ट्वा तु सैन्यं विनिवर्त्तमानं पुत्रेण ते मद्रपतिस्तदानीम् । सन्त्रस्तरूपः परिमूढचेता दुर्य्योधनं वाक्यमिदं बभाषे ॥ १ ॥

शल्य उवाच । पश्येदमुग्रं नरवाजिनागैरायोधनं वीर हतैः सुपूर्णम् । महीधराभैः पतितैर्महागजैः सकृत् प्रभिन्नैः शरभिन्नमर्मभिः ॥२॥ तैर्विह्वलद्भिश्च समन्ततो वै प्रध्वस्तवर्मायुधयोधमुख्यैः । वज्रापविद्धैरिव चाचलेन्द्रैर्विभिन्नपाषाणमहाद्रुमौषधैः॥३॥ प्रविद्धघण्टाङ्कुशतोमरध्वजैः सहेमजालैरुधिरौघसंप्लुतैः । शरावभिन्नैः पतितैश्च वाजिभिः श्वसद्भिरार्त्तैः क्षतजं वमद्भिः ॥४॥ दीनं स्तनद्भिः परिवृत्तनेत्रैर्महीं दशद्भिः कृपणं नदद्भिः । तथापविद्धैर्गजवाजियोधैर्वलापविद्धैरथवीरसङ्घैः ॥ ५ ॥ मन्दासुभिश्चैव गतासुभिश्च नराश्वनागैश्च रथैश्च मर्द्दितैः । मही महावैतरणीव दुर्दृशा गजैर्निकृत्तैर्यतहस्तगात्रैः ॥ ६ ॥ उद्वेपमानैः पतितैः पृथिव्यां विशीर्णदन्तैः क्षतजं वमद्भिः । स्फुरद्भिरार्त्तैः करुणं रणाजिरे नयोधवर्मायुधपादगोप्तृभिः । प्रकीर्णतूणीरपताककेतुभिः सुवर्णजालावततैर्भृशाहतैः ॥ ७ ॥ मही बभौ य्योज्वलदैरिवावृता यशस्विभिर्नागरथाश्वयोधिभिः । पदातिभिश्चाभिमुखैर्हतैः परैर्विशीर्णवर्माभरणाम्बरायुधैः ॥ ८ ॥ शरप्रहाराभिहतैर्महावलै-

रवेच्यमाणैः पतितैः सहस्रशः। प्रनष्टसंज्ञैः पुनरुच्छ्वसद्भिर्मही
बभूवानुगतैरिवाग्निभिः॥ ९॥ कर्णार्जुनाभ्यां शरभिन्नगात्रैर्हतैः
प्रवीरैः कुरुसृञ्जयनाम्। दिव्यस्रुतैर्भूरतिदीप्तिमद्भिर्नक्तं ग्रहै-
र्द्यौरमलैश्च दीप्तैः॥ १०॥ शराश्च कर्णार्जुनबाहुतुन्ना विदार्य्य
नागाश्वमनुष्यदेहान्। प्राणान्निरस्याशु महीं व्यतीयुर्महोरगा
वासमिवातिताम्राः॥ ११॥ हतैर्मनुष्याश्वगजैरसङ्खैः शराव-
भिन्नैश्च रथैर्बभूव। धनञ्जयस्याधिरथेश्च मार्गणैर्जैरगम्या
वसुधातिदुर्गमा॥१२॥ रथैर्वरेषून्मथितैः सयोधैः संस्यूतसूताश्व-
वरायुधध्वजैः। विशीर्णशस्त्रैर्विनिकृत्तकन्धरैर्निकृत्तचक्राचयुगत्रि-
वेणुभिः॥ १३॥ विमुक्तचक्रैर्विहतैरुपस्करैः कृतानुकर्षैर्विनिषङ्ग-
बन्धनैः। प्रभग्ननीड़ैर्मणिहेममण्डितैः स्तृता मही द्यौरिव शारदै-
र्घनैः॥ १४॥ विकृष्यमाणैर्ज्ववनैस्तुरङ्गैर्हतेश्वरै राजरथैः सुक-
ल्पितैः। मनुष्यमातङ्गरथाश्वराशिभिर्द्रुतं व्रजन्तो बहुधा विचू-
र्णिताः॥ १५॥ सहेमपट्टाः परिघाः परश्वधाः शिताश्च शूला
मुषलानि पट्टिशः। पेतुश्च खड़्गा विमला विकोषा गजाश्च
जाम्बूनदपट्टनद्धाः॥ १६॥ चापानि रुक्माङ्गदभूषणानि शराश्च
कार्त्तस्वरचित्रपुङ्खाः। ऋष्टाश्च पीता विमला विकोषाः प्रासाः
सखड़्गाः कनकावभासाः॥ १७॥ छत्राणि वालव्यजनानि शङ्खा
भुजाश्च पुष्पोत्तमहेमभूषिताः। कुथाः पताका रथवेष्टनानि किरीट
माला मुकुटाश्च शुभ्राः॥ १८॥ प्रकीर्णका विप्रकीर्णाश्च राजन्
प्रवालमुक्तातरलाश्च हाराः। आपीड़केयूरवराङ्गदानि ग्रैवेय-
निष्काश्च सुवर्णसूत्राः॥ १९॥ मण्युत्तमा वज्र सुवर्णमुक्ता रत्नानि
चोच्चावचमङ्गलानि। गात्राणि चात्यन्तसुखोचितानि शिरांसि
चेन्दुप्रतिमाननानि॥ २०॥ देहांश्च भोगांश्च परिच्छदांश्च त्यक्त्वा
मनोज्ञानि सुखानि चापि। स्वधर्मनिष्ठां महतीमवाप्य चाप्याशु
लोकान् यशसा गतास्ते॥ २१॥ निवर्त्त दुर्य्योधन यान्तु सैनिका

व्रजस्व राजन् शिविराय मानद । दिवाकरो ह्येष विलम्बते प्रभो पुनस्त्वमेवात्र नरेन्द्र कारणम् ॥ २२ ॥ इत्येवमुक्त्वा विरराम शल्यो दुर्य्योधनं शोकपरीतचेताः । हा कर्ण हा कर्ण इति ब्रुवाणमार्त्तं विसंज्ञं भृशमश्रुनेत्रम् ॥ २३ ॥ तं द्रोणपुत्रप्रमुखा नरेन्द्रा सर्व्वे समाश्वास्य मुहुः प्रयान्ति । निरीक्षमाणा मुहुरर्ज्जुनस्य ध्वजं महान्तं यशसा ज्वलन्तम् ॥ २४ ॥ नराश्वनातङ्गशरीरजेन रक्तेन सिक्ताञ्च तथैव भूमिम् । रक्ताम्बरस्रक्तपनीययोगान्नारीं प्रकाशामिव सर्व्वगम्याम् ॥ २५ ॥ प्रच्छन्नरूपा रुधिरेण राजन् रौद्रे मुहूर्त्तेऽतिविराजमाने । नैवावतस्थुः कुरवः समीक्ष्य प्रव्राजिता देवलोकाय सर्व्वे ॥ २६ ॥ वधेन कर्णस्य च दुःखितास्ते हा कर्ण हा कर्ण इति ब्रुवाणाः । द्रुतं प्रयाताः शिविराणि राजन् दिवाकरं रक्तमवेक्षमाणाः ॥ २७ ॥ गाण्डीवमुक्तैश्च सुवर्णपुङ्खैः शिलाशितैः शोणितदिग्धवाजैः । शरैश्चिताङ्गो भुवि भाति कर्णो हतोऽपि सन् सूर्य्य इवांशुमाली ॥ २८ ॥ कर्णस्य देहं रुधिरावसिक्तं भक्तानुकम्पी भगवान् विवस्वान् । स्पृष्ट्वांशुभिर्लोहितरक्तरूपः सिस्नासुरभ्येति परं समुद्रम् ॥ २९ ॥ इतीव सञ्चिन्त्य सुरर्षिसङ्घाः संप्रस्थिता यान्ति यथानिकेतम् । सञ्चिन्तयित्वा जनता विसस्रुर्यथासुखं खञ्च महीतलञ्च ॥ ३० ॥ तदद्भुतं प्राणभृतां भयङ्करं निशम्य युद्धं कुरुवीरमुख्याः । धनञ्जयस्याधिरथेश्च विस्मिताः प्रशंसमानाः प्रययुस्तदा जनाः ॥ ३१ ॥ शरैः संकृत्तवर्माणं वीरं विशसने हतम् । गतासुमपि राधेयं न लक्ष्मीः प्रतिमुञ्चति ॥ ३२॥ निष्टप्तहेमवपुषं ज्वलनार्कसमप्रभम् । जीवन्तमिव शूरञ्च सर्व्वभूतानि मेनिरे ॥ ३३ ॥ हतस्यापि महाराज सूतपुत्रस्य संयुगे । वित्रेसुः सर्व्वतो योधाः सिंहस्येवेतरे मृगाः ॥ ३४ ॥ हतोऽपि पुरुषव्याघ्रो व्याहरन्निव दृश्यते । नाभवद्विकृतं किञ्चित् मृतस्यापि महात्मनः ॥ ३५ ॥ चारुवेशधरं राजन् चारु-

मौलिशिरोधरम्। तन्मुखं सूतपुत्रस्य पूर्णचन्द्रसमद्युति ॥ ३६ ॥
नानाभरणवान्राजंस्तप्तजाम्बुनदाङ्गदः। हतो वैकर्त्तनः शेते पादपोऽङ्कुरवानिव ॥ ३७ ॥ कनकोत्तमसङ्काशो ज्वलन्निव विभावसुः।
स शान्तः पुरुषव्याघ्रः पार्थसायकवारिणा ॥ ३८ ॥ यथा हि
ज्वलनो दीप्तो जलमासाद्य शाम्यति। कर्णाग्निः शमितस्तद्वत्
पार्थमेघेन संयुगे ॥ ३९ ॥ प्रगृह्य च यशो दीप्तं सुयुद्धेनात्मनो
भुवि। विसृज्य शरवर्षाणि प्रताप्य च दिशो दश। सपुत्रः पुरुषव्याघ्रः संशान्तः पार्थतेजसा ॥ ४० ॥ प्रताप्य पाण्डवान्राजन् पाञ्चालान् स्वतेजसा। वर्षित्वा शरवर्षेण प्रताप्य रिपुवाहिनीम् ॥४१॥
श्रीमानिव सहस्रांशुर्जगत् सर्वं प्रताप्य च। हतो वैकर्त्तनः कर्णः
सपुत्रः सहवाहनः ॥ ४२ ॥ अर्थिनां पक्षिसङ्घस्य कल्पवृक्षो
निपातितः। ददानीत्येव योऽवोचन्न नास्तीत्यर्थितोऽर्थिभिः ॥४३॥
सद्भिः सदा सत्पुरुष स हतो द्वैरथे वृषः। यस्य ब्राह्मणसात्
सर्वं वित्तमासीन्महात्मनः। नादेयं ब्राह्मणेष्वासीद्यस्य स्वमपि
जीवितम् ॥ ४४ ॥ सदा नृणां प्रियो दाता प्रियदानोऽप्रियं गतः।
स पार्थास्त्रविनिर्दग्धो गतः परमिकां गतिम् ॥ ४५ ॥ यमाश्रित्याकरोद्वैरं सुतस्ते स गतो दिवम्। आदाय तव पुत्राणां जयाशां
शर्म वर्म च ॥ ४६ ॥ हते कर्णे सरितो न प्रसस्रुर्जगाम चास्तं
कलुषो दिवाकरः। ग्रहश्च तिर्यग्ज्वलितार्कवर्णः सोमस्य पुत्रोऽभ्युदियाय तिर्य्यक् ॥ ४७ ॥ नभः पफालाथ चचाल चोर्वी ववुश्च
वाताः परुषा सुघोराः। दिशः सधूमाश्च भृशं प्रजज्वलुर्महार्णवाश्चुक्षुभिरे च सस्वनाः ॥ ४८ ॥ सकाननाश्चाद्रिचया विदद्रुर्व्यविव्यथुर्भूतगणाश्च मारिष। बृहस्पती रोहिणीं संप्रपीड्य बभूव
चन्द्रार्कसमानवर्णः ॥ ४९ ॥ हतेऽपि कर्णे विदिशोऽपि जज्वलुस्तमोवृता द्यौर्विचचाल भूमिः। पपात चोल्का ज्वलनप्रकाशा
निशाचराश्चाप्यभवन् प्रहृष्टाः ॥ ५० ॥ शशिप्रकाशाननमर्जुनो यदा

क्षुरेण कर्णस्य शिरो न्यपातयत् । तदान्तरीक्षे दिवि चेह राजन् बभूव हाहेति जनस्य निस्वनः ॥ ५१ ॥ स देवगन्धर्वमनुष्यपूजितो निहत्य कर्णं रिपुमाहवेऽर्जुनः । रराज पार्थः परमेण तेजसा वृत्रं निहत्येव सहस्रलोचनः ॥ ५२ ॥ ततो रथेनाम्बुदवृन्दनादिना शरन्नभोमध्यगभास्करत्विषा । पताकिना भीमनिनादकेतुना हिमेन्दुशङ्खस्फटिकावभासिना ॥ ५३ ॥ महेन्द्रवाहप्रतिमेन तावुभौ महेन्द्रवीर्य्यप्रतिमानपौरुषौ । सुवर्णमुक्तामणिवज्रविद्रुमैरलंकृतावप्रतिमेन रंहसा ॥ ५४ ॥ नरोत्तमौ पाण्डवकेशिमर्द्दनौ तदाहिताबग्निदिवाकरोपमौ । रणाजिरे वीतभयौ विरेजतुः समानयानाविव विष्णुवासवौ ॥ ५५ ॥ ततो धनुर्ज्यातलघातनिस्वनैः प्रसह्य कृत्वा च रिपुं हतप्रभम् । ससाधयित्वैव कुरून् शरौघैः कपिध्वजः पक्षिवरध्वजश्च ॥ ५६ ॥ हृष्टौ ततस्तावमितप्रभावौ मनांस्यरीणामवदारयन्तौ । सुवर्णजालावततौ महाध्वनौ हिमावदातौ परिगृह्य पाणिभिः । चुचुम्बतुः शङ्खवरौ नृणांवरौ वराननाभ्यां युगपच्च दध्मतुः ॥ ५७ ॥ पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः । पृथिवीञ्चान्तरीक्षञ्च दिवञ्च समपूरयत् ॥ ५८ ॥ वित्रस्ताश्चाभवन् सर्व्वे कुरवो राजसत्तम । शङ्खशब्देन शूरस्य माधवस्यार्जुनस्य च ॥ ५९ ॥ तौ शङ्खशब्देन निनादयन्तौ वनानि शैलान् सरितो दिशश्च । वित्रासयन्तौ तव पुत्रसेनां युधिष्ठिरं नन्दयतां वरिष्ठौ ॥ ६० ॥ ततः प्रयाताः कुरवो जवेन श्रुत्वैव शङ्खस्वनमीर्य्यमाणम् । विहाय मद्राधिपतिं पतिञ्च दुर्य्योधनं भारत भारतानाम् ॥ ६१ ॥ महाहवे तं बहुशोभमानं धनञ्जयं भूतगणाः समेताः । तदान्वमोदन्त जनार्द्दनञ्च प्रभाकरावभ्युदितौ यथैव ॥ ६२ ॥ समाचितौ कर्णशरैः परन्तपावुभौ व्यभातां समरेऽच्युतार्जुनौ । तमो विहत्याभ्युदितौ यथामलौ शशाङ्कसूर्य्याविव रश्मिमालिनौ ॥ ६३ ॥ विहाय तान् बाणगणानथागतौ सुहृ-

हतावप्रतिमानविक्रमौ। सुखं प्रविष्टौ शिविरं स्वमीश्वरौ सदस्य-
मिन्द्राविव वासवाच्युतौ ॥ ६४ ॥ तौ देवगन्धर्वमनुष्यचारणैर्मह-
र्षिभिर्यक्षमहोरगैरपि । जयाभिवृद्ध्या परयाभिपूजितौ हते तु
कर्णे परमाहवे तदा ॥ ६५ ॥ यथोऽभिरूपं प्रतिगृह्य तानथ
प्रशस्यमानावतुलैश्च कर्मभिः। ननन्दतुस्तौ ससुहृद्गणौ तदा बलिं
नियम्येव सुरेशकेशवौ ॥ ६६ ॥

इति कर्णपर्वणि शिविरप्रवेशे चतुर्नवतोध्यायः ॥ ९४ ॥

---

सञ्जय उवाच। हते वैकर्त्तने कर्णे कुरवो भयपीड़िताः।
वीक्षमाणा दिशः सर्वाः पलायन्ते स्म सर्वतः॥ १ ॥ वीरं तु
निहतं श्रुत्वा शत्रुभिः परमाहवे। सर्वे दिशोऽन्वकीर्यन्त तावका
भयमोहिताः॥ २ ॥ ततोऽवहारं चक्रुस्ते राजन् योधाः सम-
न्ततः। वार्य्यमाणा भयोद्विग्नास्तव पुत्रेण भारत॥ ३ ॥ तेषान्तु
मतमाज्ञाय पुत्रस्ते भरतर्षभ। अवहारं ततश्चक्रे शल्यस्यानुमते
नृप॥ ४॥ योधैर्महारथैः सार्द्धं वृतो भारत तावकैः। हता-
वशेषैस्त्वरितः शिबिरायैव दुद्रुवे ॥ ५॥ गान्धाराणां सहस्रेण
शकुनिः परिवारितः। हतमाधिरथिं दृष्ट्वा शिविरायैव दुद्रुवे॥ ६॥
कृपः शारद्वतो राजन् नागानीकेन संवृतः। महता मेघकल्पेन
शिविरायैव दुद्रुवे ॥ ७ ॥ अश्वत्थामा ततः शूरो विनिश्वस्य
मुहुर्मुहुः। पाण्डवानां जयं दृष्ट्वा शिविरायैव दुद्रुवे ॥ ८ ॥
संशप्तकावशेषेण वलेन महता वृतः। सुशर्मापि ययौ राजन्
वीक्षमाणो भयातुरान् ॥ ९ ॥ दुर्य्योधनस्तु नृपतिर्हतसर्वस्व
आतुरः। ययौ शोकसमाविष्टश्चिन्तयन् विमना वहु॥ १०॥ हीन-
ध्वजेन शल्यस्तु रथेन रथिनाम्वरः। प्रययौ शिविरायैव वीक्ष-
माणो दिशो दश॥ ११ ॥ ततोऽपरे सुवहवो भारतानां महा-

रथाः । प्राद्रवन्त भयत्रस्ता ह्रियाविष्टा विचेतसः ॥ १२ ॥ अश्रु-कण्ठा भयोद्विग्ना वेपमाना भयातुराः । कुरवः प्रद्रुताः सर्व्वे दृष्ट्वा कर्णं निपातितम् ॥ १३ ॥ प्रशंसन्तोऽर्जुनं केचित् केचित् कर्णं महारथाः । व्यद्रवन्त दिशो भीताः कुरवः कुरुसत्तम ॥ १४ ॥ तेषां योधसहस्राणां तावकानां महामृधे । नासीत्तत्र पुमान् कश्चिद्योद्धुं यो मन आदधे ॥ १५ ॥ हते कर्णे महाराज निराशाः कुरवोऽभवन् । जीवितेष्वथ राज्येषु दारेषु च धनेषु च ॥ १६ ॥ तान् समानीय पुत्रस्ते यत्नेन महता प्रभो । निवेशाय मनो दध्रे दुःखशोकसमन्वितः ॥ १७ ॥ तस्याज्ञां शिरसा तेऽपि प्रतिगृह्य विशाम्पते । विवर्णवदना दीना न्यवर्त्तन्त महारथाः ॥ १८ ॥

इति कर्णपर्व्वणि कौरवपलायने पञ्चनवतोऽध्याय ॥ ९५ ॥

---

सञ्जय उवाच । तथा निपातिते कर्णे तव सैन्ये च विद्रुते । आश्लिष्य पार्थं दाशार्हो हर्षाद्वचनमब्रवीत् ॥ १ ॥ हतो वज्रभृता वृत्रस्त्वया कर्णो निपातितः । वधं वै वृत्रकर्णाभ्यां कथयिष्यन्ति मानवाः ॥ २ ॥ वज्रेण निहतो वृत्रः संयुगे भूरितेजसा । त्वया तु निहतः कर्णो धनुषा निशितैः शरैः ॥ ३ ॥ तमिमं विक्रमं लोके प्रथितन्ते यशस्करम् । निवेदय त्वं कौन्तेय धर्मराजाय भारत ॥ ४ ॥ वधं कर्णस्य संग्रामे दीर्घकालचिकीर्षितम् । निवेद्य धर्मराजाय त्वमानृण्यं गमिष्यसि ॥ ५ ॥ वर्त्तमाने तु युद्धे वै तव कर्णस्य चोभयोः । द्रष्टुमायोधनं पूर्व्वमागतो धर्मनन्दनः ॥ ६ ॥ सुभृशं गाढ़विद्धत्वान्न शक्तः स्थातुमाहवे । ततः स्वशिविरं यातः स राजा पुरुषर्षभः ॥ ७ ॥ तथेत्युक्तः केशवस्तु पार्थेन यदुपुङ्गव । पर्य्यावर्त्तयदव्यग्रो रथं रथवरस्य तम् ॥ ८ ॥ एवमुक्त्वार्जुनं कृष्णः सैनिकानिदमब्रवीत् । परानभिमुखा यत्तास्तिष्ठध्वं भद्रमस्तु वः

॥ ९ ॥ धृष्टद्युम्नं युधामन्युं माद्रीपुत्रौ वृकोदरम् । युयुधानञ्च
गोविन्द इदं वचनमब्रवीत् ॥ १० ॥ यावदावेद्यतां राज्ञे हतः
कर्णोऽर्जुनेन वै । तावद्भवद्भिर्यत्तैस्तु भवितव्यं नराधिपैः ॥११॥
स तैः शूरैरनुज्ञातो ययौ राजनिवेशनम् । पार्थमादाय गोविन्दो
ददर्श च युधिष्ठिरम् ॥ १२ ॥ शयानं राजशार्दूलं काञ्चने शय-
नोत्तमे । अगृह्णीताञ्च मुदितौ चरणौ पार्थिवस्य तौ ॥ १३ ॥
तयोः प्रहर्षमालोक्य प्रहारांश्चातिमानुषान् । राधेयं निहतं मत्वा
समुत्तस्थौ युधिष्ठिरः ॥ १४ ॥ समुत्थाय महाबाहुः पुनः पुन-
ररिन्दमः । वासुदेवार्जुनौ प्रेम्णा पुनश्च परिषस्वजे । वासुदेवञ्च
वार्ष्णेयं पप्रच्छ कुरुनन्दनः ॥ १५ ॥ ततोऽस्मै तद्यथावृत्तं वासु-
देवः प्रियम्वदः । कथयामास कर्णस्य निधनं यदुनन्दनः ॥ १६ ॥
ईषदुत्स्मयमानस्तु कृष्णो राजानमब्रवीत् । युधिष्ठिरं हतामित्रं
कृताञ्जलिरथाच्युतः ॥ १७ ॥ दिष्ट्या गाण्डीवधन्वा च पाण्डवश्च
वृकोदरः । त्वञ्चापि कुशली राजा माद्रीपुत्रौ च पाण्डवौ ।
मुक्ता वीरक्षयादस्मात् संग्रामाल्लोमहर्षणात् ॥ १८ ॥ क्षिप्रमुत्तर-
कालानि कुरु कार्य्याणि पाण्डव । हतो वैकर्त्तनः सूतपुत्रो
महाबलः । दिष्ट्या जयसि राजेन्द्र दिष्ट्या वर्द्धसि पाण्डव ॥ १९ ॥
यस्तु द्यूतजितां कृष्णां प्राहसत् पुरुषाधमः । तस्याद्य सूतपुत्रस्य
भूमिः पिबति शोणितम् ॥ २० ॥ शेतेऽसौ शरपूर्णाङ्गः शत्रुस्ते
कुरुपुङ्गव । तं पश्य पुरुषव्याघ्रं विभिन्नं बहुधा शरैः ॥ २१ ॥
हतामित्रामिमामुर्वीमनुशाधि महाभुज । यत्तो भूत्वा सहा-
स्माभिर्भुङ्क्ष्व भोगांश्च पुष्कलान् ॥ २२ ॥

सञ्जय उवाच । इति श्रुत्वा वचस्तस्य केशवस्य महात्मनः ।
युधिष्ठिरस्तु दाशार्हं प्रहृष्टः प्रत्यपूजयत् । दिष्ट्या दिष्ट्येति
राजेन्द्र वाक्यं चेदमुवाच ह ॥ २३ ॥ नैतच्चित्रं महाबाहो त्वयि
देवकिनन्दन । त्वया सारथिना पार्थो यत् कुर्य्यादप्यमानुषम् ॥२४॥

प्रगृह्य च कुरुश्रेष्ठः साङ्गदं दक्षिणं भुजम् । उवाच धर्मभृत् पार्थ उभौ तौ केशवार्जुनौ ॥ २५ ॥ नरनारायणौ देवौ कथितौ नारदेन मे । धर्मसंरक्षणे युक्तौ पुराणवृषिसत्तमौ ॥ २६ ॥ असकृच्चापि मेधावी कृष्णद्वैपायनो मम । कथामेतां महाभागो दिव्यामकथयत् प्रभुः ॥ २७ ॥ तव कृष्ण प्रभावेन पाण्डवोऽयं धनञ्जयः । जिगायाभिमुखः शत्रून्न चासीद्विमुखः क्वचित् ॥ २८ ॥ जयश्चैव ध्रुवोऽस्माकं न त्वस्माकं पराजयः । यदा त्वं युधि पार्थस्य सारथ्यमुपजग्मिवान् ॥ २९ ॥ इत्युक्त्वा धर्मराजस्तु तं रथं हेमभूषितम् । दन्तवर्णैर्हयैर्युक्तं कालवालैर्मनोजवैः ॥ ३० ॥ आस्थाय पुरुषव्याघ्रः स्वबलेनाभिसंवृतः । कृष्णार्जुनाभ्यां वीराभ्यामनुमन्त्र्य ततः प्रियम् । आगतो बहुवृत्तान्तं द्रष्टुमायोधनं तदा ॥ ३१ ॥ आभाषमाणस्तौ वीरावुभौ माधवफाल्गुनौ । ददर्श च रणे कर्णं शयानं पुरुषर्षभम् ॥ ३२ ॥ यथा कदम्बकुसुमं केशरैः सर्वतो वृतम् । चितं शरशतैः कर्णं धर्मराजो ददर्श सः ॥ ३३ ॥ गन्धतैलावसिक्ताभिः काञ्चनीभिः सहस्रशः । दीपिकाभिः कृतोद्द्योतं पश्यते वै वृषं तदा ॥ ३४ ॥ गाण्डीवमुक्तैर्विशिखैः सर्वतः शकलीकृतम् । सपुत्रं निहतं दृष्ट्वा कर्णं राजा युधिष्ठिरः ॥ ३५ ॥ सञ्जातप्रत्ययोऽतीव वीक्ष्य चैवं पुनः पुनः । प्रशशंस नरव्याघ्रावुभौ माधवफाल्गुनौ ॥ ३६ ॥ अद्य राजास्मि गोविन्द पृथिव्यां भ्रातृभिः सह । त्वया नाथेन वीरेण विदुषा परिपालितः ॥ ३७ ॥ हतं श्रुत्वा नरव्याघ्रं राधेयमतिमानिनम् । निराशोऽद्य दुरात्मा स धार्त्तराष्ट्रो भविष्यति ॥ ३८ ॥ जीविताच्चैव राज्याच्च हते कर्णे महारथे । त्वत्प्रसादाद्वयं चैव कृतार्थाः पुरुषर्षभ ॥ ३९ ॥ दिष्ट्या जयति गोविन्द दिष्ट्या शत्रुर्निपातित । दिष्ट्या गाण्डीवधन्वा च विजयी पाण्डुनन्दनः ॥ ४० ॥ त्रयोदश समास्तीर्णा जागरेण सुदुःखिताः । स्वप्स्यामोऽद्य सुखं रात्रौ त्वत्प्रसादान्महाभुज ॥४१॥

एवं स बहुशो राजन् प्रशशंस जनार्द्दनम्। अर्जुनश्चापि राजेन्द्र धर्मराजो युधिष्ठिरः॥ ४२॥

सञ्जय उवाच। दृष्ट्वा च कर्णं निहतं पार्थशायकैः। पुनर्जातमिवात्मानं मेने कुरुकुलोद्वहः॥ ४३॥ समेत्य च महाराज कुन्तीपुत्रं युधिष्ठिरम्। हर्षयन्ति स्म राजानो हर्षयुक्ता महारथाः॥ ४४॥ नकुलः सहदेवश्च पाण्डवश्च वृकोदरः। सात्यकिश्च महाराज वृष्णीनां प्रवरो रथः॥ ४५॥ धृष्टद्युम्नः शिखण्डी च पाण्डुपाञ्चालसृञ्जयाः। पूजयन्ति स्म कौन्तेयं निहते सूतनन्दने॥ ४६॥ ते वर्द्धयित्वा नृपतिं पाण्डुपुत्रं युधिष्ठिरम्। जितकाशिनो लब्धलक्ष्या युद्धशौण्डाः प्रहारिणः॥ ४७॥ स्तुवन्तस्तवयुक्ताभिर्वाग्भिः कृष्णौ परन्तपौ। जग्मुः स्वशिविरायैव मुदायुक्ता महारथाः॥ ४८॥ एवमेष क्षयो वृत्तः सुमहांल्लोमहर्षणः। तव दुर्मन्त्रिते राजंस्तत्त्वं किमनुशोचसि॥ ४९॥

वैशम्पायन उवाच। श्रुत्वैतदप्रियं राजा धृतराष्ट्रो महीपतिः। पपात भूमौ निश्चेष्टः कौरव्यः परमासनात्॥ ५०॥ तथा सा पतिता देवी गान्धारी दीर्घदर्शिनी। शुशोच बहुलालापैः कर्णस्य निधनं युधि॥ ५१॥ तं प्रत्यगृह्णाद्विदुरो नृपतिं सञ्जयस्तथा। पर्य्याश्वासयताञ्चैव तावुभावेव भूमिपम्॥ ५२॥ तथैवोत्थापयामासुर्गान्धारीं कुरुयोषितः॥ ५३॥ स दैवं परमं मत्वा भवितव्यञ्च पार्थिव। परां पीड़ां समाश्रित्य नष्टचित्तो महातपाः॥ ५४॥ चिन्ताशोकपरीतात्मा न जज्ञे मोहपीड़ितः। ताभ्यामाश्वासितो राजा तूष्णीमासीद्विचेतनः॥ ५५॥ इदं महायुद्धमखं महात्मनोर्द्धनञ्जयस्याधिरथेश्च यः पठेत्। स सम्यगिष्टस्य मखस्य यत् फलं तदाप्नुयात् संश्रवणाच्च भारत॥ ५६॥ मखो हि विष्णुर्भगवान् सनातनो वदन्ति तं चाग्न्यनिलेन्दुभानवः। अतोऽनुसूयुः शृणुयात् पठेच्च यः स सर्वलोकानुचरः सुखी

192 90